'निसर्ग०' व्याख्या । एकस्मिन् वृत्ते द्वौ क्वशब्दौ महदन्तरं सूचयतः । हे राजन् ! **भूपतीनां** राज्ञां **चरितम्** आचरणं क्व वर्तते इति शेषः । **जन्तवः** अस्मादृशाः पामरलोकाः क्व वर्तन्ते नोभयं संघट्टत इत्यर्थः। चरितं कथंभूतम् ? **निसर्गदुर्बोधं** स्वभावेन दुर्ग्रहं दुःखेनावगम्यमित्यर्थः । किं० जन्तवः ? **अबोधविक्लवाः** अज्ञान[3]विक्लवाः तथापि यन्मया विद्विषां **नयवर्त्म** नयमार्गो षाड्गुण्यप्रयोगो**ऽवेदि** ज्ञातम् अयं **तवानुभावः** तव प्रसादः किं० नयवर्त्म ? **निगूढतत्त्वं** गुप्तरह[4]स्यम् । अथ समासः । निसर्गेण दुर्बोधं निसर्गदुर्बोधं तत्पुरुषः । न बोधः अबोधः नञ्तत्पुरुषः अबोधेन विक्लवाः अबोधविक्लवाः तत्पुरुषः । भुवः पतयो भूपतयस्तेषां भूपतीनां तत्पुरुषः । भवनं भावः अनुगतो भावः अनुभावः । निगूढं तत्त्वं यस्य यस्मिन् वा तत् निगूढतत्त्वं बहुव्रीहिः । नयस्य वर्त्म नयवर्त्म तत्पुरुषः । इति वृत्तार्थः ॥६॥

संप्रति यद्वक्तव्यं तदाह -

---

१. हितादाप्तजनात् - म. । २. संप्रति स्वाहङ्कारं परिहरति-इत्यवतरणिका - म. । ३. अज्ञानोपहताः- म. । ४. संवृतयाथार्थ्यम् -म. ।

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥७॥

'विश०' व्याख्या । हे नृप ! **सुयोधनो** दुर्योधनः **नयेन** नीतिमार्गेण **जगतीं** पृथ्वीं **जेतुं** स्ववशीकर्तुं **समीहते** वाञ्छति न नू(तू)दासीनो भवतीति भावः । किं० सुयोधनः ? **नृपासनस्थः** सिंहासनस्थोऽपि **भवतः** त्वत्सकाशात् **पराभवम्** उपद्रवं **विशङ्कमानः** आशङ्कमानः उत्प्रेक्षमाण इत्यर्थः । बलवत्प्रभुकम् अपवित्रागमनं च द्रव्यं भुञ्जानस्य पुंसः कुतश्चित्तप्रसत्तिरिति भावः । किं० भवतः ? **वनाधिवासिनः** वनस्थायिनः राज्यभ्रष्टादित्यर्थः । किं० जगतीम् ? **दुरोदरच्छद्मजितां** द्यूतक्रीडामिषेणात्म-वशीकृतां दुर्नयलब्धामित्यर्थः। अथ समासः । विशेषेण शङ्कत इति विशङ्कमानः । नृपस्यासनं नृपासनं इति नृपासने तिष्ठतीति नृपासनस्थः तत्पुरुषः । सुखेन युध्यत इति सुयोधनः । 'इषदुस्सुषल्यू' इति इत्यनेन सूत्रेण युप्रत्ययः पश्चात् 'युष्वोरनाकौ' इत्यनेन यु इत्यस्य अनादेशः तदनु प्रथमैकवचनं सि । इति वृत्तार्थः ॥७॥

नयेन जेतुं जगतीं समीहत इत्युक्तम् । तत्प्रकारमेवाह -

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः ।
समुन्नयन् भूतिमनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः ॥८॥

'तथा०' व्याख्या । हे राजन् ! **तथापि** साशङ्कोऽपि सुयोधनो **जिह्मो** वक्रः सन् **भवज्जिगीषया** गुणैः भवन्तमाक्रमयितुमिच्छया **गुणसंपदा** गुणबाहुल्येन **शुभ्रमुज्ज्वलं** **यशः तनोति** विस्तारयति यतः- दानपुण्यफला कीर्तिः पराक्रमान्वितं यशः । एकदिग्व्यापिनी कीर्तिः सर्वदिग्गामुकं यश इति ॥८॥

स खलु दुर्जनो गुणलोभनीयां भवत्संपदं स्वायत्तीकर्तुं भवतोऽपि गुणवत्तामात्मनः प्रकटी-करोतीत्यर्थः । स सुयोधनः किंकुर्वन् ? **भूतिम्** ऋद्धिं **समुन्नयन्** वर्धयन् उत्कर्षं संपादयन्नित्यर्थः । यतः **अनार्यसंगमात् महात्मभिः** सज्जनैः **समं** सार्धं **विरोधोऽपि** क्लेशोऽपि **वरं** किञ्चिदिष्टं 'वरं तु घुसृणे किञ्चिदिष्टे' इति *हैमानेकार्थः* [२-४४०] । अथ समासः । जेतुमिच्छा जिगीषा भवतो जिगीषा भवज्जिगीषा तया भवज्जिगीषया। गुणस्य संपत् गुणसंपत् तया गुणसंपदा । न आर्यः अनार्यः अनार्यस्य संगमः अनार्यसंगम[:] उभयथापि तत्पुरुषः तस्मात् अ० । महान् आत्मा येषां ते महात्मनस्तैर्महात्मभिः । इति वृतार्थः ॥८॥

ननु 'कातर्यं केवला नीतिः शौर्यं श्वापदचेष्टितम्' (९) । इत्याशङ्क्य नीतियुक्तं पौरुषमस्यास्त्येवेत्या-शयेनाह -

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥९॥

'कृता०' व्याख्या । हे नृप ! **तेन** सुयोधनेन **नयेन** नीतिमार्गेण कृत्वा **पौरुषं** पराक्रमो **वितन्यते**

१. अत्र 'दुरोदरच्छद्मजिताम्' इति विशेषणद्वारा पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासात् काव्यलिङ्गमलंकारः- म. । २. एतद्विशेषणं म. मध्ये विरोधशब्दस्य ।

विस्तार्यते इति क्रियाकारकसंयोजना । तेन कथंभूतेन ? **नक्तन्दिवं** रात्रिंदिवम् अहर्निशमित्यर्थः । **विभज्य** अस्यां वेलायामिदं कार्यं कार्यम् इति विभागं कृत्वा **अस्ततन्द्रिणा** गतालस्येन अनलसेनेत्यर्थः । यतः- अलसोऽनुपायवेदी भाग्यैरत्यन्तमुज्झितो यश्च । सीदति पुरुषत्रितयं केवलमिह जगति बहुरत्ने ॥१०॥ इति

पुनस्तेन कथंभूतेन ? 'कृतारिषड्वर्गजयेन' **कृतो** निष्पादितो**ऽरिषड्वर्गाणां** कामक्रोधलोभ-मानमदहर्षाणाम् अन्तरङ्गवैरिणां **जयो** येन पुनस्तेन कथंभूतेन ? **मानवीं** मनुराजेनोपदिष्टां मनुराजसंबन्धिनीं [वा] **पदवीं** प्रजापालनपद्धतिं **प्रपित्सुना** प्राप्तुकामेन किं० पदवीम् ? **अगम्यरूपाम्** अन्यैर्नृपैः प्राप्तुमशक्यरूपाम् । अथ समासः । षण्णां वर्गः षड्वर्गः अरीणां षड्वर्गः अरिषड्वर्गः शिवभागवतवत् अरिषड्वर्गस्य जयोऽरिषड्वर्गजयः स्थानत्रयेऽपि तत्पुरुषः कृतोऽरिषड्वर्गजयो येन स कृतारिषड्वर्गजयस्तेन कृ० बहुव्रीहिः । मनोरियं मानवी अत्र 'देवतेदमर्थे' इत्यनेन सूत्रेण अण् प्रत्ययः तां मानवीम् । गन्तुं योग्यं गम्यं न गम्यम् अगम्यम् अगम्यं रूपं यस्याः सा अगम्यरूपा ताम् अगम्यरूपां बहुव्रीहिः । प्रपत्तुमिच्छति प्रपित्सति प्रपित्सतीति प्रपित्सुस्तेन प्रपित्सुना 'पद् गतौ' इत्यस्य धातोः सप्रत्यये प्रयोगः । अस्ता तन्द्रिस्तन्द्रिणो वा येन स अस्ततन्द्रिः अस्ततन्द्री वा तेन अ० । पुरुषस्य कर्म पौरुषं कर्मणि अण् । इति वृत्तार्थः ॥९॥

अधुना भृत्यानुरागमाह -

सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥१०॥

'सखी०' व्याख्या । हे नृप ! **स** राजा सुयोधनः **अनुजीविनः** सेवकान् **सखीनिव** मित्राणीव **दर्शयते** विलोकयते अत्र 'अणिकर्मणिकर्तृणिगोस्मृतौ' इत्यात्मनेपदम् अस्य सेवकान् जना सुहृदो जानत इति भावः । किं० अनुजीविनः ? **प्रीतियुजः** प्रीतियुक्तान् **च** पुनः **सुहृदो** मित्राणि **बन्धुभिः** बान्धवप्रमुखैः **समानमानान्** तुल्यसंस्कारान् दर्शयते । पुनः सुयोधनः **सन्ततं** निरन्तरं **साधु** सम्यक् अकपटं यथा भवति तथा **बन्धुतां** बन्धुसमूहं **कृताधिपत्यां** कृतप्रभुतामिव दर्शयते, बन्धून् अधिपतीनिव दर्शयत इति भावः । स किं० ? **गतस्मयो** गतगर्वः । अथ समासः । प्रीतिं युजन्तीति प्रीतियुजः । समानो मानो येषां ते समानमानास्तान् समानमानान् । शोभनं हृत् हृदयं येषां ते सुहृदः तान् सुहृदः । गतः स्मयो यस्मात्स गतस्मयः । अधिकं पतिः अधिपतिः अधिपतेर्भावः कर्म वा आधिपत्यं कृतमाधिपत्यं यस्याः सा कृताधिपत्या तां कृ० । बन्धूनां समूहो बन्धुता तां बन्धुताम् । इति वृत्तार्थः ॥१०॥

न चायं त्रिवर्गात् प्रमाद्यतीत्याह -

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम् ॥११॥

'असक्त०' व्याख्या । हे राजन् ! **अस्य** दुर्योधनस्य **त्रिगणो** धर्मार्थकामसमुदायः **परस्परम्** अन्योन्यं **न बाधते** न पीडयति न धर्मोऽर्थकामौ बाधते, नार्थो धर्मकामौ बाधते, नापि कामो धर्मार्थौ

यथायोग्यं निरन्तरं विभागीकृत्य यदा यस्यैव कालो निर्दिष्टस्तदा तत्तुल्यानुरागेण सेवमानस्यास्य धर्मार्थकामा[:]- अन्योन्यानु(यमु)पमर्दने न वर्तन्त इति भावः । यदुक्तं- 'धर्मार्थकामा सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः' इति (११) । किंलक्षणस्त्रिगणः ? **सख्यं** मैत्र्यम् **इयिवान्** प्राप्तवान् इयाय इत्यर्थः । उत्प्रेक्षते **गुणानुरागात्** गुणस्नेहात् गुणवदाश्रयलोभात् इवेत्यर्थः । अस्य किंकुर्वतः ? **असक्तम**नासक्तं अव्यसनितयेति यावत् । **यथायथं** यथायोग्यं **विभज्य** विभागीकृत्य **भक्त्या** अनुरागेण **आराधयतो** भजतः भक्त्या कथंभूतया ? **समपक्षपातया** तुल्यानुरागया । अथ समासः । आराधयतीति आराधयन् तस्य आ० । पक्षे पातः पक्षपातः समः पक्षपातो यस्याः सा समपक्षपाता तया सम० । गुणस्य अनुरागः गुणानुरागः तस्माद्गु० । सख्युर्भावः सख्यं तत् सख्यम् । त्रयाणां गणस्त्रिगणः । परश्च परश्च परस्परम् । इति वृत्तार्थः ॥११॥

अथ श्लोकत्रयेणोपायकौशलं दर्शयन्नादौ सामदाने दर्शयति -

निरत्ययं साम न दानवर्जितं न भूरिदानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥१२॥

'निर०' व्याख्या । हे नृप ! **तस्य** सुयोधनस्य **निरत्ययं** निर्बाधं प्रतिबन्धरहितं **साम** मनोहरवचनं सामयिकमुपाय[1] इत्यर्थः । **दानवर्जितं** दानरहितं **न प्रवर्तते** अन्यथा लुब्धाद्यावर्जनं दानं विना सूक्तप्रियवचनेन कर्तुमसुकरमिति भावः । उक्तं च-

लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्मणा । मूर्खं छन्दोनुरोधेन तत्त्वार्थेन च पण्डितम् ॥१२॥ इति

तस्य **भूरिदानं** प्रचुरदानं **सत्क्रियां** सत्कारं **विरहय्य** विहाय न प्रवर्तते । कस्मादनादरे दानवैफल्यात् न चैवं सर्वत्र येनाविवेकित्वं कोशहानिश्च स्यादित्याह-तस्य सुयोधनस्य **विशेषशालिनी** गुणातिशयेन शोभमाना **सत्क्रिया** सत्कारो गुणानुरोधेन विना गुणानुरागेण विना न प्रवर्तते । गुणेष्वेव आदरो भूरिदानं चेति नोक्तदोषावकाश[2] इत्यर्थः । अथ समासः । निर्गतोऽत्ययो अस्मात् तत् निरत्ययम् । दानेन वर्जितं दानवर्जितम् । भूरि च तत् दानं च भूरिदानम् । सती चासौ क्रिया च सत्क्रिया तां सत्क्रियाम् । विशेषेषु शालते शोभत इत्येवंशीला विशेषशालिनी । गुणस्यानुरोधः गुणानुरोधः तेन गु० । सती चासौ क्रिया च सत्क्रिया । इति वृत्तार्थः ॥१२॥

अथ दण्डप्रकारमाह -

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्म्मविप्लवम् ॥१३॥

'वसू०' व्याख्या । हे नृप ! सुयोधनः **दण्डेन** दमेन शिक्षया च **रिपौ** शत्रौ **वा** अथवा **सुते** पुत्रे स्थितमिति शेषः । **धर्मविप्लवं** धर्मविनाशं पापं वा **निहन्ति** स्फेटयति इति अनेन अस्य शत्रौ सुते

१. अमायिकम् -म. २. अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यलंकारः -म. ।

च समदर्शित्वमुक्तम् । कथंभूतेन दण्डेन ? **गुरूपदिष्टेन** नीतिशास्त्राध्याप[के]नाचार्येण दर्शितेन स कथंभूतः ? **इति** कारणात् **मन्युना** कोपेन सह **निवृत्तकारणः** निवृत्तं कारणं लोभादिनिमित्तं यस्य स निवृत्तकारणः । इतीति किम् ? यदेवाऽसौ **स्वधर्मो** निजधर्मः स्वस्य राज्ञः ममायं धर्म्मः ममेदं कर्तव्यमित्यस्मादेव हेतोरित्यर्थः । **न वसूनि** धनानि वाञ्छन् इति **न** द्वौ नञौ प्रकृत्यर्थं सूचयतः, अपितु वाञ्छन्नेव । पुनः कथंभूतः स ? **वशी** जितेन्द्रियः । अथ समासः । निवृत्तं कारणं यस्य स निवृत्तकारणः । गुरुणा उपदिष्टः गुरूपदिष्टस्तेन गु० । धर्मस्य विप्लवः धर्मविप्लवः तं ध० । इति वृत्तार्थः ॥१३॥

संप्रति भेदकौशल्यं दर्शयति -

विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति संपदः ॥१४॥

'विधा०' व्याख्या । हे नृप ! सुयोधनः त्वद्भयात् **शङ्कितः** सन् साशङ्कोऽपि सन् **अशङ्किताकारम्** शङ्कारहितस्यैवाकारम् **उपैति** भजते किंकृत्वा ? **परितः** सर्वत्र मण्डले देशे **परेतरान्** स्वकीयान् **रक्षान्** अङ्गरक्षकान् **विधाय** कृत्वा नियुज्येत्यर्थः । **अस्य** सुयोधनस्य **संपदो** विभूतयः **कृतज्ञताम्** उपकारज्ञत्वं **वदन्ति** कथयन्ति प्रीतिदानैरेवास्य कृतज्ञत्वं प्रकाश्यते न तु वाङ्मात्रेणेत्यर्थः । कृतज्ञे राजनि अनुजीविनो रज्यन्ति अनुरक्ताश्च तं राजानं रक्षन्तीति भावः । किं० संपदः ? **क्रियापवर्गेषु** कार्यावसानेषु कार्यसमाप्तिं यावत् यतः 'अपवर्गस्त्यागमोक्षयोः क्रियावसाने साफल्येऽपि' इति *हैमानेकार्थः* [४-४६] । **अनुजीविसात्कृताः** सेवकायत्तीकृताः सेवकेभ्यो दत्ता इत्यर्थः । अथ समासः । परेभ्य इतराः परेतरास्तान् परेतरान् । शङ्कितस्य आकारः शङ्किताकारः न शङ्किताकारः अशङ्किताकारस्तम् अ० । शङ्का जाता अस्येति शङ्कितः । क्रियाया[:] अपवर्गाः क्रियापवर्गास्तेषु क्रि० । अनुजीव्यधीना[:] अनुजीविसात्कृताः कृतं जानातीति कृतज्ञः कृतज्ञस्य भावः कृतज्ञता तां कृ० । इति वृत्तार्थः ॥१४॥

अथोपायप्रयोगस्य फलवत्तां दर्शयति -

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य संघर्षमिवार्थसंपदः ॥१५॥

'अना०' व्याख्या । हे नृप ! अस्य सुयोधनस्य **उपायाः** साम १ दण्ड २ भेद ३ उपप्रदाना-४ ख्याश्चत्वार उपायाः तत्र परस्परोपकारप्रदर्शनगुणो कीर्तनादिना शत्रोरात्मवशीकरणं साम १, तथावबन्ध-परिक्लेशधनहरणादिको दण्डः २, विदितगीतशत्रुपरिवर्गस्य स्वाम्यादिस्नेहापनयनादिको भेदः ३, गृहीतधनप्रतिदानादिकमुपप्रदानमिति ४ । ज्ञाता वृत्तौ **अर्थसंपदः** अर्थसमृद्धयः **फलन्ति** प्रसुवते किंकृत्वा ? उत्प्रेक्ष्यते **संह(घ)र्षं** परस्परं स्पर्धा**मुपेत्य** प्राप्येव 'संह(घ)र्षस्तु स्पर्धा' इति *हेमनाममालायाम्* । किं० उपायाः ? **अनारतं** निरन्तरं **तेन** सुयोधनेन **सम्यक्** सम्यक्प्रकारेण **विनियोगसत्क्रियाः** व्यापार-

१. यद्वा परानितरयन्ति भेदेनात्मसात्कुर्वन्तीति म. मध्ये अपरोऽर्थः । २. मन्त्रगुप्तिसमर्थानित्यर्थः - म. ।

सत्कारान् **विभज्य** विभागीकृत्य **पदेषु** कृत्यवस्तुषु **लम्भिता** युक्ताः स्थापिताः स्थानेषु सम्यक्प्रयुक्ता इत्यर्थः । किं० अर्थसंपदः ? **परिवृं(बृं)हितायती:** वर्धमानोत्तरकाला: स्थिरा इत्यर्थः । अथ समासः । सत्यश्च ताः क्रियाश्च सत्क्रियाः कर्मधारयः । विनियोग एव सत्क्रियाः विनियोगसत्क्रियाः । परिबृंहिता आयतिर्यासु ताः परिबृंहितायतयः ताः परिबृंहितायतीः । अर्थस्य संपदः अर्थसंपदः । इति वृत्तार्थः ॥१५॥

[१]अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥१६॥

'अने०' व्याख्या । हे नृप ! **नृपोपायनदन्तिनां** नृपढौकनीकृतगजानां **मदो** दानवारि **भृशम्** अत्यर्थं **तदीयं** सुयोधनसंबन्धि **आस्थाननिकेतनाजिरं** सभामण्डपाङ्गणम् **आर्द्रतां** सजलतां **नयति** पङ्किलत्वं प्रापयतीत्यर्थः । 'णीन् प्रापणे' धातुर्द्विकर्मकोऽयम् एतेन महा[२]समृद्धिरस्योक्ता । गजान्ता लक्ष्मीरिति । मदः कथंभूतः ? **अयुग्मच्छदगन्धिः** सप्तपर्णवृक्षकुसुमतुल्यगन्धिः कथंभूतमास्थाननिकेतनाजिरम् ? **अनेकराजन्यरथाश्वसंकुलं** असङ्ख्यक्षत्रियरथाश्वव्याप्तम् । अथ समासः । राज्ञामपत्यानि पुमांसो राजन्याः न एके अनेके अनेके च ते राजन्याश्च अनेकराजन्याः रथाश्च अश्वाश्च रथाश्वं समाहारद्वन्द्वः एकवद्भावो वा समाहारे वक्तव्यः अनेकराजन्यानां रथाश्वम् अनेकराजन्यरथाश्वं तेन संकुलम् अनेकराजन्यरथाश्वसंकुलम् । तस्य इदं तदीयम् इदमर्थे णीसः । अस्मिन्नास्थीयते इत्यास्थानम् आस्थानस्य निकेतनम् आस्थाननिकेतनम् आस्थाननिकेतनस्य अजिरम् आस्थाननिकेतनाजिरं तत् आस्था० । न विद्यन्ते युग्मानि छदानि यस्य स अयुग्मछदः अयुग्मच्छदस्य गन्ध इव गन्धो यस्य स अयुग्मछदगन्धिः अत्र गन्धादेरिः । आर्द्रस्य भाव आर्द्रता ताम् आ० । नृपाणाम् उपायनानि नृपोपायनानि नृपोपायनानां दन्तिना(नः) नृपोपायनदन्तिनस्तेषां नृ० । इति वृत्तार्थः ॥१६॥

संप्रति जनपदक्षेमकरत्वमाह -

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसंपदः ।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥१७॥

'सुखे०' व्याख्या । हे नृप ! **कुरवो** देशविशेषाः **चकासति** शोभन्ते क्व सति **तस्मिन्** राज्ञि सुयोधने **चिराय** चिरकालं क्षेमं प्राप्तरक्षणं 'क्षेमस्तु मङ्गले लब्धरक्षणे मोक्षे च' इति *हैमानेकार्थः* । [१-८६] । **वितन्वति** कुर्वति सति किंलक्षणाः कुरवः ? **सस्यसंपदो** धान्यसमृद्धी**र्दधतो** धारयन्तः किं० सस्यसंपदः ? **कृषीब(व)लैः** कौट(टु)म्बिकैः **सुखेन** अक्लेशेन **लभ्याः** प्राप्याः पुनः किं० सस्यसंपदः ? उत्प्रेक्ष्यते **अकृष्टपच्याः** अनुप्तपच्या **इव** अत एव सुखेन लभ्याः संपन्नदेशत्वात् असंतापकरत्वात् च दुःसाध्योऽयमिति भावः । किं० कुरवः ? **अदेवमातृकाः** नद्यम्बुजीविनः नदीमातृका इत्यर्थः । वृष्ट्यम्बुजीविनो देशाः ते न भवन्तीति भावः । तेनास्य कुल्यादिपूर्तधर्मप्रवर्तकत्वमुक्तम् । 'कुल्याल्पाकृत्रिमा सरित्' । अथ समासः । कृषिर्येषामस्तीति कृषीब(व)लाः तैः कृषीब(व)लैः कृष्यादिना ब(व)लच् प्रत्ययः ब(व)ल

१. अर्थसंपदमेवाह-इत्यवतरणिका -म. । २. अत एवोदात्तालंकारः -म. ।

इति दीर्घः कृषीब(व)लैरिति सिद्धिः । कृष्टे हलेन कृष्टे प्रदेशे पच्यन्त इति कृष्टपच्याः न कृष्टपच्याः अकृष्टपच्याः। सस्यानां संपदः सस्यसंपदः । देव एव माता येषां ते देवमातृकाः न देवमातृकाः अदेवमातृकाः । इति वृत्तार्थः ॥१७॥

नन्वेवं जनपदानुवर्तिनः कथमर्थलाभोऽत आह -

उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ॥१८॥

'उदा०' व्याख्या । हे नृप ! **अस्य** सुयोधनस्य **मेदिनी** पृथ्वी **वसूनि** द्रव्याणि **स्वयं** स्वयमेव **प्रदुग्धे** प्रसूते किं० मेदिनी ? काकाक्षिगोलकन्यायेन एकपदमेवमुभयत्रापि संबध्यते अस्येति पदं पुनरपि योज्यते । **अस्य** राज्ञः **गुणैः** क्षमाशौर्यौदार्यगाम्भीर्यादिभि**रुपस्नुता** द्राविता मेदिनी वसूनि प्रदुग्धे अक्लेशेन दुह्यते इत्यर्थः । दुहेः कर्मकर्तरि लट् यथा केनचित् पण्डितेन वर्धिता रक्षिता च गौः स्वयं प्रदुग्धे तद्वदिति भावः । किं० अस्य ? **उदारकीर्तेः** महायशसः पुनः किं० अस्य ? **दयावतो** दयासहितस्य परपीडाहरणेच्छोरित्यर्थः । पुनः किं० अस्य ? **अभिरक्षया** सर्वरक्षणेन **उदयम**भ्युदयं **दिशतो** ददतः संपादयतः इत्यर्थः । किंलक्षणमुदयम् ? **प्रशान्तबाधं** प्रशमितोपद्रवं किं० अस्य ? **वसूपमानस्य** 'द्रोणः १. प्राणो २. ध्रुवो ३. ऽर्को ४. ऽग्नि ५. र्दोषो ६. वसु ७. वि(र्वि)भा(भा)वसुः' ८. (१३) इत्यष्टौ वसवस्तेषामुपमानं यस्य अथवा धनदोपमस्य कुबेरसदृशस्येत्यर्थः । अथ समासः । उदारा कीर्तिर्यस्य स उदारकीर्तिः तस्य उदारकीर्तेः । दया अस्यास्ति इति दयावान् तस्य दयावतः । प्रशान्ता बाधा यत्र तत् प्रशान्तबाधम् । अभि समन्तात् रक्षा अभिरक्षा तया अ० । वसूनामुपमानं यस्य स वसूपमानः तस्य व० । इति वृत्तार्थः ॥१८॥

वीरभटानुकूल्यमाह -

महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भेदवृत्तयः प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥१९॥

'महौ०' व्याख्या । हे राजन् ! **धनुर्भृतो** धनुर्धराः राजानः अन्ये वा धनुष्मन्तः **तस्य** सुयोधनस्य **असुभिः** प्राणैः कृत्वा **प्रियाणि** वल्लभानि **समीहितुं** कर्तुं **वाञ्छन्ति** अभिलषन्ति एतत्कृतसत्कारानृण्यार्थे प्राणानपि दातुं वाञ्छन्तीति भावः । कथंभूता धनुर्भृतः ? **महौजसः** महाबलाः दुर्बलानां तु तेषामनुपकारकत्वात् । पुनः कथंभूता धनुर्भृतः ? **मानधनाः** जातिधनकुलैश्वर्यबलरूपादिमदसहिताः अन्यथा कदाचित् बलदर्पाद्विकुर्वीरन्निति भावः । पुनः कथंभूताः धनु० ? **संयति** संग्रामे **लब्धकीर्तयः** लब्धयशसः बहुसद्गुणा[:] इत्यर्थः । अन्यथा कदाचिन्मोहं गच्छेयुरिति भावः । पुनः कथंभूता धनु० ? **न संहता**[:] नैकत्र मिलिताः न स्वार्थनिष्ठा[:] भवन्तीत्यर्थः । पुनः किंविशिष्टा धनुर्भृतः ? **न**

१. अलंकारस्तु-'विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः'- इति सर्वस्वकारः । अत्र प्रतीयमानया गवा सह प्रकृताङ्गया मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशाद्दोह्यत्वेनोक्तिरिति संक्षेपः -म. ।

भेदवृत्तयः न द्रोहकारकाः[1] । अथ समासः । महदोजो येषां ते महौजसो बहुव्रीहिः । मान एव धनं येषां ते मानधनाः बहुव्रीहिः । धनैरर्चिताः धनार्चिताः तृतीयातत्पुरुषः । धनूंषि बिभ्रतीति धनुर्भृतः । लब्धाः कीर्तयो यैस्ते लब्धकीर्तयः बहुव्रीहिः । भेदे वृत्तयो येषां ते भेदवृत्तयः । इति वृत्तार्थः ॥१९॥

स्वराष्ट्रवत्परराष्ट्रवृत्तान्तमपि वेत्तीत्याह -

महीभृतां सच्चरितैश्चरैः क्रियाः स वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥२०॥

'मही०' व्याख्या । हे युधिष्ठिर ! **स** राजा सुयोधनः **चरैः** सेवकैः कृत्वा **महीभृतां** राज्ञाम् अहि १ मित्र २ मध्यमो ३ दान्त ४ पार्ष्णिग्राह्यादीनां **निःशेषं** यथा स्यात्तथा **क्रियाः** प्रारम्भलक्षणकर्तव्यानि **वेद** जानाति कथंभूतैः चरैः ? **सच्चरितैः** उत्तमचरितैः स कथंभूतः ? **अशेषितक्रियः** [2]समापितसकलकर्तव्यः स्वरहस्यं न कश्चिद्वेद इत्याह **तस्य** सुयोधनस्य **ईहितं** चेष्टितं **फलैः** कार्यसिद्धिभिः कृत्वा **प्रतीयते** ज्ञायते पुनः कथंभूतैः फलैः ? **हितानुबन्धिभिः** हितकारकैः **महोदयैः** हितानुबन्धिभिः एते द्वे अपि विशेषणे चराणामपि । कस्य इव ? **धातु**र्ब्रह्मण **इव** यथा धातुर्देवस्य **ईहितं** चिकीर्षितं फलैरेव ज्ञायते । अथ समासः । महीं बिभ्रतीति महीभृतस्तेषां महीभृताम् । सच्चरितं येषां ते सच्चरिताः तैः स० । चरन्तीति चरास्तैश्चरैः । निर्गतः शेषो यत्र तत् निःशेषम् । न शेषिताः अशेषिताः अशेषिताः क्रिया येन स अशेषितक्रियः । महानुदयो येषां ते महोदयास्तैर्म० । यद्वा फलविशेषणे महानुदयो येषां तानि महोदयानि तैर्म० । चरविशेषणे हितम् अनुबध्नन्तीत्येवंशीला हितानुबन्धिनस्तैर्हिता० । यद्वा फलविशेषणे हितम् अनुबध्नन्तीत्येवंशीलानि हितानुबन्धीनि तैर्हि० । इति वृत्तार्थः ॥२०॥ मित्रबलमाह -

न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥२१॥

'न तेन०' व्याख्या । हे राजन् ! **तेन** सुयोधनेन **क्वचित्** कस्मिंश्चिदपि नृपादौ **धनु**श्चापं **नोद्यतम्** ऊर्ध्वं न कृतं किं० धनुः ? **सज्यं** समौर्वीकं **वा** अथवा तेन सुयोधनेन **आननं** मुखं कस्मिन्नपि विषये **कोपविजिह्मं** क्रोधेन वक्रं **न कृतं** न विहितं यस्य कोप एव नोदेति कुतस्तस्य युद्धवार्ता इति । तर्हि आज्ञां कथं कारयति इत्याह- **नराधिपैः** नृपैः अस्य सुयोधनस्य **शासनम्** आज्ञा **माल्यमिव** स्रगिव **शिरोभि**र्मस्तकै**रुह्यते** धार्यते केन ? **गुणानुरागेण** दयादाक्षिण्यादिगुणेन माल्यपक्षे गुणानुरागेण सूत्रानुषङ्गेन सौरभ्यगुणलोभेन वा । अथ समासः । सह ज्यया वर्तते तत् सज्यम् । कोपेन विजिह्मं कोपविजिह्मम् । गुणस्यानुरागः गुणानुरागः तेन गु० । नराणां नरेषु वा अधिपा नराधिपास्तैर्न० स्वामित्वे षष्ठीसप्तम्यौ । इति वृत्तार्थः[3] ॥२१॥

१. अत्र महौजसादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात्काव्यलिङ्गमलंकारः । तथा साभिप्रायविशेषणत्वात्परिकरालंकारः इति द्वयोस्तिलतण्डुलवद्विभक्ततया स्फुरणात्संसृष्टिः -म. । २. आफलोदयकर्मेत्यर्थः -म. । ३. अत्रोपमा स्फुटैव - म. ।

संप्रति अस्य धार्मिकत्वमाह -

स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥२२॥

'स यौ०' व्याख्या । हे राजन् ! **स** राजा सुयोधनः **पुरोधसा** पुरोहितेन **अनुमतः** प्रेरितः सन् **हव्येन** होतव्यद्रव्येण **हिरण्यरेतसम्** अग्निं **धिनोति** प्रीणाति किंकृत्वा ? **दुःशासनं** लघुभ्रातरं **यौवराज्ये** युवराजकर्मणि **निधाय** स्थापयित्वा किं० दुःशासनम् ? **नवयौवनोद्धतं** नूतनतारुण्योत्कटं[1] स किं० ? **इद्धशासन[:]** दीप्ताज्ञः अप्रतिहताज्ञः इत्यर्थः । पुनः किं० सुयोधनः ? **मखेषु** यागेषु **अखिन्नो**ऽनलसः । अथ समासः । युवा चासौ राजा च युवराजः युवराजस्य कर्म यौवराज्यम् । यूनो भावो यौवनं नवं च तत् यौवनं च नवयौवनं नवयौवनेन उद्धतः नवयौवनोद्धतस्तं न० । दुःखेन शास्यत इति दुःशासनः तं दुःशासनम् । इद्धं शासनं यस्य स इद्धशासनः । न खिन्नः अखिन्नः । हिरण्यमेव रेतो यस्मिन् स हिरण्यरेताः तं हि० । इति वृत्तार्थः ॥२२॥

न चैतावता निरुद्योगैर्भाव्यम् इत्याशङ्क्याशां दर्शयति -

प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधता ॥२३॥

'प्रली०' व्याख्या । हे युधिष्ठिर ! **स** राजा **त्वदेष्यतीः** त्वदागमिष्यतीः त्वत्तः आगामिनीरित्यर्थः । **भियो** भयानि **चिन्तयति[एव]** आलोचयत्येव त्वत्तो भयमाशङ्कत इत्यर्थः । एवकारो निश्चयार्थः । स किंकुर्वन्? **आवारिधि** आसमुद्रं **भुवो मण्डलं** भूतलं **प्रशासद्** आज्ञया पालयन्नपि किं० भुवो मण्डलम्? 'प्रलीनभूपालं' **प्रलीना** नष्टा **भूपाला** शत्रुराजानो यस्मिन् तत् निःसपत्नमित्यर्थः । पुनः किं० भुवो मण्डलम्? अत एव **स्थिरायति** चिरस्थायि **अहो** इति आश्चर्ये **बलवद्विरोधता** बलवद्भिः सह विरोधता विरोधत्वं **दुरन्ता** विषमावसाना । अथ समासः । प्रलीना भूपाला यत्र तत् प्रलीनभूपालम् । स्थिरायतिर्यत्र तत् स्थिरायति । वारिधिम् आ - मर्यादीकृत्य आवार(रि)धि । एष्यन्तीति एष्यन्त्यः त्वत्तः एष्यन्त्यः त्वदेष्यन्त्यस्ताः त्वदेष्यतीः । दुर् दुःखेन अन्तो यस्याः सा दुरन्ता । बलं विद्यते येषां ते बलवन्तः विरोधस्य भावो विरोधता [बलवद्भिः विरोधता बल०]। इति वृत्तार्थः ॥२३॥

ननु गूढाकारेङ्गितस्य भयं त्वया कथं निरधारीत्यत आह -

कथाप्रसङ्गेन जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद्व्यथते नताननः स दुःसहान्मन्त्रपदादिवोरगः ॥२४॥

'कथा०' व्याख्या । हे नृप ! **स** सुयोधनः **तवाभिधानात्** भवन्नाम्नः **व्यथते** दुःखायते दुःखी

---

१. प्रगल्भं धुरन्धरमित्यर्थः -म. ।

भवतीत्यर्थः । स कथंभूतः ? अत एव **नताननो** नम्रमुखः किं० तवाभिधानात् ? 'कथाप्रसङ्गेन जनैरुदाहृतात्' **कथा** गोष्ठिः तद्वशेन **जनैर्लोकैः उदाहृतात्** उच्चरितात् पुनः किंलक्षणात्तवाभिधानात् ? **दुःसहात्** सोढुमशक्यत्वात् स किं० ? 'अनुस्मृताखण्डलसूनुविक्रमः' **अनुस्मृतः** स्मरणविषयीकृतः **आखण्डलसूनो**रर्जुनस्य **विक्रमः** पराक्रमः येन स[ः] । क इव ? उरग **इव** यथा **उरगः** भुजङ्गो **मन्त्रपदात्** मन्त्रोच्चारात् **व्यथते** पीडां प्राप्नोति कथंभूतात् मन्त्रपदात् ? 'कथाप्रसङ्गेन जनैरुदाहृतात्' **कथाप्रसङ्गेन** विषवैद्येन **जनैः उदाहृतात्** उदीरितात् 'कथाप्रसंगो वातूले विषस्य च चिकित्सके' इति *हैमानेकार्थः* [५-१०] । 'सर्वत्र जयमन्विच्छन् पुत्रादिच्छेत् पराजयमिति' (१४) न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति । यद्वा कथाप्रसङ्गे विषवैद्ये इनाश्चतुरा ये जनास्तैरुच्चारितात् । पुनः किं० मन्त्रपदात् ? **तवाभिधानात्** नामैकदेशे नाममात्रग्रहणमिति न्यायात् तस्तार्क्ष्यो वो वासुकिस्तयोरभिधानं तस्मात् तवाभिधानात्। पुनः किं० मन्त्रपदात् ? **दुःसहात्** दुःखकारित्वात् किं० उरगः ? 'अनुस्मृताखण्डलसूनुविक्रमः' **अनुस्मृतः** स्मरणविषयीकृतः **आखण्डलस्य** शक्रस्य **सूनु**र्लघुभ्राता 'सूनुः पुत्रेऽनुजे रवौ' इति *हैमानेकार्थः* [२-२८६] । कृष्ण इत्यर्थः । तस्य विः पक्षी अर्थात् गरुडः तस्य क्रमः पादनिक्षेपो महिमा वा येन सः । पुनः किं० उरगः ? अत एव नताननः सन् व्यथामेति प्राप्नोतीति तात्पर्यः । अथ समासः । भिन्नपदेन कथाप्रसङ्गशब्दस्य समासः क्रियते - कथायाः प्रसङ्गः कथाप्रसङ्गस्तेन क० । आखण्डलस्य सूनुः आखण्डलसूनुः आखण्डलसूनोः विक्रमः आ० अनुस्मृतः आखण्डलसूनुविक्रमो येन सः अ० । नतमाननं यस्य स नताननः । दुःखेन सह्यते इति दुःसहं तस्मात् दुःसहात्। मन्त्रस्य पदं मन्त्रपदं तस्मात् म० । उरसा हृदयेन गच्छतीति उरगः। इति वृत्तार्थः ॥२४॥

निगमयति -

तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि तन्वतां प्रवृत्तिसाराः खलु मादृशां धियः ॥२५॥

तदा० व्याख्या । हे युधिष्ठिर ! **तत्** तस्मात्कारणात् रिपौ सुयोधने **विधेयं** करणीयम् **उत्तरं** प्रतिकाररूपं प्रतिवचः **आशु** शीघ्रं **विधीयतां** क्रियतां प्रत्युत्तरदाने विलम्बो न कर्तव्य इत्यर्थः । **तत्र** कथंभूते रिपौ ? **त्वयिजिह्मं** कपटं **कर्तुमुद्यते** त्वां जिघांसावित्यर्थः । 'जिह्मः कुटिले मन्दे च' इति *हैमानेकार्थः* [२-३१७] । ननु कर्तव्यं त्वमेव कथं न कथयसीत्याह **खलु** यस्मात् कारणात् **मादृशाम्** अस्मत्सदृशां वार्ताहारिणां **धियो** बुद्धयः 'गिर[1]' इति पाठे तु गिरो वाचः **प्रवृत्तिसाराः** वार्तामात्रसारा वार्तामानेतुमेव समर्थाः न तु कर्तव्योपदेशसमर्थाः अतस्त्वयैव निर्धार्य कार्यं क्रियतामित्यर्थः । कथंभूतानां मादृशाम् ? **परप्रणीतानि** परोदितानि **वचांसि** वचनानि **तन्वतां** कथयतां क्वचित् चिन्व[2]तामिति पाठः तत्र चिन्वतां गृह्णताम् । अथ समासः । परैः प्रणीतानि तानि प० । प्रवृत्तिरेव सारो यासां ताः प्रवृत्तिसाराः । मद्वत् दृश्यन्ते इति मादृशास्तेषां मादृशाम् । इति वृत्तार्थः ॥२५॥

1. एष पाठः म. मध्ये इदं च पाठान्तरम् । 2. एष पाठः म. मध्ये ।

इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसंनिवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥२६॥

'इती०' व्याख्या । **अथा**नन्तरं **महीभुजा** राज्ञा युधिष्ठिरेण **कृष्णासदनं** द्रौपदीवासगृहं **प्रविश्य** प्रवेशं कृत्वा **अनुजसंनिधौ** भीमार्जुननकुलसहदेवभ्रातृसमीपे **तत्** वनेचरोक्तं **वचो** वचनम् **आचचक्षे** कथयाम्बभूवे कथितमित्यर्थः । अथवा कृष्णासदनमिति पदद्वयम् । तदा कृष्णेति कर्तृपदं कर्म वचः कृष्णा आचचक्षे। किंकृत्वा ? सदनं प्रविश्य कथं सह केन ? महीभुजा एकपदपक्षे कृष्णायाः द्रौपद्याः सदनं प्रविश्य इति योजनिका। क्व सति ? **वनसंनिवासिनां** वनेचराणां **पत्यौ** स्वामिनि **इति** पूर्वोक्तां **गिरं** वाणीम् **ईरयित्वा** उक्त्वा **गते** याते सति किं० पत्यौ ? **आत्तसत्क्रिये** गृहीतसत्कारे 'तुष्टिदानं हि चराणां वेतनं ते हि तल्लोभात् स्वामिकार्येष्वतीव त्वरयन्ते' इति (१५) *नीतिवाक्यामृते* । अथ समासः । सती चासौ क्रिया च सत्क्रिया आत्ता सत्क्रिया येन स आत्तसत्क्रियः तस्मिन्ना० । वने संनिवसन्तीत्येवंशीला वनसंनिवासिनस्तेषां व० । कृष्णायाः सदनं कृष्णासदनं तत् कृ० । अनुजानां संनिधिः अनुजसंनिधिस्तस्मिन् अ० । इति वृत्तार्थः ॥२६॥

निशम्य सिद्धिं द्विषतामपाकृतीस्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदात्मजा गिरः ॥२७॥

'निशम्य०' व्याख्या । **ततो**ऽनन्तरं **द्रुपदात्मजा** द्रौपदी **गिरो** वाणी**रुदाजहार** जगादेत्यर्थः । किं कृत्वा ? किरातेनोक्तां **द्विषतां** वैरिणां धृतराष्ट्रपुत्राणां नृपमुखात् **सिद्धिं** वृद्धिरूपां राज्यसिद्धिं **निशम्य** श्रुत्वेत्यर्थः । किं० द्रौपदी ? **ततस्त्याः** तत आगता शत्रुकृता इत्यर्थः । **अपाकृतीः** अपकारान् पराभवान् केशकर्षणपट्टकूलाक्षेपणादीन् **विनियन्तुं** निरोद्धुं हृदये सोढुमवगणयितुं वा **अक्षमा** असमर्था। किं० गिरः ? **नृपस्य** युधिष्ठिरस्य **मन्युव्यवसायदीपिनीः** कोपोद्यमोद्दीपिनीः संधुक्षयन्तीरित्यर्थः । अथ समासः। ततो भवा आगता वा ततस्त्याः तास्ततस्त्याः । न क्षमा अक्षमा । मन्योर्व्यवसायो मन्युव्यवसायो मन्युव्यवसायं दीपयन्तीत्येवंशीलाः मनुव्यवसायदीपिन्यस्ताः म० । यद्वा मन्युश्च व्यवसायश्च मन्युव्यवसायौ मन्युव्यवसायौ दीपयन्तीत्येवंशीलाः मन्युव्यवसायदीपिन्यस्ताः म० । आत्मनो मनःसकाशात् जाता आत्मजा द्रुपदस्य आत्मजा द्रुपदात्मजा । 'आत्मा चित्ते धृतौ यत्ने धिषणायां कलेवरे । परमात्मनि जीवेऽर्के हुताशनसमीरयोः' ॥ स्वभावेऽथेन इति *हैमानेकार्थः* [२-२५४/५] । अत्र आत्मशब्देन मनः । इति वृत्तार्थः ॥२७॥

द्रौपदी किमुवाचेत्याह -

भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां निरस्तनारीसमया दुराधयः ॥२८॥

'भवा०' व्याख्या । हे राजन् ! **प्रमदाजनोदितं** स्त्रीजनोक्त**मनुशासनं** शिक्षावचनं **भवादृशेषु** युष्मत्-सदृशेषु पण्डितेषु नीतिशास्त्रविशारदेषु विषये **अधिक्षेप इव** तिरस्कार इव **भवति** अतो न युक्तं

वक्तुमित्याशङ्क्याह- **तथापि दुराधयो** मानस्यो व्यथा समयोल्लङ्घनहेतुत्वात् दुष्टा मनोव्यथा **मां** द्रौपदीं **वक्तुं** जल्पितुं **व्यवसाययन्ति** प्रेरयन्तीत्यर्थः । न किंचित् अयुक्तं दुःखितानाम् इति भावः । किं० दुराधयो ? 'निरस्तनारीसमयाः' **निरस्तास्त्याजिता नारीणां** स्त्रीणां **समयाः** लज्जादिसमाचारा यैस्ते निरस्त० । 'समयः शपथे भाषासंपदोः कालसंविदोः सिद्धान्ताचारसंकेतनियमावसरेषु च क्रियाकारे च निर्देशे' इति *हैमानेकार्थः* [२-५०२/३] । अथ समासः। भवन्त इव दृश्यन्ते इति भवादृशास्तेषु भ० । प्रमदा एव जनः प्रमदाजनः प्रमदाजनेन उदितं प्र०। अनुशास्यते इति अनुशासनम् । नारीणां समयाः नारीसमया निरस्ता नारीसमया यैस्ते नि०। दुष्टाश्च ते आधयश्च दुराधयः आधिशब्दः पुल्लिङ्गे। इति वृत्तार्थः ॥२८॥

अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयाऽऽत्महस्तेन मही मदश्च्युता मतङ्गजेन स्रगिवापवर्जिता ॥२९॥

'अख०' व्याख्या । हे राजन् ! **त्वया** भवता **मही** पृथ्वी **आत्महस्तेन** स्वभुजेन स्वचापलेनेत्यर्थः। **अपवर्जिता** त्यक्ता वर्तते स्वदोषादेवायमनर्थागम इति भावः । मही कथंभूता ? **भूपतिभिः** भरतादिभिः **चिरं** चिरकालम् **अखण्डम्** अनवच्छिन्नं यथा स्यात्तथा **धृता** पालिता किं० भूपतिभिः ? **स्ववंशजैः** निजकुलोद्भवैः पुनः किं० भूप० ? **आखण्डलतुल्यधामभिः** इन्द्रतुल्यपराक्रमैः महाप्रभावैः इत्यर्थः। 'धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः' इति *हैमानेकार्थः* [२-२६६] । केन केव ? **मतङ्गजेन** हस्तिना **स्रगिव** कुसुममाल्य**मिव** यथा मतङ्गजेन स्रक् त्यज्यते । केन ? **आत्महस्तेन** स्वशुण्डादण्डेन 'हस्तः करे मानोडुभेदयोः केशात् कलापे शुण्डायां हरिद् दिशि तृणान्तरे वर्णभेदेऽश्वभेदे च' इति *हैमानेकार्थः* [२- २०७/८] । कथंभूतेन मतङ्गजेन ? **मदश्च्युता** मदस्राविणा । अथ समासः । न विद्यते खण्डं यत्र तदखण्डं खण्डशब्दः नपुंसकः । आखण्डलेन तुल्यम् आखण्डलतुल्यम् आखण्डलतुल्यं धाम येषां ते आखण्डलतुल्यधामानस्तैरा० । भुवः पतयो भूपतयः तैः भूपतिभिः । स्वस्य वंशः स्ववंशः स्ववंशे जाताः स्ववंशजास्तैः स्ववंशजैः । आत्मनो हस्तः आत्महस्तस्तेन आत्महस्तेन मदं श्च्योततीति मदश्च्युत् तेन मदश्च्युता क्विप्प्रत्ययान्तः । इति वृत्तार्थः ॥२९॥

स्वदोषादेवायमनर्थागम इत्युक्तं स च दोषः कुटिलेऽप्यकौटिल्यमेवेत्याह -

व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥३०॥

'व्रजन्ति०' व्याख्या । हे राजन् ! **ते मूढधियो** मूर्खमतयो जनाः **पराभवं** तिरस्कारं **व्रजन्ति** प्राप्नुवन्ति यत्तदोर्नित्याभिसंबन्धात्ते के ? **ये** जनाः **मायाविषु** छद्मपरेषु जनेषु **मायाविनो** मायायुक्ता **न भवन्ति** ते भवद्वत् तिरस्कारं प्राप्नुवन्तीत्यर्थः । अतो मायाविषु मायावता भवितव्यम् । यदुक्तं - 'शठं प्रति हठं कुर्यात्' इति (१६) । **हि** निश्चितं **शठाः** अपकारिणः धूर्ताः केनचित् व्याजेन अन्तर्मध्ये **प्रविश्य** प्रवेशं कृत्वा **तथाविधान्** अकुटिलमतीञ्जनान् **घ्नन्ति** विनाशयन्ति अत आर्जवं मायाविषु यत् क्रियते तत्

न नीतिः । के इव ? इषव **इव** यथा **इषवो** बाणाः **असंवृताङ्गान्** कवचादिभिरगोपितशरीरान् जनान् प्रविश्य घ्नन्ति । इषवः किं० ? **निशिताः** तीक्ष्णाः । अथ समासः । मूढा धीर्येषां ते मूढधियः । माया विद्यते येषां ते मायाविनस्तेषु मायाविषु । माया सन्त्येषां ते मायिनः । न संवृतम् असंवृतम् असंवृतमङ्गं येषां ते असंवृताङ्गाः । इति वृत्तार्थः ॥३०॥

न च लक्ष्मीचाञ्चल्यादयमनर्थः किंतु स्वोपेक्षादोषादित्याशयेनाह -

गुणानुरक्तामनुरक्तसाधनः कुलाभिमानी कुलजां नराधिपः ।
परैस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमिव श्रियम् ॥३१॥

'गुणा०' व्याख्या । हे राजन् ! **त्वदन्यो** भवतो परः **नराधिपः** क इव ? **कः परैः** शत्रुभिः **आत्मवधूमिव** निजप्रमदामिव **श्रियं** लक्ष्मीं स्वयमेव **अपहारयेत्** ग्राह्येत ? अपितु न कोपीत्यर्थः। अत्रायमभिप्रायः - कलत्रापहारवत् लक्ष्म्यपहारोपि राज्ञां मानहानिकरत्वात् नोपेक्षणीय इति भावः । सा श्रीरनुरक्ता न भविष्यतीत्यत आह कथंभूतां श्रियम् ? **गुणानुरक्तां** गुणैः संध्यादिभिः शौर्यादिभिश्च अनुरक्तां वश्यां सानुरागिणीमित्यर्थः । तथा कुलक्रमागता न भविष्यतीत्यत आह किं० नृपः?'अनुरक्तसाधनः' **अनुरक्तम्** अनुकूलं **साधनं** सहायसंपत् राजतुरगरथाद्युपकरणं वा यस्य सः अनुकूलसहायवानित्यर्थः ।

उक्तं च-उद्योगादनिवृत्तस्य सुसहायस्य धीमतः । छायेवानुगता तस्य नित्यं श्रीः सहचारिणी ॥१७॥

पुनः किं० नृपः ? **कुलाभिमानी** क्षत्रियकुलत्वादहङ्कारी पुनः कथंभूतां श्रियम् ? **मनोरमां** चेत्ताह्लादकारिणीं [पुनः किं०श्रि० ? **कुलजां** कुलक्रमादागतां] वधूपक्षेऽपि गुणानुरक्तत्वं कुलजत्वं मनोहरत्वं च योज्यम् । अथ समासः । गुणैरनुरक्ता गुणानुरक्ता तां गु० । अनुरक्तं साधनं यस्य स अ० । कुलस्याभिमानं विद्यते यस्यासौ कुलाभिमानी । कुले जाता कुलजा तां कु० । नराणामधिपो नराधिप[:] । त्वत्तोऽन्यस्त्वदन्यः । मनसि रमत इति मनोरमा तां म० । आत्मनो वधूरात्मवधूस्तामा० इति वृत्तार्थः ॥३१॥

अथ दशभिः श्लोकैः कोपोद्दीपनं करोति -

भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव ! वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥३२॥

'भव०' व्याख्या । हे **नरदेव** ! **एतर्हि** इदानीमस्मिन्नापत्काले **उदीरितः** उद्दीपितः सन् **मन्युः** कोपो **भवन्तं** त्वां **कथं न ज्वलयति** ? कथं न दहति ? क इव ? **अग्निरिव** यथाऽ**ग्निः** वैश्वानरः **उच्छिखः** ऊर्ध्वजालः सन् **शुष्कं** नीरसं **शमीतरुं** शमीवृक्षं ज्वलयति । अत्र शमीग्रहणं शीघ्रज्वलनस्वभावात्कृतम् । त्वां कोपो वह्निरिव कथं न ज्वलयतीत्यर्थः ज्वलयितुमुचितमित्यर्थः । किं० भवन्तम् ? **मनस्विगर्हिते** तेजस्विभिर्निन्दिते **वर्त्मनि** पथि **विवर्तमानं** वर्तमानं शत्रुकृतावस्थामनुभवन्तमित्यर्थः । नरदेववर्त्मनि वर्तमानोपि निन्दितमार्गे स्थितः सन् कथं न लज्जसे इति भावः । अथ समासः । मनस्विभिर्गर्हितं मनस्विगर्हितं तस्मिन् म० । विशेषेण वर्तते इति विवर्तमानस्तं वि० । नरेषु

देवो नरदेवस्तत्संबोधनं हे नरदेव ! । शमी चासौ तरुश्च शमीतरुस्तं श० । ऊर्ध्वं शिखा यस्य स उच्छिखः । इति वृत्तार्थः ॥३२॥

नन्वन्तःशत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशङ्क्याह –

अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन च विद्विषा दरः ॥३३॥

'अव०' व्याख्या । हे राजन् ! **अवन्ध्यकोपस्य** सफलक्रोधस्य निग्रहानुग्रहसमर्थस्येत्यर्थः । पुंसः **स्वयमेव देहिनः** प्राणिनः **वश्या** वशंगता **भवन्ति** किंलक्षणस्य अवन्ध्यकोपस्य ? **आपदां** कष्टानां **विहन्तु**रुन्मूलयितुः अतः क्रोधवता भवितव्यम् इति भावः । कोपानङ्गीकारेऽनिष्टं वक्ति यतः कारणात् **अमर्षशून्येन** कोपरहितेन **जन्तुना** प्राणिना **जातहार्देन** [जातस्नेहेन] सता **जनस्य विद्विषा** शत्रुणा **दरो** भयं न भवति ।

यदुक्तं–यस्मिन् रुष्टे भयं नास्ति तुष्टे नैव धनागमः । निग्रहानुग्रहौ न स्तः स रुष्टः किं करिष्यति ॥१८॥ अन्यच्च- प्रसादो निष्फलो यस्य कोपश्चापि निरर्थकः । न तं राजानमिच्छन्ति यतिं षण्ढमिव स्त्रियः ॥१९॥

अतः स्थाने क्रोधो विधेयः अस्थाने तु कोपवता न भवितव्यमिति तात्पर्यम् । अथ समासः । न विद्यते वन्ध्यः कोपो यस्य स अवन्ध्यकोपस्तस्य अ० । विशेषेण हन्तीति विहन्ता तस्य विहन्तुः । देहो विद्यते येषां ते देहिनः देहशब्दः पुंनपुंसकः । अमर्षेण शून्यः अमर्शशून्यस्तेन अ० । हृदयस्य कर्म हार्दं जातं हार्दं यस्य स जातहार्दस्तेन जा० । इति वृत्तार्थः ॥३३॥

परिभ्रमँल्लोहितचन्दनोचितः पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदरः ॥३४॥

परि० व्याख्या । **कच्चिदि**ष्टपरिप्रश्ने हे राजन् ! **अय**मसौ **वृकोदरो** भीमः तवेति शेषः । **मानसं** चित्तं **नो दुनोति** न परितापयति न पीडयतीत्यर्थः । वृकोदरः किंकुर्वन् ? **पदातिः** पादचारी सन् **अन्तर्गिरि** गिरिमध्ये **परिभ्रमन्** पर्यटन् पुनः किं० भीमः ? **रेणुरूषितः** धूलीच्छुरितः पूर्वं कीदृश आसीत् भीमस्तदेवाह–**लोहितचन्दनोचितः** आरक्तचन्दनयोग्यः अभ्यक्तरक्तचन्दन इत्यर्थः । पुनः किं० भीमः ? **महारथो** रथचारी तव कथंभूतस्य ? **सत्यधनस्य** सत्ययुक्तस्य अद्यापि सत्यमेव रक्ष्यते न तु भ्रातर इति भावः । अथ समासः । परि समन्तात् भ्रमतीति परिभ्रमन् । लोहितं च तत् चन्दनं च लोहितचन्दनं लोहितचन्दनाय उचितः [लोहितचन्दनोचितः] । पादाभ्यां अतति गच्छतीति पदातिः । गिरेरन्तरन्तर्गिरि । रेणुना रूषितः रेणुरूषितः । महान् रथो यस्य स म० । सत्यमेव धनं यस्य स सत्यधनस्तस्य स० । इति वृत्तार्थः ॥३४॥

विजित्य यः प्राज्यमयच्छदुत्तरान्कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाऽऽहरन् करोति मन्युं न कथं धनञ्जयः ॥३५॥

'विजित्य०' व्याख्या । हे नृप ! **स धनञ्जयो**ऽर्जुनः **तव** भवतः **अधुना** सांप्रतं विपत्काले **मन्युं** क्रोधं दुःखं वा **कथं न करोति** अर्जुनः किंकुर्वन् ? **वल्कवासांसि** वल्कलवस्त्राणि **आहरन्** परिदधत् प्रयच्छन् वा स कः ? **यः** पूर्वम् **उत्तरान् कुरून्** उत्तरकुरुदेशान् **विजित्य** जित्वा **प्राज्यं** प्रचुरम् **अकुप्यं वसु** [१]अघटितं धनम् **अयच्छत्** ददौ किंलक्षणोऽर्जुनः ? **वासवोपमः** पराक्रमेण इन्द्रतुल्यः । अथ समासः । कुप्यादन्यदकुप्यम् । वासवस्योपमा यस्य स वा० । वल्कान्येव वासांसि वल्कवासांसि । इति वृत्तार्थः ॥३५॥

वनान्तशय्याकठिनीकृताकृती कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ विलोकयन्नुत्सहसे न बाधितुम् ॥३६॥

'वनान्त०' व्याख्या । हे नृप ! **त्वं** भवान् **एतौ** समीपवर्तिनौ **यमौ** युगलौ माद्रीपुत्रौ नकुलसहदेवौ **विलोकयन्** पश्यन् **धृतिसंयमौ** कर्मपदं संतोषनियमौ **बाधितुं** त्यक्तुं **कथं न उत्सहसे** कथं न प्रवर्तसे कथं न उद्यमं करोषीत्यर्थः । अहो ते महद्धैर्यमिति भावः । यद्वा पुनः किं० यमौ ? 'धृतिसंयमौ' **धृतिः** संतोषः **संयमं** दुःखसहिष्णुता ते विद्येते ययोस्तौ यद्वा 'धृतसंयमौ' धृतो गृहीत[ः] संयमो याभ्यां तौ० पुनः किं० यमौ ? **विष्वक्** सर्वतः **कचाचितौ** केशव्याप्तौ विकीर्णकेशावित्यर्थः । अत एव उत्प्रेक्ष्यते **अगजौ** गिरिसंभवौ **गजाविव** हस्तिनाविव स्थितौ किंलक्षणौ गजौ ? 'वनान्त०' । [**वनान्तः** वनभूमिः सा एव **शय्या** वनान्तशय्या तया **कठिनीकृताकृती** कठिनीकृतदेहौ] पुनः किं० ? विष्वक् कचाचितौ । अथ समासः । वनस्यान्तो वनान्तः वनान्ते शय्या वनान्तशय्या अकठिना कठिना कृता इति कठिनीकृता [वनान्तशय्यया कठिनीकृता] व० [वनान्तशय्याकठिनीकृता] आकृतिर्ययोस्तौ वना० । कचैराचितौ कचाचितौ । गच्छतीति गः न गः अगः अगे जातौ अगजौ । धृतिश्च संयमश्च धृतिसंयमौ धृतिसंयमौ विद्येते ययोस्तौ धृतिसंयमौ । इति वृत्तार्थः ॥३६॥

अथ राज्ञो दुर्दशां दर्शयितुमुपोद्घातमाह - प्रकृतार्थं वर्णयितुमर्थान्तरवर्णनमुपोद्घातः -

इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां रुजन्ति चेतः प्रसभं ममाधयः ॥३७॥

'इमा०' व्याख्या । हे राजन् ! **अहं** द्रौपदी **इमां** वर्तमानां **तावकीं** त्वत्संबन्धिनीम् आपद्विषयां **धियं न वेद** न जानामि न चात्मदृष्टान्तेन आपन्नत्वाद्दुःखत्वमनुभावयितुं शक्यते धीरादिष्वनैकान्तिकत्वादित्याशयेनाह - **खलु** निश्चयेन **चित्तवृत्तयः** चित्तस्वभावाः **विचित्ररूपाः** अनेकप्रकाराः भवन्तीति शेषः । **आधयो** मनोव्यथाः **प्रसभं** हठात् **मम** मे **चेतो** मनो **रुजन्ति** व्यथयन्ति पीडयन्तीत्यर्थः । मम किंकुर्वत्याः ? **परां** प्रकृष्टां **भवदापदं** त्वत्कष्टं **विचिन्तयन्त्याः** विचारयन्त्याः पश्यतामपि दुःसहदुःखजननी त्वद्विपत्तिः अनुभवितारं त्वां न विकरोति इति महच्चित्रमित्यर्थः । अथ

१. हेमरूप्यात्मकम् -म. ।

समासः । तवेयं तावकी तां ता० । विचित्राणि रूपाणि यासां ता विचित्ररूपाः । चित्तानां वृत्तयः चि० । विचिन्तयन्तीति विचिन्तयन्ती तस्याः वि० । भवत आपत् भवदापत् तां भवदापदम् । इति वृत्तार्थः ॥३७॥

तामेवापदं श्लोकत्रयेणाह -

पुराधिरूढः शयनं महाधनं विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं जहासि निद्रामशिवैः शिवारुतैः ॥३८॥

'पुरा०' व्याख्या । हे नृप ! **यस्त्वं पुरा** पूर्वं **महाधनं** महासमृद्धिमती(त्) **शयनं** शय्याम् **अधिरूढः** सन् अध्यारोपितः सन् सुप्तः सन् इत्यर्थः । ['स्तुतिगीतिमङ्गलैः'] **स्तुति**र्गुणोत्कीर्तनं **गीतिः** स्वरतालपदप्रयोगः **मङ्गलं** च जय जयेत्यादिपदोदीरणं तैः कृत्वा वैतालिकैः **विबोध्यसे** जागर्यसे **स** त्वम् **अदभ्रदर्भां** बहुदर्भां **स्थलीं** स्थलीमित्यत्र अकृत्रिमभूमिं 'जानपद' - (पा.४-१-४२) इत्यादिना अकृत्रिमार्थे ङीप् । एतेन दुस्सहस्पर्शत्वं स्थल्या उक्तं भूमिम् **अधिशय्य** अधिष्ठाय **अशिवैः** अप्रशस्तैः **शिवारुतैः** शृगालफेत्कारैः **निद्रां** प्रमीलां **जहासि** त्यजसि अद्येति शेषः । अतः परं किं कष्टं भवेदिति भावः । अथ समासः । महद् धनं यस्मिन् तत् म० । स्तुतिश्च गीतिश्च मङ्गलं च स्तुतिगीतिमङ्गलानि तैः स्तु० । अदभ्रो दर्भो यस्यां सा अदभ्रदर्भा ताम् अ० । न शिवानि अशिवानि तैः अशिवैः । शिवानां रुतानि शिवारुतानि तैः शि० । इति वृत्तार्थः ॥३८॥

अनारतं यौ मणिपीठशायिनावरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते मृगद्विजालूनशिखेषु बर्हिषाम् ॥३९॥

'अना०' व्याख्या । हे नृप ! पुरा इत्याध्याहार्यं **राजशिरःस्रजां** नमन्नृपमस्तककुसुममालानां **रजः** कर्तृपदं परागोऽ**नारतं** निरन्तरं **यौ ते** तव **चरणौ** पादौ **अरञ्जयत्** रञ्जयामास किं० चरणौ ? **मणिपीठशायिनौ** रत्नखचितपीठन्यस्तौ इदानीं तव तौ चरणौ **बर्हिषां** दर्भाणां **वनेषु** [**निषीदतः**] उपविशतस्तिष्ठत इत्यर्थः । कथंभूतेषु वनेषु ? 'मृगद्विजालूनशिखेषु' **मृगा** हरिणास्तेषां **द्विजाः** दन्ता तै**रालूनशिखेषु** भक्षिताग्रेषु यद्वा 'मृगद्विजालूनशिखेषु' **मृगैः** कुरङ्गै**र्द्विजैः** ब्राह्मणै**श्चालूनशिखेषु** छिन्नाग्रेषु । अथ समासः । मणिभिर्युक्तं पीठं मणिपीठं मणिपीठे शयाते इत्येवंशीलौ म० । राज्ञां शिरांसि राजशिरांसि राजशिरस्सु स्रजः रा० तेषां रा० । मृगानां द्विजाः मृगद्विजाः मृगद्विजैरालूनशिखा येषां तानि मृगद्विजालूनशिखानि तेषु मृग० । इति वृत्तार्थः ॥३९॥

पुरोपनीतं नृप ! रामणीयकं द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परम् उपैति[1] कार्श्यं यशसा समं वपुः ॥४०॥

1. परैति - म.

'पुरो०' व्याख्या । हे **नृप** ! **यत् एतदिदं ते** तव **वपुः** शरीरं **पुरा** पूर्वं **द्विजातिशेषेण** विप्रभुक्तावशिष्टेन अनेन इदानीं तदभाव इति सूचितम् **अन्धसा** अन्नेन भक्तादिना **रामणीयकं** रमणीयतां सुन्दरत्व**मुपनीतं** प्रापितं **तत् अद्य** साम्प्रतं **वन्यफलाशिनः** वनोद्भवफलभक्षिणस्तव शरीरं **यशसा समं** कीर्त्या सार्धं **परं** केवलम् उत्कृष्टं वा **कार्श्यं** कृशत्व**मुपैति** प्राप्नोति उभयमपि क्षीयते इत्यर्थः[1]। अथ समासः । रमणीयस्य भावो रामणीयकम् । द्विजातिभिर्भुक्तं द्विजातिभुक्तं द्विजातिभुक्ताद् शेषं द्विजातिशेषं मध्यमपदलोपस्तेन द्वि० । वने भवानि वन्यानि वन्यानि च तानि फलानि च वन्यफलानि अश(श्ना)तीत्येवंशीलो वन्यफलाशी तस्य व० । इति वृत्तार्थः ॥४०॥

ननु सर्वप्राणिसाधारण्यामापदि का परिदेवनेत्यत आह -

द्विषन्निमित्ता यदियं दशा ततः समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसंपदां पराभवोऽप्युत्सव एव मानिनाम् ॥४१॥

'द्विष०' व्याख्या । हे नृप ! **यत्** यस्मात् कारणात् **इय**मेषा भुज्यमाना **दशा** अवस्था **द्विषन्निमित्ता** शत्रुसमुत्पन्ना वर्तते परं न दैवकृता **ततः** तस्मात्कारणात् इयं दशा **मे** मम **मनः समूलं** साश्रयम् **उन्मूलयतीव** उत्पाटयतीव दैवकीया विपत् न दुःखायेत्याह-**परैः** शत्रुभिः **अपर्यासितवीर्यसंपदाम्** अविनाशितशक्तिसमृद्धीनां 'वीर्यं तेजः प्रभावयोः शुक्रे शक्तौ च' इति *हैमानेकार्थः* [२-३७१/२] । **मानिनाम्** अहङ्कारिणां दैवकृतः **पराभवोऽपि** दैविक्यापत् **उत्सव** एव भवति मानहानिः सोढुमशक्या न तु विपदिति भावः । अथ समासः। द्विषन्तो निमित्तं यस्याः सा द्विषन्निमित्ता । वीर्यस्य संपदो वीर्यसंपदः । न पर्यासिता[:] अपर्यासिता[:] अपर्यासिता वीर्यसंपदो येषां ते अपर्यासितवीर्यसंपदस्तेषाम् अप० । मानो विद्यते येषां ते मानिनस्तेषां मानिनाम् इति वृत्तार्थः ॥४१॥

विहाय शान्तिं नृप ! धाम तत्पुनः प्रसीद संधेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥४२॥

'विहाय०' व्याख्या । हे **नृप** ! त्वं **प्रसीद** प्रसन्नो भव अस्मभ्यमिति शेषः । किंकृत्वा ? **शान्तिं** क्षमां **विहाय** त्यक्त्वा **पुनः** पुनरपि **तत्** प्रसिद्धं **धाम** दिग्विजयादिदृष्टं तेजः **विद्विषां** वैरिणां **वधाय** विनाशाय **संधेहि** समाश्रय अङ्गीकुरु इत्यर्थः । शमेनैव कार्यसिद्धौ किं कोपेनेत्याह-**निःस्पृहाः** गतवाञ्छाः **मुनयो** यतयः **शत्रून्** रिपून् **अवधूय** तिरस्कृत्य अवगण्येत्यर्थः । **शमेन** उपशमेन **सिद्धिं** मोक्षं **व्रजन्ति** यान्ति न **भूभृतो** राजानो निःस्पृहाः सन्तः शमेन कार्यसिद्धिं गच्छन्ति । 'सिद्धिस्तु मोक्षे निष्पत्तियोगयोः' इति *हैमानेकार्थः* [२-२५१] । अयमाशयः नृपः शात्रवमजित्वा सिद्धिं राज्यं च न प्राप्नोति किंतु जित्वैव, न तु शान्त्या किंतु क्रोधेनेति। तपस्विनां सिद्धौ शमः कारणं राज्ञां तु क्रोधः सस्पृहत्वादिति, राज्यकार्यं न क्षमासाध्यमित्यर्थः । अथ समासः । निर्गता स्पृहा येभ्यस्ते निःस्पृहाः । भुवं बिभ्रतीति भूभृतः । इति

१. अत्र सहोक्तिरलंकारः । तदुक्तं काव्यप्रकाशे-(१०-११२) 'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम् ।'-म.

वृत्तार्थः ॥४२॥

पुरस्सरा धामवतां यशोधनाः सुदुस्सहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं निराश्रया हन्त हता मनस्विता ॥४३॥

'पुरस्०' व्याख्या । हे नृप ! **भवादृशा** युष्मत्सदृशाः **सुदुःसहं** सोढुमशक्य**मीदृश**मिति उक्तप्रकारं शत्रुकृतं **निकारम्** उपद्रवं **प्राप्य चेत्** यदि **रतिम्** उपशमं संतोषं वा **अधिकुर्वते** स्वीकुर्वते तर्हि **हन्त** इति खेदे **मनस्विता** धीरता अभिमानिता वा **निराश्रया** आश्रयरहिता सती **हता** गता तेजस्विजनैकशरणत्वात् मनस्वितायाः इत्यर्थः । अतः पराक्रमितव्यमिति भावः । किं० भवादृशाः ? **यशोधनाः** यशोयुक्ताः पुनः किं० भवादृशाः ? **धामवतां** तेजस्विनां मध्ये **पुरस्सराः** अग्रेसराः । अथ समासः । पुरस्सरन्तीति पुरस्सराः । धाम विद्यते येषां ते धामवन्तस्तेषां धामवताम् । यश एव धनं येषां ते यशोधनाः । दुःखेन सह्यत इति दुःसहः सुतरामतिशयेन दुस्सहः सुदुस्सहस्तं सुदुस्सहम् । अयमिव दृश्यत इति ईदृशस्तम् ईदृशम् । भवन्त इव दृश्यन्ते इति भवादृशाः । निर्गत आश्रयो यस्याः सा निराश्रया । प्रशस्तं मनो येषां ते मनस्विनो मनस्विनो भाव मनस्विता । इति वृत्तार्थः ॥४३॥

अथ क्षमामेव निरस्तविक्रमश्चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं जटाधरः सन् जुहुधीह पावकम् ॥४४॥

'अथ०' व्याख्या । **अथे**ति पक्षान्तरे हे नृप ! **निरस्तविक्रमः** त्यक्तबलः सन् त्यक्तपराक्रमः सन् वा **चिराय** चिरकालेनापि **क्षमां** क्षान्तिमेव **सुखस्य साधनं** सौख्यस्य कारणं **पर्येषि** अवगच्छसि जानासीत्यर्थः । तर्हि त्वं **लक्ष्मीपतिलक्ष्म** राजचिह्नं **कार्मुकं** धनुः **विहाय** त्यक्त्वा **जटाधरः सन् इह** अत्र वने **पावकमग्निं जुहुधि** प्रीणय अग्नौ होमं कुरु इत्यर्थः । संसाराद्विरक्तस्य किं धनुषेत्यर्थः । अथ समासः । निरस्तो विक्रमो येन स नि० । लक्ष्म्याः पतिः लक्ष्मीपतिः लक्ष्मीपतेः लक्ष्म ल० । जटां धरतीति जटाधरः । यद्वा धरती[ति]धरः जटानां धरो जटाधरः । इति वृत्तार्थः ॥४४॥

अथ समयोल्लङ्घनाद् बिभेषि तदपि भवतो न किंचि[दि]त्याह -

न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः ।
<u>अरिषु हि विजयार्थिनः क्षितीषा विदधति सोपधि संधिदूषणानि</u> ॥४५॥ (पु.)

'न स०' व्याख्या । हे नृप ! **परेषु** शत्रुषु विषये **ते** तव **समयपरिरक्षणं** त्रयोदशवत्सरान् वने वत्स्यामीत्येवंरूपो योऽवधिः स समयस्तस्य परिरक्षणं प्रतिक्षणं प्रतिज्ञापरिपालनं **न क्षमं** न युक्तं न घटमानमित्यर्थः । कथंभूतेषु परेषु ? **निकृतिपरेषु** कपटतत्परेषु अपकारकारकेष्वित्यर्थः । कथंभूतस्य ते भवतः ? **भूरिधाम्नः** प्रचुरतेजसः महौजस इत्यर्थः । प्रतीकारकरणसमर्थस्येत्यर्थः । **हि** यस्मात् कारणात् **विजयार्थिनः** विजिगीषवः **क्षितीशाः** राजानः **अरिषु** शत्रुषु विषये **सोपधि** सकपटं यथा स्यात् तथा

संधिदूषणानि पणबन्धदोषान् **विदधति** कुर्वन्ति केनचित् व्याजेन दोषमुत्पाद्य संधिं विघटयन्तीत्यर्थः । शक्तस्य हि जिगीषोः सर्वथा कार्यसाधनं प्रधानम् अन्यत्समयरक्षणादिकम् अशक्तस्येति भावः । अथ समासः । समयस्य परिरक्षणं समयपरिरक्षणम् । निकृतौ परा निकृतिपरास्तेषु निकृतिपरेषु । भूरि धाम यस्य स भूरिधामा तस्य भूरिधाम्नः । विजय एव अर्थो येषां ते विजयार्थिनः । क्षितेरीशाः क्षितीशाः । सह उपधिना वर्तते यत् तत् सोपधि । संधेः दूषणानि सं० । पुष्पिताग्रा छन्दः । इति वृत्तार्थः ॥४५॥

इत्यमुक्तमर्थमाशीर्वादपूर्वकम् उपसंहरति -

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समु(म)भ्येतु भूयः ॥४६॥ (मा.)

[इति श्रीकिरातार्जुनीये महाकाव्ये भारविकृतौ लक्ष्म्यङ्के प्रथमः सर्गः ॥१॥]

'विधि०' व्याख्या। हे नृप ! **लक्ष्मीः** राज्यश्रीः **त्वां** भवन्तं **भूयः** पुनरपि **समभ्येतु** समागच्छतु भजत्वित्यर्थः । किं० त्वाम् ? **रिपुतिमिरं** शत्रुरूपतमः **उदस्य** निरस्य निष्कास्य वा **दिनादौ उदीयमानम्** उद्यन्तम् उदयप्राप्तवन्तमित्यर्थः । पुनः किं० त्वाम् ? 'विधिसमयनियोगात् दीप्तिसंहारजिह्मं' **विधि**र्दैवं **समयश्च** कालस्तयो**र्नियोगात्** आदेशात् **दीप्तिः** प्रतापः तस्य **संहारः** क्षयस्तेन **जिह्मं** कलूष(षं) दीनमित्यर्थः । पुनः किं० त्वाम् ? **शिथिलवसुं** श्लथधनं शिथिलबलमिति पाठे उभयत्रापि शिथिलशक्तिकमित्यर्थः । पुनः किं० त्वाम् ? **अगाधे** दुस्तरे **आपत्पयोधौ** कष्टसमुद्रे **मग्नं** पतितं लीनमित्यर्थः कमिव ? **दिनकृत**मिव सूर्य**मिव** यथा **लक्ष्मीः** शोभा दिनादौ प्रभाते दिनकृतं रविं **भूयः** पुनः अपि **समभ्येति** समायाति 'लक्ष्मीः श्रीशोभासंपत् प्रियङ्गुषु' इति *हैमानेकार्थः* [२-३२८] । किं० रविम् ? **रिपुतिमिरमुदस्योदीयमानं** वैरिध्वान्तं विभिद्योद्गच्छन्तं पुनः किं० ? **विधिसमयनियोगात् दीप्तिसंहारजिह्मं** दैवसमयादेशात् प्रतापसंक्षेपादप्रसन्नं पुनः किं० ? शिथिलवसुं शिथिलकिरणम् । 'वसुस्त्वग्नौ देवभेदे नृपे रुचि योक्त्रे शुष्के वसु स्वादौ । रत्ने वृद्ध्यौषधे धने' इति *हैमानेकार्थः* [२-५७७] । पुनः किं० ? **आपत्पयोधौ मग्नं** व्यसनसागरे निमग्नम् । सूर्यो हि संध्यासमये समुद्रे निमज्जति परेद्युरुन्मज्जतीति भावः । लक्ष्मीः एवंविधं सूर्यं पुनरुपैति तद्वद्भवन्तम् उपैतु इत्याशीरलङ्कारः । अत्र चमत्कारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु लक्ष्मीशब्दप्रयोगः । अथ कविः काव्यवर्णनम् आख्यानपूर्वकं सर्गपरिसमाप्तौ कथयति इतिशब्दः सर्गपरिसमाप्तौ भारविकृत इति कविनामकथनम् । महाकाव्यम् इति महच्छब्देन काव्यलक्षणसंपत्तिः सूचिता किरातार्जुनीयमिति काव्यवर्णनयोः प्रथमः सर्ग[:] समाप्त इति शेषः । एवमुत्तरत्रापि द्रष्टव्यं किरातार्जुनावधिकृत्य कृतोऽयं ग्रन्थः किरातार्जुनीयमिति । अथ समासः । विधिश्च समयश्च विधिसमयौ विधिसमययोर्नियोगः विधिसमयनियोगः तस्मात् वि० । दीप्तेः संहारः दीप्तिसंहारः दीप्तिसंहारेण जिह्मं दी० । शिथिलं वसु यस्य स शिथिलवसुस्तं शि० । आपदेव

पयोधिः आपत्पयोधिस्तस्मिन्नापत्पयोधौ । रविपक्षे आपदिव पयोधिः आपत्पयोधिः तस्मिन्नापत्पयोधौ । रिपुरेव तिमिरं रिपुतिमिरं तद्रिपुतिमिरम् । दिनस्यादिर्दिनादिस्तस्मिन् दिनादौ । दिनं करोतीति दिनकृत् तं दि० । मालिनीछन्दः इति वृत्तार्थः ॥४६॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः, प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र ***देवविजयोपाध्यायसिंहास्तपा***- गच्छेये प्रति गौतमाणभृतस्तैस्तैर्गुणैरेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण ***धर्मविजयेन*** विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि ***किरातकाव्ये*** सर्गो निसर्गमधुरः प्रथमः समाप्तः ॥२॥

इति ***महोपाध्यायदेवविजयगणि*** पादपयोजचञ्चरीक***पण्डितधर्मविजयगणि***-रचितायां ***भट्टश्रीभारविकविकृतस्य किरातार्जुनीयनाम्नो*** महाकाव्यस्य ***प्रदीपिकाभिधानायां*** वृत्तौ ***व्यवसायदीपनो*** नाम प्रथमः सर्गोऽगमत् ॥३॥

॥ श्रीरस्तुतराम् । मङ्गलमाला भवन्तु । इति श्रेयःश्रेणयः ॥

द्वितीयः सर्गः।

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥१॥

[अतः आरभ्य ५६ यावत् प्रबोधिताछन्दः]

'विहितां०' व्याख्या । **अथ** द्रौपदीवचनकथनानन्तरं **वृकोदरो** भीमः **नृपं** युधिष्ठिरं भूपं प्रति **वचनं** वाक्य**मूचे** उक्तवान् कथयामासेत्यर्थः । किंकृत्वा ? **प्रियया** द्रौपद्या प्रियाग्रहणम् अस्या हितोप[देश]-तात्पर्यसूचनार्थं **विहिता**मुच्चारितां **गिरं** वाचं **निश्चित्य** निश्चित[त]या कृत्वा ज्ञात्वेत्यर्थः । किं० गिरम् ? **मनःप्रियाम्** उत्साहादिगुणयुक्तत्वात् चित्ताह्लादकारिणीं पुनः किं० गिरम् ? **गरीयसीं** सारवत्तरां कथंभूतं वचनम् ? **उपपत्तिमत्** युक्तियुक्तं पुनः किं० वचनम् ? **ऊर्जिताश्रयम्** बलवत्ताश्रयम् उदारार्थाश्रयमित्यर्थः । विहितामिति विपूर्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषतात्पर्यावसानात् । विशेषणद्वयेनापि गिरो ग्राह्यत्वमुक्तम् । अथ समासः । मनसः प्रिया मनःप्रिया तां म० । अतिशयेन गुरुर्गरीयसी तां गरीयसीम् । उपपत्तिर्विद्यते यस्मिन् तत् उपपत्तिमत् । उर्जित आश्रयो यस्य तत् ऊर्जिताश्रयम् । वृकस्य उदरमिवोदरं यस्य स वृकोदरः । इति वृत्तार्थः ॥१॥

अथ भीम उवाच -

[1]यदवोचदवेक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥२॥

'यद०' व्याख्या । हे राजन् ! इयं **मानिनी** क्षत्रियकुलाभिमानवती द्रौपदी **यत् वचनम् अवोचत्** अवादीत् तत् वचनं सर्वस्यापीति शेषः । **विस्मयं विदधीत** आश्चर्यं कुर्वीत किंकृत्वा ? **स्नेहमयेन** प्रीतिप्रचुरेण **चक्षुषा** ज्ञाननेत्रेण **परितः** सर्वतोऽ**वेक्ष्य** विलोक्य विचिन्त्ये[त्य]र्थः । किं० वचः ? **वागधिपस्य** बृहस्पतेरपि **दुर्वचं** वक्तुमशक्यं यत्स्त्रीणामपि वचो नीतिशास्त्रमनुरुणद्धि हितं चानुबध्नाति । अतो विस्मयकरं ग्राह्यं च तद्वचनमिति तात्पर्यार्थः । अथ समासः । मानोऽस्यास्तीति मानिनी । स्नेहः प्रचुरो यत्र तत् स्नेहमयं तेन स्ने० । वाचामधिपो वागधिपस्तस्य वा० । दुःखेन उच्यत इति दुर्वचम् । इति वृत्तार्थः ॥२॥

विस्मयकरत्वे हेतुः -

विषमोऽपि विगाह्यते नयः कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ॥३॥

'विषमो०' व्याख्या । हे राजन् ! **विषमोऽपि** दुर्बोधोऽपि **नयो** नीतिशास्त्रं **कृततीर्थः** सन्

1. वोचत वीक्ष्य - म. इदं च पा.

१. अथवा बृहस्पतेरपि विस्मयं विदधीत इति संबन्धः दुर्वचम् इत्यत्र च केनापि इति शेषः इत्यपि योजना - म.

कृताभ्यासाद्युपायः सन् **विगाह्यते** गृह्यते अवबुध्यते इत्यर्थः । यः शृणोति स शास्त्रं विषममपि जानातीत्यर्थः । 'नयः स्यात् नैगमादिषु नीतिद्यूतभिदोः' इति *हैमानेकार्थः* [२-३६०] । क इव ? **पयसाम् आशय** इव ह्रद **इव** यथा पयसाम् आशयो ह्रदः विषमोऽपि दुःप्रवेशोऽपि कृततीर्थः सन् कृतजलावतारः सन् विगाह्यते प्रविश्यते । 'तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः ऋषिजुष्टे जले सत्रिण्युपाये स्त्रीरजस्यपि ॥ योनौ पात्रे दर्शने च'इति *हैमानेकार्थः* [२-२१३/४] । **तु** पुनः **स** पुमान् **तत्र** तस्मिन् नये ह्रदे च **विशेषदुर्लभः** अत्यन्तदुर्लभः दुष्प्राप इत्यर्थः । स कः यः सत् साधु देशकालाद्यविरुद्धं **कृत्यं** सन्धिविग्रहादिकं कार्यं तस्य **वर्त्म** मार्गम् **उपन्यस्यति** उदाहरति कथयतीत्यर्थः । ह्रदपक्षे सत् प्रशस्तं गर्तग्राहपाषाणादिना रहितं कृत्यं स्नानादि तस्य वर्त्म मार्गं **यः** कथयति स विशेषदुर्लभः । 'सत् विद्यमाने सत्ये च प्रशस्तार्चितसाधुषु' इति *हैमानेकार्थः* [१-९] । यथा केनचित् कृततीर्थे पयसि गम्भीरेऽपि प्रविष्टारस्सन्ति तीर्थकरस्तु विरलः तद्वन्नीतावपि गूढतत्त्ववक्तरि सति बोद्धारः सन्ति वक्ता तु न सुलभः इति भावः । इयं चापठितापि वक्तीति युज्यते विस्मयं तस्येत्यर्थः । अथ समासः । कृतं तीर्थं यस्मिन् स कृततीर्थः । विशेषेण दुर्लभो विशेषदुर्लभः । कृत्यस्य वर्त्म कृत्यवर्त्म । इति वृत्तार्थः ॥३॥

अथ द्रौपद्या वचनं ग्राह्यं तत्र हेतुमाह -

परिणामसुखे गरीयसि व्यथकेऽस्मिन् वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः ॥४॥

'परि०' व्याख्या । हे नृप ! **अस्मिन् वचसि** अस्या वचने द्रौपदीवाक्ये **बहुः** प्रचुरो **गुणो**ऽभिमानरक्षणराज्यलाभादिलक्षणः शौर्यादिर्वा **दृश्यते** 'गुणो ज्यासूदतन्तुषु रज्जौ सत्त्वादौ सन्ध्यादौ शौर्यादौ भीम इन्द्रिये रूपादावप्रधाने च दोषान्यस्मिन् विशेषणे' इति *हैमानेकार्थः* [२-१३६/७] । किं० वचसि ? 'परिणामसुखे' **परिणामः** फलकालः तत्र **सुखे** आगामिकालहिते पुनः किं० वचसि ? **गरीयसि** भूयिष्ठे महार्थे इत्यर्थः । पुनः किं० वचसि ? **क्षतौजसां** क्षीणशक्तीनां जनानां **व्यथके** त्रासजनके पुनः किं० व० ? **अतिवीर्यवति** अत्यन्तसामर्थ्ययुक्ते 'वीर्यं शुक्रे प्रभावे च तेजःसामर्थ्ययोरपि'इति *विश्वः* । वीररसोत्साहकत्वात् पुनः किं० व० ? **अल्पीयसि** अत्यल्पाक्षरे कस्मिन्निव ? भेषज **इव** यथा अल्पीयसि अल्पमात्रेऽपि **भेषजे** औषधे बहुतरो गुण आरोग्यबलपोषादिर्दृश्यते किं० भेषजे ? **परिणामसुखे** परिणामसुखकारके रोगपरिपाकावस्थायां सुखकारिणीत्यर्थः । पुनः किं० ? **गरीयसि** गुणबाहुल्यात् श्रेष्ठे पुनः किं० ? **क्षतौजसां** रोगग्रस्तानाम् अनेन रोगशान्तिर्भविष्यति न वेति संशयादिदुःखजनके पुनः किं० ? **अतिवीर्यवति** अत्यन्तसामर्थ्यवति रोगशान्तिकरणसामर्थ्यात् अतोऽस्या वचनं ग्राह्यमिति भावः । अथ समासः । परिणामे सुखं तस्मिन् प० । अतिशयेन गुरुः गरीयस्तस्मिन् ग० । व्यथतीति व्यथकस्तस्मिन् व्य० । क्षतम् ओजो येषां ते क्षतौजसस्तेषां क्ष० । अति अत्यन्तं वीर्यं विद्यते यस्मिन् तत् अतिवीर्यवत् तस्मिन् अ० । अतिशयेनाल्पम् अल्पीयस्तस्मिन् अ० । इति वृत्तार्थः ॥४॥

तथा ते तादृशम् अपि वचनं मह्यं न रोचते किं करोमीत्याह -

इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती ।
ननु वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥५॥

'इय०' व्यख्या । हे राजन् ! **इयम्** एषा परिणामसुखादिगुणयुक्ता द्रौपद्योक्ता वाणी **भवतेऽपि** अल्पमयि(तुभ्यमपि) **रोचतां** प्रियतां यातु स्वदताम् इत्यर्थः । किंविशिष्टाय भवते ? **इष्टगुणाय** वल्लभगुणाय गुणग्राहकायेत्यर्थः, बालादीनामपि हितवचने इच्छां कुर्यादौषधवदिति भावः । तथापि अबलावचने का श्रद्धा तत्राह० किं० भारती ? **रुचिरार्था** मनोहरार्था महितार्था वा **नन्वि**ति निश्चितं **विपश्चितः** विद्वांसः **वचने** हितवाक्ये विषये **गुणगृह्याः** गुणपक्षपातिनः गुणग्राहिणो वा विदुषि अविदुषि वा निःस्पृहा विद्वान् अयम् अविद्वान् अयम् इत्यत्रादरानकुर्वन्तः भवन्तीति शेषः । किं० विपश्चितः ? 'वक्तृविशेषनिस्पृहाः' **वक्तृविशेषे** स्त्रीपुंसादिलक्षणे **निःस्पृहा** निरास्था गतस्पृहा इत्यर्थः । यतस्ततः सुभाषितमाद्रियन्त इत्यर्थः ।

बालादपि हितं ग्राह्यममेध्यादपि काञ्चनम् । अमृतं च विषाद् ग्राह्यं स्त्रीरत्नं दुष्कुलादपि ॥२०॥

इति वचनात् बालादपि सुभाषितं ग्राह्यमिति भावः। अथ समासः । इष्टा गुणा यस्य स इष्टगुणस्तस्मावि(यि)ष्टगुणाय । रुचिरोऽर्थो यस्यां सा रुचिरार्था । वक्तृणां विशेषः वक्तृविशेषः वक्तृविशेषे निर्गता स्पृहा येषां ते व० । गुणान् गृह्णन्तीति गुणगृह्याः । इति वृत्तार्थः ॥५॥

संप्रति स्वयमुपालभते -

चतसृष्वपि ते विवेकिनी नृपविद्यासु निरूढिमागता ।
कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति ॥६॥

'चत०' व्याख्या । हे नृप ! **ते** तव **मतिः** बुद्धिः **विपर्ययं** वैपरीत्यम् अविवेकस्वरूपम् **एत्य** प्राप्य **कथमवसीदति** कथमवसन्ना भवति कथं नश्यतीत्यर्थः । मतिः किंलक्षणा ? **चतसृष्वपि नृपविद्यासु** राजविद्यासु **निरूढिं** प्रसिद्धिम् **आगता** प्राप्ता तदुक्तम्-

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती । विद्याश्चतस्रो भूपानां लोकसंस्थितिहेतवः ॥२१॥
आन्वीक्षिक्यां तु विज्ञानं धर्माधर्मौ त्रयीस्थितौ । अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ ॥२२॥

यद्वा आन्वीक्षिकी तर्कविद्या १ त्रयी वेदत्रयी २ वार्ता कृषिगोरक्षादि ३ दण्डनीतिः नीतिशास्त्रम् ४ इति पुनः किं० मतिः ? अत एव **विवेकिनी** विवेकयुक्ता गुणदोषाविष्करणसमर्थेत्यर्थः । केव ? करिणी**व** यथा **करिणी** हस्तिनी **पङ्कं** कर्दमम् **एत्य** प्राप्य **अवसीदति** तत्रैव ब्रुडति पुनर्न निस्सरतीत्यर्थः । एतन्न युक्तं तवेति भावः । अथ समासः । विवेकोऽस्यास्तीति विवेकिनी । नृपाणां विद्या नृपविद्यास्तासु नृ० । करोऽस्या अस्तीति करिणी । इति वृत्तार्थः ॥६॥

एवमपि किमस्माकं हीयते येनेत्थमुपालभ्यते इत्याह -

विधुरं किमतः परं परैरवगीतां गमिते दशामिमाम् ।
अवसीदति यत् सुरैरपि त्वयि संभावितवृत्ति पौरुषम् ॥७॥

'विधु०' व्याख्या । हे नृप ! **यत्** पौरुषं पराक्रमं **त्वयि** त्वद्विषये **अवसीदति** नश्यति खेदं प्राप्नोतीत्यर्थः । **अतः परम्** अतोऽन्यत् अधिकं **विधुरं** कष्टं किमस्तीति शेषः । न किंचिदित्यर्थः । त्वयि किं० ? **परैः** शत्रुभिः **इमा**मेतां वनवासलक्षणां **दशाम**वस्थां **गमिते** प्रापिते दशां किंलक्षणाम् ? **अवगीतां** निन्दितां गर्हितामित्यर्थः । 'अवगीतं विगर्हिते मुहुर्दृष्टेऽपवादे च' इति *हैमानेकार्थः* [३-९४] । किं० पौरुषम् ? **सुरैरपि** देवैरपि **संभावितवृत्ति** बहुकृतप्रसारं निश्चितसद्भावं वा क्वापि न व्यभिचरतीति भावः। अयमर्थः-पुरुषाधिकारस्य दुर्दशा कष्टतरा सा चेत्पुनः शत्रुकृता स्यात् तन्महत्कष्टं तच्च त्वदुपेक्षयेत्युपालभ्यते इति । अथ समासः । संभाविता वृत्तिर्यस्य तत् संभावितवृत्ति । पुरुषस्य कर्म पौरुषम् । इति वृत्तार्थः ॥७॥

अथोपेक्षाकालत्वादियमुपेक्षा इत्याशङ्क्य नायमुपेक्षाकाल इति श्लोकद्वयेन व्यनक्ति -

द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसंपत्प्रवणः परिक्षयः ॥८॥

'द्विष०' व्याख्या । हे राजन् ! **सुमेधसा** प्राज्ञेन पुरुषेण विजिगीषुणा **द्विषतां** शत्रुणा**मुदयो** वृद्धिलक्षणोऽभ्युदयः **सुमर्षणः** सुसहः कदा सुसह इत्याह-यदि **अस्वन्ततरो**ऽशोभनान्तो भवति तदा सुसह उपेक्ष्य इत्यर्थः। किं० उदयः ? **गुरु**र्महानपि इत्यध्याहारः अथ च **भूति**मुदय**मिच्छता** वाञ्छता पुरुषेण द्विषतां **महानपि** गुरुरपि **परिक्षयो** विनश्यदवस्थां(था) न सुमर्षणः न सुसहः नोपेक्ष्य इत्यर्थः। किं० परिक्षयः ? **फलसंपत्प्रवणः** अर्थातिशयाभिमुखः फलसमृद्धितत्परः परिक्षयोऽपि न सह्य इत्यर्थः । अथ समासः । सुष्ठु शोभना मेधा यस्य स सुमेधास्तेन सुमेधसा । सुष्ठु अन्तो यस्य स स्वन्तः अतिशयेन स्वन्तः स्वन्ततरः न स्वन्ततरः अ० । सुखेन मृष्यते इति सुमर्षणः । फलस्य संपत् फलसंपत् फलसंपदि प्रवणः फ० । परि समन्तात् क्षयः परिक्षयः । इति वृत्तार्थः ॥८॥

अथोभयोरपि मध्ये एकतरस्योदयक्षययोर्गतिमुक्त्वा इदानीं युगपत्परिक्षयागमे गतिमाह -

अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः ।
क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥९॥

'अचि०' व्याख्या । **कृती** पण्डितः **परस्य** शत्रोः **क्षययुक्तिं** हानिम् **अचिरेण** शीघ्रभाविनीं भूयसीं **विगणय्य** विचार्य **च** पुनः **आत्मनः** स्वस्य क्षययुक्तिं **विपरीतां** चिरभाविनीम् अल्पीयसीं च **विगणय्य** विचार्य ज्ञात्वा वा **उपेक्षते** उपेक्षां कुर्यात् उदासीनः स्यादित्यर्थः । **अन्यथा** उक्तवैपरीत्ये उक्तवैपरीये इति किम् ? अचिरेण शीघ्रम् आत्मनः स्वस्य अग्रे इति शेषः । **भूयसीं** गुर्व्वीं क्षययुक्तिं विगणय्य ज्ञात्वा परस्य शत्रोः अग्रे इति शेषः । क्षययुक्तिं विपरीताम् अल्पीयसीं विगणय्य विचार्य अर्थात्(द)भ्युदयमवेक्ष्य **तत् प्रतिकारं** तस्याः क्षययुक्तेः प्रतिकारम् अचिरेणाशु **कुरुते** प्रतिक्रियां करोति शत्रुणा समं युद्धं करोतीत्यर्थः। एवं च सति यदा शत्रोरुदयः स्वस्य च अतिपरिक्षयः यथास्माकं तदा

किं कर्तव्यं सद्यः प्रतिकुरुते इत्यर्थात्सिद्धमित्यनुसंधेयम् । अथ समासः । अतिशयेन बह्वी भूयसी तां भूयसीम् । क्षयस्य युक्तिः क्षययुक्तिः तां क्षययुक्तिम् । कृतमनेन कृती तस्याः प्रतिकारः तत्प्रतिकारस्तं तत्प्रतिकारम् । इति वृत्तार्थः ॥९॥

वर्धमानानां शत्रूणाम् उपेक्षायां यद्(यो)दोषः स्यात् तमेवाह –

अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया ।
अपयान्त्यचिरान्महीभुजां जननिर्वादभयादिव श्रियः ॥१०॥

'अनु०' व्यख्या । हे नृप ! **महीभुजां** राज्ञां **श्रियो** लक्ष्म्यः **अचिरात्** शीघ्रम् **अपयान्ति** अपसरन्ति समीपात् पलाय्य दूरं गच्छन्तीत्यर्थः । किंकुर्वतां महीभुजाम् ? **अनीहया** अनुद्यमेन अनुत्साहेन वा **द्विषतां** वैरिणाम् **उदेष्यतीं** वर्धिष्यमाणां **प्रभुशक्तिं** कोशदण्डजं तेजः **अनुपालयताम्** उपेक्षमाणानाम् उत्प्रेक्ष्यते **जननिर्वादभयादिव**[1] एवंविधनिरीहस्य श्रियो पुरोक्ता इति लोके अस्माकमपयशो मा भूदिति अतो हेतोरिव अपयान्तीत्युत्प्रेक्षा 'स्त्रीभिः षण्ढ इव श्रीभिरलसः परिभूयते (परित्यज्यते)' इति (२३) अतः पराक्रमितव्यं इति भावः । अथ समासः । अनुपालयन्तीति अनुपालयन्तस्तेषामनुपालयताम् उदेश्यतीति उदेष्यती ताम् उदेष्यतीम् । प्रभोः शक्तिः प्रभुशक्तिस्तां प्र० । द्विषन्तीति द्विषन्तस्तेषां द्विषताम् । न ईहा अनीहा तया अनीहया । न चिरात् अचिरात् । महीं भुञ्जन्तीति महीभुजस्तेषां म० । जनानां निर्वादो जननिर्वादस्तस्मात् जन० । इति वृत्तार्थः ॥१०॥

ननु परिक्षीणः कथं प्रबलमभियुज्यते इत्यत्र आह –

क्षययुक्तमपि स्वभावजं दधतं धाम शिवं [1]विवृद्धये ।
प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥११॥

'क्षय०' व्याख्या । हे नृप ! **प्रजा** लोका **नृपं** राजानं **प्रणमन्ति** नमस्कुर्वन्ति अनुसरन्तीत्यर्थः[2] । किंलक्षणं नृपम् ? **क्षययुक्त**मपि क्षीणलक्ष्मीक**मपि** पुनः किंविशष्टम् ? **स्वभावजं** स्वभावाज्जातं **शिवं** निरुपद्रवं **धाम** क्षात्रतेजो **दधतं** धारयन्तं वहन्तमित्यर्थः । पुनः किं० ? **विवृद्धये** समृद्धये **उत्थितम्** उत्साहयुक्तं पुनः किं० ? अत एव **अनपायम्** अपायरहितं कमिव ? प्रतिपच्चन्द्र**मिव** यथा प्रतिपच्चन्द्रं द्वितीयाचन्द्रं प्रतिपदि अदृश्यत्वाद्द्वितीयाचन्द्रमिति व्याख्येयं प्रजाः प्रणमन्ति किंलक्षणं चन्द्रम् ? क्षययुक्तमपि क्षीणमपि पुनः किं० ? **स्वभावजं** स्वाभाविकं **शिवं** सर्वलोकाह्लादकारकं **धाम** प्रकाशं **दधतं** धारयन्तं पुनः किं० ? **विवृद्धये** वृद्ध्यर्थमुत्थितमुदितं पुनः किं० ? अनपायम् अविनाशिनं वर्द्धिष्णुमित्यर्थः । क्षययुक्तस्यापि उत्साहः कार्यसिद्धेर्निदानमित्यर्थः । 'जयं हि सततोत्साही दुर्बलोऽपि समश्नुते' इति (२४) *कामन्दकः* । अथ समासः । क्षयेन युक्तस्तं क्षययुक्तम् । स्वभावाद् जातं स्वभावजम् । विशेषेण वर्धनं

1. समृ० म. इदं च पा० ।

१. निकृष्टपुरुषानुरागोत्थलोकापवादभयादिव -म. । २. प्रह्वीभावेन वर्तन्ते -म. ।

विवृद्धिस्तस्यै विवर्ध(वृद्ध)ये। न विद्यते अपायो यस्य स अनपायस्तम् अ०। प्रतिपदि चन्द्रः प्रतिपच्चन्द्रस्तं प्र०। इति वृत्तार्थः ॥११॥

ननु प्रभुशक्तिशून्यस्य उत्साहः कुत उपयुज्यते(त) इत्यत्राह -

प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गविनिर्णयो नयः।
स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥१२॥

'प्रभ०' व्याख्या। हे नृप! **यो नयः** सन्धि १ विग्रह २ यान ३ आसन ४ संश्रय ५ द्वैधसंभाव ६ षाड्गुण्यलक्षणः सन्धिः पणबन्धः १ विग्रहोऽपकारः २ यानमभ्युच्चयः ३ आसनमुपेक्षणं ४ संश्रयः परस्यात्मसमर्पणं ५ द्वैधीभावः एकेन सह सन्धाय परेण सह विग्रहकरणम् ६ इति **खल्विति** निश्चितं **कृतपञ्चाङ्गविनिर्णयो** वर्तते

सहायाः साधनोपाया विभागो देशकालयोः। विनिपातः प्रतिकारः सिद्धिः पञ्चाङ्गमिष्यते' ॥२५॥ इति यद्वा कर्मणामारम्भोपायः १ पुरुषद्रव्यसंपद् २ देशकालविभागः ३ विनिपातप्रतीकारः ४ कार्यसिद्धिश्चेति ५ **कृतो** विहितः पञ्चाङ्गानां विनिर्णयो यत्र स किंलक्षणो नयः? 'कोशदण्डयोः' **कोशो**ऽर्थराशिः भाण्डागारः **दण्डः** गजरथाश्वपदातिलक्षणं चतुर्विधं सेनाङ्गं तयोः **प्रभवः** कारणं स नयो **विधेयपदेषु** विपक्षोच्छेदनलक्षणरूपेषु कृत्यवस्तुषु 'पदं स्थाने विभक्त्यन्ते शब्दे वाक्येऽङ्कवस्तुनोः' इति *हैमानेकार्थः* [२-२२५] **दक्षतां** क्षिप्रकारित्वमुत्साहमिति यावत् **अनुरुध्यते** अनुसरति क इव? **लोक इव** यथा लोकः कृषीब(व)लजनः **नियतिं** भाग्यम् अनुरुध्यते अनुसरति 'नियती दैवसंयमौ' इति *हैमानेकार्थः* [३-२६३]। मन्त्रस्यापि मूलमुत्साहः तन्मूलायाः प्रभुशक्तेः मूलमिति किमु वक्तव्यं अतः स एवाश्रणीयः यतो नक्तन्दिवं मन्त्रयतस्तस्यापि प्रभोर्निरुत्साहस्य न किञ्चित्सिध्यतीति भावः। अथ समासः। प्रभवति अस्मादिति प्रभवः। कोशश्च दण्डश्च कोशदण्डौ तयोः को०। पञ्च च तानि अङ्गानि च पञ्चाङ्गानि पञ्चाङ्गानां विनिर्णयः पञ्चाङ्गविनिर्णयः कृतः पञ्चाङ्गविनिर्णयो यत्र स कृत०। विधातुमर्हानि विधेयानि विधेयानि च तानि पदानि च विधेयपदानि तेषु वि०। दक्षस्य भावो दक्षता तां दक्षताम्। इति वृत्तार्थः॥ १२ ॥

ननु सोत्साहस्याप्यसहायस्य कथमर्थसिद्धिरित्यत आह -

अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः।
विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥ १३ ॥

'अभि०' व्याख्या। हे नृप! **मनस्विनो** धीरस्य वीरपुरुषस्य वा **आत्मपौरुषं निजालम्बनम्** आश्रयणं सहकारि वा **मतं** कथितम् इष्टं सम्मतमित्यर्थः। किं० मनस्विनः? **अभिमानवतः** अहङ्कारधनस्य यथा कस्यचिदुत्तं(त्तुङ्)गमारोहतः किञ्चित्पतनप्रतिबन्धकमनुचरहस्तादिकमालम्बनं तद्वदिति भावः। किं पौरुषादन्यैः सहायैः शूराणामिति भावः। केवलं पराक्रम एव प्रधानमित्यर्थः। पुनः किं०? **प्रियमिष्टमुच्चैः पदम्** उन्नतस्थानं राज्यादिकम् **आरुरुक्षतः** आरोढुमिच्छतः प्राप्तुकामस्येत्यर्थः। पौरुषं विना नान्यो

वैरिजयोपायोऽस्तीत्यर्थः । किं० पौरुषम् ? **विनिपातनिवर्तनक्षमं** कष्टनिवारणसमर्थं 'विनिपातस्तु दैवतः व्यसने चावपाते च' इति *हैमानेकार्थः* [४-१२७] । अथ समासः । अभिमानोऽस्यास्तीति अभिमानवान् तस्य अ० । प्रशस्तं मनोऽस्यास्तीति मनस्वी तस्य मनस्विनः । आरोढुमिच्छतीति आरुरुक्षति आरुरुक्षतीति आरुरुक्षत् तस्य आ० । विनिपातस्य निवर्तनं विनिपातनिवर्तनं विनिपातनिवर्तने क्षमं वि० । पुरुषस्य कर्म पौरुषम् आत्मनः पौरुषम् आत्मपौरुषम् । इति वृत्तार्थः ॥ १३ ॥

पौरुषानङ्गीकारे दोषमाह -

विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥ १४ ॥

'विप०' व्याख्या । हे नृप ! **विपदः** कष्टानि **अविक्रमं** पौरुषरहितं पुरुष**मभिभवन्ति** पराभवन्ति तिरस्कुर्वन्ति **आयति**रुत्तरकालः **आपदुपेतं** विपद्युक्तं नरं **रहयति** त्यजति उत्तरकालस्तस्य शोभनो न भवतीत्यर्थः । **निरायतेः** प्रतापरहितस्य नरस्य **लघुता** लघुत्वं **नियता** अवश्यंभाविनी न कश्चिदेनमाद्रियत इत्यर्थः । **अगरीयान्** लघीयान् पुमान् **नृपश्रियो** राजलक्ष्म्या **न पदं** न स्थानम् आश्रयो न भवतीति भावः। पौरुषमेव राज्यसाधनं तस्मात्पौरुषं कर्तव्यमिति भावः[1] । अथ समासः । न विद्यते विक्रमो यस्मिन् सोऽविक्रमस्तमविक्रमम् । आपद्भिरुपेत आपदुपेतस्तमापदुपेतम् । लघोर्भावः लघुता । निर्गताऽऽयतिर्यस्मात् स निरायतिस्तस्य निरायतेः । अतिशयेन गुरुर्गरीयान् । नृपस्य श्रीः नृपश्रीस्तस्याः नृपश्रियः यद्वा नृपेति पदच्छेदः । इति वृत्तार्थः ॥१४॥

फलितमाह -

तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ १५ ॥

'तदलं०' व्याख्या । हे नृप ! तस्मात् उपेक्षायां दोषसंभवात् **व्यवसायवन्ध्यताम्** उद्यमशून्यताम् **अवलम्ब्य** आश्रित्य **अलं** कृतम् अवलम्बनेन अलं पूर्यतामित्यर्थः । किं० व्यवसायवन्ध्यताम् ? **उन्नतेर**भ्युदयस्य **प्रतिपक्षं** शत्रुभूताम् उद्योगरहितस्य उदयो न भवतीति तात्पर्यं तथा हि **समृद्धयः** संपदः **विषादेन** अनुद्यमेन **समं** सार्धं **न निवसन्ति** न निवासं कुर्वन्ति किं० समृद्धयः ? **पराक्रमाश्रयाः** पौरुषसाध्याः संपदो नानुत्साहेन सह निवसन्ति । अथ समासः । वन्ध्यस्य भावो वन्ध्यता व्यवसायस्य वन्ध्यता तां व्य० । पराक्रम आश्रयो यासां ताः पराक्रमाश्रयाः । इति वृत्तार्थः ॥ १५ ॥

ननु समयः प्रतीक्ष्यते किमौत्सुक्येनेत्येवमाह -

अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना ।
धृतराष्ट्रसुतेन सुत्यजाश्चिरमासाद्य नरेन्द्रसंपदः ॥ १६ ॥

१. अत्र पूर्वपूर्वस्याविक्रमत्वादेरुत्तरोत्तरविपदादिकं प्रति कारणत्वात्कारणमालाख्योऽलंकारः -म.

'अथ०' व्याख्या । **अथेति** पक्षान्तरे हे राजन् ! **चेत्** यदि त्वया **अवधिः** त्रयोदशवार्षिकी मर्यादा **प्रतीक्ष्यते** प्रतिपाल्यते त्रयोदशवर्षाणि यावत् तूष्णीं स्थीयते चेत् 'अवधिः स्यादवधाने कालसीमबिलेष्वपि' इति *हैमानेकार्थः* [३-३३३] । तर्हि **धृतराष्ट्रसुतेन** सुयोधनेन **चिरं** चिरकालं त्रयोदशवर्षाणि यावत् **नरेन्द्रसंपदः** राजश्रियः **आसाद्य** अनुभूय **कथं सुत्यजाः** कथं सुखेन त्यजनीया भविष्यन्तीति शेषः । ज्ञातास्वादेन तेन पश्चादपि युद्धक्लेशं विना न त्यक्ष्यन्त इत्यवधिप्रतीक्षणं व्यर्थमिति भावः । यद्वा नरेन्द्रेति पदच्छेदः तदा हे **नरेन्द्र** इति संबोधनपदं कथंभूतेन धृतराष्ट्रसुतेन ? **आविष्कृतजिह्मवृत्तिना** प्रकटितकुटिलव्यवहारेण । अथ समासः । जिह्मस्य वृत्तिः जिह्मवृत्तिः आविष्कृता जिह्मवृत्तिर्येन स आविष्कृतजिह्मवृत्तिस्तेन आ० । धृतराष्ट्रस्य सुतः धृतराष्ट्रसुतः तेन धृ० । सुखेन त्यज्यन्त इति सुत्यजाः । नराणाम् इन्द्राः नरेन्द्राः नरेन्द्राणां संपदो न० पदच्छेदेन नराणामिन्द्रो नरेन्द्रस्तत्संबोधने हे नरेन्द्र । इति वृत्तार्थः ॥ १६ ॥

अथ यदि दैववशात्स स्वयमेव संपदो दास्यति तदा किमर्थं पौरुषम् आश्रयणीयमित्याह-

द्विषता विहितं त्वयाथवा यदि लब्धा पुनरात्मनः पदम् ।
जननाथ ! तवानुजन्मनां कृतमाविष्कृतपौरुषैर्भुजैः ॥ १७ ॥

'द्विष०' व्याख्या । **हे जननाथ** ! हे युधिष्ठिर ! **अथवा** इति पक्षान्तरे **त्वया यदि** चेत् **द्विषता** शत्रुणा सुयोधनेन **विहितं पुनः** प्रत्यर्पितम् **आत्मनः पदं** निजं राज्यं **लब्धा** लप्स्यते तर्हि **तवानुजन्मनां** लघुभ्रातृणां **भुजै**र्बाहुभिः **कृतं** श्रितं भुजैर्न किञ्चित्साध्यमित्यर्थः । किं० भुजैः ? **आविष्कृतपौरुषैः** प्रकटितपराक्रमैः राज्यदानादानयोर्वैरिणामेव स्वातन्त्र्ये अस्मद्भुजानां वैफल्यमित्यर्थः । क्षत्रियस्य वैरिणां विजयं विधाय गृहीतं राज्यं यशसे न नु (तु) तद् दत्तमिति भावः । 'क्षत्रियस्य विजेतव्यमिति' (२६) शास्त्रात् क्षात्रेणैव राज्यं ग्राह्यमिति भावः । कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठ्यते 'कृतमिति निवारणनिषेधयोरिति' *गणव्याख्याने* । 'पौरुषम् ऊर्ध्वविस्तृतदोःपाणिपुरुषोन्मानतेजसोः पुंसः कर्मणि भावे च' इति *हैमानेकार्थः* [३-७३३/४] । अथ समासः । जनानां नाथो जननाथस्तत्संबोधनं हे जननाथ । अनु पश्चात् जन्म येषां ते अनुजन्मानस्तेषाम् अ० । आविष्कृतं पौरुषं यैस्ते आविष्कृतपौरुषास्तैरा० । इति वृत्तार्थः ॥ १७ ॥

ननु साम्नैव कार्यसिद्धौ किं क्षात्रेण ? यथाह *मनुः*- (७-१९८)

'साम्ना दानेन भेदेन समस्तैरुत वा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥ २७ ॥'

इति तत्किमाग्रहेणत्याशङ्क्याह -

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः ।
लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः ॥ १८ ॥

'मद०' व्याख्या । हे नृप ! **मृगाधिपः** सिंहः **स्वयम्** आत्मना **हतै**र्मारितैः **करिभि**र्हस्तिभिः

वर्तयते वृत्तिं करोति तैरेव जीवति स्वशरीरं पोषयतीत्यर्थः । नान्यैर्लब्धैरिति भावः । किं० करिभिः ? **मदसिक्तमुखैः** मदोन्मत्तैरित्यर्थः । **खलु** निश्चितं **महान्** पुमान् **तेजसा** प्रभावेन 'तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि' इति *वैजयन्ती* । **जगत्** विश्वं **लघयन्** लघुकुर्वन् **अन्यतः** परस्मात् पुरुषात् **भूति**मुदयं वृद्धिं वा **न इच्छति** न वाञ्छति न हि तेजस्विनः पुरुषस्य पराधीनवृत्तित्वं युक्तं मनुवचनं त्वशूरविषयमिति । अथ समासः । मदेन सिक्तानि मुखानि येषां ते मदसिक्तमुखाः तैः म० । मृगाणामधिपो मृगाधिपः । करो विद्यते येषां ते करिणस्तैः करिभिः । अन्यस्मादिति अन्यतः । इति वृत्तार्थः ॥१८॥

ननु युद्धात्पाक्षिको लाभः उपायान्तरैस्तु न तथेत्याशङ्क्याह -

अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥

'अभि०' व्याख्या । हे राजन् ! **ननु** निश्चितं तस्य मानिनः पुरुषस्य **लक्ष्मीः** श्रीः **आनुषङ्गिकं फलम्** अप्रधानं फलं वर्तते तस्य कथंभूतस्य ? **अभिमानधनस्य** अहङ्कारयुक्तस्य वैरनिर्यातनमात्र-निष्ठस्येत्यर्थः । पुनः कथंभूतस्य ? तस्य **गत्वरै**र्गमनशीलै**रसुभिः** प्राणैः **स्थास्नु** स्थिरं **यशश्चिचीषतः** यशोऽर्जयितुकामस्य किंलक्षणा लक्ष्मीः ? **अचिरांशुविलासचञ्चला** विद्युद्विलसितवच्चपला अत एव मानत्राणजं यश एव मुख्यं फलम् अभ्युच्चयस्तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्[1]यमित्यर्थः । अथ समासः । अभिमान एव धनं यस्य स अभिमानधनस्तस्य अ० । गमनशीला गत्वरास्तैर्गत्वरैः । तिष्ठतीत्येवंशीलं स्थास्नु । चेतुमिच्छति चिचीषति चिचीषतीति चिचीषन् तस्य चि० । न चिरमचिरम् अचिरमंशवो यस्यां सा अचिरा(रां)शुः अचिरांशोर्विलासोऽचिरांशुविलासः अचिरांशुविलासवत् चञ्चला अ० । अनुषङ्गादागतम् आनुषङ्गिकम् । इति वृत्तार्थः ॥ १९ ॥

ननु अल्पस्य मानस्य हेतोः कथं प्राणत्यागः कर्तुं शक्यते यतो 'जीवन् नरो भद्रशतानि पश्यति' (२८) इत्याशङ्क्याह -

ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥

'ज्वलि०' व्यख्या । हे नृप ! **जनो** लोकः **भस्मनां चयं** रक्षाणां समूहं पादैः कृत्वा **आस्कन्दति** आक्रमति अदाहकत्वात् इति भावः । परन्तु **ज्वलितं** ज्वलन्तं **हिरण्यरेतसम्** अग्निं पदादिना नास्कन्दति नाक्रामति दाहकत्वात् इति भावः । **अतो** हेतोः **मानिनः** पुरुषाः गर्वयुक्ता नराः **अभिभूत (ति) भयात्** प्राणलाभेन रक्षणेन वा तेजस्त्यागे लोकाः पराभविष्यन्तीति भयात् **असून्** प्राणान् **सुख**मक्लेशं यथा स्यात् तथा **उज्झन्ति** त्यजन्ति [**धाम** तेजस्तु नोज्झन्ति ।] मानहानिकरात् जीवनात् स्वतेजसा सह मरणमेव वरमिति भावः । अथ समासः । हिरण्यं रेतो यस्य स हिरण्यरेताः तं हि० । अभिभवनम्

१. अत्रास्थिरप्राणत्यागेन स्थिरयशःस्वीकाराभिधानान्न्यूनाधिकविनिमयाख्यः परिवृत्त्यलंकारः -म. ।

अभिभूतिः अभिभूतेर्भयमभिभूतिभयं तस्माद० । मानो विद्यते येषां ते मानिनः । इति वृत्तार्थः ॥२०॥

चिन्तया अत्र किं प्रयोजनं किन्तु तेजस्विनाम् अयं स्वभाव एव यत् परोत्कर्षो न सोढव्य इत्याह –

किमवेक्ष्य*[1] *फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया ॥ २१ ॥

'किम०' व्याख्या । हे राजन् ! **मृगाधिपः** केसरी **किं फलं** किं प्रयोजन**मवेक्ष्य** विलोकयित्वा **ध्वनतो** गर्जतः **पयोधरान्** मेघान् **प्रार्थयते** अभियाचते तेभ्यः किं फलमपेक्ष्य अभियाति न किञ्चित् प्रयोजनमपेक्ष्येत्यर्थः । 'याच्ञायामभिधाने च प्रार्थना कथ्यते बुधैः'इति *केशवः* । **खलु** निश्चितं **महीयसो** महत्तरस्य उत्तमनरस्य **सा प्रकृतिः** स स्वभावः सा का **यया** प्रकृत्या **अन्यसमुन्नतिम्** अन्यस्यौन्नत्यं **न सहते** परवृद्धिं न वाञ्छतीत्यर्थः । महतां परोत्कर्षभञ्जनमेव पुरुषार्थभावः । अथ समासः । धरन्तीति धराः पचिनन्दिग्रहादेरयुणिनि' इत्यनेन सूत्रेण अप्रत्ययः । पयसां धराः पयोधरास्तान् पयोधरान् । ध्वनन्तीति ध्वनन्तस्तान् ध्वनतः । अतिशयेन महान् महीयान् तस्य महीयसः । अन्यस्य समुन्नतिः अन्यसमुन्नतिः ताम् अ० । इति वृत्तार्थः ॥ २१ ॥

उक्तप्रयोजनं निगमयति –

कुरु तन्मतिमेव विक्रमे नृप ! निर्धूय तमः प्रमादजम् ।
ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥ २२ ॥

'कुरु०' व्याख्या । हे नृप ! **तस्मात्** हेतोः **प्रमादजं** प्रमादा[दा]गतं **तमो** मोहम् अज्ञानं वा **निर्धूय** त्यक्त्वा **विक्रमे** पराक्रमे **एव मतिं** बुद्धिं **कुरु** विस्तारय न तूपायान्तरमित्यर्थः । न च विक्रमवैफल्यं शङ्कनीयमित्याह- **एतत्** इदं त्वं **ध्रुवं** निश्चितम् **अवेहि** जानीहि 'ध्रुवं स्थिरे नित्ये निश्चिते च खेऽजस्रतर्कयोः' इति *हैमानेकार्थः* [२-५१६] । तत्किं वक्ष्यमाणमित्याह- **विद्विषां** शत्रूणां **विपत्तयः** आपदः **त्वदनुत्साहहता** वर्तते भवदनुद्यमेन गताः । यदि पुनस्त्वमुत्साहं कुरुषे तर्हि तेषां रिपूणां विपद आगत(ता) एवेत्यर्थः । अथ समास । प्रमादात् जातं प्रमादजम् । विशेषेण द्विषन्तीति विद्विषः तेषां विद्विषाम् । न उत्साहः अनुत्साहः तवानुत्साहः त्वदनुत्साहः त्वदनुत्साहेन हताः त्व० । इति वृत्तार्थः ॥२२॥

न चास्माकं शत्रुकृता पराभवशङ्का कार्येत्याह –

द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतान् ।
प्रसहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः ॥ २३ ॥

'द्विर०' व्याख्या । हे राजन् ! **द्विषतां** शत्रूणां मध्ये **कः** स विद्यते यस्**तव** भवतश्चतुरो**ऽनुजान्**

1. किमपेक्ष्य – म. इदं च पा.

लघुभ्रातॄन् **आयतान्** आगच्छतः **रणे** संग्रामे **प्रसहेत** सोढुं शक्नुयात् न कोपीत्यर्थः । अतो निःशङ्कं प्रवर्तस्वेति भावः । किं० अनुजान् ? । उत्प्रेक्ष्यते **दिग्विभावितान्** दिग्प्रसिद्धान् आयतान् आगच्छतः चतुरो **द्विरदानिव** दिग्गजानिव पुनः किं० अनुजान् ? उत्प्रेक्ष्यते दिग्विभावितान् दिशिप्रसिद्धान् दीर्घान् महतश्चतुरस्**तोयनिधीनिव** द्विरदान(नि)वेति बलवत्त्वम् तोयनिधीनिव [अनेन] गाम्भीर्यमुक्तं किंलक्षणान् अनुजान्? **शतमन्युतेजसः** इन्द्रसमविक्रमान् इत्यनेन शूरत्वमुक्तम् । अथ समासः । दिक्षु विभाविताः दिग्विभावितास्तान् दि० । तोयं निधीयते येषु ते तोयनिधयस्तान् तो० । शतं मन्यवो यस्य स शतमन्युः शतमन्युवत् तेजो येषां ते शतमन्युतेजसस्तान् श० । इति वृत्तार्थः ॥ २३ ॥

आशीर्वादव्याजेन फलितमाह -

ज्वलतस्तव जातवेदसः सततं वैरिकृतस्य चेतसि ।
विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः ॥ २४ ॥

'ज्वल०' व्याख्या । हे राजन् ! **रिपुनारीनयनाम्बुसन्ततिः** शत्रुवनिताश्रुजलश्रेणिः **तव चेतसि** भवच्चित्ते **ज्वलतो** ज्वलितस्य **जातवेदसः** क्रोधाग्नेः **शमं** शान्तिं **विदधातु** करोतु त्वद्वैरिवनिताश्रुप्रवाहस्तव वैराग्निं हृदये ज्वलन्तं शमयतामित्यर्थः । विपूर्वको डुधा धारणपोषणयोः (धा)धातुः करणार्थमाचष्टे किं० रिपु० ? **शिवेतरा** अमङ्गला वैधव्यदुःखजन्यत्वात् कथंभूतस्य जातवेदसः ? **सततं** निरन्तरं **वैरिकृतस्य** शत्रुजनितस्य वैर्ञिनशादितस्य (?) कोपाग्नेः वैरिवधं विना शान्त्यसंभवात् अवश्यं तद्वधः त्वया कर्तव्य इत्यर्थः । अथ समासः । ज्वलतीति ज्वलन् तस्य ज्वलतः । वैरिणा कृतः वैरिकृतः तस्य वै० । शिवात् इतरा शिवेतरा। रिपूणां नार्यो रिपुनार्यो रिपुनारीणां नयनानि रिपुनारीनयनानि तेषु अम्बूनि रीपुनारीनयनाम्बूनि तेषां संततिः रि० । इति वृत्तार्थः ॥ २४ ॥

इति दर्शितविक्रियं सुतं मरुतः क्रोधपरीतमानसम् ।
उपसान्त्वयितुं महीपतिर्द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

'इति०' व्याख्या । अथ **महीपतिः** राजा युधिष्ठिरो **मरुतः सुतं** वायुपुत्रं भीमसेनम् **उपसान्त्वयितुं** मनोहरवाक्यैः अनुनेतुम् **उपचक्रमे** प्रारेभे, धर्मराजो भीमम् अनुनेतुं प्रवृत्त इत्यर्थः । किं० भीमसेनम् ? **इति** पूर्वोक्तप्रकारेण **दर्शितविक्रियं** दर्शितवचनारम्भकोपविकारं पुनः किं० ? **क्रोधपरीतमानसं** कोपाक्रान्तचित्तं कमिव ? **दुष्टद्विरदमिव** यथा कश्चित् पुमान् मदोद्धतं मतङ्गजमुपसान्त्वयितुम् उपक्रामति किं० द्विरदम्? इति **दर्शितविक्रियं** दर्शितविकारं पुनः किं० द्विरदम् ? **क्रोधपरीतमानसं** कोपव्याप्तचित्तं राज्ञां हि उपकारविशेषाकाङ्क्षया कथमप्यवश्यो जनः शनैः शनैः द्विरदवत् वशीकरणीयो न तु त्याज्य इति भावः । अथ समासः । दर्शिता विक्रिया येन स दर्शितविक्रियः तं द० । क्रोधेन परीतं क्रोधपरीतं मन

१. क्रोधस्य विषयस्य निगरणेन विषयिणो जातवेदस एवोपनिबन्धनाददतिशयोक्तिरलंकारः । तत्रापि क्रोधस्य जातवेदसो भेदेऽप्यभेदाध्यवसायाद् भेदेऽभेदरूपा । तत एवाम्बुनिर्वाप्यत्वोक्तिश्च घटते । तथा च यथाऽम्बुसेकेनाग्निः शाम्यति तथा शत्रुवधेन क्रोध इत्यौपम्यं गम्यते -म. ।

एव मानसं क्रोधपरीतं मानसं यस्य स क्रोधपरीतमानसस्तं क्रो० । मह्याः पतिर्महीपतिः । द्वौ रदौ यस्य स द्विरदस्तं द्वि० । इति वृत्तार्थः ॥२५॥

अथ युधिष्ठिरो भीमसेनमुपसान्त्वयन् किमुवाचेत्याह-प्रथमं तावत् स्तुत्यादिभिः प्रसादयति-

अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

'अप०' व्याख्या । हे भीम ! **तव गिरां विस्तरे** भवतो वाक्प्रपञ्चे **विमला** निर्मला **मति**र्बुद्धिरस्माभि**रभिदृश्यते** अनुमीयते यादृशं तव हृदयं तथाविध एव वाग्विस्तर इत्यर्थः । किं० गिरां विस्तरे ? **अपवर्जितविप्लवे** त्यक्तवाक्दोषे पुनः किं० ? **शुचौ** शुद्धे 'शुचिः शुद्धे सितेऽनले ग्रीष्माषाढानुपहतेषूपधाशुद्धमन्त्रिणि' इति *हैमानेकार्थः* [२-५९] । पुनः किं० ? **हृदयग्राहिणि** चित्तहरे पुनः किं० ? **मङ्गलास्पदे** मङ्गलवस्तुत्वात् कल्याणानां स्थाने आदर्शदर्शनात् मङ्गलं स्यात् यदुक्तम्-

रोचनं चन्दनं हेम मृदङ्गदर्पणं मणीन् । गुरुमग्निं तथा सूर्यं प्रातः पश्येत् सदा बुधः ॥२९॥

इति *पुराणवचनात्* मृदङ्गे मृदङ्गध्वनिं शृणुयादिति अत्र वाचां वैशद्यादेव मतिवैशद्यमनुमीयते तत्पूर्वकत्वात्तस्येत्यर्थः । अथ समासः । अपवर्जितो विप्लवो येन सोऽपवर्जितविप्लवस्तस्मिन् अ० । हृदयं गृह्णातीति हृदयग्राही तस्मिन् हृ० । मङ्गलानाम् आस्पदं मङ्गलास्पदं तस्मिन् म० । इति वृत्तार्थः ॥२६॥

[१]स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥ २७ ॥

उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

'स्फुट०' 'उपप०' व्याख्या । हे भीम ! **अनीदृगाशयः** अविद्यमान ईदृगाशयः इत्थं क्षत्रतेजोयुक्तातिशयो यस्य सोऽनीदृगाशयः न भवत्सदृशाभिप्राय इत्यर्थः । **कः** पुमान् **इदृग्** इत्थं क्षत्रतेजोयुक्त**मिदं** वचनं **प्रसभं** बलात्कारेण **वक्तुं** जल्पितुम् **उपक्रमेत** उपक्रमं करोति न कोऽपीत्यर्थः । इत्थं वक्तुमुपक्रामितेव नास्ति वक्ता तु दुरापास्त एवेति भावः । हे भीम ! त्वया **पदैः**स्त्याद्यन्तशब्दैः कृत्वा **स्फुटता** विशदार्थता **न अपाकृता** न त्यक्ता झटित्यर्थप्रतीतेः तर्हि अर्थगौरवं न भविष्यतीत्याह- **च** पुनः त्वया **अर्थगौरवम्** अर्थप्राधान्यं **न स्वीकृतं** न, अपितु स्वीकृतमेव महार्थत्वात् वैशद्यप्रसक्तार्थगौरवाभावनिवृत्यर्थं नद्वयम् 'संभाव्यनिषेधानिषेधनिवर्त्तने द्वौ प्रतिषेधौ' इति (३०) *वामनः* । **च** पुनस्त्वया गिराम् अनन्तरवाक्यानां च वाचां **पृथगर्थता** भिन्नार्थता **रचिता** कृता वाक्यानां परस्परं श्लिष्टता नास्तीत्यर्थः । **च** पुनस्त्वया **क्वचि**दपि स्थाने **सामर्थ्यम्** उद्यमं नापोहितं न विवर्जितं न त्यक्तमित्यर्थः । च पुनस्त्वया **बलात्** हठात् बलमाश्रित्य क्यप्लोपे पञ्चमी च वक्तव्या । **उपपत्ति**र्युक्तिः

१. अथ युग्मेनाह-इत्यवतरणिका -म. ।

उदाहृता कथिता च पुनस्त्वया **अनुमानेन** गुणदोषविचारेण युक्त्या च **आगमो**ऽर्थशास्त्रं नीतिशास्त्रं च **न क्षतो** न त्यक्तः आगमविरुद्धं नोक्तमित्यर्थः । अन्यथा तद्विरोधानुमानस्य प्रामाण्यभङ्गप्रसंगात् इति भावः । अथ समासः । स्फुटस्य भावः स्फुटता । अर्थस्य गौरवम् अर्थगौरवम्। समर्थस्य भावः सामर्थ्यम् । न विद्यते ईदृग् आशयो यस्य स अनीदृगाशयः । इति वृत्तद्वयार्थः (यु.) ॥२७॥ ॥२८॥

यदि साधूक्तं तर्हि तथैव विधीयतामित्याशङ्क्याह -

अवितृप्ततया तथापि मे हृदयं निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं न विधेयेषु विशेषसंपदः ॥ २९ ॥

'अवि०' व्याख्या । हे भीम ! त्वया एवंविधं सम्यग् विचार्य वचनमुक्तं **तथापि मे** मम हृदयम् **अवितृप्ततया** असंतुष्टतया **निर्णयमेव** निश्चयमेव **धावति** अनुसरति वाञ्छतीति यावत् अद्यापि संशयत्वेन तिष्ठतीति भावः । निर्णयानुदये कारणमाह- **विशेषसंपदो** विशेषसमृद्धयः **विधेयेषु** सन्धिविग्रहादिकार्येषु **सुखम्** अक्लेशेन यथा स्यात् तथा **अवसाययितुम्** आत्मसात्कर्तुं निश्चयीकर्तुमिति यावत् **न क्षमा** न समर्था[2] 'क्षमः शक्ते हिते युक्ते क्षमावति'इति *हैमानेकार्थः* [२-३१०] । अथ समासः । विशेषेण तृप्तो वितृप्तः न वितृप्तः अवितृप्तः अवितृप्तस्य भावो अवितृप्तता तया अ० । क्षमन्त इति क्षमाः । पचिनन्दिग्रहादेरयुणिनीति अप्रत्ययः । विशेषाश्च ताः संपदश्च [विशेषसंपदः] । इति वृत्तार्थः ॥ २९ ॥

सहसा[3] विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥ ३० ॥

'सह०' व्याख्या । हे भीम ! **सहसा** अविमृश्य **क्रिया** कार्यं **न विदधीत** न कुर्यात् पुमान् इति शेषः । सहसेत्यास्मिकाविमर्शयोरिति *गणव्याख्याने* स्वरादिपाठादव्ययम् । कस्माद् **अविवेको**ऽविचारः अविमृश्यकारित्वं **परं** केवलं **आपदा**मनर्थानां **पदं** स्थानं कारणं वा भवति **हि** यस्मात् कारणात् **संपदः** समृद्धयो **विमृश्यकारिणं** युक्तायुक्तविचारकारिणं जनं **स्वयमा**त्मनैव **वृणते** भजन्ते समाश्रयन्तीत्यर्थः । तस्मात् विमृश्यैव प्रवर्तितव्यमिति भावः । वृङ् संभक्तौ इति धातुः नात्र्यादेर्नाप्रत्ययः । ङकारानुबन्धत्वादात्मपदमन्ते वृना इति जात (तं) पश्चात् नात् इति सूत्रेण नामध्ये आकारस्य लोपः पश्चात् षुर्नो नेत इति नस्य णत्वं जातं तदा वृणते इति सिद्धम् । किंलक्षणाः संपदः ? **गुणलुब्धाः** गुणानुरागिणः । अथ समासः । न विवेकोऽविवेकः । विमृश्य करोतीति विमृश्यकारी तं वि० । गुणेषु लुब्धाः गुणलुब्धाः । इति वृत्तार्थः ॥ ३० ॥

---

१. केचिदेतच्छ्लोकत्रयं निन्दापरत्वेनापि योजयन्ति । तदसत्, हितोपदेशमात्रतत्परस्यातिवत्सलस्य राज्ञो मत्सरिण इव महावीरे भ्रातरि विधेये सर्वानर्थमूलभूतनिन्दातात्पर्यकल्पनानौचित्यादिति - म. । २. अत्र निर्णयधावनं प्रत्युत्तरवाक्यार्थस्य हेतुत्वाभिधानाद्वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः -म. । ३. वस्तुविशेषावधारणमन्तरेणैव प्रवृत्तिरित्याशङ्क्याह-इत्यवतरणिका -म. ।

ननु साहसिकस्यापि कार्यफलसिद्धिर्दृश्यत एव तत् किं विवेकेनेत्याशङ्क्याह -

अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥ ३१ ॥

'अभि०' व्याख्या । हे भीम ! **यः** पुमान् विजिगीषुः कर्षकलोकश्च **विवेकवारिणा** विचारनीरेण कृत्वा **विधिबीजानि** कार्यबीजानि **अनुपालयन्** संरक्षन् सन् **अभिवर्षति** सिञ्चति यः पुमान् विवेकेन कार्यं करोति तस्य किं फलमित्याह- **स** पुमान् **सदा** सर्वदा **क्रियां** कार्यं **फलशालिनीं** सफलां[1] **मधितष्ठति** प्राप्नोति क्रियाफलं लभत इत्यर्थः । क इव ? यथा **लोको** जनः बीजानि पालयन् सन् वारिणा सिञ्चति । स लोकः **शरदं** शरत्कालं फलशालिनीमधिगच्छति प्राप्नोत्येव न कदाचिद(द्) व्यभिचरतीत्यर्थः । साहसिकस्य काकतालीयन्यायेन सिद्धिर्विवेकिनस्तु नियतेति तात्पर्यम् । अथ समासः । अनुपालयतीति अनुपालयन्। विधीयन्ते इति विधयः तानि एव बीजानि तानि वि० । विवेक एव वारि विवेकवारि तेन वि० । फलेन शालत इत्येवंशीला फलशालिनी तां फ० । क्रियते इति क्रिया तां क्रियां, कृत्वा इट् वक्तव्यः (?) । इति वृतार्थः ॥ ३१ ॥

विवेकिनः फलसिद्धिर्नियतोक्ता संप्रति तामेव रुच्यर्थं स्तौति -

शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥ ३२ ॥

'शुचि०' व्याख्या । हे भीम ! **शुचि** संप्रदायशुद्धं निर्मलमिति यावत् **श्रुतं** शास्त्रं शास्त्रश्रवणं कर्तृ **वपुर्**देहं कर्म **भूषयति** अलङ्करोति अन्यथा विद्वान् न[2] शोभत इत्यर्थः । **तस्य** श्रुतस्य **प्रशमः** क्रोधोपशान्तिः **अलङ्क्रिया** अलङ्कारो **भवति** अन्यथा श्रुतैः[तवै]फल्यादिति भावः । **पराक्रमो** विक्रमश्च **प्रशमाभरणमु**पशमभूषणं भवति अन्यथा सर्वः परिभूयत इति भावः । **स** पराक्रमः **नयापादितसिद्धिभूषणः** न्यायनिष्पादितकार्यसिद्धिभूषणो भवति[3] । अत्रोत्तरोत्तरपूर्वपूर्वविशेषणत्वादेकावल्यलङ्कारः । तदुक्तं *वाग्भट्टालंकारे* -

पूर्वपूर्वार्थवैशिष्ट्यनिष्ठानामुत्तरोत्तरम् । अर्थानां या विरचना बुधैरेकावली मता ॥३१॥

अथ समासः । प्रशमस्याभरणं प्रशमाभरणम् । नयेन आपादिता नयापादिता चासौ सिद्धिश्च नयापादितसिद्धिः नयापादितसिद्धिरेव भूषणं यस्य स न० । इति वृत्तार्थः ॥ ३२ ॥

---

१. फलं साधननिष्पाद्योऽर्थः सस्यं च तच्छालिनीम्, अत्र 'फल' शब्देन सस्यहेतुकृतयोरर्थयोरभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिस्तदनुगृहीता चोपमेत्यनुसंधेयम् -म. । २. पुरुषः शोच्य इति भावः -म. । ३. वपुषो भूष्यतैवात्र सिद्धेर्भूषणतैव च । उभयं मध्यमानां तु तेषां पूर्वोत्तरेच्छया ॥ इति विवेकः । एवं विशिष्टसिद्धेः- अन्याभूषिताया एव भूषणत्वोक्त्या सर्वोत्तरतया स्तुतिर्गम्यते -म. ।

विमृश्य कुर्यादित्युक्तं तत्र विमर्शोपायः कः इत्युक्ते शास्त्रमेवेत्याह –

मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम् ।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥

'मति०' व्याख्या । हे भीम ! **विवेकिनां** विवेकवतां पुंसां **कृत्यविधौ** कार्यकरणे **आगमः** शास्त्रम् **अर्थदर्शनं** कार्यज्ञानं **कुरुते** विदधाति विवेकिनां कर्तव्यं शास्त्रानुसारेण निश्चीयत इति भावः । किंलक्षणे कृत्यविधौ ? **मतिभेदतमस्तिरोहिते** बुद्धिविशेषतिमिराच्छादिते कृत्याकृत्यापरिज्ञान इत्यर्थः । पुनः कथंभूते ? अत एव **गहने** दुरवगाहे किंलक्षण आगमः ? **सुकृतः** सुष्ठु अभ्यस्तः पुनः कथंभूतः ? अत एव **परिशुद्धो** निश्चितार्थः क इव ? **यथा दीपः** कृत्यविधौ कर्तव्यवस्तुनि अर्थदर्शनं वस्तुप्रतिभासं प्रकाशं कुरुते किं० कृत्यविधौ ? मतिभेदतमस्तिरोहिते मतिभेदतुल्यान्धकारावृते पुनः किं० ? अत एव **गहने** दुर्ज्ञेये किं० दीपः ? **सुकृतः** सुपात्रकृतः वातादिदोषरहितश्च पुनः किं० ? अत एव **परिशुद्धो** निर्मलो दीप्तशिख इत्यर्थः। अथ समासः । मतेः भेदो मतिभेदो मतिभेद इव तमो मतिभेदतमो मतिभेदतमसा तिरोहितः मतिभेदतमस्तिरोहितस्तस्मिन् म० । कृत्यस्य विधिः कृत्यविधिस्तस्मिन् कृ० । विवेको विद्यते येषां ते विवेकिनस्तेषां वि० । अर्थस्य दर्शनम् अर्थदर्शनम् । इति वृत्तार्थः ॥ ३३ ॥

एवं विमृश्य कुर्वतो दैवादनर्थागमेऽपि न कश्चिदपराध इत्याह –

स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः ॥ ३४ ॥

'स्पृह०' व्याख्या । हे भीम ! **स्पृहणीयगुणैः** लोकश्लाघ्यशौर्यादिगुणैः **महात्मभिः** सज्जनैः महानुभावैश्च **चरिते** सेविते अनुष्ठिते वा **वर्त्मनि** मार्गे आचारे वा **मन**श्चित्तं **यच्छतां** निदधतां ददतां सन्मार्गे व्यवहरतां पुंसामित्यर्थः । **विनिपातोऽपि** दैवकृतानर्थोऽपि **समुन्नतेर**भ्युदयस्य **सम**स्तुल्यो भवति स पराभवो न किन्तु समुन्नतिरेवेत्यर्थः । दैविकानर्थेषु पुरुषस्यानुपालभ्यत्वादिति भावः । यदुक्तम्–

यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम् । पुमांस्तत्रानुपालभ्यो दैवान्तरितपौरुषः । इति ॥३२॥

किंलक्षणः विनिपातः ? **विधिहेतुः** दैवनिमित्तकः पुनः किं० ? अत एव **आगसाम्** अपराधानाम् **अहेतुर**कारणम् । अथ समासः । स्पृहणीयाः गुणाः येषां ते स्पृहणीयगुणाः तैः स्पृ० । महान् आत्मा येषां ते महात्मानः तैः म० । यच्छन्तीति यच्छन्तस्तेषां यच्छताम् । विधिरेव हेतुर्यस्य स विधिहेतुः । न हेतुः अहेतुः । इति वृत्तार्थः ॥ ३४ ॥

संप्रति यद्विमृश्यं तदेव आह –

शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम् ।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः ॥ ३५ ॥

'शिव०' व्याख्या । हे भीम ! **जिगीषवो** जयैषिणो विजयेच्छवो राजानः **पौरुषं** पराक्रमं **शिव**मनुकुलम् **औपयिकम्** उपायं **नयन्ति** प्रापयन्ति पौरुषमुपायेन योजयन्तीत्यर्थः, तेन निश्चितफलं कर्म्म कुर्वन्तीति तात्पर्यार्थः । यदुक्तम्-

निष्फलं क्लेशबहुलं संदिग्धफलमेव च । न कर्म कुर्यान्मतिमान् सदा वैरानुबन्धि च ॥३३॥ इति

णीम् प्रापणे द्विकर्मकोऽयं धातुः । किंकृत्वा ? **गरीयसीं** प्रचुराम् **अदूषितायतिम्** अक्षतोत्तरकालाम् आगामिकाले हितानुबन्धिनीमिति यावत् । **फलनिष्पत्तिं** कार्यसिद्धिं **विगणय्य** विचार्य किं० जिगीषवः ? **विजितक्रोधरया** निर्जितकोपवेगाः । अथ समासः । उपाय एव औपयिकम् अतिशयेन गुर्वी गरीयसी तां गरीयसीम् । फलस्य निष्पत्तिः फलनिष्पत्तिः तां फ० । न दूषिता आयतिर्यया सा अदूषितायतिस्ताम् अ० । पुरुषस्य भावः कर्म्म वा पौरुषम् । क्रोधस्य रयः क्रोधरयः विजितः क्रोधरयो यैस्ते वि० । जेतुमिच्छन्तीति जिगीषन्ति जिगीषन्ति इति जिगीषवः । इति वृत्तार्थः ॥ ३५ ॥

यदुक्तं विजितक्रोधरया इति तदावश्यकमित्याह -

अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते ॥ ३६ ॥

'अप०' व्याख्या । हे भीम ! **उदेतुमिच्छता** अर्थात् उदयं वाञ्छता नृपेण **पुरः** प्रथमं **रोषमयं** रोषादागतं **तिमिर**मज्ञानम् **अपनेयं** स्फेटितव्यं जेतव्यमित्यर्थः । कया ? **धिया** विवेकबुद्ध्या तत्र दृष्टान्तमाह- **अंशुमतापि** सूर्येणापि **निशाकृतं** रात्रिकृतं रात्र्या निहितं वा **तमो**ऽन्धकारं **प्रभया** कान्त्या **अविभिद्य** अविदार्य **नोदीयते** किंतु निशाकृतं तमो विभिद्यैव उदयं प्राप्यत इति भावः । सूर्यस्यापि एवं स्थितिः किमुत अन्येषामित्यपिशब्दार्थः । अथ समासः । रोषः प्रचुरो यत्र तत् रोषमयम् । ध्यायत इति धीः तया धिया । न विभिद्य अ० । निशया कृतं नि० । अंशवो विद्यन्ते अस्यासावंशुमान् तेनांशु०। इति वृत्तार्थः ॥ ३६ ॥

ननु दुर्बलस्यैवमस्तु बलवतस्तु कोपादेव कार्यसिद्धिरित्याशङ्क्याह -

बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसंपदः ॥ ३७ ॥

'बल०' व्याख्या । हे भीम ! **बलवान्** बलिष्ठोऽपि शौर्यवानपि **यः** पुमान् **कोपजन्मनः** क्रोधोत्थितस्य **तमसो**ऽज्ञानस्य मोहस्य वा **अभिभवं** पराभवं **न रुणद्धि** न निवारयति स पुमान् **सकलाः** समग्राः **संपदः** प्रभुमन्त्रोत्साहलक्षणास्तिस्रोऽपि शक्तीः **हन्ति** नाशयति अन्धस्य जङ्घाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेव स्यादिति भावः । क इव ? **क्षयपक्ष इव** यथा क्षयपक्षः **ऐन्दवीः** इन्दुसंबन्धिनीः सकला(लाः) कला हन्ति क्षपयति अत्र कालस्य सर्वत्र कारणत्वात् क्षयपक्षस्य कलाक्षयकारित्वमस्त्येव तमसस्तु तत्कालविजृम्भणात्तथा व्यपदेशः । 'षोडशोंऽशः कला'

इति *हैमः* [१०६] । अथ समासः । बलमस्यास्तीति बलवान् । कोपात् जन्म यस्य तत् कोपजन्म तस्य कोपजन्मनः । क्षयस्य पक्षः क्षयपक्षः । इन्दोरिमा ऐन्दव्यस्ता ऐन्दवीः शक्तीनां संपदः श० । इति वृत्तार्थः ॥३७॥

विमृश्य कुर्वतः क्रियाप्रकारमाह -

समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥

'सम०' व्याख्या । हे भीम ! **मेदिनीपति**र्नृप **ओजसा** तेजसा बलेन वा **लोकं** विश्वम् **अधितिष्ठति** आक्रमति क इव ? विवस्वा**निव** यथा **विवस्वान्** श्रीसूर्यः ओजसा तेजसा कृत्वा लोकम् अधितिष्ठति आक्रमति तद्वि(द्वदि)त्यर्थः । स कः ? **यः समये** अवसरे सति **मार्दवं** मृदुत्वम् **उपैति** गच्छति **च** पुनः समये प्रस्तावे **तिग्मतां** तीक्ष्णतां **तनोति** विस्तारयति प्रकटीकरोतीत्यर्थः । यदुक्तम्-

मृदुमप्यवमन्यन्ते तैक्ष्ण्यादुद्विजते प्रजाः । एतद्बुद्ध्वा महाराज ! मा तीक्ष्णो मा मृदुर्भव ॥३४॥

इति वचनात् कथंभूतो मेदिनीपतिः ? **समवृत्तिः** सर्वेषां भूतानामुपरि समाना नातिमृदुर्नातितिग्मा वृत्तिर्वर्तनं यस्य स समवृत्तिः सन् समये मृदुत्वं तीक्ष्णवृत्तिं च तनोति यथा सूर्योऽपि समये प्रभातसमये हेमन्तादौ च मृदुर्भवति तथा समये मध्याह्नसमये ग्रीष्मादौ च तीक्ष्णवृत्तिर्भवति ततः एव सर्वदा न मृदुवृत्तिना तिग्मवृत्तिना च भवितव्यं मेदिनीपतिसूर्ययोः साधमर्यो(र्म्यो)पमा । अथ समासः । समा वृत्तिर्यस्य स स० । मृदोर्भावो मार्दवं तन्मा० । तिग्मस्य भावः तिग्मता तां ति० । मेदिन्याः पतिर्मे० । इति वृत्तार्थः ॥३८॥

उक्तान्यथाकरणेऽनिष्टमाह -

क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता ।
शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

'क्व चि०' व्याख्या । द्वौ **क्व**शब्दौ महदन्तरं सूचयतः । हे भीम ! **श्रियां** संपदां **चिराय** बहुकालं **परिग्रहः** स्वायत्तीकरणं क्व **च** पुनः **दुष्टेन्द्रियवाजिवश्यता** दुष्टानाममार्गधाविनाम् इन्द्रियवाजिनां विषयाश्वानां वश्यो वशंगतस्तस्य भावो दुष्टेन्द्रियवाजिवश्यता क्व वर्तते दुष्टेन्द्रियाश्ववशवर्तित्वमित्यर्थः । नोभयमेकत्र तिष्ठतीति भावः । **हि** यस्मात् कारणात् **चलेन्द्रियैः** अजितेन्द्रियैः **श्रियो** लक्ष्म्यः **असुरक्षा** रक्षितुमशक्याः कथंचित्प्राप्ताः नाविनीतेषु तिष्ठन्तीत्यर्थः । किं० श्रियः ? **शरदभ्रचलाः** शरत्कालीनाभ्रवत् मेघवच्चपलाः पुनः किं० ? अत एव **बहुच्छलाः** बहुव्याजाः बहुरन्ध्रा इत्यर्थः । कस्मात्[१] बह्वधीनत्वात् यतः-

१. वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः -म. ।

दायादाः स्पृहयन्ति तस्करगणा मुष्णन्ति भूमीभुजो
गृह्णन्ति छलमाकलय्य हुतभुग्भस्मीकरोति क्षणात् ।
अम्भः प्लावयति क्षितौ विनिहितं यक्षा हरन्ते हठा-
द्दुर्वृत्तास्तनया नयन्ति निधनं धिग्बह्वधीनं धनम् ॥३५॥ [सिन्दूरप्रकर-७४]

अथ समासः । इन्द्रियाण्येव वाजिनः इन्द्रियवाजिनः दुष्टाश्च ते इन्द्रियवाजिनश्च दु० वश्यस्य भावो वश्यता दुष्टेन्द्रियवाजिनां वश्यता दु० । चलानीन्द्रियाणि येषां ते चलेन्द्रियास्तैश्च० । सुखेन रक्ष्यन्ते इति सुरक्षाः न सुरक्षा असुरक्षाः । बहूनि छलानि यासां ता बहुच्छलाः । इति वृत्तार्थः ॥३९॥

क्रोधस्य दुष्टतामुक्त्वा तस्य त्यागमुपदिशति -

किमसामयिकं वितन्वता मनसः क्षोभमुपात्तरंहसः ।
क्रियते पतिरुच्चकैरपां भवता धीरतयाधरीकृतः ॥ ४० ॥

किं० व्याख्या । हे भीम ! **भवता** त्वया **अपाम्पतिः** समुद्रः **धीरतया** गाम्भीर्येण प्राग् इति शेषः । प्राक् पूर्वम् **अधरीकृतः** तिरस्कृतो नीचैःकृत इत्यर्थः । अधुनेति शेषः । **अधुना** साम्प्रतं स सागरः अधीरतया अधैर्यतया **किं** किमर्थम् **उच्चकै**रधिकः **क्रियते** पराजितं पुनरुच्चकैर्न कुर्यादिति भावः । भवता किंकुर्वता ? **असामयिकम्** अप्रस्तावोद्भवं धैर्यगुणेन **मनसः क्षोभं** चेतसो विकारं **वितन्वता** विस्तारयता अर्थादकाले कोपं कुर्वता इति भावः । किं० मनसः ? **उपात्तरंहसः** प्राप्तवेगस्य । अथ समासः । समये भवं सामयिकं न सामयिकम् अ० । उपात्तं रंहो येन स उपात्तरंहास्तस्य उ० । धीरस्य भावो धीरता तया धी० । अनधरो अधरः कृतोऽधरीकृतः । इति वृत्तार्थः ॥ ४० ॥

श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय संपदामयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

श्रुत० व्याख्या । **ये** जनाः **श्रुतं** शास्त्रमपि **अधिगम्य** प्राप्य **शरीरजन्मनः** शरीरोत्पन्नान् शरीरे वर्तमानान् वा कामक्रोधलोभमदमानहर्षलक्षणान् षट्रिपून् **न विनयन्ते** न वशीकुर्वन्ते **ते** जनाः **खलु** इति निश्चितम् **अचिराय** स्तोककालेन **संपदां** श्रियाम् **अयशो**ऽपकीर्तिं **जयनन्ति** उत्पादयन्ति अजितेन्द्रियतया ते श्रियम् उद्वेजयन्ति ताः श्रियः पुनः चिरं लोके गत्वर्य इति [दुष्]कीर्त्तिम् उत्पादयन्तीत्यर्थः । किं० अयशः ? **चापलाश्रयं** चञ्चलपुरुषाधारम् आश्रयदोषादेव लक्ष्म्याः चञ्चलत्वम् अस्थैर्यं नात्मदोषादित्यर्थः । अजितारिषड्वर्गस्य कुतः संपद इत्यर्थः । अथ समासः । शरीराज्जन्म येषां ते शरीरजन्मानः तान् श० न चिराय अ० । न यशोऽयशः । चपलस्य भावः चापलं चापलमेव आश्रयो यस्य तत् चापलाश्रयम् । इति वृत्तार्थः ॥ ४१ ॥

---

१. अत्र 'वितन्वता' इति भीमविशेषणत्वेन अपांपतिपदार्थस्योच्चैःकरणे हेतुत्वोक्त्या काव्यलिङ्गमलंकारः म. ।

तथापि क्रोधश्चेत् तदा कार्यहानिरित्याशयेनाह -

अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापिनी ।
जनवन्न भवन्तमक्षमा नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

अति० व्याख्या । हे भीम ! **अक्षमा** कोपो **भवन्तं** त्वां **जनवत्** नीचजनमिव **नयसिद्धेः** नयसाध्यफलात् **अपनेतुं** स्फेटितुं **नार्हति** न योग्या भवति अनवसरकोपस्यात्मसंतापातिरिक्तं फलं नास्तीति भावः । किं० अक्षमा ? **अतिपातितकालसाधना** अतिक्रान्तसमयसहाया पुनः किं० ? **स्वशरीरेन्द्रियवर्गतापिनी** स्वस्य यच्छरीरमिन्द्रियवर्गश्च तयोस्तापिनी संतापकारिणी । अथ समासः । कालश्च साधनानि च कालसाधनानि अतिपातितानि कालसाधनानि यया सा अ० । इन्द्रियाणां वर्गः इन्द्रियवर्गः शरीरं च इन्द्रियवर्गश्च श० स्वस्य शरीरेन्द्रियवर्गौ तापयतीति स्व० । जनमिव जनवत् । न क्षमा अक्षमा । नयस्य सिद्धिः नयसिद्धिः तस्या नयसिद्धेः । इति वृत्तार्थः ॥ ४२ ॥

अथ क्षमया को गुण इत्याह -

उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः ।
अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

उप० व्याख्या । हे भीम ! **तितिक्षासमं** क्षमातुल्यम् अन्यत् **साधनं** कारणं **नास्ति** न विद्यते 'तितिक्षा सहनं क्षमा' इति *हैमः* [३९१] । यद्यस्ति तर्हि तितिक्षैव साधनं नान्यदिति भावः । साधनं किं० ? **आयतेः** उत्तरकालस्य **भृश**मत्यर्थम् **उपकारक**मुपकारकारकं स्थिरफलहेतुरित्यर्थः । **भूरिणः** प्रचुरस्य **कर्मफलस्य** सत्कार्यस्य **प्रसवः** कारणम् उत्पत्तिस्थानमित्यर्थः । पुनः किं० ? **अनपायि** अविनश्वरं पुनः किं० ? **द्विषां** शत्रूणां **निबर्हणम्** उन्मूलनं विनाशकमित्यर्थः[१] । अथ समासः । उपकरोतीति उपकारकम् । प्रसूयते अनेनेति प्रसवः । कर्मणां फलं कर्मफलं तस्य कर्मफलस्य । अपायोऽस्यास्तीति अपायि न अपायि अनपायि । तितिक्षायाः समं तितिक्षासमम् । साध्यते अनेन इति साधनम् । इति वृत्तार्थः ॥ ४३ ॥

ननु तितिक्षायाः कालक्षेपे सुयोधनः सर्वान् राज्ञो वशीकुर्यादित्याह -

प्रणतिप्रवणान् विहाय नः सहजप्रेम[1]निबद्धचेतसः ।
प्रणमन्ति सदा सुयोधनं प्रथमे मानभृतां न वृष्णयः ॥ ४४ ॥

प्रणति० व्याख्या । हे भीम ! **वृष्णयो** यादवाः **सदा** सर्वदा **सुयोधनं** मित्रभावेनेति शेषः । **प्रणमन्ति** न नमस्कुर्वन्ति किन्तु काले त्यक्ष्यन्त्येवेत्यर्थः । किंकृत्वा ? **नो**ऽस्मान् **विहाय** त्यक्त्वा

1. स्नेह० - म. इदं च पा०

१. 'तितिक्षासमम्' इत्यनुक्तोपमेया समास आर्थी लुप्तोपमा । 'भृशायत्यनपायि' शब्दैः साधनान्तरवैलक्षण्याद्व्यतिरेकश्च व्यज्यते । भेदप्राधान्य उपमानादुपमेयस्याधिक्ये विपर्यये च व्यतिरेकः -म. ।

कथंभूतान् नः ? **प्रणतिप्रवणान्** प्रणामतत्परान् सुयोधने तु न तथेति भावः । पुनः कथं० नः ? **सहजप्रेमनिबद्धचेतसः** स्वाभाविकस्नेहरचितचित्तान् यद्वा वृष्णयः किं० ? **सहजप्रेमनिबद्धचेतसः** अकृत्रिमस्नेहनिबद्धचेतसोऽस्मासु विषये गाढस्नेहलग्नचित्ता सुयोधने न तथेत्यर्थः । कार्यवशादेव तं भजन्त इत्यर्थः । रागस्तु अस्मास्विति भावः । सति यादवसहाये न किंचिदस्माकमसाध्यं भवेदिति भावः । कथंभूता वृष्णयः ? **मानभृताम्** अहंकारिणां मध्ये **प्रथमे** अग्रेसराः सुयोधनस्तु ततोऽप्यहङ्कारीति भावः[1] । अथ समासः । प्रणतौ प्रवणाः प्रणतिप्रवणास्तान् प्र० । सहजं च तत् प्रेम च सहजप्रेम सहजप्रेम्णा निबद्धं चेतो यैस्ते सह० । मानं बिभ्रतीति मानभृतस्तेषां मानभृताम् । इति वृत्तार्थः ॥ ४४ ॥

किंचित्कारणान्तरमाह -

सुहृदः सहजास्तथेतरे मतमेषां न विलङ्घयन्ति ये ।
विनयादिव यापयन्ति ते धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥

सुहृद० व्याख्या । हे भीम ! **एषां** वृष्णीनां यादवानां **ये सहजा सुहृदो** मातृपक्षाः बान्धवाः **तथा इतरे** अन्ये कृत्रिमादयो दानमानाद्यावर्जिताः सुहृदो मित्राणि **मतं** यादवपक्षं **न विलङ्घयन्ति** नातिक्रमन्ति **ते** द्वयेऽपि यादवाः तं प्रति कालापेक्षितया **आत्मसिद्धये** निजसिद्ध्यर्थं स्वजीवनार्थं **धृतराष्ट्रात्मजं** सुयोधनं **विनयादिव** आनुकूल्यादिव **यापयन्ति** कालं गमयन्ति कृत्रिमप्रीत्या सेवन्ते न तु तत्त्वतः, अत्र इवशब्दो [अ]लीकार्थे । शास्त्रे त्रिविधौ मित्रामित्रावुक्तौ सहजौ प्राकृतौ कृत्रिमौ चेति तत्र सहजमित्रं मातुलमातुलेयमातृष्वस्रेयादिकं स्वविषयानन्तरं प्राकृतं सन्मानाद्यावर्जितं कृत्रिमम् अपरं शत्रुरपि त्रिविधः पितृव्यतत्सुतादिः सहजशत्रुः स्वविषयानन्तरं प्रकृतः शत्रुः अपराधाद्यपराद्धः कृत्रिमः शत्रुः । अथ समासः । सु शोभनं हृत् हृदयं येषां ते सुहृदः । सह जाताः सहजाः । धृतराष्ट्रस्यात्मजो धृतराष्ट्रात्मजस्तं धृत० । आत्मनः सिद्धिः आत्मसिद्धिः तस्यै आ० । इति वृत्तार्थः ॥ ४५ ॥

किन्तु[2] नायं प्रयाणकाल इत्याशङ्क्याह -

अभियोग इमान्महीभुजो भवता तस्य कृतः क्ष[1](कृ)तावधेः ।
प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव ॥ ४६ ॥

['अभि०' व्याख्या ।] हे भीम ! **भवता** त्वया **तस्य** सुयोधनस्य **कृतो** विहितोऽ**भियोग** आर्द्राभिमान इति यावत् । उद्यमः शीघ्रपराभवलक्षणः इमान् पूर्वोक्तान् **महीभुजो** यादवान् नृपान् **प्रविघाटयिता** भेत्स्यति पृथक् करिष्यतीत्यर्थः । कथंभूतस्य सुयोधनस्य ? **क्ष(कृ)तावधेः** लुप्त(कृत)परिपूर्णत्रयोदशवर्षसमयस्य क इव ? हरिदश्वः **इव** यथा **हरिदश्वः** श्रीसूर्यः **समुत्पतन्** उदयन् सन् **कमलाकरान्** कमलवनानि प्रविघाटयति विकाश(स)यति । अथ समासः । महीं भुञ्जन्तीति

१. कृता० - म. इदं च पा०

१. अनेकपदार्थहेतुकं काव्यलिङ्गमलंकारः -म. । २. किञ्च नायमभियोगकाल इत्याशयेनाह -म.

महीभुजस्तान् म० । क्ष(कृ)तोऽवधिर्येन स क्ष(कृ)तावधिः तस्य क्ष(कृ)तावधेः । हरितोऽश्वा यस्य स हरिदश्वः । कमलानामाकराः कमलाकरास्तान् क० । इति वृत्तार्थः ॥४६॥

अथ ये न वृष्णिपक्षास्तान्प्रत्याह -

उपजापसहान् विलङ्घयन् स विधाता नृपतीन्मदोद्धतः ।
सहते न जनोऽप्यधःक्रियां किमु लोकाधिकधाम राजकम् ॥ ४७ ॥

उप० व्याख्या । हे भीम ! सुयोधनः **नृपतीन्** यादवनृपान् **विलङ्घयन्** मदात् निर्भर्त्सयन् सन् **उपजापसहान्** भेदयोग्यान् **विधाता** विधास्यति करिष्यतीति भावः । अवमानितो जनः सुभेद्य इति भावः । स किंलक्षणः ? **मदोद्धतः** गर्वोत्कटः राज्यमदेनेत्यर्थः । न च ते सहिष्णव इत्याह- यतो हेतोः **जनः** सामान्योऽपि लोकः **अधः क्रियां** तिरस्क्रियाम् अपमानमिति यावत् । **न सहते** न क्षमते तर्हि **राजकं** नृपसमूहं **किमु** सहते अपि तु न सहत इत्यर्थः । किं० राजकम् ? **लोकाधिकधाम** लोकोत्तरप्रतापं तथा सति समग्रमेव राजसमूहम् अस्मानेव आलम्बयिष्यत इति भावः । अथ समासः । सहन्तीति सहाः उपजापस्य सहाः उपजापसहास्तान् उ० । विलङ्घयतीति विलङ्घयन् नृणां पतयो नृपतयस्तान् नृपतीन् । मदेन उद्धतो मदोद्धतः । लोकेभ्योऽधिकं धाम यस्य तत् लो० । राज्ञः समूहो राजकम् । इति वृत्तार्थः ॥४७॥

ननु प्रथमसर्गे 'सखीनिव'(१-१०)इत्यादिवनेचरोक्तरीत्या तस्य मदसंभावना कथमित्याह -

असमापितकृत्यसंपदां हतवेगं विनयेन तावता ।
प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥

अस० व्याख्या । हे भीम ! **विभूतयः** संपदः **अभिमानशालिनाम्** अहङ्कारवतां पुरुषाणां **मदं** गर्वं पित्तविकारम् **उत्तम्भयितुं** वर्धयितुं **प्रभवन्ति** समर्था भवन्ति किंलक्षणानामभिमानशालिनाम् ? **असमापितकृत्यसंपदाम्** अनिष्पादितकार्यसमृद्धीनाम् अकृतकृत्यानामित्यर्थः । किंलक्षणं मदम् ? कार्यवशादारोपितेन **विनयेन हतवेगं** निषिद्धप्रसरं न तु स्वरूपतो हतं किं० विनयेन ? **तावता** तावन्मात्रेण स्वल्पेनेत्यर्थः । अथ समासः । कृत्यानां संपदः कृ० । न समापिता असमापिता असमापिताः कृत्यसंपदो यैस्ते असमापितकृत्यसंपदस्तेषाम् अस० । हतो वेगो यस्य स हतवेगस्तं हत० । तत् परिमाणमस्येति तावत् तेन तावता । अभिमानेन शालन्त इत्येवंशीलाः अभिमानशालिनस्तेषाम् अ० । इति वृत्तार्थः ॥ ४८ ॥

अथ मदस्यानर्थहेतुतां युग्मेनाह -

मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः ॥ ४९ ॥

मद० व्याख्या । हे भीम ! **मूढता** अज्ञानता **नियमेन** निश्चयेन **नृपं** राजानं **न वियुङ्क्ते** न मुञ्चति न त्यजतीत्यर्थः । किं० नृपम् ? **मदमानसमुद्धतं** कुलबलजातिरूपैश्वर्यविद्याद्यहङ्कारो मदः

गुणविस्तारणं मानं ताभ्यां समुद्धतं युक्तमित्यर्थः । अपरम् **अतिमूढो** अविवेकी **नयात्** नीतिमार्गात् **उदस्यते** उत्क्षिप्यते पात्यते इत्यर्थः । अत्र कर्मकर्तरि यक् । अपरं **नयहीनात्** नीतिमार्गभ्रष्टात् नृपतेः **जनः** लोकः **अपरज्यते** विरक्तो भवति । अथ समासः । मदश्च मानश्च मदमानौ मदमानाभ्यां समुद्धतो मदमानसमुद्धतस्तं म० । मूढस्य भावो मूढता । अतिशयेन मूढोऽतिमूढः । नयेन हीनः नयहीनस्तस्मात् न० । इति वृत्तार्थः ॥ ४९ ॥

अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंततिः ।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि ॥ ५० ॥

अप० व्याख्या । हे भीम ! **सहिष्णुना** क्षमावता पुरुषेण **महान्** गुरुरपि **रिपुः शत्रुरुन्मूलयितुं** स्फेटयितुं **सुकरः** सुसाध्यः सुखेन उन्मूल्यत इत्यर्थः । किंवत् ? **तरुवत्** यथा महानपि वृक्षः केनचिन्नरेण उन्मूलयितुं सुकरः सुलभः सुकरोन्मूलनमित्यर्थः । किं० रिपुः ? 'अपरागसमीरणेरितः' **अपरागो** जनविरक्तता स एव **समीरणो** वातस्तेन **ईरितः** प्रेरितः पुनः किं० रिपुः ? 'क्रमशीर्णाकुलमूलसंततिः' **क्रमेण** शनैः **शीर्णा** उत्थायोत्थाय गता **आकुला** चला **मूलसंततिः** प्रकृत्यादिस्वजनवर्गो यस्य सः किं०तरुः ? अपरागसमीरणेरितः द्वेषतुल्यवातप्रेरितः पुनः किं० क्रमशी० ? क्रमेण शीर्णा जीर्णत्वात्त्रुटिता आकुला शिथिला मूलसंततिः मूलश्रेणिर्यस्य[१] सः 'मूलं पार्श्वाद्ययोरुडौ निकुञ्जशिफयोः' इति *हैमानेकार्थः* [२-४९५] । अथ समासः । अपराग एव समीरणः अपरागसमीरणः अपरागसमीरणेन ईरितः अ० । वृक्षपक्षे अपराग इव समीरिण० शेषं पूर्ववत् । मूलानां संततिः मू० । सुखेन क्रियते इति सुकरः । सहनशीलः सहिष्णुः तेन सहिष्णुना । इति वृत्तार्थः ॥ ५० ॥

अणुरप्यपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः ॥ ५१ ॥

अणु० व्याख्या । हे भीम ! **अणुरपि** अल्पोऽपि **विग्रहो** वैरं **प्रभुं** स्वामिनम् **अपहन्ति** विनाशयति कथंभूतो विग्रहः ? **अन्तःप्रकृतिकोपजः** मध्यामात्यकोपोत्पन्नः 'प्रकृतिर्योनिशिल्पिनोः पौरामात्यादिलिङ्गेषु' इति *हैमानेकार्थः* [३-२६९] । **हि** यस्मात् कारणात् **अनलोऽग्निः अखिलं** समस्तं **भूधरं** पर्वतं **हिनस्ति** दहति किंलक्षणोऽनलः ? **तरुशाखान्तनिघर्षजः** वृक्ष[२]शाखामध्यघर्षणोत्पन्नः । अथ समासः । अन्तश्च ताः प्रकृतयश्च अन्तःप्रकृतयः अन्तःप्रकृतीनां प्रकोपः अन्तःप्रकृतिप्रकोपः अन्तःप्रकृतिप्रकोपाज्जातोऽन्त० । तरूणां शाखाः तरुशाखाः तरुशाखानाम् अन्तः तरुशाखान्तः तस्य निघर्षः तरुशाखान्तनिघर्षः तरुशाखान्तनिघर्षात् जातः त० । इति वृत्तार्थः ॥ ५१ ॥

तथापि कथं वर्धमानं शत्रुमुपेक्षत इत्याशङ्क्य दुर्विनीतत्वादित्याह –

१. अत्र महादेः पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वात्कारणमाला, तरुवदित्युपमा चेति द्वयोः संसृष्टिः –म. । २. अत्रोपमानोपमेयसमानधर्माणां प्रतिबिम्बतया निर्देशेन दृष्टान्तालंकारः –म. ।

मतिवान् विनयप्रमाथिनः समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे विपदन्ता ह्यविनीतसंपदः ॥ ५२ ॥

नयवा० व्याख्या । हे भीम ! **नयवान्** नयज्ञो नृपः **विनयप्रमाथिनः** विनयरहितस्य दुर्विनीतस्य **द्विषः** शत्रोः **समुन्नतिं** वृद्धिं **समुपेक्षेत** उपेक्षां विदध्यात् अनिच्छां करोति उपेक्षायाः फलमाह- **खलु** इति निश्चितं **तादृग्** अविनीतो रिपुः **अन्तरे** छिद्रे **सुजयः** सुखेन जेतुं शक्यः 'मध्ये छिद्रे विशेषे च व्यवधाने बहिर्युजि । उपसंव्यानने प्राज्ञाः षडर्थमन्तरं विदुः इति (३३) *चन्द्रकीर्त्याम्* । **हि** यस्मात् कारणात् **अविनीतसंपदः** दुर्विनीतश्रियः विपदन्ताः कष्टान्ता दुष्टपरिपाका इत्यर्थः । तस्य कष्टं दत्त्वा पलाय्य यान्तीति भावः । अथ समासः । प्रशस्ता मतिरस्यास्तीति मतिमान् । नयोऽस्यास्तीति नयवान् इत्यपि पाठः । विनयं प्रमथ्नातीति विनयप्रमाथी तस्य वि० । सुखेन जीयते सुजयः । विपदेव अन्ते यासां ता विपदन्ताः । न विनीताः अविनीताः अविनीतानां संपदः अ० । इति वृत्तार्थः ॥ ५२ ॥

कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्जरित्वादित्याह -

लघुवृत्ततया[1] भिदां गतं बहिरन्तश्च नृपस्य मण्डलम् ।
अभिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः ॥ ५३ ॥

लघु० व्याख्या । हे भीम ! **अनन्तरः** सन्निहितो विजिगीषुः समीपवर्ती शत्रुराजा **नृपस्य मण्डलं** राज्ञो देशम् अभिभूय पराभवं कृत्वा **हरति** गृह्णाति स्वाधीनं करोतीत्यर्थ । किं० मण्डलम् ? **लघुवृत्ततया** स्वस्य दुर्वृत्तरूपया क्षुद्रचेष्टितेन वा **बहि**र्मित्रादिजनपदेषु **च पुनः अन्त**र्मध्ये अमात्यादिषु च **भिदां गतं** भेदं प्राप्तं क इव ? आपगारय **इव** यथा **आपगारयो** नदीवेगः **शिथिलम्** अन्तर्भेदजर्जरं **कूलं** तटम् **अभिभूय** आक्रम्य **हरति** पातयति आपगारयः कथंभूतः ? **अनन्तरः** समीपवर्ती । अथ समासः । लघु च तत् वृत्तं च लघुवृत्तं लघुवृत्तस्य भावो लघुवृत्तता तया लघु० । न विद्यते अन्तरं यस्य स अ० । इति वृत्तार्थः ॥५३॥

उपसंहरति -

अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥ ५४ ॥

अनु० व्याख्या । **पराशरात्मजो** वेदव्यासः **तं** युधिष्ठिरम् **अभीयाय** आययौ प्राप्त इत्यर्थः । किं० पराशरात्मजः ? **स्वयमा**त्मना **अभिवाञ्छितोऽर्थ इव** साक्षान्मनोरथ इव प्राप्त इत्युत्प्रेक्षा । तं किं० ? **इति** पूर्वोक्तप्रकारेण **आकुलम्** अरितिरस्कारस्मरणात् क्षुभितम् एवंविधम् **अर्जुनाग्रजं** भीमं **नयवर्त्म** नीतिमार्गम् **अनाकुलम्** अव्याकुलं यथा स्यात्तथा **अनुशासतम्** उपदिशन्तम् । अथ समासः । अनुशासयतीति अनुशासत् तम् अनुशासतं द्विरुक्तानां यज्ञादीनां च शतृर्नुम्प्रतिषेधो वक्तव्यः । न आकुलं यत्र यस्यां क्रियायां तदनाकुलं क्रियाविशेषणम्। नयस्य वर्त्म नयवर्त्म । अर्जुनस्याग्रजोऽर्जुनाग्रजः तम० । पराशरस्यात्मजः पराशरात्मजः । इति वृत्तार्थः ॥ ५४ ॥

1. लघुवृत्तितया - म. ।

अथ युग्मेन पराशरात्मजं मुनिं वर्णयति -

मधुरैरवशानि लम्भयन्नपि तिर्यञ्चि शमं निरीक्षितैः ।
परितः पटु बिभ्रदेनसां दहनं धाम विलोकनक्षमम् ॥ ५५ ॥

सहसोपगतः सविस्मयं तपसां सूतिरसूतिरेनसाम् ।
ददृशे जगतीभुजा मुनिः स वपुष्मानिव पुण्यसंचयः ॥ ५६ ॥ (यु.)

'मधु०, सहसा०' व्याख्या । **जगतीभुजा** राज्ञा युधिष्ठिरेण **स** वेदव्यासो **मुनिः सविस्मयं** साश्चर्यं यथा स्यात्तथा **ददृशे** दृष्टः सविस्मये हेतुगर्भितं विशेषणमाह- कथंभूतो मुनिः ? **सहसोपगतः** अकस्मादागतः पुनः कथंभूतः ? **तपसां सूतिः** तपस उत्पत्तिस्थानं तथा **एनसां** पापानाम् **असूतिर**प्रभवः निवारक इत्यर्थः । **इवो**त्प्रेक्ष्यते **वपुष्मान्** देहधारी **पुण्यसंचयः** पुण्यराशिरुपागतः स किंकुर्वन् ? **मधुरैः** शान्तैः **निरीक्षितै**-रवलोकनैः **अवशानि** प्रतिकूलानि कोपेन ज्वलमानानि तिर्यञ्चि सिंहमृगपक्ष्यादीनि **शमं** शान्तिम् उपशमं **लम्भयन्** प्रापयन् द्विकर्मकोऽयं धातुः । तस्मिन्नागते सिंहादयोऽपि शान्ता बभूवुरिति भावः । पुनः किंकुर्वन् ? **परितः** सर्वतः **पटु** उज्ज्वलं **धाम** तेजो **बिभ्रत्** दधत् किं० धाम ? **एनसां दहनं** पापानां निवर्तकं पुनः किं० धाम ? **विलोकनक्षमं** विलोकयितुं शक्यं दर्शनीयमित्यर्थः । अग्न्यादिविलक्षणमिति भावः । अथ समासः । न विद्यते वशो येषां तानि अवशानि । लाभयतीति लम्भयन् । बिभर्ति इति बिभ्रत् । दह्यते अनेनेति दहनम् । विलोकने क्षमं वि० । विस्मयेन सह वर्तते यत् तत् सविस्मयम् । जगतीं भुनक्तीति जगतीभुक्तेन ज० । वपुरस्यास्तीति वपुष्मान् । पुण्यस्य संचयः पुण्यसंचयः । इति वृत्तद्वयार्थः ॥५५॥ ५६॥

अथोच्चकैरासनतः परार्घ्यादुद्यन्स धूतारुणवल्कलाग्रः ।
रराज कीर्णाकपिशांशुजालः शृङ्गात् सुमेरोरिव घर्मरश्मिः ॥ ५७ ॥ (उ.)

'अथ०' व्याख्या । **अथ** मुनिदर्शनानन्तरं **स** युधिष्ठिरः **उच्चकैः** उन्नतात् **आसनतः** सिंहासनात् उद्यन् उत्तिष्ठन् सन् **रराज** शुशुभे किंलक्षणात् आसनतः ? **परार्घ्यात्** श्रेष्ठात् बहुमूल्यादित्यर्थः । अत एव स किंलक्षणः ? **धूतारुणवल्कलाग्रः** कम्पितारक्तवृक्षत्वग्शिखः क इव ? **सुमेरोः** मेरुपर्वतस्य शृङ्गात् शिखरात् **उद्यन्** उदयमानः **घर्मरश्मि**रिव सूर्य **इव** यथा मेरोः शृङ्गात् उदयन् सूर्यो राजते तद्वदित्यर्थः । किंलक्षणो घर्मरश्मिः ? **कीर्णाकपिशांशुजालः** विस्तृतपीतकिरणसमूहः । अथ समासः । उच्चैरेव उच्चकैः आसनादित्यासनतः । वल्कलानामग्राणि वल्कलाग्राणि । धूतानि अरुणानि वल्कलाग्राणि यस्य स धूतारुणवल्कलाग्रः । अंशूनां जालम् अंशुजालम् आ समन्तात् कपिशम् आकपिशम् आकपिशं च तदंशुजालं च आकपिशांशुजालं कीर्णम् आकपिशांशुजालं येन यस्य वा की० । शोभनो मेरुः सुमेरुस्तस्य सुमेरोः घर्मा रश्मयो यस्य स घर्मरश्मिः । (उपजातिच्छन्दः) । इति वृत्तार्थः ॥ ५७ ॥

अवहितहृदयो विधाय सोऽर्हामृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलञ्चकार पश्चात् प्रशम इव श्रुतमासनं नरेन्द्रः ॥ ५८ ॥ (पु.)

1. आपदाम् - म. इदं च पा० ।

'अव०' व्याख्या । **स नरेन्द्रो** युधिष्ठिर **ऋषिप्रवरे** मुनिश्रेष्ठे वेदव्यासे **ऋषिवत्** मुनिवत् ऋषियोग्याम् **अर्हां** पूजां **विधाय** कृत्वा **पश्चाद**नन्तरं **तदनुमतं** तेन ऋषिणा अनुज्ञातं कथितम् **आसनं** नृपासनम् **अलञ्चकार** अलङ्कृतवान् उपाविशदित्यर्थः । किं० नरेन्द्रः ? **अवहितहृदयः** सावधानचित्तः किं० अर्हाम् ? **गुरूपदिष्टां** शास्त्रीयाम् आचार्यकथितां क इव ? प्रशम **इव** यथा **प्रशम** उपशमः **श्रुतं** शास्त्रमलङ्करोति उक्तं च 'प्रशमस्तस्य भवत्यलङ्क्रिया' इति (३६) [किरात २-३२] मुनेरनुज्ञया आसने उपविष्टवानित्यर्थः। अथ समासः । अवहितं हृदयं यस्य स अ० । ऋषिषु प्रवरः ऋषिप्रवरः तस्मिनृ० । गुरुणा उपदिष्टा गुरूपदिष्टा तां गु० । तेन अनुमतं तदनुमतम् । नराणामिन्द्रो नरेन्द्रः । (पुष्पिताग्राछन्दः) । इति वृत्तार्थः ॥५८॥

व्यक्तोदितस्मितमयूखविभासितोष्ठस्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ।
तन्वन्तमिद्धमभितो गुरुमंशुजालं लक्ष्मीमुवाह सकलस्य मृगाङ्कमूर्तेः ॥५९॥ (व.)

इति श्रीकिरातार्जुनीये महाकाव्ये भारविकृतौ लक्ष्म्यङ्के कृष्णद्वैपायनो नाम द्वितीयः सर्गः संपूर्णः ॥

'व्यक्तो०' व्याख्या । **स** युधिष्ठिरः **मुनेः** वेदव्यासस्य **अभिमुखं** सन्मुखं **तिष्ठन्** सन् सकलकलासहितस्य संपूर्णस्य **मृगाङ्कमूर्ते**श्चन्द्रस्य **लक्ष्मीं** शोभा**मुवाह** वहति स्म प्राप्तवानित्यर्थः । कथंभूतस्य मृगाङ्कमूर्तेः ? **इद्धं** समृद्धम् **अंशुजालं** किरणसमूहं तन्वन्तं विस्तारयन्तं **गुरुं** बृहस्पतिम् **अभितो** अभिमुखं तिष्ठत इति शेषः। बृहस्पतेः सन्मुखं तिष्ठत इत्यर्थः । गुरुमित्यत्राभितः शब्दयोगे द्वितीया । मुनेः कथंभूतस्य ? **विकीर्णधाम्नः** विस्तीर्णतेजसः स कथंभूतः ? **व्यक्तोदितस्मितमयूखविभासितोष्ठः** प्र[१]कटोत्पन्नहास्यकिरणालङ्कृतोष्ठः। अथ समासः । स्मितस्य मयूखा स्मितमयूखाः व्यक्तमुदिता व्यक्तोदिता व्यक्तोदिताश्च ते स्मितमयूखाश्च व्यक्तोदितस्मितमयूखाः तैः विभासितावोष्ठौ यस्य स व्यक्तो०। तिष्ठतीति तिष्ठन् । विकीर्णं धाम येन यस्य वा विकीर्णधामा तस्य वि० । तनोति [इति] तन्वन् तं त० । अंशूनां जालम् अं० । कलाभिः सह वर्तते यः स सकलस्तस्य स० । मृगोऽङ्के यस्याः सा मृगाङ्का मृगाङ्का मूर्तिर्यस्य स मृगाङ्कमूर्तिस्तस्य मृ० । (वसन्ततिलकाछन्दः) । इति वृत्तार्थः ॥५९॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद्गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गो विलोचनमितः समवाप पूर्तिम् ॥ २ ॥

इति महोपाध्यायदेवविजयगणिपादपयोजचञ्चरिकधर्मविजयगणिविरचितायां भट्टश्रीभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***व्यासागमनो*** नाम द्वितीयः सर्गः ॥

---

१. अत्रोपमेयस्य राज्ञ उपमानेन्दुधर्मेण लक्ष्म्याः साक्षात्संबन्धासंभवात्तत्सदृशीं लक्ष्मीमिवेति प्रतिबिम्बकरणाक्षेपादसंभववद्वस्तुसंबन्धात्पदार्थवृत्तिर्निदर्शनालंकारः -म. ।

तृतीयः सर्गः

॥ अर्हं ॥

द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् । चतुर्भिः कलापकं स्यात्तदूर्ध्वं कुलकं स्मृतमिति ॥३७॥

अथ वेदव्यासऋषिं वर्णयन् चतुर्भिः कलापकमाह –

ततः शरच्चन्द्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गीर्जटास्तडित्वन्तमिवाम्बुवाहम् ॥ १ ॥

प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतःसु समासजन्तमसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥

अनुद्धताकारतया विविक्तां तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविश्रम्भविशेषभाजा कृतोपसंभाषमिवेक्षितेन ॥ ३ ॥

धर्मात्मजो धर्मनिबन्धिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनाम् ।
हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥

[अतः का. ३८ यावद् उपजातिच्छन्दः]

ततः० प्रसा० अनु० धर्मा० व्याख्या । **तत** उपवेशनानन्तरं **धर्मात्मजो** युधिष्ठिरः **मुनिं** वेदव्यासं प्रति **आबभाषे** बभाण उवाचेत्यर्थः । किं० मुनिम् ? **शरच्चन्द्रकराभिरामैः** शरद्कालेन्दुकिरणवदाह्लादकैः **उत्सर्प्पिभिः** ऊर्ध्वं प्रसारिभिः सर्वतः प्रसरणशीलैः एवंविधैः **अंशुजालैः** किरणसमूहैः स्वकीयैरिति शेषः । **प्रांशु**मुन्नतं सन्तमिव **स्थितमिवो**त्प्रेक्षा पुनः किं० ? **आनीलरुचं** श्यामवर्णं कृष्णद्वैपायनमिति कथनात् पुनः किम्० ? **पिशङ्गीः** पीतवर्णा **जटाः बिभ्राणं** धारयन्तं पुनः किम्० ? अत एव उत्प्रेक्ष्यते **तडित्वन्तं** विद्युद्युक्तम् **अम्बुवाहं** मेघमिव स्थितं जटायाः विद्युता सहोपमानं पीतत्वात् कृष्णद्वैपायनस्य मेघोपमानं कृष्णवर्णत्वात् ॥१॥ पुनः किं० मुनिम् ? **समग्रां** समस्तां **प्रसादलक्ष्मीं** प्रसन्नताशोभां **दधतं** धारयन्तं पुनः किं० ? अत एव **जनातिगेन** लोकातिशायिना लोकातिक्रान्तेन **वपुःप्रकर्षेण** आकारविशेषेण **असंस्तुतानाम्** अपरिचितानां स्वसोदरोऽयमित्यजानतामपि जनानां **चेतस्सु** चित्तेषु **प्रसह्य** हठात् **आर्द्रं** स्नेहार्द्रं **भावम्** अभिप्रायं **समासजन्तम्** उत्पादयन्तं ये हि भगवान् कृष्णद्वैपायनोऽयमिति न जानते तेषामपि तदीयं वपुर्वंशे पश्यतां कोऽप्ययं महानिति मनो भक्तिनम्रं भवति प्रसन्नाकारेषु सर्वेऽपि जनाः स्नेहं प्राप्नुवन्तीति भावः ॥२॥ पुनः किं० ? **अनुद्धताकारतया** सौम्याकारतया **अन्तःकरणस्य** चित्तस्य **वृत्तिं** व्यापारं **विविक्तां** पूतां वीतरागां रागद्वेषादिदोषरहितां **तन्वन्तं** विस्तारयन्तम् आकृतिरेवास्य चित्तशुद्धिं कथयतीति भावः । पुनः **इवो**त्प्रेक्ष्यते **ईक्षितेन** विलोकितेन दर्शनेन वा कृत्वा **कृतोपसंभाषं** विहितकुशलप्रश्नं किं० ईक्षितेन ? 'माधुर्यविश्रम्भविशेषभाजा' **माधुर्यं** स्वभावसौम्यता **विश्रम्भो** विश्वासस्तयो**र्विशेष**मतिशयं भजतीति भाक् तेन मा० ॥ ३ ॥ पुनः किं० **श्रुतीनां** वेदानां **प्रसूति**मुत्पत्तिस्थानं किं० श्रुतीनाम् ?

धर्मनिबन्धिनीनाम् अग्निहोमादिधर्मप्रतिपादकानां पुनः किं० ? **एनःप्रणुदां** पापस्फेटिकानां पुनः किं० मुनिम् ? **सुखोपविष्टं** सुखेन उपविष्टं किं० धर्मात्मजः ? 'तदभ्यागमने' **तस्य** मुनेर**भ्यागमने** आगमनविषये **हेतुं** कारणं **परीप्सुः** ज्ञातुमिच्छुः । अथ समासः । शरदि चन्द्रः शरच्चन्द्रः शरच्चन्द्रकरवत् अभिरामाणि शरच्चन्द्रकराभिरामाणि तैः श० । उत्सर्पयन्तीत्येवंशीलानि उत्सर्पीणि तैरु० । अंशूनां जालानि अंशुजालानि तैरं० । बिभृते असौ बिभ्राणम् । आसमन्तात् नीला रुको(चो) यस्य स आनीलरुक् तम् आ० । तडित् विद्यते अस्यासौ तडित्वान् तं तडित्वन्तम् । अन्बूनि वहतीति [अम्बुवाहः तम् अ० । प्रसादस्य] लक्ष्मीः प्रसादलक्ष्मीः तां प्र० । दधतीति दधत् तं द० । वपुषः प्रकर्षः वपुःप्रकर्षस्तेन व० । जनम् अतिगच्छतीति जनातिगस्तेन ज०। समासजतीति समासजन् तं समासजन्तं षञ्ज् संगे षञ्ज् धातुः । न संस्तुता असंस्तुतास्तेषाम० ॥ २ ॥ न उद्धतोऽनुद्धतः अनुद्धतश्चासौ आकारश्च अनुद्धताकारः अनुद्धताकारस्य भावो अनुद्धताकारता तया अ० । तनोतीति तन्वन् तं त० । माधुर्यं च विश्रम्भश्च माधुर्यविश्रम्भौ माधुर्यविश्रम्भयोर्विशेषः माधुर्यविश्रम्भविशेषः तं भजतीति माधुर्यविश्रम्भविशेषभाक् तेन मा० । कृता उपसंभाषा येन स कृतोपसंभाषस्तं कृ० ॥ ३ ॥ धर्मस्यात्मजः ध० । धर्मं निबध्नन्तीति धर्मनिबन्धिन्यस्तासां ध० । एनांसि प्रणुदन्तीति क्विप् एनःप्रणुदः तासामे० । तस्याभ्यागमनं तदभ्यागमनं तस्मिन् त० । परीप्सतीति परिप्सुः । सुखेन उपविष्टः सुखोपविष्टस्तं सु० । इति वृत्तचतुष्टयार्थः ॥४॥ चतुर्भिः कलापकम् ।

युधिष्ठिरः किमुवाचेत्याह -

अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ।
तुल्या भवद्दर्शनसंपदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥

अना० व्याख्या । हे मुने ! **एषा भवद्दर्शनसंपत्** त्वद्दर्शनसमृद्धिः **वीतबलाहकायाः** वारि वहतीति बलाहकः पृषोदरादित्वात्साधुः मेघरहिताया **दिवो** गगनस्य **वृष्टेः तुल्या** समाना जातेति शेषः । अनभ्रवृष्टिवद् अतर्कितो[प]पन्नं त्वद्दर्शनं कस्यचित् सर्वेषां(र्वथा) श्रेयसः कारणमिति भावः । किं० भवद्दर्शनसंपत् ? **अनाप्तपुण्योपचयैर्दुरापा** अकृतसुकृतसंग्रहैर्दुर्लभा दुष्प्रापा कृतपुण्यैरेव पुरुषैः प्राप्यते इत्यर्थः । पुनः किं० ? **फलस्य** स्वर्गापवर्गादेः भाविन इति शेषः । **सवित्री** निष्पादिका श्रेयस्करीत्यर्थः। पुनः किं० ? **निर्धूतरजाः** निरस्तरजोगुणा निर्मेघाकाशवृष्टिरपि कथंभूता अनाप्तपुण्योपचयैर्दुरापा निष्पुण्यकैः दुःखेन लभ्या पुनः किं० ? **फलस्य** धान्यादेः **सवित्री** जननी 'फलं हेतुकृते जातीफले फलकसस्ययोः। त्रिफलायां च कक्कोले शास्त्राग्रे व्युष्टिलाभयोः' इति *हैमानेकार्थः* [२-४८७] । पुनः किं० ? **निर्धूतरजाः** स्फेटितरेणुः 'रजो रेणुपरागयोः स्त्रीपुष्पे गुणभेदे च' इति *हैमानेकार्थः* [२-५८१] । अथ समासः । पुण्यानामुपचयः पुण्योपचयः न आप्तः अनाप्तः पुण्योपचयो यैस्ते अनाप्तपुण्योपचयास्तैर० । दुःखेनाप्यत इति दुरापा । निर्धूतं रजो यया सा नि० । सूते इति सवित्री । दर्शनस्य संपत् दर्शनसंपत् भवतो दर्शनसंपत् भ० । वीता बलाहका यस्याः सा वीतबलाहका तस्याः वी० । इति वृत्तार्थः ॥ ५ ॥

अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः संप्रति भूमिदेवाः ।
आ संहृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रम् ॥ ६ ॥

अद्य० व्याख्या । **अद्य** अधुना **क्रतूनां** राजसूयादीनां **क्रियाः** अनुष्ठानानि **कामदुघाः** अभिमतफलपूरकाः फलप्रदा इत्यर्थः । जाता इति शेषः । **संप्रति** इदानीं **भूमिदेवाः** ब्राह्मणाः **सत्याशिषः** सत्याशीर्वादाः जाताः ब्राह्मणाशिषोऽद्य फलिता इति भावः । **यत्** यस्मात् कारणात् **त्वयि** मुनावा**गते** सति **अस्मि** अहम् 'अस्मि अहमित्यर्थेऽव्ययं 'विभक्तिथमन्ततसाद्याभाः' [सि. १-१-३३] इत्यनेन *हैमसूत्रेणा*व्ययसंज्ञेति[१] । **आसंहृतेः** कल्पान्तमिति यावत् क्वचित् 'आसंसृतेः' इति पाठः तदा आसंसाराद्यावत् संसारमित्यर्थः । आङादियोगे पञ्चमी वक्तव्या । **जगत्सु** त्रिभुवनेषु **बहुमानपात्रं** प्रसंशाभाजनं **जातः** उद्भूतसकलसत्कर्मफलभूतं भवदागमनं येन मे जगन्मान्यता जाता इति भावः । अथ समासः । कामं दुहन्तीति कामदुघाः । सत्या आशीर्येषां ते सत्याशिषः । भूमौ देवाः भूमिदेवाः । बहुश्चासौ मानश्च बहुमानः बहुमानस्य पात्रं ब० । इति वृत्तार्थः ॥ ६ ॥

श्रियं विकर्षत्यपहन्त्यघानि श्रेयः परिस्त्रौति[2] तनोति कीर्तिम् ।
सुदर्शनं लोकगुरोरमोघं तवात्मयोनेरिव किं न धत्ते ॥ ७ ॥

'श्रियं०' व्याख्या । हे मुने ! हे लोकगुरो ! **तव** भवतोऽ**मोघं** सफलं **सुदर्शनं** विलोकनं **किं न धत्ते** किं न करोति, अपितु सर्वं करोतीत्यर्थः । तत् किं तदाह- भवद्दर्शनं **श्रियं** लक्ष्मीं **विकर्षति** आनयति लक्ष्मीमाकृष्य ददाति इत्यर्थः । पुनः किं करोति ? **अघानि** पापानि **अपहन्ति** स्फेटयति दूरीकरोतीत्यर्थः । पुनः किं० ? **श्रेयो** मङ्गलं **परिस्त्रौति** श्रवति ददातीत्यर्थः । पुनः किं० ? **कीर्तिं** यशः **तनोति** विस्तारयति सर्वं संपादयतीत्यर्थः । कस्येव ? आत्मयोने**रिव** यथा **आत्मयोने**र्ब्रह्मणः संदर्शनं किं न करोति अपितु सर्वसंपत्साधकं भवतीत्यर्थः । किं० आत्मयोनेः ? **लोक[२]गुरोः** जगद्गुरोः । अथ समासः । लोकस्य गुरुः लोकगुरुस्तस्य लो० । न मोघम् अमोघम् । आत्मनो योनिर्यस्य स आत्मयोनिस्तस्य आ० । इति वृत्तार्थः ॥ ७ ॥

श्च्योतन्मयूखेऽपि हिमद्युतौ मे न निर्वृतं निर्वृतिमेति चक्षुः ।
समुज्झितज्ञातिवियोगखेदं त्वत्संनिधावुच्छ्वसतीव चेतः ॥ ८ ॥

'श्च्योत०' व्याख्या । अत्र यत्तदोर्द्वयोरप्यध्याहारः । हे मुने ! **मे** मम यच्चक्षुः दृष्टिः**श्च्योतन्मूयखेऽपि** श्रवदमृतेऽपि **हिमद्युतौ** चन्द्रे **न निर्वृतं** न सुखं प्राप्तं तन्मे मम चक्षुः **त्वत्संनिधौ** त्वत्समीपे **निर्वृतिं** सुखम् **एति** प्राप्नोति चकारोऽध्याहारः **च** पुनः मे **चेतो** मानसं त्वत्समीपे **उच्छ्वसतीव** उल्लासं भजतीव उत्पूर्वः श्वस् प्राणधारणे इति धातुः । किंलक्षणं चेतः ? **समुज्झितज्ञातिवियोगखेदं** त्यक्तस्वजन-वि[३]रहदुःखम् । अथ समासः । श्च्योतन्तीति श्च्योतन्तः श्च्योतन्तो मयूखा यस्मिन् ते श्च्यो० [हिमा

1. एषः पाठः म. मध्ये । 2. परिस्नौति - म. एष पाठः म. मध्ये सूचितः ।

१. 'दासे कृतागसि भवत्युदिनः प्रभूणां पादप्रहार इति सुन्दरि ! **नास्मि**' इति प्रयोगोऽपि -म. । २. एतद्विशेषणं म. मध्ये 'तव' इति पदस्य । ३. पूर्वार्धे तु निर्वृतिकारणे सत्यपीन्दावनिर्वृत्तिकथनाद्विशेषोक्तिः -म. ।

द्युतिर्यस्य स हि. तस्मिन्] हिमद्युतौ । [ज्ञातीनां वियोगः] ज्ञातिवियोगो ज्ञातिवियोगस्य खेदः ज्ञातिवियोगखेदः समुज्झितः ज्ञातिवियोगखेदः येन तत् समु० । तव संनिधिः त्वत्संनिधिस्तस्मिन् त्व० । इति वृत्तार्थः ॥८॥

निरास्पदं प्रश्नकुतूहलित्वमस्मास्वधीनं किमु निःस्पृहाणाम् ।
तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरोति ॥ ९ ॥

निरा० व्याख्या । हे मुने ! **प्रश्नकुतूहलित्वं निरास्पदम्** आगमनप्रयोजनप्रश्नो निराश्रयो वर्तते । आस्पदं प्रतिष्ठायामिति निपातः । पृच्छाऽनवकाशे हेतुमाह **निःस्पृहाणां** भवादृशाम् **अस्मासु** अस्मद्विषये **अधीन**मायत्तं **किमु** वर्तते न किंचि[दि]त्यर्थः । ये सस्पृहास्तेषां राजाधीनं कार्यं, न निःस्पृहाणामिति भावः । यद्यपि एवं विद्यते **तथापि इच्छा** वाञ्छा **कल्याणकरीं** मद्धितैककारणं **ते** तव **गिरं** वाणीं **श्रोतुं** श्रवणाय **मां प्रति मुखरीकरोति** वाचालीकरोति प्रेरयतीत्यर्थः । निस्स्पृहस्यापि तव वाक्यं मद्धितकरत्वात् श्रोतव्यमिति भावः । अथ समासः । निर्गतम् आस्पदं यस्मात् तन्नि० । प्रश्ने कुतूहलं विद्यते अस्य प्रश्नकुतूहली प्रश्नकुतूहलिनो भावः प्र० । निर्गता स्पृहा येषां ते निस्स्पृहास्तेषां नि० । कल्याणं करोतीति कल्याणकरी तां क० । अमुखरं मुखरं करोतीति मुखरीकरोति । इति वृत्तार्थः ॥९॥

इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥

इत्यु० व्याख्या । **द्वैपायनेन** वेदव्यासेन **नरेन्द्रो** युधिष्ठिरः **इति** वक्ष्यमाणां **गिरं** वाणीम् **अभिदधे** उक्तः कथंभूतां गिरम् ? **उदारां** स्फुटार्थां विशेषार्थवतीमित्यर्थः । किं० नरेन्द्रः ? **इति** पूर्वोक्तप्रकारेण **[उक्तिविशेषरम्यं]** वचनचातुर्यमनोहरं यथा स्यात्तथा **उक्तवान्** कथितवानित्यर्थः । किं कृत्वा ? **मनो** मानसं **जयोपपत्तौ** जयाभ्युपाये जयसिद्धौ **समाधाय** आरोप्य वेदव्याससंगमात् मम जयो भावीति मनसि निश्चित्येत्यर्थः । पुनः किं० ? अत एव **उदारचेताः** उत्कृष्टमनाः । अथ समासः । उक्तेर्विशेषः उक्तिविशेषः उक्तिविशेषेण रम्यम् उ० । जयस्य उपपत्तिः जयोपपत्तिः तस्मिन् ज० । उदारं चेतो यस्य स उ० । द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनो द्वीपायन एव द्वैपायनः स्वार्थे अण्प्रत्ययः तेन द्वै० । नराणामिन्द्रो नरेन्द्रः । इति वृत्तार्थः ॥ १० ॥

आदौ स्वस्य माध्यस्थ[भङ्ग]दोषं युग्मेन परिहरति -

चिकीर्षतां जन्मवतामलघ्वीं यशोवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानाम् ॥ ११ ॥

चिकीर्षतां० व्याख्या । हे राजन् ! **जन्मवतां** देहिनां **बन्धुषु** स्वजनेषु **तुल्यरूपा** समानरूपा **वृत्तिर्व्य**वहारो **अभ्यर्हिता** उचिता योग्या उक्ता किन्तु प्राणिनामपि स्वजनेषु समानव्यवहार उक्तः एतावता सर्वैरपि बन्धुषु तुल्यानुरागः कर्तव्य इति भावार्थः । किंकुर्वतां जन्मवताम् ? **उभयत्र** लोकद्वयेऽपि **भूतिम्**

ऋद्धिं **चिकीर्षतां** संग्रहीतुमिच्छतां किं० भूतिम् ? **अलघ्वीं** गुर्वीं महतीं च पुनः किं० ? **यशोवतंसां** कीर्तिभूषणाम् अतो हेतोस्**तपोधनाना**मस्मादृशां मुनीनां सर्वेषु **विशेषेण** नियमेन तुल्यरूपा वृत्तिः **अभ्यर्हिता** उक्ता कस्मात् शत्रुषु मित्रेषु च तुल्यानुरागात् । अथ समासः । जन्म विद्यते येषां ते जन्मवन्तस्तेषां ज० । न लघ्वी अलघ्वी तामलघ्वीम् । यश एव अवतंसो यस्याः सा यशोवतंसा तां य० । उभयस्मिन्नित्युभयत्र । तुल्यं रूपं यस्याः सा तु० । तप एव धनं येषां ते तपोधनास्तेषां त० । इति वृत्तार्थः ॥११॥

तथापि निघ्नं नृप ! तावकीनैः प्रह्वीकृतं मे हृदयं गणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः ॥ १२ ॥

तथा० व्याख्या । तर्हि तवैव बन्धुषु तुल्या वृत्तिः कथं न इत्याह यद्यपि तपोधनानां सर्वेष्वपि समानरागस्तथापि हे नृप ! **तावकीनै**स्त्वदीयै**र्गुणौघै**र्गुणसमूहैः **प्रह्वीकृतम्** आवर्जितं सत् **मे** मम **हृदयं** चित्तं **निघ्नं** त्वदायत्तं त्वदधीनं वर्तते 'नाथवत् निघ्नगृह्यकौ तन्त्रायत्तवशाधीनबन्दवन्तः परात्परे' इति *हैमः* [३५६] । ननु निःस्पृहस्य कोऽयं पक्षपातः इत्याह- **हि** यस्मात् हेतोः **वीतस्पृहाणां** विरक्ताना**मपि मुक्तिभाजां** मुमुक्षूणां **भव्येषु** साधुषु **पक्षपाताः** स्नेहाः **भवन्ति** उत्पद्यन्ति न तु भव्यानुग्रहो महतां माध्यस्थभञ्जक इति भावः । अथ समासः । तव इमे तावकीनास्तैस्ता० । गुणानामोघाः गुणौघास्तैर्गु० । वीता गता स्पृहा येभ्यस्ते वीतस्पृहास्तेषां वी० । मुक्तिं भजन्तीति ते मुक्तिभाजस्तेषां मु० । भवन्तीति भव्यास्तेषु भव्येषु । इति वृत्तार्थः ॥ १२ ॥

अथ नृपस्य गुणवत्तां प्रकटयितुं धृतराष्ट्रस्य दुश्चेष्टतामुद्घाटयति -

सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः ।
यस्त्यक्तवान् वः स वृथा बलाद्वा मोहं विधत्ते विषयाभिलाषः ॥ १३ ॥

सुता० व्याख्या । हे युधिष्ठिर ! **यूयं** भवन्तः **तस्य राज्ञो** धृतराष्ट्रस्य **किमु न सुता** न पुत्राः अपितु पुत्राः एवेत्यर्थः। **वा** अथवा यूयं **गुणैः** क्षमाशौर्यगाम्भीर्यादिभिः **सुयोधनं** दुर्योधनं किमु **नातीताः** नातिक्रान्ताः अपितु क्रान्ता एव असुतत्वमगुणत्वं च त्यागे हेतुः तत्तु युष्मासु नास्तीत्यर्थः । उपालम्भकारणमाह - यत् **स** धृतराष्ट्रो **वो** युष्मान् **त्यक्तवान्** तद् **वृथा** निरर्थकं निष्कारणमेव त्यक्तवानित्यर्थः यदि यूयं सुता गुणाधिकाश्च तर्हि कथमत्याक्षीत्तत्राह - **वा** अथवा युक्तं **विषयाभिलाषो** भोगतृष्णा **बलात्** हठात् **मोहम**विवेकमज्ञानं वा **विधत्ते** उत्पादयति विषयाभिलषातिरिक्तो न कश्चिद्युष्मत्त्यागहेतुः इत्यर्थः । अथ समासः । राजत इति राजा तस्य राज्ञः । सुखेन योध्यत इति सुयोधनस्तं सु० । विषयस्याभिलाषो वि० । इति वृत्तार्थः ॥ १३ ॥

अथ राज्ञ उत्साहवर्धनाय शत्रोर्हानिं सूचयति -

जहातु नैनं कथमर्थसिद्धिः संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥ १४ ॥

'जहा०' व्याख्या हे नृप ! **अर्थसिद्धिः** कार्यसिद्धिः **एनं** धृतराष्ट्रं **कथं न जहातु** अपितु त्यजत्येव हानिकालस्तस्य प्राप्त इत्यर्थः । एनं कम् ? **यः** धृतराष्ट्रः राजा **संशय्य** संदिह्य संदेहं प्राप्य **कर्णादिषु** दुर्मन्त्रिषु **तिष्ठते** अर्थात् संशयपरो भूत्वा कर्णादीन् दुर्मन्त्रिणः संदेहपदं पृच्छतीत्यर्थः । यदि कर्णादयो निर्णेतारस्ततोऽर्थसिद्धिस्तं कथं न त्यजतीत्याह- तथाहि यतो हेतो **असाधुयोगा** दुर्जनसंसर्गा **विपदाम्** आपदां **पदानि** स्थानानि भवन्ति धृतराष्ट्रोऽपि दुर्जनसंसर्गकारणात् विनाशं प्राप्नोतीति भावः । कथंभूताः असाधुयोगाः ? **जयान्तरायाः** जयस्य विघ्नकारिणः किं० विपदाम् ? **प्रमाथिनीनां** पीडाकारिणीनां न केवलम् असाधुयोगाः अर्थघातिनः किन्त्वनर्थकारिणश्चेत्यर्थः । अथ समासः । अर्थस्य सिद्धिः अ० । कर्णः आदौ येषां ते कर्णादयस्तेषु क० । न साधवोऽसाधवः असाधुनां योगाः अ० । जयस्य अन्तरायाः ज० । प्रमथ्नन्तीति प्रमाथिन्यस्तासां प्र० । इति वृत्तार्थः ॥ १४ ॥

एवं शत्रोरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति -

पथश्च्युतायां समितौ रिपूणां धर्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्ति रम्यमाविष्कृतं प्रेम परं गुणेषु ॥ १५ ॥

पथ० व्याख्या । हे नृप ! **त्वया गुणेषु** शान्त्यादिषु **पर**मुत्कृष्टं **प्रेम** कीर्तिः **आविष्कृतं** प्रकटीकृतं कथंभूतं प्रेम ? **विपत्स्वपि** कष्टेष्वपि **अविपत्ति** अविनाशि पुनः कथंभूतं प्रेम ? अत एव **रम्यं** मनोहरं दुःसहमपि सोढवता त्वया साधु अनुष्ठितम् इत्यर्थः । त्वया किंकुर्वाणेन ? **रिपूणां** शत्रूणां **समितौ** सभायां **चिराय** चिरकालं **धर्म्यां** धर्मादनपेतां **धुरं** भारं **दधानेन** धारयता कृच्छ्रेष्वपि धर्मादचलतेत्यर्थः । किं० समितौ ? **पथः** सन्मार्गत**श्च्युतायां** भ्रष्टायां सत्यां दुरात्मनो दुःशासनस्य द्रौपदीसंग्रहसाहस-मङ्गीकृतवत्यामित्यर्थः । यन्मार्गादपेतानाम् अधार्मिकाणां मध्ये धर्ममेव परिपालयता त्वया लोके चिरं गुणवान् इति यशः प्रापितमिति भावार्थः । अथ समासः । धर्मादनपेता धर्म्या तां धर्म्याम् । दधतीति दधानः तेन दधानेन । न विद्यते विपत्तिर्यस्मात् तदविपत्ति । इति वृत्तार्थः ॥ १५ ॥

विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः कृतोपकारा इव विद्विषस्ते ॥ १६ ॥

विधा० व्याख्या । हे राजन् ! **ते** तव **विद्विषः** शत्रवः **कृतोपकारा** विहितोपकृतय **इव** वर्तन्ते अपकारोप्युपकारायैव संवृत्तस्तद्दौर्जन्यं तव सौजन्यं च जगति सुव्यक्तमासीदित्यर्थः । किं० विद्विषः ? **प्रकाशितत्वन्मतिशीलसाराः** प्रकटीकृतत्वद्बुद्धिसदाचारप्रकर्षाः विद्यमानस्यापि सुजनस्य गुणाश्चन्दनदारुण इव परिभव एव प्रकटीभवन्तीति भावः । किंकृत्वा ? **भवत**स्तव **छलेन** कपटेन द्यूतव्याजेन वा **अनात्मनीनं** स्वस्यैवानर्थहेतुं **विध्वंसं** पराभवम् अपकारं वा **विधाय** कृत्वा भवतः किंलक्षणस्य ? **शमैकवृत्तेः** शमैकव्यापारस्य । अथ समासः । आत्मने हितः आत्मनीनः न आत्मनीनः अनात्मनीनस्तं अ० । शम एव एका वृत्तिर्यस्य स शमैकवृत्तिस्तस्य श० । मतिश्च शीलं च मतिशीले तव मतिशीले त्वन्मतिशीले त्वन्मतिशीलयोः सारः त्वन्मतिशीलसारः प्रकाशितस्त्वन्मतिशीलसारो यैस्ते प्र० । कृत

उपकारो यैस्ते कृ० । इति वृत्तार्थः ॥ १६ ॥

अथ प्रयोजनमाह -

लभ्या धरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः ।
अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ १७ ॥

लभ्या० व्याख्या । हे राजन् ! **तव** त्वया कर्तरि षष्ठी । **धरित्री** पृथ्वी **विक्रमेण लभ्या** प्राप्या प्राप्तव्या वर्तते तद्विना न सुलभेत्याह- **च** पुनः **विपक्षः** शत्रुरपि सुयोधनः 'वीर्यास्त्रबलैः' **वीर्यं** शक्तिः **अस्त्राणि** आग्नेयादिमन्त्रविशेषाः **बलं** रथतुरगगजादि तैः कृत्वा **ज्यायान्** गरीयान् अधिकतर इत्यर्थः । **अतो** हेतोः **प्रकर्षाय** आधिक्याय **विधिरु**पायो **विधेयः** कर्तव्यः कुत इति हेतुमात्रमाह- **हि** यस्मात् कारणात् **रणे** संग्रामे **जयश्रीः** जयलक्ष्मीः **प्रकर्षतन्त्रा** आधिक्याधीना वर्तते । 'तन्त्रायत्तवशाधीन' इति *हैम:* [३५६] । बलिन एव जयो न दुर्बलस्य इति भावः । अथ समासः । अतिशयेन वृद्धो ज्यायान् वृद्धशब्दस्य ज्या आदेशः । वीर्यं च अस्त्राणि च बलानि च वीर्यास्त्रबलानि तैः वी० । प्रकर्षस्य तन्त्रा प्रकर्षतन्त्रा । जयस्य श्रीः जयश्रीः । इति वृत्तार्थः ॥ १७ ॥

अथ 'त्रिः' इत्यादिना श्लोकचतुष्टये विपक्षाधिक्यं वर्णयति -

त्रिः सप्तकृत्वो जगतीपतीनां हन्ता गुरुर्यस्य स जामदग्न्यः ।
वीर्यावधूतः स्म तदा विवेद प्रकर्षमाधारवशं गुणानाम् ॥ १८ ॥

यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्यान्मनो भयैकप्रवणं स भीष्मः ॥ १९ ॥

त्रिः स० यस्मि० व्याख्या । हे राजन् ! **स भीष्मो** गाङ्गेयः **रणे** संग्रामे **धनुश्चा**पं **धुन्वन्** कम्पयन् सन् **कस्य** जनस्य **मनश्चि**त्तं **भयैकप्रवणं** भयैकतत्परं **न कुर्यात्** न करोति अपितु सर्वस्यापि योधृमास्यपि (युध्यमानस्य) मनसि भयं कुर्यादिति भावः । सः कः ? **यस्मिन्** भीष्म **अनैश्वर्यकृतव्यलीकः** असामर्थ्यविहितदुःखः सन् 'दुःखे वैलक्ष्ये व्यलीकमिति' *यादवः ।* **अन्तकोपि** यमोऽपि **पराभवम्** उपद्रवं **प्राप्त इव** भीष्मस्य रणे यमोऽपि पराभव एव आस्ते किमुतान्य इति भावः । पुनरपि सः कः ? **यस्य** भीष्मस्य **गुरुः** धनुर्वेदोपदेष्टा स **जामदग्न्यः** परशुरामो वर्तते । स कः ? यः परशुरामः **त्रिःसप्तकृत्वः** एकविंशतिवारान् **जगतीपतीनां** क्षत्रियाणां राज्ञां **हन्ता** हिंसको घातको वर्तते । पुनरपि स कः ? यो जामदग्न्यो यस्य भीष्मस्य **वीर्यावधूतः** बलेन अवगणितः सन् अम्बिकादिस्वयंवरे इत्यर्थः । **तदा** युद्धे भङ्गसमये **गुणानां** शौर्यादीनां **प्रकर्षम्** अतिशयम् **आधारवशम्** आश्रयाधीनं **विवेद** वेत्ति स्म निजविद्यायाः स्वशिष्ये भीष्मे स्वस्मादस्याधिक्याधार-दर्शनात् इति भावः । **स्मे**ति पादपूरणे 'स्मातीते पादपूर्तौ' इति *हैमानेकार्थः* [५-१६] । अथ समासः । त्रिः आवृत्तान् सप्तवारान् त्रिःसप्तकृत्वः । जगत्याः पतयो जगतीपतयस्तेषां ज० । हन्तीति हन्ता । जमदग्नेरपत्यं पुमान् जामदग्न्यः

गर्गादित्वात् ण्यप्रत्ययः । वीर्येणावधूतः वी० । आधारस्य वशम् आ० । ईश्वरस्य भाव ऐश्वर्यं न ऐश्वर्यम् अनैश्वर्यम् अनैश्वर्यं कृतं व्यलीकं यस्य स अनै० । एकं च तत् प्रवणं च एकप्रवणं भये एकप्रवणं भयैकप्रवणम् । इति वृत्तद्वयार्थः ॥१८॥ ॥१९॥

सृजन्तमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः ।
परिस्फुरल्लोलशिखाऽग्रजिह्वं जगज्जिघत्सन्तमिवान्तवह्निम् ॥ २० ॥

सृज० व्याख्या । हे राजन् ! **वो** युष्माकं मध्ये कोऽसौ विद्यते यो **गुरुं** द्रोणाचार्यम् **आजौ** संग्रामे **सहेत** क्षमेत सोढुं शक्नुयात् अपितु न कोपि सहेत इत्यर्थः । किं० गुरुम् ? **इषुसंहतीः** बाणश्रेणीः शरसमूहान् **सृजन्तं** मुञ्चन्तं वर्षन्तं पुनः किं० ? **कोपज्वलितं** क्रोधाक्रान्तं कोपेन दीप्तम् इत्यर्थः । अत एव उत्प्रेक्ष्यते **जगत्** विश्वं **जिघत्सन्तं** भक्षितुमिच्छन्तम् **अन्तवह्निं** प्रलयकालवैश्वानरमिव स्थितम् । किं० अन्तवह्निम् ? **परिस्फुरल्लोलशिखाग्रजिह्वं** देदीप्यमानचपलज्वालाग्रजिह्वम् । अथ समासः । सृजतीति सृजन् तं सृजन्तम् । इषूणां संहतयः इषुसंहतयः ता इ० । कोपेन ज्वलितः कोपज्वलितस्तं को० । परिस्फुरन्ति लोलानि शिखाग्राण्येव जिह्वा यस्य स परिस्फुरल्लोलशिखाग्रजिह्वः तं प० । इति वृत्तार्थः ॥२०॥

निरीक्ष्य संरभ्भनिरस्तधैर्यं राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः ॥ २१ ॥

निरी० व्याख्या । हे राजन् ! **राधेयं** राधासुतं कर्णं **निरीक्ष्य** दृष्ट्वा **मृत्योरपि** यमस्यापि **असंस्तुतेषु** अपरिचितेषु 'संस्तवः स्यात् परिचय' इति *हैमः* [१५१३] । **भयेषु** भीतिषु **प्रसभं** हठात् **पक्षपातः** परिचयो **जायेत** भवेत् मृत्युरपि अस्मात् बिभीयादित्यर्थः । किमुतान्य इति भावः । किं० राधेयम् ? **संरम्भनिरस्तधैर्यं** कोपत्यक्तमर्यादम् आटोपेनैव परधैर्यापहारिणमित्यर्थः । पुनः किं० ? **आराधितजामदग्न्यं** सेवितपरशुरामं परशुरामादधिगतशस्त्रशास्त्ररहस्यमित्यर्थः । एतावता शस्त्रवेदित्वं कथितम् । अथ समासः । संरम्भेण निरस्तं धैर्यं येन स संरम्भनिरस्तधैर्यस्तं सं० । राधायाः अपत्यं राधेयस्तं राधेयम् । जमदग्नेरपत्यं जामदग्न्यः आराधितो जामदग्न्यो येन स आराधितजामदग्न्यस्तम् आ० । इति वृत्तार्थः ॥२१॥

अथानन्तरं करणीयमागमनप्रयोजनं च युग्मेनाह -

यया समासादितसाधनेन सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्यमुन्मूलितारः कपिकेतनेन ॥ २२ ॥

यया० व्याख्या । हे राजन् ! **कपिकेतनेन** अर्जुनेन **दुरापं** दुष्प्रापं **वीर्यं** बलं तेजो वा प्राप्य **एते** पूर्वोक्ता भीष्मादयो योद्धाः **उन्मूलितारः** उन्मूलयिष्यन्ते अन्यथोन्मूलयितुमशक्या इति भावः । कपिकेतनेन किंकुर्वता ? **यया** विद्यया कृत्वा **सुदुश्चराम्** अतिदुस्तपां **तपस्यां** तपश्चर्याम् **आचरता** ईश्वरं

१. अत्र भयसंबन्धरहितस्य मृत्योर्भयसंबन्धाभिधानादसंबन्धे संबन्धरूपातिशयोक्तिरलंकारः -म.

प्रति उद्दिश्य तपः कुर्वतेत्यर्थः । किं० कपिकेतनेन ? **समासादितसाधनेन** प्राप्तपाशुपतास्त्ररूपेण । अथ समासः । समासादितं साधनं येन स समासादितसाधनस्तेन स० । दुःखेन चर्यते दुश्चरा तां दुश्चराम् । आचरतीति आचरन् तेन आचरता । दुःखेन आप्यते इति दुरापम् । कपिः केतनं यस्य स कपिकेतनस्तेन क० । इति वृत्तार्थः ॥२२॥

महत्त्वयोगाय महामहिम्नामाराधनीं तां नृप ! देवतानाम् ।
दातुं प्रदानोचितभूरिधाम्नीमुपागतः सिद्धिमिवास्मि विद्याम् ॥ २३ ॥

मह० व्याख्या । हे **नृप** ! अहं **तां** विद्याम् इन्द्राराधनमन्त्ररूपां **दातुं** समर्पितु**मागतोऽस्मि** उत्प्रेक्ष्यते साक्षात् **सिद्धिमिव** कार्यसिद्धिमिव अनेन विद्यायाः सफलत्वमुक्तम् किमर्थम् ? **महत्त्वयोगाय** [प्रकर्षलाभाय] किंलक्षणां विद्याम्? **देवतानाम्** इन्द्रादीनाम् **आराधनीं** प्रसादयित्रीम् आराधनेन योग्यामित्यर्थः । कथंभूतानां देवतानाम् ? **महामहिम्नां** प्रचुरप्रभावाणां किं० विद्याम् ? **प्रदानोचितभूरिधाम्नीं** दानयोग्यानेकप्रभावां यद्वा भिन्नपदे हे **प्रदानोचित** ! हे दानपात्र ! फलभोक्तृत्वात् अस्य युधिष्ठिरस्येति पात्रत्वोक्तिः किंलक्षणां विद्याम्? **भूरिधाम्नीं** महाप्रभावां 'धाम रश्मौ गृहे देहे स्थाने जन्मप्रभावयोः' इति *हैमानेकार्थः* [२-२६६] । अथ समासः । महतो भावो महत्त्वं महत्त्वस्य योगो महत्त्वयोगस्तस्मै म० । महान् महिमा येषां ते महामहिमानस्तेषां म० । आराध्यतेऽनया इति आराधनी ताम् आ० । साधनाधारयोश्चेति ल्युट् ततः टित्वादीप् । प्रदाने उचितं प्रदानोचितं भूरि च तद् धाम च भूरिधाम प्रदानोचितं भूरिधाम यस्याः सा प्रदानोचितभूरिधाम्नी तां प्र० । भिन्नपदे प्रदानाय उचितः प्रदानोचितस्तस्य संबोधनं हे प्रदानोचित !। भूरि धाम यस्याः भूरिधाम्नी तां भू० । इति वृत्तार्थः ॥ २३ ॥

इत्युक्तवन्तं व्रज साधयेति प्रमाणयन् वाक्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥

इत्यु० व्याख्या । **जिष्णुर**र्जुनः 'जिष्णुःशक्रेऽर्जुने विष्णौ जित्वरेऽर्के वसुष्वपि' इति *हैमानेकार्थः* [२-१४०] । **तं** वेदव्यासं **विनयेन उपाससाद** आराधयामास तं किं० ? **इति** पूर्वोक्तप्रकारेण **उक्तवन्तं** भाषमाणं कथितवन्तमित्यर्थः । पुनः किं० ? **प्रसेदिवांसं** प्रसन्नं क इव ? **अन्तेवसन्निव** यथा अन्तेवासी शिष्यः विनयेन गुरुम् उपासीदिति जिष्णुः (जयनशीलोऽर्जुनः) किंकुर्वन् ? **इति** अमुना प्रकारेण **अजातशत्रोः** युधिष्ठिरस्य **वाक्यं** वचनं **प्रमाणयन्** अङ्गीकुर्वन् प्रमाणीकुर्वन्नित्यर्थः । इतीति किं हे अर्जुन ! त्वं **व्रज** गच्छ भगवदादेशं **साधय** निष्पादय 'अजातशत्रुः शल्यारिर्धर्मपुत्रो युधिष्ठिरः' इति *हैमः* [७०७] । अथ समासः। न जाताः शत्रवो यस्य स अजातशत्रुः तस्याजातशत्रोः स्वयमविद्वेषणत्वात् इयमन्वर्थसंज्ञा । प्रससाद इति प्रसेदिवान् तं प्र० । इति वृत्तार्थः ॥ २४ ॥

निर्याय विद्याथ दिनादिरम्याद्बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

निर्या० व्याख्या । **अथ** जिष्णुसेवाकरणानन्तरं **विद्या** ऐन्द्रमन्त्ररूपा **महर्षे**र्वेदव्यासस्य **मुखात्** वदनात् **निर्याय** निर्गत्य **पार्थाननम्** अर्जुनमुखम् **अभिपेदे** प्रविष्टा किंलक्षणा विद्या ? **वह्निकणावदाता** अग्निस्फुलिङ्गवदुज्ज्वला देवतासान्निध्यात् देदीप्यमाना इति भावः । केव ? दी**प्तिरिव** यथा **दीप्तिः** सूर्यकान्तिः **अर्कस्य** सूर्यस्य **बिम्बात्** मण्डलात् **दिनादिरम्यात्** प्राप्तकाले मनोहरात् **निर्याय** निर्गत्य **स्फुरत्पद्मं** विकसत्कमलम् अभिपद्यते प्राप्नोति दीप्तिः कथंभूता ? **वह्निकणावदाता** अग्निस्फुलिङ्गवद् पीता 'अवदातं विमले मनोज्ञे सितपीतयोः' इति *हैमानेकार्थः* [४-९३] । अर्कतुल्यो वेदव्यासः सूर्यबिम्बतुल्यं वेदव्यासमुखं स्फुरत्पद्मतुल्यम् अर्जुनाननम् अर्कदीधितितुल्या विद्या । अथ समासः । दिनस्यादिः दिनादिः दिनादौ रम्यं दिनादिरम्यं तस्मात् दि० । महांश्चासौ ऋषिश्च महाऋषिस्तस्य महर्षेः । पार्थस्याननं पा० । वह्नेः कणाः वह्निकणाः वह्निकणवत् अवदाता व० । स्फुरत् च तत् पद्मं च स्फुरत्पद्मम् इति वृत्तार्थः ॥ २५ ॥

योगं च तं योग्यतमाय तस्मै तपः प्रभावाद्वितताार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे समुन्मिमीलेव चिराय चक्षुः ॥ २६ ॥

योग० व्याख्या । न केवलं विद्यामेव ददौ **च** पुनः स वेदव्यासः **तपःप्रभावात् योग्यतमाय** अतिशयेन योग्याय **तस्मै** अर्जुनाय **तं** वक्ष्यमाणमहिमानं **योगं** पातञ्जलादिशास्त्रनिर्दिष्टं ध्यानविधिं 'योगो विश्रब्धघातिनि । अलब्धलाभे संगत्यां कार्मणध्यानयुक्तीषु' इति *हैमानेकार्थः* [२-४२/४३] **सद्य**स्तत्कालमेव **वितताार** ददौ तं कं योगं **येन** योगेन **तत्त्वेषु** प्रकृतिमहदादिषु चतुर्विंशतितत्त्वेषु तानि चामूनि प्रकृति, १ महान् २ अहङ्कारो ३ मनश्चेति ४ अन्तःकरणचतुष्टयी । पृथिवी १ अप् २ तेजः ३ वायुः ४ आकाशश्चेति ५ पञ्चमहाभूतानि । शब्द १ रूप २ रस ३ स्पर्श ४ गन्धश्चेति ५ पञ्च तन्मात्राणि । त्वग् १ चक्षुः २ श्रोत्र ३ नासिका ४ जिह्वाश्चेति ५ पञ्च ज्ञानेन्द्रियाणि । पाणि १ पाद २ अपायु ३ उपस्थ ४ वाग् चेति ५ पञ्च कर्मेन्द्रियाणि तेषु **अवभासे** साक्षात्कारे **कृते** विहिते सति **अस्या**र्जुनस्य **चक्षुः** नेत्रं **चिराय** चिरकालं **समुन्मिमीलेव** उद्घाटितमेव इवेत्युत्प्रेक्षा तदा तस्य कोऽपि अखिलाज्ञानभञ्जकस्तत्त्वाव-भासश्चिरादन्धस्य दृष्टिलाभ इव भवेत् इति । तत्त्वदर्शनात् चिरकालं यावत् चक्षुष्मानिव संपन्नः इति भावः । अथ समासः । अतिशयेन योग्यो योग्यतमः तस्मै यो० । तपसः प्रभावः तपःप्रभावस्तस्मात् त० । इति वृत्तार्थः ॥२६॥

आकारमाशंसितभूरिलाभं दधानमन्तःकरणानुरूपम् ।
नियोजयिष्यन् विजयोदये तं तपःसमाधौ मुनिरित्युवाच ॥ २७ ॥

आका० व्याख्या । **मुनिर्वेदव्यासः तपःसमाधौ** 'समाधिः स्यात् समर्थने चित्तैकाग्र्यनियमयोर्मौने' इति हैमानेकार्थः [३-३४२/३] । तपोनियमे **तमर्जुनं नियोजयिष्यन्** आरोपयिष्यन् **इति** वक्ष्यमाणम् **उवाच** उक्तवान् किं० तपःसमाधौ ? **विजयोदये** विजयफलके किं० अर्जुनम् ? **आकारं** मूर्तिं **दधानं** बिभ्राणं किं० आकारम् ? **आशंसितभूरिलाभं** कथितप्रचुरफलं महाभाग्यसूचकमित्यर्थः । पुनः किं० ?

अन्तःकरणानुरूपं चित्तयोग्यम् अन्तःकरणशब्देन तद्वृत्तिरुत्साहो लक्ष्यते तदनुरूपं तदनुकूलम् उत्साहानुगुणव्यापारक्षममित्यर्थः । पुनः किं० ? अन्तःकरणानुरूपं चित्तयोग्यं मनःसदृशं मुखरागं धारयन्तमित्यर्थः । अथ समासः । भूरिश्चासौ लाभश्च भूरिलाभः । आशंसितो भूरिलाभो येन स आशंसितभूरिलाभस्तम् आ० । अन्तःकरणस्य अनुरूपः अन्तःकरणानुरूपस्तम् अ० । नियोजयिष्यतीति नियोजयिष्यन् । विजयस्य उदयो यस्मिन् स विजयोदयस्तस्मिन् वि० । तपसः समाधिः तपःसमाधिस्तस्मिन् त० । इति वृत्तार्थः ॥२७॥

किमुवाचेत्याह -

अनेन योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥

अने० व्याख्या । हे अर्जुन ! त्वं **जपोपवासाभिषवैः** स्वाध्यायानशनस्नानैः 'अभिषवः क्रतौ मद्यसंधानस्नानयोरपि' इति *हैमानेकार्थः* [४-३०३] । **मुनीनाम्** ऋषीणाम् **आचारम्** अनुष्ठानं **समाचर** सम्यगनुतिष्ठ किंलक्षणस्त्वम् ? **अनेन** सदुपदिष्टेन **योगेन** मन्त्रसंबन्धेन **विवृद्धतेजा** वर्धितप्रतापः त्वं किंकुर्वन् ? **निजां** स्वकीयां **पदवीं** मार्गं **परस्मै** अन्यस्मै **अयच्छन्** अददत् परप्रवेशमददित्यर्थः । पुनः किंलक्षणस्त्वम् ? **उपात्तशस्त्रः** गृहीतायुधः यः कोऽपि एतद्वनं प्रविशति स हन्तव्य इत्यर्थः । अथ समासः । विवृद्धं तेजो यस्य स वि० । यच्छतीति यच्छन् न यच्छन् अयच्छन् । उपात्तं शस्त्रं येन स उ० । जपश्च उपवासश्च अभिषवश्च जपोपवासाभिषवास्तैर्ज० । इति वृत्तार्थः ॥ २८ ॥

क्षेत्रविशेषे तपःसिद्धिरित्याशयेन तन्निदर्शयन्नाह -

करिष्यसे यत्र सुदुष्कराणि प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारुशिलोच्चयं तमेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥ २९ ॥

करिष्य० व्याख्या । **एषः** असौ **गुह्यको** यक्षः 'यक्षः पुण्यजनो राजा गुह्यको वटवास्यपि'इति *हैमः* [१९४] । **त्वां** भवन्तं **क्षणात्** क्षणमात्रेण अनायासेन तं **शिलोच्चयं** पर्वतम् इन्द्रकीलनामानं **नेष्यति** प्रापयिष्यति एष इति अनन्तरमेवास्य पुरः प्रादुर्भावान्निर्देशः किंलक्षणं शिलोच्चयम् ? **चारुशिलोच्चयं** मनोहरशिलासमूहं रम्यशिखरं वा तं कं **यत्र** यस्मिन् पर्वते **गोत्रभिदः** इन्द्रस्य **प्रसत्तये** प्रसादाय **सुदुश्चराणि** अतितरां दुश्चराणि **तपांसि करिष्यसे** चरिष्यसे तपिष्यसीत्यर्थः । अथ समासः । दुःखेन क्रियन्ते इति दुष्कराणि सुतरां दुष्कराणि सुदुष्कराणि । गोत्रान् भिनत्ति इति गोत्रभिद् तस्य गोत्रभिदः । शिलानां उच्चयाः शिलोच्चयाः चारवः शिलोच्चया यस्मिन् स चारुशिलोच्चयस्तं चा० । इति वृत्तार्थः ॥२९॥

इति ब्रुवाणेन नरेन्द्रसूनुं महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य सद्यः[1] प्रदेशमादेशमिवाधितस्थौ ॥ ३० ॥

इति० व्याख्या । **तेन महर्षिणा** वेदव्यासेन **तिरोबभूवे** अन्तर्दधे अदृशीभूतमित्यर्थः । तेन

1. साक्षात् -म. इदं च पा० ।

किंकुर्वाणेन ? **नरेन्द्रसूनुम्** अर्जुनम् **इति** पूर्वोक्तरीत्या **ब्रुवाणेन** वदता उक्तवतेत्यर्थः । 'वर्तमान सामीप्यं' भूते वर्तमानवत् प्रत्ययः । तिरोधानस्याविलम्बनसूचनार्थः । राजराजानुचरो धनदसेवको यक्षः 'राजराजो नृपे चन्द्रे कुबेरे' इति *हैमानेकार्थः* [४-५७]। **अस्य** वेदव्यासस्य **सद्यस्**तत्कालमेव **तं प्रदेशम् अधितस्थौ** आशिश्राय यत्र वेदव्यासोऽभूत् तत्र स यक्षः आगत इत्यर्थः । क इव ? **आदेश इव** यथा आदेशो भ्वादिदा(दिः) अस्त्यादेर्धातोः स्थानमधितिष्ठति आश्रयति । अथ समासः । ब्रूते इति ब्रुवाणस्तेन ब्रु० । नराणामिन्द्रो नरेन्द्रः नरेन्द्रस्य सूनुः नरेन्द्रसूनुः तं न० । महांश्चासौ ऋषिश्च महर्षिः तेन म० । राजराजस्य अनुचरो रा० । इति वृत्तार्थः ॥३०॥

कृताननतिर्व्याहृतसान्त्ववादे जातस्पृहः पुण्यजनः स जिष्णौ ।
इयाय सख्याविव संप्रसादं विश्वासयत्याशु सतां हि योगः ॥ ३१ ॥

कृत० व्याख्या । **स पुण्यजनो** यक्षः तस्मिन् **जिष्णौ** अर्जुने **सख्याविव संप्रसादं** विश्वासम् **इयाय** प्राप यथा कश्चित् पुमान् सख्यौ विश्वासमेति । जिष्णौ किंलक्षणे ? **व्याहृतसान्त्ववादे** उक्तप्रियवचने पुण्यजनः कथंभूतः ? **कृताननतिः** कृतप्रणामः पुनः किं० ? **जातस्पृहः** उत्पन्नाभिलाषः **हि** यस्मात् कारणात् **सतां** सत्पुरुषाणां **योगः** संगतिः **आशु** शीघ्रं **विश्वासयति** विश्वासं जनयति । अथ समासः । कृता आ समन्तात् नतिर्येन स कृ० । सान्त्वश्चासौ वादश्च सान्त्ववादः व्याहृतः सान्त्ववादो येन स व्याहृतसान्त्ववादस्तस्मिन् व्या० । जाता स्पृहा येन(यस्य) स जातस्पृहः । इति वृत्तार्थः ॥ ३१ ॥

अथोष्णभासेव सुमेरुकुञ्जान् विहीयमानानुदयाय तेन ।
बृहद्द्युतीन् दुःखकृतात्मलाभं तमः शनैः पाण्डुसुतान् प्रपेदे ॥ ३२ ॥

अथ० व्याख्या । **अथ** यक्षागमानानन्तरं **तमो** मोहः शोको वा **शनैः** मन्दं मन्दं **पाण्डुसुतान्** पाण्डवान् युधिष्ठिरभीमनकुलसहदेवान् **प्रपेदे** प्राप तेषां विवेकित्वाद्भीतभीतमिवेति भावः । कथंभूतान् पाण्डवान् ? **तेना**ऽर्जुनेन **उदयाय** उदयार्थं **विहीयमानान्** त्यज्यमानान् पुनः किं० ? **बृहद्द्युतीन्** गुरुद्युतीन् अनेकबुद्धिप्रकाशानित्यर्थः । तत्र कथंभूतम् ? **दुःखकृतात्मलाभं** दुःखेन विहितात्मोत्पत्तिः येन तत् तेषां विवेकित्वात् कथंचित् लब्धोदयमित्यर्थः । कान् केनेव ? सुमेरुकुञ्जान् उष्णभा**सेव** यथा **उष्णभासा** सूर्येण **उदयाय** उदेतुं **विहीयमानान्** त्यज्यमानान् **सुमेरुकुञ्जान्** मेरुपर्वतगह्वरान् **तमो**ऽन्धकारं **प्रपद्यते** प्राप्नोति किं० मेरुकुञ्जान् ? **बृहद्द्युतीन्** अतितेजस्विनः सौवर्णत्वाद्दीप्यमानान् तमसः संकोचकारणोक्तेः सुमेरुकुञ्जानित्यत्र सुमेरुग्रहणं कुञ्जानां सौवर्णत्वद्योतनार्थम्[१] । अथ समासः । उष्णा भाः यस्य स उष्णभास्तेन उ० । सुमेरोः कुञ्जास्तान् सु० । विहीयन्ते इति विहीयमानास्तान् वि० । बृहत्यो द्युत्यो येषां ते बृहद्द्युत्य(त)यः तान् बृ० । आत्मनो लाभः आत्मलाभः दुःखेन कृतः आत्मलाभो यस्य तत् दु० । पाण्डोः सुताः पाण्डुसुतास्तान् पा० ।इति वृत्तार्थः ॥ ३२ ॥

---

१. अत्र 'तमः'शब्दस्य श्लिष्टत्वाच्छ्लेषानुप्राणितेयमुपमा -म. ।

असंशयालोचितकार्यनुन्नः प्रेम्णा समानीय विभज्यमानः ।
तुल्याद्विभागादिव तन्मनोभिर्दुःखातिभारोऽपि लघुः स मेने ॥ ३३ ॥

असं० व्याख्या । **तन्मनोभिस्ते**षां चतुर्णां पाण्डवानां चित्तैः **स** पूर्वोक्तो **दुःखातिभारोऽपि** दुःखसमूहोऽपि अतिबाह्य(भार)भूतमपि दुःखं **लघुः** तृणवत् स्तोको **मेने** मन्यते स्म यतः एको भारः बहुधा विभज्य बहुभिरुह्यमानो महानपि लघुर्मन्यते तद्वदित्यर्थः । किं० दुःखातिभारः ? **असंशयालोचितकार्यनुन्नः** निस्संदेहं यथा भवति तथा विमर्शितेन कार्येण फलप्राप्तिलक्षणेन प्रेरितः निश्चयेन कार्यपर्यालोचनया निवारित इत्यर्थः । दुःखातिभारः किं क्रियमाणः ? **प्रेम्णा** भ्रातृस्नेहेन **समानीय** पुनराकृष्य **विभज्यमानः** समविभागीक्रियमाणः तुल्यस्नेहानां तुल्यदुःखदो भवतीति भावः । अत एव उत्प्रेक्ष्यते **तुल्याद्विभागादिव** पूर्वोक्तात् प्रेमकृतात् समविभागादिव इत्यर्थः । वस्तुतस्तु विवेकादेवेति भावः । पुनर्विभागग्रहणं तस्य हेतुत्वोत्प्रेक्षार्थे अनुवाद इत्यदोषः । अथ समासः । आलोचितं च तत् कार्यं च आलोचितकार्यम् असंशयं यथा स्यात् तथा आलोचितं कार्यम् असंशयालोचितकार्यम् असंशयालोचितकार्येण नुन्नः अ० । विभज्यते इति विभज्यमानः । तेषां मनांसिः [तन्मनांसि] तैस्त० । अति अत्यन्तं भारोऽतिभारः दुःखमेवातिभारो दु० । इति वृत्तार्थः ॥३३॥

अथैवं प्रेम्णाऽऽकृष्यमाणमपि शोकं विवेको निर्जिगायेत्याह -

धैर्येण विश्वास(स्य)तया महर्षेस्तीव्रादरातिप्रभवाच्च मन्योः ।
वीर्यं च विद्वत्सु सुते मघोनः स तेषु न स्थानमवाप शोकः ॥ ३४ ॥

धैर्य० व्याख्या । **स शोकः तेषु** चतुर्षु पाण्डवेषु **स्थानं** स्थितिं **न अवाप** न प्राप नाकरो-दित्यर्थः । तत्र हेतूनाह- केन ? **धैर्येण** स्वसुभटत्वेन स्वभावतो मनोनिर्विकारत्वेन वा पुनः कया ? **महर्षेः** वेदव्यासस्य प्रवर्तकस्येति शेषः । **विश्वास(स्य)तया** विश्रम्भतया श्रद्धेयवचनत्वेनेत्यर्थः । **च** पुनः कस्मात् ? **तीव्रात्** दुःसहात् **अरातिप्रभवात्** शत्रूत्पन्नात् एवंविधात् **मन्योः** कोपात् हेतोः तथार्जुनप्रभावपरिज्ञानाच्चेति हेत्वन्तरं विशेषणमुखेनाह- तेषु कथंभूतेषु ? च पुनः **मघोन** इन्द्रस्य **सुते** अर्जुने **वीर्यं** बलं **विद्वत्सु** जानत्सु । अथ समासः । धीरस्य भावो धैर्यं तेन धैर्येण । विश्वास(स्य)स्य भावो विश्वास(स्य)ता तया वि० । महांश्चासौ ऋषिश्च महर्षिः तस्य महर्षेः । अरातेः प्रभवो यस्य स अरातिप्रभवस्तस्मात् अ० । इति वृत्तार्थः ॥ ३४ ॥

तान्भूरिधाम्नश्चतुरोऽपि दूरं विहाय यामानिव वासरस्य ।
एकौघभूतं तदशर्म कृष्णां विभावरीं ध्वान्तमिवाभिपेदे ॥ ३५ ॥

तान्० व्याख्या । **तत्** पूर्वोक्तम् **अशर्म** असुखं शोकरूपम् **एकौघभूतम्** एकराशीभूतम् एकपिण्डीभूतमित्यर्थः । **कृष्णां** द्रौपदीम् **अभिपेदे** प्राप किंकृत्वा ? **चतुरोऽपि तान्** युधिष्ठिरप्रभृतीन् **दूरं विहाय** दूरे त्यक्त्वा किं० तान् ? **भूरिधाम्नः** प्रचुरप्रतापान् किमिव ? ध्वान्तमिव । कानिव ? वासरस्य

यामानिव यथा **ध्वान्तम**न्धकारं **वासरस्य** दिवसस्य चतुरोऽपि **यामान्** प्रहरान् **विहाय** त्यक्त्वा **विभावरीं** रात्रिम् **अभिपद्यते** व्याप्नोति कथंभूतान् यामान् ? **भूरिधाम्नः** बहुतेजसः कथंभूतं ध्वान्तम् ? एकौघभूतम् एकत्र मिलितम् । अथ समासः । भूरि धाम येषां ते भूरिधामानस्तान् भू० । अनौघभूतम् औघभूतम् एकं च तत् औघभूतं च ए० । न शर्म अशर्म । इति वृत्तार्थः ॥ ३५ ॥

तुषारलेशाकुलितोत्पलाभे पर्यश्रुणी मङ्गलभङ्गभीरुः ।
अगूढभावापि विलोकने सा न लोचने मीलयितुं विषेहे ॥ ३६ ॥

तुषा० व्याख्या । **सा** द्रौपदी **लोचने** नेत्रे **मीलयितुं** संकोचयितुं सनिमेषं कर्तुं **न विषेहे** न शशाक न समर्था बभूवेत्यर्थः । सा किं० ? **विलोकने** अर्जुनदर्शने **अगूढभावा** प्रकटचित्ताभिप्राया स्फुटाभिलाषापीति यावत् पुनः किं० सा ? **मङ्गलभङ्गभीरुः** मङ्गलहानेर्भीता कल्याणविनाशकातरेत्यर्थः। चक्षुर्निमीलनात् अश्रुपातः स्यात् अश्रुपातैर्मङ्गलभङ्गस्तन्निवर्तकं नेत्रमीलनं सा न चकारेत्यर्थः । लोचने किं० ? **पर्यश्रुणी** अश्रुपरिपूर्णे पुनः किं० ? **तुषारलेशाकुलितोत्पलाभे** हिमबिन्दुव्याप्तकमलप्रभे यत एवं तेषु युधिष्ठिरादिषु स शोकः पूर्वोक्ताद्यचतुष्टयात् चिरं नातिष्ठत् अतस्तान् परित्यज्य द्रौपदीं प्राप 'न विधेयं गेहिन्या स्नानं सहितं च कुञ्चकञ्चुकत्यागः प्रक्षालनमपि वस्त्राणां यद्दिने गृहपतिश्चलितः' (३८) । अथ समासः । तुषारस्य लेशः तुषारलेशः तुषारलेशेनाकुलितानि तु० तुषारलेशाकुलितानि च तानि उत्पलानि च तु० तुषारलेशाकुलितोत्पलवत् आभा ययोस्ते तु० । परि समन्तात् अश्रूणि ययोस्ते पर्यश्रुणी । मङ्गलस्य भङ्गः मङ्गलभङ्गः मङ्गलभङ्गे भीरुः म० । न गूढोऽगूढः अगूढो भावो यस्याः सा अगूढभावा । इति वृत्तार्थः ॥३६॥

अकृत्रिमप्रेमरसाभिरामं रामार्पितं दृष्टिविलोभि दृष्टम् ।
मनःप्रसादाञ्जलिना निकामं जग्राह पाथेयमिवेन्द्रसूनुः ॥ ३७ ॥

अकृ० व्याख्या । **इन्द्रसूनुर**र्जुनः **रामार्प्पितं** द्रौपदीदत्तं **दृष्टं** दर्शनं **मनःप्रसादाञ्जलिना** चित्तप्रसन्नतारूपकरयोजनेन **निकामम्** अत्यर्थं **जग्राह** गृहीतवान् अत एव उत्प्रेक्ष्यते **पाथेयमिव** शम्बलमिव यथा कश्चित् नरो रामार्पितं पाथेयं पथि क्षेमाय अञ्जलिना गृह्णाति तद्वदित्यर्थः । कथंभूतं दृष्टम् ? **अकृत्रिमप्रेमरसाभिरामं** स्वाभाविकस्नेहरसमनोहरं पुनः कथंभूतं दृष्टं ? **दृष्टिविलोभि** नेत्रवल्लभं दृष्टिलोभोत्पादकमित्यर्थः । स्वाभाविकमधुरादिरसहृद्यं रामार्पितं कान्तासमर्पितं दृष्टिप्रियं च तदप्यञ्जलिना गृह्यते इति भावः। अथ समासः । प्रेमैव रसः प्रेमरसः क्रियया निर्वृत्तः कृत्रिमः कृत्रिमश्चासौ प्रेमरसश्च कृत्रिमप्रेमरसः न कृत्रिमप्रेमरसः अकृत्रिमप्रेमरसः अकृत्रिमप्रेमरसेनाभिरामम् अ० । रामया अर्पितं रामार्पितम्। दृष्टिं विलोभयतीति दृ० । मनसः प्रसादः मनःप्रसादः तेन अञ्जलिर्मनःप्रसादाञ्जलिस्तेन म० । पथि साधु पाथेयम्। इन्द्रस्य सूनुः इ० । इति वृत्तार्थः ॥ ३७ ॥

धैर्यावसादेन हृतप्रसादा वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धबाष्पोदयसन्नकण्ठमुवाच कृच्छ्रादिति राजपुत्री ॥ ३८ ॥

धैर्या० व्याख्या । **राजपुत्री**[1] क्षत्रियपुत्री द्रौपदी **निरुद्धबाष्पोदयसन्नकण्ठं** संरुद्धरोदनेन हीनस्वरं सगद्गदकण्ठं यथा स्यात् तथा **कृच्छ्रात्** कष्टात् **इति** वक्ष्यमाणम् **उवाच** बभाषे अवोचदित्यर्थः । कथंभूता द्रौपदी ? **धैर्यावसादेन** धैर्यक्षयेन धैर्यभ्रंशेन कृत्वा **हृतप्रसादा** गतप्रसन्नता केन केव ? **वन्यद्विपेनेव** वनोद्भवगजेन **निदाघसिन्धुः** ग्रीष्मकालन**दीव** यथा वन्यद्विपेन निदाघनदी हृतप्रसादा हृतनैर्मल्या क्षोभं गमिता सती कलुषा भवति तद्वदित्यर्थः । अत्र वन्यग्रहणम् उच्छृङ्खलत्वद्योतनार्थं निदाघग्रहणं दौर्बल्यद्योतनार्थम् । अथ समासः । धैर्यस्य अवसादः धैर्यावसादस्तेन धै० । हृतः प्रसादो यस्याः सा हृ० । वने भवो वन्यः वन्यश्चासौ द्विपश्च वन्यद्विपस्तेन व० । निदाघस्य सिन्धुः नि० । बाष्पस्य उदयो बाष्पोदयः निरुद्धश्चासौ बाष्पोदयश्च निरुद्धबाष्पोदयः तेन सन्नः कण्ठो यत्र तत् नि० । राज्ञः पुत्री रा० । इति वृत्तार्थः ॥ ३८ ॥

मग्नां द्विषच्छद्मनि पङ्कभूते संभावनां भूतिमिवोद्धरिष्यन् ।
आधिद्विषामा तपसां प्रसिद्धेरस्मद्विना मा भृशमुन्मनीभूः ॥ ३९ ॥ (इ.)

मग्नां० व्याख्या । द्रौपदी किमुवाचेत्याह - हे अर्जुन ! त्वं **तपसाम् आप्रसिद्धेः** आसमाप्तेः तपःसम्यग्सिद्धिं यावत् **अस्मद्विना** अस्माभिः विना **भृशम**त्यर्थं **मा उन्मनीभूः** अस्मद्विरहदुःखेन मा दुर्मना 'भूरित्यर्थः। दौर्मनस्यस्य तपःशत्रुत्वात् इति भावः । किंलक्षणानां तपसाम् ? **आधिद्विषां** मनोदुःखच्छिदां दुःखहारिणामित्यर्थः । त्वं किंकरिष्यन् ? **पङ्कभूते** कर्दमसद्मो(?)पङ्कोपमिते इति यावत् 'भूतं सत्योपमानयोः' इति *हैमानेकार्थः* [२-१८०]। **द्विषच्छद्मनि** शत्रुकपटे **मग्नां** ब्रूडितां दुरुद्धरा-मित्यर्थः । **संभावनां** योग्यतां प्रतिष्ठामिति यावत् । **भूतिमिव** संपदमिव 'भूतिस्तु भस्मनि मांसपाकविशेषे च संपदुत्पादयोरपि' इति *हैमानेकार्थः* [२-१८१/८२] **उद्धरिष्यन्** आनयिष्यन् उद्धारकस्त्वमिति शेषः । यथा कश्चित् कर्दमछले मग्नं किंचित् उद्ध्रियते तथा तां त्वं समुद्धरिष्यन्निति भावः । अथ समासः । द्विषतां छद्म द्विषच्छद्म तस्मिन् द्वि० । पङ्क एव पङ्कभूतं तस्मिन् प० । उद्धरिष्यतीति उद्धरिष्यन् । आधिं द्विषन्तीति आधिद्विषः तेषाम् आधिद्विषाम् अनुन्मना उन्मना संपद्यमान इति उन्मनीभूः । इति वृत्तार्थः ॥ ३९ ॥

अथानौत्सुक्यदार्ढ्यार्थं तपसां सर्वार्थसिद्धिनिदानत्वमाह -

यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्त्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ४० ॥ (उपे.)

यशो० इति व्याख्या । हे अर्जुन ! **सिद्धिः** कार्यसिद्धिः **निरुत्सुकानाम्** अदुर्मनायमानानां निर्मलचित्तानामित्यर्थः । **समुत्सुके**व अनुरक्तकान्तेव **अङ्कं** समीपम् **उपैति** किंकर्तुम् ? **यशोऽधिगन्तुं** कीर्तिं प्राप्तुं **वा** अथवा **सुखलिप्सया** सुखस्य लब्धुमिच्छया पुनः किंकर्तुम् ? **वा** अथवा **मनुष्यसंख्यां** मनुष्येषु गणनाम् **अतिवर्तितुम्** अतिक्रमितुम् अमानुषम् कर्म कर्तुमिवेत्यर्थः । उत्कृष्टपुरुषगणनाप्रस्तावे अहमेव गुणी

१. राजपुत्रीशब्देन एवं द्योत्यते यद्-क्षात्रयुक्तमेव वक्ष्यतीतिभावः -म.

गुण्योऽयम् इति मनुष्यसंख्यानिवृत्तिः अत एव किं० निरुत्सुकानाम् ? **अभियोगभाजाम्** उद्यमवतो सिद्धिर्नाम पूर्वोक्तं यशःसुखाद्यर्थसिद्धिः अनुरक्तकान्तेव अङ्कमुपैति तस्मादस्मद्विरहदुःखम् आतपःसिद्धेः सोढव्यमिति भावः । अथ समासः । लब्धुमिच्छा लिप्सा सुखस्य लिप्सा सुखलिप्सा तया सु० । मनुष्यस्य संख्या मनुष्यसंख्या तां म० । अभियोगं भजन्तीति अभियोगभाजस्तेषाम् अ० । इति वृत्तार्थः ॥४०॥

अथास्य मन्यूद्दीपनद्वारेण तपःप्रवृत्तिं प्रथयितुम् अरिनिकारं तावच्चतुर्भिः श्लोकैरुद्धाटयति-

लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन्वसु जैत्रमोजः ।
तेजस्विताया विजयैकवृत्तैर्निघ्नन्प्रियं प्राणमिवाभिमानम् ॥ ४१ ॥ (इ.)

व्रीडानतैराप्तजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः ।
वितानभूतं विततं पृथिव्यां यशः समूहन्निव दिग्विकीर्णम् ॥ ४२ ॥ (उ.)

वीर्यावदानेषु कृतावमर्शस्तन्वन्नभूतामिव संप्रतीतिम् ।
कुर्वन्प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः ॥ ४३ ॥ (इ.)

प्रसह्य योऽस्मासु परैः प्रयुक्तो स्मर्तुं न शक्यः किमुताधिकर्तुम् ।
नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः ॥ ४४ ॥ (उ.)

लोकं० व्रीडा० वीर्या० प्रसह्य० व्याख्या । हे अर्जुन ! **स निकारो** पराभवलक्षणः तिरस्कारः **त्वद्विना** त्वया विना **आर्द्रः** सन् **मे** मम **उपशुष्यत् हृदयं नवीकरिष्यति** नवं विधास्यति न त्वद्यापि शुष्कमिति भावः । दुःखस्तम्भं शोषपदार्थः मे हृदयं नवीकरिष्यत्यार्द्रीकरिष्यति व्रणमिवेति भावः । दुःखितस्य पुनर्दुःखोपचयः प्रशान्तप्रायमपि दुःखहेतुं पुनरुद्धाटयतीत्यर्थः । **स** कः **यो** निकारः **परैः** शत्रुभिः **अस्मासु** विषये **प्रसह्य** बलात्कारेण **प्रयुक्तः** रचितः केशाम्बराकर्षणादिरूपः स **स्मर्तुं** वक्तुं **न शक्यः** स्मारयितुं वा जल्पितुमशक्यः तर्हि **अधिकर्तुं** सोढुं **किमुत** कथं शक्येत ? यस्य स्मरणमपि दुस्सहं तस्य अनुभवस्तु दुस्सह इति किमु वक्तव्यमित्यर्थः[१] । 'किमुत प्रश्नवादयोः । विकल्पेऽतिशये चापि' इति *हैमानेकार्थः* [७-५४/५] ॥ ४४ ॥

निकारः किं० ? **वीर्यावदानेषु** पराक्रमाश्चर्यभूतेषु कर्मसु **कृतावमर्शः** विहितविश्वासः पुराकृतपराक्रमोद्भूतान्यपि कर्माणि प्रमार्जन्मि(न्ती)त्यर्थः । पुनर्निकारः किंकुर्वन् ? **संप्रतीतिं** ख्यातिम् **अभूतामिव** असंजातामिव **तन्वन्** कुर्वुन् सतोप्यसत्त्वमुत्प्रेक्ष्यते । पुनर्निकारः किंकुर्वन् ? **आयतीनां** प्रतापानाम् उत्तरकालानां वा 'आयतिः स्यात् प्रभावोत्तरकालयोः' इति *हैमानेकार्थः* [३-२३९] । **प्रयामक्षयं** विस्तारक्षयं कुर्वन् क इव ? अह्नोऽवशेष **इव** यथा **अह्नो** दिवसस्य **अवशेषः** पश्चिमो भागः अत्यय इत्यर्थः । **अर्कत्विषां** सूर्यकिरणानाम् आयतीनां प्रतापानां प्रयामक्षयं दैर्घ्यनाशं करोतीत्यर्थः । अरिनिराकृतस्य

1. र्ष०-म.

१. अत्र शोषादिविशेषणसाम्याद्व्राणाद्यप्रस्तुतार्थप्रतीतेः समासोक्तिरलंकारः -म. ।

कुतश्चिरावस्थानमिति भावः ॥ ४३ ॥

पुनः किं० । निकारः ? **व्रीडानतैः** लज्जया नम्रमुखैः द्रौपद्याः केशाकर्षणादिजुगुप्सित-वृत्तान्तश्रवणादिति भावः । **नृपैर्देशान्तरस्थैर्भूपतिभिः संशय्य** संशयं कृत्वा **कृच्छ्रेण** कष्टेन **प्रपन्नो**ऽङ्गीकृतः परम् असंभावितबुद्ध्येति भावः यः शृण्वतामपि दुःसहः किमुतानुभवतामिति भावः । पुनः किंभूतो निकारः ? **आप्तजनोपनीतः** ज्ञातिकृतः[1] । निकारः किंकुर्वन् ? **दिग्विकीर्णं** दिक्षु प्रसृतं **पृथिव्यां** धरित्र्यां **विततं** विस्तीर्णं **वितानभूतं** चन्द्रोदयसदृशं **यशः** कीर्तिं **समूहन्निव** एकत्रकुर्वन्[2] ॥४२॥

पुनर्निकारः किंकुर्वन् ? **क्षत्रस्य** क्षत्रियस्य यज्जैत्रं जयनशीलम् **ओजो** बलं दीप्तिर्वा 'ओजो दीप्तिप्रकाशयोः अवष्टम्भे बले धातुतेजसि' इति *हैमानेकार्थः* [२-५६३] । तदेव **वसु**[3] धनं सर्वस्वभूतमिति यावत् । **मुष्णन्** अपहरन् क्षत्रस्य कथंभूतस्य ? **विधात्रा** वेधसा **लोकं** विश्वं 'लोको विश्वे जने' इति *हैमानेकार्थः* [२- १६] । **गोप्तुं** रक्षितुं **विहितस्य** निष्पादितस्य सृष्टस्य अरिभिः परिभूतस्य कुतः क्षात्रं तेज इति भावः । पुनर्निकारः किंकुर्वन् ? **विजयैकवृत्तेः** विजयैकजीवनायाः 'क्षत्रियस्य विजेतव्यम्'(३९) इति स्मरणादिति भावः । **तेजस्वितायाः** ऊर्जस्वितायाः[4] **अभिमानम्** अहंकारं **प्रियं प्राणमिव निघ्नन्** खण्डयत् तेजस्विनां प्राणहानिप्राया मानहानिरिति भावः ॥ ४१ ॥ अथ समासः । अनवं नवं करिष्यतीति नवीकरिष्यति । उपशुष्यतीति उपशुष्यन् । वीर्याण्येवावदानानि वीर्यावदानानि तेषु वी० । कृतोऽवमर्शो येन स कृ० । न भूता अभूता ताम् अभूताम् । प्रयामस्य क्षयः प्रयामक्षयस्तं प्र० । अर्कस्य त्विषः अर्कत्विषः तासाम० । व्रीडया नता वीडानतास्तैर्व्री० । आप्तश्चासौ जनश्च आप्तजनः आप्तजनेन उपनीतः आ० । वितानमिव वि० । दिक्षु विकीर्णं दिग्विकीर्णम् । मुष्णातीति मुष्णन् । जयनशीलं जेतृ तदेव जैत्रं स्वार्थेऽण्प्रत्ययः । तेजो विद्यते येषां ते तेजस्विनः तेजस्विनां भावः तेजस्विता तस्यास्ते० । विजये एव एका वृत्तिर्यस्याः सा विजयैकवृत्तिस्तस्या वि० । इति वृत्तचतुष्टयार्थः ॥४१॥४२॥४३॥४४॥

पुनः प्रकारान्तरेण मन्युमुद्दीपयति 'प्राप्त' इत्यादिभिस्त्रिभिः श्लोकैः तत्र वक्ष्यमाणप्रत्यभिज्ञानहेतु-भिर्धनञ्जयं विशिनष्टि-

प्राप्तोऽभिमानव्यसनादसह्यं दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः शरद्घनाकीर्ण इवादिरह्नः ॥ ४५ ॥ (उ.)

प्राप्त० व्याख्या । हे अर्जुन ! त्वम् **अभिमानव्यसनात्** अहङ्कारभङ्गात् 'व्यसनं विपदि भ्रंशे' *[अमरः]* इति **असह्यं** वीराणां सोढुमशक्यं **विकारं** वैरूप्यं पूर्वाकारान्यप्रकारं **प्राप्तः** क इव ? **दन्तीव**

१. मल्लिनाथात्पुरोगामिनां व्याख्या एवमस्ति-आप्तजनोपनीतः-आप्तजनैः कथितः तथापि संशय्य व्रीडानतैः देशान्तरस्थैः नृपैः कृच्छ्रेण प्रपन्नः आप्तोक्तत्वात्कथञ्चिद्विश्वस्तः । म. मध्ये व्याख्या एवमस्ति-आप्तजनोपनीतः=ज्ञातिकृतः (=दुर्योधनादिबन्धुभिः एव कृतः) संशय्य = कथमिदमन्याय्यमुपेक्ष्यमिति विचार्य व्रीडानतैः जुगुप्सितकर्मदर्शनादिति भावः । नृपैः सभास्थैः कृच्छ्रेण प्रपन्नोऽङ्गीकृतः । गोत्रकलहेषु मध्यस्थैरुदासितव्यमिति बुद्ध्योपेक्षितः । २. संकोचयन्नित्यर्थः । अरातिपरिभूतस्य कुतः कीर्तिरिति भावः - म. । ३. इति रूपकालंकारः - म. । ४. तेजःप्राधान्यद्योतनार्थं भावप्रधानो निर्देशः - म. ।

यथा **दन्ती** गजः **दन्तव्यसनात्** दन्तभङ्गात् विकारं प्रकारान्तरमाकारं प्राप्तः सन् न ज्ञायते । अतो न प्रत्यभिज्ञायते इति धनञ्जय इति सोऽयं गज इति प्रत्यभिज्ञानागोचरो भवति तद्वदित्यर्थः । पुनः किं० त्वम् ? **द्विषत्प्रतापान्तरितोरुतेजाः** शत्रुप्रतापेन तिरस्कृतगरिष्ठप्रतापः क इव ? **अह्न आदिरिव** यथाह्नः दिवसस्यादिः दिनमुखं **शरद्घनाकीर्णः** शरत्कालमेघाच्छादितः सन् साधते तद्वदेवाप्रत्यभिज्ञायमानस्त्वमित्यर्थः । मध्याह्नस्तु मेघावरणेऽपि कथंचित्प्रत्यभिज्ञायत एव इत्याशयेनोक्तमादिरिति । अथ समासः । अभिमानस्य व्यसनम् अभिमानव्यसनं तस्मादभिमानव्यसनात् । सह्यते इति सह्यम् न सह्यम् असह्यम् । दन्तस्य व्यसनं दन्तव्यसनं तस्मात् द० । द्विषतां प्रतापः द्विषत्प्रतापः उरु च तेजश्च उरुतेजः द्विषत्प्रतापेन अन्तरितमुरुतेजो यस्य स द्वि० । शरदि घनः शरद्घनः शरद्घनेन आकीर्णः श० । इति वृत्तार्थः ॥४५॥

सव्रीडमन्दैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः ।
यशः[1]क्षयाद् क्षीणजलार्णवाभस्त्वमन्यमाकारमिवाभिपन्नः ॥ ४६ ॥ (उ.)

स० व्याख्या । हे अर्जुन ! त्वं पुनः कथंभूतः ? **अन्यमाकारमिवाभिपन्न** इव पूर्वरूपात् रूपान्तरं प्राप्त इवं[१] **स्थितः** इति शेषः । किंभूतस्त्वम् ? **अस्त्रैः** शस्त्रैः **अत्यर्थम्** अतिशयेन **न अवभासमानः** न शोभमानः अत एव उत्प्रेक्ष्यते अस्त्रैः कथंभूतैः ? **निष्क्रियत्वात्** ...... निरम्भत्वात् क्रियानिरर्थकत्वात् इत्यर्थः । **सव्रीडमन्दैः** सलज्जत्वात् अपटुभिरिव **स्थितैः** अचेतनेषु शस्त्रेषु व्रीडादिचेतनधर्म उपचर्यते । अन्यच्च पुनः कथंभूतः ? **यशःक्षयात्** कीर्तिनाशात् **क्षीणजलार्णवाभः** क्षीणोदकसमुद्रतुल्यः । अथ समासः । सह व्रीडया वर्तते यानि तानि सव्रीडानि सव्रीडानि च तानि मन्दानि च सव्रीडमन्दानि तैः स० । निर्गता क्रिया यस्मात् स निष्क्रियः निष्क्रियस्य भावो निष्क्रियत्वं तस्मात् नि० । यशसः क्षयः यशःक्षयः तस्मात् य० । क्षीणं जलं यस्मिन् स क्षीणजलः क्षीणजलश्चासौ अर्णवश्च क्षीणजलार्णवः क्षीणजलार्णववत् आभा यस्य स क्षी० । इति वृत्तार्थः ॥ ४६ ॥

दुःशासनामर्षरजोविकीर्णैरेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनञ्जयस्त्वम् ॥ ४७ ॥ (इ.)

दुःशा० व्याख्या । **कच्चिद्**दिति अभीष्टपरिप्रश्ने हे अर्जुन ! य एवासौ पूर्वं सकलभुवनख्यातमहिमा **स एव त्वं** धनञ्जयोऽर्जुनोऽ**सि** त्वं किं० ? **एभि**रेतैः परिदृश्यमानैः असंयमितैर्मदीयैः **केशैः** **कदर्थीकृतवीर्यसारः** निर्भर्त्सितपराक्रमबलः 'सारो मज्जास्थिरांशयोः बले श्रेष्ठे च' इति *हैमानेकार्थः* [२-४५३] । केशैः किं० ? **दुःशासनामर्षरजोविकीर्णैः** धृतराष्ट्रात्मजाकर्षणशेषरेणुविकीर्णैः पुनः किं० ? उत्प्रेक्ष्यते **विनाथैरिव** स्थितवतामपि भवतामसत्त्वप्रायत्वात् गतनाथैरिव **स्थितैः** अन्यथा कथमियं दुर्दशेति । पुनः किं० ? **भाग्यनाथैः** दैवमात्ररक्षकैः न यूयं नाथा इत्यर्थः । मदीयम् ईदृशं केशपाशं विलोक्य सर्वजनोऽशक्त एव मन्यत इति भावः । अथ समासः । दुःशासनस्य आमर्षः दुःशासनामर्षः दुःशासनामर्ष

1. यशः क्षयक्षीण०-म. इदं च पा० ।

१. इत्युप्रेक्षा, तस्य च क्षीणजलार्णवाभ इत्युपमासंसृष्टिः -म. ।

एव रजो दुःशासनामर्षरजो तेन विकीर्णाः दुःशासनामर्षरजोविकीर्णास्तैर्दुः० । विगता नाथा येषां ते विनाथास्तैर्वि० । भाग्यान्येव नाथा येषां ते भाग्यनाथास्तैर्भा० । वीर्यं च सारं च वीर्यसारौ अकदर्थौ कदर्थौ कृतौ इति कदर्थीकृतौ कदर्थीकृतौ वीर्यसारौ यस्य स क० । इति वृत्तार्थः ॥ ४७ ॥

तथाप्युपेक्षणे दोषमाह -

स क्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः ।
वहन् द्वयीमप्यफलेऽर्थजाते करोत्यसंस्कारहतामिवोक्तिम् ॥ ४८ ॥ (उ.)

स क्ष० व्याख्या । हे अर्जुन ! **सः** पुमान् **क्षत्रियः** स कः यः पुमान् **सतां** साधूनां **त्राणसहः** रक्षणे समर्थः 'त्राणं त्राते रक्षणे च' [२-१४१] 'सहः क्षमे बलेऽपि च' इति *हैमानेकार्थः* [२-५८९] । स एव क्षत्रियशब्दवाच्य इत्यर्थः । **तत् कार्मुकं** कथ्यते तत् किम् ? **यस्य** [धनुषः] **कर्मसु** रणक्रियासु **शक्तिः** सामर्थ्यम् अस्तीति शेषः । तदेव कार्मुकशब्दवाच्यम् अत्रैव एतौ शब्दौ मुख्यौ नान्यत्रेत्यर्थः । एतावता त्वं क्षत्रियो न नैतत् कार्मुकम् इति भावः । **अफले** पूर्वोक्तार्थशून्ये **अर्थजाते** स्वाभिधेयसामान्ये जातिमात्रे अर्थसमूहे सति 'जातं जात्योद्यजनिषु' इति *हैमानेकार्थः* [२-१६६] । **द्वयीमपि** उभयरूपाम् **उक्तिं** भणितिं द्वौ इमौ क्षत्रियकार्मुकशब्दावित्यर्थः । **वहन्** धारयन् पुरुषः **असंस्कारहतामिव** उपहासदूषितामिव **करोति** विधत्ते **तस्मात्** त्वमपि अस्मद्रक्षणे नोक्तदोषादात्मानं मोचयस्वेत्यर्थः । अथ समासः । क्षतात्त्रायत इति क्षत्रं क्षत्रे जातः क्षत्रियः । सहत इति सहः त्राणस्य सहः त्रा० । कर्मणे प्रभवति इति कार्मुकम् । न विद्यते फलं यस्य तदफलं तस्मिन् अफले । अर्थस्य जातम् अर्थजातं तस्मिन् अ० । न संस्कारः असंस्कारः असंस्कारेण हता असंस्कारहता ताम् अ० ।इति वृत्तार्थः ॥ ४८ ॥

अथ त्वद्गुणा अपि नोज्जीवयेयुरित्याह -

वीतौजसः सन्निधिमात्रशेषा भवत्कृतां भूतिमपेक्षमाणाः ।
समानदुःखा इव नस्त्वदीयाः सरूपतां पार्थ ! गुणा भजन्ति ॥ ४९ ॥ (उ.)

वीतौ० व्याख्या । हे **पार्थ** ! हे अर्जुन ! **त्वदीया**स्त्वत्संबन्धिनो **गुणाः** शौर्यादयः **नो**ऽस्माकं **सरूपतां** समानतां **भजन्ति** आश्रयन्ते अस्मत्सदृशा भवन्तीत्यर्थः[1] । कथंभूता गुणाः ? **वीतौजसो** गतबलाः पुनः कथंभूताः ? **सन्निधिमात्रशेषाः** सत्तामात्रेण शिष्टाः पुनः कथं० ? **भवत्कृतां** त्वया करिष्यमाणां **भूति**मभ्युदयम् अपेक्षमाणा वाञ्छतः अत एव उत्प्रेक्ष्यते पुनः कथंभूताः ? **समानदुःखा इव** समदुःखभाज इव स्थिताः अर्थवशाद्विभक्तिपरिणामः किं० नः ? वीतौजस्त्वादिविशेषणविशिष्टान् अथ समासः । वीतम् ओजो येभ्यस्ते वी० । संनिधिरेव संनिधिमात्रं संनिधिमात्रं शेषं येषां ते सं० । भवता कृता भवत्कृता तां भ० । अपेक्षन्ते इति अपेक्षमाणाः । समानं दुःखं येषां ते समानदुःखाः । तव इमे

1. द्वयीं यद्य०-म. इदं च पा० ।

१. इत्युपमा, सा च समानदुःखा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसंभावितयानुप्राणितेत्यनुसंधेयम् -म. ।

त्वदीया: । समानं रूपं सरूपं सरूपस्य भाव: सरूपता तां स० । इति वृत्तार्थ: ॥४९॥

तथापि ममैव कोऽयं भार: ? इत्याह -

आक्षिप्यमाणं रिपुभि: प्रमादान्नागैरिवालूनसटं मृगेन्द्रम् ।
त्वां धूरियं योग्यतयाधिरूढा दीप्त्या दिनश्रीरिव घर्मरश्मिम्[1] **॥ ५० ॥** (इ.)

आक्षि० व्याख्या । हे पार्थ ! **इयं** धू: एष कार्यभार: **योग्यतया** अनुरूपतया निर्वाहकतयेत्यर्थ: । **त्वां** भवन्तम् **अधिरूढा** प्राप्ता एष भार त्वया [वोढुं] शक्त(क्य) इत्यर्थ: । त्वां कथंभूतम् ? **प्रमादात्** प्रज्ञाहीनत्वात् न तु दुर्बलत्वात् । **रिपुभि:** वैरिभि: **आक्षिप्यमाणम्** आकृष्यमाणमित्यर्थ: । पुन: त्वां किंलक्षणम् ? उत्प्रेक्ष्यते अत एव **प्रमादात्** आलस्यात् **नागै:** हस्तिभि: 'नागो मतङ्गजे सर्प्पे' इति *हैमानेकार्थ:* [२-३२] । **आलूनसटम्** आक्षिप्तकेसरं 'सटा जटाकेसरयो:' इति *हैमानेकार्थ:* [२-९८] । **मृगेन्द्रं** सिंहमिव स्थितमिति शेष: । केव ? **दिनश्रीरिव** यथा दिनश्री: दिवसशोभा **दीप्त्या** कृत्वा **घर्मरश्मिं** सूर्यम् अधिरोहति प्राप्नोति । अथ समास: । आक्षिप्यते असौ आक्षिप्यमाणस्तम् आ० । आलूना सटा यस्य स आलूनसटस्तम् आ० । मृगाणामिन्द्रो मृगेन्द्रस्तं मृ० । योग्यस्य भावो योग्यता तया यो० । घर्मा रश्मयो यस्य स घर्मरश्मिस्तं घ० । इति वृत्तार्थ: ॥ ५० ॥

पूर्वं निर्व्यवसायस्य 'स क्षत्रिय' (का.-४८) इत्यादिना दोष उक्त: । संप्रति व्यवसायिनो गुणमाह-

करोति योऽशेषजनातिरिक्तां संभावनामर्थवतीं क्रियाभि: ।
संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या ॥ ५१ ॥ (उ.)

करो० व्याख्या । हे पार्थ ! **य:** पुमान् **क्रियाभि:** कर्मभि: कृत्वा **संभावनां** योग्यतां प्रतिष्ठामित्यर्थ: । **अर्थवतीं** सफलां **करोति** विदधाति संभावनां कथंभूताम् ? **अशेषजनातिरिक्ताम्** इतरलोकादधिकां सर्वातिशायिनीमित्यर्थ: । **तं** पुमांसं **संसत्सु** सभासु 'सामाजिका: सभा संसत् इति' *हैम:* [४८१] । **पुरुषाधिकारे** योग्यपुरुषगणनाप्रस्तावे **जाते** संपन्ने सति **पूरणी संख्या** द्वितीयतृतीयादिका **न समुपैति** न प्राप्नोति आदौ स एव गण्यते इत्यर्थ: । तस्मात् असामान्यप्राप्तये त्वयापि महानुत्साह आदरणीय इति भाव: । अथ समास: । [न शेषा: अशेषा:] अशेषाश्च ते जनाश्च अशेषजना: अशेषजनेभ्योऽतिरिक्ता अशेषजनातिरिक्ता ताम् अ० । अर्थो विद्यते यस्या: सा अर्थवती ताम् अ० । पुरुषस्य अधिकार: पुरुषाधिकारस्तस्मिन् पु० । पूर्यते अनयेति पूरणी । इति वृत्तार्थ: ॥ ५१ ॥

[१]अस्माकीनेन दु:खेन त्वया दु:खितेन न भवितव्यमित्येतत् आशीर्द्वारेण दर्शयतीत्याह -

प्रियेषु यै: पार्थ ! विनोपपत्तेर्विचिन्त्यमानै: क्लममेति चेत: ।
तव प्रयातस्य जयाय तेषां क्रियादघानां मघवा विघातम् ॥ ५२ ॥ (उपे.)

1. तिग्मरश्मिम् -म. इदं च पा० ।

१. अथ द्वाभ्यां सुलभविपक्षस्य प्रोषितस्यार्जुनस्य कर्तव्यमुपदिशति -म.

प्रिय० व्याख्या । **हे पार्थ** ! हे अर्जुन ! **तव** भवतः **जयाय** जयार्थं जेतुं वा **प्रयातस्य** चलितस्य **मघवा** इन्द्रः **तेषां** तव संबन्धिनाम् **अघानां** व्यसनानाम् 'अघं दुःखे व्यसनैनसोः' इति *हैमानेकार्थः* [२-४१] । **विघातं** विनाशं **क्रियात्** करोतु तेषां केषां **यैः** अघैः व्यसनैः पापैर्वा **चेतो** मनः**क्लमं** खेदम् **एति** प्राप्नोति किं० अघैः ? **प्रियेषु** अस्मासु विषये **उपपत्तेर्विना** कारणाद्विना **विचिन्त्यमानैः** विचार्यमाणैः अकस्मादेवाशङ्क्यमानैरित्यर्थः । अपायदर्शीनि स्निग्धहृदयानि भवन्ति यतस्ततो ऽनुत्पद्यमानान्यपि प्रियविषये व्यसनान्याशङ्क्यते । अस्मद्विषया दुःखचिन्तैव तव इन्द्रप्रसादात् मा भूदित्यर्थः । अथ समासः । विचिन्त्यन्ते इति विचिन्त्यमानानि तैर्वि० । इति वृत्तार्थः ॥ ५२ ॥

जेतुं प्रयातस्य चेतःक्लमोऽर्थसिद्धेरन्तरायकृत्स्यात् अतो निषेधयतीत्याह -

मा गाश्चिरायैकचरः प्रमादं वसन्नसंबाधशिवेऽपि देशे ।
मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥ (उ.)

मा गा० व्याख्या । हे अर्जुन ! **असंबाधशिवेऽपि** असंकटनिरुपद्रवेऽपि **देशे** प्रदेशे **चिराय** चिरकालम् **एकचरः** एकाकी **वसन्** स्थितः सन् **प्रमादं** दौर्बल्यं **मा गा** मा दासीः मम निःस्पृहस्य कुतो भयम् इति न वाच्यमित्याह- **हि** यस्माद्धेतोः **मात्सर्यरागोपहतात्मनां** रागद्वेषदूषितस्वभावानाम् 'आत्मा चित्ते धृतौ यन्ते धिषणायां कलेवरे। परमात्मनि जीवेऽर्के हुताशनसमीरयोः । स्वभावेऽर्थे' इति *हैमानेकार्थः* [२-२५४] । पुरुषाणां दुर्जनानां **मानसानि** चित्तानि **साधुषु** सत्पुरुषेष्वपि विषये **स्खलन्ति** शङ्कां **भजन्ते** । अथ समासः। एकश्चासौ चरश्च एकचरः। न संबाधः असंबाधः असंबाधश्च शिवं च असंबाधशिवे असंबाधशिवे वर्तेते अस्मिन्निति असंबाधशिवस्तस्मिन् अ० । मत्सर एव मात्सर्यं मात्सर्यं च रागश्च मात्सर्यरागौ मात्सर्यरागाभ्याम् उपहत आत्मा येषां ते मात्सर्यरागोपहतात्मानः तेषां मा० । इति वृत्तार्थः ॥ ५३ ॥

निगमयति -

तदाशु कुर्वन्वचनं महर्षेर्मनोरथान्नः सफलीकुरुष्व ।
प्रत्यागतं त्वाऽस्मि कृतार्थमेव स्तनोपपीडं परिरब्धुकामा ॥ ५४ ॥ (उपे.)

तदा० व्याख्या । हे अर्जुन ! **तत्**तस्मात् कारणात् त्वम् **आशु** शीघ्रं **महर्षेः** वेदव्यासस्य **वचनं** वाक्यं **कुर्वन्** संपादयन् **नो**ऽस्माकं **मनोरथान् सफलीकुरुष्व** व्यासवचनात् इन्द्रमाराध्य शत्रुसमूहमुन्मूल्य स्वकुलमृद्धि- मानयेत्यर्थः । **अस्मि** अहं **कृतार्थमेव** कृतकृत्यमेव **त्वा** त्वां 'त्वामौ' इत्यनेन सूत्रेण युष्मत् शब्दस्य अमा सह त्वादेशः । **प्रत्यागतं** पुनरागतं **स्तनोपपीडं** स्तनाभ्याम् उपपीड्य **परिरब्धुकामास्मि** आलिङ्गितुमिच्छामि 'तुं काममनसोरपीति' मकारलोपः । [प्राक्कार्यसिद्धेः] आलिङ्गनमपि मम न प्रीतिदम् इति भावः । अथ समासः । असफलान् सफलान् कुरुष्व इति सकलीकुरुष्व । कृतोऽर्थो येन स कृतार्थस्तं कृ० । स्तनयोरुपपीड्य इति स्तनोपपीडम् । परिरब्धुं कामोऽभिलाषो यस्याः सा प० । इति वृत्तार्थः ॥५४॥

उदीरितां तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकाराम् ।
आसाद्य वाचं स भृशं दिदीपे काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥ (उ.)

उदी० व्याख्या । **सोऽर्जुनः याज्ञसेन्या** द्रौपद्या **इति** 'दुःशासनामर्शरजोविकीर्णैः' इत्यादिकाम् **उदीरिताम्** उक्तां **तां वाचं** वाणीम् **आसाद्य** आकर्ण्य **भृशम**त्यर्थं **दिदीपे** जज्वाल चुक्रोधेत्यर्थः । किंलक्षणां वाचम् ? **नवीकृतोद्ग्राहितविप्रकारां** नूतनीकृतः प्रापितः पराभवः 'उद्ग्राहितमुपन्यस्ते बद्धग्राहितयोरपि' इति *हैमानेकार्थः* [४-१०३] । 'पराभवो विप्रकार' इति *हैमः* [४४१] । चिरविस्मृतोऽपि तदानीमेव प्रवृत्त इति स्वीकृतः मनसि स्थापितः पराभव इति भावः । कः इव तिग्मर**श्मिरिव** यथा **तिग्मरश्मिः** सूर्यः **उदीचीमु**त्तरां काष्ठां विशं 'काष्ठाशा दिग्हरित् कुकुप्' इति *हैमः* [१६६] । **आसाद्य** प्राप्य **भृश**मत्यर्थं दीपेत । अथ समासः । यज्ञसेनस्यापत्यं स्त्री याज्ञसेनी तया याज्ञसेन्या । अनवो नवः कृतः इति नवीकृतः नवीकृतश्चासौ उद्ग्राहितश्च नवीकृतोद्ग्राहितो नवीकृतोद्ग्राहितो विप्रकारो यया सा नवीकृतोद्ग्राहितविप्रकारा तां न० । तिग्मा रश्मयो यस्य स तिग्मरश्मिः । इति वृत्तार्थः ॥ ५५ ॥

अथाभिपश्यन्निव विद्विषः पुरः पुरोधसाऽऽरोपितहेतिसंततिः ।
बभार रम्योऽपि वपुः स भीषणं गतः क्रियां मन्त्र इवाभिचारिकीम् ॥५६॥ (वं.)

अथ० व्याख्या । **अथ** द्रौपदीवाक्यश्रवणादनन्तरं **सोऽ**र्जुनो **रम्योऽपि** सौम्योऽपि **भीषणं** भयङ्करं **वपुः** शरीरं **बभार** धारयामास क्रोधात् भयावहं रूपमुवाहेत्यर्थः । अर्जुनः किंकुर्वन् ? उत्प्रेक्ष्यते दूरस्थानपि **विद्विषः** शत्रून् **पुरः** अग्रे **अभिपश्यन्** विलोकयन्निव स्थित इति शेषः । अभिमुखं पश्यन् इत्यर्थः । किं०अर्जुनः ? **पुरोधसा** धौम्यगुरुणा **आरोपितहेतिसंततिः** समन्त्रस्थापितशस्त्रसमूहः 'हेति र्ज्वालास्त्रसूर्यांशुषु' इति *हैमानेकार्थः* [२-२०८] । क इव ? मन्त्र **इव** यथा **मन्त्रो** वेदवाक्यम् **आभिचारिकीं** हिंसासंबन्धिनीं **क्रियां** कर्म **गतः** प्राप्तः सन् प्रकृत्या सौम्योऽपि भीषणं वपुः धारयति । अदृष्टोपायेन शत्रुहननमभिचारः । अथ समासः । हेतीनां संहतिः हेतिसंहतिः आरोपिता हेतिसंहतिर्येन स आ० । अभिचारे[1] भवा आभिचारी तामा० । इति वृत्तार्थः ॥ ५६ ॥

त्रिभिः श्लोकैः उक्तमायुधारोपणं विवृण्वन् अस्य प्रस्थानमाह -

अविलङ्घ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकम् ।
अगतावरिदृष्टिगोचरं शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥ (प्रबो.)

यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः ।
कवचं च सरत्नमुद्वहञ्ज्वलितज्योतिरिवान्तरं दिवः ॥ ५८ ॥ (प्रबो.)

अलकाऽधिपभृत्यदर्शितं शिवमुर्वीधरवर्त्म संप्रयान् ।
हृदयानि समाविवेश स क्षणमुद्बाष्पदृशां तपोभृताम् ॥ ५९ ॥ (प्रबो.)

१. अभिचारः प्रयोजनं यस्याः सा आभिचारिकी -म.

अवि० यश० अल० व्याख्या । **सोऽर्जुनस्तपोभृतां** द्वैतवनवासिनां तपस्विनां **हृदयानि** चित्तानि **समाविवेश** प्रविष्टः यद्वा द्वैतवनवासिनां तपस्विनां हृदयानि समाविवेश खेदयामास संपूर्वकस्य विशतेः खेदार्थत्वमवधेयम् । किंलक्षणानां तपोभृताम् ? **क्षणं** क्षणमात्रम् **उद्बाष्पदृशां** पथि गच्छन्तम(ता)र्जुनेन सह विरहदुःखवत्त्वात् साश्रुनेत्राणां स किंकुर्वन् ? **शिवं** निरुपद्रवम् **उर्वीधरवर्त्म** इन्द्रकीलपर्वतमार्गं **संप्रयान्** गच्छन् किं० उर्वीधरवर्त्म ? **अलकाधिपभृत्यदर्शितं** धनदसेवकयक्षेण दर्शितम् । अथ समासः । अलकाया अधिपः अलकाधिपः तस्य भृत्योऽलकाधिपभृत्योऽलकाधिपभृत्येन दर्शितम् अ० । उर्वीं धरतीति उर्वीधरः उर्वीधरस्य वर्त्म उ० । संप्रयातीति संप्रयान् । उत् अधिकं बाष्पं यासां ताः उद्बाष्पाः उद्बाष्पा दृशो येषां ते उद्बाष्पदृशस्तेषामुद्बाष्पदृशाम् । तपांसि बिभ्रतीति तपोभृतस्तेषां तपोभृताम् । इति वृत्तार्थः ॥५९॥

च पुनः स किंकुर्वन् ? **सरत्नं** रत्नसहितं **कवचं** सन्नाहम् **उद्वहन्** दधत् कथंभूतं कवचम् ? उत्प्रेक्ष्यते **दिवोऽन्तरम्** आकाशस्य मध्यमिव स्थितं 'द्यौस्तु स्वर्गे विहायसि' इति *हैमानेकार्थः* [१-११] । किं० अन्तरम् ? **ज्वलितज्योतिः** दीप्ततारकं 'ज्योतिर्वह्निदिनेशयोः प्रकाशे दृशि नक्षत्रे' इति *हैमानेकार्थः* [२-५६६/७] । किं० कवचम् ? **ज्वलितज्योतिः** देदीप्यमानप्रकाशम् अर्जुनः किंकुर्वन् ? **महसा** तेजसा स्वकान्त्या **यशसेव** मूर्तया कीर्त्येव **गोत्रभिदायुधक्षतीः** इन्द्रवज्रप्रहाररन्ध्राणि **मुहुर्वारंवारं** **तिरोदधन्** आच्छादयन् खाण्डववनदाहसमये इन्द्रेण मुक्तान् युद्धप्रहारान् आच्छादयन्नित्यर्थः । अथ समासः । तिरोदधातीति तिरोदधत् । गोत्रान् भिन्नतीति गोत्रभित् गोत्रभिदः आयुधं गोत्रभिदायुधं गोत्रभिदायुधस्य क्षतयः गोत्रभिदायुधक्षतयः ताः गो० । रत्नैः सह वर्तमानं सरत्नम् । उद्वहत इति उद्वहन् । ज्वलितानि ज्योतींषि यत्र तत् ज्व० । इति वृत्तार्थः ॥ ५८ ॥

पुनः स किंकुर्वन् ? **कार्मुकं** गाण्डीवधनुः **उद्वहन्** धारयन् किं० कार्मुकम् ? **परैः** शत्रुभिः **अविलङ्घ्यविकर्षणम्** अनतिक्रमणीयाकर्षणम् अमोघाकर्षणमित्यर्थः । पुनः किं० ? **प्रथितज्यारवकर्म** विख्यातमौर्वीशब्ददृढप्रहारादि पुनः स किंकुर्वन् ? **महेषुधी** महातूणीरौ उद्धरन् कथंभूतौ महेषुधी ? **शितनिस्त्रिंशयुजौ** तीक्ष्णखड्गयुक्तौ पुनः किं० तौ ? **अरिदृष्टिगोचरं** शत्रुदृष्टिविषयम् **अगतौ** अप्राप्तौ संग्रामे त्वनिवर्तित्वादस्येति । अथ समासः । न विलङ्घ्यम् अविलङ्घ्यम् अविलङ्घ्यं विकर्षणं यस्य तत् अविलङ्घ्यविकर्षणम् । ज्याया रवो ज्यारवः ज्यारवश्च कर्म च ज्यारवकर्मणी प्रथिते ज्यारवकर्मणी यस्य तत् प्रथितज्यारवकर्म । न गतौ अगतौ । अरीणां दृष्टिः अरिदृष्टिः अरिदृष्टेर्गोचरः अरिदृष्टिगोचरस्तम् अ० । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः शितश्चासौ निस्त्रिंशश्च शितनिस्त्रिंशः शितनिस्त्रिंशेन युक्त इति शिततिस्त्रिंशयुजौ तौ शि० । इषवो धीयन्ते अनयोरिति इषुधी महान्तौ च तौ इषुधी महेषुधी । इति वृत्तत्रयार्थः ॥५९॥

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः ॥ ६० ॥ (मा.)

इति श्री किरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ तृतीयः सर्गः ॥३॥ ऐं नमः ॥

अनु० व्याख्या । **अथ** अर्जुनप्रयाणादनन्तरम् **आशा** दिशो **दिव्यं** दिवि भवं **दुन्दुभिध्वानं** दुन्दुभिशब्दम् **अनुजगुः** अनु पश्चात् गायन्ति स्म **व्योम्नि** आकाशे **सुरकुसुमनिपातैः** देवपुष्पवृष्टिभिः **लक्ष्मीः** शोभा **वितेने** विस्तारिता दिव्यपुष्पवृष्टिरजनिष्टेत्यर्थः । किंच **अनिभृतवेलावीचिबाहुः** चञ्चलदृढकल्लोलभुजः 'वेला कूलविकारयोः' इति' *शाश्वतः* । **पयोधिः** समुद्रः **भुवं** पृथ्वीम् **आलिलिङ्ग** परिषष्वजे यथा कश्चित् नायकः स्वां नायिकां प्रियङ्करिष्यन्निवालिङ्गति तद्वदितिभावः । किं० भुवम् ? **स्फुरन्तीं** हर्षात् उल्लसन्तीं नायिकापक्षे सात्त्विकभावोत्प्रादुर्भूतरोमोद्गमां पयोधिः किंकुर्वन् ? उत्प्रेक्ष्यते **प्रियम्** इष्टं भारावताररूपं **कथयिष्यन्निव** कथयितुमिव पार्थस्तव भारावतरणार्थम् उद्यत इति भावः[१]। अथ समासः । दिवि भवं दिव्यम्। दुन्दुभेर्ध्वानो दुन्दुभिध्वानस्तं दु० दुन्दुभिशब्दः पुल्लिङ्गे । सुराणां कुसुमानि सुरकुसुमानि सुरकुसुमानां निपाताः सुरकुसुमनिपातास्तैः सु० । कथयिष्यतीति कथयिष्यन् । न निभृता अनिभृता वेलायां वीचयः वेलावीचयः । अनिभृता वेलावीचय एव बाहवो यस्य स अ० । इति वृत्तार्थः ॥ ६० ॥ ३ ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद्गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गः शिवेक्षणमितः सुसगः(गमः) समाप्तः ॥ २ ॥

१. अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात् समासोक्तिरलंकारः । तत्र चाप्रस्तुतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकाभ्यां भेदेऽभेदलक्षणातिशयोक्तिवशादालिङ्गनोक्तिरितिरहस्यम् । एवमतिशयोक्त्यनुप्राणिता समासोक्तिः । प्रियकथनात्स्नेह-मुज्जीवयति तदङ्गभावं भजत इत्युभयोरङ्गाङ्गिभावेन संकर इति विवेचनीयम् -म. ।

चतुर्थः सर्गः।

ततः स कूजत्कलहंसमेखलां सपाकसस्याहितपाण्डुतागुणाम् ।
उपाससादोपजनं जनप्रियः प्रियामिवासादितयौवनां भुवम् ॥ १ ॥

[अतः ३६ यावद् वंशस्थवृत्तम्]

ऐं नमः । 'ततः' व्याख्या । **ततः** प्रस्थानानन्तरं **जनप्रियः** लोकवल्लभः **सोऽर्जुनः भुवं** पृथ्वीम् **उपजनं** जनसमीपे **उपाससाद** प्राप्तवान् किं० भुवम् ? **कूजत्कलहंसमेखलां** शब्दायमानमधुर-हंसरूपकाञ्चीं पुनः किं० ? **सपाकसस्याहितपाण्डुतागुणां** सपक्वधान्योत्पादितपाण्डुतागुणां पुनः किं० ? **आसादितयौवनां** प्राप्तसस्यसंपत्तिरूपतारुण्यां क इव ? कश्चित्पुमा**न्निव** यथा कश्चित्पुमान् **उपजनं** सखीसमीपे **जनप्रियो** वल्लभलोकः **प्रियां** वल्लभाम् **उपसीदति** प्राप्नोति किं० प्रियाम् ? **कूजत्कलहंसमेखलां** शब्दायमानराजहंसेव कटिमेखलाम् । 'कलहंसो राजहंसे कादम्बे नृपसत्तमे' इति *हैमानेकार्थः* [४-३२६] । पुनः किम्० ? सपाकसस्या सबालसस्या अत एव उत्पादितपाण्डुतागुणाम् । 'पाकः पचने शिशुदैत्ययोः'इति' *हैमानेकार्थः* [२-१२] । पुनः किं० ? **आसादितयौवनां** प्राप्तयौवनाम्[१] । अथ समासः । कूजन्तश्च ते कलहंसाश्च कूजत्कलहंसाः, सा एव मेखला यस्याः सा कू० । अन्यत्र कूजती कलहंसा इव मेखला यस्याः सा कूजत्कलहंसमेखला तां कू० । सपाकानि च तानि सस्यानि च सपाकसस्यानि, सपाकसस्यैराहितपाण्डुतागुणा सपाक० तां सपाक० । अन्यत्र पाक एव सस्यं पाकसस्यं सह पाकसस्येन वर्तते या सा सपाकसस्या । पाण्डोर्भावः पाण्डुता पाण्डुताया[ः] गुणः पाण्डुतागुणः, आहितः पाण्डुतागुणो यस्याः सा आहितपाण्डुतागुणा, सपाकसस्या चासौ आहितपाण्डुतागुणा च सपाकसस्या-हितपाण्डुतागुणा तां सपा० । जनस्य समीपे उपजनं तस्मिन्नुपजनम्[२] । जनानां प्रियः जनप्रियः यद्वा प्रिया जना यस्य स जनप्रियः । आसादितं यौवनं यया सा आसादितयौवना ताम् आ० । इति वृत्तार्थः ॥१॥

विनम्रशालिप्रसवौघशालिनीरपेतपङ्काः ससरोरुहाम्भसः ।
ननन्द पश्यन्नुपसीम स स्थलीरुपायनीभूतशरद्गुणश्रियः ॥ २ ॥

'विनम्र०' व्याख्या । **सोऽर्जुन उपसीम** ग्रामसीमसु समीपे ग्रामारण्ययोः सन्धिश्रेयं वा सीमा तत्समीपे **स्थली** अकृत्रिमा भूमीः समप्रदेशान् इत्यर्थः । **पश्यन्** विलोकयन् सन् **ननन्द** आनन्दं प्राप किं० स्थलीः ? **विनम्रशालिप्रसवौघशालिनीः** भारावनतशालिफलसमूहैः शोभमानाः 'प्रसवः पुष्पफलयोः' इति *हैमानेकार्थः* [३-६९७] । पुनः किं० ? **अपेतपङ्काः** निष्कर्दमाः निष्पङ्काः स्थल्यो भवन्तीत्यर्थः । पुनः किं० ? ['ससरोरुहाम्भसः' **ससरोरुहाणि** सकमलानि **अम्भांसि** जलानि यासु ताः ।] अत्र प्रसवशब्देन फलत्वमुपचर्यते । शालिप्रसवानां फलरूपत्वात् पुनः किं० ? **उपायनीभूत-शरद्गुणश्रियः** तस्मै पार्थाय स्त्रौकनिकां प्राप्ता शरत्कालसमृद्धीः[३] । अथ समासः । विशेषेण नम्राः

---

१. उपमालङ्कारः -म. । २. अव्ययीभावसमासे सर्वासां विभक्तीनाम् 'अम्' आदेशः भवति, अत्र सप्तम्याः अम् आदेशः । ३. अत्र शरद्गुणेषु तादात्म्येनारोप्यमाणस्योपापनस्य प्रकृते नन्दनक्रियोपयोगित्वात् परिणामालङ्कारः -म. ।

विनम्राः प्रसवानाम् औघाः प्रसवौघाः शालीनां प्रसवौघाः शालिप्रसवौघाः विनम्राश्च ते शालिप्रसवौघाश्च विनम्रशालिप्रसवौघाः विनम्रशालिप्रसवौघैः शालन्त इत्येवंशीलाः विनम्रशालिप्रसवौघशालिनस्ताः वि० । अपेतः पङ्को यासु ताः अपेतपङ्कास्ताः अपेतपङ्काः । सरसि रुहन्तीति सरोरुहाणि सरोरुहैः सह वर्तन्ते इति ससरोरुहाणि अम्भांसि यासु ताः स० । सीम्नः समीपम् उपसीम । शरदो गुणाः शरद्गुणाः शरद्गुणानां श्रियः शरद्गुणश्रियः । उपायनानि वियन्ते यासां ताः उपायनाः न उपायना अनुपायना उपायनाभूता ता उपायनीभूताः उपायनीभूताः शरद्गुणश्रियो यासु ताः उपायनीभूतशरद्गुणश्रियस्ता उपा० । इति वृत्तार्थः ॥ २ ॥

निरीक्ष्यमाणा इव विस्मयाकुलैः पयोभिरुन्मीलितपद्मलोचनैः[1] ।
हृतप्रियादृष्टिविलासविभ्रमा मनोऽस्य जह्रुः शफरीविवृत्तयः ॥ ३ ॥

'निरी'० व्याख्या । **शफरीविवृत्तयः** मत्स्यीस्फुरितानि मत्स्योल्लनोद्धर्तनानि इत्यर्थः । **अस्या**र्जुनस्य **मनः** चित्तं **जह्रुः** वशीचक्रुः तद्दर्शनैकपरो बभूवेत्यर्थः । मनोहरणे हेतुभूतं विशेषणमाह- किं० शफरीविवृत्तयः ? **हृतप्रियादृष्टिविलासविभ्रमाः** गृहीतस्त्रीलोचनलीलाशोभाः 'विलासो हावे लीलायाम्' इति *हैमानेकार्थः* [३-७५१] । 'विभ्रमः शोभायां संशये' इति *हैमानेकार्थः* [३-४६६] । पुनः किं० शफ० ? **पयोभिः** पानीयैः **निरीक्ष्यमाणा** विलोक्यमाना **इव** स्थिताः किं० पयोभिः ? **विस्मयाकुलैः** कुतूहलाक्षिप्तैः आश्चर्यरसाभिव्याप्तैः अत एव पुनः किं० ? **उन्मीलितपद्मलोचनैः** विस्फारितकमलनेत्रैः । अथ समासः । निरीक्ष्यन्ते इति निरीक्ष्यमाणा । विस्मयेन आकुलानि विस्मयाकुलानि तैर्वि० । उन्मीलितानि पद्मान्येव लोचनानि येषां तानि उन्मीलितपद्मलोचनानि तैः उ० । दृष्टेर्विलासो दृष्टिविलासो दृष्टिविलासस्य विभ्रमो दृष्टिविलासविभ्रमः प्रियाणां दृष्टिविलासविभ्रमः प्रियादृष्टिविलासविभ्रमः हृतः प्रियादृष्टिविलास विभ्रमो याभिस्ता हृ० । शफरीणां विवृत्तयः श० । इति वृत्तार्थः ॥ ३ ॥

तुतोष पश्यन् कलमस्य सोऽधिकं सवारिजे वारिणि रामणीयकम् ।
सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे ॥ ४ ॥

'तुतो'० व्याख्या । **सो**ऽर्जुनः **कलमस्य** शालिविशेषस्य 'शालयः कलमाद्याश्च' इति *हैमः* [११६९] । शालिशब्दः धान्यनामत्वात् पुंसि । **सवारिजे** कमलयुक्ते **वारिणि** जले वर्तमानस्येति शेषः । **रामणीयकं** मनोहरत्वं **पश्यन्** विलोकयन् **अधिकम्** अत्यर्थं **तुतोष** तुष्टिं प्राप अनुरूपसंगमत्वाद्-दृष्टवानित्यर्थः । तथाहि **सुदुर्लभे** सर्वत्राभावात् अत्यन्तदुष्प्राप्ये **अनुरूपसंगमे** परस्परयोग्यसंयोगे लब्धे सति इति शेषः । **प्रकर्षलक्ष्मीं** योग्यसमागमनिमित्ताम् उत्कर्षसंपदम् **अभिनन्दितुं** प्रसंशितुं स्तोतुं वा **कः** पुमान् **नार्हति** न योग्यो भवति अपितु सर्वोप्यभिनन्दत्येव । अथ समासः । सह वारिजैर्वर्तमानं सवारिजं तस्मिन् स० । रमणीयस्य भावो रा० । दुःखेन लभ्यते इति दुर्लभः सुतरां दुर्लभः सुदुर्लभः तस्मिन् सु० । प्रकर्षस्य लक्ष्मीः प्रकर्षलक्ष्मीस्तां प्र० । अनुरूपस्य संगमः अनुरूपसंगमस्तस्मिन् अ० । इति वृत्तार्थः ॥ ४ ॥

1. सरोभिः म. ।

नुनोद तस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंहति[1] ।
अवाप्तकिञ्जल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहतं पयः ॥ ५ ॥

'नुनो'० व्याख्या । **पयः** पानीयं **तस्य** अर्जुनस्य **स्थलपद्मिनीगतं** स्थलकमलिनीप्राप्तम् इयं स्थलकमलिनीति **वितर्कं** संशयं 'वितर्कः संशयोहयोः' इति *हैमानेकार्थः* [३-८९] **नुनोद** स्फेटयामास दूरीचकारेत्यर्थः । किं० पयः ? **आविष्कृतफेनसंहति** प्रकटीकृतफेनसमूहम् । अत एव पुनः किं० ? **अवाप्तकिञ्जल्कविभेदं** प्राप्तपरागविनाशं पुनः किं० ? **उच्चकैः** उच्चं यत्र स्यात् **विवृत्तपाठीनपराहतम्** उल्ललितसहस्रदंष्ट्रमत्स्यविशेषेण चालितं पाठीनचलनेन किञ्जल्कापाये जाते सति जलदर्शनात् स्थलपद्मिनीशङ्कानिवृत्तेति। अत्र निश्चयोत्तरसंदेहालङ्कारः । विषयस्य संदिह्यमानत्वेन संदेहः स त्रिविधः- शुद्धो १ निश्चयगर्भो २ निश्चयान्तश्चेति ३ यत्र संशय एव पर्यवसानं स शुद्धः १ यत्र संशयोपक्रमेनिश्चयमध्यः। संशयश्च स निश्चयगर्भः २ निश्चयान्तो यत्र संशयोपक्रमे निश्चये पर्यवसानं स निश्चयान्तः अत्र तृतीयो भेदो निश्चयोत्तरसंदेहः। उदाहरणम् इन्दुः किं क्व कलङ्कः सरसिजसे तत् किमुषु कुत्र गतम् । ललितविलासवचनैर्मुखमिति हरिणाक्षि निश्चितं पुरतः इति । अथ समासः । स्थले पद्मिनी स्थलपद्मिनी स्थलपद्मिन्यां गतं स्थलपद्मिनीगतम् । फेनानां संहतिः फेनसंहतिः आविष्कृता फेनसंहतिः [यस्मिन् तत् आवि०] । किञ्जल्कस्य विभेदः किञ्जल्कविभेदः अवाप्तः किञ्जल्कविभेदो येन तत् अ० । विवृत्तश्चासौ पाठीनश्च विवृत्तपाठीनः विवृत्तपाठीनेन पराहतं वि० । इति वृत्तार्थः ॥ ५ ॥

कृतोर्मिलेखं[2] शिथिलत्वमायता शनैः शनैः शान्तरयेण वारिणा ।
निरीक्ष्य रेमे स समुद्रयोषितां तरङ्गितक्षौमविपाण्डु सैकतम् ॥ ६ ॥

'कृतो०' व्याख्या । **समुद्रयोषितां** समुद्रगामिनीनां नदीनां **सैकतं** सिकतामयं तटं **निरीक्ष्य** विलोक्य **रेमे** चिक्रीड आनन्दं प्रापेत्यर्थः । किं० सैकतम् ? **तरङ्गितक्षौमविपाण्डु** मुष्टिलग्नदुकूलवत् 'क्षौमं स्यादतसीवस्त्रे दुकूलेऽट्टालकेऽपि च' इति *हैमानेकार्थः* [२-३१३] । पुनः किं० ? **वारिणा** पानीयेन **कृतोर्मिलेखं** विहितकल्लोलसेवं 'लेखा राज्यां लिपावपि' इति *हैमानेकार्थः* [२-२४] । वारिणा किं० ? **शिथिलत्वं** तुच्छत्वम् **आयता** प्राप्तवता दिने दिने क्षीयमाणेनेत्यर्थः । पुनः किं० वारिणा ? **शनैः शनैः** मन्दं **शान्तरयेण** शान्तवेगेन अन्यथोर्मिलेखानुदयादिति भावः । यथा कश्चित्पुमान् रागियोषितं तरङ्गितं क्षौमं वीक्ष्य रमते। शिथिलत्वं गच्छता सात्त्विकाविर्भावात् भीतभीतेनैव शान्तवेगेन करेण कृतलेखं कृता लेखा तस्मिन् तत् तथोक्तं पिण्डीकृतमित्यर्थः । पाण्डुचलवति समासोऽत्र उपमा बोधव्या। अथ समासः । कृता ऊर्मय एव लेखा यस्य तत् कृ० । शिथिलस्य भावः शिथिलत्वम्। शान्तो रयो यस्य तत् शान्तरयं तेन शा०। समुद्रस्य योषितः समुद्रयोषितः तासां स० । तरङ्गा जाता अस्य तत् तरङ्गितं तरङ्गितं च तत् क्षौमं च तरङ्गितक्षौमं विशेषेण पाण्डु विपाण्डु । त० च तद् वि० च इति तरङ्गितक्षौम-विपाण्डु । सिकता अस्याऽस्तीति सैकतम् । इति वृत्तार्थः ॥ ६ ॥

1. अयं पाठः म. मध्ये पाठान्तररूपेण निर्दिष्टः म. मध्ये 'संतति' पाठः । 2. रेखं -म. । इदं च पाठान्तरम् ।

ततस्त्रिभिः श्लोकैः शालिगोपिकां वर्णयति -

मनोरमं प्रापितमन्तरं भ्रुवोरलंकृतं केसररेणुनाऽणुना ।
अलक्तताम्राधरपल्लवश्रिया समानयन्तीमिव बन्धुजीवकम् ॥ ७ ॥

नवातपालोहितमाहितं मुहुर्महानिवेशौ परितः पयोधरौ ।
परिश्रमाम्भःपुलकेन सर्पता चकासयन्तीमरविन्दजं रजः ॥ ८ ॥

विभूषयन्तीमवतंसकोत्पलं कपोलसंश्लेषि विलोचनत्विषा ।
सुतेन पाण्डोः कलमस्य गोपिकां विलोक्य[1] मेने शरदः कृतार्थता ॥ ९ ॥

'मनोरमं०' 'नवा०' 'विभू०' व्याख्या । **पाण्डोः** कुन्तीपतेः **सुतेन** अर्जुनेन **कलमस्य** शालिविशेषस्य **गोपिकां** शालिगोप्त्रीं रक्षिकां गोपाङ्गनां **विलोक्य** दृष्ट्वा **शरदो** वर्षात्ययस्य शरद्समयस्य **कृतार्थता** **साफल्यं** मेने मानितं सफला शरदिति ज्ञातमित्यर्थः । किंकुर्वतीं गोपिकाम् ? **विलोचनत्विषा** नेत्रकान्त्या **कपोलसंश्लेषि** गल्लस्थलस्थितं कपोलाभरणमुत्पलमित्यर्थः । उत्पलस्याभरणं नेत्रकान्तिरिति भावः । **अवतंसकोत्पलं** कर्णालंकारकमलं **विभूषयन्तीं** शोभयन्तीम् आभरणस्याप्याभरणं करोतीत्यर्थः ॥९॥

'नवा०' व्याख्या । पुनः [किं]कुर्वतीम् ? **अरविन्दजं रजः** कमलोत्पन्नं परागं **सर्प्पता** प्रसरणशीलेन **परिश्रमाम्भः पुलकेन** स्वेदोद्भवेन पुलकेन परिश्रमसमुत्थस्वेदजलकणिकाजालकेनेत्यर्थः । 'पुलको गजान्नपिण्डे रोमाञ्चे प्रस्तरान्तरे अश्रुराज्यां मणिदोषे गल्वर्के तालके कृमौ' इति *हैमानेकार्थः* [३-६१] । **चकासयन्तीम्** अलंकुर्वतीम् अलंकरणमप्यलंकुर्वन्तीम् तत्रापि विकृतत्वेनेतिभावः । किं० रजः ? **पयोधरौ परितः** स्तनयोः समन्तात् **मुहु**रत्यर्थम् **आहितं** स्थापितं किं० स्तनौ ? **महानिवेशौ** पृथुपीठबन्धौ पुष्टावित्यर्थः । किं० अरविन्दजं रजः ? **नवातपालोहितं** नूतनतापेन इषत् रक्तं बालातपताम्रमित्यर्थः । शोभाविशेषद्योतनार्थम् इदं विशेषणम् ॥८॥

'मनो०' व्याख्या । पुनः किंकुर्वन्तीं गोपिकाम् **अलक्तताम्राधरपल्लवश्रिया** लाक्षारसवत् रक्तोष्ठपल्लवशोभया **बन्धुजीवकं** बन्धुवृक्षकुसुमं 'बन्धुको बन्धुजीवक्याम्' इति *हैमः* [११४९] । **समानयन्तीं** समीकुर्वन्तीमिव साम्यं भवति वा न वेति परीक्षां कुर्वन्तीमिवेत्युप्रेक्षालंकारः । किं० बन्धुजीवकम् ? **अणुना** सूक्ष्मेन **केसररेणुना** किञ्जल्करजसा परागेण **अलंकृतं** शोभितं 'केसरो नागकेसरे तुरङ्गसिंहयोः स्कन्धकेशेषु बकुलद्रुमे पुंनागवृक्षे किञ्जल्के स्यात्' इति *हैमानेकार्थः* [३-५३६/७] । अत एव पुनः किं० ? **मनोरमं** मनोहरं क्व स्थितम् ? **भ्रुवोरन्तरं प्रापितं** भ्रुवोर्मध्ये निवेशितम् 'अन्तरं रन्ध्रावकाशयोर्मध्ये' इति *हैमानेकार्थः* [३-५०७/८] ॥७॥ अथ समासः । कपोलयोः संश्लेषो अस्यास्तीति क० । विलोचनयोः त्विड् विलोचनत्विड् तया वि० । विभूषयतीति विभूषयन्ती तां वि० । अवतंसकस्य उत्पलम् अ० । गोपायति इति गोपिका तां गोपिकाम् । कृतोऽर्थो यया सा कृतार्था कृतार्थाया भावः कृ० ॥ ९ ॥ नवश्चासौ आतपश्च नवातपः नवातपवदालोहितं न० । महान् निवेशो ययोस्तौ म० ।

1. निरीक्ष्य -म. इदं च पाठान्तरम् ।

अरविन्दात् जातम् अरविन्दजम् । परिश्रमाम्भ एव पुलकः परिश्रमाम्भः पुलकस्तेन प० । सर्प्यतीति सर्पन् तेन सर्पता ॥ ८ ॥ मनो रमयतीति मनोरमम् । केसरेषु रेणुः केसररेणुस्तेन के० । अधर एव पल्लवः अ० । अलक्तवत् ताम्रः अलक्तताम्रः अलक्तताम्रश्चासौ अधरपल्लवश्च अलक्तताम्राधरपल्लवः अलक्तताम्राधर-पल्लवस्य श्रीः अ० तया अलक्तताम्राधर-पल्लवश्रिया ॥ ७ ॥ इति वृत्तार्थः ॥ ७ ॥ ८ ॥ ९ ॥

उपारताः पश्चिमरात्रिगोचरादपारयन्तः पतितुं जवेन गाम् ।
तमुत्सुकाश्चक्रुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरौधसः ॥ १० ॥

'उपा०' व्याख्या । **गवां गणाः** धेनुसमूहाः **तम्** अर्जुनम् **अवेक्षणोत्सुकं** विलोकनलम्पटं **चक्रुः** कृतवन्तः किं० गवां गणाः ? **पश्चिमरात्रिगोचरात्** पाश्चात्यनिशाचरणस्थानात् **उपारताः** पश्चाद्वलिताः पश्चिमरात्रौ गवां जग्धिस्थानात् व्याघुटिता इत्यर्थः । 'अतः पाश्चात्यपश्चिमे' इति *हैमः* [१४५९] । गवांगणाः किंकुर्वन्तः ? **जवेन** वेगेन **गां** पृथ्वीं **पतितुं** गन्तुं धावितुमित्यर्थः । **अपारयन्तः** अशक्नुवन्तः असमर्था इत्यर्थः । 'गौरुदके दृशि स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि' इति *हैमानेकार्थः* [१-६] । किं० गवां गणाः ? **प्रस्नुतपीवरौधसः** वत्सस्मरणात्स्खलितौधसः वत्सस्मरणात् क्षरत्क्षीरपुष्टापीनाः इत्यर्थः । 'आपीनमूधः' इति *हैमः* [१२७२] । पुनः किं० ? उत्सुकाः वत्सान्प्रति उत्कण्ठिताः[१] । अथ समासः । गावश्चरन्त्यस्मिन्निति गोचरः पश्चिमा चासौ रात्रिश्च पश्चिमरात्रिः [पश्चिमरात्रौ गोचरः] पश्चिमरात्रिगोचरस्तस्मात् प० । अवेक्षणे उत्सुकः अवेक्षणोत्सुकस्तम् अवेक्षणोत्सुकम् । पीवरं च तत् ऊधश्च पीवरौधः प्रस्नुतं पीवरौधो येषां ते पी० । इति वृत्तार्थः ॥ १० ॥

परीतमुक्षावजये जयश्रिया नदन्तमुच्चैः क्षतसिन्धुरोधसम् ।
ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवाम् ॥ ११ ॥

परी० व्याख्या । **सोऽर्जुनः गवां** धेनूनाम् **अधिपं** स्वामिनं षण्ढं **ददर्श** अपश्यत् महोक्षं दृष्ट-वानित्यर्थः । किंलक्षणमधिपम् ? **उक्षावजये** अन्यबलीवर्दविजये उक्षान्तरभङ्गे सति **जयश्रिया** विजयलक्ष्म्या **परीतं** व्याप्तं वेष्टितमित्यर्थः । पुनः किंलक्ष० ? **उच्चै**रत्यर्थं **नदन्तं** शब्दं कुर्वन्तं शब्दायमानमित्यर्थः । पुनः किं० ? **क्षतसिन्धुरोधसं** शृङ्गाभ्यां पातितनदीतटं पुनः किं० ? **शारदीं** शरत्कालकृतां शरत्संबन्धिनीं पुष्टिम् अङ्गोपाङ्गोपचयरूपां वृद्धिं **दधतं** धारयन्तं पुनः किं० ? उत्प्रेक्ष्यते **सविग्रहं** मूर्तिमन्तं **दर्पं** मद**मिव** अहंकारमिव स्थितम् । अथ समासः । उक्षामवजयः उक्षावजयस्तस्मिन् उक्षावजये । जयस्य श्रीः जयश्रीः तया जयश्रिया । नदतीति नदन् तं नदन्तम् । सिन्धोः रोधः सिन्धुरोधः क्षतं सिन्धुरोधो येन स क्षतसिन्धुरोधास्तं क्ष० । शरदि भवा शारदी तां शारदीम् । विग्रहेन सह वर्तमानं सविग्रहम् । इति वृत्तार्थः ॥ ११ ॥

विमुच्यमानैरपि तस्य मन्थरं गवां हिमानीविशदैः कदम्बकैः ।
शरन्नदीनां पुलिनैः कुतूहलं गलद्दुकूलैर्जघनैरिवादधे ॥ १२ ॥

१. अत्र स्वभावोक्तिरलंकारः । 'स्वभावोक्तिरलंकारः यथावद्वस्तुवर्णनम्' इति लक्षणात् –म.

विमु० व्याख्या । **शरन्नदीनां** शरत्कालसिन्धूनां **पुलिनैः** जलमभितः तटैः **तस्या**ऽर्जुनस्य **कुतूहलं** कौतुकम् **आदधे** कृतम्। 'कौतुकं कुतूहलम्' इति हैमः [९२६] । शरन्नदीनाम् इति संबन्धषष्ठी शरद्ग्रहणं प्रावृट्निवृत्त्यर्थं तत्र पुलिनादर्शनात् । हर्षः समजनीत्यर्थः । किं० पुलिनैः ? **गवां** धेनूनां **कदम्बकैः** समूहैः **मन्थरं** मन्दं मन्दं **विमुच्यमानैरपि** किमुतामुच्यमानैरिति भावः । पुनः किं० ? **हिमानीविशदैः** हिमसमूहवत् शुभैः पुनः किं० ? उत्प्रेक्ष्यते **गलद्दुकूलैः** पतत्परकुलैः नारीणामिति शेषः । **जघनैः** कटिप्रदेशैरिव स्थितैरिति शेषः । 'दुकूलं सूक्ष्मवाससि क्षौमवस्त्रे च' इति *हैमानेकार्थः* [३-६४९] । अथ समासः । विमुच्यन्ते तानि विमुच्यमानानि तैः वि० । हिमानां समूहो हिमानी हिमानीवत् विशदानि हिमानीविशदानि तैर्हि० । शरदि नद्यः शरदन्द्यस्तासां श० । गलन्ति दुकूलानि येभ्यस्तानि तैर्ग० । इति वृत्तार्थः ॥ १२ ॥

गतान्पशूनां सहजन्मबन्धुतां गृहाश्रयं प्रेम वनेषु बिभ्रतः ।
ददर्श गोपानुपधेनु पाण्डवः कृतानुकारानिव गोभिरार्जवे ॥ १३ ॥

गता० व्याख्या । **उपधेनु** धेनूनां समीपे **गोपान्** गोपालकान् **ददर्श** अद्राक्षीत् किं० गोपान्? **पशूनां** धेनूनां **सहजजन्मबन्धुतां** सहजातबन्धुवत्त्वं **गतान्** प्राप्तान् पशुषु सहोदराभिमानवत इत्यर्थः । पुनः किं०? **वनेषु** काननेषु **गृहाश्रयं** मन्दिरविषयं **प्रेम** स्नेहं **बिभ्रतो** धारयतः वनेषु गृहाभिमानिन इत्यर्थः । पुनः किं०? उत्प्रेक्ष्यते **आर्जवे** ऋजुत्वे विधेयत्वे **गोभिः** पशुभिः **कृतानुकारानिव** विहितसारूप्यानिव स्थितान् ऋजुत्वेन बलीवर्दानिव विधेयानित्यर्थः[१] । अथ समासः । सह जन्म येषां ते सहजन्मानः सहजन्मानश्च ते बन्धवश्च सहजन्मबन्धवः सहजन्मबन्धूनां भावः सहजन्मबन्धुता तां स० । गृहमेवाश्रयो यस्य तत् गृहाश्रयम्। बिभ्रतीति बिभ्रन् तान् बिभ्रतः । गां पान्तीति गोपास्तान् गोपान् । धेनूनां समीपम् उपधेनु समीपार्थेऽव्ययीभावः । पाण्डोरपत्यं पुमान् पाण्डवः । कृतोऽनुकारो यैस्ते कृतानुकारास्तान् कृतानुकारान् । ऋजोर्भावः आर्जवं तस्मिन् आर्जवे । इति वृत्तार्थः ॥ १३ ॥

अथ नर्तकीसाम्येन चतुर्भिः श्लोकैः गोपाङ्गना वर्णयति –

परिभ्रमन्मूर्धजषट्पदाकुलैः स्मितोदयादर्शितदन्तकेसरैः ।
मुखैश्चलत्कुण्डलरश्मिरञ्जितैर्नवातपामृष्टसरोजचारुभिः ॥ १४ ॥

प्रवृद्धनिःश्वासविकम्पिताधरा लता इव प्रस्फुरितैकपल्लवाः ।
व्यपोढपार्श्वैरपवर्तितत्रिका विकर्षणैः पाणिविहारहारिभिः ॥ १५ ॥

व्रजाजिरेष्वम्बुदनादशङ्किनीः शिखण्डिनामुन्मदयत्सु योषितः ।
मुहुः प्रणुन्नेषु मथां विवर्तनैर्नदत्सु कुम्भेषु मृदङ्गमन्थरम् ॥ १६ ॥

---

१. अत्रोत्प्रेक्षानुप्राणिता स्वभावोक्तिरलंकारः -म. । 1. निबद्ध० -म. इदं च पाठान्तरम् ।

स मन्थरावल्गितपीवरस्तनीः परिश्रमक्लान्तविलोचनोत्पलाः ।
निरीक्षितुं नोपरराम वल्लवीरभिप्रनृत्ता इव वारयोषितः ॥ १७ ॥

परि० प्रवृ० व्रजा० स म० व्याख्या । **सोऽर्जुनः वल्लवी**र्गोपीः **अभिप्रनृत्ता** नृत्यन्तीः **वारयोषितः** नर्तकीवेश्या **इव निरीक्षितुं** द्रष्टुं **न उपरराम** न विरमति स्म गोपीनिरीक्षणार्थमुपरतव्यापारो न बभूवेत्यर्थः । यथा कश्चित्पुमान् नृत्यन्तीर्गणिकाः पश्यन्न विरमति तद्वदित्यर्थः । इदानीं वल्लवीनां नृत्यद्वारयोषितां च साधारणविशेषणान्याह- किं० वल्लवीः ? **मन्थरावल्गितपीवरस्तनीः** मन्थानाकर्षणचञ्चलपुष्टपयोधरा 'मन्थरः सूचके कोशे वक्रे मन्दे पृथौ मथि' इति *हैमानेकार्थः* [३-५८३] । पुनः किं० ? **परिश्रमक्लान्तविलोचनोत्पलाः** खेदसंकोचितनेत्रकमलाः नृत्यवशादेवम्भूता वारयोषितोऽपि भवन्ति तस्मात् द्वे अपि विशेषणे वारयोषितामपि योजनीये ॥ १७ ॥

पुनः केषु सत्सु ? **व्रजाजिरेषु** गोस्थानाङ्गणेषु अधिकरणे सप्तमी 'व्रजोऽध्वगोष्ठसंघेषु' इति *हैमानेकार्थः* [२-७४] । **कुम्भेषु** मन्थानभ्रमणकलशीषु 'कुम्भो वेश्यापतौ घटे' इति *हैमानेकार्थः* [२-३०१] । **मृदङ्गमन्थरं** मुरजवत् गम्भीरं यथा स्यात् तथा। **नदत्सु** शब्दायमानेषु कुम्भेषु किंकुर्वत्सु ? **शिखण्डिनां** मयूराणां **योषितो** नारीमयूरीः **उन्मदयत्सु** उन्मदाः कुर्वत्सु मयूर्यो मेघगर्जितमिदमिति बुद्ध्या उन्मद्यो भूता इति भावः । अत्र योषित्ग्रहणं मौग्ध्यातिशयप्रतिपादनार्थे। किं० मयूरीर**म्बुनादशङ्किनीः** मेघगर्जितभ्रमवतीरिति भ्रान्तिमानलंकारः। तदुक्तं वाग्भट्टालंकारे-

वस्तुन्यन्यत्र कुत्रापि तत्तुल्यस्यान्यवस्तुनः । निश्चयो यत्र जायेत स भ्रान्तिमान् स्मृतो यथा ॥४०॥

इति । पुनः किं० कुम्भेषु ? **मथां** मथनदण्डानां **विवर्तनैः** परिभ्रमणैः **मुहुर्वारंवारं प्रणुन्नेषु** कम्पितेषु क्षोभितेष्वित्यर्थः। 'वैशाखः खजको मन्था मन्थानो मन्थदण्डकः' इति *हैमः* [१०२३] । वारयोषित्पक्षे केषु सत्सु ? **व्रजाजिरेषु** मार्गाङ्गणेषु चत्वरेष्वित्यर्थः । **कुम्भेषु** मुखावनद्धेषु वाद्येषु मृदङ्गमन्थरं शब्दपृथु यथा स्यात्तथा **नदत्सु** वाद्यमानेषु सत्सु यथा कुम्भेषु वेश्यापतिषु गन्धर्वेषु मृदङ्गमन्थरं वाद्यमन्दं यथा स्यात्तथा **नदत्सु** स्वनत्सु । 'मृदङ्गो घोषवाद्ययोः' इति *हैमानेकार्थः* [३-११९] । पुनः कुम्भेषु कथंभूतेषु ? **मुहुर्वारंवारं मथां** वादित्रवादनदण्डानां **विवर्तनै**रास्फालनैः **प्रणुन्नेषु** प्रेरितेषु पुनः कुम्भेषु किंकुर्वत्सु ? शिखण्डिनां योषित उन्मदयत्सु योषितः किंलक्षणाः अम्बुदनादशङ्किनीः ॥ १६ ॥

पुनः किं० वल्लवीः ? **प्रवृद्धनिःश्वासविकम्पिताधराः** वृद्धिगतनिःश्वासेन कम्पायमानौष्ठाः पुनः किं० ? अत एव **प्रस्फुरितैकपल्लवाः** लता इव दैवात् कम्पितैककिसलया वल्लीरिव स्थिता । दैवादेकपल्लवस्फुरणस्यापि लोके संभवादुपमैवं सतोत्प्रेक्षा । 'पल्लवः किसले वले विटपे विस्तरेऽलक्तरागे शृङ्गारषिङ्गयोः' इति *हैमानेकार्थः* [३-६९८] । पुनः किं० ? **विकर्षणैः** मन्थगुणाकर्षणैः नेत्राकर्षणै-रित्यर्थः । **अपवर्तितत्रिका** संवलितनितम्बा वक्रीभूतजघना इत्यर्थः । यद्यपि 'त्रिकं वंशाद्य' इति *हैमः* [६०८] तथाप्यत्र नितम्बो लक्ष्यंते । किंलक्षणैर्विकर्षणैः ? **व्यपोढपार्श्वैः** विपरीतकक्षाद्यवयवैः 'पार्श्वमन्तिके

१. तन्नैकट्यादिति -म. ।

कक्षाधोऽवयवेव क्रोपायपर्शुसमूहयोः'इति *हैमानेकार्थः* [२-५१९/२०] । पुनः किं० ? **पाणिविहारहारिभिः** हस्तभ्रमणमनोहरैः 'विहारस्तु जिनालये लीलायां भ्रमणे स्कन्धे' इति *हैमानेकार्थः* [३-५९६/७] । वारयोषितोप्येवंविधाः । तत्र वारयोषित्पक्षे विकर्षणैः हस्तादावङ्गुलचालनैः अपवर्त्तितत्रिका चलितनितम्बा किं० वि० ? **व्यपोढपार्श्वैः** चलितपार्श्वैः पुनः किं० ? **पाणिविहारहारिभिः** हस्तगतागतरम्यैः पुनः किंल० वारयोषितः ? **प्रवृद्ध०** गीतगानेन वर्धितनिःश्वासचलिताधराः उत्प्रेक्ष्यते **प्रस्फु०** चलदेकपल्लवा वल्लीरिव स्थिताः ॥ १५ ॥

पुनः किंलक्षणाः वल्लवीः ? **मुखैः** वदनैः उपलक्षिताः किं० मुखैः ? **परिभ्रमन्मूर्धजषट्पदाकुलैः** समन्तात् भ्रमणशीलकेशपाशभ्रमराकुलैः पुनः किं० ? **स्मितोदयादर्शितदन्तकेसरैः** हास्याविर्भावात् इषत्प्रकटीकृतदन्तकिञ्जल्कैः पुनः किं० ? **चलत्कुण्डलरश्मिरञ्जितैः** चञ्चलसुवर्णकर्णाभरणप्रभानुलिप्तैः पुनः किं० ? अत एव **नवातपामृष्टसरोजचारुभिः** नूतनघर्मेण इषत्स्पष्टकमलवत् मनोहरैः नर्तकीरपि एवंविधाः[१] ॥ १४ ॥ अथ समासः । मन्थरमावल्गिताः पीवराः स्तना यासां ताः मन्थरावल्गितपीवरस्तन्यस्ताः म० । विलोचनान्येवोत्पलानि विलोचनोत्पलानि परिश्रमेण क्लान्तानि विलोचनोत्पलानि यासां ताः परिश्रमक्लान्तविलोचनोत्पलास्ताः परि० ॥ १७ ॥ व्रजस्य अजिरं व्रजाजिरं तेषु व्रज० । अम्बुदानां नादा अम्बुदनादाः अम्बुदनादान् शङ्कन्ते इत्येवंशीलाः अम्बुदनादशङ्किन्यस्ता अ० । शिखण्डः विद्यते येषां ते शिखण्डिनस्तेषां शि० । मृदङ्गेन मन्थरं मृदङ्गमन्थरम् ॥ १६ ॥ प्रवृद्धश्चासौ निःश्वासश्च प्रवृद्धनिःश्वासः प्रवृद्धनिःश्वासेन विकम्पिता अधरा यासां ताः प्रवृद्धनिःश्वासविकम्पिताधरास्ताः प्रवृद्धा० । एके च ते पल्लवाश्च एकपल्लवाः प्रस्फुरिताः एकपल्लवा यासां ताः प्र० । व्यपोढानि पार्श्वानि येषु तानि व्यपोढपार्श्वानि तैर्व्य० । अपवर्तितानि त्रिकानि यासां ताः अपवर्तितत्रिका पाण्योर्विहारः पाणिविहारः पाणिविहारेण हारीणि पाणिविहारहारीणि तैः पा० ॥ १५ ॥ मूर्धजा एव षट्पदा मूर्धजषट्पदाः परिभ्रमन्तीति परिभ्रमन्तः परिभ्रमन्तश्च ते मूर्धजषट्पदाश्च परिभ्रमन्मूर्धजषट्पदाः परिभ्रमन्मूर्धजषट्पदैराकुलानि परिभ्रमन्मूर्धजषट्-पदाकुलानि तैः परि० । दन्ताः केसरा इव दन्तकेसराः स्मितस्य उदयः स्मितोदयः स्मितोदयेन आदर्शिता दन्तकेसरा येषां तानि स्मितोदयादर्शितदन्तकेसराणि तैः स्मि० । चलन्तश्च ते कुण्डलाश्च चलत्कुण्डलाः चलत्कुण्डलानां रश्मयः चलत्कुण्डलरश्मयः चलत्कुण्डलरश्मिभी रञ्जितानि चलत्कुण्डलरश्मिरञ्जितानि तैश्च० । नवश्चासौ आतपश्च नवातपः नवातपेन आमृष्टं नवातपामृष्टं नवातपामृष्टं च तत् सरोजं च नवातपामृष्टसरोजं नवातपामृष्टसरोजवत् चारूणि नवातपामृष्टसरोजचारूणि तैः न० । इति वृत्तार्थः चतुष्टयस्य ॥ १४, १५, १६, १७ ॥

पपात पूर्वां जहतो विजिह्मतां वृषोपभुक्तान्तिकसस्यसंपदः ।
रथाङ्गसीमन्तितसान्द्रकर्दमान् प्रसक्तसंपातपृथूकृतान्पथः ॥ १८ ॥

1. पृथक्कृतान् -म. इदं च पाठान्तरम् ।

१. अत्र चतुःश्लोक्यामुपमास्वभावोक्त्योः संसृष्टिः -म. ।

'पपात०' व्याख्या । सोऽर्जुनः **पथो** मार्गान् **पपात** जगाम किं० पथः ? **पूर्वां** वर्षाकालसंबन्धिनीं **विजिह्मतां** वक्रताम् अस्फुटतां **जहत**स्त्यजतः वर्षाकाले जलादिना अपटुत्वात् मार्गा वक्रा भवन्ति शरदि तु निष्पङ्कत्वेन समरेखाः प्रकटीभवन्ति इति भावः । पुनः किं० पथः ? **वृषोपभुक्तान्तिकसस्यसंपदः** वृषभभक्षितसमीपधान्यसमृद्धीन् 'वृषो गव्याखुधर्मयोः' इति *हैमानेकार्थः* [२-५५८] । पुनः किं० पथः ? **रथाङ्गसीमन्तितसान्द्रकर्दमान्** चक्रैर्द्विधाकृतनिबिडपङ्कान् 'रथाङ्गं रथपादोऽरि चक्रम्' इति *हैमः* [७५५] । पुनः किं० पथः ? **प्रसक्तसंपातपृथूकृतान्** निरन्तरगमनेन विस्तारितान् मनुष्याणामिति शेषः[1]। अथ समासः। विजिह्मस्य भावो विजिह्मता तां विजिह्मताम् । सस्यानां संपत् सस्यसंपत् अन्तिके सस्यसंपत् अन्तिकसस्यसंपत् वृषैरुपभुक्ता अन्तिकसस्यसंपत् येषां ते वृषोपभुक्तान्तिकसस्यसंपदस्तान्वृषो० । सान्द्राश्च ते कर्दमाश्च सान्द्रकर्दमाः सीमवन्तः कृता इति सीमन्तिताः रथैः सीमन्तिताः सान्द्रकर्दमा येषु ते रथाङ्गसीमन्तितसान्द्रकर्दमास्तान् रथाङ० । अपृथवः पृथवः कृताः इति पृथूकृताः प्रसक्तश्चासौ संपातश्च प्रसक्तसंपातः प्रसक्तसंपातेन पृथूकृताः प्रसक्तसंपातपृथूकृतास्तान् प्र० । इति वृत्तार्थः ॥ १८ ॥

जनैरुपग्राममनिन्द्यकर्मभिर्विविक्तभावेङ्गितभूषणैर्वृताः ।
भृशं ददर्शाश्रममण्डपोपमाः सपुष्पहासाः स निवेशवीरुधः ॥ १९ ॥

जनैः० व्याख्या । **सोऽर्जुनः उपग्रामं** ग्रामसमीपे **निवेशवीरुधः** गृहलतामण्डपान् **भृश**मत्यर्थं सादरं वा **ददर्श** दृष्टवान् किं० निवेशवीरुधः ? **जनै**र्गोपाललोकैः **वृता** व्याप्ता अधिष्ठिता इत्यर्थः । जनैः किं० ? **अनिन्द्यकर्मभिः** कुत्सितकर्मरहितैः पुनः जनैः किं० ? **विविक्तभावेङ्गितभूषणैः** पवित्राभिप्रायचेष्टालङ्कारैः 'विविक्तं स्यादसंपृक्ते रहःपूतविवेकिषु' इति *हैमानेकार्थः* [२-२८८] । 'भावोऽभिप्रायवस्तुनोः' इति *हैमानेकार्थः* [२-५२१] । 'इङ्गितं तु स्याच्चेष्टायां गमनेऽपि च' इति *हैमानेकार्थः* [३-२४१] किं० निवेशवी० ? **आश्रममण्डपोपमाः** मुनिस्थाने जनाश्रयतुल्याः 'आश्रमस्तु मुनिस्थानम्' इति *हैमः* [१००१] 'मण्डपस्तु जनाश्रयः' इत्यपि *हैमः* [१००३] । आश्रममण्डपा अपि उक्तविधजनैर्वृता भवन्तीति भावः । पुनः किं० निवेश० ? **सपुष्पहासाः** पुष्पविकाससहिताः । अथ समासः । ग्रामस्य समीपम् उपग्रामम् । न निन्द्यम् अनिन्द्यम् अनिन्द्यं कर्म येषां ते अनिन्द्यकर्माणस्तैर० । भावश्च इङ्गितं च भूषणं च भावेङ्गितभूषणानि विविक्तानि भावेङ्गितभूषणानि येषां ते विविक्तभावेङ्गितभूषणाः तैर्वि० । आश्रमेषु मण्डपाः आश्रममण्डपाः आश्रममण्डपानाम् उपमा यासां ताः आ० आश्रममण्डपौ पुंनपुंसकौ । पुष्पाणां हासाः पुष्पहासाः सह पुष्पहासैर्वर्तन्ते यास्ताः सपुष्पहासाः । निवेशेषु वीरुधो निवे० । इति वृत्तार्थः ॥ १९ ॥

ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषम् ।
उवाच यक्षस्तमनोदितोऽपि गां न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ २० ॥

1. अचोदितो -म. इदं च पाठान्तरम् ।

१. स्वभावोक्तिः -म. ।

तत० व्याख्या । **ततो**ऽनन्तरं **सः** पूर्वोक्तो **यक्षः** धनदानुचरः **शरद्गुणश्रियं** शरत्कालगुणशोभां **संप्रेक्ष्य** दर्शनीयां वर्णनीयां चालोक्य **अनोदितोऽपि** अपृष्टोऽपि **तम्** अर्जुनं प्रति **गां** वाणीम् **उवाच** अब्रवीत् किं० तम् अर्जुनम् ? **शरद्गुणालोकनलोलचक्षुषं** शरत्कालगुणावलोकनसाभिलाषनयनं 'लोलश्चले सतृष्णे च' इति *हैमानेकार्थः* [२-४९७] । **हि** यस्मात् कारणात् **इङ्गितज्ञो** भावज्ञः 'इङ्गितं हृद्गतो भावः' इति *विश्वः* । **अवसरे** वेलायां **नावसीदति** अवसादं न याति किन्तु मुखरीभवतीत्यर्थः । अथ समासः । शरदो गुणाः शरद्गुणाः शरद्गुणानामालोकनं शरद्गुणालोकनं शरद्गुणालोकने लोले चक्षुषी यस्य स शरद्गुणालोकनलोलचक्षुः तं शरद्गुणा० । न नोदितः अनोदितः । इङ्गितं जानाति इति इङ्गितज्ञः । इति वृत्तार्थः ॥ २० ॥

यक्षः किमुवाचेत्याह -

इयं शिवाया नियतेरिवायतिः कृतार्थयन्ती जगतः फलैः क्रियाः ।
जयश्रियं पार्थ ! पृथूकरोतु ते शरत्प्रसन्नाम्बुरनम्बुवारिदा ॥ २१ ॥

इयं० व्याख्या । हे **पार्थ !** हे अर्जुन ! **इयमेषा शरद्** शरत्समयः वर्षात्ययः **ते** तव **जयश्रियं** विजयलक्ष्मीं **पृथूकरोतु** विस्तारयतु प्रापयत्वित्यर्थः । किं० शरत् ? **शिवायाः** कल्याणकारिण्याः अनुकूलायाः **नियतेः** भाग्यस्य **आयतिः** फलदानकाल इव स्थिता । शरत् किंकुर्वती ? **जगतो** लोकस्य **क्रियाः** कृष्यादिकर्माणि **फलैः** सस्यनिष्पत्तिभिः **कृतार्थयन्ती** सफलाः कुर्वती 'फलं हेतुकृते जातिफले फलकसस्ययोः । त्रिफलायां च कक्वोले शस्त्राग्रे व्युष्टिलाभयोः' इति *हैमानेकार्थः* [२-४८७] ।

पुनः किं० शरत् ? **प्रसन्नाम्बुः** निर्मलजला पुनः किं० ? **अनम्बुवारिदा** जलरहितमेघा अनेन विशेषणद्वयेन द्यावापृथिव्योरानुकूल्यं सूचितम् । अथ समासः । जयस्य श्रीः जयश्रीः तां जयश्रियम् । प्रसन्नानि अम्बूनि यस्यां सा प्र० । न विद्यन्ते अम्बूनि येषु ते अ० वारिणि ददतीति वारिदाः अनन्बवो वारिदा यस्यां सा अ० । इति वृत्तार्थः ॥ २१ ॥

उपैति[1] सस्यं परिणामरम्यता नदीरनौद्धत्यमपङ्कता महीम् ।
नवैर्गुणैः संप्रति संस्तवस्थिरं तिरोहितं प्रेम घनागमश्रियः ॥ २२ ॥

उपै० व्याख्या । हे अर्जुन ! **परिणामरम्यता** परिपाकसुन्दरता **सस्यं** व्रीह्यादिधान्यम् **उपैति** प्राप्नोति । हे अर्जुन ! **अनौद्धत्यम्** अपूरादिलक्षणम् अगम्यरूपत्वं सौम्यत्वमित्यर्थः । **नदीः** सरित उपैति प्राप्नोति । हे अर्जुन ! **अपङ्कता** निष्कर्दमत्वं **महीं** भूमिम् उपैति मही अपङ्का जाता इत्यर्थः । तथाहि **संप्रति** अधुना **नवै**र्नूतनै**र्गुणैः** पूर्वोक्तैः शरद्गुणैः **संस्तवस्थिरं** चिरोपभोगेन परिचयेन वा दृढं **घनागमश्रियः** वर्षाकाललक्ष्म्याः संबन्धि **प्रेम** प्रीतिः **तिरोहितम्** आबाधितं निरर्थकं कृतमित्यर्थः । गुणवशाः प्रेमाणो न परिचयवशा इति भावः[2]। अथ समासः । रम्यस्य भावो रम्यता परिणामेन रम्यता प० । उद्धतस्य भावो

१. म. मध्ये 'उपैति सस्यं परिणामरम्यतां नदीरनौद्धत्यमपङ्कतां मही' इति पाठः किन्तु तत्र टीकायां 'नदीः' इति विसर्गान्तं प्रथमाविभक्तिउपं चिन्त्यम् । २. वास्तवालंकारः - म. ।

औद्धत्यं न औद्धत्यम० । पङ्क्तस्य भावः पङ्क्तता न पङ्क्तता अ० । संस्तवेन स्थिरं सं० । घनानामागमो घनागमः घनागमस्य श्रीः घनागमश्रीस्तस्याः घ० । इति वृत्तार्थः ॥ २२ ॥

पतन्ति नास्मिन् विशदाः पतत्रिणो धृतेन्द्रचापा न पयोदपङ्क्तयः ।
तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणम् ॥ २३ ॥

पतन्ति० व्याख्या । हे अर्जुन ! **अस्मिन्** आकाशे **विशदा** उज्ज्वलाः **पतत्रिणो** बलाकपक्षिणो हंसा वा **न पतन्ति** न भ्रमन्ति न प्रसरन्तीत्यर्थः । शरदागमे हि तेषां प्राचुर्याभावात् । पुनः किम्० ? **धृतेन्द्रचापाः** धृतेन्द्रधनुषः **पयोदपङ्क्यो** मेघश्रेणयो **न** पतन्ति शरदि तदभावात् । **तथापि** शोभाकारणाभावेपि **नभो** गगनं **परामु**त्कृष्टां **श्रियं** शोभां **पुष्णाति** पुष्यति दधातीत्यर्थः । तथाहि- **रम्यं** स्वभावसुन्दरं वस्तु **आहार्यमा**रोप्यं कृत्रिममिति यावत् । गुणं **न अपेक्षते** न वाञ्छति गगनमपि निसर्गरमणीयमिति । अथ समासः । पतत्राणि विद्यन्ते येषां ते पतत्रिणः । इन्द्रस्य चापाः इन्द्रचापाः धृता इन्द्रचापा याभिस्ता धृ० चापशब्दः पुंनपुंसकलिङ्गः । पयांसि ददतीति पयोदाः पयोदानां पङ्क्यः पयो० । इति वृत्तार्थः ॥२३॥

विपाण्डुभिर्म्लानतया पयोधरैश्च्युताचिराभागुणहेमदामभिः ।
इयं कदम्बानिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते ॥ २४ ॥

विपां० व्याख्या । हे अर्जुन ! **इयमेषा दिग्वधूनां** दिग्वनितानां **कृशता** कृशत्वं **न राजते** न शोभते इति **न**[१] किन्तु **राजत एव** शोभत एव कस्मिन् सति ? **कदम्बानिलभर्तुः** कदम्बानिलशब्देन वर्षर्तुरुपलक्ष्यते वर्षाऋतुरेव भर्ता तस्या**त्यये** विरहे सति किं० । दिग्वधूनाम् ? **पयोधरैः** घनैः उपलक्षितानां किं० पयोधरैः ? **च्युताचिराभागुणहेमदामभिः** वर्षाकालविपर्ययात् पतितविद्युल्लतासुवर्णसूत्राभरणैः तथाहि भर्तृविरहे वधूनां कृशता राजते । किं० वधूनां पयोधरैः ? स्तनैः 'पयोधरः कुचे मेघे' इति *हैमानेकार्थः* [४-२७०] । उपलक्षितानां किं० पयोधरैः ? **म्लानतया** भर्तृसंयोगाभावात् 'आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा' (४१) इति स्मरणादिति भावः । दुर्बलतया **विपाण्डुभिः** पाण्डुरवर्णैः पुनः किंल० पयोधरैः ? च्युताचि० गतविद्युद्रूपसुवर्णाभरणैः[२] । अथ समासः । विशेषेण पाण्डवो विपाण्डवस्तैर्वि० । म्लानस्य भावो म्लानता तया म्लानतया । पयः धरन्तीति पयोधरास्तैः प० । न चिरम् अचिरम् अचिरं भा यस्याः सा अचिराभा तस्या गुणाः अ० हेम्नो दामानि हेमदामानि च्युतानि अचिराभागुणा एव हेमदामानि येषां ते च्युताचिराभागुणहेमदामानस्तैः च्यु० । कदम्बानिल एव भर्ता तस्य क० । दिश एव वधूः दिग्वधूस्तासां दिग्वधूनाम् । कृशस्य भावः कृशता । इति वृत्तार्थः ॥ २४ ॥

विहाय वाञ्छामुदिते मदात्ययादरक्तकण्ठस्य रुते शिखण्डिनः ।
श्रुतिः श्रयत्युन्मदहंसनिःस्वनं गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥ २५ ॥

---

१. सामान्यतः प्रसक्तमरञ्जनं संकार्श्यस्यैकेन नञाऽनूद्य द्वितीयेन निषेधति । यथाह वामनः - 'संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति (काव्यालंकार सू.-५/१/९) । २. अत्र रूपकालंकारः स्फुट एव -म. ।

विहाय० व्याख्या । हे अर्जुन ! **श्रुतिः** कर्णः'श्रुतिराम्नायवार्तयोः षड्जाद्यारम्भिकायां च कर्णाकर्णनयोरपि' इति *हैमानेकार्थः* [२-२०१]। **उन्मदहंसनिःस्वनं** मत्तमरालकूजितं **श्रयति** किंकृत्वा ? **मदात्ययात्** मदक्षयात् शरदि हेममयूराणां मदक्षयो भवति । **अरक्तकण्ठस्य** अश्राव्यस्वरस्य कण्ठशब्देन तद्गतः स्वरो लक्ष्यते । 'कण्ठो ध्वनौ संनिधाने ग्रीवायां मदनद्रुमे' इति *हैमानेकार्थः* [२-१०१] । **शिखण्डिनो मयूरस्य** संबन्धिनि **उदिते** उच्चैस्तरे **रुते** शब्दिते **वाञ्छां** श्रवणेच्छां **विहाय** त्यक्त्वा ननु अकाण्डे कथं परिचितपरिहारेणापरिचिते प्रीतिप्रादुर्भाव इत्याशङ्क्यार्थान्तरं न्यस्यति-यतो हेतोः **प्रियत्वे** प्रीतिकरत्वे **गुणाः अधिकृताः** नियुक्ता प्रयोजका इत्यर्थः । न तु **संस्तवः** परिचयो नाधिकृ**तः** प्रेमकरणे गुणवत्त्वं कारणं **न** तु परिचय इति भावः। अथ समासः। मदस्य अत्ययः मदात्ययः तस्मान्म० । अरक्तः कण्ठो यस्य सोऽरक्तकण्ठस्तस्य अ० । उत् अधिको मदो येषां ते उन्मदाः उन्मदाश्च ते हंसाश्च उन्मदहंसाः उन्मदहंसानां निःस्वनम् उ०। प्रीणाति इति प्रियः प्रियस्य भावः प्रियत्वं तस्मिन् प्रियत्वे । इति वृत्तार्थः ॥२५॥

अथ शालयो विपक्वा सन्तः नमन्ति । इति स्वभावस्तत्र कविरुत्प्रेक्षते -

अमी पृथुस्तम्बभृतः पिशङ्गतां गता विपाकेन फलस्य शालयः ।
विकासि वप्राम्भसि गन्धसूचितं नमन्ति निघ्रातुमिवासितोत्पलम् ॥ २६ ॥

अमी० व्याख्या । हे अर्जुन ! **अमी** एते **शालयो** व्रीहिविशेषाः **नमन्ति** नम्रीभवन्ति किं० शालयः ? **पृथुस्तम्बभृतः**[१] प्रपुलप्रकाण्डधारिणः विशालमूलधरा इत्यर्थः । 'स्तम्ब आलानगुल्मयोः व्रीह्यादीनां प्रकाण्डे च' इति *हैमानेकार्थः* [२-३१०] । पुनः किं० ? **फलस्य** प्रसवस्य **विपाकेन** परिणामेन 'विपाकः परिणामे स्याद् दुर्गतिस्वादुनोरपि' इति *हैमानेकार्थः* [३-८९] **पिशङ्गतां** पीततां **गताः** प्राप्ता पुनः कथंभूताः शालयः ? अत एव उत्प्रेक्ष्यते - **वप्राम्भसि** केदारजले 'क्षेत्रे तु वप्रः केदारः' इति *हैमः* [९६५] । **असितोत्पलं** नीलोत्पलं **निघ्रातुमा**घ्रातुं क्वचित् 'निध्यातुम्'इति पाठः तत्र निध्यातुं द्रष्टुं निर्वर्णयितुमिवेत्यर्थः। 'निध्यानमवलोकनं दर्शनं द्योतनं निर्वर्णनं च' इति *हैमः* [५७७] । किं० असि० ? **विकासि** विकसितं ननु विकासि नीलोत्पलं वर्तते इति कथं तैः ज्ञातमित्याह - पुनः किं० अ० ? **गन्धसूचितं** गन्धेन ज्ञापितम् अतः फलभारनम्राणां तेषां शालीनां निघ्राणं फलमुत्प्रेक्ष्यते इति फलोदयोत्प्रेक्षा । अथ समासः । पृथवश्च ते स्तम्बाश्च पृथुस्तम्बाः पृथुस्तम्बान् बिभ्रतीति पृ० । पिशङ्गस्य भावः पिशङ्गता तां पि० । विकासोऽस्यास्तीति विकासि । वप्राणामम्भो वप्राम्भस्तस्मिन् व० । गन्धेन सूचितं ग० । न सितम् असितम् असितं च तदुत्पलं च अ० । इति वृत्तार्थः ॥ २६ ॥

मृणालिनीनामनुरञ्जितं त्विषा विभिन्नमम्भोजपलाशशोभया ।
पयः स्फुरच्छालिशिखापिशङ्गितं द्रुतं धनुःखण्डमिवाहिविद्विषः ॥ २७ ॥

---

१. पृथुन् स्तम्बान् गुच्छान् बिभ्रतीति पृथुस्तम्बभृतः -म.

विपाण्डु संव्यानमिवानिलोद्धतं निरुन्धतीः सप्तपलाशजं रजः ।
अनाविलोन्मीलितबाणचक्षुषः स्वपुष्पहासा वनराजयोषितः ॥ २८ ॥

अदीपितं वैद्युतजातवेदसा सिताम्बुदच्छेदतिरोहितातपम् ।
ततान्तरं सान्तरवारिशीकरैः शिवं नभोवर्त्म सरोजवायुभिः ॥ २९ ॥

सितच्छदानामपदिश्य धावतां रवैरमीषां ग्रथिताः पतत्रिणाम् ।
प्रकुर्वते वारिदरोधनिर्गताः परस्परालापमिवामला दिशः ॥ ३० ॥

मृणा० विपा० अदी० सित० व्याख्या । किंलक्षणानां पतत्रिणाम् ? **सितच्छदानां** श्वेतपक्षानां पतत्रिणां हंसानामित्यर्थः । पयः केदारजलमुद्दिश्य धावताम् इत्यग्रसंबन्धः । किं० पयः ? **मृणालिनीनां** कमललतानां **त्विषा** नीलवर्णकान्त्या **अनुरञ्जितं** तद्धर्मतामापादितं नीलवर्णतां प्रापितमित्यर्थः । पुनः **अम्भोजपलाशशोभया** कमलपत्रकान्त्या 'पत्रं पलाशं छदनं बर्हं पर्णं छदं दलम्' इति *हैमः* [११२३] । रक्तत्वेनेत्यर्थः । **विभिन्नं** मिश्रितं पुनः किं० ? **स्फुरच्छालिशिखापिशङ्गितम्** उल्लसत्कलमाग्रभागेन पीततां नीतं 'शिखाग्रमात्रे चूडायाम्' इति *हैमानेकार्थः* [२-२७]। पुनः किं० ? उत्प्रेक्ष्यते नानाविधवर्णत्वात् **अहिविद्विषो** वृत्राशुरशत्रोः 'अहिः सर्पे वृत्रे' इति *हैमानेकार्थः* [२-५८३] । देवेन्द्रस्येत्यर्थः । **द्रुतं** पतितं **धनुःखण्डं** शकल**मिव** स्थितम् अत्र धनुःखण्डस्य द्रुतस्य लोके अप्रसिद्धत्वात् उत्प्रेक्षेयं नोपमा । अथ समासः । मृणालानि विद्यन्ते यासां ता मृणालिन्यस्तासां मृ० । अम्भोजानां पलाशानि अम्भोजपलाशानि अम्भोजपलाशानां शोभा अम्भोजपलाशशोभा तया अ०। स्फुरन्तश्च ते शालयश्च स्फुरच्छालयः स्फुरच्छालिनां शिखाः स्फुरच्छालिशिखाः ताभिः पिशङ्गिते स्फु० । धनुषः खण्डं धनुःखण्डम् । अहेर्विद्विट् अहिविद्विट् तस्याहिविद्विषः । इति वृत्तार्थः ॥ २७ ॥

विपा० व्याख्या । पुनः किं० सितच्छदानां पतत्रिणाम् ? **वनराजयोषितः** काननराति(ज)स्त्रियः **अपदिश्य** उद्दिश्य धावतां गच्छतामित्यन्वयः । किं० वनराजयोषितः ? **सप्तपलाशजं** सप्तच्छदवृक्षोत्पन्नं **रजः** रेणुं **संव्यान**मुत्तरीयम**िव** 'संव्यानं चोत्तरीयकम्' इति *हैमः* [६७१] **निरुन्धतीः** निवारयन्तीः काचिन्नायिका केनचित्कामुकेन आक्षिप्तं स्तनांशुकं निरुन्धे(न्धते) तद्वदिति भावः । किं० रजः ? **विपाण्डु** उज्ज्वलं पुनः किं० ? **अनिलोद्धतं** वायुना प्रेरितं पुनः किं० वन० ? **अनाविलोन्मीलितबाणचक्षुषः** निर्मलोद्घाटितबाणवृक्षकुसुमनेत्राः पुनः किं० ? **स्वपुष्पहासाः** [स्वीय]पुष्परूपहास्यसंयुक्ताः 'व[1]नराजियोषित' इति पाठे वनस्पतिस्त्रियस्ता अपदिश्य केचिद् धमानस (?) धावन्ति । पुनः किं० वनराज० ? विपाण्डु शुभ्रम् अनिलोद्धतं वातक्षिप्तं सप्तपलाशजं रज इव संव्यानमुत्तरीयं निरुन्धतीः । पुनः किं० अना० ? अकलुषविकस्वर बाणा एव नेत्राः 'बाणो वृक्षविशेषेस्याच्छरस्यावयवे शरे' इति *हैमानेकार्थः* [२-१४७] । पुनः किं० ? सपुष्पहासाः हासपुष्पसहिताः। अथ समासः । विशेषेण पाण्डु

1. एष पाठः म. मध्ये ।

विपाण्डु । अनिलेन उद्धतम् अ० । सप्त सप्त पलाशानि पर्वसु येषां ते वृक्षाः सप्तपलाशाः सप्तपलाशेभ्यो जातः सप्तपलाशजः तं सप्त० । अनाविलानि उन्मीलितानि बाण एव चक्षूंषि यासां ताः अना० । स्वानि पुष्पाण्येव हासो यासां तानि स्वपुष्पहासास्ताः स्व० 'स' इति पाठे पुष्पाणि हासा इव तैः सह वर्तते इति सपुष्पहासाः । वनराजयो योषित इव व०। इति वृत्तार्थः ॥ २८ ॥

अदी० व्याख्या। पुनः किं० सितच्छदानां पतत्रिणाम् ? **नभोवर्त्म** गगनमार्गमपदिश्य धावतामित्यन्वयः। किं० नभोवर्त्म ? **वैद्युतजातवेदसा** विद्युताग्निना **अदीपितम्** अप्रकाशितं विद्युत्प्रकाशस्य प्रतिघातकत्वात् तद्राहित्यमत्र गुण इति भावः । पुनः किं० ? **सिताम्बुदच्छेदतिरोहितातपं** श्वेतमेघखण्डाच्छादितातपं न वृष्टिबाधो नाप्यातपबाध इति भावः । पुनः किं० ? **सान्तरवारिशीकरैः** विरलाम्बुकणैः **ततान्तरं** व्याप्तमध्यं 'ततो व्याप्तेऽनिले पृथौ' इति *हैमानेकार्थः* [२-१६७] । पुनः किं० ? **सरोजवायुभिः** कमलवातैः **शिवं** रम्यं सुगन्धीत्यर्थः । अथ समासः । न दीपितम् अदीपितम् । विद्युति भवो वैद्युतः वैद्युतश्चासौ जातवेदाश्च वैद्युतजातवेदास्तेन वै० । सिताश्च ते अम्बुदाश्च सिताम्बुदाः सिताम्बुदानां छेदाः सिताम्बुदछेदाः सिताम्बुदछेदैः तिरोहित आतपो यत्र तत् सि० । ततम् अन्तरं यस्य तत् ततान्तरम्। सान्तराश्च ते वारिशीकराश्च सान्तरवारिशीकरास्तैः सा० । नभसो वर्त्म नभोवर्त्म । सरसि जातानि सरोजानि सरोजानां वायवः सरोजवायवस्तैः स० । इति वृत्तार्थः ॥ २९ ॥

सित० व्याख्या । हे अर्जुन ! **अमला** निर्मला **दिशः** ककुभः **परस्परालापं** परस्परं संभाषणं **प्रकुर्वते** कुर्वन्तीव अन्योन्यं वार्तामिव पृच्छन्तीत्यर्थः । किं० दिशः ? **वारिदरोधनिर्गताः** मेघोपरोधनिर्मुक्ताः पुनः किं० ? **अमीषाम्** एतेषां सितच्छदानां **रवैः** शब्दैः **ग्रथिताः** दृढाः बद्धाः इत्यर्थः। किंकुर्वतां सितच्छदानां पूर्वश्लोकत्रयोक्तं पयःप्रभृतिक**मपदिश्य** उद्दिश्य **धावतां** गच्छतां 'सृ गतौ' इत्येतस्य धावादेशः शध्रेर्थे शतृप्रत्ययान्तोऽयम् । अथ समासः । सिताः च्छदा येषां ते सितच्छदास्तेषां सि० । धावन्तीति धावन्तस्तेषां धावताम् । पतत्राणि विद्यन्ते येषां ते पतत्रिणस्तेषां प० । वारिदानां रोधः वारिदरोधः वारिदरोधान्निर्गता वा० । परस्परस्य परस्परं परस्परमालपनं परस्परालापस्तं प० । इति वृत्तार्थः ॥३०॥

विहारभूमेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपङ्क्तयः ।
असक्तमूधांसि पयः क्षरन्त्यमूरुपायनानीव नयन्ति धेनवः ॥ ३१ ॥

विहार० व्याख्या । हे अर्जुन ! **अमूः** प्रत्यक्षा **धेनवो** गावः **उपायनानीव** रगैकनिका (?) इव **ऊधांसि** आपीनानि **शरीरजेभ्यः** अपत्येभ्यः **नयन्ति** प्रापयन्ति किं० धेनवः ? **विहारभूमेः** तृणभक्षणधरित्र्याः आगछन्त्य इति शेषः । पुनः किं० ? **अभिघोषमुत्सुकाः** व्रजं प्रत्युत्कण्ठिताः 'अभिप्रती आभिमुख्ये' इत्यव्ययीभावः समासः । वत्सस्नेहेनेति भावः । 'घोषस्त्वाभीरपल्लिका' इति हैमः [१००२] । पुनः किं० ? **च्युतयूथपङ्क्तयः** व्यक्तगोकुलश्रेणयः 'जातं तिरश्चां तद्यूथम्' इति हैमः

1. एषोऽपि म. मध्ये ।

१. स्वभावोक्तिरलंकारः -म. ।

[१४१२] । ऊधांसि किंकुर्वन्ति ? **असक्तं** निरन्तरम् अप्रतिबन्धं यथा स्यात् तथा प्रचुरं **पयो** दुग्धं **क्षरन्ति** स्रवन्ति । 'पयः क्षीरे च नीरे च' इति *हैमानेकार्थः* [२-५७१] । वत्सस्मरणात् प्रस्नुतस्तना इत्यर्थः । यथा लोके कुतश्चित् ग्रामादागछन्त्यो जनन्यः किञ्चित् खाद्यं वस्तु शर्करादिविकारं बालेभ्यः समानयन्ति तद्वदिति भावः । अथ समासः । विहारस्य भूमिः विहारभूमिः तस्या वि० । घोषमभि लक्ष्यीकृत्य अभिघोषम् शरीरजाता शरीरजाः तेभ्यः श० । यूथानां पङ्क्यः यूथपङ्क्यः च्युता यूथपङ्क्यो याभिः ताः च्यु० । इति वृत्तार्थः ॥ ३१ ॥

जगत्प्रसूतिर्जगदेकपावनी व्रजोपकण्ठं तनयैरुपेयुषी ।
द्युतिं समग्रां समितिर्गवामसावुपैति मन्त्रैरिव संहिताहुतिः ॥ ३२ ॥

जग० व्याख्या । हे अर्जुन ! **असौ** एषा **गवां** धेनूनां **समितिः** संहतिः 'समितिर्युधि संगमे साम्ये सभायामीर्यादौ' इति *हैमानेकार्थः* [३-३०२] । **समग्रां** समस्तां **द्युतिं** कान्तिम् **उपैति** प्राप्नोति किं० समितिः ? **जगत्प्रसूतिः** विश्वोत्पत्तिकारणं[1] पुनः किं० ? **जगदेकपावनी** भुवनैकपवित्रकारणी पुनः किं० ? **व्रजोपकण्ठं** गोष्ठान्तिकं गोकुलसमीपमित्यर्थः । **तनयै**र्वत्सैः सह उपेयुषी संगता मिलितेत्यर्थः । केव ? आहुति**रिव** यथा **आहुतिः** होतव्यद्रव्यं **मन्त्रैः** ऋग्यजुसामादिभिः **संहिता** योजिता सती समग्रां द्युतिम् उपैति प्राप्नोति 'संहिता वर्णसंयोगे शास्त्रवेदैकदेशयोः' इति *हैमानेकार्थः* [३-२९९] । किं० आहुतिः ? **जगत्प्रसूतिः** कृष्यादिनिमित्तत्वात् पुनः किं० ? **जगदेकपावनी** जगतामघस्य हन्त्री ।

'अग्नौ प्रास्ताहुतिः सम्यग् आदित्यमुपतिष्ठते । आदित्याद्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा' ॥४२॥ [मनुस्मृति ३-७६] इति स्मरणादिति भावः । अथ समासः । जगतां प्रसूतिः ज० । एका च असौ पावनी च एकपावनी जगताम् एकपावनी ज० । व्रजस्य उपकण्ठः व्रजोपकण्ठः तं व्र० । इति वृत्तार्थः ॥३२॥

कृतावधानं जितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिस्वने ।
इदं जिघत्सामपहाय भूयसीं न सस्यमभ्येति मृगीकदम्बकम् ॥ ३३ ॥

कृता० व्याख्या । हे अर्जुन ! **इदम्** एतत् पुरोवर्ति **मृगीकदम्बकं** हरिणीसमूहं **सस्यं** व्रीह्यादि धान्यं **नाभ्येति** सस्याभिमुखं न गच्छति तृणादीन् न भक्षयति इति भावः । किंकृत्वा ? **भूयसीं** प्रचुरां **जिघत्सा**मदनेच्छाम् **अपहाय** त्यक्त्वा गीतासक्त्या क्षुधमपि न गणयतीति भावः । किं० मृगीकदम्बकम् ? **सुरक्तगोपीजनगीतनिस्वने** मधुरस्वरगोपीजनगानशब्दे 'गीतं गानं गेयं गीतिः' इति *हैमः* [२८०] । **कृतावधानं** निष्पादितैकाग्रचित्तं गोपीजनगाने दत्तचित्तमित्यर्थः । किं० सुर० ? **जितबर्हिणध्वनौ** निर्जितमयूरशब्दे एतेन षड्जस्वरप्रायं गायन्तीति भावः । 'षड्जं मयूरो वदति' (४३) इति ध्वनिः[2] । 'मयूरबर्हिणौ नीलकण्ठः' इति *हैमः* [१३१९] । अथ समासः । कृतम् अवधानं येन तत् कृ० । बर्हिणां ध्वनिः बर्हिणध्वनिः जितो बर्हिणध्वनिर्येन स जितबर्हिणध्वनिस्तस्मिन् जित० । गां पान्ति ते गोपाः

१. आज्यादिहविर्द्वारेणेति भावः -म. । २. म. मध्ये इदं मातङ्गनाम्नः विदुषः वाक्यमिति सूचितम् ।

गोपानां भार्या गोप्यः आतोः अति प्रत्ययः पुंयोगे चेतिङीप् । गोप्य एव जनो गोपीजनः सुरक्तश्चासौ गोपीजनश्च सु० गीतानां निस्वनः गीतनिस्वनः सुरक्तगोपीजनस्य गीतनिस्वनः सुरक्तगोपीजनगीतनिस्वनस्तस्मिन् सु० । अत्तुमिच्छा जिघत्सा तां जिघत्साम् अतिशयेन बह्वी भूयसी तां भूयसीं मृगाणां भार्या मृग्यः। मृगीनां कम्दबकं मृ० । इति वृत्तार्थः ॥ ३३ ॥

असावनास्थापरयाऽवधीरितः सरोरुहिण्या शिरसा नमन्नपि ।
उपैति शुष्यन्कलमः सहाम्भसा मनोभुवा तप्त इवाभिपाण्डुताम् ॥ ३४ ॥

असा० व्याख्या । हे अर्जुन ! **असौ** अयं **कलमः** शालिविशेषः **अम्भसा** पानीयेन **सह** सार्धं **शुष्यन्** शोषं गच्छन् सन् **अभिपाण्डुतां** समन्तात् श्वेतत्वम् **उपैति** प्राप्नोति कलमः किंकुर्वन् ? **शिरसा** अग्रमस्तकेन नमन् प्रणमन्न**पि** किं० कलमः ? **अनास्थापरया** अनादरतत्परया **सरोरुहिण्या** कमलिन्या **अवधीरितोऽ**वगणितः किं० कलमः ? उत्प्रेक्ष्यते **मनोभुवा** कन्दर्पेन **तप्तोऽ**भितप्त इव **स्थितः** यथा कश्चित् कामातुरो नायकोऽनादरवत्या कयाचित् नायिकया मूर्ध्ना प्रणमन्नपि अवज्ञातः सन् मित्रेण सह शुष्यन् मनोभुवा तप्तः सन् विरहेण विच्छायतां प्राप्नोति तद्वदित्यर्थः[१] । अथ समासः । न आस्था अनास्था अनास्थायां परा अनास्थापरा तया अ० । सरसि रुहति इति सरोरुहिणी तया स० । नमतीति नमन् शुष्यतीति शुष्यन् मनसि भवतीति मनोभूस्तेन म० । पाण्डोर्भावः पाण्डुता अति समन्तात् पाण्डुता अतिपाण्डुता ताम० । इति वृत्तार्थः ॥३४॥

अमी समुद्धूतसरोजरेणुना हृता हृतासारकणेन वायुना ।
उपागमे दुश्चरिता इवापदां गतिं न निश्चेतुमलं शिलीमुखाः ॥ ३५ ॥

अमी० व्याख्या । हे पार्थ ! **अमी** पुरोवर्तिन एते **शिलीमुखाः** भ्रमराः 'शिलीमुखोऽलौ बाणे च' इति *हैमानेकार्थः* [४-४६] । **गतिं** गन्तव्यदेशं 'गतिर्वहद्व्रणे ज्ञाने यात्रोपायदशाध्वसु' इति *हैमानेकार्थः* [२-१६३] । **निश्चेतुं** निश्चयं कर्तुं **न अलं** न समर्था बभूवुः क्व गन्तव्यमिति मार्गं न ददृशुरित्यर्थः । के इव ? दुश्चरिता **इव** यथा **दुश्चरिता** दुष्टकर्मिणश्चौरादय **आपदां** कष्टानाम् **उपागमे** आविर्भावे राजभये प्राप्ते सति वयं क्व याम इति **गतिं** मार्गं निश्चेतुं नालं समर्था न **भवन्ति** न जानन्तीत्यर्थः । भ्रमरपक्षे वायोः सार्वत्रिकत्वेन अन्धत्वात् अनिश्चयः । चौरपक्षेऽपि भयान्धत्वात् इति भावः । किं० शिलीमुखाः ? **वायुना** समीरणेन **हृता** आकृष्टाः कविना वायुस्त्रिधा वर्ण्यते शीतो मन्दः सुगन्धश्चेति । वायुना किं० ? **समुद्धूतसरोजरेणुना** प्रसारितपद्मधूलिना 'रेणुर्धूल्यां पर्पटके' इति *हैमानेकार्थः* [२-१५०] । एतेन सौरभ्योक्तिः । पुनः किं० ? **हृतासारकणेन** गृहीतजललवेन 'आसारो वेगवान् वर्षः' इति *हैमः* [१५६] एतेन शीतलतोक्तिः । अथ समासः । सरोजानां रेणुः सरोजरेणुः समुद्धूतः

---

१. अत्र 'अनास्थापरया' इति प्रकृतसरोरुहिणीविशेषणसामर्थ्यादप्रस्तुतनायिकाप्रतीतेः समासोक्तिः । उत्तिष्ठमानायाः सरोरुहिण्याः प्रतीयमानया नायिकया शुद्धभेदेऽप्यभेदलक्षणातिशयोक्तिमहिम्नावधीरणक्रियासंबन्धान्निर्वहन्ती मनोभुवा तप्त इवेत्युत्प्रेक्षा निर्वाहिकेत्यतिशयोक्त्यनुप्राणितसमासोक्त्युपमयोरङ्गाङ्गिभावेन संकरः -म. ।

सरोजरेणुर्येन स समुद्धूतसरोजरेणुस्तेन स० । आसाराश्च कणाश्च आसारकणाः हता आसारकणा येन स हतासारकणस्तेन ह० । दुष्टं चरितं येषां ते दुश्चरिताः । इति वृत्तार्थः ॥ ३५ ॥

मुखैरसौ विद्रुमभङ्गलोहितैः शिखाः पिशङ्गीः कलमस्य बिभ्रती ।
शुकावलिर्व्यक्तशिरीषकोमला धनुःश्रियं गोत्रभिदोऽनुगच्छति ॥ ३६ ॥

मुखैः व्याख्या । हे अर्जुन ! **असौ** इयं **शुकावलिः** कीरश्रेणिः **गोत्रभिदः** इन्द्रस्य **धनुःश्रियं** चापशोभाम् **अनुगच्छति** अनुकरोति नानावर्णत्वादिन्द्रधनुरिव भातीत्युपमालंकारः । इन्द्रधनुषा साम्यं कथं शुकावल्यास्तदेवाह-किं कुर्वती शुकावलिः ? **मुखैर्**वदनैः कृत्वा **पिशङ्गीः** पीताः **कलमस्य** शालिविशेषस्य **शिखाः** शाल्यग्रभागान् **बिभ्रती** धारयन्ती किं० मुखैः ? **विद्रुमभङ्गलोहितैः** प्रवालखण्डवत् रक्तैः 'भङ्गस्तरङ्गे भेदे च' इति *हैमानेकार्थः* [२-३७] । किं० शुकावलिः ? **व्यक्तशिरीषकोमला** विकसित-शिरीषपुष्पवर्णा अत एव कोमला मनोहरा नीलवर्णत्वात् शिरीषवृक्षपुष्पसदृशीत्यर्थः । अथ समासः । विद्रुमस्य भङ्गो विद्रुमभङ्गो विद्रुमभङ्गवत् लोहितानि तैः वि० । शुकानाम् आवलिः शु० । व्यक्तं च तत् शिरीषं च व्यक्तशिरीषं व्यक्तशिरीषवत् कोमला व्य० । धनुषः श्रीः धनुःश्रीस्तां ध० । गोत्रान् भिन्नतीति गोत्रभित् तस्य गो० । इति वृत्तार्थः ॥ ३६ ॥

इति कथयति तत्र नातिदूरादथ ददृशे पिहितोष्णरश्मिबिम्बः ।
विगलितजलभारशुक्लभासां निचय इवाम्बुमुचां नगाधिराजः ॥ ३७ ॥ (पु.)

इति० व्याख्या । **अथा**नन्तरं **तत्र** तस्मिन् पूर्वोक्ते यक्षे **इति** अमुना प्रकारेण मार्गे **कथयति** वदति सति अर्जुनेन **नातिदूरात्** अनतिदूरात् ईषद्दूरादित्यर्थः । **नगाधिराजो** हिमवान् **ददृशे** दृष्टः किं० नगाधिराजः ? **पिहितोष्णरश्मिबिम्बः** आच्छादितसूर्यमण्डलः इत्यनेन [उन्नतिः] कथिता । पुनः किं० न० ? उत्प्रेक्ष्यते **विगलितजलभारशुक्लभासां** गततोयातिशयश्वेतत्विषाम् **अम्बुमुचां** मेघानां **निचयः** समूह **इव** निर्जलमेघराशिसदृश इव दृष्ट इति भावः । अथ समासः । कथयतीति कथयन् तस्मिन् कथयति । अतिशयेन दूरम् अतिदूरं न अतिदूरं नातिदूरं तस्मात् ना० । उष्णा रश्मयो यस्य स उष्णरश्मिः तस्य बिम्बम् उष्णरश्मिबिम्बं पिहितमुष्णरश्मिबिम्बं येन स पि० । विगलितो जलभारो येषां ते विगलितजलभाराः शुक्ला भासो येषां ते शुक्लभासः विगलितजलभाराश्च शुक्लभासश्च विगलितजलभारशुक्लभासस्तेषां विग०, यद्वा जलानां भारो जलभारः विगलितश्चासौ जलभारश्च विगलितजलभारः तेन शुक्ला भासो येषां ते विगलितजलभारशुक्लभासस्तेषां विग० । अम्बूनि मुञ्चन्तीति अम्बुमुचस्तेषाम् अ० । नगेषु अधिकं राजते इति नगाधिराजः । यद्वा अधिको राजा अधिराजः नगानाम् अधिराजो न० । पुष्पिताग्राछन्दस्तस्य चेदं लक्षणम् 'अयुजिनयुगरेफतोयकारो युजि च नजौजरगाश्च पुष्पिताग्रा' इति *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥३७॥

तमतनुवनराजिश्यामितोपत्यकान्तं नगमुपरि हिमानीगौरमासाद्य जिष्णुः ।
अपगतमदरागस्यानुसस्मार लक्ष्मीमसितमधरवासो बिभ्रतः सीरपाणेः ॥ ३८ ॥ (मा.)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *शरद्वर्णनो* नाम चतुर्थः सर्गः ।

'तम०' व्याख्या । **जिष्णुरर्जुनस्तं** नगाधिराजं हिमालयम् **आसाद्य** प्राप्य **सीरपाणेः** हलायुधस्य बलभद्रस्य **लक्ष्मीं** शोभाम् **अनुसस्मार** स्मृतवान् किं० सीरपाणेः ? **अपगतमदरागस्य** निवृत्तमदिरारागस्य निर्गतमदजनितरक्तस्य शुभ्रस्येत्यर्थः । 'मदो रेतस्यहङ्कारे मद्ये हर्षेभदानयोः' इति *हैमानेकार्थः* [२-२२८]। पुनः किं० ? **असितं** नीलम् **अधरवासोऽ**धोवस्त्रं जघनाम्बरमित्यर्थः । **बिभ्रतः** बिभ्राणस्य परिदधतः इत्यर्थः। किं० नगम् **?** **उपरि** उपरितनभागे **हिमानीगौरं** हिमसमूहैः शुभ्रं 'चामीकराभं शुभ्रं च गौरमाहुर्मनीषिणः' (४४) इति । पुनः किं० नगम् ? **अतनुवनराजिश्यामितोपत्यकान्तं** महत्कानन-श्रेणिश्यामीकृताधोभूमिभागम् 'अधित्यकोर्ध्वभूमिः स्यादधोभूमिरुपत्यका' इति *हैमः* [१०३५] । बलभद्रसदृशो हिमालयः श्वेतत्वात् बलभद्राधोवस्त्रतुल्यं पर्वतासन्नभूमिप्रान्तम्[1] । अथ समासः । वनानां राजयो वनराजयः न तनवः अतनवः अतनवश्च वनराजयश्च अ० उपत्यस्य कान्ता उपत्यकान्ता अतनुवनराजिभिः श्यामिता उपत्यकान्ता यस्य स अतनुवनराजिश्यामितोपत्यकान्तस्तम् अतनुव० । महान्ति हिमानि हिमान्यः हिमानीभिः गौरः हिमानी गौरस्तं हिमानीगौरम् । मदस्य रागो मदरागः अपगतो मदरागो यस्य यस्माद्वासौ अपगतमदरागस्तस्य अ० । न सितमसितम् । अधरं च तद्वासश्च अधरवासस्तद-धरवासः । बिभर्तीति बिभ्रत् तस्य बिभ्रतः । सीरं पाणौ यस्य सः सीरपाणिस्तस्य सी० । अत्र नेन्द्वादिभ्यश्चेत्यनेन सूत्रेण सप्तम्याः पूर्वनिपातो न । सर्गान्तत्वात् वृत्तभेदः । इदं मालिनीवृत्तं, तदुक्तं *वृत्तरत्नाकरे*- 'न ग म यय युते मालिनी भोगिलोकैः' इति वृत्तार्थः ॥३८॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद्गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गः पयोनिधिमितो विमलः समाप्तः ॥ २ ॥

इति महोपाध्यायश्रीश्रीदेवविजयगणिपादपयोजचञ्चरीकपण्डितधर्मविजयगणिविरचितायां भट्टश्री-भारविकविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य [प्र]दीपिकाभिधानायां वृत्तौ ***शरद्वर्णनो*** नाम चतुर्थः सर्गः ॥ ॥ ऐं नमः ॥

१. अत्र सदृशदर्शनेन सदृशान्तरस्य स्मरणात्स्मरणालंकारः -म.

पञ्चमः सर्गः

अथ हिमवद्वर्णनमारभ्यते; तत्र पञ्चदशभिः श्लोकैः आदिक्रियाकुलकमाह -

अथ जयाय नु मेरुमहीभृतो रभसया नु दिगन्तदिदृक्षया ।
अभिययौ स हिमाचलमुच्छ्रितं समुदितं नु विलङ्घयितुं नभः ॥ १ ॥ (द्रु.)

[का. १६ यावद् द्रुतविलम्बितवृत्तम्]

'अथ०' व्याख्या । **अथा**नन्तरं **सो**ऽर्जुनो **हिमाचलं** हिमाचलनामानं पर्वतम् **अभिययौ** सन्मुखं जगाम हिमाचलमुद्दिश्य गतवानित्यर्थः । किं० हिमाचलम् ? **मेरुमहीभृतो** मेरुपर्वतस्य **जयाय** जेतुं **नु** इति वितर्के, 'नु प्रश्नेऽनुशयेऽतीतार्थे विकल्पवितर्कयोः' इति *हैमानेकार्थः* [४-११] । अथवा नु इति वितर्के (कल्पे) **रभसया** वेगेन हर्षेण वा 'रभसो वेगहर्षयोः' इति *हैमानेकार्थः* [३-७४७] । **दिगन्तदिदृक्षया** दिक्प्रान्तानां द्रष्टुमिच्छया पुनः किं० ? **नु** इति वितर्के **नभो** गगनं **विलङ्घयितुम्** आक्रमयितुं **समुदितं** समुत्पतितमिव **स्थितं** लोकः कोऽपि उन्नतं कमपि पदार्थं जेतुं द्रष्टुं वा विलोकयितुं वा स्वयमुन्नतो भवितुमिच्छतीति तद्वदिति भावः । पुनः किं० ? **उच्छ्रितम्** उन्नतम्[1] । अथ समासः । महीं बिभर्तीति महीभृत् मेरुश्चासौ महीभृत् च मेरुमहीभृत् तस्य मे० । दिशामन्ताः दि० द्रष्टुमिच्छा दिदृक्षा दिगन्तानाम् दिदृक्षा तया दिगन्तदिदृक्षया हिमस्याचलो हिमाचलस्तं हि० । द्रुतविलम्बितं वृत्तं तल्लक्षणं चेदं 'द्रुतविलम्बितमाह नभौभरौ' । इति वृत्तार्थः ॥ १ ॥

तपनमण्डलदीपितमेकतः सततनैशतमोवृतमन्यतः ।
हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा ॥ २ ॥

'तप०' व्याख्या । पुनः किं० हिमाचलम् ? **एकतः** एकस्मिन् पक्षे **तपनमण्डलदीपितं** सूर्यमण्डलेन प्रकाशितं मण्डलशब्देन रविणा सह सामीप्यं लक्ष्यते अतो रविकिरणैरिति नोक्तं पुनः किं० ? **अन्यतो**ऽन्यस्मिन् पक्षे **सततनैशतमोवृतं** सर्वकालं रात्रिभवान्धकारेणाच्छादितम् एकत्र दिवसेन अन्यत्र च रात्र्या सह संगतमिति भावः । अत एव पुनः किं० ? **पुरो**ऽग्रे **हसितभिन्नतमिस्रचयम्** अट्टहासेन निरस्तान्धकारपटलं **गजचर्मणा** गजासुरचर्मणा **अनुगतं** पश्चाद्व्याप्तम् 'अनु लक्षणवीप्सेत्थंभूतभागेषु संनिधौ सादृश्यायामहीनेषु पश्चादर्थसहार्थयोरिति' *हैमानेकार्थः* [४-३०] । एवंविधं शिवमिश्वरमिव स्थितं शिवसदृशो हिमाचलः गजचर्मसदृशम् एकत्र हिमालयान्धकारं शिवहसिततुल्यम् एकत्र सूर्यमण्डलम् इति भावः[2] । अथ समासः । तपनस्य मण्डलं तपनमण्डलं तपनमण्डलेन दीपितः तपनमण्डलदीपितस्तं त० । एकस्मात् इति एकतः सार्वविभक्तिकस्तस् । निशायां भवं नैशं नैशं च तमश्च नैशतमः सततं च तन्नैशतमसा वृतं च स० । अन्यस्मादिति अन्यतः । तमिस्राणां चयः तमिस्रचयः हसितेन भिन्नस्तमिस्रचयो येन स हसितभिन्नतमिस्रचयस्तं ह० । अनु पश्चात् गतः अनुगतः तम् अ० । गजस्य चर्म गजचर्म तेन ग० । इति वृत्तार्थः ॥ २ ॥

---

१. अत्रानिर्धारितानेकफलविशिष्टैन्नत्यगुणनिमित्तोदितादिक्रियोत्प्रेक्षा । सा च व्यञ्जकाप्रयोगात्प्रतीयमानेति संक्षेपः -म. । २. तपनतेजःप्रसारोऽप्यस्य कारणमिव कुत्रचित्परिसमाप्यत इति महत्त्वातिशयोक्तिः -म.

क्षितिनभःसुरलोकनिवासिभिः कृतनिकेतमदृष्टपरस्परैः ।
प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगतामिव शम्भुना ॥ ३ ॥

क्षिति० व्याख्या । पुनः किं० हिमाचलम् ? **क्षितिनभःसुरलोकनिवासिभिः** भूर्भुवःस्वर्लोकनिवासिभिः भुवनत्रयस्थितैर्लोकैरित्यर्थः **कृतनिकेतं** कृतास्पदमित्यर्थः । किं० क्षिति० ? **अदृष्टपरस्परैः** अदृष्टाऽन्योन्यैः विप्रकृष्टत्वात् दूरत्वात् अन्योन्यमपश्यद्भिः इत्यर्थः । पुनः किं० हिमा० ? अत एव उत्प्रेक्ष्यते **शम्भुना** महादेवेन **विभुताम्** आत्मनो[1] वैभवं सामर्थ्यं **प्रथयितुं** ख्यापयितुम् **अभिनिर्मितं** निष्पादितम् **जगताम्** त्रिभुवनानाम् **प्रतिनिधिम्** प्रतिबिम्बमिव स्थितम् अदृष्टपरस्परैरित्यर्थेन महत्त्वविशालत्वे उक्ते सुरलोकनिवासिभिरित्यनेन सर्वलोकानाम् उपभोगक्षमत्वमुक्तम् अत एव त्रैलोक्यश्लाघ्योऽयमपरिच्छेद्यश्च हिमवानिति भावः । अथ समासः । सुराणां लोकः सु० । क्षितिश्च नभश्च सुरलोकश्च क्षितिनभःसुरलोकाः क्षितिनभःसुरलोकेषु निवसन्तीति क्षितिनभःसुरलोकनिवासिनः तैः क्षि० । कृतानि निकेतानि यस्मिन् कृतनिकेतम् । परे च परे च परस्परे अदृष्टाः परस्परे यैस्ते अदृष्टपरस्परास्तैः अ० । [विभोः भावः] विभुता तां विभुताम् । अभिसमन्तात् निर्मितोऽभिनिर्मितस्तम् अ० । इति वृत्तार्थः ॥ ३ ॥

भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना ।
समुदितं निचयेन तडित्वतीं लघयता शरदम्बुदसंहतिम् ॥ ४ ॥

भुज० व्याख्या । पुनः किं० हिमाचलम् ? **निचयेन** शिखरसमुच्चयेन **समुदितं** समुन्नतम् यद्यपि निचयशब्दः शिखरशब्दवाचको न तथापि गिरिवर्णनप्रकरणोक्तत्वात् पाषाणनिचयशृङ्गवाची भवितुमर्हति यथा शृङ्गं शिखरं कूटं इति कूटशब्दः समूहापरपर्यायः अत एव लक्षणा आश्रयणीया अत एव अवाच्यकथने न दूषणमिति निचयेन किं० ? **भुजगराजसितेन** शेषनागवत् धवलेन पुनः किं० नि० ? **नभःश्रिता** आकाशस्पृशा अभ्रंलिहेनेत्यर्थः । पुनः किं० नि० ? **कनकराजिविराजितसानुना** सुवर्णरेखाशोभितभूभागेन पर्वतोऽपि प्रध्वराभूमिः सानुस्त्यते (?) 'स्नुः प्रस्थं सानुः' इति *हैमः* [१०३५] । किंकुर्वता निच० ? **तडित्वतीं** विद्युद्युक्तां **शरदम्बुसंहतिम्** शरत्कालमेघवृन्दं **लघयता** लघूकुर्वता जयता तडिद्युक्तशारदजलतुल्येनेत्यर्थः । शिखरसमुच्चयः शारदमेघतुल्यः श्वेतत्वात् कनकश्रेणिस्तडित्तुल्या पीतत्वादिति भावः । अत्र त्रिभिः विशेषणैः शिखरस्य चास(?)त्वोन्नतत्वपवित्रत्वानि प्रतिपादितानि । अथ समासः । भुजाभ्यां गच्छन्ती भुजगाः भुजगानां राजा भुजगराजः भुजगराजवत् सितः भुजगराजसितस्तेन भु० । नभः श्रयतीति नभःश्रित् तेन न० । कनकस्य राजयः कनकराजयः कनकराजिभिः विराजिता सानवो येन स कनकराजिविराजितसानुस्तेन कन० सानुशब्दः पुंनपुंसकलिङ्गः । तडितो विद्यन्ते अस्यामिति तडित्वती तां त० । शरदि अम्बुदाः शरदम्बुदाः शरदम्बुदानां संहतिः शरदम्बुदसंहतिस्तां श० । इति वृत्तार्थः ॥ ४ ॥

मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः ।
दधतमुच्चशिलान्तरगोपुराः पुर इवोदितपुष्पलता भुवः ॥ ५ ॥

---

१. अत्र 'विभुता' शब्दस्य सर्वव्यापित्वमित्यर्थः अपि चिन्तयितुं शक्यते -संयो. ।

मणि० व्याख्या । पुनः किं० हिमाचलम् ? **पुरो** नगरीरिव **भुवो** भूमिकाः **दधतं** धारयन्तं 'पूः शरीरे नगरे च' इति *हैमानेकार्थः* [१-१२] । किंलक्षणा भुवः ? [**मणिमयूखचया अंशुका**नीव पटकाण्डादीनीव तैः **भासुराः**] दीप्यमानाः पुनः किं० ? **सुरवधूपरिभुक्तलतागृहाः** देवाङ्गनासेवितलतागृहाः पुनः किं० ? **उच्चशिलान्तरगोपुराः** उच्चशिलामध्यप्रतोल्यः 'पूर्द्वारे गोपुरं रथ्याप्रतोलीविशिखाः समाः' इति *हैमः* [९८१] पुनः किं० ? **उदितपुष्पवना** उद्गतकुसुमवनाः 'उदितं तूद्गतोक्तयोः' इति *हैमानेकार्थः* [३-२४२] । नगर्योऽपि एवंविघाः **मणिमयूखचयाश्च अंशुकानि** च तैः **भासुराः** पुनः सुरवधूभिः परिभुक्ताः लताः वल्लयश्च गृहाश्च यासु ताः उच्चानि शिलान्तराकाराणि गोपुराणि पुरद्वाराणि यासु ताः तथा उदितपुष्पवनाश्चेति । अथ समासः । मणीनाम् मयूखाः मणिमयूखाः मणिमयूखानाम् चया मणिमयूखचया मणिमयूखचया एव अंशुकानि मणिमयूखचयांशुकानि मणिमयूखचयांशुकैः भासुराः मणिमयूखचयांशुक-भासुरास्ता म० । सुराणां वधूः सुरवधूः सुरवधूभिः परिभुक्ता लता गृहा इव यासु ताः सू० । दधतीति दधत् तं द० । शिलानामन्तराणि शिलान्तराणि उच्चानि शिलान्तराणि गोपुराणीव यासु ताः उच्चशिला० । उदितानि पुष्पाणां वनानि यासु ताः उ० । इति वृत्तार्थः ॥ ५ ॥

अविरतोज्झितवारिविपाण्डुभिर्विरहितैरचिरद्युतितेजसा ।
उदितपक्षमिवारतनिस्वनैः पृथुनितम्बविलम्बिभिरम्बुदैः ॥ ६ ॥

अवि० व्याख्या । उत्प्रेक्ष्यते पुनः किं० हिमाचलम् ? **अम्बुदै**र्मेघैः **उदितपक्षं** पुनः संजातपिच्छमिव स्थितं पूर्वं छिन्नपक्षस्यापि हिमाचलस्य उज्ज्वलमेघसंयोगात् पुनः पक्षोत्थानमुत्प्रेक्ष्यते 'पक्षो गरुच्छदश्चापि' इति *हैमः* [१३१८] । पक्षाणां मेघानां च कथं तुल्यत्वमित्याह- किं० अम्बुदैः ? **अविरतोज्झितवारि-विपाण्डुभिः** निरन्तरत्यक्तजलेन विशेषपाण्डुरवर्णैः श्वेतवर्णैरित्यर्थः । पुनः किं० ? **अचिरद्युतितेजसा** विद्युत्कान्त्या **विरहितै**र्वियुक्तैः 'तेजस्त्विड्रेतसोर्बले' इति *हैमानेकार्थः* [२-५६८] । अन्यथा पिच्छत्वहानिः स्यात् इति भावः । पुनः किं० ? **आरतनिस्वनै**र्निवृत्तगर्जितैः प्रशान्तशब्दैरित्यर्थः । पुनः किं० ? **पृथुनितम्बविलम्बिभिः** विशालपर्वतमध्यभागेषु लम्बमानैः 'मेखला मध्यभागोऽद्रेर्नितम्बः कटकश्च सः' इति *हैमः* [१०३३] । अथ समासः । अविरतम् उज्झितं वारि यैः ते अविरतोज्झितवारयः विशेषेण पाण्डवः विपाण्डवः अविरतोज्झितवारयश्च ते विपाण्डवश्च अविरतोज्झितवारिविपाण्डवस्तैः अ० । विशेषेण रहिता विरहितास्तैर्विरहितैः । न चिरमचिरम् अचिरं द्युतिर्यस्याः सा अचिरद्युतिः तस्याः तेजः अचिरद्युतितेजः तेन अ० । उदिता पक्षा यस्मिन् स उदितपक्षस्तम् उ० । आरता निस्वना येषां ते आरतनिस्वनास्तैः आ० । पृथवश्च ते नितम्बाश्च पृथुनितम्बाः पृथुनितम्बेषु विलम्बन्ति ते पृथुनितम्बविलम्बिनस्तैः पृ० । अम्बूनि ददति इति अम्बुदास्तैः अम्बुदैः । इति वृत्तार्थः ॥६॥

दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः ।
विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ॥ ७ ॥

दधत० व्याख्या । पुनः किं हिमा० ? **नदीः** सरितो **दधतम्** धारयन्तम् नदीः किम् ? **तटैस्तीरैः**

उपलक्षिता इति शेषः । तटैः किं० ? **आकरिभिः** सुवर्णादिखानिवद्भिः 'स्यादाकरः खनिः खानिः' इति *हैमः* [१०३६] । पुनः किं० तटैः ? **करिभिः** हस्तिभिः **क्षतैः** पीडितैः भग्नैरित्यर्थः । पुनः किं० तटैः ? **समवतारसमैः** तीर्थेष्वविषमैः समोत्तारणमार्गेऽविषमैः सुखारोहावरोहैरित्यर्थः 'अवतारस्तु नद्यादितीर्थेऽवतरणेपि च' इति *हैमानेकार्थः* [४-२३८] । पुनः किं० तटैः ? **असमैः** असदृशैः निरुपमैरित्यर्थः । **नदीः** किं० ? **महिताम्भसः** पूजितजलाः श्लाघ्योदका इत्यर्थः । पुनः किं० ? अत एव **विविधकामहिता** अभीष्टदायित्वादिकेनाभिलाषानुकूलाः । पुनः किं० ? **स्फुटसरोजवनाः** विकसितकमलकाननाः पुनः किं० ? **जवना** वेगवतीः वेगयुक्ता इत्यर्थः[१] । 'जवी जवनस्त्वरिते वेगे' इति *हैमः* [३-४९४] । अथ समासः । आकरो विद्यते येषां तानि आ० तैः आ० । करो विद्यते येषां ते करिणस्तैः क० । समन्तात् अवतीर्यते एभिः समवताराः समवतारेषु समानि स० तैः स० । न विद्यते समो येषां तानि असमानि तैर० । विविधाश्च ते कामाश्च विविधकामाः विविधकामेभ्यो हिताः विविधकामहितास्ता वि० । महितमम्भो यासां ताः महितमम्भसः ता म० । सरोजानां वनानि सरोजवनानि स्फुटानि सरोजवनानि यासां ताः स्फु० । इति वृत्तार्थः ॥ ७ ॥

नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरेण महाश्मनाम् ।
निहित[1]सान्ध्यमयूखमिव क्वचिन्निचितकाञ्चनभित्तिषु सानुषु ॥ ८ ॥

नव० व्याख्या । पुनः किं० हिमाचलम् ? **क्वचित्** कस्मिंश्चित् प्रदेशे **महाश्मनाम्** महामणीनाम् पद्मरागाणां **निकरेण** समूहेन हेतुना **सानुषु** गिरिवरेषु **निहितसान्ध्यमयूखमिव** स्थापितसान्ध्यसमयकिरणमिव स्थितं किं० सानुषु ? **निचितकाञ्चनभित्तिषु** व्याप्तसुवर्णतटेषु सुवर्णभित्तिषु पद्मरागकान्तिप्रसरात् उद्गत-सान्ध्यरागमिव भातीति उत्प्रेक्ष्यते किं० महाश्मनाम् ? **नवविनिद्रजपाकुसुमत्विषां** नूतनविकसितजपाकुसुम-कान्तीनाम् अत एव पुनः किं० ? **द्युतिमतां** कान्तियुक्तानाम् । अथ समासः । जपायाः कुसुमानि जपाकुसुमानि विनिद्राणि च तानि जपाकुसुमानि च विनिद्रजपाकुसुमानि नवानि च तानि जपाकुसुमानि च नवविनिद्रजपाकुसुमानि नवविनिद्रजपाकुसुमानां त्विषो येषां ते नवविनिद्रजपाकुसुमत्विषः तेषां न० । द्युतिर्विद्यते येषां ते द्युतिमन्तस्तेषां द्यु० । महान्तश्च ते अश्मानश्च महाश्मानस्तेषां म० । सन्ध्यायां भवाः सान्ध्याः सान्ध्याश्च ते मयूखाश्च सान्ध्यमयूखा यस्मिन् स निहितसान्ध्यमयूखस्तं नि० । काञ्चनानाम् भित्तयः काञ्चनभित्तयः निचिताः काञ्चनभित्तयः येषु ते निचितकाञ्चनभित्तयस्तेषु नि० । इति वृत्तार्थः ॥८॥

पृथुकदम्बकदम्बकराजितं ग्रथितमालतमालवनाकुलम् ।
लघुतुषारतुषारजलश्च्युतं धृतसदानसदाननदान्तिनम् ॥ ९ ॥

1. विहित० -म. इदं च पाठान्तरम् ।

१. अत्र यमवृत्यनुप्रासभेदात् स्वयमेवालंकारः । अर्थालंकारस्त्वभ्युच्चयः । तस्यातिदुष्करत्वाद्रसपोषोऽपि नाद्रियते । तदुक्तम् - 'प्रायशो यमके चिंत्रे रसवृद्धिर्न मृग्यते' इति -म. ।

पृथु० व्याख्या । पुनः किं० हिमाचलम् ? **पृथुकदम्बकदम्बकराजितं** स्थूलनीपवृक्षसमूहशोभितं 'कदम्बः सर्षपे नीपे कदम्बं निकुरम्बके' इति *हैमानेकार्थः* [३-४३९] । पुनः किं० ? **ग्रथितमालतमालवनाकुलं** बद्धश्रेणितापिच्छवृक्षकाननव्याप्तं 'तापिच्छस्तु तमालः स्यात्' इति *हैमः* [११४६] । पुनः किं० ? **लघुतुषारतुषारजलश्च्युतं** सूक्ष्महिमकणशिशिराम्भःक्षरन्तं 'तुषारो हिमदेशयोः शीकरे हिमभेदे च' इति *हैमानेकार्थः* [३-५५४/५] । पुनः किं० ? **धृतसदानसदाननदन्तिनं** संगृहीतमदवारियुक्तशोभनमुखहस्तिनं 'दामं मतङ्गजमदे रक्षणच्छेदशुद्धिषु' इति *हैमानेकार्थः* [२-२६४] । अथ समासः । कदम्बान्येव कदम्बकाः 'के ने ये का' इत्यनेन सूत्रेण स्वार्थे कप्रत्ययः । कदम्बकानां कदम्बकाः कदम्बकदम्बकाः पृथवश्च ते कदम्बकदम्बकाश्च पृथुकदम्बकदम्बकाः तेन राजितः इति पृथुकदम्बकदम्बकराजितस्तं पृ० । ग्रथिता माला यैस्ते ग्रथितमाला ग्रथितमालाश्च ते तमालाश्च ग्रथितमालतमालाः ग्रथितमालतमालानां वनानि ग्र० । ग्रथितमालतमालवनैः आकुलः ग्रथितमालतमालवनाकुलस्तं ग्र० । यद्वा तमालानां वनानि तमालवनानि ग्रथितामाला यैस्तानि ग्रथितमालानि ग्रथितमालानि च तानि तमालवनानि ग्र० । ग्रथितमालतमालवनैः आकुलः ग्रथितमालतमालवनाकुलस्तं ग्र० । लघवस्तुषारा यस्य तत् लघुतुषारम् । तुषाराणां जलं तुषारजलं लघुतुषारं च तत् तुषारजलं च लघुतुषारतुषारजलं लघुतुषारजलं श्च्योततीति लघुतुषारतुषारजलश्च्युत् तं ल० । सह दानेन वर्तत इति सदानं सत् आननं येषां ते सदाननाः सदानाश्च ते सदाननाश्च ते सदानसदाननाः दन्ता विद्यन्ते येषां ते दन्तिनः सदानसदाननाश्च ते दन्तिनश्च सदानसदाननदन्तिनः धृताः सदानसदाननदन्तिनो येन स धृतसदानसदाननदन्ती तं धृ० । यद्वा सन्ति च तानि आननानि च सदाननानि च दानैः सह वर्तमानानि सदाननानि, सदानानि च तानि सदाननानि च सदानसदाननानि धृतानि सदानसदाननानि यैस्ते धृतसदानसदाननाः धृतसदानसदानना दन्तिनो यस्मिन् स धृतसदानसदाननदन्ती तं धृ० । इति वृत्तार्थः ॥९॥

रहितरत्नचयान्न शिलोच्चयानपलताभवना न दरीभुवः ।
विपुलिनाम्बुरुहा न सरिद्वधूरकुसुमान् दधतं न महीरुहः ॥१०॥

रहित० व्याख्या । पुनः किं० हिमाचलम् ? **रहितरत्नचयान्** रत्नराशिरहितान् **शिलोच्चयान्** शिखराणि **न दधतं** न धारयन्तं पुनः किं० हिमाचलम् ? **अपलताभवना** लतागृहरहिता **दरीभुवो** गुहाप्रदेशान् न दधतं लतागृहयुक्ताः दरीभुवो बिभ्राणमिति भावः । 'दरी स्यात् कन्दर' इति *हैमः* [१०३३] । पुनः किं० हिमाचलम् ? **विपुलिनाम्बुरुहाः** तटकमलरहिताः **सरिद्वधू**र्नदीवधूर्न दधतम् अत्र नदीनां भार्यौपम्यात् पुलिनं जघनस्थानीयम् अम्बुरुहाणि मुखस्थानीयानीतिभावः । पुनः किं० हिमाचलम् ? **अकुसुमान्** पुष्परहितान् **महीरुहो** वृक्षान् न दधतं पुष्पसहितान् वृक्षान् धारयन्तमित्यर्थः । रत्नादियुक्तानेव शिलोच्चयादीन् धारयन्तमिति भावः । अथ समासः । रत्नानां चया रत्नचया रहिता रत्नचया यैस्ते रहितरत्नचयास्तान् र० । यद्वा रत्नचयै रहिता रहितरत्नचयास्तान् र० । शिलानामुच्चयाः शिलोच्चयास्तान् शि० । लतानां भवनानि लताभवनानि अपगतानि लताभवनानि याभ्यस्ता अपलताभवनास्ता अ० । दरीणां भुवः दरीभुवः ता द० । पुलिनानि च अम्बुरुहानि च पुलिनाम्बुरुहानि विगतानि पुलिनाम्बुरुहाणि यासां

याभ्यां वा ताः विपुलिनाम्बुरुहास्ताः वि० । सरितो वधूः सरिद्वधूः ताः स० । न विद्यन्ते कुसुमानि येषु ते अकुसुमास्तान् अ० । दधतीति दधत् तं दधतं मह्यां रुहन्तीति महीरुहस्तान् म० । इति वृत्तार्थः ॥१०॥

व्यथितसिन्धुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः ।
फणभृतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः ॥११॥

व्यथि० व्याख्या । पुनः किं० हिमा० ? **अमरलोकवधूजघनैः** क्रीडत्सुरसुन्दरीजघनैः देवाङ्गनाकटिपुरोभागैः 'नितम्बारोहौ स्त्रीकट्याः पश्चात् जघनमग्रतः' इति *हैमः* [६०८] । शनैः शनैर्मन्दं मन्दं **व्यथितसिन्धुं** क्षोभितसरितं जलक्रीडायां पराहतनदीकमित्यर्थः । एतेन अयमपरः सुरलोको दर्शितः किं० अमरलोकवधूजघनैः ? **घनैः** निबिडैः पुनः किं० ? **अनीरशनैः** कटिमेखलासहितैः पुनः किं० हिमा० ? **फणभृतां** सर्पाणां **कुलैः** समूहैः **अभितः** समन्तात् **ततं** व्याप्तं किं० कुलैः ? **दयितरम्यलताबकुलैः** वल्लभमनोहरकेसरैः 'बकुलः केसरः' इति *हैमः* [११३४] । पुनः किं० हिमा० ? **विततं** विस्तीर्णम् । अथ समासः । व्यथिताः सिन्धवो यस्य स व्यथितसिन्धुस्तं व्य० । निर्गता रशना येषां तानि नीरशनानि न नीरशनानि अनीरशनानि तैर० । अमराणां लोको अमरलोकः अमरलोकस्य वधूः अमरलोकवधूः अमरलोकवधूनां जघनानि अमरलोकवधूजघनानि तैः अ० । फणां बिभ्रतीति फणभृतः तेषां फ० पुंस्त्रीलिङ्गः फणशब्दः । लताश्च बकुलाश्च लताबकुलाः रम्याश्च ते लताबकुलाश्च रम्यलताबकुलाः दयिता रम्यलताबकुला येषां तानि दयितरम्यलताबकुलानि तैः द० । इति वृत्तार्थः ॥ ११ ॥

विकचवारिरुहं दधतं सरः सकलहंसगणं शुचि मानसम् ।
शिवमगात्मजया च कृतेर्ष्यया सकलहं सगणं शुचिमानसम् ॥१२॥

विक० व्याख्या । पुनः किं० हिमाचलम् ? **शुचि** निर्मलं **मानसं** मानसनामानं **सरः** सरोवरं दधतं धारयन्तं 'मानसं स्वान्तसरसोः'इति *हैमानेकार्थः* [३-७४७] । किं० मानसम् ? **विकचवारिरुहं** नित्यविकसितकमलं वृत्तिसामर्थ्यात् पुनः किं० मानसम् ? **सकलहंसगणं** समस्तहंससमूहं यद्वा कलहंससमूहैः सहितं 'कादम्बास्तु कलहंसाः पक्षैः स्युरतिधूसरैः' इति *हैमः* [१३२७] । **च** पुनः किं० हिमाचलम् ? **शिवं** महादेवं दधतं किं० शिवम् ? **अगात्मजया** पार्वत्या सह **सकलहं** प्रणयकलहयुक्तं सविवादमित्यर्थः । 'कलहो भण्डने खड्गकोशे समरराढयोः' इति *हैमानेकार्थः* [३-७५७] । किं० अगात्मजया ? **कृतेर्ष्यया** कुतश्चित्कारणात् विहितकोपया पुनः किं० शिवम् ? **सगणं** प्रमथादिगणयुक्तं 'गणः प्रथमसङ्ख्ययोः समूहे सैन्यभेदे' इति *हैमानेकार्थः* [२-१३६] । पुनः किं० शिवम् ? **शुचिमानसं** निर्मलचित्तम् अविद्यानिर्मुक्तमित्यर्थः । एतेन मानससरःशिवधारणलक्षणेन सकलशैलस्य वन्द्यत्वमुक्तमिति भावः । अथ समासः । विकचानि वारिरुहाणि यस्मिन् तत् वि० । हंसानां गणाः हंसगणाः सकला हंसगणा यस्मिन् तत् स० । यद्वा कलहंसानां गणाः कलहंसगणाः कलहंसगणैः सह वर्तते इति स० । अगस्यात्मजा अगात्मजा तया अ० । कृता ईर्ष्या यया सा कृतेर्ष्या तया कृ० । कलहेन सह वर्तमानः सकलहस्तं स० । गणैः सह वर्तते इति सगणस्तं स० । शुचि मानसं यस्य स

शुचिमानसस्तं शु० । इति वृत्तार्थः ॥१२॥

ससुरचापमनेकमणिप्रभैरपपयोविशदं हिमपाण्डुभिः ।
अविचलं शिखरैरुपबिभ्रतं ध्वनितसूचितमम्बुमुचां चयम् ॥१३॥

ससु० व्याख्या । पुनः किं० हिमा० ? **शिखरैः** शृङ्गैः **अम्बुमुचां** मेघानां **चयं** समूहम् **उपबिभ्रतं** धारयन्तं शिखरैः किं० ? **अनेकमणिप्रभैः** असङ्ख्यातरत्नकिरणैः पुनः किं० ? **हिमपाण्डुभिः** तुषारेण स्नुतैः किं० अम्बुमुचां चयम् ? **ससुरचापम्** इन्द्रधनुर्युक्तं पुनः किं० चयम् ? **अपपयोविशदं** गतजलत्वादुज्ज्वलं पुनः किं० चयम् ? **अविचलं** दैवान्निश्चलम् अत एव शिखरसदृशो मेघसमूहोऽभूदित्यर्थः । पुनः किं० चयम् ? **ध्वनितसूचितं** गर्जितेन ज्ञापितम् । अथ समासः । सुरस्य चापं सुरचापं सह सुरचापेन वर्तते सः ससुरचापस्तं स० । मणीनां प्रभा मणिप्रभा न एका अनेका अनेका मणिप्रभा येषां ते अनेकमणिप्रभाः तैः अ० । अपगतानि पयांसि यस्मात्स अपपयाः अपपयाश्च विशदश्च अपपयोविशदस्तम् अ० । हिमैः पाण्डवः हिमपाण्डवः तैर्हि० । उपबिभर्तीति उपबिभ्रत् तम् उ० । विशेषेण चलो विचलः न विचलो अविचलस्तम० । ध्वनितेन सूचितो ध्वनितसूचितस्तं ध्व० । अम्बूनि मुञ्चन्तीति अम्बुमुचः तेषाम० । इति वृत्तार्थः ॥१३॥

ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना ।
मुहुरनुस्मरयन्तमनुक्षपं त्रिपुरदाहमुमापतिसेविनः ॥१४॥

ग्रह० व्याख्या । पुनः किं० हिमाचलम् ? **औषधिजेन** औषधिसमुत्थेन **कृशानुना** अग्निना **उमापतिसेविनः** ईश्वरसेवकान् प्रमथादिगणान् **अनुक्षपं** रात्रिं रात्रिं प्रति **त्रिपुरदाहं** त्रिपुरदैत्यदाहं **मुहु**र्वारंवारम् **अनुस्मरयन्तं** स्मारकम् लोके 'संभरावतो छै' किं० कृशानुना ? **दिवं** गगनम् **अभितो**ऽभिमुखं 'ग्रहविमान-गणान्' **ग्रहा**श्चन्द्रादयो **विमानानि** देवयानानि च 'विमानं देवतायाने सप्तभूमिगृहेऽपि च' इति *हैमानेकार्थः* [२-४०९] । तेषां **गणान्** समूहान् **ज्वलयता** प्रदीपयता देदीप्यमानान् कुर्वता इत्यर्थः । त्रिपुरदाहेष्वेवं लक्षणमभूदित्यर्थः[1] । अथ समासः । ग्रहाश्च विमानानि च ग्रहविमानानि ग्रहविमानानां गणाः ग्रहविमानगणास्तान् ग्र० । ज्वलयतीति ज्वलयन् तेन ज्वलयता औषध्या जात औषधिजस्तेन औ० । अनुस्मरयतीति अनुस्मरयन् तमनु० । क्षपां क्षपाम् अनु इति अनुक्षपम् । त्रयाणां पुराणां समाहारस्त्रिपुरं त्रिपुरस्य दाहः त्रिपुरदाहस्तं त्रि० । उमायाः पतिः उमापतिः उमापतिं सेवन्ते ते उमापतिसेविनस्तान् उ० । इति वृत्तार्थः ॥१४॥

विततशीकरराशिभिरुच्छ्रितैरुपलरोधविवर्तिभिरम्बुभिः ।
दधतमुन्नतसानुसमुद्धतां धृतसितव्यजनामिव जाह्नवीम् ॥१५॥

वित० व्याख्या । पुनः किं० हिमाचलम् ? **जाह्नवीं** जह्नुपुत्रीं गङ्गां **दधतं** धारयन्तं किं०

१. अत्र 'कविसंमतसादृश्यात् स्मृतिः' इति स्मरणालंकारः ।

जाह्नवीम् ? **अम्बुभिः** जलैः कृत्वा **धृतसितव्यजनां** गृहीतश्वेतचामरामिव स्थितामिति शेषः। अत एव उत्प्रेक्ष्यते चामरसादृश्यप्रतिपादनार्थम् अम्बुविशेषणे आह- । किं० अम्बुभिः ? **विततशीकरराशिभिः** विस्तारितजलकणसमूहैः पुनः किं० ? **उच्छ्रितैः** विवर्तैः उन्नतैरित्यर्थः । पुनः किं० ? **उपलरोधविवर्तिभिः** शिलासंकटनिरुद्धप्रसरतया भ्रमद्भिः पाषाणसंवलनेन पश्चाद्वलितैरित्यर्थः । किं० जाह्नवीम् ? **उन्नतसानुसमुद्धताम्** उच्चस्तरेषु महतीं वहतीमित्यर्थः । अथ समासः । शीकराणां राशयः शीकरराशयः वितताः शीकरराशयो येषां तानि विततशीकरराशीनि तैर्वित० । उपलानां रोध उपलरोध उपलरोधेन विवर्तते इति उपलरोधविवर्तीनि तैरु० । [उन्नताः सानवः उन्नतसानवः तेषु समुद्धता उन्नत०] तां उ० । सितानि च तानि व्यजनानि च सितव्यजनानि धृतानि सितव्यजनानि यया सा धृतसितव्यजना तां धृ० । जह्नोरपत्यं स्त्री जाह्नवी तां जा० । इति वृत्तार्थः ॥१५॥ पञ्चदशभिः कुलकम् ।

अनुचरेण धनाधिपतेरथ नगविलोकनविस्मितमानसः ।
स जगदे वचनं प्रियमादरान्मुखरताऽवसरे हि विराजते ॥१६॥

अनु० व्याख्या । **अथो**ऽनन्तरं 'अथो अथ समुच्चये मङ्गले संशयारम्भाधिकारानन्तरेषु च' इति *हैमानेकार्थः* [६-२७] । **धनाधिपतेः** धनस्वामिनः धनदस्या**नुचरेण** सेवकेन यक्षेण **सो**ऽर्जुन **आदरात्** **प्रियम**भीष्टं **वचनं** वचो **जगदे** गदितः अर्जुनं प्रति अपृष्टेनोक्तमित्यर्थः । सः किं० ? **नग-विलोकितविस्मितमानसः** हिमाचलदर्शनेन कुतूहलचेताः अपृष्टपरिभाषणे दोषं परिहरति **हि** यस्मात् कारणात् **मुखरता** वाचालता अपृष्टपरिभाषितापीति यावत् **अवसरे** श्रोतुराकाङ्क्षासमये **विराजते** शोभते आकाङ्क्षितमपृष्टेपि ब्रूयादिति भावः । अथ समासः । अनुचरतीति अनुचरस्तेन अ० । अधिकं पतिः अधिपतिः धनस्य अधिपतिः धनाधिपतिः तस्य ध० । नगस्य विलोकनं नगविलोकनं नगविलोकने विस्मितं मानसं यस्य स न० । मुखरस्य भावो मु० । इति वृत्तार्थः ॥१६॥

अलमेष विलोकितः प्रजानां सहसा संहतिमंहसा विहन्तुम् ।
घनवर्त्म सहस्रधा कुर्वन् हिमगौरैरचलाधिपः शिरोभिः ॥ १७ ॥ (औ०)

अल० व्याख्या । हे अर्जुन ! एषोऽयम् **अचलाधिपः** हिमाचलः **विलोकितो** दृष्टमात्रः सन् **सहसा** शीघ्रं **प्रजानां** लोकानाम् **अंहसां** पातकानां **संहतिं** समूहं **विहन्तुं** स्फेटयितुम् **अलं** समर्थः 'अलं निवारणे अलंकरणसामर्थ्ये पर्याप्तिष्ववधारणे' इति *हैमानेकार्थः* [५-३६/७] । अचलाधिपः किंकुर्वन् ? **हिमगौरैः** तुषारेण शुभ्रैः **शिरोभिः** शिखरैः **घनवर्त्म** मेघमार्गं **सहस्रधा** अनेकप्रकारं **कुर्वन्** विद**धन्निवे**त्युत्प्रेक्षा विपाटयन्नि**वेत्यर्थः** । एतेन शिखराणां सहस्रमस्तीत्युक्तम् । अथ समासः । घनानां वर्त्म घन० । सहस्रैः प्रकारैः सहस्रधा । हिमेन गौराणि हिमगौराणि तैः हि० । अचलानामधिपोऽ-चलाधिपः । औपछन्दसिकं वृत्तं तल्लक्षणं चेदं-पर्यन्ते यौं तथैव शेषं चौपच्छन्दसिकं सुधीभिरुक्तं *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥१७॥

इह दुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम् ।
अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिः परम् ॥ १८ ॥ (क्ष०)

इह० व्याख्या । **इह** अस्मिन् पर्वते बुधा इति शेषः । **असुतरं** दुस्तरम् अतिदुर्ज्ञेयमित्यर्थः । **अन्तरं** मध्यभागं पुरुषेत्वरं तत्त्वं **दुरधिगमैः** दुर्ज्ञयैः **आगमैः** पुराणादिभिः **किंचिदेव** स्तोकमेव, न समस्तं **सततं** सर्वदा **वर्णयन्ति** स्तुवन्ति न तु कदाचित्प्रत्यक्षेण निःशेषं ज्ञातुं शक्यत्वात्किंचिदितिभावः । किन्तु **अमुं** पर्वतं हिमालयं **परं** केवलं **पद्मयोनिः** ब्रह्मा एव **वेद** जानाति नान्यः कश्चित् कथंभूतम् अमुम् ? **अतिविपिनम्** अत्यन्तगह्वरम् अतिगहनमित्यर्थः । पुनः किं० ? **दिग्व्यापिनं** व्याप्तककुभवलयं कमिव ? **परं** प्रकृष्टं **पुरुषं** नारायणमिव 'परो दूरान्यश्रेष्ठशत्रुषु परन्तु केवले' इति *हैमानेकार्थः* [२-४२५] । यथापरं पुरुषं नारायणं पद्मयोनिरेव जानाति नान्यः कश्चित्पुनः परं पुरुषं किं० ? अतिविपिनम् अत्यन्तगहनं दुर्ज्ञेयमित्यर्थः । पुनः किं ? दिग्व्यापिनम् उक्तं च–

जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्तके । ज्वालामालाकुले विष्णुः सर्वं विष्णुमयं जगत् ॥४५॥

इति वचनात् दिग्व्यापी विष्णुः कथ्यते[१] । अथ समासः । दुःखेन अधिगम्यते इति दुरधिगमास्तैर्दुरधिगमैः । सुखेन तीर्यत इति सुतरम् न सुतरं असुतरम् । अतिक्रान्तानि विपिनानि येन स अतिविपिनस्तम् अ० । दिशो व्याप्नोतीति दिग्व्यापी तं दि० । पद्मं योनिर्यस्य स पद्मयोनिः क्षमावृत्तं तदुक्तं *वृत्तरत्नाकरे* 'तुरगरसयतिर्नौततौगः क्षमा' इति वृत्तार्थः ॥ १८ ॥

रुचिरपल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः ।
नयति संततमुत्सुकतामयं धृतिमतीरुपकान्तमपि स्त्रियः ॥ १९ ॥ (द्रु.)

रुचिर० व्याख्या । हे अर्जुन ! **अयं** हिमाचलः **सततं** निरन्तरं **स्त्रियो** नारीः **उपकान्तमपि** भर्तुः समीपेऽपि **उत्सुकताम्** उत्सुकत्वं **नयति** प्रापयति यद्वा **उपकान्तं** कान्तसमीपे **धृतिमतीः** धैर्यवतीः निकटवर्तिनो भर्तॄन् अवगणयन्तीः मानिनीरित्यर्थः । **स्त्रियः** सततमुत्सुकतां नयन्ति तासां स्त्रीणाम् अहंकारग्रन्थिं शिथिलयतीत्यर्थः । 'धृतिर्योगविशेषे स्यात्' 'धारणाधैर्ययोः सुखे संतोषाध्वरयोः' इति *हैमानेकार्थः* [२-१७३] । कैः ? **जलराशिभिः** जलाशयैः तडागादिभिर्जलसमूहैः वा कृत्वा किंलक्षणैः जल० ? **रुचिरपल्लवपुष्पलतागृहैः** मनोहरकिसलयकुसुमवल्लीगेहैः 'रुचिरपल्लवपुष्पलताकुलैः' इति पाठे मनोहर-किसलयकुसुमवल्लीभिर्व्याप्तैः । पुनः किं० जल० ? **उपलसज्जलजैः** स्फुरत्कमलैः उभयत्राप्युद्दीपकत्वादति-शयोक्तिः । अथ समासः । पल्लवाश्च पुष्पाणि च पल्लवपुष्पाणि रुचिराणि पल्लवपुष्पाणि येषां ते रु० । लता एव गृहा लतागृहाः रुचिरपल्लवपुष्पलतागृहा येषु ते रुचिरपल्लवपुष्पलतागृहास्तैः रु० क्वचित् रुचिरपल्लवपुष्पलताकुलैरिति पाठस्तत्र पल्लवाश्च पुष्पाणि च लताश्च पल्लवपुष्पलताः रुचिराश्च पल्लवपुष्पलताश्च रुचिरपल्लवपुष्पलताः रुचिरपल्लवपुष्पलताभिः आकुलाः रुचिरपल्लवपुष्पलताकुलास्तैः रु० । जले जाता इति

१. अत्रोपमायमकयोः संसृष्टिः -म.

जलजानि उपलसन्ति जलजानि येषु ते उपलसज्जलजानि तैः उ० । जलानां राशयो जलराशयः तैर्ज० । उत्सुकस्य भाव उत्सुकता ताम् उ० । धृतिर्विद्यते यासां ता धृतिमत्यस्ता धृ० । कान्तस्य समीपम् उपकान्तं तस्मिन् उ० । इति वृत्तार्थः ॥१९॥

सुलभैः सदा नयवताऽयवता निधिगुह्यकाधिपरमैः परमैः ।
अमुना धनैः क्षितिभृतातिभृता समतीत्य भाति जगती जगती ॥२०॥ (प्रमि०)

सुल० व्याख्या । हे अर्जुन ! **जगती** पृथ्वी **अमुना** अनेन **क्षितिभृता** हिमाचलेन **परमैः** उत्कृष्टैः **धनै** रत्नैः कृत्वा **अतिभृता** अतिशयेन पूर्णा सती **भाति** शोभते किंकृत्वा ? **जगती** स्वर्गलोकपातालललोकौ **समतीत्य** अतिक्रम्य उल्लङ्घ्येत्यर्थः । किं० धनैः ? **नयवता** नीतिवता **अयवता** भाग्यवता च जनेन **सदा** सर्वदा **सुलभैः** सुप्रापैः नान्येनेत्यर्थः । पुनः किं० धनैः ? 'निधिगुह्यकाधिपरमैः' **निधीनां** नवनिधानानाम् । 'महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च चर्चाश्च निधयो नव' इति *हैमः* [१९३] । **गुह्यकानां** च यक्षाणां 'यक्षः पुण्यजनो राजा गुह्यको वटवास्यपि' इति *हैमः* [१९४] । **अधिपं** धनदं रमयन्ति तानीति धनदरमणशीलैरित्यर्थः[1] । अथ समासः । सुखेन लभ्यन्त इति सुलभाः तैः सु० । नयोऽस्यास्तीति नयवान् तेन न० । अयोऽस्यास्तीति अयवान् तेन अयवता निधयश्च गुह्यकाश्च निधिगुह्यकाः निधिगुह्यकानाम् अधिपो निधिगुह्यकाधिपः निधिगुह्यकाधिपं रमयन्ति तानि निधिगुह्यकाधिपरमानि तैः निधि० । क्षितिं बिभर्ति इति क्षितिभृत् तेन क्षि० । प्रमिताक्षरं वृत्तं तल्लक्षणं 'प्रमिताक्षरा सजससैरुदिता' इति *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥२०॥

अखिलमिदममुष्य गौरीगुरोस्त्रिभुवनमपि नैति मन्ये तुलाम् ।
अधिवसति सदा यदेनं जनैरविदितविभवो भवानीपतिः ॥ २१ ॥ (प्रभा)

अखिल० व्याख्या । हे अर्जुन ! अहम् एवं **मन्ये** विचारयामि किं तदित्याह - **इदमेतत् अखिलं** समस्तं **त्रिभुवनं** त्रैलोक्यमपि **अमुष्य** अस्य **गौरीगुरोः** पार्वतीपितुः हिमाचलस्य **तुलां** साम्यं **नैति** न प्राप्नोति कस्मात् ? **यत्** यस्मात् कारणात् **भवानीपतिः** महादेवः **सदा** सर्वदा **एनं** हिमाचलम् **अधिवसति** अस्मिन् पर्वते सदा वसतीति भावः । अतोऽयं धर्मभूमिरित्यर्थः । किं० भवानीपतिः ? **जनैः** लोकैः **अविदितविभवो**ऽज्ञातमहिमा । अथ समासः । गौर्या गुरुः गौरीगुरुस्तस्य गौ० । त्रयाणां भुवनानां समाहारस्त्रिभुवनम् । अविदितो विभवो यस्य स अ० । भवस्त्री भवानी भवान्याः पतिः भ० । **प्रभा** छन्दस्तस्य लक्षणं चेदं 'स्वरशरविरतिर्नौ रौ प्रभा' इति *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥२१॥

वीतजन्मजरसः परं शुचि ब्रह्मणः पदमुपैतुमिच्छताम् ।
आगमादिव तमोपहादितः संभवन्ति मतयो भवच्छिदः ॥२२॥ (र०)

---

१. अत्र धनातिभृतेति पदार्थस्य विशेषणगत्या जगदतिक्रमणहेतुत्वोक्त्या काव्यलिङ्गम् । तस्य यमकेन संसृष्टिः -म. ।

'वीत०' व्याख्या । हे अर्जुन ! **इतः** अस्मात् हिमाचलात् **भवच्छिदः** संसारच्छेदिन्यो **मतयो** बुद्धयः **संभवन्ति** उत्पद्यन्ति न केवलम् इयं भोगभूमिः किन्तु मुक्तिक्षेत्रमपीति भावः । केषाम् **ब्रह्मणः पदं** मुक्तिम् **उपैतुं** प्राप्तुम् **इच्छतां** वाञ्छतां मुमुक्षूणाम् इति शेषः । किं० ब्रह्म० **परं** प्रकृष्टं पुनः किं० **शुचि** निष्कलङ्कं मायानिर्मुक्तं च ब्रह्मणः किं० ? **वीतजन्मजरसः** निवृत्तजन्मजरसः कथंभूतात् इतः ? **तमोपहात्** पापनिवर्तकात् कस्मादिव ? **आगमादिव** यथा आगमात् वेदात् ब्रह्मप्रतिपादकात् भवच्छिदो मतयः तत्त्वज्ञानातिशयाः संभवन्ति क्षेत्रविशेषस्य ज्ञानोपायकत्वादिति भावः । आगमात् किं० ? **तमोपहात्** मिथ्याज्ञाननिवर्तकात् अविद्यानिवर्तकाद्वा 'तमो राहौ गुणे पापे ध्वान्ते' इति *हैमानेकार्थः* [२-५६८] । अथ समासः । जन्म च जरा च जन्मजरसौ वीते जन्मजरसौ यस्य तत् वीतजन्मजरसं तस्य वीत० । तमोऽपहन्तीति तमोपहस्तस्मात्त० । भवं छिन्दतीति भवच्छिदः । रथोद्धतावृत्तं तल्लक्षणं चेदं 'रान्नराविह रथोद्धता लगौ' इति *वृत्तरत्नाकरे*। इति वृत्तार्थः ॥ २२ ॥

दिव्यस्त्रीणां सचरणलाक्षारागा रागापाते निपतितपुष्पापीडाः ।
पीडाभाजः कुसुमचिताः साशंसं शंसन्त्यस्मिन्सुरतविशेषं शय्याः ॥२३॥ (ज०)

दिव्य० व्याख्या । हे अर्जुन ! **अस्मिन्** हिमाचले **दिव्यस्त्रीणां** देवाङ्गनानां सम्बन्धिन्यः **शय्याः** शयनानि 'तल्पं शय्या शयनीयं शयनं तलिमं च तद्' इति *हैमः* [६८२] । **साशंसं** साभिलाषं **सुरतविशेषं** संभोगविशेषं जात्यैकवचनं सुरतविशेषानित्यर्थः । **शंसन्ति** सूचयन्ति कथयन्तीत्यर्थः । शय्यानां सुरतविशेषसूचकानि विशेषणान्याह- किं० शय्याः ? **सचरणलाक्षारागाः** पादजतुरागसहिताः धेनुकपुरुषायितादिबन्धेषु स्त्रियाः रमणीयतलसंपर्काद्रागाङ्किता इत्यर्थः । 'लाक्षा द्रुमामयो राक्षा रङ्गमाता पलङ्कषा जतु क्षतघ्ना कृमिजा' इति *हैमः* [६८५/६] । पुनः किं० ? शृङ्गारादिसुरतातिशये **निपतितपुष्पापीडा** व्यानतकरणे कान्तानाम् अधोमुखत्वात् पतितकुसुमशेखराः 'आपीडशेखरोत्तंसाऽवतंसाः शिरसः स्रजि' इति *हैमः* [६५४] । अत एव पुनः किं० ? **पीडाभाजः** सुरतजनितव्यथाभाजः मध्ये निम्नतामाश्रयन्त्यः इति भावः । पुनः किं० ? **कुसुमचिताः** पुष्पव्याप्ताः[१] । अथ समासः । दिवि भवा दिव्याः दिव्यानां स्त्रियो दिव्यस्त्रियः तासां दि० । लाक्षाया रागो लाक्षारागः चरणयोर्लाक्षारागः च० चरणलाक्षारागेण सह वर्तते इति स० । रागस्य आपातो रागापातः तस्मिन् रा० । पुष्पाणामापीडाः पुष्पापीडाः निपतिता पुष्पापीडा यासु ताः नि० । पीडां भजन्तीति पीडाभाजः । कुसुमैश्चिता कु० । सह आशंसया वर्तते इति साशंसम् । सुरतस्य विशेषः सुरतविशेषस्तं सु० । शेरत आस्विति शय्याः । जलधरमालाछन्दस्तस्य[२] लक्षणं चेदम् 'अष्टाङ्गैः स्याज्जलधरमाला म्भौ स्मौ' इति *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥२३॥

गुणसंपदा समधिगम्य परं महिमानमत्र महिते जगताम् ।
नयशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुमौषधयः ॥२४॥ (प्रमि०)

---

१. अत्र लाक्षारागादिपदार्थानां सुरतविशेषशंसनं प्रति विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलंकारो यमकेन सृज्यते -म. । २. कान्तोत्पीडा म्भौ स्मौ इत्यप्येतद्वृत्तनाम -म. ।

गुण० व्याख्या । हे अर्जुन ! **अत्र** अस्मिन् हिमाचले **औषधयः** तृणज्योतींषि **ज्वलितुं** प्रकाशितुं **न विरमन्ति** विरामं न प्राप्नुवन्ति निरन्तरं ज्वलन्तीत्यर्थः । अन्यत्र तु रात्रावेव ज्वलन्ति इह तु सदैवेति भावः । किंकृत्वा ? **गुणसंपदा** क्षेत्रगुणसंपदा क्षेत्रगुणोत्कर्षेण वा **परमुत्कृष्टं** व्याधिप्रशमनादिकं **महिमानं** प्रभावं **समधिगम्य** प्राप्य अन्यत्र गिरौ क्षेत्रगुणसम्बन्धादिति । किं० अत्र हि० ? **जगतां** त्रिभुवनानां **महिते** पूजिते 'जगतः' इति पाठे जगद्भिः पूज्यमाने कस्मिन् का **इव** श्रिय इव यथा **श्रियो** लक्ष्म्यो **नयशालिनि** नीतिशोभिनि **अधिपतौ** राज्ञि विषये ज्वलितुं दीपितुं न विरमन्ति सदा दीप्यन्ते सर्वदा प्रकाशवत्यः भवन्तीत्यर्थः । किंकृत्वा ? गुणसंपदा सन्धिविग्रहादिषाड्गुण्यसमृद्ध्या परं प्रकृष्टं महिमानं प्रकाशसामर्थ्यं समधिगम्य आसाद्य किं० अधिपतौ ? जगतां महिते त्रैलोक्यपूजिते । अथ समासः । गुणानां संपद् गुणसंपद् तया गु० । महतो भावो महिमा तं म० । नयेन शालते इति नयशाली तस्मिन् न० । प्रमिताक्षरा वृत्तं तल्लक्षणं चेदं 'प्रमिताक्षरा सजससैरुदिता' इति *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥२४॥

कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलम् ।
इह सिन्धवश्च वरणावरणाः करिणां मुदे सनलदानलदाः ॥२५॥ (प्रमि०)

कुर० व्याख्या । हे अर्जुन ! **इहास्मिन्** पर्वते हिमाचले **कुररीगणः** उत्क्रोशपक्षिणीसमूहः 'अथ उत्क्रोशो मत्स्यनाशनः कुरर' इति *हैमः* [१३३४] । **कृतरवो** विहितशब्दो वर्तते इति शेषः । **च** पुनः **तरवो** वृक्षाः **कुसुमानताः** पुष्पैर्नम्रा वर्तन्ते अनेन पुष्पसमृद्धिर्वर्तते यत्रान्यत्क्रियापदं न श्रूयते तत्रास्ति भवति वर्तते विद्यते परः प्रयुज्यते च पुनः कमलं जलं **सकमलं** पद्मसहितं वर्तते 'कमलं क्लोम्नि भेषजे पङ्कजे सलिले ताम्रे' इति *हैमानेकार्थः* [३-६२१/२] । यद्वा कं जलम् अलम् अत्यर्थं 'कं शीर्षेऽप्सु सुखे' इति *हैमानेकार्थः* [१-५] । **सकमलं** वर्तते च पुनः **सिन्धवो** नद्यः इह **करिणां** गजानां **मुदे** हर्षाय भवन्तीति शेषः । किं० सिन्धवः ? 'वरणावरणाः' **वरणा** वृक्षविशेषाः त एव आवरणमाच्छादनं यासां ताः 'वरणो वरुणद्रुमे' इति *हैमानेकार्थः* [२-२१४] । पुनः किं० ? 'सनलदानलदाः' **सनलदाः** उशीरयुक्ताः 'नलदा मांस्यां नलदमुशीरमकरन्दयोः' इति *हैमानेकार्थः* [३-३२६] । **अनलदाः** संतापच्छेदिन्यश्च यद्वा पदच्छेदे पुनः किं० सिन्धवः ? सनलदाः ससल्लक्यः पुनः किं० ? नलदाः नलं हस्तिनां ग्रासविशेषं ददतीति नलदाः अत्र गिरौ कस्मिन्नपि प्रदेशे उक्तपदार्थवैपरीत्यं नास्तीति भावः। अथ समासः । कुरराणां स्त्रियः कुर्यः कुररीणां गणः कु० । कृतो रवो येन सः कृ० । कुसुमैरानताः कु० । कमलैः सह वर्तमानं सकमलम् । वरणैरावरणं यासां ताः वर० । करा विद्यन्ते येषां ते करिणः तेषां क० । नलदैः सह वर्तमानाः स० अनलवन्तीत्यनलदाः सनलदाश्च ता अनलदाश्च सनलदानलदाः यद्वा सह नलदया वर्तन्ते इति सनलदाः नलं ददति इति नलदाः। प्रमिताक्षरावृत्तं लक्षणं प्रागुक्तम् । इति वृत्तार्थः ॥२५॥

सादृश्यं गतमपनिद्रचूतगन्धैरामोदं मदजलसेकजं दधानः ।
एतस्मिन्मदयति कोकिलानकाले लीनालिः सुरकरिणां कपोलकाषः ॥२६॥ (प्र०)

सादृश्य० व्याख्या । हे अर्जुन ! **एतस्मिन्** समीपवर्तिनि हिमाचले **सुरकरिणां** देवगजानां

कपोलकाषः गल्लबलघर्षणस्थानं वृक्षस्कन्धादि **अकाले** वसन्तव्यतिरिक्तेऽपि काले **कोकिलान्** पुंस्कोकिलान् **मदयति** वाचालयति मदयुक्तान् करोतीत्यर्थः । अत्र वसन्तरूपनिमित्ताभावेऽपि मदाख्यकार्योत्पतिकथनात् विभावनालङ्कारस्तदुक्तं *वाग्भट्टालङ्कारे*–

विनाकारणसद्भावं यत्र कार्यस्य दर्शनम् । नैसर्गिकगुणोत्कर्षभावनात्सा विभावना ॥ ४६ ॥ इति

किं० कपोलकाषः ? **लीनालिः** उपविष्टभ्रमरः पुनः किं० कपोल० ? **मदजलसेकजं** मदवारिसेचनोत्पन्नं मदोदकस्त्रावजमित्यर्थः । **आमोदं** परिमलं **दधानः** धारयन् 'आमोदो गन्धहर्षयोः' इति *हैमानेकार्थः* [३-३१९] । किं० अमोदम् ? **अपनिद्रचूतगन्धैः** विकसिताम्रगन्धैः **सादृश्यं** तुल्यत्वं **गतं** प्राप्तम् । अथ समासः । सदृशस्य भावः सादृश्यम् । अपगता निद्रा येभ्यस्तेऽपनिद्रा अपनिद्राश्च ते चूताश्च अपनिद्रचूताः अपनिद्रचूतानां गन्धः अपनिद्रचूतगन्धस्तैर० । मदस्य जलं मदजलं सेचनं सेकः मदजलस्य सेकः मदजलसेकः मदजलसेकात् जातो म० । लीना अलयो यस्मिन् स लीनालिः । सुराणां करिणः सुरकरिणः तेषां सु० । कष्यतेऽस्मिन्निति काषः कपोलानां काषः क० । प्रहर्षिणीछन्दस्तस्य लक्षणं च 'म्नौजौगस्त्रिदशयतिः प्रहर्षिणीयम्' इति *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥ २६ ॥

सनाकवनितं नितम्बरुचिरं चिरं सुनिनदैर्नदैर्वृतममुम् ।
मता फणवतोऽवतो रसपरा परास्तवसुधा सुधाधिवसति ॥२७॥ (जलो०)

सनाक० व्याख्या । हे अर्जुन ! **सुधा** अमृतम् **अमुं** हिमाचलम् **अधिवसति** आश्रयति अमृतमस्मिन्नेव गिरौ तिष्ठतीत्यर्थः । किं० सुधा ? **अवतो** अधोलोकरक्षकस्य **फणवतः** शेषनागस्य **मता** इष्टा वल्लभेत्यर्थः । पुनः किं० ? **रसपरा** स्वादेनोत्कृष्टा 'रसः स्वादे जले वीर्ये' इति *हैमानेकार्थः* [२-५७३] । पुनः किं० ? **परास्तवसुधा** परित्यक्तभूमिः त्यक्तभूलोकेत्यर्थः । अतोऽन्यत्र महीतले कुत्रापि अमृतं नास्तीत्यर्थः । मेरुप्रतिभटोऽयं गिरिरितिभावः । किं० अमुम् ? **सनाकवनितं** देवाङ्गनासहितं पुनः किं० ? **नितम्बरुचिरं** मध्यभागेन मनोहरं देवाङ्गनानां क्रीडास्थानमित्यर्थः । पुनः किं० ? **सुनिनदैः** श्रव्यशब्दैः गम्भीररवैरित्यर्थः । **नदैः** प्रवाहैः **चिरं** चिरकालं **वृतमा**च्छादितं युक्तमित्यर्थः । अनेन सर्वभोगक्षयत्वमुक्तम्[1] । अथ समासः । नाकस्य वनिता नाकवनिता सह नाकवनिताभिः वर्तमानं सनाकवनितस्तं स० । नितम्बैरुचिरः नितम्बरुचिरः तं नित० । सुष्ठु शोभनो निनदो येषां ते सुनिनदास्तैः सु० । फणास्सन्ति अस्येति फणावान् तस्य फ० । अवति रक्षतीति अवन् तस्य अवतः । रसेन परा रसपरा । परास्ता वसुधा यया सा प० । जलोद्धतगतिश्च्छन्दस्तस्य लक्षणं चेदं 'रसैर्जसजसा जलोद्धतगतिः' इति *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥२७॥

श्रीमल्लताभवनमौषधयः प्रदीपाः शय्या नवानि हरिचन्दनपल्लवानि ।
अस्मिन् रतिश्रमजितश्च सरोजवाताः स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः ॥२८॥ (व०)

१. अत्र प्रस्तुतविशेषणसामर्थ्यादप्रस्तुतमेरुप्रतीतेः समासोक्तिरलंकारः स च यमकेन संसृज्यते -म. ।

श्रीम० व्याख्या । हे अर्जुन ! **अस्मिन्** हिमाचले **सुरसुन्दरीभ्यो** देवाङ्गनाभ्यः **दिवो** देवलोकान् **स्मर्तुं** स्मरणविषयीकर्तुं न **दिशन्ति** न एते पदार्थाः ददति स्वर्गं विस्मारयन्तीत्यर्थः । तत्र विद्यमानपदार्थाना-मिह प्राप्तेरिति स्वर्गादपि अतिशयवानित्यर्थः । एते के पदार्थाः इत्याह-अत्र पर्वते **लताभवनं** वल्लीगृहं **श्रीमत्** शोभावत् मनोज्ञं वर्तते च पुनः **औषधयः** तृणज्योतींषि एव **प्रदीपा** दीपा वर्तन्ते च पुनः **नवानि** नूतनानि **हरिचन्दनपल्लवानि** कल्पवृक्षकिशलयानि **शय्याः** शयनानि वर्तन्ते च पुनः **सरोजवाताः** कमलवायवः **रतिश्रमजितः** संभोगश्रमापहारिणो वर्तन्ते 'रतिः स्मरस्त्रियां रते रागे' इति *हैमानेकार्थः* [२-१८७] । अथ समासः। श्रीरस्यास्ति इति श्रीमत् । लता एव भवनं लताभवनम् । हरिचन्दनस्य पल्लवानि ह० । रतेः श्रमाः रतिश्रमाः रतिश्रमान् जयन्तीति र० । सरोजानां वाता स० । सुराणां सुन्दर्यः सुरसुन्दर्यः ताभ्यः सु० । वसन्ततिलका छन्दस्तल्लक्षणं चेदम् 'उक्ता वसन्ततिलका तभजाजगौगः' इति *वृत्तरत्नाकरे* । इति वृत्तार्थः ॥२८॥

ईशार्थमम्भसि चिराय तपश्चरन्त्या यादोविलङ्घनविलोलविलोचनायाः ।
आलम्बताग्रभुजमत्र[1] भवो भवान्याश्च्योतन्निदाघसलिलाङ्गुलिना करेण ॥२९॥ (व०)

ईशार्थ० व्याख्या । हे अर्जुन ! **अत्र** अस्मिन् पर्वते **भवो** महादेवः **करेण** हस्तेन कृत्वा **भवान्याः** शिवपत्न्याः पार्वत्याः अग्रभुजं हस्ताग्रभागम् **आलम्बत** जग्राह किंकुर्वत्याः भवान्याः ? **ईशार्थं** महादेवार्थं **चिराय** चिरकालम् **अम्भसि तपः** कृच्छ्रादि कर्म **चरन्त्याः** कुर्वत्याः किं० भवान्याः ? अत एव **यादोविलङ्घनविलोलविलोचनायाः** जलजन्तुम् उल्लङ्घनेन चकितेक्षणायाः जलचरजीवेभ्यो भयं प्राप्ताया इत्यर्थः। 'अथ यादांसि नक्राद्याः हिंसका जलजन्तवः' इति *हैमः* [१३४८] । किं० करेण ? **च्योतन्निदाघसलिलाङ्गुलिना** तत्संपर्कवशात् स्रवत्प्रस्वेदोदकबिन्दुकरशाखेन एतेन सात्त्विकोक्तिः[१] ।

'स्तम्भस्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलयः इत्यष्टौ सात्त्विका गुणाः' ॥४७॥ इति

अथ समासः । ईशाय इति ईशार्थम् । चरतीति चरन्ती तस्याः चरन्त्याः । यादसां विलङ्घनं यादोविलङ्घनं यादोविलङ्घनेन विलोलविलोचनायाः यादो० । अग्रश्चासौ भुजश्च अग्रभुजस्तम् अग्रभुजं यद्वा भुजस्य अग्रम् अग्रभुजस्तम् अग्रभुजम् भुजशब्दः पुंस्त्रीलिङ्गः । क्वचिदयाधं (?) परत्वं वक्तव्यमिति । भवस्य स्त्री भवानी तस्याः भवान्याः । निदाघस्य सलिलं निदाघसलिलं च्योतन्निदाघसलिलं यासां ताः च्योतन्निदाघसलिलाः अङ्गुलयो यस्य स च्योतन्निदाघसलिलाङ्गुलिस्तेन च्यो० । वसन्ततिलकावृत्तं तल्लक्षणं प्रागुक्तम् । इति वृत्तार्थः ॥२९॥

येनापविद्धसलिलस्फुटनागसद्मा देवासुरैरमृतमम्बुनिधिर्ममन्थे ।
व्यावर्तनैरहिपतेरयमाहिताङ्कः खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥३०॥ (व०)

1. अग्रकर -म. इदं च पाठान्तरम् । १. अत्राद्भुतातीतवृत्तान्तस्य प्रत्यक्षवदभिधानाद्भाविकालंकारः ।

येन० व्याख्या । हे अर्जुन ! **सोऽयम्** असौ **मन्दराद्रिः** मन्थाचलः **खम्** आकाशम् अत्युच्चतया **व्यालिखन्निव** विदारयन्निव **विभाति** शोभते अयमित्यङ्गुल्या निर्देशः पुरोवर्तिनि पदार्थे किं० अयं मन्दराद्रिः ? **अहिपतेः** मन्थगुणकृतस्य वासुकेः **व्यावर्तनैः** वेष्टनैः **आहिताङ्कः** कृतचिह्नः यतः 'मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम्' इति [भारतवचनात्] सः कः ? येन मन्दराद्रिणा कृत्वा **देवासुरैः** देवदानवैः येषां च विरोधः शाश्वतिक' इति नैकवद्भावः यत एषां कार्ये एव विरोधो न गोव्याघ्रादिवत्शाश्वतिकः इति वचनात् । **अम्बुनिधिः** समुद्रः **अमृतं** पीयूषं **मन्मथे** मथितः मथ्नातेर्धातोर्दुहादित्वाद्द्विकर्मकत्वम् किं० अम्बुनिधिः ? **अपविद्धसलिलस्फुटनागसद्मा** प्रक्षिप्तजलप्रकटपाताले मन्दराद्रिणा मन्थनदण्डकृतेनेति भावः[1] । अथ समासः । अपविद्धं सलिलं यस्य स अ० नागस्य सद्म नागसद्म स्फुटं नागसद्म यस्मिन् स्फु० अपविद्धसलिलश्च स्फुटनागसद्मा च अ० । यद्वा अपविद्धसलिलेन स्फुटं नागसद्म यत्रासौ अ० । देवाश्च असुराश्च देवासुरास्तैर्देवासुरैः । अम्बूनि निधीयन्ते यत्र सोऽम्बुनिधिः । अहीनां पतिः अहिपतिः तस्याहि० । आहितोऽङ्को यस्मिन् स आहिताङ्कः । मन्दरश्चासौ अद्रिश्च मन्दराद्रिः । वसन्ततिलका-वृत्तम् । इति वृत्तार्थः ॥३०॥

नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्त्रैरानीलाभैर्विरचितपरभागा रत्नैः ।
ज्योत्स्नाशङ्कामिह वितरति हंसश्येनी मध्येऽप्यह्नः स्फटिकरजतभित्तिच्छाया ॥३१॥ (कु.)

नीतो० व्याख्या । हे अर्जुन ! **इहास्मिन्** पर्वते **स्फटिकरजतभित्तिच्छाया** स्फटिकरूप्यभित्तिकान्तिः **अह्नो** दिवसस्य **मध्येऽपि** मध्याह्नेऽपि **ज्योत्स्नाशङ्कां** ज्योतिःसंयुक्तनिशाभ्रान्तिं[2] **वितरति** जनयति 'ज्योत्स्ना स्यात् ज्योतिःसंयुक्तनिशि चन्द्रातपेऽपि च' इति *हैमानेकार्थः* [२-२६२] । किं० स्फ० ? **हंसश्येनी** हंसवत् श्वेतवर्णा पुनः किं० स्फ० ? **अशिशिररश्मेः** सूर्यस्य **उस्त्रैः** किरणैः **मुहुरत्यर्थम् उच्छ्रयम्** औन्नत्यं **नीता** प्रापिता संक्रान्तैः किरणैः नीतोच्छ्राया विस्तारितेत्यर्थः । पुनः किं० **आनीलाभैः** ? इषत् कृष्णकान्तिभिः इन्द्रनीलरत्नैः वैडूर्यादिभिः **विरचितपरभागा** तत्संबन्धात् लब्धोत्कर्षा उत्पादितगुणोत्कर्षा इत्यर्थः । 'परभागो गुणोत्कर्षो' इति *हैमः* [१३७५] । अथ समासः । न शिशिरा अशिशिरा अशिशिरा रश्मयो यस्य सः अशिशिररश्मिः तस्य अ० । आ इषत् नीला आभा येषां तानि आनीलाभानि तैरा० । विरचितः परभागो यस्याः सा विर० । ज्योत्स्नायाः शङ्का ज्योत्स्नाशङ्का तां ज्यो० । हंसवत् श्येनी हंसश्येनी । 'वर्णाइनुदात्तोप० धात्तो न [:]' इति श्वेतशब्दात् ङीप् । तकारस्य च नकारः । स्फटिकाश्च रजतानि च स्फटिकरजतानि स्फटिकरजतानां भित्तयः स्फटिकरजतभित्तयः तेषां छाया स्फटिकरजत-भित्तिच्छाया । [कुटीलंछन्दः] इति वृत्तार्थः ॥३१॥

दधत इव विलासशालि नृत्यं मृदुपतता पवनेन कम्पितेषु ।
इह ललितविलासिनीजनभ्रूगतिकुटिलेषु पयःसु पङ्कजानि ॥३२॥ (पु०)

---

१. अत्रौन्नत्यानुपादानेनैव खलेखनोत्प्रेक्षणादनुपात्तगुणनिमित्ताक्रियास्वरूपोत्प्रेक्षा -म. । २. ज्योत्स्नाकृते भ्रान्तिं जनयतीति भ्रान्तिमदलंकारः -म. ।

दध० व्याख्या । हे अर्जुन ! **इहास्मिन्** पर्वते **पङ्कजानि** कमलानि **पयस्सु** जलेषु **विलासशालि नृत्यं दधत इव** सविलासं नृत्यन्तीव विलासैरङ्गप्रत्यङ्गविक्षेपनैर्नृत्यं कुर्वन्तीव इत्यर्थः । किं० पयःसु ? **मृदुपतता** मन्दम् आगच्छता वहता **पवनेन** वायुना **कम्पितेषु** चालितेषु । पुनः किं० ? अत एव **ललितविलासिनीजनभ्रूगतिकुटिलेषु** सुन्दरस्त्रीजनभ्रूभङ्गवक्रेषु । अथ समासः । विलासेन शालते इति विलासशालि । मृदु यथा स्यात् तथा पततीति मृदुपतन् तेन मृ० । विलासिनीनां जनो विलासिनीजनः ललितश्चासौ विलासिनीजनश्च ल० भ्रुवोर्गतिः भ्रूगतिः ललितविलासिनीजनस्य भ्रूगतिः ललितविलासिनी-जनभ्रूगतिः ललितविलासिनीजनभ्रूगतिवत् कुटिलानि ललितविलासिनीजनभ्रूगतिकुटिलानि तेषु ल० । पङ्के जातानि पङ्कजानि । पुष्पिताग्रावृत्तं तल्लक्षणम् 'अयुजिनयुगरेफतोयकारो युजि च न जौ जरगाश्च पुष्पिताग्रा' । इति वृत्तार्थः ॥३२॥

अस्मिन्नगृह्यत पिनाकभृता सलीलमाबद्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरीश्वरायाः स्रस्तोरगप्रतिसरेण करेण पाणिः ॥ ३३ ॥ (व०)

अस्मि० व्याख्या । हे अर्जुन ! **अस्मिन्** पर्वते **पिनाकभृता** श्रीमहादेवेन **सलीलं** सविलासं यथा स्यात्तथा **ईश्वरायाः** पार्वत्याः **पाणिर्**हस्तः निजेन **करेण** हस्तेन कृत्वा **अगृह्यत** गृहीतः गौर्याः पाणिग्रहणं कृतवानित्यर्थः । अनेन श्लोकेन ईश्वरस्य पार्वतीपरिणयवर्णनं कृतम् 'ईशार्थम्भसि' (का. २९) इत्यनेन महादेवस्य पार्वतीविषयोऽनुग्रहश्चोक्तस्तेन नात्र पौनरुक्त्यमिति भावः । किं० पाणिः ? **आबद्धवेपथुः** प्राप्तकम्पः पुनः किं० पाणिः ? **विन्यस्तमङ्गलमहौषधिः** बद्धमङ्गलनिमित्तमदनफलयवाङ्कुरादिः किं० ईश्वरायाः ? **अधीरविलोचनायाः** चकितलोचनायाः सर्पदर्शनात् इति भावः । किं० करेण ? **स्रस्तोरगप्रतिसरेण** गलितसर्पहस्तसूत्रेण शिथिलितोरगवैवाहिकप्रलोष्ठाभरणविशेषेणेत्यर्थः[1] । 'प्रतिसरश्चमूपृष्ठे नियोज्य करसूत्रयोः । मन्त्रभेदे व्रणशुद्धावारक्षे मण्डने स्रजि कङ्कणे' इति *हैमानेकार्थः* [४-२६६] । अथ समासः । पिनाकं बिभर्तीति पिनाकभृत् तेन पि० । सह लीलया वर्तते यत् तत् सलीलम् । आबद्धो वेपथुर्येन स अ० । न धीरे अधीरे अधीरे विलोचने यस्याः सा अधीरविलोचना तस्या अ० । महत्यश्च ताः औषधयश्च महौषधयः मङ्गलार्थं महौषधयः मङ्गलमहौषधयः विन्यस्ता मङ्गलमहौषधयो यस्मिन् स वि० । ईश्वरस्य स्त्रीः ईश्वरा तस्याः ईश्वरायाः । उरग एव प्रतिसरः उरगप्रतिसरः स्रस्तः उरगप्रतिसरो यस्य स स्रस्तोरगप्रतिसरस्तेन स्र० । वसन्ततिलकावृत्तम् इति वृत्तार्थः ॥३३॥

क्रामद्भिर्घनपदवीमनेकवर्णैस्तेजोभिः शुचिमणिजन्मभिर्विभिन्नः ।
उस्राणां व्यभिचरतीव सप्तसप्तेः पर्यस्यन्निह निचयः सहस्रसंख्याम् ॥३४॥ (प्र०)

क्रामद्भिः व्याख्या । हे अर्जुन ! **इहास्मिन्** पर्वते **सप्तसप्तेः** सूर्यस्य **उस्राणां** किरणानां **निचयः** समूहः **पर्यस्यन्** प्रसरन् सन् **सहस्रसङ्ख्यां** दशशतसंख्यां **व्यभिचरति** अतिक्रामतीव उल्लङ्घयतीत्यर्थः । किं० निचयः ? **तेजोभिः** कान्तिभिः **विभिन्नो** मिश्रीभूतः किं० तैः ? **शुचिमणिजन्मभिः** निर्मलरत्नोद्भवैः

१. भाविकमेवालंकारः -म. ।

पुनः किं० तेजोभिः ? **अनेकवर्णैः** असङ्ख्यातनीलरक्तश्वेतपीतादिवर्णयुक्तैः क्वचिद् 'अनेकसंख्यैः' इति पाठस्तत्र अनेकसंख्यैः परसहस्रैः शुचिमणिजन्मभिः स्फटिकरत्नोत्पत्तिभिस्तेजोभिरिति । पुनः किं० तेजोभिः ? **घनपदवी**माकाशं **क्रामद्भिः** व्याप्नुवद्भिः एतावता अत्र पर्वते मणिजैस्तेजोभिः कृत्वा सूर्यस्य सहस्रकिरणेभ्योऽत्यधिकाः किरणा भवन्तीति भावार्थः । अथ समासः । घनस्य पदवी घनपदवी तां घ० । अनेकं वर्णा येषां ते अनेकवर्णानि तैर० । शुचयश्च ते मणयश्च शुचिमणयः शुचिमणिभ्यो जन्म येषां ते शुचिमणिजन्मानि तैः शु० । सप्त सप्तयो यस्य स सप्तसप्तिः तस्य स० । पर्यस्यतीति पर्यस्यन् । सहस्रमिति संख्या सहस्रसंख्या तां स० । प्रहर्षिणी वृत्तं तल्लक्षणं चेदं म्नौज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् इति वृत्तार्थः ॥३४॥

व्यधत्त यस्मिन् पुरमुच्चगोपुरं पुरां विजेतुर्धृतये धनाधिपः ।
स एष कैलास उपान्तसर्पिणः करोत्यकालास्तमयं विवस्वतः ॥३५॥ (वं०)

व्यधत्त० व्याख्या । हे अर्जुन ! **स एषः कैलाशः** रजतगिरिः **उपान्तसर्पिणः** निकटसंचारिणः समीपवर्तिन इत्यर्थः । **विवस्वतः** सूर्यस्य **अकालास्तमयं** मध्याह्नसमये अस्तमयं **करोति**[1] अभ्रंलिहशृङ्गसहस्रसंकटान् गतः सर्वत्र सूर्यो दिवसे अस्तंगत इव दृश्यते एतेन कैलाशस्य उच्चत्वं वर्णितमिति तात्पर्यार्थः । स कः **यस्मिन्** कैलाशे **धनाधिपो** धनदः **पुरां विजेतु**स्त्रिपुररिपोर्महादेवस्य **धृतये** संतोषाय प्रीत्यर्थम् **उच्चगोपुरम्** उन्नतपुरद्वाराम् उच्चप्रतोलिकाम् इति यावत् **पुरम्** अलकाख्यां नगरीं व्यधत्त निर्मितवान् तस्य तत्सखित्वात् इति भावः । अथ समासः । उच्चं गोपुरं यस्यां सा उच्चगोपुरा ताम् उ० । धनानामधिपो ध० । उपान्ते सर्पतीत्येवंशील उपान्तसर्पी तस्य उपान्तसर्पिणः । न कालः अकालः अकाले अस्तमयः अकालास्तमयस्तम् अ० । अस्तमिति मकाराव्ययस्य प्राचुर्यविकार-प्राधान्यादिषु मयट् तदनेन अस्तमयशब्देन षष्ठीसमासः । वंशस्थवृत्तं तल्लक्षणं चेदं 'जतौ तु वंशस्थमुदीरितं जरौ' इति वृत्तार्थः ॥३५॥

नानारत्नज्योतिषां सन्निपातैश्छन्नेष्वन्तःसानु वप्रान्तरेषु ।
बद्धांबद्धां भित्तिशङ्काममुष्मिन्नावानावान्मातरिश्वा निहन्ति ॥३६॥ (शालि०)

नाना० व्याख्या । हे अर्जुन ! **अमुष्मिन्** कैलासपर्वते **मातरिश्वा** वायुः **भित्तिशङ्कां** भित्तिभ्रान्तिं **निहन्ति** स्फेटयति किं० भित्तिशङ्काम् ? **आवान् आवान्** वारंवारम् आगच्छन् ? **अन्तःसानु** पर्वतशिखरेषु **वप्रान्तरेषु** कटकमध्येषु **बद्धाम्** निरन्तरसमुत्पन्नाम् अभीक्ष्णां **बद्धां** दृढोत्पन्नामित्यर्थः । किं० वप्रान्तरेषु ? **नानारत्नज्योतिषां** नानाविधमणिकान्तीनां **सन्निपातैः** समूहेषु **छन्नेषु** आच्छादितेषु । यदा वायुरागच्छति तदा भित्तिभ्रान्तिं निवर्तयतीत्यर्थः[2] । अथ समासः । नानानि च तानि रत्नानि नानारत्नानि नानारत्नानां ज्योतींषि नानारत्नज्योतींषि तेषां ना० । वप्राणामन्तराणि वप्रान्तराणि तेषु व० । भित्तीनां शङ्का भित्तिशङ्का

१. करोतीवेत्युत्प्रेक्षा । वस्तुतस्तु तत्कारणाभावाद् व्यञ्जकाप्रयोगाद् गम्योत्प्रेक्षा सा चोपान्तवर्तितयाऽसंबन्धे संबन्धातिशयोक्त्योत्थापितेति विवेकः -म. । २. अतो निश्चयान्तः संदेहालंकारः -म. ।

तां भि० । मातरि अन्तरिक्षे श्वयति गच्छतीति मातरिश्वा उणादिको नप्रत्ययः । तत्पुरुषे अलुक् शालिनीवृत्तम् इति । वृत्तार्थः ॥३६॥

रम्या नवद्युतिरपैति न शाद्वलेभ्यः श्यामीभवन्त्यनुदिनं नलिनीवनानि ।
अस्मिन्विचित्रकुसुमस्तबकाचितानां शाखाभृतां परिणमन्ति न पल्लवानि ॥३७॥ (व०)

रम्या० व्याख्या । हे अर्जुन ! **अस्मिन्** कैलाशे **शाद्वलेभ्यो** हरिततृणेभ्यो **रम्या** रमणीया **नवद्युति**र्नवकान्तिः **न अपैति** न गच्छति निरन्तरं तृणेभ्यो नीलछाया न निवर्तते इति भावः । किन्तु नित्यशोभाः शाद्वलाः अत्र सन्तीत्यर्थः । **नलिनीवनानि** कमलिनीकाननानि **अनुदिनं** सर्वदा **श्यामीभवन्ति** कृष्णानि भवन्ति न कदाचित्पाण्डुरीभवन्ति इति अर्थः । नित्यं नलिन्योऽत्र सन्तीत्यर्थः । **शाखाभृतां** तरूणां **पल्लवानि** किशलयानि **न परिणमन्ति** न परिपाकं गच्छन्ति कदाचित् न जीर्णानि भवन्तीत्यर्थः । किं० शाखाभृताम् ? **विचित्रकुसुमस्तबकाचितानां** नानाविधपुष्पगुच्छव्याप्तानाम् इह पर्वते सर्वे पदार्थाः सदैव यौवनवन्तः सन्तीत्यर्थः[१] । अथ समासः । नवा चासौ द्युतिश्च नवद्युतिः अश्यामानि श्यामानि भवन्तीति श्यामीभवन्ति । दिनमनु अनुदिनम् । नलिनीनां वनानि नलिनीवनानि । विचित्राणि च तानि कुसुमानि विचित्रकुसुमानि विचित्रकुसुमानां स्तबका विचित्रकुसुमस्तबकाः विचित्रकुसुमस्तबकैराचिता विचित्रकुसुमस्तबकाचितास्तेषां वि० । शाखा बिभ्रतीति शाखाभृतस्तेषां शा० । वसन्ततिलकावृत्तम् । इति वृत्तार्थः ॥ ३७ ॥

परिसरविषयेषु लीढमुक्ताः प्रथमतृणोद्गमशङ्कया मृगीभिः ।
इह नवशुककोमला मणीनां रविकरसंवलिताः फलन्ति भासः ॥३८॥ (पु०)

परि० व्याख्या । हे अर्जुन ! **इहा**स्मिन् कैलासे **मणीनां** मरकतरत्नानां लोके 'पन्नां' इति प्रसिद्धिः **भासः** कान्तयः **रविकरसंवलिताः** सूर्यकिरणैः मिश्रिता मिलिताः सत्यः **फलन्ति** वर्धन्ते । किं० भासः ? **नवशुककोमलाः** कीरशिशुसदृशाः बालशुकवत् नीलवर्णा इत्यर्थः । पुनः किं० भासः ? **परिसरविषयेषु** प्रान्तभूमिदेशेषु 'परिसरः प्रान्तभूदेवतयोर्मृतौ' इति *हैमानेकार्थः* [४-२६९] । क्वचित् 'परिसरविषमेषु' इति पाठस्तत्र परिसराः भूमिभागास्तेषु विषमा विषमभूमिभागास्तेषु । **मृगीभिः** हरिणीभिः **प्रथमतृणोद्गमशङ्कया** नीलतृणाङ्कुराविर्भावभ्रान्त्या **लीढमुक्ताः** गृहीतपरित्यक्ताः पूर्वमास्वादिताः पश्चान्मुक्ताः इत्यर्थः । अथ समासः। परिसरस्य विषयाः परिसरविषयास्तेषु प०। पूर्वं लीढाः पश्चान्मुक्ताः इति लीढमुक्ताः। प्रथमाश्च ते तृणाश्च प्रथमतृणाः प्रथमतृणानामुद्गमः प्रथमतृणोद्गमः प्रथमतृणोद्गमस्य शङ्का प्रथ० तया प्र०। नवाश्च ते शुकाश्च नवशुका नवशुकवत् कोमला न०। रवेः कराः रविकराः रविकरैः संवलिताः र० । पुष्पिताग्रावृत्तम् । इति वृत्तार्थः ॥३९॥

१. अत्र प्रस्तुतस्यैव तत्तद्वस्तुगतकान्तिस्थैर्यरूपकार्यस्य वर्णनात् प्रस्तुतमिव कारणं कश्चिदसाधारणः कैलाशस्य महिमावगम्यत इति पर्यायोक्तिरलंकारः -म. ।

इह सनियमयोः सुरापगायामुषसि सयावकसव्यपादलेखा ।
कथयति शिवयोः शरीरयोगं विषमपदा पदवी विवर्तनेषु ॥३९॥ (पु०)

इह० व्याख्या । हे अर्जुन ! **इहास्मिन्** पर्वते **उषसि** प्रभाते **सुरापगायां** गङ्गायां **विवर्तनेषु** प्रदक्षिणक्रियासु **पदवी** मार्गः **शिवयोः** पार्वतीशङ्करयोः **शरीरयोगं** वपुःसंयोगं शरीरसंगमम् अर्धाङ्गसंघटनारूपसंबन्धमिति यावत् **कथयति** ब्रूते सूचयतीत्यर्थः । किं० शिवयोः ? **सनियमयोः** नियमयुक्तयोः गृहिततत्कालोचितनियमयोरित्यर्थः। उषसि सन्ध्यां प्रणमतोरिति भावः । शिवयोरिति पुमान् स्त्रियेत्येकशेषः शिवयोरिति विरहासहिष्णुत्वं परस्परं सूचितमिति भावः । किं० पदवी ? **सयावकसव्यपादलेखा** अलक्तयुक्तवामचरणरेखा पुनः किं० ? **विषमपदा** असमपादमुद्रा स्त्रीपुरुषसम्बन्धित्वात् ह्रस्वदीर्घपादा ईत्यर्थः । अथ समासः । नियमेन सह वर्तते सनियमः तयोः स० सुराणां आपगा सुरापगा तस्यां सु० । सव्यश्चासौ पादश्च सव्यपादः सव्यपादस्य लेखा सव्यपादलेखा यावकैः सह वर्तमाना सयावका सयावका सव्यपादलेखा यस्यां सा स०। शिवा च शिवश्च शिवौ तयोः शिवयोः । शरीरयोर्योगः शरीरयोगः तं श० । विषमानि पदानि यस्यां सा वि० । पुष्पिताग्रावृत्तं तल्लक्षणं प्रागुक्तम् । इति वृत्तार्थः ॥३९॥

उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसंभवः परागः ।
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम् ॥ ४० ॥ (प्र०)

उत्० व्याख्या । हे अर्जुन ! **अमुष्मात्** अस्मात् दर्शनात् **उत्फुल्लस्थलनलिनीवनात्** विकसितस्थलकमलिनीकाननात् अत्र स्थलग्रहणं जलपतितपरागस्योत्थानासंभवात् **उद्धूतः** उत्थितः **वात्याभिः** वातसमूहैः **वियति** आकाशे **समन्तात्** सर्वतः **विवर्तितो** भ्रमितश्चलितः सन् **सरसिजसंभवः** कमलोत्पन्नः **परागः** पुष्परेणुः अत्र रूढ्यभिप्रायेण सरसिजप्रयोगो दृष्टव्यः यथा अङ्गभूशब्दो मानसपुत्रे वर्तते तथा सरसिजशब्द उपचारात् स्थलकमलेऽपि । **कनकमयातपत्रलक्ष्मीं** सुवर्णछत्रशोभाम् **आधत्ते** धारयति अतिशयेन पुष्णाति[२] इत्यर्थः । अथ समासः । स्थले नलिन्यः स्थलनलिन्यः स्थलनलिनीनां वनं स्थलनलिनीवनम् उत्फुल्लं च तत् स्थलनलिनीवनं च उत्फुल्लस्थलनलिनीवनं तस्मात् उ० । सरसिजेभ्यो संभवो यस्य स स०। वातानां मण्डल्यो वात्यास्ताभिर्वा० । कनकस्वरूपं कनकमयं कनकमयं च तदातपत्रं च कनकमयातपत्रं कनकमयातपत्रस्य लक्ष्मीः कनकमयातपत्रलक्ष्मीस्तां क०। प्रहर्षिणीछन्दः। इति वृत्तार्थः ॥३८॥

संमूर्च्छतां रजतभित्तिमयूखजालैरालोलपादपलतान्तरनिर्गतानाम् ।
घर्मद्युतेरिह मुहुः पटलानि धाम्नामादर्शमण्डलनिभानि समुल्लसन्ति ॥४१॥ (व०)

१. पदवीविशेषणपदार्थयोः कथनं प्रति हेतुत्वोक्त्या काव्यलिङ्गमलंकारः -म. २. अत्र परागस्यातपत्रलक्ष्मीसंबन्धासंभवात्तत्सदृशीं लक्ष्मीमिति प्रतिबिम्बेनाक्षेपादसंभविधर्मसंबन्धेयं निदर्शना -म. अनया कारिकया भारवेः 'आतपत्रभारविः' इति प्रसिद्धिः जाता-संयो. ।

संमूर्च्छं० व्याख्या । हे अर्जुन ! **इहा**ऽस्मिन् पर्वते **घर्मद्युते**र्भानो**र्धाम्नां** तेजसां **पटलानि** वृन्दानि **मुहु**र्वारंवारं **समुल्लसन्ति** स्फुरन्ति देदीप्यमानानि भवन्तीत्यर्थः । समुल्लसन्तीत्यत्र सातत्येन लतानामालोलत्वात् समुल्लास उक्तः । किं० पटलानि ? **आदर्शमण्डलनिभानि** दर्पणबिम्बसदृशानि 'मण्डलो बिम्बदेशयोः' इति *हैमानेकार्थः* [३-६६८] । किं० धाम्नाम् ? **रजतभित्तिमयूखजालैः** रूप्यभित्तिकिरणसमूहैः **संमूर्छतां** बहुलीभूतानां पुनः किं० धाम्नाम् ? **आलोलपादपलतान्तरनिर्गतानां** इषच्चञ्चलवृक्षशाखारन्ध्रप्रसृतानां 'लता ज्योतिष्मती दुर्वाशाखावल्लीप्रियङ्गुषु' इति *हैमानेकार्थः* [२-१८८] । 'अन्तरं रन्ध्रावकाशयोः' इति *हैमानेकार्थः* [३-५०७] । अथ समासः । संमूर्छन्तीति संमूर्छन्तस्तेषां सं० । रजतानां भित्तयो रजतभित्तयः रजतभित्तीनां मयूखाः रजतभित्तिमयूखाः रजतभित्तिमयूखानां जालानि रजतभित्तिमयूखजालानि तैः र० । आ इषल्लोला आलोला पादपानां लताः पादपलताः आलोलाश्च ताः पादपलताश्च आलोलपादपलताः आलोलपादपलतानामन्तराणि आलोलपादपलतान्तराणि आलोलपादपलतान्तरेषु निर्गतानि आलोलपाद-पलतान्तरनिर्गतानि तेषाम् आ० । घर्मा द्युतयो यस्य स घर्मद्युतिस्तस्य घ० । आदर्शस्य मण्डलम् आदर्शमण्डलम् आदर्शमण्डलस्य निभा इव निभा येषां तानि आ० । वसन्ततिलकावृत्तम् । इति वृत्तार्थः ॥४१॥

शुक्लैर्मयूखनिचयैः परिवीतमूर्तिर्वप्राभिघातपरिमण्डलितोरुदेहः ।
शृङ्गाण्यमुष्य भजते गणभर्तुरुक्षा कुर्वन् वधूजनमनःसु शशाङ्कशङ्काम् ॥४२॥ (व०)

शुक्लैः० व्याख्या । हे अर्जुन ! **गणभर्तुः** प्रमथस्वामिनो महादेवस्य **उक्षा** वृषभः **अमुष्या**ऽस्य पर्वतस्य **शृङ्गाणि** शिखराणि **भजते** सेवते आश्रयतीत्यर्थः । उक्षा किंकुर्वन् ? **वधूजनमनःसु** मुग्धस्त्रीजनचित्तेषु **शशाङ्कशङ्कां** चन्द्रभ्रान्तिं **कुर्वन्** उत्पादयन् किं० उक्षा ? **शुक्लै**र्धवलैः **मयूखनिचयैः** तेजःपुञ्जैः **परिवीतमूर्ति**रालिङ्गितदेहः आच्छादितशरीर इत्यर्थः । पुनः किं० उक्षा ? **वप्राभिघातपरि-मण्डलितोरुदेहः** तटक्रीडया वर्तुलीकृतमहच्छरीरः तटाभिघातेन वक्रीकृतगरिष्ठकायः इत्यर्थः । चन्द्रोऽपि उज्ज्वलकिरणवेष्टितो वर्तुलमण्डलाग्रः भवतीति साम्यात् वधूजनचन्द्रभ्रान्तिमुत्पादयतीति भा[१]वः । अथ समासः । मयूखानां निचया मयूखनिचयास्तैर्म० । परिवीता मूर्तिर्यस्य प० । वप्रस्याऽभिघातः वप्राभिघातः उरुश्चासौ देहश्च उरुदेहः वप्राभिघातेन परिमण्डलित उरुदेहो येन स वप्र० । गणस्य भर्ता गणभर्ता तस्य गणभर्तुः । वधूनां जनो वधूजनः वधूजनस्य मनांसि वधूजनमनांसि तेषु वधू० । शशोऽङ्को यस्य शशाङ्कः शशाङ्कस्य शङ्का शशाङ्कशङ्का तां श० । इदमपि वसन्ततिलकावृत्तम् । इति वृत्तार्थः ॥ ४२ ॥

संप्रति लब्धजन्म शनकैः कथमपि लघुनि क्षीणपयस्युपेयुषि भिदां जलधरपटले ।
खण्डितविग्रहं बलभिदो धनुरिह विविधाः पुरयितुं भवन्ति विभवः शिखरमणिरुचः ॥४३॥ (वंश०)

संप्रति० व्याख्या । **इहास्मिन्** पर्वते **विविधाः** विचित्राः नानावर्णाः **शिखरमणिरुचः** शृङ्गरत्नद्युतयः

१. अत्र 'शङ्का'शब्दस्य संदेहार्थत्वे संदेहालंकारः । भ्रान्तिपरत्वे भ्रान्तिमदलंकारः । नवोक्षविशेषणोत्थेन काव्यलिङ्गेनाङ्गाङ्गिभावेन संकीर्यते -म.

संप्रति सांप्रतं शरत्काले **बलभिदः** इन्द्रस्य **धनुश्चापं** **पूरयितुं** पूरणाय सन्धातुं वा **विभवः** समर्थाः **भवन्ति** किं० धनुः ? **जलधरपटले** मेघसमूहे कथमपि महता कष्टेन **शनकैर्**मन्दंमन्दं यथा भवति तथा **लब्धजन्म** प्राप्तजन्म जातमित्यर्थः । किं० जलधरपटले ? **लघुनि** स्तोके पुनः किं० ? शरत्कालवशात् **क्षीणपयसि** क्षीणजले गलितोदके इत्यर्थः । पुनः किं० ? अत एव **भिदां** भेदम् **उपेयुषि** प्राप्ते क्वचित् क्वचित् भेदं गते इत्यर्थः । पुनः किं० धनुः ? **खण्डितविग्रहं** विभिन्नस्वरूपं त्रुटितेन्द्रधनुः अनेकवर्णैः मणिकिरणैः संपूर्णं क्रियते इत्यर्थः । अत्रेन्द्रचापस्य रत्नकान्तीनां चासम्बन्धे संबन्धकथनादतिशयोक्तिरलंकारः । अथ समासः । लब्धं जन्म येन स लब्धजन्मा शनैरेव शनकैरत्र 'अव्यया सर्वाद्रिष्टेरकूवा' इत्यनेन सूत्रेण अकप्रत्ययः। क्षीणं पयो यस्मिन् तत् क्षीणपयस्तस्मिन् क्षी० । उपेयाय इति उपेयिवस्तस्मिन् उपेयुषि। भेदनं भिदा तां भिदाम् । 'भिदि विदारणे' भिद्धातुः 'षिद् भिदामङ्' इत्यनेन अङ्प्रत्ययः पश्चादाव्वतःस्त्रियामित्याय द्वितीयैकवचनम् अम् इति । धरतीति धरः जलानां धरो जलधरः जलधरस्य पटलं जलधरपटलं तस्मिन् ज० । खण्डितो विग्रहो यस्य स खण्डितविग्रहः तत् ख० । बलं भिन्नतीति बलभित् तस्य ब० । शिखराणां मणयः शिखरमणयः शिखरमणीनां रुचः शि० । वंशपत्रपतितं छन्दस्तस्य लक्षणं चेदं 'दिङ्मुनिवंशपत्रपतितं भरनभनलगैः' । इति वृत्तार्थः ॥ ४३ ॥

स्नपितनवलतातरुप्रवालैरमृतलवस्रुतिशालिभिर्मयूखैः ।
सततमसितयामिनीषु शम्भोर्धवलयतीह वनान्तमिन्दुलेखा ॥ ४४ ॥ (पु०)

स्नपित० व्याख्या । हे अर्जुन ! **इहास्मिन्** पर्वते **शम्भोर्**महादेवस्य **इन्दुलेखा** **सततं** निरन्तरम् **असितयामिनीषु** कृष्णपक्षरात्रिषु **वनान्तं** काननपर्यन्तम् अमलयति **धवलयति** प्रकाशयतीत्यर्थः । अन्यत्र नैतदस्तीति व्यतिरेको व्यज्यते । कैः ? **मयूखैः** किरणैः कृत्वा किं० मयूखैः ? **स्नपितनवलतातरुप्रवालैः** सिक्तनूतनवल्लीवृक्षपल्लवैः पुनः किं० मयूखैः ? **अमृतलवस्रुतिशालिभिः** सुधाकणस्रावेण शोभमानैः । अथ समासः । नवाश्च ता लताश्च नवलता नवलताश्च तरवश्च नवलतातरवः नवलतातरूणां प्रवालानि नवलतातरुप्रवालानि स्नपितानि नवलतातरुप्रवालानि यैस्ते स्नपितनवलतातरुप्रवालास्तैः स्न०। अमृतस्य लवाः अमृतलवाः अमृतलवानां स्रुतिः अमृतलवस्रुतिः अमृतलवस्रुत्या शालन्ते ते अमृतलवस्रुतिशालिनस्तैर० । न सिता असिता असिताश्च ता यामिन्यश्च असितयामिन्यस्तासु अ० । वनस्यान्तो वनान्तो तं व० । इन्दोर्लेखा इ० । पुष्पिताग्राछन्दः । इति वृत्तार्थः ॥४४॥

क्षिपति योऽनुवनं विततां बृहद्बृहतिकामिव रौचनिकीं रुचम् ।
अयमनेकहिरण्मयकन्दरस्तव पितुर्दयितो जगतीधरः ॥४५॥ (द्रु०)

क्षिपति० व्याख्या । हे अर्जुन ! **अयमेष** **जगतीधरः** इन्द्रकीलनामा पर्वतः **तव** भवतः **पितुस्**तातस्य इन्द्रस्य **दयितो** वल्लभः प्रियो वर्तते । किं० जगती० ? **अनेकहिरण्मयकन्दरः** असंख्यातसुवर्णमयगुहः । अयं कः **यो** जगतीधरोऽ**नुवनं** वनं प्रति **विततां** विस्तृतां **रौचनिकीं** गोरोचनसंबन्धिनीं **रुचं** कान्तिं सौवर्णद्युतिमिति यावत् **क्षिपति** विस्तारयति 'रोचना स्यात्सुवर्णेऽपि' इति

अनेकार्थः । किं० रुचम् ? उत्प्रेक्ष्यते **बृहद्बृहतिकामिव** विस्तीर्णोत्तरासंगमिव बृहदाच्छदनपटीमिव **स्थितामित्यर्थः** । अथ समासः । वनं प्रति अनुवनम् । बृहती चासौ बृहतिका च बृहत्बृहतिका तां बृ० रोचनया रक्ता रौचनिकी तां रौ० । हिरण्यस्य विकारो यासु ताः हिरण्मया हिरण्मयाश्च ताः कन्दराश्च हिरण्मयकन्दराः न एका अनेका अनेका हिरण्मयकन्दरा यस्य यस्मिन् वा स अ० । धरतीति धरो जगत्या धरो जगतीधरः । द्रुतविलम्बितच्छन्दः । इति वृत्तार्थः ॥४५॥

सक्तिं जवादपनयत्यनिले लतानां वैरोचनैर्द्विगुणिताः सहसा मयूखैः ।
रोधोभुवां मुहुरमुत्र हिरण्मयीनां भासस्तडिद्विलसितानि विडम्बयन्ति ॥४६॥ (व०)

सक्तिं० व्याख्या । हे अर्जुन ! **अमुत्र** अत्र पर्वते **हिरण्मयीनां** सुवर्णविकाराणां **रोधोभुवां** तटभूमीनां 'भूस्तु भूमिरिव क्षितौ स्थाने च' इति *हैमानेकार्थः* [१-९/१०] । **भासः** कान्तयः **सहसा** शीघ्रं हठाद्वा **वैरोचनैः** सूर्यसंबन्धिभि**र्मयूखैः** किरणैः **द्विगुणिताः** द्विगुणीकृताः [किं० भासः ? **मुहु**र्वारंवारं **तडिद्विलसितानि** विद्युद्विलसितानि **विडम्बयन्ति** तिरस्कुर्वन्ति] क्व सति ? **अनिले** वाते **जवात्** वेगात् **लतानां** वल्लीनां **सक्तिं** परस्परसंगमम् **अपनयति** स्फेटयति[१] । अथ समासः । विरोचनस्य इमे वैरोचनास्तैर्वै० । द्विरावृत्तिः कृता इति द्विगुणिताः । रोधसां भुवो रोधोभुवस्तासां रो० । हिरण्यानां विकारो हिरण्मयस्तासां हि० । तडितां विलसितानि त० । वसन्ततिलकावृत्तं तल्लक्षणं चेदं 'उक्ता वसन्ततिलका तभजाजगौगः' । इति वृत्तार्थः ॥४६॥

कषणकम्पनिरस्तमहाहिभिः क्षणविमत्तमतङ्गजवर्जितैः ।
इह मदस्नपितैरनुमीयते सुरगजस्य गतं हरिचन्दनैः ॥ ४७ ॥ (द्रु०)

कषण० व्याख्या । हे अर्जुन ! **इह** इन्द्रकीलनामपर्वते **हरिचन्दनैः** चन्दनवृक्षैः **सुरगजस्य** ऐरावणस्य **गतं** गमनं प्राप्तिरिति यावत् **अनुमीयते** अनुमानेन ज्ञायते लोकैरिति शेषः । किं० हरिचन्दनैः ? **कषणकम्पनिरस्तमहाहिभिः** कपोलकण्डूयनकम्पनेन दूरीकृतसर्पैः पुनः किं० हरिचन्दनैः ? **क्षणविमत्तम-तङ्गजवर्जितैः** क्षणमात्रं मत्तहस्तिरहितैः । यद्वा क्षणं विमत्तैः तद्नयात् गतमदैः वानेयगजरहितैः पुनः किं० ह० ? **मदस्नपितैः** मदेन क्षालितैः वनगजमदवारिसिक्तैरित्यर्थः[२] । अथ समासः । कषणेन कम्पः कषणकम्पः महान्तश्च ते अहयश्च महाहयः कषणकम्पेन निरस्ता महाहयो येभ्यः ते कषणकम्पनिरस्तमहाहयः तैः क० । विमत्ताश्च ते मतङ्गगजाश्च विमत्तमतङ्गजाः क्षणं विमत्तमतङ्गजैः वर्जिताः क्षणविमत्तमत-ङ्गजवर्जिताः तैः क्ष० । मदेन स्नपिता मदस्नपिताः तैर्म० । सुरस्य गजः सुरगजः तस्य सु० । द्रुतविलम्बितच्छन्दः । इति वृत्तार्थः ॥ ४७ ॥

जलदजालघनैरसिताश्मनामुपहतप्रचयेह मरीचिभिः ।
भवति दीप्तिरदीपितकन्दरा तिमिरसंवलितेव विवस्वतः ॥ ४८ ॥ (द्रु.)

१. उपमालंकारः -म. । २. हरिचन्दनविशेषणैः काव्यलिङ्गमुन्नेयम् -म.

जल० व्याख्या । हे अर्जुन ! **इहास्मिन्** इन्द्रकीलपर्वते **विवस्वतः** सूर्यस्य **दीप्तिः** कान्तिः **तिमिरसंवलिता** अन्धकारमिश्रितेव **भवति** जायते किं० दीप्तिः ? **असिताश्मनाम्** इन्द्रनीलमणीनां **मरीचिभिः** किरणैः **उपहतप्रचया** विघटितसमूहा संवलिता प्रकाशयतीत्यर्थः । किं० मरीचिभिः ? **जलदजालघनैः** मेघवृन्दनिबिडैः पुनः किं० दीप्तिः ? अत एव **अदीपितकन्दरा** अप्रकाशितगुहा। अथ समासः । जलं ददातीति जलदाः जलदानां जालानि ज० । जलदजालैः घनाः जलदजालघनास्तैः ज० । न सिता असिता असिताश्च ते अश्मानश्च असिताश्मानस्तेषाम० । उपहतः प्रचयो यस्याः सा उ० । न दीपिता कन्दरा यया सा अ०। तिमिरैः संवलिता तिमिरसंवलिता । इदमपि द्रुतविलम्बितवृत्तमिति वृत्तार्थः ॥४८॥

भव्यो भवन्नपि मुनेरिह शासनेन क्षात्रे स्थितः पथि तपस्य हतप्रमादः ।
प्रायेण सत्यपि हितार्थकरे विधौ हि श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥४९॥ (व०)

भव्यो० व्याख्या । हे अर्जुन ! **इहाद्रौ** त्वं **भव्यः** शान्तो **भवन्नपि** सन् **मुनेर्वेदव्यासस्य** **शासनेन** इन्द्राराधनरूपाज्ञया शिक्षया वा अप्रमत्तः **हतप्रमादः** सन् सावधानो भूत्वा **तपस्य** तपः कुरु समस्तभूतहितकारिणो मम प्रमादः किं करिष्यतीति न विश्वसितव्यमित्यर्थः । किं० त्वम् ? **क्षात्रे** क्षत्रसम्बन्धिनि **पथि** मार्गे स्थित इत्यर्थः । अर्थान्तरन्यासेन द्रढयति **हि** यस्मात्कारणात् **प्रायेण** बाहुल्येन 'प्रायो वयस्यनशने मृतौ बाहुल्यतुल्ययोः' इति *हैमानेकार्थः* [२-२६१] । **हितार्थकरे** सानुकूले **विधौ** दैवे **सत्यपि श्रेयांसि** कल्याणानि **अन्तरायै**र्विघ्नै**र्विना लब्धुं** प्राप्तुम् **असुखानि** अशक्यानि सुखेन न लभ्यते । यतः-

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि । अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥४८॥ इति ।

अकारणवैरिणः सर्वत्र सर्वेषामपि भवन्तीति भावः । अथ समासः । क्षत्रस्यायं क्षात्रस्तस्मिन् क्षा० । हतः प्रमादो येन स ह० । हितश्चासौ अर्थश्च हितार्थः हितार्थं करोतीति हितार्थकरस्तस्मिन् हि० । वसन्ततिलका वृत्तम् । इति वृत्तार्थः ॥ ४९ ॥

मा भूवन्नपथहृतस्तवेन्द्रियाश्वाः संतापे दिशतु शिवः शिवां प्रवृत्तिम् ।
रक्षन्तस्तपसि बलं च लोकपालाः कल्याणीमधिकफलां क्रियां क्रियासुः ॥५०॥ (प्र०)

माभू० व्याख्या । हे अर्जुन ! **तव** भवतः **इन्द्रियाश्वाः** इन्द्रियतुरगाः **अपथहृतः** अमार्गगामिनो **मा भूवन्** मा भवन्तु त्वामुन्मार्गं मा नैषुरित्यर्थः । अत्र मा योगे भूतार्थताया विभक्तेराशीः प्रेरणार्थता वक्तव्या पुनः **शिवो** महादेवः **सन्तापे** तपःक्लेशे सति **शिवां** कल्याणकरीं **प्रवृत्तिं** मनस्युत्साहं प्रसन्नतां **दिशतु** ददातु **च** पुनः **लोकपालाः** इन्द्रादयः तव **तपसि** विषये **बलं** शक्तिं **रक्षन्तो** वर्धयन्तः सन्तः **कल्याणीं** श्रेयस्कारिणीं **क्रियाम्** अग्निहोत्रादिकमनुष्ठानम् **अधिकफलां** बहुलाभां श्रूयमाणात्फलादधिक-फलामिति यावत् **क्रियासुः** कुर्वन्तु । अथ समासः । न पन्था अपथः अपथेन हरन्तीति अ० ।

इन्द्रियाण्येव अश्वाः इ० । लोकान् पालयन्तीति लोकपालाः । अधिकं फलं यस्याः सा अधिकफला तामधिकफलाम् । प्रहर्षिणीवृत्तम् । इति वृत्तार्थः ॥ ५० ॥

इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे धाम स्वं गतवति राजराजभृत्ये ।
सोत्कण्ठं किमपि पृथासुतः प्रदध्यौ संधत्ते भृशमरतिं हि सद्वियोगः ॥ ५१ ॥ (प्र०)

इत्यु० व्याख्या । **पृथासुतः** कुन्तीपुत्रोऽर्जुनः **सोत्कण्ठं** सोत्सुकं यथा भवति तथा **किमपि** किञ्चित् **प्रदध्यौ** चिन्तयामास क्व सति ? **प्रियार्हे** इष्टयोगे अभीष्टे अभिलाषुके इत्यर्थः । **राजराजभृत्ये** धनदानुचरे यक्षे **इति** पूर्वोक्तप्रकारेण **हितं प्रियं** च **उक्त्वा** कथयित्वा **सपदि** शीघ्रं **स्वं** निजं **धाम** स्थानं **गतवति** यातवति सति **हि** यस्मात् कारणात् **सद्वियोगः** सुजनविरहः **भृशम**त्यर्थम् **अरतिं** व्यथां **संधत्ते** कुरुते दुःखमुत्पादयतीत्यर्थः । अथ समासः । प्रियेऽर्हः प्रियार्हः तस्मिन् प्रि० । राज्ञां राजा राजराजः राजराजस्य भृत्यो राजराजभृत्यस्तस्मिन् रा० । सह उत्कण्ठया वर्तते यत् तत् सोत्कण्ठम् । पृथायाः सुतः पृ० । सतो वियोगः सद्वियोगः । इदमपि प्रहर्षिणीवृत्तम् इति वृत्तार्थः ॥ ५१ ॥

तमनतिशयनीयं सर्वतः सारयोगा-
दविरहितमनेकेनाङ्कभाजा फलेन ।
अकृशमकृशलक्ष्मीश्चेतसा शंसितं स
स्वमिव पुरुषकारं शैलमभ्याससाद ॥ ५२ ॥ (मा०)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *पर्वतवर्णनो* नाम पञ्चमः सर्गः ॥

तम० व्याख्या । **सोऽर्जुनः स्वं** स्वकीयं **पुरुषकारं** पुरुषकर्म पुरुषार्थमिति यावत् **तं शैलम्** इन्द्रकीलपर्वतम् **अभ्यससाद** प्राप किं० शैलम् ? **सारयोगात्** उत्कृष्टवस्तुसंयोगात् **सर्वतः** सर्वत्र **अनतिशयनीयम्** अनतिक्रमणीयम् पुनः किं० शैलम् ? **अनेकेन** बहुना **अङ्कभाजा** समीपगतेन त्वरितभाविनेति यावत् **फलेन** कार्यसिद्धिलक्षणेन **अविरहितम्** अशून्यं कार्यसिद्धेरवश्यंकारमित्यर्थः । पुनः किं० शैलम् ? **अकृशं** महान्तम् पुनः किं० शैलम् ? **चेतसा शंसितं** मनसा प्राप्तुमभिलषितं पुरुषकारं किं० ? **सारयोगात्** बलयोगात् 'सारो मज्जास्थिरांशयोः बले श्रेष्ठे' वा'इति *हैमानेकार्थः* [२-४५५] । सर्वतोऽनतिशयनीयम् अतिक्रमितुम् अशक्यम् । पुनः किं० पुरुषकारम् ? **अनेकेन** असंख्यातेन **अङ्कभाजा** निकटवर्तिना **फलेन** राज्यादिलाभलक्षणेन **अविरहितं** सहितं पुनः किं० पुरु० ? **अकृशं** गरिष्ठं पुनः किं० ? **चेतसा शंसितं** चित्तेन लब्धुमिष्टं स किंलक्षणः ? **अकृशलक्ष्मीः** बहुशोभः 'लक्ष्मीश्छाया च शोभायाम्' इति *हैमः* [१५१२] । अथ समासः । न अतिशय्यते इति अनतिशयनीयस्तम् अ० सारस्य योगः सारयोगः तस्मात्सा० । न विरहितो अविरहितस्तम० । न एकमनेकं तेन अ० । अङ्कं भजतीति अङ्कभाक् तेन अ० । न कृशोऽकृशस्तम० । न कृशा अकृशा अकृशा लक्ष्म्यो यस्य सोऽकृ० । पुरुषस्य कारः पुरुषकारस्तं पु० । सर्गान्तत्वात् वृत्तभेदस्ततो मालिनीवृत्तं तल्लक्षणं चेदं-'न न म य य युतेयं

मालिनी भोगिलोकैः । इति वृत्तार्थः ॥ ५२ ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः
प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपा-
गच्छे ये प्रति गौतमाद्गणभृतस्तैस्तैर्गुणै रेजिरे ॥ १ ॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपदभाजि किरातकाव्ये सर्गश्च पाण्डवमितः समवाप पूर्तिम् ॥ २ ॥

इति महामहोपाध्यायश्रीदेवविजयगणिपादपयोजचञ्चरिकपण्डितधर्मविजयगणिविरचितायां भट्टश्री भारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***इन्द्रकिलाभिगमनो*** नाम पञ्चमः सर्गः । ऐं नमः ॥

षष्ठः सर्गः।

अथार्जुनस्य तपो वर्णयितुं कविः षष्ठं सर्गमारभते -

रुचिराकृतिः कनकसानुमथो परमः पुमानिव पतिं पतताम् ।
धृतसत्पथस्त्रिपथगामभितः स तमारुरोह पुरुहूतसुतः ॥ १ ॥

[का. ४५ यावद् प्रमिताक्षराच्छन्दः]

'रुचिराकृति०' व्याख्या । **अथो** पर्वतप्राप्तेरनन्तरं **सः पुरुहूतसुतः** अर्जुनः **त्रिपथगां** गङ्गाम् **अभितो** अभिमुखं गङ्गासन्मुखम् अनुसरन् इत्यर्थः । 'अभितोऽभिमुखकार्त्स्न्योः समीपोभयतः शीघ्रेषु' इति *हैमानेकार्थः* [७-५८] । **तम्** इन्द्रकीलपर्वतम् **आरुरोह** आरोहति स्म सः किं० ? **रुचिराकृतिः** मनोहराकारः आकारसदृशगुणवान् इत्यर्थः । यतः- 'यत्राकृतिस्तत्र गुणा भवन्ति' इति (४९) *सामुद्रिकाः* । इत्यनेन अर्जुनस्य भविष्यदभ्युदयत्वं सूचितम् । पुनः किं० सः ? **धृतसत्पथः** आश्रितशोभनमार्गः तं पर्वतं किं० ? **कनकसानुं** सुवर्णशिखरं क इव ? परमः पुमान् **इव** यथा **परमः पुमान्** कृष्णः **पततां पतिं** पक्षिणां स्वामिनं गरुडम् आरोहति अत्र गरुडसावर्ण्यार्थमिदं विशेषणम् । अथ समासः । रुचिरा आकृतिर्यस्य स रुचिराकृतिः । कनकस्य सानवो यस्य स कनकसानुः तं कनकसानुम् । धृतः सन् पथा येन स धृतसत्पथः । त्रिभिः पथिभिर्गच्छतीति त्रिपथगा तां त्रिपथगाम् । पुरुहूतस्य सुतः पु० । अस्मिन् सर्गे [४५ यावद्] प्रमिताक्षरा छन्दः तल्लक्षणं चेदं - 'प्रमिताक्षरा सजससैरुदिता' । इति वृत्तार्थः ॥१॥

अथास्य कार्यसिद्धिनिमित्तानि सूचयन्मार्गं वर्णयति-

तमनिन्द्यबन्दिन इवेन्द्रसुतं विहितालिनिक्वणजयध्वनयः ।
पवनेरिताकुलविजिह्मशिखा जगतीरुहोऽवचकरुः कुसुमैः ॥२॥

'तम०' व्याख्या । **जगतीरुहो** भूमिरुहो वृक्षाः **कुसुमैः** पुष्पैः कृत्वा **तम् इन्द्रसुतम्** अर्जुनम् **अवचकरुः** अवाकिरन् वर्धापयामासुरित्यर्थः । किं० जग० ? **विहितालिनिक्वणजयध्वनयः** उच्चरितभ्रमर-रवजयशब्दाः पुनः किं० जग० ? **पवनेरिताकुलविजिह्मशिखः** वायुप्रेरिता अत एव लोलाः... पुष्पभराद् वक्रशाखाः । 'शिखाग्रमात्रे चूडायां केकिचूडाप्रधानयोः । ज्वालायां लाङ्गलिकायां शिफाशाखाघृणिष्वपि' इति *हैमानेकार्थः* [२-२७] । के इव ? अनिन्द्यबन्दिन **इव** यथा **अनिन्द्यबन्दिनः** प्रशस्तमङ्गलपाठकाः पुष्पाणि विकिरन्ति जयशब्दमुच्चैरन्ति । अथ समासः । न निन्द्या अनिन्द्या अनिन्द्याश्च ते बन्दिनश्च अ० । इन्द्रस्य सुतः इन्द्रसुतः तम् इ० । अलीनां निक्वणाः अ० जयस्य ध्वनयो जय० विहितालिनिक्वणा एव जयध्वनयः यैस्ते वि० । पवनेन इरिताः पवनेरिता आकुलाश्च ता विजिह्माश्च आकुलविजिह्माः पवनेरिताश्च ता आकुलविजिह्माश्च पवनेरिताकुलविजिह्माः पवनेरिताकुलविजिह्माः शिखा येषां ते प० । जगत्यां रुहन्तीति ज० । इति वृत्तार्थः ॥ २ ॥

---

१. अत्र वाक्ये समासगतयोरुपमयोः साध्यसाधनभावादङ्गाङ्गिभावेन संकरः -म.

अवधूतपङ्कजपरागकणास्तनुजाह्नवीसलिलवीचिभिदः ।
परिरेभिरेऽभिमुखमेत्य सुखाः सुहृदः सखायमिव तं मरुतः ॥ ३ ॥

'अव०' व्याख्या । **मरुतो** वायवः **अभिमुखं** सन्मुखम् **एत्य** आगत्य **तम्** अर्जुनं **परिरेभिरे** आलिङ्गयामासुः के इव ? सुहृद **इव** यथा **सुहृदो** मित्राणि **सखायं** मित्रम् अभिमुखम् एत्य आलिङ्गन्ति। कविना वातस्त्रिधा वर्ण्यते । अत आह – किं० मरुतः ? **अवधूतपङ्कजपरागकणाः** चालितकमलपरागलेशाः 'कणो धान्यांशलेशयोः' इति *हैमानेकार्थः* [२-१३२] । एतेन सौगन्ध्योक्तिः । पुनः किं० मरुतः ? **तनुजाह्नवीसलिलवीचिभिदः** सूक्ष्मगङ्गाजलकल्लोलभिदः एतेन शैत्योक्तिः । **सुखाः** सुखकारिणः सुखस्पर्शार्हा इत्यर्थः । एतेन मन्दत्वोक्तिः । सुहृदोऽप्येवंलक्षणा भवन्तीति । मरुत्सुहृतामुपमानोपमेयभावः । अथ समासः। पङ्कजानां परागः पङ्कजपरागः पङ्कजपरागस्य कणाः पङ्कजपरागकणाः अवधूताः पङ्कजपरागकणा यैस्ते अ० । जाह्नव्याः सलिलं जाह्नवीसलिलं जाह्नवीसलिलस्य वीचयः जाह्नवीसलिलवीचयः तन्व्यश्च ता जाह्नवीसलिलवीचयश्च तनुजाह्नवीसलिलवीचयः तनुजाह्नवीसलिलवीचीः भिन्दन्तीति त० । सुखं कुर्वन्तीति सुखयन्ति 'डिडित्करणे' इत्यनेन डिप्रत्ययः । सुखयन्तीति सुखाः 'पचिनन्दिग्रहादेरयुणिनि' इत्यनेन सूत्रेण अप्रत्ययः । सुष्ठु शोभनं हृत् येषां ते सुहृदः । इति वृत्तार्थः ॥३॥

उदितोपलस्खलनसंवलिताः स्फुटहंससारसविरावयुजः ।
मुदमस्य माङ्गलिकतूर्यकृतां ध्वनयः प्रतेनुरनुवप्रमपाम् ॥४॥

'उदितो०' व्याख्या । **अनुवप्रं** तटं तटं प्रति पतन्तीनाम् इति शेषः । **अपां** जलानां **ध्वनयः** शब्दाः **अस्य** अर्जुनस्य **माङ्गलिकतूर्यकृतां** मङ्गलप्रयोजनवादित्रोत्पादितं **मुदं** हर्षं **प्रतेनुः** विस्तारयामासुः किं० ध्वनयः ? **उदितोपलस्खलनसंवलिताः** उन्नतपाषाणप्रतिघातेन आस्फालिताः अतो मर्दलध्वनिवत् घुमघुमायमाना इत्यर्थः । पुनः किं० ध्वनयः ? **स्फुटहंससारसविरावयुजः** प्रकटहंससारसशब्दैः सह मिलिताः[1] । अथ समासः । उदिताश्च ते उपलाश्च उदितोपलाः उदितोपलेषु स्खलनम् उदितोपलस्खलनम् उदितोपलस्खलनेन संवलिताः उ० । हंसाश्च सारसाश्च हं० हंससारसानां विरावाः हं० स्फुटाश्च ते हंससारसविरावाश्च स्फु० स्फुटहंससारसविरावैर्युजतीति स्फु० । मङ्गलं प्रयोजनं येषां ते माङ्गलिकाः माङ्गलिकाश्च ते तूर्याश्च माङ्गलिकतूर्याः माङ्गलिकतूर्यैः कृता माङ्गलिकतूर्यकृता तां मा०। तूर्यशब्दः पुंनपुंसकलिङ्गः । वप्रमनु इति अनुवप्रम् । इति वृत्तार्थः ॥४॥

अवरुग्णतुङ्गसुरदारुतरौ निचये पुरः सुरसरित्पयसाम् ।
स ददर्श वेतसवनाचरितां प्रणतिं बलीयसि विवृद्धिकरीम्[1] ॥५॥

'अव०' व्याख्या । **सोऽर्जुनः पुरोऽग्रे सुरसरित्पयसां** गङ्गाजलानां **निचये** प्रवाहे पूरे समूहे वा

1. समृद्धिकरीम् -म. इदं च पाठान्तरम् ।

१. अत्रान्यस्यान्यकार्यकारणासंभवात्तूर्यकृतमुत्सदृशीं मुदमिति प्रतिबिम्बेनाक्षेपान्निदर्शनालंकारः -म. ।

वेतसवनाचरितां वानीरवृक्षवनेन कृतां 'विदुलो वेतसः शीतो वानीरो वञ्जुलोरथ' इति *हैमः* [११३७]। **प्रणतिं** नम्रतां नमस्कारं वा **ददर्श** अद्राक्षीत् किं॰ प्रणतिम् ? **विवृद्धिकरीं** वेतसवृक्षस्यैव श्रेयस्करीं किं॰ निचये ? **बलीयसि** बलवत्तरे पुनः किं॰ निचये ? **अवरुग्णतुङ्गसुरदारुतरौ** उन्मूलितोच्चदेवदारुवृक्षे लोके बलीयसि यस्तादृशो भवति स वर्धते इति लोकस्थितिः । अथ समासः। अवरुग्णाः तुङ्गाः सुरदारवस्तरवो येन स अवरुग्णतुङ्गसुरदारुतरुस्तस्मिन् अ॰ । सुरस्य सरित् सुरसरित् सुरसरितः पयांसि सुरसरित्पयांसि तेषां सु॰ । वेतसानां वनं वेतसवनं वेतसवनेन आचरिता वेतसवनाचरिता तां वे॰ । अतिशयेन बलो बलीयस्तस्मिन् ब॰ । विवृद्धिं करोतीति विवृद्धिकरी तां वि॰ । इति वृत्तार्थः ॥ ५ ॥

वि[1]बभूव नालमवलोकयितुं परितः सरोजरजसारुणितम् ।
सरिदुत्तरीयमिव संहतिमत्स तरङ्गरङ्गि कलहंसकुलम् ॥ ६ ॥

'विबभू॰' व्याख्या । **सोऽर्जुनः कलहंसकुलं** राजहंसवृन्दं **विलोकयितुं** द्रष्टुम् **अलम**त्यर्थं **न विबभूव** न शशाक तत् सौन्दर्यस्योज्ज्वलत्वादिति भावः । किं॰ कल॰ ? **परितः** सर्वतः **सरोजरजसा** कमलपरागेण **अरुणितं** रक्तीभूतं पुनः किं॰ कल॰ ? **संहतिमत्** श्रेणियुक्तं वृन्दीभूतमित्यर्थः । पुनः किं॰ कल॰ ? **तरङ्गरङ्गि** कल्लोलेषु रमणस्वभावं पुनः किं॰ कल॰ ? उत्प्रेक्ष्यते **सरिदुत्तरीयं** नदीप्रच्छादनं नद्याः स्तनांशुकमिव स्थितं किं॰ सरिदुत्तरीयम् ? **परितः** सरोजरजसाऽरुणितं कुसुमादिना रक्तीभूतं पुनः किं॰ स॰ ? **संहतिमत्** छिद्ररहितम् । पुनः किं॰ सरि॰ ? **तरङ्गरङ्गि** वस्त्रसंकोचरेखाभिः शोभायमानम्। अथ समासः । सरोजानां रजः सरोजरजः तेन स॰ । सरित उत्तरीयं सरिदुत्तरीयम् । संहतिरस्यास्तीति संहतिमत्। तरङ्गेषु रङ्गते रमते इति त॰ । कलहंसानां कुलं कलहंसकुलं तत् क॰ । इति वृत्तार्थः ॥६॥

दधति क्षतीः परिणतद्विरदे मुदितालियोषिति मदस्रुतिभिः ।
अधिकां स रोधसि बबन्ध धृतिं महते रुजन्नपि गुणाय महान् ॥ ७ ॥

'दधति॰' व्याख्या । **सोऽर्जुनो रोधसि** तटे **अधिकां** बहुलां लोकोत्तरां वा **धृतिं** प्रीतिं **बबन्ध** बध्नाति स्म प्रीतिं निश्चलीकृतवानित्यर्थः । किं॰ रोधसि ? **क्षतीः** व्रणान् प्रहारान् वा **दधति** धारयति कुतः, पुनः किं॰ रोधसि ? **परिणतद्विरदे** तिर्यग्दन्तप्रहारकारिगजे 'तिर्यग्घाती परिणतो गज' इति *हैमः* [२२१]। पुनः किं॰ रोधसि ? **मदस्रुतिभिः** गजमदवारिस्रवणैः **मुदितालियोषिति** हर्षितगजभ्रमरकलत्रे । मदस्रावित्वं गजसंबन्धात् अचेतने चेतनत्वमुपचारात् । युक्तोऽयमर्थः तथाहि– **महान्** महेच्छुः महासत्त्वो जनः **रुजन्नपि** पीडयन्नपि **महते** उत्कृष्टाय **गुणाय** उत्कर्षाय भवति । महद्भिः कृता पीडापि शुभकारिणी भवति इत्यर्थः। तद् युक्तिमत् गजभग्नस्यापि तटस्य प्रीतिकरत्वमिति भावः । अथ समासः । परिणता द्विरदा यस्मिन् तत् परिणतद्विरदं तस्मिन् प॰ । अलीनां योषितः अलियोषितः, मुदिता अलियोषितो यस्मिन् तत् मुदितालियोषित् तस्मिन् मु॰ । मदस्य स्रुतयो मदस्रुतयः तैर्म॰ । इति वृत्तार्थः ॥७॥

1. प्रबभूव –म. इदं च पाठान्तरम् ।

अनुहेमवप्रमरुणैः समतां गतमूर्मिभिः सहचरं पृथुभिः ।
स रथाङ्गनामवनितां करुणैरनुबध्नतीमभिननन्द रुतैः ॥ ८ ॥

'अनु०' व्याख्या । **सोऽर्जुनः रथाङ्गनामवनितां** चक्रवाकपत्नीं चक्रवाकीं पश्यन्निति शेषः । **अभिननन्द** प्रशशंस प्रशंसयामासेत्यर्थः । यद्वा **अभिननन्द** तुतोष प्रकृष्टेष्टदर्शनात् आननन्देत्यर्थः । किं-कुर्वन्तीं रथा० ? **सहचरं** चक्रवाकप्रियं **करुणैः** दीनैः **रुतैः** शब्दैः **अनुबध्नतीम्** आकारयन्तीम् अन्वेषणे हेतुमाह-किं० सहचरम् ? **पृथुभिः** महद्भिः **ऊर्मिभिः** कल्लोलैः **समतां** सादृश्यं **गतं** प्राप्तम् अत्र तावदूर्मीणां स्वधवलत्वत्यागेन अरुणत्वस्वीकारात् तद्गुणालङ्कारः 'तद्गुणः स्वगुणत्यागात् अन्योत्कृष्ट-गुणाहृतिः' इति (६४) लक्षणात् । तन्मूला चेयं चक्रवाक्याः स्वकान्ते तरङ्गभ्रान्तिरिति तद् गुणभ्रान्तिमतोरङ्गाङ्गिभावेन संकरः । पुनः किं० ऊर्मिभिः ? **अनुहेमवप्रं** सुवर्णतटसमीपे **अरुणैः** रक्तैः कनककान्त्युपरञ्जनादिति भावः । अथ समासः। हेम्नो वप्रं हेमवप्रं हेमवप्रस्य समीपम् अनु० । सह चरतीति सहचरः तं सहचरम् । रथस्य अङ्गं रथाङ्गं रथाङ्गं नाम्नि यस्य स रथाङ्गनामा रथाङ्गनाम्नो वनिता रथाङ्गनामवनिता तां र० । इति वृत्तार्थः ॥८॥

सितवाजिने निजगदू रुचयश्चलवीचिरागरचनापटवः ।
मणिजालमम्भसि निमग्नमपि स्फुरितं मनोगतमिवाकृतयः ॥ ९ ॥

'सित०' व्याख्या । **रुचयो** द्युतयः **सितवाजिने** श्वेताश्वाय अर्जुनाय **अम्भसि** जले **निमग्नं** ब्रूडितम् **अपि मणिजालं** रत्नसमूहं **निजगदुः** कथयामासुः अत्र जले मणयो मग्नाः सन्तीत्येवं सूचयतीत्यर्थः । का इव ? आकृतय **इव** यथा **आकृतयः** आकाराः भ्रूभङ्गादिबाह्यविकाराः **मनोगतं** हृद्गतं **स्फुरितं** कोपादिविकारं निगदन्ति। किं० रुचयः ? **'चलवीचिरागरचनापटवः' चलानां** चञ्चलानां **वीचीनां** तरङ्गानां **रागो** रञ्जनं वर्णान्तरापादनं तस्य **रचना** क्रिया तत्र **पटवः** पटिष्ठाः चञ्चलकल्लोलरञ्जनविधानकुशलाः इत्यर्थः । अथ समासः । सिता वाजिनो यस्य स सितवाजी तस्मै सि० । चलाश्च ते वीचयश्च चलवीचयः चलवीचीनां रागः चल० तस्य चलवीचिरागस्य रचना चलवीचिरागरचना चलवीचिरागरचनायां पटवः च० । मणीनां जालं मणिजालम् । मनसि गतं मनोगतम् । इति वृत्तार्थः ॥ ९ ॥

उपलाहतोद्धततरङ्गधृतं जविना विधूय[1] विततं मरुता ।
स ददर्श केतकशिखाविशदं सरितः प्रहासमिव फेनमपाम् ॥ १० ॥

'उप०' व्याख्या । **सोऽर्जुनः अपां** जलानां **फेनम**ब्धिकफं 'डिण्डीरोऽब्धिकफः फेन' इति *हैमः* [१०७७] । **ददर्श** दृष्टवान् किं० फेनम् ? **जविना** वेगवता **मरुता** वायुना **विधूय** कम्पयित्वा **विततं** विस्तारितं [पुनः किं० फेनम् ? **उपलाहतोद्धततरङ्गधृतं** प्रस्तरताडनोद्धतवीचिधृतं] पुनः किं० फेनम् ?

1. 'विधूतविततं' -म. इदं च पाठान्तरम् ।

केतकशिखाविशदं केतकीकुसुमाग्रवत् धवलं पुनः किं० ? उत्प्रेक्ष्यते **सरितः** नद्याः **प्रहासम्** अट्टहास**मिव** स्थितम् । अथ समासः । उपलैराहता उपलाहता उपलाहतैः उद्धताः उ० उपलाहतोद्धताश्च ते तरङ्गाश्च उ० उपलाहतोद्धततरङ्गैः धृतः उपलाहतोद्धततरङ्गधृतस्तम् उ० । जवोऽस्यास्तीति जवी तेन जविना । केतकस्य शिखा केत० केतकशिखावद्विशदः केतकशिखाविशदस्तं के० । प्रकृष्टो हासः प्रहासस्तं प्रहासम् । इति वृत्तार्थः ॥१०॥

बहु बर्हिचन्द्रकनिभं विदधे धृतिमस्य दानपयसां पटलम् ।
अवगाढमीक्षितुमिवेभपतिं विकसद्विलोचनशतं सरितः ॥ ११ ॥

'बहु०' व्याख्या । **बहु**नेकं **दानपयसां** मतङ्गजमदवारिणां **पटलं** वृन्दम् **अस्या**ऽर्जुनस्य **धृतिं** प्रीतिं **विदधे** चक्रे किं० पटलम् ? **बर्हिचन्द्रकनिभं** मयूरमेचकसदृशं 'मेचकश्चन्द्रकः समौ' इति *हैमः* [१३२०] । लोके 'मयूरपिछना चान्दलानेंसरिखुं' । पुनः किं० पटलम् ? **इभपतिम्** ऐरावणगजम् **ईक्षितुं** विलोकयितुं **सरितः** गङ्गायाः **विकसत्** प्रसरत् **विलोचनशतं** नयनशतमिव स्थितं किं० इभपतिम् ? **अवगाढं** जलमध्ये प्रविष्टम् । अथ समासः । बर्हाणि विद्यन्ते येषां ते बर्हिणः, बर्हिणां चन्द्रका बर्हिचन्द्रका बर्हिचन्द्रकाणां निभा इव निभा यस्य तत् ब० । दानस्य पयांसि दान० तेषां दा० । इभानां पतिरिभपतिस्तमिभपतिम् । विलोचनानां शतं वि० । इति वृत्तार्थः ॥ ११ ॥

प्रतिबोधजृम्भणविभिन्नमुखी पुलिने सरोरुहदृशा ददृशे ।
पतदच्छमौक्तिकमणिप्रकरा गलदश्रुबिन्दुरिव शुक्तिवधूः ॥ १२ ॥

'प्रति०' व्याख्या । **सरोरुहदृशा** कमललोचनेन अर्जुनेन **पुलिने** जलरहिततटे शय्यायां च **शुक्तिवधूः** अब्धिमण्डूकीरूपा स्त्री **ददृशे** दृष्टा 'मुक्तास्फोटोऽब्धिमण्डूकी शुक्तिः' इति *हैमः* [१२०४] । किं० शुक्तिवधूः ? 'प्रतिबोधजृम्भणविभिन्नमुखी' **प्रतिबोधः** स्फुटनं निद्रापगमश्च तत्र यत् **जृम्भणम्** उच्छूनता जम्भा च तेन **विभिन्नमुखी** विवृतवदना पुनः किं० शुक्तिवधूः ? अत एव **पतदच्छमौक्तिकमणिप्रकरा** गलन्निर्मलमुक्ताफलमणिसमूहा वधूपक्षे शयनीये पतन्तोऽश्रुरूपाः स्वच्छमौक्तिकसमूहाः । उत्प्रेक्ष्यते **गलदश्रुबिन्दुरिव** पतत् अश्रुबिन्दुरिव स्थिता । वधूपक्षे दयितविरहात् गलदश्रुबिन्दुर्भवति उभयोः अपि समानं विशेषणम्[1] । अथ समासः । प्रतिबोधे जृम्भणं प्रतिबोधजृम्भणं प्रतिबोधजृम्भणेन विभिन्नमुखं यस्याः सा प्र० । सरोरुहवत् दृशौ यस्य स सरोरुहदृग् तेन सरोरुहदृशा । मौक्तिकमणीनां प्रकरः मौक्तिकमणिप्रकरः अच्छश्चासौ मौक्तिकमणिप्रकरश्च अच्छमौक्तिकमणिप्रकरः पतन् अच्छमौक्तिकमणिप्रकरो यस्याः सा प० । अश्रूणां बिन्दवः अश्रुबिन्दवः गलन्तो अश्रुबिन्दवो यस्याः सा ग० । शुक्तिरेव वधूः शु० । इति वृत्तार्थः ॥ १२ ॥

---

१. अत्र प्रतिबोधादिश्लिष्टपदोपात्तानां प्रकृतानां शुक्तिवध्वोश्चोपमारूपकयोः साधकबाधकाभावात् संदेहालंकारः । तत्सापेक्षा चाश्रुगलनोत्प्रेक्षेति तयोरङ्गाङ्गिभावः -म. ।

शुचिरप्सु विद्रुमलताविटपस्तमसान्द्रफेनलवसंवलितः ।
स्मरदायिनः स्मरयति स्म भृशं दयिताधरस्य दशनांशुभृतः ॥१३॥

'शुचि०' व्याख्या । **अप्सु** जलेषु स्थितः सन् स्थित इति शेषः । **विद्रुमलताविटपः** प्रवाललताविस्तरः 'विटपः पल्लवे स्तम्बे विस्तारे खि(षि)ङ्गशिखयोः' इति *हैमानेकार्थः* [३-४३८] । **तम्** अर्जुनं **दयिताधरस्य** कान्ताधरपल्लवं **भृशम**त्यर्थं **स्मरयति स्म** स्मारितः 'स्मृतेर्धातोः स्मृतौ च कार्ये' इत्यनेन सूत्रेण कर्मणि षष्ठि। किं० दयिताधरस्य ? **स्मरदायिनः** कामोद्दीपकस्य पुनः किं० दयि० ? **दशनांशुभृतः** दन्तकिरणधारिणः किं० विद्रुमलताविटपः ? **शुचि**र्निर्मलः पुनः किं० विद्रुम० ? **असान्द्रफेनलवसंवलितः** अनिबिडडिण्डीरलेशमिश्रितः स्वल्पफेनलेशैर्मिलित इत्यर्थः । अधरस्य प्रवालोपमा दन्तकिरणस्य विद्रुममिलितफेनलवोपमा[१] । अथ समासः । विद्रुमस्य लता विद्रुमलता विद्रुमलतायाः विटपः वि० । फेनस्य लवः फेनलवः न सान्द्रोऽसान्द्रः असान्द्रश्चासौ फेनलवश्च असान्द्रफेनलवः असान्द्रफेनलवेन संवलितः अ० । स्मरं ददातीत्येवंशीलः स्मरदायी तस्य स्म० । दयिताया अधरो दयिताधरस्तस्य द० । दशनानाम् अंशवो दशनांशवः दशनांशून् बिभर्तीति दशनांशुभृत् तस्य द० । इति वृत्तार्थः ॥ १३ ॥

उपलभ्य चञ्चलतरङ्गहृतं[1] मदगन्धमुत्थितवतां पयसः ।
प्रतिदन्तिनामिव स संबुबुधे करियादसामभिमुखान् करिणः ॥ १४ ॥

'उप०' व्याख्या । **सो**ऽर्जुनः **करियादसां** गजाकारमत्स्यानाम् **अभिमुखान्** संमुखान् **करिणः** वनहस्तिनः **संबुबुधे** ददृशे दृष्टवानित्यर्थः । किं० करियादसाम् ? **मदगन्धं** वनगजमदवारिपरिमलम् उपलभ्य प्राप्य आदाय इति यावत् । **पयसो** जलसकाशात् **उत्थितवतां** कोपादिति शेषः । उत्थितानां किं० करियादसाम् ? उत्प्रेक्ष्यते **प्रतिदन्तिनां** प्रतिपक्षहस्तिनाम् **इव** स्थितानां यथा प्रतिपक्षगजानां सन्मुखाः गजा भवन्ति तथेति । किं० मदगन्धम् ? **चञ्चलतरङ्गहृतं** चपलकल्लोलैरानीतं तत्संक्रान्तमित्यर्थः । अथ समासः । चञ्चलाश्च ते तरङ्गाश्च चञ्चलतरङ्गाः चञ्चलतरङ्गैर्हृतः चञ्चलतरङ्गहृतस्तं च० । मदस्य गन्धो मदगन्धस्तं म० । करिणाम् आकार इव आकारो येषां तानि कर्याकाराणि कर्याकाराणि च तानि यादांसि च करियादांसि तेषां क० । अत्र 'समानाधिकरणे शाकपार्थिवादीनां मध्यमपदलोपो वक्तव्यः' इत्यनेन मध्यमपदलोपः । इति वृत्तार्थः ॥ १४ ॥

स जगाम विस्मयमुदीक्ष्य पुरः सहसा समुत्पिपतिषोः फणिनः ।
प्रहितं दिवि प्रजविभिः श्वसितैः शरदभ्रविभ्रममपां पटलम् ॥ १५ ॥

'स ज०' व्याख्या । **सो**ऽर्जुनः **पुरो**ऽग्रे **अपां** जलानां **पटलं** वृन्दं पूरमिति यावत् । **उदीक्ष्य** दृष्ट्वा **विस्मयम्** आश्चर्यं **जगाम** प्राप किं० पटलम् ? **समुत्पिपतिषोः** समुत्पतितुमिच्छोः जलमध्यादुत्तिष्ठत

1. धृतं -म. इदं च पा. ।

१. स्मरणालंकारः -म. ।

इत्यर्थः। **फणिनो** भुजङ्गस्य **श्वसितैः** निश्वासफुत्कारैः **सहसा** शीघ्रं **दिवि** आकाशे **प्रहितं** प्रेरितम् उच्छालितमित्यर्थः। किं० श्वसितैः ? **प्रजविभिः** वेगवत्तरैः अतिवेगयुक्तैः इत्यर्थः। पुनः किं० पटलम् ? **शरदभ्रविभ्रमं** शरत्कालीनमेघसमानशोभं तद्वत्धवलं गगनव्यापकं चेत्यर्थः। 'अथ विभ्रमः शोभायां संशये हावे' इति *हैमानेकार्थः* [३-४६६]। अथ समासः। समुत्पतितुमिच्छति समुत्पिपतिषति समुत्पिपतिषतीति समुत्पिपतिषुस्तस्य स०। प्रकृष्टो जवो येषां ते प्रजविनस्तैः प्रजविभिः। शरदि अभ्रः शरदभ्रः शरदभ्रस्य विभ्रम इव विभ्रमो यस्य तत् श०। अत्र 'वैयधिकरणे च बहुव्रीहिः मध्यम - पदलोपश्च' इत्यनेन मध्यमपदलोपः। इति वृत्तार्थः॥ १५॥

स ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः।
ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः॥ १६॥

'स त०' व्याख्या। **सोऽर्जुनः सरितः** नदीस्**ततार** अवातरत् उत्तीर्य गतवानित्यर्थः। 'तॄ प्लवनतरणयोः' इत्यस्य धातोः प्रयोगो दृष्टव्यः। किं० सरितः ? **अभितः** पक्षद्वये **सैकतवतीः** पुलिनवतीः जलरहिततटयुक्ता इत्यर्थः। पुनः किं० सरितः ? काकाक्षिगोलकन्यायेन उभयत्रापि अभितः संबध्यते। **अभितः** सर्वतः **शफरीपरिस्फुरितचारुदृशः** मत्सीपरिवर्तनरूपमनोहरनेत्राः पुनः किं० सरितः ? **सुरनिम्नगां** गङ्गां प्रति **उपयतीः** गच्छतीः पुनः किं० सरितः ? अत एव उत्प्रेक्ष्यते **ललिताः** सविलासाः **सखीरिव** स्थिताः किं० सखीः ? **बृहज्जघनाः** महज्जघनाः महत्कटीपूर्वभागा इत्यर्थः। 'जघनं कटौ स्त्रियः श्रोणीपुरोभागे' इति *हैमानेकार्थः* [३-३६८]। पुनः किं० सखीः ? **शफ०** मत्सीस्फुरितवत् चञ्चलनेत्राः। अथ समासः। सैकतं विद्यते यासां ताः सैकतवत्यः ताः सै०। शफरीणां परिस्फुरितानि शफरीपरिस्फुरितानि शफरीपरिस्फुरितान्येव चारवो दृशो यासां ताः शफरीपरिस्फुरितचारुदृशस्ताः श०। बृहन्ति जघनानि यासां ता बृहज्जघनास्ताः बृह०। सुराणां निम्नगा सुरनिम्नगा तां सु०। उपयन्तीति उपयन्त्यस्ताः उ०। 'इण् गतौ' धातोः प्रयोगः। इति वृत्तार्थः॥ १६॥

अधिरुह्य पुष्पभरनम्रशिखैः परितः परिष्कृततलां तरुभिः।
मनसः प्रसत्तिमिव मूर्ध्नि गिरेः शुचिमाससाद स वनान्तभुवम्॥ १७॥

'अधि०' व्याख्या। **सोऽर्जुनः अधिरुह्य** आरुह्य अर्थात् पर्वतमिति शेषः। **गिरेः** इन्द्रकीलपर्वतस्य **मूर्ध्नि** मस्तके **शुचिं** निर्मलां **वनान्तभुवं** वनसमीपभूमिकाम् अत्र अन्तशब्दो निकटवचनः 'अन्तः स्वरूपे निकटे' इति *हैमानेकार्थः* [२-१५५]। **आससाद** प्राप किं० वनान्तभुवम् ? उत्प्रेक्ष्यते **मनसः** चेतसः **प्रसत्तिं** प्रसन्नतामिव स्थितं पुनः किं० वनान्त० ? **तरुभिः** वृक्षैः **परितः** सर्वत्र **परिष्कृततलां** अलंकृतस्वभावां 'तलश्चपेटे तालद्रौ स्वभावाधारयोस्तरोः' इति *हैमानेकार्थः* [२-४७८]। किं० तरुभिः ? **पुष्पभरनम्रशिखैः** कुसुमभरेण नताग्रैः 'भरोऽतिशयभारयोः' इति *हैमानेकार्थः* [२-४३३]।

---

१. अत्रोपमानुप्राणिता स्वभावोक्तिरलंकारः -म.।

'पुष्पफलनम्रशिखैः' इति क्वचित्पाठः तत्र पुष्पफलेन नताग्रैः । अथ समासः । पुष्पाणां भरः पुष्पभरः पुष्पभरेण नम्रा शिखा येषां ते पुष्पभरनम्रशिखास्तैः पु० । परिष्कृतं तलं यस्याः सा परिष्कृततला तां प० । वनस्य अन्तो वनान्तः वनान्तस्य भूः वनान्तभूस्तां व० । इति वृत्तार्थः ॥१७॥

अनुसानु पुष्पितलतावितति: फलितोरुभूरुहविविक्तवनः ।
धृतिमाततान तनयस्य हरेस्तपसेऽधिवस्तुमचलामचलः ॥ १८ ॥

'अनु०' व्याख्या । **अचलः** इन्द्रकीलपर्वतः **हरेरि**न्द्रस्य **तनयस्य** पुत्रस्य अर्जुनस्य **तपसे** तपश्चर्यार्थम् **अधिवस्तुम्** आसितुम् अधिष्ठातुं **धृतिं** धैर्यम् **आततान** विस्तारयामास किं० धृतिम् ? **अचलां** निश्चलां धृतिहेतुभूतानि विशेषणा[१]न्याह– किं० अचलः ? **अनुसानु** प्रतिशिखरं **पुष्पितलतावितति:** संजातकुसुमलताश्रेणिः पुनः किं० अचलः ? **फलितोरुभूरुहविवक्तिवनः** संजातफलमहावृक्ष–विवेकिकाननः 'विविक्तं स्यादसंपृक्ते रहःपूतविवेकिषु' इति *हैमानेकार्थः* [३–२८८] । अथ समासः । सानोः अनु अनुसानु । लतानां विततयो लतावितततयः पुष्पाणि संजातानि यासां ताः पुष्पिताः पुष्पिताः लतावितततयो यस्य स पु० । उरवश्च ते भूरुहाश्च उरुभूरुहाः फलानि संजातानि येषां ते फलिताः फलिता उरुभूरुहा येषु तानि फ० विविक्तानि च तानि वनानि च विविक्तवनानि फलितोरुभूरुहाणि च तानि विविक्तवनानि च फ० फलितोरुभूरुहविविक्तवनानि यस्मिन् स फ० । न चला अचला ताम् अ० । इति वृत्तार्थः ॥ २८ ॥

प्रणिधाय तत्र विधिनाऽथ धियं दधतः पुरातनमुनेर्मुनिताम् ।
श्रममादधावसुकरं न तपः किमिवावसादकरमात्मवताम् ॥ १९ ॥

'प्रणि०' व्याख्या । **अथा**नन्तरं **तत्र** इन्द्रकीलपर्वते तस्येति शेषः । अर्जुनस्य **असुकरं** दुःखकरं कर्तुमशक्यमित्यर्थः । **तपः** कर्तुः **श्रमं** खेदं **न आदधौ** न चकार दुष्करतपश्चरणेपि तस्य श्रमो मा भूदितिभावः। तस्य कथंभूतस्य ? **पुरातनमुनेः** चिरन्तनऋषेः **मुनितां** मुनित्वं नाम **दधतः** धारयतः तपस्यत इत्यर्थः । किंकृत्वा ? **विधिना** योगशास्त्रानुसारेण **धियं** चित्तवृत्तिं **प्रणिधाय** विषयेषु निरुध्य तथाहि–**आत्मवतां** मनस्विनां ज्ञानवतामित्यर्थः । **अवसादकरं** श्रमकरं **किमिवा**स्ति न किंचिदिवास्तीत्यर्थः । इवशब्दो वाक्यालंकारे । अथ समासः । पुरातनश्चासौ मुनिश्च पुरातनमुनिः तस्य पु० । मुनेर्भावो मुनिता तां मु० । सुखेन क्रियते इति सुकरम् न सुकरम् असुकरम् । अवसादं करोतीति अवसादकरः तम० । आत्मा विद्यते येषां ते आत्मवन्तः तेषाम् आ० । इति वृत्तार्थः ॥ १९ ॥

शमयन्धृतेन्द्रियशमैकसुखः शुचिभिर्गुणैरघमयं स तमः ।
प्रतिवासरं सुकृतिभिर्ववृधे विमलः कलाभिरिव शीतरुचिः ॥ २० ॥

'शम०' व्याख्या । **सोऽ**र्जुनः **प्रतिवासरं** प्रतिदिनं **सुकृतिभिः** सुकृतैः तपोऽनुष्ठानादिभिरित्यर्थः ।

१. अत्राचलविशेषणपदार्थस्य धृतिकरणहेतुत्वात् काव्यलिङ्गमलंकारः –म. ।

ववृधे वृद्धिं प्राप क इव ? शीतरुचि**रिव** यथा **शीतरुचिः** चन्द्रः **कलाभिः** षोडशांशैः प्रतिवासरं वर्धते। किं० सः ? **धृतेन्द्रियशमैकसुखः** गृहीतविषयव्यावृत्तिरूपमुख्यसुखः स किंकुर्वन् ? **शुचिभिर्निर्मलैः गुणै**र्मैत्र्यादिभिः कृत्वा **अघमयं** पापस्वरूपं **तमो** मोहं **शमयन्** स्फेटयन् पुनः किं० स ? **विमलः** निर्मलः अथ शीतरुचेर्विशेषणानि किं० शीतरुचिः ? **धृतेन्द्रियशमैकसुखः** धृतसंतापनिवर्तनादद्वितीयाह्लादः किंकुर्वन् शीतरुचिः ? **शुचिभि**रुज्ज्वलै**र्गुणैः** कान्त्यादिभिः **अघमयं तमो**ऽन्धकारं **शमयन्** निवर्तयन् पुनः किं० शीत० ? **विमलो** धवलः । अथ समासः। इन्द्रियाणां शमः इन्द्रियशमः एकं च तत् सुखं च एकसुखं धृतम् इन्द्रियशम एव एकसुखं येन स धृ०। अघस्वरूपम् अघमयम् । वासरं प्रति प्रतिवासरम् । शीता रुचिर्यस्य स शीतरुचिः शीतरुचिपक्षे इन्द्रियशमश्चैकसुखं च इन्द्रियशमैकसुखे धृते इन्द्रियशमैकसुखे येन स धृ० ।इति वृत्तार्थः ॥ २० ॥

अधरीचकार च विवेकगुणादगुणेषु तस्य धियमस्तवतः ।
प्रतिघातिनीं विषयसंगरतिं निरुपप्लवः शमसुखानुभवः ॥ २१ ॥

'अधरी०' व्याख्या । **शमसुखानुभवः** उपशमसुखप्राप्तिः **तस्य** अर्जुनस्य **विषयसंगरतिं** भोगसंगतिप्रीतिम् **अधरीचकार** दूरीचकार किं० विषय० ? **प्रतिघातिनीं** विघ्नकारिणीं किं० शम० ? **निरुपप्लवः** विघ्नरहितः कल्याणकारक इत्यर्थः । तस्य किंकुर्वतः ? **विवेकगुणात्** ज्ञानगुणात् **अगुणेषु** कामक्रोधादिदोषेषु विषये **धियं** बुद्धिम् **अस्तवतः** निषेधयतः उत्कृष्टसुखलाभस्य प्रकृष्टवैराग्यहेतुत्वादिति भावः । **च**शब्दः पादपूरणे पूर्वकाव्यगतकर्तृपदाक्षेपको वा । अथ समासः । अनधराम् अधरां चकार इति अधरीचकार । विवेक एव गुणः विवेकगुणस्तस्मात् विवेकगुणात् । विषयस्य संगः विषयसंगः विषयसंगे रतिः विषयसंगरतिस्तां वि० । निर्गतः उपप्लवो यस्मात् स नि० । शम एव सुखं शमसुखं शमसुखस्य अनुभवः श० । इति वृत्तार्थः ॥ २१ ॥

मनसा जपैः प्रणतिभिः प्रयतः समुपेयिवानधिपतिं स दिवः ।
सहजेतरौ जयशमौ दधती बिभराम्बभूव युगपन्महसी ॥ २२ ॥

'मनसा०' व्याख्या । **सो**ऽर्जुनः **युगपत्**समकालं 'सहजेतरौ' **सहजं** तेजः क्षात्रसम् **इतरं** वीररसतेजश्च आगन्तुकं तपःसमुत्थं बाह्यं **महसी** द्वे तेजसी **बिभराम्बभूव** धारयामास किंकुर्वती महसी ? **जयशमौ** वीरशान्तौ **दधती** धारयतीत्यर्थः । स किं० ? **प्रयतः** नियमतत्परः पुनः किं० सः ? **मनसा** चेतसा चेतोवृत्या ध्यानेन वा **जपैः** शक्राराधनरूपैः मनोवाक्कायकर्मभिः **प्रणतिभिः** नमस्कारैः विशिष्टमन्त्रन्यासैर्वा कृत्वा **दिवः** स्वर्गस्य **अधिपतिं** स्वामिनम् इन्द्रं **समुपेयिवान्** उपसेदिवान् आराधयामास अत्र विरोधिनोर्वीरशान्तयो रसयोरधिकरणत्वाभिधानात् अस्य लोकाद्भुतमहिमत्वं व्यज्यते । अथ समासः । सहजं च इतरं च सहजेतरौ । जीयते अनेनेति जयः जयश्च शमश्च जयशमौ । इति वृत्तार्थः ॥२२॥

शिरसा हरिन्मणिनिभः स वहन् कृतजन्मनोऽभिषवणेन जटाः ।
उपमां ययावरुणदीधितिभिः परिमृष्टमूर्धनि तमालतरौ ॥ २३ ॥

'शिर०' व्याख्या । **सोऽर्जुनः तमालतरौ अरुणदीधितिभिः** सूर्यसारथिकिरणैः **परिमृष्टमूर्धनि** व्याप्तशिरसि 'सूरसूतस्तु काश्यपिः अनूरुर्विनतासूनुररुणो गरुडाग्रजः' इति *हैमः* [१०२] । स किंकुर्वन् ? **शिरसा** मस्तकेन **जटाः** केशरचनाविशेषान् **वहन्** धारयन् किं० जटाः ? **अभिषवणेन** नित्यस्नानेन **कृतजन्मनो** निष्पादिताः अतः पिशङ्गीरिति भावः । स किं० ? **हरिन्मणिनिभः** इन्द्रनीलमणिसदृशः तमालतरुसदृशोऽर्जुनः श्यामवर्णत्वात् अरुणकान्तिव्याप्ततमालशिरोविटपसदृशा जटाः पीतवर्णत्वात् । अथ समासः । हरिन्मणिनिभा इव निभा यस्य स ह० । कृतं जन्म याभिस्ताः कृतजन्मानः ताः कृत० । अरुणस्य दीधितयः अरुणदीधितयः ताभिः अ० । परिमृष्टो मूर्धा यस्य स परिमृष्टमूर्धा तस्मिन् प० । तमालश्चासौ तरुश्च तमालतरुस्तस्मिन् त० । इति वृत्तार्थः ॥ २३ ॥

धृतहेतिरप्यधृतजिह्ममतिश्चरितैर्मुनीनधरयन्गुरुभिः ।
रजयाञ्चकार विरजाः स मृगान् कमिवेशते रमयितुं न गुणाः ॥ २४ ॥

'धृत०' व्याख्या । **सोऽर्जुनः मृगान्** हरिणान् **रज[२]याञ्चकार** विश्वासयामास स किं० ? **धृतहेतिः** गृहीतशस्त्रोऽपि यदि गृहीतायुधः तत्कथं मृगान् अरजयत् ? इत्याह- पुनः किं० सः ? **अधृतजिह्ममतिः** अगृहीतकुटिलबुद्धिः स किंकुर्वन् ? **गुरुभिः** महद्भिश्च**रितैः** तपःशमनियमादिभिः **मुनीन्** ऋषीन् **अधरयन्** तिरस्कुर्वन् अनेन वेषेणैव भीषणो न तु कर्मणेति भावः । कुतः पुनः किं० ? **विरजाः** रजोगुणरहितः 'रजो रेणुपरागयोः स्त्रीपुष्पे गुणभेदे च' इति *हैमानेकार्थः* [२-५७५] । यतो हेतोः **गुणाः** दयादयः **कमिव रमयितुं** वशीकर्तुं **न ईशते** समर्था न भवन्ति अपितु सर्वमपि वशीकर्तुं शक्नुवन्तीति भावः । भावशुद्धिरेव परं विश्वासबीजं परस्परं न वेषो नापि संस्तव इति तात्पर्यम् । अथ समासः । धृता हेतयो येन स धृतहेतिः हेतिशब्दः पुंस्त्रीलिङ्गः । 'रचिरर्चिषि वह्नेश्च ज्वालायां नृस्त्रियोः पुनः शस्त्रे हेति समाख्यात्' इति *क्षीरस्वामी* । जिह्माश्च ता मतयश्च जिह्ममतयः न धृता जिह्ममतयो येन सः अ० । विगतं रजो यस्मात् स विरजाः । इति वृत्तार्थः ॥ २४ ॥

अथ त्रिभिः काव्यैः तपःसिद्धिमाह -

[1]अनुलोमपातिनमचण्डगतिं किरता सुगन्धिमभितः पवनम् ।
अवधीरितार्तवगुणं सुखतां नयता रुचां निचयमंशुभृतः ॥ २५ ॥

नवपल्लवाञ्जलिभृतः प्रचये बृहतस्तरून् गमयताऽवनतिम् ।
स्तृणता तृणैः प्रतिनिशं मृदुभिः शयनीयतामुपयतीं वसुधाम् ॥ २६ ॥

पतितैरपेतजलदान्नभसः पृषतैरपां शमयता च रजः ।
स दयालुनेव परिगाढकृशः परिचर्ययानुजगृहे तपसा ॥ २७ ॥

1. अनुकूल० -म. इदं च पा. ।

१. तरोरौपम्याधिकरणत्वात्तदपेक्षया सप्तमी -म. । २. णौ मृगरमणे सि ४-२-५१ सूत्रेण अत्र नकारलोपः ।

'अनु०' नव० पति० व्याख्या । **तपसा** कर्त्रा कृच्छ्रादिकर्मणा 'तपः कृच्छ्रादिकर्मणि' इति *हैमानेकार्थः* [२-५६७] । **सोऽर्जुनः** कर्म **अनुजगृहे** अनुगृहीतः प्रसादित इत्यर्थः । कया **परिचर्यया** उक्तविधया भक्त्या किं० तपसा ? उत्प्रेक्ष्यते **दयालुना** दयाव**तेव** यथा दयावता सख्यादिना केनचित् हेतुना परिगाढकृशः कश्चित् दीनः परिचर्यया अनुगृहीतो भवति इत्युत्प्रेक्षा । किमिति दयालुनेत्याह– स किं० ? **परिगाढकृशः** अत्यन्तदुर्बलः तपसा किंकुर्वता ? **अपानां** जलानां **पृषतै**र्बिन्दुभिः **रजो** रेणुं **शमयता** स्फेटयता किं० पृषतैः ? **नभसो** गगनात् **पतितैः** गलितैः किं० नभसः ? **अपेतजलदात्** निर्गतमेघात् । अथ समासः । अपेता जलदा यस्मात् तत् अपेतजलदं तस्मात् अ० । दयाऽस्यास्तीति दयालुः तेन दयालुना 'शीङ्श्रद्धा' इत्यनेन सूत्रेण आलुप्रत्ययः, नामत्वात् पश्चात् तृतीयैकवचनं टानास्त्रियामित्यनेन टाना । परि समन्तात् गाढं कृशः परिगाढकृशः । इति वृत्तार्थः ॥ २७ ॥

पुनः किंकुर्वता तपसा ? **प्रचये** पुष्पावचयसमये **बृहतः** उच्चान् **तरून्** वृक्षान् **अवनतिं** नम्रतां **गमयता** प्रापयता यो हि नमति स अञ्जलिं बध्नातीत्याह– किं० तरून् ? **नवपल्लवाञ्जलिभृतः** नूतनकिसलयरूपकरसंपुटं दधानान् 'अञ्जलिस्तु कुडवे करसंपुटे' इति *हैमानेकार्थः* [३-६१७] । पुनः किं० तपसा ? **प्रतिनिशं** रात्रौ **मृदुभिः** कोमलैः **तृणैः** दूर्वाङ्कुरादिभिः **वसुधां** भूमिं **स्तृणता** आच्छादयता किं० वसुधाम् ? **शयनीयतां** शय्याभावम् **उपयतीं** प्राप्तवन्तीं शयनस्थानभूतामित्यर्थः । अथ समासः । नवाश्च ते पल्लवाश्च नवपल्लवाः नवपल्लवा एव अञ्जलयो नवपल्लवाञ्जलयो नवपल्लवाञ्जलिं बिभ्रतीति नवपल्लवाञ्जलिभृतस्तान् न० । अवनमनम् अवनतिस्ताम् अ० । निशं निशं प्रति इति प्र० । शयनीयस्य भावः शयनीयता तां श० । उपैतीति उपयती तामु० । इति वृत्तार्थः ॥ २६ ॥

पुनः किं० तपसा ? **अभितः** समन्तात् **सुगन्धिं** सुरभिं **पवनं** वातं **किरता** मुञ्चता प्रवर्ततेत्यर्थः । एतेन तपसः सुखकारित्वोक्तिः । किं० पवनम् ? **अनुलोमपातिनम्** अनुकूलगामिनं पृष्ठानुगामिनमित्यर्थः । पुनः किं० पवनम् ? **अचण्डगतिम्** अतीव्रगतिं मन्दगामिनमित्यर्थः। पुनः किं० तपसा ? **अंशुभृतः** सूर्यस्य **रुचां** कान्तीनां **निचयं** समूहं **सुखतां** सुखस्पर्शतां **नयता** प्रापयता नयतिः द्विकर्मकः । किं० निचयम् ? **अवधीरितार्तवगुणं** परित्यक्तग्रीष्मकालीनसंतापगुणं शीते मन्दता प्रावृषि तदभावः ग्रीष्मे प्रचण्डतागुणः तमपहाय समवृतितां गतः इति तात्पर्यार्थः । अथ समासः । अनुलोमं पततीति अनुलोमपाती तम् अनु० । अचण्डा गतिर्यस्य सोऽचण्डगतिस्तम् अ० । सुष्ठु शोभनो गन्धो यस्य स सुगन्धिस्तं सु० । ऋतौ भव आर्तव आर्तवश्च असौ गुणश्च आर्तवगुणः अवधीरित आर्तवगुणो येन स अवधीरितार्तवगुणस्तम् अ० । सुखस्य भावः सुखता तां सु० । अंशून् बिभर्तीति अंशुभृत् तस्य अं० । इति वृत्तार्थः ॥ २५ ॥ त्रिभिर्विशेशकम् ।

महते फलाय तदवेक्ष्य शिवं विकसन्निमित्तकुसुमं स पुरः ।
न जगाम विस्मयवशं वशिनां न हि[1] हन्ति धैर्यमनुभावगुणः ॥ २८ ॥

१. अत्र श्लोकत्रयस्याप्येकवाक्यत्वादुत्प्रेक्षैव प्रधानालंकारः -म. 1. निहन्ति -म. इदं च पा०

तदभूरिवासरकृतं सुकृतैरुपलभ्य वैभवमनन्यभवम् ।
उपतस्थुराहितविषादधियः शतयज्वनो वनचरा वसतिम् ॥ २९ ॥

विदिताः प्रविश्य विहितानतयः शिथिलीकृतेऽधिकृतकृत्यविधौ ।
अनपेतकालमभिरामकथाः कथयाम्बभूवुरिति गोत्रभिदे ॥ ३० ॥

'महते०' व्याख्या । **सोऽ**र्जुनो **विस्मयवशम्** आश्चर्यवशं **न जगाम** न ययौ सगर्वो न बभूवेत्यर्थः। किंकृत्वा ? **पुरो**ऽग्रे **महते फलाय** महल्लाभाय श्रेयसे च **विकसत्** विकासं गच्छत् तत्पूर्वश्लोकत्रयोक्तं **शिवं** कल्याणकारि शोभनं च **निमित्तकुसुमं** निमित्तरूपपुष्पम् **अवेक्ष्य** दृष्ट्वा विस्मयवशं कथं न जगामेत्याह- **हि** यस्मात् कारणात् **अनुभावगुणः** प्रभावादि**र्वशिनां** जितेन्द्रियाणां **धैर्यं** धीरत्वं **न हन्ति** न विनाशयति विस्मयादिविकारं न जनयतीत्यर्थः । जनने वा तपःक्षयः । 'तपः क्षरति विस्मयात्' इति *स्मरणात्* इति भावः । अथ समासः । निमित्तमेव कुसुमं नि० । विस्मयस्य वशं वि० । इन्द्रियाणि वशे येषां ते वशिनस्तेषां व० । धीरस्य भावो धैर्यम् । अनुभाव एव गुणः अनुभावगुणः । इति वृत्तार्थः ॥२८॥

तद० व्याख्या । **वनचराः** इन्द्रोद्यानपालकाः **शतयज्वनः** इन्द्रस्य **वसतिं** स्थानम् **उपतस्थुः** प्रापुः किंकृत्वा ? **सुकृतैः** तपोभिः कृत्वा **अभूरिवासरकृतं** स्वल्पदिनैर्विहितं **तत्** पूर्वोक्तम् अनुलोमपातिनमित्यादि । **वैभवं** प्रभुताम् **उपलभ्य** निश्चित्य ज्ञात्वा किं० वैभवम् ? **अनन्यभवम्** अपरभवम् अपरासमानभूतमिति भावः । किं० वनचराः ? वैभवदर्शनात् **आहितविषादधियः** प्राप्तोद्वेगबुद्धयः क्वचिदास्थि[1]तविषादधियः इति पाठस्तत्र **आस्थिता** अङ्गीकृता विषादाकुला धीयैस्ते आ०। अथ समासः । न भूरयः अभूरयः अभूरयश्च ते वासराश्च अभूरिवासराः अभूरिवासरैः कृतः अभूरिवासरकृतः तम् अभूरिवासरकृतम् । विभव एव वैभवस्तं वैभवम् । न अन्यस्य भवतीति अनन्यभवम् । आहितो विषादो याभिस्ता आहितविषादाः आहितविषादा धियो येषां ते आ० । शतेन शतस्य वा यज्ञानां यजति स्मेति शतयज्वा तस्य श० । वने चरतीति वनचराः अलुक् क्वचित् इति क्वचित् ग्रहणात् विभक्तेर्लुक् । इति वृत्तार्थः ॥ २९ ॥

विदि० व्याख्या । ते पूर्वश्लोकोक्ताः वनेचराः **अधिकृतकृत्यविधौ** नियुक्तकर्मणः शैलरक्षणात्मकस्यानुष्ठाने प्रस्तुतकार्यारम्भे इत्यर्थः । **शिथिलीकृते** समाप्तीकृते सति **अनपेतकालम्** अनतिक्रान्तसमयं सादरं यथा स्यात् तथा **गोत्रभिदे** इन्द्राय **इति** वक्ष्यमाणेन प्रकारेण **कथयाम्बभूवुः** कथयामासुः किं० वनेचराः ? **अभिरामकथाः** सुन्दरकथाः श्रव्यवाच इत्यर्थः । पुनः किं० वनेचराः ? **विदिता** द्वारपालेन कथिताः पुनः किं० वनेचराः ? अनुमतप्रवेशाः सन्तः **प्रविश्य** प्रवेशं कृत्वा **विहितानतयः** कृतप्रणामाः । अथ समासः। विहिता आनतयो यैस्ते वि० । कृत्यस्य विधिः कृत्यविधिः अधिकृता कृत्यविधिः अधिकृतकृत्यविधिः तस्मिन् अ०। न अपेतः कालो यस्मिन् तत् अ० । अभिरामाश्च ताः कथाश्च अ० । गोत्रान् भिनत्तीति गोत्रभिद् तस्मै गो०। इति वृत्तार्थः ॥३०॥

1. एष पाठः -म. मध्ये इदं च पा. ।

वनेचराः किमूचुरित्याह -

शुचिवल्कवीतवपुरन्यतमस्तिमिरच्छिदामिव गिरौ भवतः ।
महते जयाय मघवन्ननघः पुरुषस्तपस्यति तपन् जगतीम् ॥ ३१ ॥

'शुचि०' व्याख्या । **हे मघवन्** ! हे इन्द्र ! **भवतः गिरा**विन्द्रकीले कश्चन **पुरुषः** पुमान् **महते जयाय** महासिद्ध्यै **तपस्यति** तपश्चरति । किदृशः पुरुषः ? **अनघः** निष्पापः पुरुषः किंकुर्वन् ? **जगतीं** पृथिवीं **तपन्** संतापयन् किं० पुरुषः ? **शुचिवल्कवीतवपुः** पवित्रवल्कलवेष्टितशरीरः पुनः किं० पुरुषः ? **तिमिरच्छिदां** सूर्यसोमादीनां मध्यात् **अन्यतमो**ऽन्यतर इव स्थितः इत्युत्प्रेक्षा । अथ समासः । शुचि च तत् वल्कं च शुचिवल्कं शुचिवल्केन वीतं वपुर्येन यस्य वा स शुचिवल्कवीतवपुः । अतिशयेन अन्योऽन्यतमः । तिमिरं छिन्दतीति तिमिरछिदः तेषां ति० । मघं कैतवम् अस्यास्तीति मघवान् तत्संबोधनं हे मघवन् ! । न विद्यते अघं यस्य स अनघः । इति वृत्तार्थः ॥ ३१ ॥

जयाय तपस्यतीत्युक्तं तत्र युक्तिमाह -

स बिभर्ति भीषणभुजङ्गभुजः पृथु विद्विषां भयविधायि धनुः ।
अमलेन तस्य धृतसच्चरिताश्चरितेन चातिशयिता मुनयः ॥ ३२ ॥

'स बि०' व्याख्या । हे मघवन् ! **स** पुमान् **विद्विषां** शत्रूणां **भयविधायि** त्रासकारि नान्येषामिति भावः । **पृथु** महत् **धनुः** चापं **बिभर्ति** धारयति ततो जयाभिलाषीत्यर्थः । स किं० ? **भीषणभुजङ्गभुजः** भयङ्करसर्पबाहुः यद्येवं तर्हि न तपस्यतीत्याह **तस्य** पुरुषस्य **अमलेन** निर्मलेन **चरितेन** तपस्यालक्षणेनाचारेण **मुनयः** ऋषयः **अतिशयिताः** अतिक्रान्ताः किं० मुनयः ? **धृतसच्चरिताः** गृहीतसदाचाराः । अथ समासः । भीषणौ च तौ भुजङ्गौ च भीषणभुजङ्गौ भीषणभुजङ्गाविव भुजौ यस्य स भी० । भयं विदधातीति भयविधायि । सन्ति च तानि चरितानि सच्चरितानि धृतानि सच्चरितानि यैस्ते धृ० । इति वृत्तार्थः ॥३२॥

अथास्य तपःसिद्धिं वर्णयति -

मरुतः शिवा नवतृणा जगती विमलं नभो रजसि वृष्टिरपाम् ।
गुणसंपदानुगुणतां गमितः कुरुतेऽस्य भक्तिमिव भूतगणः ॥ ३३ ॥

'मरु०' व्याख्या । हे मघवन् ! **भूतगणः** पृथिव्यप्तेजोवायव्याकाशलक्षणपञ्चमहाभूतसमुदायः **अस्य** पुरुषस्य **भक्तिं** सेवामिव **कुरुते** करोति किं० भूतगणः ? **गुणसंपदा** गुणवृद्ध्या भूतहितादिगुणसंपत्या **अनुगुणताम्** अनुकूलतां **गमितः** प्रापितः स्वगुणगौरवेण वशीकृत इत्यर्थः । लोकेऽपि यः कश्चन कस्याप्युत्कृष्टगुणेन वशीकृतः स तस्य हितमाचरतीति ध्वनिः । तथाहि- **मरुतो** वाताः **शिवाः** सानुकूलाः सुखकारिणो वर्तन्ते । पुनः **जगती** पृथ्वी **नवतृणा** शयनासनाद्यनुकूलेत्यर्थः । पुनः **नभो** गगनं **विमलं** निर्मलं वर्तते अवश्यायरहितमित्यर्थः । पुनः **रजसि** धूल्याम् **अपां** पानीयानां **वृष्टि**र्वर्षणं भवति । किं

1. तनुः -म. इदं च पा. ।

बहुधा कथ्यते इति शेषः । अथ समासः । नवानि तृणानि यस्यां सा नवतृणा । गुणस्य संपत् गुणसंपत् तया गु० । अनुगुणस्य भावो अनुगुणता ताम् अ० । भूतानां गणः भूतगणः । इति वृत्तार्थः ॥ ३३ ॥

इतरेतरानभिभवेन मृगास्तमुपासते गुरुमिवान्तसदः ।
विनमन्ति चास्य तरवः प्रचये परवान् स तेन भवतेव नगः ॥ ३४ ॥

'इत०' व्याख्या । हे मघवन् ! **मृगा** हरिणा **इतरेतरानभिभवेन** अन्योन्यमद्रोहेण **तं** पुरुषम् **उपासते** सेवन्ते के इव ? अन्तसद **इव** यथा **अन्तसदो**ऽन्तेवासिनः शिष्याः **गुरुं** विद्याचार्यम् उपासते अन्योन्यविरोधपरिहारेण सेवन्ते इत्यर्थः । **च** पुनः **प्रचये** देवतापूजनार्थं पुष्पावचये **तरवो** वृक्षाः **अस्य** पुरुषस्य **विनमन्ति** प्रणमन्ति नम्रीभवन्तीत्यर्थः । करग्रहयोग्या भवन्तीति भावः । किंबहुनोक्तेन ? **स नगः** इन्द्रकीलपर्वतः **तेन** पुरुषेण **भवता** यथा **परवान्** वर्तते तथा । यथा स नगस्त्वया नाथवान् तथा तेनापीत्यर्थः । अथ समासः । इतरे च इतरे च इतरेतरे न अभिभवः अनभिभवः इतरेतरेषाम् अनभिभवः इ० तेन इ० । अन्ते समीपे अध्ययनार्थं सीन्दन्ति उपविशन्तीति अन्तसदः । इति वृत्तार्थः ॥३४॥

उरुसत्त्वमाह विपरिश्रमता परमं वपुः प्रथयतीव जयम् ।
शमिनोऽपि तस्य नवसंगमने विभुतानुषङ्गि भयमेति जनः ॥ ३५ ॥

'उरु०' व्याख्या । हे मघवन् ! **विपरिश्रमता** निष्खेदता अश्रमतेति यावत् । **तस्य** पुरुषस्य **उरुसत्त्वं** महद्बलम् **आह** ब्रूते अन्तःसारं कथयति इत्यर्थः । दुर्बलस्य श्रमताया संभवात् । **वपुः** शरीरं **जयं** विजयं **प्रथयति** कथयति **इव** वपुः किं० ? **परमम्** उत्कृष्टम् आकारणैव जिष्णुत्वं गम्यते । **शमिनोपि** शमवतोऽपि तस्य पुरुषस्य **नवसंगमने** नूतनमेलापने **जनो** लोकः **विभुतानुषङ्गि** प्रभुतासंबन्धि **भयं** भीतिम् **एति** प्राप्नोति अपरिचितो जनः तं पश्यन् राज्ञ इव बिभेतीत्यर्थः । अथ समासः । विगतः परिश्रमो यस्मात् स विपरिश्रमः विपरिश्रमस्य भावो वि० । परमा उत्कृष्टा लक्ष्मीः शोभा यस्य तत् परमम् । नवं च तत् संगमनं च नवसंगमनं तस्मिन् न० । विभोर्भावो विभुता विभुतायाः अनुषङ्गि वि० । इति वृत्तार्थः ॥ ३५ ॥

अथैवंलक्षणः कोऽसाविति चेत् न जानीम इत्याह -

ऋषिवंशजः स यदि दैत्यकुले यदि वाऽन्वये महति भूमिभुजाम् ।
चरतस्तपस्तव वनेषु सहा न वयं निरूपयितुमस्य गतिम् ॥ ३६ ॥

'ऋषि०' व्याख्या । हे मघवन् ! **सः** पुरुषः **ऋषिवंशजो** मुनिवंशजो वर्तते **यदी**ति संभावनायां **दैत्यकुले** दानववंशे जात इति शेषः । **यदि वे**ति पक्षान्तरे **महति** गुरौ **भूमिभुजां** राज्ञाम् **अन्वये** सोमसूर्यादिवंशे जातः । अतो हेतोः **तव** भवतः **वनेषु** काननेषु **तपः चरतः** कुर्वतः **अस्य** पुरुषस्य **गतिं** स्वरूपं **निरूपयितुं** कथयितुं **वयं न सहाः** न समर्थाः स्म इति शेषः । अथ समासः । ऋषीणां वंशः

ऋषिवंशः ऋषिवंशे जाताः ऋ० । दैत्यानां कुलं दैत्यकुलं तस्मिन् दै० । भूमिं भुञ्जन्तीति भूमिभुजस्तेषां भूमिभुजाम् । इति वृत्तार्थः ॥ ३६ ॥

'पर[१]वान् तेन भवतेव नग' (का. ३४) इत्यादिकमनुचितं विज्ञाय भयमाशङ्कमानाः कथयितुमाह-

विगणय्य कारणमनेकगुणं निजयाऽथवा कथितमल्पतया ।
असदप्यदः सहितुमर्हसि नः क्व वनेचराः क्व निपुणा म[1]तयः ॥ ३७ ॥

'विगण०' व्याख्या । हे मघवन् ! त्वं **नो**ऽस्माकम् **असदपि** अप्रियमपि **अदः** इदं वचनं **सहितुं** क्षमितु**मर्हसि** योग्यो भवसि इदं विरुद्धमपि वचनं श्रुत्वा त्वं कोपं कर्तुं नार्हसीत्यर्थः। किं० अदः ? **अनेकगुणं** बहुफलम् इन्द्रत्वाद्यनेकफलसाधनयोग्यं **कारणं** तपोरूपं **विगणय्य** विचार्य **कथितं** जल्पितम् **अथवा निजया** स्वकीयया **अल्पतया** कथितं तर्हि निपुणमेव कथं नोक्तम् ? तत्राह- **वनेचराः क्व निपुणा मतयः** विवेकबुद्धयः क्व नोभयं संगच्छत इत्यर्थः । एकस्मिन् काव्ये द्वौ क्वशब्दौ महदन्तरं सूचयतः । अत एवाज्ञानं नापराध्यतीति भावः । अथ समासः । अनेके गुणा यस्य तत् अ० । अल्पस्य भावो अल्पता तया अल्पतया । इति वृत्तार्थः ॥ ३७ ॥

अव[2]गम्य गुह्यकगणादिति तन्मनसः प्रियं प्रियसुतस्य तपः ।
निजुगोप हर्षमुदितं मघवा नयवर्त्मगाः प्रभवतां हि धियः ॥ ३८ ॥

'अवग०' व्याख्या । **मघवा** इन्द्रः **उदितं** तत्तपसो देवकार्यादुत्पन्नं **हर्षमा**नन्दं **निजुगोप** ररक्ष आच्छादयति स्म अन्यथा मन्त्रभेदे कार्यहानिः स्यादिति भावः । किंकृत्वा ? **गुह्यकगणात्** यक्षसमूहात् **इति** पूर्वोक्तं **प्रियसुतस्य** अर्जुनस्य **तपस्**तपश्चरणम् **अवगम्य** अधिगम्य श्रुत्वा क्वचिद्'उपलभ्य' इति पाठः तत्र **उपलभ्य** ज्ञात्वा किं० तपः ? **मनसः प्रियं** चित्तस्य सुखकारित्वात् वल्लभं **हि** यस्मात् कारणात् **प्रभवतां** प्रभूणां **धियो** बुद्धयः **नयवर्त्मगाः** नीतिमार्गानुसारिण्यो भवन्ति । अथ समासः । गुह्यकानां गणो गुह्यकगणस्तस्मात् गु० । प्रियश्चासौ सुतश्च प्रियसुतस्तस्य प्रि० । नयस्य वर्त्म नयवर्त्म नयवर्त्मनि गच्छन्ति ताः न० । इति वृत्तार्थः ॥ ३८ ॥

प्रणिधाय चित्तमथ भक्ततया विदितेऽप्यपूर्व इव तत्र हरिः ।
उपलब्धुमस्य नियमस्थिरतां सुरसुन्दरीरिति वचोऽभिदधे ॥ ३९ ॥

'प्रणिधाय०' व्याख्या । **अथा**नन्तरं **हरि**रिन्द्रः **सुरसुन्दरीः** देवाङ्गनाः **इति** वक्ष्यमाणं **वचो** वचनं **अभिदधे** उवाच किंकर्तुम् ? **अस्या**र्जुनस्य **नियमस्थिरतां** तपःस्थैर्यम् **उपलब्धुं** ज्ञातुं परीक्षितुमित्यर्थः। लोकप्रतीत्यर्थमिति भावः । स्वयं तस्यान्तःकरणस्थैर्यं जानात्येवेत्यर्थः । किंकृत्वा ? **तत्र** तस्मिन् अर्जुने **चित्तं** मनः **प्रणिधाय** विषयान्तरपरिहारेण आत्मनि अवस्थाप्य आरोप्य किं० तत्र ? **भक्ततया विदिते**

1. यतयः -म. । 2. अधि० -म. ।

१. अपृष्टपरिभाषणापराधं परिहरन्ति -म. ।

सत्यपि अपूर्व इव अज्ञातपूर्व इव अविदिते सतीत्यर्थः । मदाराधनाय तपस्यतीति प्रणिधानेन ज्ञातेऽपि अज्ञात इव इति भावः । अथ समासः । भक्तस्य भावो भक्तता तया भक्ततया । स्थिरस्य भावो स्थिरता नियमस्य स्थिरता नियमस्थिरता तां नि० । सुराणां सुन्दर्यः सुरसुन्दर्यः ताः सुरसुन्दरीः । इति वृत्तार्थः ॥३९॥

महत्कार्ये विनियुञ्जानः उत्साहार्थं प्रशंसां कुर्वन् इन्द्रः किमुवाचेत्याह -

सुकुमारमेकमणु मर्मभिदामतिदूरगं युतममोघतया ।
अविपक्षमस्त्रमपरं कतमद्विजयाय यूयमिव चित्तभुवः ॥ ४० ॥

'सुकुमार०' व्याख्या । हे सुरसुन्दर्यः ! **चित्तभुवः** कन्दर्पस्य **विजयाय** जयाय **अपर**मन्यत् **यूयमिव** युष्मत्सदृशं **कतमत्** किम् **अस्त्रमा**युधं वर्तते अस्य युष्मत्सदृशमन्यदस्त्रं जयाय न वर्तते इत्यर्थः। किं० अ० ? **सुकुमारं** कोमलं न तु कठिनम् अन्यत्तु पुनः किं० अस्त्रम् ? **एकं** मुख्यं वा एकं न बहु तत्तु अनेकं भवति । पुनः किं० अस्त्रम् ? **अणु** सूक्ष्मं न स्थूलम् अलक्ष्यप्रदेशत्वात् तत् लक्ष्यं कठिनं च । पुनः किं० अस्त्रम् ? **मर्मभिदां** मर्मच्छेदिनाम् अस्त्रान्तराणां मध्ये **अतिदूरगम्** अत्यन्तदूरलक्ष्यभेदि यतोऽन्यत्तु समीपलक्ष्यभेदि दूरवर्तिनामपि प्राणिनां वशीकरणमित्यर्थः । पुनः किं० अस्त्रम् ? **अमोघतया** सफलतया **युतं** युक्तं न कदाचित् लक्ष्याद्व्यभिचरतीति भावः । अन्यत्तु लक्ष्यात्कदाचित् व्यभिचरति । पुनः किं० अस्त्रम् ? **अविपक्षं** शत्रुरहितम् अविद्यमानप्रतीकारमित्यर्थः[१] । अथ समासः। मर्माणि भिदन्तीति मर्मभिदस्तेषां म० । अतिशयेन दूरं गच्छतीति अ० । मोघस्य भावो मोघता न मोघता अमोघता तया अ० । न विद्यन्ते विपक्षा यस्य तत् अविपक्षम् । चित्ते भवतीति चित्तभूस्तस्य चि० । इति वृत्तार्थः ॥ ४० ॥

तासामसामर्थ्यभ्रान्तिं वारयति -

भववीतये हतबृहत्तमसामवबोधवारि रजसः शमनम् ।
परिपीयमाणमिव वोऽसकलैरवसादमेति नयनाञ्जलिभिः ॥ ४१ ॥

'भव०' व्याख्या । हे सुरसुन्दर्यः ! भववीतये संसारावतरणनिवृत्तये **हतबृहत्तमसां** स्फेटितमहापापानां मुनीनाम् **अवबोधवारि** ज्ञानरूपजलं **वो** युष्माकम् **असकलै**रसमग्रैः **नयनाञ्जलिभिः** नेत्रकरसंपुटैः **परिपीयमाणमिव** पेपीयमानमिव **अवसादं** नाशम् **एति** प्राप्नोति युष्माभिः कटाक्षनिरीक्षितानां मुमुक्षूणां सम्यग् ज्ञानं नश्यतीत्यर्थः । किं० अवबो० ? **रजसः शमनं** रजोगुणस्य नाशनम्[२] । अथ समासः। भवस्य वीतिः भववीतिस्तस्यै भ० । बृहत् तमश्च बृहत्तमः हतं बृहत्तमो यैस्ते हतबृहत्तमसस्तेषां ह०। अवबोध एव वारि अ० । न सकलाः असकलाः तैर० । नयनान्येवाञ्जलयो नयनाञ्जलयस्तैः न० । इति वृत्तार्थः ॥ ४१ ॥

१. अत्रोपमालंकारः । साभिप्रायविशेषणत्वात् परिकरालंकारश्च । तयोरङ्गाङ्गिभावेन संकरः -म. । २. रजो धूलिः इति श्लिष्टरूपकम् । अत्रोत्प्रेक्षारूपकयोः संकरः -म. ।

बहुधा गतां जगति भूतसृजा कमनीयतां समुपहृत्य पुरा ।
उपपादिता विदधता भवतीः सुरसद्मयानसुमुखी जनता ॥ ४२ ॥

'बहु०' व्याख्या । हे सुरसुन्दर्यः ! **भूतसृजा** ब्रह्मणा **भवती**र्युष्मान् **विदधता** कुर्वता सता **जनता** जनसमूहः **सुरसद्मयानसुमुखी** स्वर्लोकगमनप्रवणा **उपपादिता** कृता लोका युष्मान् कृत्वा स्वर्गं वाञ्छन्तीत्यर्थः । स्वर्गस्यापि भवत्प्रसादादेव सर्वलोकविश्रामत्वम् अतो वः कथमसामर्थ्यमिति भावः । किंकृत्वा विहिता ? तत्राह- **जगति** पृथिव्यां **बहुधा गतां** शशिकमलादौ अनेकस्मिन् वस्तुनि निक्षिप्तां **कमनीयतां** सुन्दरतां **पुरा** पूर्वं **समुपहृत्य** संगृह्य कृता[1] । अथ समासः । बहुभिः प्रकारैः बहुधा बहुधा गता बहु० तां बहुधागताम् । भूतान् सृजतीति भूतसृक् तेन भूतसृजा । कमनीयस्य भावः कमनीयता तां क० । सुराणां सद्म सुरसद्म सुरसद्मनि यानं सुरसद्मयानं सुरसद्मयाने सुमुखी सुर० । जनानां समूहो जनता । इति वृत्तार्थः ॥ ४२ ॥

अथ कार्याशयमाह -

तदुपेत्य विघ्नयत तस्य तपः कृतिभिः कलासु सहिताः सचिवैः ।
हृतवीतरागमनसां ननु वः सुखसङ्गिनं प्रति सुखा विजितिः[2] ॥४३॥

'तदु०' व्याख्या । हे सुरसुन्दर्यः ! यूयं **तत्** तस्मात् समर्थत्वात् **उपेत्य** गत्वा **तस्य** पुरुषस्य **तपो विघ्नयत** विघ्नयुक्तं कुरुत किं० यूयम् ? **सचिवै**र्मदीयैर्गन्धर्वैः **सहिताः** संयुक्ताः सचिवैः किं० ? **कलासु** गीतनृत्यवादित्रादिषु **कृतिभिः** कुशलैः न च भवत्यः तत्रासमर्था इत्याह- **नन्वि**ति निश्चयेन **वो** युष्माकं **विजिति**र्विजयः **सुखसङ्गिनं** सुखाभिलाषिणं पुरुषं **प्रति सुखा** सुखकरा न तु दुष्करा किं० वः ? **हृतवीतरागमनसां** वशीकृतमुनिमनसाम् एतेनायं सुखार्थी न मुमुक्षुरित्युक्तम् । अथ समासः । वीतो रागो येभ्यस्ते वीतरागाः वीतरागाणां मनांसि वीत० हृतानि वीतरागमनांसि याभिस्ता हृतवीतरागमनसः तासां हृ० । सुखस्य संगोऽस्यास्तीति सुखसंगी तं सु० । इति वृत्तार्थः ॥ ४३ ॥

कथं ज्ञायेत ? असौ सुखसंगीत्याह -

अविमृश्यमेतदभिलष्यति न द्विषतां वधेन विषयातिशयम् ।
भववीतये न हि तथा स विधिः क्व शरासनं क्व च विमुक्तिपथः ॥ ४४ ॥

'अवि०' व्याख्या । हे सुरसुन्दर्यः ! **एतद्** इदम् **अविमृश्यम्** असंदिग्धं वर्तते विचार्यं न भवतीत्यर्थः । एतत् किम् ? **स** पुरुषः **द्विषतां** शत्रूणां **वधेन** घातेन **विषयातिशयं** विषयसुखम् **अभिलष्यति** वाञ्छति **हि** यस्मात् कारणात् स **विधिः** 'स बिभर्ती' (का० ३२)त्यादिश्लोकोक्तानुष्ठानप्रकारो **भववीतये** संसारोच्छेदनाय **न** भवति कुत इत्याह- **शरासनं** धनुः **क्व च** पुनः **विमुक्तिपथो** मोक्षमार्गः

1. समभि० -म. इदं च पा० । 2. सुखावजितिः -म. इदं च पा. ।

१. अत्राप्सरसां प्रकीर्णलावण्यसंग्रहासंबन्धेऽपि संबन्धाभिधानादतिशयोक्तिः -म. ।

क्व नोभयम् एकत्र संगच्छति परस्परविरुद्धत्वात्। न खलु हिंसासाध्या मुक्तिरिति भावः । अथ समासः । विषयस्य अतिशयः विषयातिशयः तं वि० । भवस्य भीतिः भवभीतिस्तस्यै भ० । विमुक्तेः पन्थाः वि० । इति वृत्तार्थः ॥ ४४ ॥

न च शापमपि संभाव्यमस्मादित्याह -

पृथुधाम्नि तत्र परिबोधि च मा भवतीभिरन्यमुनिवद्विकृतिः ।
स्वयशांसि विक्रमवतामवतां न वधूष्वघानि विमृशन्ति धियः ॥ ४५ ॥

'पृथु०' व्याख्या । **भवतीभिः** युष्माभिः **तत्र** तस्मिन् पुरुषे विषये **अन्यमुनिवत्** विश्वामित्र-दुर्वासादिवत् **विकृति**र्विकारः क्रोधातिशयो भवतीति । **मा परिबोधि** मा शङ्कि किं० तत्र ? **पृथुधाम्नि** विशालतेजसि तथाहि- **स्वयशांसि** निजयशांसि **अवतां** रक्षतां यशोधनानामिति शेषः । **विक्रमवतां** पराक्रमवतां पुसां **धियो** बुद्धयः **वधूषु** स्त्रीषु विषये **अघानि** व्यसनानि **न विमृशन्ति** न स्पृशन्ति न चिन्तयतीत्यर्थः । **च**शब्दः पादपूरणे । अयं भावः-शूराणां स्त्रियः हिंसायाः यशोहानिकरत्वात् स सर्वथा वो न हिनस्तीत्यर्थः । अथ समासः । पृथु धाम यस्य स पृथुधामा तस्मिन् पृ० । अन्यमुनिषु वत् अन्यमुनिवत् । स्वानि च तानि यशांसि च स्व० । विक्रमो विद्यते येषां ते विक्रमवन्तस्तेषां वि० । अवन्ति ते अवन्तस्तेषाम् अ० । इति वृत्तार्थः ॥ ४५ ॥

आशंसितापचितिचारु पुरः सुराणामादेशमित्यभिमुखं समवाप्य भर्तुः ।
लेभे परां द्युतिममर्त्यवधूसमूहः संभावना ह्यधिकृतस्य तनोति तेजः ॥४६॥ (व०)

'आशं०' व्याख्या । **अमर्त्यवधूसमूहो** देवाङ्गनागणः **परां** प्रकृष्टां **द्युतिं** कान्तिं **लेभे** प्राप देवाङ्गनाः पूर्वमेव शोभावत्यः इदानीं ततोऽप्यधिकां शोभां प्रापुरिति भावः । किंकृत्वा ? **सुराणां** देवानां **पुरो**ऽग्रे **आशंसितापचितिचारु** कृतार्चा चारु यथा स्यात् तथा 'अपचितिः व्यये हानौ पूजायां निष्कृतावपि' इति *हैमानेकार्थः* [४-९८] । **इति** पूर्वोक्तप्रकारेण **अभिमुखं** सन्मुखं भर्तुः इन्द्रस्य **आदेश**माज्ञां **समवाप्य** प्राप्य **हि** यस्मात् कारणात् **अधिकृतस्य** क्वचिदधिकारे नियुक्तस्य अधिकारिणः **संभावना** स्वामिकृताज्ञा पूजा वा **तेजः** कान्तिं **तनोति** विस्तारयति । अथ समासः । आशंसिताश्च ता अपचितयश्च आशंसितापचितयः आशंसितापचितिभिः चारु यत्र यस्यां क्रियायां तत् आ० । अमर्त्यानां वध्वोऽमर्त्यवधूः अमर्त्यवधूनां समूहः अम० । वसन्ततिलकावृत्तम् । इति वृत्तार्थः ॥ ४६ ॥

प्रणतिमथ विधाय प्रस्थिताः सद्मनस्ताः स्तनभरनमिताङ्गीरङ्गनाः प्रीतिभाजः ।
अचलनलिनलक्ष्मीहारि नालं बभूव स्तिमितममरभर्तुर्द्रष्टुमक्ष्णां सहस्रम् ॥४७॥ (मा०)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *सुराङ्गनाप्रस्थानो* नाम षष्ठः सर्गः ।

'प्रण०' व्याख्या । **अथे**न्द्राज्ञाभवनानन्तरम् **अमरभर्तुः** इन्द्रस्य **अक्ष्णां** नेत्राणां **सहस्रं** दशशतं

ताः अङ्गनाः सुरसुन्दरीः **द्रष्टुं** विलोकयितुं **नालं बभूव** समर्थं न बभूव तासां सौन्दर्यसागरलहरीव्याप्तत्वादिति भावः । किं० अक्ष्णां सहस्रम् ? **अचलनलिनलक्ष्मीहारि** वातोपद्रवरहितकमलशोभावत् मनोहरं निश्चलकमलमञ्जुलमित्यर्थः । पुनः किं० ? **स्तिमितं** विस्मयेन निश्चलम् अनिमिषमित्यर्थः । किं० सुराङ्गनाः ? **प्रणतिं** पादप्रणामं **विधाय** कृत्वा **सद्मनः** इन्द्रस्य भवनात् **प्रस्थिताः** चलिताः इन्द्रकीलं प्रति इति शेषः । पुनः किं० सुराङ्गनाः ? **स्तनभरनमिताङ्गीः** पयोधरभारनम्राङ्गीः पुनः किं० ? अत एव **प्रीतिभाजः** प्रेमाञ्चिताः । अथ समासः । स्तनानां भरः स्तनभरः स्तनभरेण नमितानि अङ्गानि यासां ताः स्तनभरनमिताङ्ग्यस्ताः स्त० । प्रीतिं भजन्तीति प्रीतिभाजः । अचलानि च तानि नलिनानि च अचलनलिनानि अचलनलिनानां लक्ष्मीः अचलनलिनलक्ष्मीः अचलनलिनलक्ष्मीं हरतीत्येवंशीलम् अ० । अमराणां भर्ता अमरभर्ता तस्याऽमरभर्तुः। मालिनीवृत्तम् । इति वृत्तार्थः ॥ ४७ ॥[1]

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद् गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

इति भट्टभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य षष्ठः सर्गोऽगमदिति ॥

१. अत्रोपमालंकारः -म. ।

सप्तमः सर्गः।

श्रीमद्भिः सरथगजैः सुराङ्गनानां गुप्तानामथ सचिवैस्त्रिलोकभर्तुः ।
संमूर्च्छन्नलघुविमानरन्ध्रभिन्नः प्रस्थानं समभिदधे मृदङ्गनादः ॥ १ ॥

[का. ३९ यावद् प्रहर्षिणीवृत्तम्]

'श्रीम०' व्याख्या । **अथेन्द्र**युवतिप्रस्थानानन्तरं **मृदङ्गनादो** मर्दलध्वनिः **सुराङ्गनानां** देवाङ्गनानां **प्रस्थानं** प्रयाणं **समभिदधे** कथयामास देवाङ्गना[ः] गच्छन्तीति शशंस पुरलोकेभ्य इति शेषः । किं० मृदङ्गनादः ? **संमूर्च्छन्** वर्धयन् दिशो व्याप्नुवन्नित्यर्थः । पुनः किं० मृद० ? **अलघुविमानरन्ध्रभिन्नः** बृहत्सु विमानरन्ध्रेषु प्रतिध्वानैरनेकीभूतः किं० सुराङ्गनानाम् ? **त्रिलोकभर्तुरि**न्द्रस्य **सचिवै**र्गन्धर्वैः **गुप्तानां** रक्षितानां सचिवैः किं० ? **श्रीमद्भिः** कटककेयूराद्यलङ्कारशोभायुक्तैः पुनः किं० ? **सरथगजैः** हस्तियुक्तैः । अथ समासः । श्रियो विद्यन्ते येषां ते श्रीमन्तस्तैः श्रीमद्भिः । रथाश्च गजाश्च रथगजं सह रथगजेन वर्तमानाः सरथगजास्तैः सरथगजैः । सुराणामङ्गनाः सुराङ्गनास्तासां सुरा० । त्रयाणां लोकानां समाहारः त्रिलोकं त्रिलोकस्य भर्ता त्रिलोकभर्ता तस्य त्रि० । विमानानां रन्ध्राणि विमानरन्ध्राणि न लघूनि अ० अलघूनि च तानि विमानरन्ध्राणि अ० अलघुविमानरन्ध्रेषु भिन्नः अ०। मृदङ्गानां नादो मृ० । अस्मिन् सर्गे [३९ यावद्] प्रहर्षिणीवृत्तं तल्लक्षणं चेदं 'म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्' । इति वृत्तार्थः ॥ १ ॥

सोत्कण्ठैरमरगणैरनुप्रकीर्णान्निर्याय ज्वलितरुचः पुरान्मघोनः ।
रामाणामुपरि विवस्वतः स्थितानां नासेदे चरितगुणत्वमातपत्रैः ॥ २ ॥

'सोत्कण्ठैः' व्या० । **रामाणां** देवाङ्गनानाम् **आतपत्रैः** छत्रैः **चरितगुणत्वम्** आतपात् त्रायन्त इति सार्थकत्वं **नासेदे** न प्रापे आतपरक्षणाभावादिति भावः । किं० रामाणाम् ? **विवस्वतः उपरि स्थितानां** सूर्योपरिस्थितानाम् उष्णरश्मेरुपरि वर्तमानानामित्यर्थः । किंकृत्वा ? **मघोनः** इन्द्रस्य **पुरात्** अमरवत्याः **निर्याय** निर्गत्य पुरात् किं० ? **सोत्कण्ठैः** मृदङ्गनादावेक्षणोत्सुकैः मृदङ्गनादं श्रुत्वा उत्कण्ठायुक्तैरित्यर्थः। **अमरगणैः** देवगणैः **अनुप्रकीर्णात्** व्याप्तात् पुनः किं० पुरात् ? **ज्वलितरुचः** देदीप्यमानकान्तिनः लोकेऽपि राजादियात्रायां द्रष्टुं प्रवृत्तैर्लोकैः व्याकीर्णं पुरद्वारं भवतीति भावः । अथ समासः । सह उत्कण्ठया वर्तमानाः सोत्कण्ठाः तैः सो० । अमराणां गणाः अमरगणाः तैर० । ज्वलिता रुक् यस्य तत् ज्वलितरुक् तस्मात् ज्व० । चरितश्चासौ गुणश्च चरितगुणः चरितगुणस्य भावः च० । आतपात् त्रायन्ते इति आतपत्राणि तै० । इति वृत्तार्थः ॥ २ ॥

धूतानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानाम् ।
आनिन्ये मदविहितां[1] श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः ॥ ३ ॥

---

1. मदजनितां –म. इदं च पा. ।

'धृता०' व्याख्या । अप्सरसाम् **उष्णांशुद्युतिजनितः** सूर्यकिरणोत्पादितः **कपोलरागः** गल्लस्थलरक्तत्वं **मदविहितां** मद्यपानकृतां **श्रियं** शोभाम् **आनिन्ये** प्रापयामास द्विकर्मकस्यापि नयतेरिह यदेककर्मकत्वं तद् द्वितीयस्य कर्मणोऽविवक्षितत्वात् । किं० वधूनाम् ? **अभिमुखपातिभिः** सन्मुखवाहिभिः **समीरैः** प्रतिकूलवायुभिः **धूतानां** कम्पितानाम् एतेन दुर्निमित्तं सूचितम् । वायोरभिमुखगामित्वं यात्रायां कार्यसाधकं न भवतीति तात्पर्यार्थः । पुनः किं० वधूनाम् ? **आयासात्** वायुसन्मुखगमनजनितश्रमवशात् । **अविशदलोचनोत्पलानां** कलुषितनेत्रोत्पलानाम् । अथ समासः । अभिमुखं पतन्ति इति अभिमुख-पातिनस्तैर० । लोचनान्येवोत्पलानि लोचनोत्पलानि न विशदानि अविशदानि अविशदानि लोचनोत्पलानि यासां ताः अविशदलोचनोत्पलास्तासाम् अ० । मदेन विहिता मदविहिता तां म० । उष्णा अंशवो यस्य स उष्णांशुः उष्णांशोर्द्युतिः उष्णांशुद्युतिः उष्णांशुद्युत्या जनितः उ० । कपोलानां रागः कपोलरागः । इति वृत्तार्थः ॥३॥

तिष्ठद्भिः कथमपि देवतानुभावादाकृष्टैः प्रजविभिरायतं तुरङ्गैः ।
नेमीनामसति विवर्तने रथौघैरासेदे वियति विमानवत्प्रवृत्तिः ॥ ४ ॥

'तिष्ठद्भिः' व्याख्या । **रथौघैः** रथसमूहैः **वियति** गगने **विमानवत्** देवयानवत् **प्रवृत्तिः** गमनम् **आसेदे** प्राप्ता यथा देवयानानाम् आकाशे गतिर्निश्चलतया प्राप्यते तद्वदित्युपमा । कस्मिन् सति **नेमीनां** चक्रधाराणां **विवर्ते** भ्रमणे **असति** अविद्यमाने यदा यद्याधाराभावस्तर्हि रथौघाः भूमौ कथं न पतन्तीत्याह- किं० रथौघैः ? **देवतानुभावात्** दिव्यानुभावात् **कथमपि** केनापि प्रकारेण अन्तरिक्षे **तिष्ठद्भि**र्वर्तमानैः अपतद्भिरित्यर्थः । रथानामन्तरालेऽवस्थाने देवतासामर्थ्यं कारणमित्यर्थः । पुनः किं० रथौघैः ? **प्रजविभिः** वेगवत्तरैः **तुरङ्गै**रश्वैः **आयतं** दूरं यथा स्यात्तथा **आकृष्टैः** आकर्षितैः । अथ समासः । देवतानाम् अनुभावः देवतानुभावः तस्मात् दे० । प्रकृष्टो जवो येषां ते प्रजविनस्तैः प्र० । रथानाम् ओघाः रथौघाः तैः रथौघैः । विमानानाम् इव विमानवत् । इति वृत्तार्थः ॥ ४ ॥

कान्तानां कृतपुलकः स्तनाङ्गरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभः ।
सम्पेदे श्रमसलिलोद्‌गमो विभूषां <u>रम्याणां विकृतिरपि श्रियं तनोति</u> ॥ ५ ॥

'कान्ता०' व्याख्या । **श्रमसलिलोद्‌गमः** प्रस्वेदोदकाविर्भावः **विभूषाम्** अलङ्कृतिं **सम्पेदे** विभूषणतया सञ्जात इत्यर्थः । किं० श्रम० ? **कान्तानाम्** अप्सरसां **स्तनाङ्गरागे** पयोधरविलेपने **कृतपुलकः** विहितरोमाञ्चः स्तनाङ्गरागस्य क्षालनात् तद्विषये पुलकाकारेण स्थित इत्यर्थः । पुनः किं० श्रम० ? **च्युततिलकेषु** भग्नतिलकेषु **वक्त्रेषु** वदनेषु **मौक्तिकाभः** मौक्तिकतुल्यः अङ्गरागतिलकालङ्कारविगमेपि स्वेद एव भूषा जाता इत्यर्थः । तथाहि- **रम्याणां** स्वभावसुन्दराणां **विकृतिः** विपरीताकारोपि **श्रियं** शोभां **तनोति** विस्तारयति अतः स्वेदस्यापि विभूषणत्वमुपपद्यते इति भावः । अथ समासः । कृतो

१. अत एव निदर्शनालंकारः -म. ।

पुलको येन स कृ० । स्तनानामङ्गरागः स्तनाङ्गरागः तस्मिन् स्त० । च्युतानि तिलकानि येषां तानि च्युततिलकानि तेषु च्यु० । मौक्तिकानाम् आभा इव आभा यस्य स मौ० । श्रमस्य सलिलं श्रमसलिलं श्रमसलिलस्य उद्गमः श्रम० । इति वृत्तार्थः ॥ ५ ॥

राजद्भिः पथिमरुतामभिन्नरूपैरुल्कार्चिःस्फुटगतिभिर्ध्वजांशुकानाम् ।
तेजोभिः कनकनिकाषराजिदीप्तैरायामः क्रियत इव स्म सातिरेकः ॥ ६ ॥

'राज०' व्याख्या । **ध्वजांशुकानां** पताकावस्त्राणां **तेजोभिः** कान्तिभिः **आयामो** दीर्घः **सातिरेकः** सातिशयः **क्रियते स्म इव** दीर्घा ध्वजपटाः स्वतेजःप्रसरेण दीर्घतमा इव लक्ष्यन्ते इत्युत्प्रेक्षा[1] किं० तेजोभिः ? **मरुतां पथि** आकाशे **राजद्भिः** शोभमानैः पुनः किं० तेजोभिः ? **अभिन्नरूपैः** अविच्छिन्नाकारैः अपृथक्रूपैरित्यर्थः । पुनः किं० तेजो० ? **उल्कार्च्चिःस्फुटगतिभिः** विद्युज्ज्वालावत् प्रकटमार्गैः पुनः किं० तेजोभिः ? **कनकनिकाषराजिदीप्तैः** सुवर्णघर्षणरेखादीप्तैः । अथ समासः । अभिन्नानि रूपाणि यासां तानि अभिन्नरूपाणि तैर० । उल्कानाम् अर्चींषि उल्कार्चींषि तद्वत्स्फुटा गतयो येषां ते उल्कार्च्चिःस्फुटगतयस्तैरु० । कनकस्य निकाषः कनकनिकाषः कनकनिकाषस्य राजिः कनकनिकाषराजिः कनकनिकाषराजिवद् दीप्तानि कनकनिकाषराजिदीप्तानि तैः कन० । सह अतिरेकेण वर्तते यः स सा० । इति वृत्तार्थः ॥ ६ ॥

रामाणामवजितमाल्यसौकुमार्ये संप्राप्ते वपुषि सहत्वमातपस्य ।
गन्धर्वैरधिगतविस्मयैः प्रतीये कल्याणी विधिषु विचित्रता विधातुः ॥ ७ ॥

'रामा०' व्याख्या । **गान्धर्वैः** शक्रसचिवैः **विधातुः** ब्रह्मणः **विधिषु** सृष्टिषु कार्येषु **विचित्रता** वैचित्र्यं नानाविधत्वं **कल्याणी** प्रधाना **प्रतीये** ज्ञाता किं० गान्धर्वैः ? **अधिगतविस्मयैः** प्राप्ताश्चर्यैः कस्मिन् सति ? तत्राह- **रामाणां** देवाङ्गनानां **वपुषि** देहे **आतपस्य** घर्मस्य **सहत्वं** क्षमत्वं संप्राप्ते किं० वपुषि ? **अवजितमाल्यसौकुमार्ये** निर्जितकुसुममालासुकोमलत्वे अप्सरसां कुसुमाधिकं सौकुमार्यं वपुः च आतपक्षमं दृष्ट्वा विधीयमानवस्तुविषयं प्रजापतेर्वैचित्र्यं ज्ञातमिति भावः । अथ समासः । माला एव माल्यं सुकुमारस्य भावः सौकुमार्यं माल्यस्य सौकुमार्यं माल्यसौकुमार्यम् अवजितं माल्यसौकुमार्यं येन तत् अवजितमाल्यसौकुमार्यं तस्मिन् अ० । सहत इति सहं सहस्य भावः सहत्वम् । अधिगतो विस्मयो यैस्ते अधिगतविस्मयास्तैर० । विचित्रस्य भावो विचित्रता । इति वृत्तार्थः ॥ ७ ॥

सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्त्रोतोभिस्त्रिदशगजा मदं क्षरन्तः ।
सादृश्यं ययुररुणांशुरागभिन्नैर्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥ ८ ॥

---

1. गौरै० -म. ।

---

१. सा चोल्काद्युपमानुप्राणिता -म. ।

'सिन्दू०' व्याख्या । **त्रिदशगजा** देवदन्तिनः **पयोदैर्**मेघैः **सादृश्यम्** उपमां **ययुः** प्रापुः किं० त्रिदशगजाः ? **सिन्दूरैः** नागजाख्यैः रागद्रव्यैः 'सिन्दूरं नागजं नागरक्तं शृङ्गारभूषणम्' इति *हैमः* [१०६१] । **कृतरुचयो** विहितकान्तयः कृतशोभा वा अलङ्कृता इत्यर्थः । पुनः किं० त्रिद० ? **सहेमकक्ष्याः** कनकमयमध्येभनाडीसहिताः हस्तिनामुदरबन्धनपटी(ट्टी) नाडी उच्यते 'कक्ष्या गृहप्रकोष्ठे स्यात्सादृश्योद्योग-काञ्चिषु बृहतिकेभ्यनाड्योश्च' इति *हैमानेकार्थः* [२-३४१] । पुनः किं० त्रिद० ? **स्त्रोतोभिः** सप्तभिर्मदनादिभिश्चक्षुरागादिभिः कृत्वा **मदं** मदवारि **क्षरन्तः** मुञ्चन्तः यदुक्तं-

चक्षुषी द्वे कपोले च करो मेढ्रो गुदस्तथा । एतानि सप्तस्थानानि गजानाञ्च्युतिहेतवः ॥५१॥ इति

किं० पयोदैः ? **अरुणांशुरागभिन्नैः** सूर्यकिरणारुणत्वेन संस्पृष्टैः लिप्तैरित्यर्थः । पुनः किं० ? **वर्षद्भिः** वृष्टिं कुर्वद्भिः पुनः किं० पयो० ? **स्फुरितशतह्रदैः** उल्लसितविद्युद्भिः । अथ समासः । कृता रुचयो येषां ते कृ० । हेम्नः कक्ष्या हेमकक्ष्या सह हेमकक्ष्याभिर्वर्तन्ते ते इति स० । त्रिदशानां गजाः त्रि० । अरुणस्य अंशवः अरुणांशवः अरुणांशूनां रागः अरुणांशुरागः अरुणांशुरागेण भिन्नाः अरुणांशुरागभिन्नाः तैर० । स्फुरिताः शतह्रदा येषु ते स्फुरितशतह्रदास्तैः स्फु० । इति वृत्तार्थः ॥८॥

अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यन्तादहिममयूखमण्डलस्य ।
आशानामुपरचितामिवैकवेणीं रम्योर्मिं त्रिदशनदीं ययुर्बलानि ॥ ९ ॥

'अत्य०' व्याख्या । **बलानि** देवाङ्गनानां सैन्यानि **त्रिदशनदीं** गङ्गां **ययुः** जग्मुः प्रापुरित्यर्थः । किं० त्रिदशनदीम् ? **रम्योर्मिं** रमणीयतरङ्गां पुनः किं० त्रि० ? उत्प्रेक्ष्यते **आशानां** दिशाम् **उपरचितां** गुम्फितां ग्रथितामित्यर्थः । **एकवेणीमिव** स्थिताम् इत्युत्प्रेक्षा । किंकृत्वा ? **अत्यर्थम्** अतिशयेन **दुरुपसदात्** गन्तुमशक्यत्वात् **अहिममयूखमण्डलस्य** सूर्यबिम्बस्य **पर्यन्तात्** प्रान्तात् **दूरम्** अन्तरम् **उपेत्य** आगत्य । अथ समासः । दुःखेन उपसद्यते इति दुरुपसदं तस्माद्दु० । न हिमा अहिमा अहिमा मयूखाः यस्य स अहिममयूखः अहिममयूखस्य मण्डलम् अहिममयूखमण्डलं तस्य अ० । एका च असौ वेणी च एकवेणी तामे० । रम्या ऊर्मयो यस्याः सा रम्योर्मिस्तां र० । त्रिदशानां नदी त्रिदशनदी तां त्रिद० । इति वृत्तार्थः ॥ ९ ॥

संभिन्नैरिभतुरगावगाहनेन प्राप्योर्वीरनुपदवीं विमानपङ्क्तीः ।
तत्पूर्वं प्रतिविदधे सुरापगाया वप्रान्तस्खलितविवर्तनं पयोभिः ॥ १० ॥

'संभि०' व्याख्या । **सुरापगाया** गङ्गायाः **पयोभिः** जलैः **तत्पूर्वम्** इदं प्रथमं **वप्रान्तस्खलितवि-वर्तनं** तटान्तस्खलनात् पश्चात् चलनं **प्रतिविदधे** चक्रे आकाशगङ्गायास्तटाभावादितिभावः । क्वचित् वप्राम्भस्खलन० इति पाठस्तत्र 'वप्राम्भः' वप्रस्य तटस्याम्भः पानीयं तत्र यत् स्खलनं तेन विवर्तनं भ्रमणं **तत्पूर्वं** तदेव पूर्वं यथा स्यात् तथा इति विदधे । किं० पयोभिः ? **इभतुरगावगाहनेन** गजाश्वविलोडनेन

१. इत्यतिशयोक्तिः -म. ।

संभिन्नैः क्षुभितैः किंकृत्वा ? **उर्वीः** विस्तिर्णा **विमानपङ्क्तीः** विमानश्रेणीः **अनुपदवीं** मार्गसमीपे **प्राप्य** क्वचित् 'विमानभित्तीः' इति पाठस्तत्र विमा[ना]न्येव भित्तयस्ताः ताः प्राप्य । अथ समासः । इभाश्च तुरगाश्च इभतुरगं प्राणितूर्यसेनाङ्गानामिति सेनाङ्गत्वाद्द्वन्द्वं नपुंसकत्वम्, इभतुरगाणाम् अवगाहनम् इभतुरगावगाहनं तेन इ०। पदव्याः अनु अनुपदवी ताम् अ० । विमानानां पङ्क्त्यः विमानपङ्क्त्यः ता वि० । तदेवपूर्वं तत्पूर्वम्। सुराणामापगाः सुरापगा तस्या सुरा० । वप्रस्यान्ता वप्रान्ताः वप्रान्तेषु स्खलितानि वप्रान्तस्खलितानि वप्रान्तस्खलितैः विवर्तनं व० । इति वृत्तार्थः ॥१०॥

आमत्तभ्रमरकुलाकुलानि धुन्वन्नुद्धूतग्रथितरजांसि पङ्कजानि ।
कान्तानां गगननदीतरङ्गशीतः संतापं विरमयति स्म मातरिश्वा ॥ ११ ॥

'आम०' व्याख्या । **मातरिश्वा** वायुः **कान्तानाम्** अप्सरसां **संतापं** मार्गजनिततापश्रमं **विरमयति स्म** शमयामास किं० मातरिश्वा ? **गगननदीतरङ्गशीत** आकाशगङ्गाकल्लोलेन शीतलः एतेन शीतत्वोक्तिः । पुनः किंकुर्वन् मातरिश्वा ? **पङ्कजानि** कमलानि **धुन्वन्** कम्पयन् एतेन मन्दत्वोक्तिः । किं० पङ्कजानि ? **आमत्तभ्रमरकुलाकुलानि** मत्तभ्रमरवृन्दव्याप्तानि पुनः किं० पङ्कजानि० ? **उद्धूतग्रथितरजांसि** उत्थापितान्योन्य-संसृष्टपरागानि एतेन विशेषणेन सौरभ्योक्तिः । अथ समासः । आमत्ताश्च ते भ्रमराश्च आमत्तभ्रमराः आमत्तभ्रमराणां कुलानि आमत्तभ्रमरकुलानि आमत्तभ्रमरकुलैः आकुलानि आ०। धुनाति इति धुन्वन् । उद्धूतानि ग्रथितानि च रजांसि येषु तानि उ० । पङ्के जातानि पङ्कजानि। गगने नदी गगननदी गगननद्याः तरङ्गा गगननदीतरङ्गाः गगननदीतरङ्गैः शीतः ग०। इति वृत्तार्थः ॥ ११ ॥

क्रान्तानां ग्रहचरितात्पथो रथानामक्षाग्रक्षतसुरवेश्मवेदिकानाम् ।
निःसङ्गं प्रधिभिरुपाददे विवृत्तिः संपीडक्षुभितजलेषु तोयदेषु ॥ १२ ॥

'क्रान्ता०' व्याख्या । **रथानां प्रधिभिः** चक्रधाराभिः **तोयदेषु** मेघेषु **निःसङ्गम्** अप्रतियातम् अस्खलितं यथा स्यात्तथा **विवृत्ति**र्गमनम् **उपाददे** स्वीकृता [१]प्रारब्धेत्यर्थः । क्वचित् 'प्रवृत्तिः' पाठस्तत्र प्रवृत्तिः भ्रमणम् उपाददे किं० तोयदेषु ? **संपीडक्षुभितजलेषु** प्रेरणेन चालितजलेषु उपर्याक्रमणेन क्षुभितान्तरस्वपानीयेष्वित्यर्थः। किं० रथानाम् ? **ग्रहचरितात्** सूर्यादिभिराश्रितात् **पथो** मार्गात् गगनमार्गादित्यर्थः । **क्रान्तानां** निर्गतानां ग्रहमण्डलात् निर्गत्य मेघमण्डलं प्राप्तानामित्यर्थः । पुनः किं० रथानाम् ? **अक्षाग्रक्षतसुरवेश्मवेदिकानां** चक्रधाराग्रैर्विदारितदेवगृहवेदिकानां काष्टविशेषाग्रैः पातितदेवगृहो-पवेशनभूमिकानामित्यर्थः । 'अक्षो रथस्यवयवे' इति *हैमानेकार्थः* [२-५४३] । अथ समासः । ग्रहैः चरितः ग्रहचरितस्तस्मात् ग्र० । अक्षाणाम् अग्राणि अक्षाग्राणि सुराणां वेश्मानि सुरवेश्मानि सुरवेश्मनां वेदिकाः सुरवेश्मवेदिकाः अक्षाग्रैः क्षताः सुरवेश्मवेदिका यैस्ते अक्षाग्रक्षतसुरवेश्मवेदिकाः तासाम् अ० । संपीडेन क्षुभितानि जलानि येषां ते संपीडक्षुभितजलास्तेषु सं० । इति वृत्तार्थः ॥ १२ ॥

---

१. इत्यतिशयोक्तिः स्वभावोक्त्या संसृज्यते -म. ।

तप्तानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरन्तः ।
युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥ १३ ॥

'तप्ता०' व्याख्या । **घना** मेघाः **सुरकरिणां** देवदन्तिनां **प्रह्लादं** हर्षम् **उपदधिरे** उत्पादयामासुः किं० सुरकरिणाम् ? **तप्तानां** तपनतापेन परिभूतानां किं० घनाः ? **विषाणभिन्नाः** दन्तैर्विदारिताः पुनः किं० घनाः ? अत एव **क्षरन्तो** जलं वर्षन्तः यदि दन्तैर्विदारिताः तत्कथं प्रह्लादं चक्रुरित्याह- **खलु** इति निश्चितं **परोपकारे युक्तानाम्** आसक्तानां **महतामु**त्तमानां **रुजत्स्वपि** पीडां कुर्वत्स्वपि **कल्याणी** हितकारिणी **प्रवृत्तिः** प्रवर्त्तनं क्रियाया भवेदिति पीडाकारिण्यपि जने श्रेयसीं क्रियां कुर्वन्तीत्यर्थः । अतो युक्तं मेघानां दन्तिदन्तक्षतानामपि गजाह्लादकत्वमिति भावः । अथ समासः । विषाणैर्भिन्नाः वि० । सुराणां करिणः सुरकरिणस्तेषां सु० । क्षरन्तीति क्षरन्तः । परेषाम् उपकारः परोपकारस्तस्मिन् प० । इति वृत्तार्थः ॥ १३ ॥

संवाता मुहुरनिलेन नीयमाने दिव्यस्त्रीजघनवरांशुके विवृत्तिम् ।
पर्यस्यत्पृथुमणिमेखलांशुजालं संजज्ञे युतकमिवान्तरीयमूर्वोः ॥ १४ ॥

'संवाता०' व्याख्या । **मणिमेखलांशुजालं** रत्नयुक्तकटिमेखलाकिरणसमूहं **पर्यस्यत्** प्रसरत् अङ्गनानाम् **ऊर्वोः** सवृतोः युतकम् अपृथग्भूतं शरीरसंश्लिष्टं चल्लनाख्यं 'युतकं तु यौतके युग्मयुक्तयोः संशये चलनाग्रे स्त्रीवस्त्रभेदे पटाञ्चले' इति *हैमानेकार्थः* [३-७७/८] । **अन्तरीयम्** अधोवस्त्रमिव **संजज्ञे** संजातं युतकस्थाने अंशुकजालमभूदित्यर्थः । किं० मणिमेख० ? **पृथु** महत् विस्तीर्णं कस्मिन् सति ? **अनिलेन** वातेन **दिव्यस्त्रीजघनवरांशुके** देवाङ्गनाजघनवरवस्त्रे **विवृत्तिम्** अपसारं **नीयमाने** दूरीक्रियमाणे सतीत्यर्थः । अनिलेन कामिनेवेति भावः । किं० अनिलेन ? **मुहु**र्वारंवारं **संवाता** सम्यक् वहता । अथ समासः । संवातीति संवान् तेन संवाता । दिवि भवा दिव्याः दिव्याश्च ताः स्त्रियः च दिव्यस्त्रियः दिव्यस्त्रीणां जघनानि दि० वरं च तत् अंशुकं च वरांशुकं [दिव्यस्त्रीजघनेषु वरांशुकं] दिव्यस्त्रीजघनवरांशुकं तस्मिन् दि० । मणिभिर्युक्ता मेखला मणिमेखला मणिमेखलानामंशवः मणिमेखलांशवः मणिमेखलांशूनां जालं म० । अन्तरे भवमन्तरीयम् । इति वृत्तार्थः ॥ १४ ॥

प्रत्यार्द्रीकृततिलकास्तुषारपातैः[1] प्रह्लादं शमितपरिश्रमा दिशन्तः ।
कान्तानां बहुमतिमाययुः पयोदा नाल्पीयान्बहुसुकृतं हिनस्ति दोषः ॥ १५ ॥

'प्रत्या०' व्याख्या । **पयोदाः** मेघाः **कान्तानां** देवाङ्गनानां **बहुमतिं** बाहुल्येन सम्मतं हृदयंगमत्वं सन्मानम् **आययुः** प्रापुः किं० पयोदाः ? **तुषारपातैः** सलिलकणपातैः शीकरवर्षैरित्यर्थः। **प्रत्यार्द्रीकृततिलकाः** आर्द्रीकृततिलकाः पुनः किं० पयोदाः ? **प्रह्लादं** हर्षं **दिशन्तः** उत्पादयन्तः पुनः

1. अप्यार्द्री० -म. टी. ।

१. अत्रोत्प्रेक्षालंकारः -म. ।

किं० पयोदाः ? **शमितपरिश्रमाः** शमितमार्गखेदाः यदि भग्नपत्रवल्लयः तर्हि कथं बहुमतिम् आययुरित्याह- **यतो** हेतोः **अल्पीयान्** अतिस्वल्पो **दोषः बहुसुकृतं** प्रभूतमुपकारं प्रचुरपुण्यं वा **न हिनस्ति** न स्फेटयति तिलकालङ्कार-हरणम् अल्पो दोषः श्रान्त्यपहरणं तु महानुपकारः इति आह्लादो मेघानामिति भावः । अथ समासः। अप्रत्यार्द्राः प्रत्यार्द्राः कृता इति प्रत्यार्द्रीकृताः प्रत्यार्द्रीकृता तिलका यैस्ते प्र० । तुषाराणां पाताः तुषारपाताः तैस्तु० । शमितः परिश्रमो यैस्ते श० । इति वृत्तार्थः ॥ १५ ॥

यातस्य ग्रथिततरङ्गसैकताभे विच्छेदं विपयसि वारिवाहजाले ।
आतेनुस्त्रिदशवधूजनाङ्गभाजां सन्धानं सुरधनुषः प्रभा मणीनाम् ॥ १६ ॥

'यात०' व्याख्या । **मणीनां प्रभाः** विचित्रमणिरुचयः **सुरधनुषः** इन्द्रचापस्य **सन्धानं** मेलनम् **आतेनुः** विस्तारयामासुः सुरकार्मुकं पुनरुदयन्नित्यर्थः । किं० मणीनाम् ? **त्रिदशवधूजनाङ्गभाजां** देवाङ्गनाजनाङ्गभाजां किं० सुरधनुषः ? **विपयसि** गलितोदके निर्जले **वारिवाहजाले** मेघवृन्दे **विच्छेदं** क्षयं **यातस्य** प्राप्तस्य किं० वारिवा० ? **ग्रथिततरङ्गसैकताभे** रचितकल्लोलपुलिनसदृशे[१] । अथ समासः । ग्रथिता तरङ्गा यस्य तत् ग्रथिततरङ्गं ग्रथिततरङ्गं च तत् सैकतं च ग्रथिततरङ्गसैकतं ग्रथिततरङ्गसैकतस्याभा इव आभा यस्य तत् ग्रथिततरङ्गसैकताभं तस्मिन् ग्र० । विगतानि पयांसि यस्मात् विपयः तस्मिन् वि० । वारिवाहस्य जालं वारिवाहजालं तस्मिन् वा० । त्रिदशानां वधूः त्रिदशवधूः त्रिदशवधूनां जनः त्रिदशवधूजनः त्रिदशवधूजनस्याङ्गानि त्रिदशवधूजनाङ्गानि भजन्तीति त्रि० तेषां त्रि० । सुरस्य धनुः सुरधनुः तस्य सुर० । इति वृत्तार्थः ॥ १६ ॥

संसिद्धावितिकरणीयसंनिबद्धैरालापैः पिपतिषतां विलङ्घ्य वीथीम् ।
आसेदे दशशतलोचनध्वजिन्या जीमूतैरपिहितसानुरिन्द्रकीलः ॥ १७ ॥

'संसि०' व्याख्या । **दशशतलोचनध्वजिन्या** शक्रसेनया **इन्द्रकीलः** इन्द्रकीलाख्यो नगः **आसेदे** प्राप्तः किंकृत्वा ? **आलापै**र्वार्ताभिः **पिपतिषतां** पक्षिणां **वीथीं** मार्गं गगनं **विलङ्घ्य** अतिक्रम्य किं० इन्द्रकीलः ? **जीमूतैः** मेघैः **अपिहितसानुः** अनाच्छादितशृङ्गः उन्नतत्वात् आच्छादितशृङ्गो वा मेघमण्डलादपि उन्नत इति भावः । किं० आलापैः ? **संसिद्धौ** प्रारब्धकार्यसिद्धिनिष्पत्तौ **इतिकरणीयसंनिबद्धैः** अमुना प्रकारेण कर्तव्यसंबुद्धैः । इतीत्थंभाविना प्रकारेण कर्तव्यमिति करणीयं तेन संनिबद्धैः युक्तैरित्यर्थः । अथ समासः । करणीयेन संनिबद्धाः करणीयसंनिबद्धास्तैः कर० । पतितुमिच्छतीति पिपतिषन्ति पिपतिषन्तीति पिपतिषन्तः तेषां पिपतिषताम् । दशशतानि संख्या येषु तानि लोचनानि यस्य स दशशतलोचनः दशशतलोचनस्य ध्वजिनी दशशतलोचनध्वजिनी तया द० । अपिहितानि सानुनि यस्य स अ० । इति वृत्तार्थः ॥ १७ ॥

---

१. अत्राभरणप्रभाणामिन्द्रधनुःसंधानासंबन्धेऽपि संबन्धाभिधानादतिशयोक्तिरलंकारः -म. ।

आकीर्णा मुखनलिनैर्विलासिनीनामुद्धूतस्फुटविशदातपत्रफेना ।
सा तूर्यध्वनितगभीरमापतन्ती भूभर्तुः शिरसि नभोनदीव रेजे ॥ १८ ॥

'आकी०' व्याख्या । **सा** इन्द्रसेना **भूभर्तुः** इन्द्रकीलपर्वतस्य **शिरसि** शिखरे **नभोनदीव** आकाशगङ्गेव **रेजे** शुशुभे या नदी भवति सा कमलोपलक्षिता भवति । अत्र कानि कमलानि ? तत्राह- किं० सा ? **विलासिनीनां** देवाङ्गनानां **मुखनलिनैः** वदनाम्बुजैः **आकीर्णा** व्याप्ता । या नदी स्यात् तत्र फेनाः स्युरित्याह- पुनः किं० सेना ? **उद्धूतस्फुटविशदातपत्रफेना** ऊर्ध्वीकृतप्रकटश्वेतछत्ररूपफेना । या आकाशगङ्गा सा आकाशात् गम्भीरं पतति तत्राह- पुनः किं० सेना ? **तूर्यध्वनितगम्भीरं** वादित्रनिर्घोषैर्गम्भीरं यथा स्यात्तथा **आपतन्ती** गगनादागच्छन्तीत्यर्थः । गङ्गापि कमलव्याप्ता स्फुटफेना तूर्यध्वनिवत् गम्भीरं यथा स्यात्तथा गगनादापतन्तीत्यर्थः । अथ समासः । मुखान्येव नलिनानि मुखनलिनानि तैः मुख० । विलासा विद्यन्ते यासां ता विलासिन्यस्तासां वि० । विशदानि च तानि आतपत्राणि च विशदातपत्राणि स्फुटानि च तानि विशदातपत्राणि च स्फुटविशदातपत्राणि स्फुटविशदापत्राणि फेना इव उद्धूता यस्याः सा उ० । तूर्याणां ध्वनितानि तूर्यध्वनितानि तूर्यध्वनितैर्गम्भीरं यथा भवति तथा तू० । इति वृत्तार्थः ॥१८॥

सेतुत्वं दधति पयोमुचां विताने संरम्भादभिपततो रथाञ्जवेन ।
आनिन्युर्नियमितरश्मिभुग्नघोणाः कृच्छ्रेण क्षितिमवनामिनस्तुरङ्गाः ॥ १९ ॥

'सेतु०' व्याख्या । **तुरङ्गाः** अश्वाः **कृच्छ्रेण** महता कष्टेन **रथान्** स्यन्दनान् **क्षितिं** भूमिम् **आनिन्युः** आनयामासुः कस्मिन् सति ? **पयोमुचां** मेघानां **विताने** वृन्दे **सेतुत्वं** पालित्वं घनत्वं **दधति** धारयति सति किं० तुरङ्गाः ? **नियमितरश्मिभुग्नघोणाः** 'किरणप्रग्रहौ रश्मी घोणा तु प्रोथमस्त्रियाम्' *इत्यमरः* बलादाकृष्टरज्जुभिः वक्रीकृतनासिका । पुनः किं० तुरङ्गाः ? **अवनामिनः** नम्रमुखाः अवनतपूर्वकाया इत्यर्थः । किं० रथान् ? **जवेन** वेगेन **संरम्भात्** आटोपात् **अभिपततो** मेघवृन्दमधरीकृत्य धावत इत्यर्थः । अथ समासः । सेतोर्भावः सेतुत्वम् । पयांसि मुञ्चन्तीति पयोमुचः तेषां पयोमुचाम् । नियमिताश्च ता रश्मयश्च नियमितरश्मयः नियमितरश्मिभिर्भुग्ना घोणा येषां ते निय० । अवनमन्तीति अवनामिनः । इति वृत्तार्थः ॥१९॥

माहेन्द्रं नगमभितः करेणुवर्याः पर्यन्तस्थितजलदा दिवः पतन्तः ।
सादृश्यं निलयननिष्प्रकम्पपक्षैराजग्मुर्जलनिधिशायिभिर्नगेन्द्रैः ॥ २० ॥

'माहे०' व्याख्या । **करेणुवर्याः** प्रधानगजाः **नगेन्द्रैः** पर्वतश्रेष्ठैः मैनाकप्रभृतिभिः **सादृश्यं** तुलाम् **आजग्मुः** प्रापुः किं० करेणु० ? **माहेन्द्रं नगम्** इन्द्रकीलपर्वतम् **अभितः** इन्द्रकीलाभिमुखं सर्वतः **दिवः** आकाशात् **पतन्तः** आगच्छन्तः पुनः किं० करे० ? **पर्यन्तस्थितजलदाः** पार्श्वयोः स्थितमेघाः किं० नगेन्द्रैः ? **निलयननिष्प्रकम्पपक्षैः** उदकलक्षणस्थाने निश्चलपक्षैः पक्षवतां निलयनावसरे पक्षा निष्कम्पा भवन्ति इति जातिस्वभावः निलयनत्वं स्फुटं स्पष्टयति । पुनः किं० नगेन्द्रैः ? **जलनिधिशायिभिः** समुद्रशायिभिः । अथ समासः । महेन्द्रस्यायं माहेन्द्रस्तं मा० । करेणुषु वर्याः क० । पर्यन्ते स्थिता जलदा

येषां ते प० । सदृशस्य भावः सा० । निलयने निष्प्रकम्पाः पक्षा येषां ते निलयननिष्प्रकम्पपक्षास्तैः नि० । जलानि धीयन्ते यत्र स जलनिधिः जलनिधौ शेरत इत्येवंशीलाः जलनिधिशायिनस्तैर्ज० । नगानाम् इन्द्रा नगेन्द्रास्तैर्न० । इति वृत्तार्थः ॥ २० ॥

उत्संगे समविषमे समं महाद्रेः क्रान्तानां वियदभिपातलाघवेन ।
आमूलादुपनदि सैकतेषु लेभे सामग्रीं खुरपदवी तुरङ्गमाणाम् ॥ २१ ॥

'उत्संगे०' व्याख्या । **तुरङ्गमाणाम्** अश्वानां **खुरपदवी** खुरमार्गः **उपनदि** नदीसमीपे **सैकतेषु** निर्जलतटेषु **आमूलात्** आघुटात् **सामग्रीं** साकल्यं 'सामग्र्यम्' इति पाठे संपूर्णतां **लेभे** प्राप सैकतादन्यत्र निम्नेषु गगनसंचारेण समविषमेषु खुरस्पर्शाद्विछिन्ना खुरपदवी सैकतेषु तु सर्वत्र समतलत्वादविछिन्नेत्यर्थः । किं० तुरङ्गमाणाम् ? **महाद्रेः** इन्द्रकीलस्य **उत्संगे** उपरितनप्रदेशे **समं** समकालम् एकरूपं वा **क्रान्तानां** आगतानां केन ? **वियदभिपातलाघवेन** गगनसंचरणलाघवेन किं० उत्संगे ? **समविषमे** क्वचित् समे क्वचित् विषमे। अथ समासः । समं च विषमं च समविषमं तस्मिन् स० । महांश्चासौ अद्रिश्च महाद्रिस्तस्यम० वियत्यभिपातः वियदभिपातः लघोर्भावं लाघवं वियदभिपातस्य लाघवं वियदभिपातलाघवं तेन वि०। नद्याः समीपम् उपनदि । समग्रस्य भावः सामग्री तां सा० । खुराणां पदवी खु० । इति वृत्तार्थः ॥ २१ ॥

सध्वानं निपतितनिर्झरासु मन्द्रैः संमूर्च्छन्प्रतिनिनदैरधित्यकासु ।
उद्ग्रीवैर्घनरवशङ्कया मयूरैः सोत्कण्ठं ध्वनिरुपशुश्रुवे रथानाम् ॥ २२ ॥

सध्वानं० व्याख्या । **मयूरैः** शिखिभिः **रथानां** स्यन्दनानां **ध्वनिः** शब्दः **घनरवशङ्कया** मेघशब्दभ्रान्त्या[1] **सोत्कण्ठं** सोत्साहं यथा स्थात्तथा **उपशुश्रुवे** श्रुतः किं० म० ? **उद्ग्रीवैः** ऊर्ध्वग्रीवैः किं० ध्वनिः ? **अधित्यकासु** पर्वतोर्ध्वभूमिषु **मन्द्रैः** गम्भीरैः **प्रतिनिनदैः** प्रतिच्छन्दैः **संमूर्छन्** वर्धमानः किं० अधि० ? **सध्वानं** सशब्दं यथा स्यात्तथा **निपतितनिर्झराषु** पतितप्रवाहासु। अथ समासः । निपतिता निर्झरा यासु ताः निपतितनिर्झरास्तासु नि० । उत् ऊर्ध्वं ग्रीवा येषां ते उद्ग्रीवास्तैरुद्ग्रीवैः । घनस्य रवः घनरवः घनरवस्य शङ्का घनरवशङ्का तया घ० । सह उत्कण्ठया वर्तते यत् तत् सोत्कण्ठम् । इति वृत्तार्थः ॥२२॥

संभिन्नामविरलपातिभिर्मयूखैर्नीलानां भृशमुपमेखलं मणीनाम् ।
विछिन्नामिव वनिता नभोऽन्तराले वप्राम्भःस्त्रुतिमवलोकयाम्बभूवुः ॥ २३ ॥

'संभि०' व्याख्या । **वनिता** देवाङ्गना **नभोन्तराले** गगनस्य मध्यप्रदेशे **वप्राम्भःस्त्रुतिं** तटाघातोदकधारां **विछिन्नां** त्रुटितामिव **अवलोकयाम्बभूवुः** पश्यन्ति स्म किं० वप्राम्भः० ? **उपमेखलं** मेखलायाः समीपं मध्यभागमित्यर्थः। 'मेखला मध्यभागोऽद्रेः' इति *हैमः* [१०३३] । **नीलानां**

१. भ्रान्तिमदलंकारः -म.

मणीनाम् इन्द्रनीलरत्नानां **मयूखैः** किरणैः **भृशम**त्यर्थं **संभिन्नां** युक्ताम् एकीभूतां श्यामीकृतामित्यर्थः। यस्मिन् प्रदेशे उदकधारायाः नीलमणिमयूखसंबन्धः तत्र त्रुटितेयं लक्ष्यते। किं० मयूखैः ? **अविरलपातिभिः** निरन्तरप्रसरणशीलैः। अथ समासः। अविरलं पतन्ति ते अविरलपातिनः तैर०। मेखलायाः समीपम् उपमेखलम्। नभसोऽन्तरालं नभोऽन्तरालं तस्मिन् न०। अम्भसः स्रुतिः अम्भःस्रुतिः वप्रे अम्भःस्रुतिः वप्राम्भःस्रुतिः तां व०। इति वृत्तार्थः ॥२३॥

आसन्नद्विपपदवीमदानिलाय क्रुध्यन्तो धियमवमत्य धूर्गतानाम्।
सव्याजं निजकरिणीभिरात्तचित्ताः प्रस्थानं सुरकरिणः कथंचिदीषुः ॥ २४ ॥

'आसन्न०' व्याख्या। **सुरकरिणः** देवगजाः **कथंचित्** महता कष्टेन **प्रस्थानं** गमनम् **ईषुः** ववाञ्छुः किं० सुरकरिणः ? **सव्याजं** सछलं सकपटं यथा स्यात्तथा **निजकरिणीभिः** स्वहस्तिनीभिः **आत्तचित्ताः** गृहीतमनसः किंकृत्वा ? **धूर्गतानां** हस्तिपालकानां **धियम्** अङ्कुशप्रेरणारूपां बुद्धिम् **अवमत्य** अवगणय्य पुनः किं० सुरकरिणः ? **आसन्नद्विपपदवीमदानिलाय** समीपवर्तिवानेयगज-मार्गमदवाताय **क्रुध्यन्तः** कुप्यन्तः करिणो मदानिलमार्गेण यातुं प्रवृत्ताः हस्तिपालकाः स्वावासं नेतुं प्रवृत्ता इति विरोधाद्वैमत्यम्। अथ समासः। द्विपानां पदवी द्विपपदवी आसन्ना चासौ द्विपपदवी च आ० मदस्य अनिलः मदानिलः आसन्नद्विपपदव्यां मदानिलः आसन्नद्विपपदवीमदानिलस्तस्मै आ०। धुरं गता धूर्गतास्तेषां धू०। सह व्याजेन यत् तत् स०। निजाश्च ताः करिण्यश्च निजकरिण्यस्ताभिर्निज०। आत्तं चित्तं यैस्ते आ०। सुराणां करिणः सु०। इति वृत्तार्थः ॥ २४ ॥

नीरन्ध्रं पथिषु रजो रथाङ्गधूतं पर्यस्यन्नवसलिलारुणं वहन्ती।
आतेने वनगहनानि वाहिनी सा घर्मान्तक्षुभितजलेव जह्नुकन्या ॥ २५ ॥

'नीरन्ध्रं०' व्याख्या। **सा वाहिनी** सेना **वनगहनानि** वननिकुञ्जानि **आतेने** व्याप सा किंकुर्वती ? **रथाङ्गधूतं** चक्रैः कम्पितं क्वचित् 'रथाङ्गनुन्नम्'[1] इति पाठस्तत्र चक्रैः प्रेरितां **रजो** धूलिं **वहन्ती** धारयन्ती किं० रजः ? **पथिषु** मार्गेषु **पर्यस्यत्** प्रसरत् पुनः किं० रजः ? अत एव **नीरन्ध्रं** बहुलं सान्द्रमित्यर्थः। पुनः किं० रजः ? **नवसलिलारुणं** नूतनपानीयवत् रक्तं किं० वाहिनी ? **इव** उत्प्रेक्ष्यते **घर्मान्तक्षुभितजला** ग्रीष्मान्ते प्रचलिततोया **जह्नुकन्या** गङ्गा **इव** यथा जह्नुकन्या घर्मान्तक्षुभितजला प्रावृषि कलुषपानीया सती वनगहनानि आतनुते व्याप्नोति। जह्नुकन्यापि किं० ? नीरन्ध्रं कलुषं नवसलिलारुणं पथिषु पर्यस्यन् रथाङ्गधूतम् एवंविधं रजो वहन्ती[2]। अथ समासः। रथानाम् अङ्गाः रथाङ्गाः रथाङ्गैर्धूतं र०। नवं च तत् सलिलं नवसलिलं नवसलिलवत् अरुणं न०। वनानां गहनानि वन०। घर्मस्य अन्तः घर्मान्तः घर्मान्ते क्षुभितं जलं यस्याः सा घ०। जह्नोः कन्या ज०। इति वृत्तार्थः ॥ २५ ॥

---

1. एष पाठः म. मध्ये इदं च पा.।

---

१. वप्राम्भःस्रुतेः स्वधवलिमत्यागेनेन्द्रनीलानां नीलिमस्वीकाररूपतद्गुणोत्थापिता विच्छेदोत्प्रेक्षेति तयोरङ्गाङ्गिभावेन संकरः। तेन च नैल्यविच्छेदभ्रमरूपो भ्रान्तिमान् व्यज्यते -म.। २. अत्र समासगतवाक्यगतोपमयोः सजातीययोरङ्गाङ्गिभावेन संकरः -म.

संभोगक्षमगहनामथोपगङ्गं बिभ्राणां ज्वलितमणीनि सैकतानि ।
अध्यूषुश्च्युतकुसुमाचितां सहाया वृत्रारेरविरलशाद्वलां धरित्रीम् ॥ २६ ॥

'संभो०' व्याख्या । **अथा**नन्तरं **वृत्रारेः** इन्द्रस्य **सहायाः** सचिवाः **उपगङ्गं** गङ्गासमीपे **धरित्रीं** भूमिम् **अध्यूषुः** अधितस्थुः वसतेर्यजादित्वात् संप्रसारणं किं० धरि० ? **अविरलशाद्वलां** बहुहरिततृणां पुनः किं० धरि० ? **च्युतकुसुमाचितां** स्वयं पतितपुष्पैराकीर्णां पुनः किं० धरित्रीम् ? **संभोगक्षमगहनां** सुरतयोग्यगहनप्रदेशां पुनः किं० धरित्रीम् ? **सैकतानि** तटानि **बिभ्राणां** धारयन्तीं किं० सैकतानि ? **ज्वलितमणीनि** उद्दीप्यमानरत्नानि[१] । अथ समासः । संभोगे क्षमानि संभोगक्षमानि संभोगक्षमानि गहनानि यस्यां सा संभोगक्षमगहना तां सं० । गङ्गायाः समीपम् उपगङ्गम् । ज्वलिता मणयो येषु तानि ज्व० । च्युतानि च तानि कुसुमानि च च्युतकुसुमानि तैः आचिता च्युतकुसुमाचिता तां च्यु० । वृत्रस्यारिः वृत्रारिस्तस्य वृत्रारेः । अविरलाः शाद्वलाः यस्यां सा अविरलशाद्वला ताम० । इति वृत्तार्थः ॥ २६ ॥

भूभर्तुः समधिकमादधे तदोर्व्याः श्रीमत्तां हरिसखवाहिनीनिवेशः ।
संभक्तौ किमसुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः ॥ २७ ॥

'भूभ०' व्याख्या । **हरिसखवाहिनीनिवेशः** शक्रगन्धर्वसैन्यविन्यासः 'डेरा' इति लोके । 'निवेशः सैन्यविन्यासे न्यासे द्रङ्गविवाहयोः' इति *हैमानेकार्थः* [३-७१५] । **तदा** तस्मिन् काले **भूभर्तुरिन्द्र**कीलपर्वतस्य **उर्व्याः** भूमेः **समधिकं** पूर्वाधिकं यथा स्यात्तथा श्रीमत्तां शोभावत्ताम् **आदधे** उत्पादयामास तथाहि- **महोदयानां** महात्मनां **संभक्तौ** सेवायां **किमसुलभं** किं दुर्लभम् अपितु न किंचिदित्यर्थः । यतः कारणात् **यदृच्छयापि** स्वेच्छयापि दैवात् **योगः** संगमः **उच्छ्रायम्** उन्नत्यम् उत्कर्षं **नयति** प्रापयति । अथ समासः । भुवो भर्ता भूभर्ता तस्य भूभर्तुः । श्रीरस्यास्तीति श्रीमान् श्रीमतो भावः श्रीमत्ता तां श्री० । हरेः सखायः हरिसखायः हरिसखानां वाहिनी हरिसखवाहिनी हरिसखवाहिन्याः निवेशः ह० । सुखेन लभ्यते इति सुलभं न सुलभं असुलभम् । महान् उदयो येषां ते महोदयाः तेषां म० । इति वृत्तार्थः ॥ २७ ॥

सामोदाः कुसुमतरुश्रियो विविक्ताः संपत्तिः किसलयशालिनी लतानाम् ।
साफल्यं ययुरमराङ्गनोपभुक्ताः सा लक्ष्मीरुपकुरुते यया परेषाम् ॥ २८ ॥

'सामो०' व्याख्या । एते पदार्थाः **अमराङ्गनोपभुक्ताः** देवाङ्गनाभिरुपभुक्ता दिव्यस्त्रीभिः अनुभूता इत्यर्थः । **साफल्यं** सफलत्वं साथर्कत्वं **ययुः** प्रापुः एते के इत्याह- **सामोदाः** सपरिमलाः **कुसुमतरुश्रियः** पुष्पप्रधानसमृद्धयः तथा **विविक्ताः** एकान्तप्रदेशाः तथा **लतानां** वल्लीनां **किसलयशालिनी** पल्लवैः

---

१. अत्र धरित्रीविशेषणार्थानामधिवासहेतुत्वादनेकपदार्थहेतुकं काव्यलिङ्गमलंकारः -म. । २. अत्र प्रकृतयदृच्छया योगस्योत्कर्षाभिधानादप्रकृतसक्तियोगस्योत्कर्षाधायकत्वे कैमुतिकन्यायेनार्थापत्तिरिति प्राकरणिकाद-प्राकरणिकार्थापत्तिरलंकारः -म. ।

शोभमानाः **संपत्तिः** समृद्धिः [। युक्तोऽयमर्थः] तथाहि- **यया** लक्ष्म्या कृत्वा लक्ष्मीवान् **परेषाम्** अन्येषाम् **उपकुरुते सा लक्ष्मीः** नान्येत्यर्थः । अथ समासः । सह आमोदेन वर्तनो ये ते सामोदाः । कुसुमैः प्रधानाः कुसुमप्रधाना कुसुमप्रधानाः तरवः कुसुमतरवः कुसुमतरूणां श्रियः कु० । किसलयेन शालते इत्येवंशीला कि० । सफलस्य भावः साफल्यम् । अमराणाम् अङ्गनाः अ० अमराङ्गनाभिः उपभुक्ताः अ० । इति वृत्तार्थः ॥ २८ ॥

क्लान्तोऽपि त्रिदशवधूजनः पुरस्ताल्लीनाहिश्वसितविलोलपल्लवानाम् ।
सेव्यानां हतविनयैरिवावृतानां सम्पर्कं परिहरति स्म चन्दनानाम् ॥ २९ ॥

'क्लान्तो०' व्याख्या । **क्लान्तोऽपि** खिन्नोऽपि **त्रिदशवधूजनः** देवाङ्गनाजनः **चन्दनानां** हरिचन्दनवृक्षाणां **संपर्कं** संयोगं **परिहरति स्म** तत्याज किं० चन्द० ? **पुरस्तात्** अग्रे **लीनाहिश्वसित-विलोलपल्लवानाम्** आसक्तसर्पनिःश्वासैः चञ्चलकिसलयानां केषामिव ? यथा गुणवान् पुरुषः **सेव्यानां** सेवायोग्यानां प्रभूणां संपर्कं संयोगं परिहरति । दुष्टवत् दुष्टाश्रिता गुणवन्तोऽपि प्रभवस्त्यजनीया इति भावः । किं० सेव्यानाम् ? **हतविनयैः** दुर्जनैः **आवृत्तानाम्** आश्रितानाम् । अथ समासः । त्रिदशानां वधूः त्रिदशवधूः त्रिदशवधूनां जनः त्रि० । लीनाश्च ते अहयश्च लीनाहयः लीनाहीनां श्वसितानि लीनाहिश्वसितानि लीनाहिश्वसितैः विलोलाः पल्लवा येषां ते लीनाहिश्वसितविलोलपल्लवास्तेषां ली० । हतो विनयो यैस्ते हतविनयाः तैर्ह० । इति वृत्तार्थः ॥ २९ ॥

उत्सृष्टध्वजकुथकङ्कटा धरित्रीमानीता विदितनयैः श्रमं विनेतुम् ।
आक्षिप्तद्रुमगहना युगान्तवातैः पर्यस्ता गिरय इव द्विपा विरेजुः ॥ ३० ॥

'उत्सृष्ट०' व्याख्या । **द्विपा** हस्तिनः **विरेजुः** शुशुभिरे किं० द्विपाः ? **उत्सृष्टध्वजकुथकङ्कटाः** त्यक्तपताकास्तरणकवचाः कुथशब्दः लोके 'पाखर' इति प्रसिद्धः । पुनः किं० द्विपाः ? **विदितनयैः** गजशिक्षाव्यवहाराभिज्ञैः हस्तिपकैः **श्रमं** परिश्रमं **विनेतुं** स्फेटयितुं **धरित्रीं** भूमिम् **आनीताः** प्रापिताः शायिता इत्यर्थः । किं० द्विपाः ? उत्प्रेक्ष्यते **पर्यस्ताः** पतिताः **गिरयः** पर्वता इव स्थिताः पुनः किं० गिरयः ? **युगान्तवातैः** कल्पान्तवातैः **आक्षिप्तद्रुमगहनाः** उन्मूलितवृक्षसमूहाः गजा अपि आक्षिप्तद्रुमगहना इति उपमा। अथ समासः । ध्वजाश्च कुथाश्च कङ्कटाश्च ध्वजकुथकङ्कटा उत्सृष्टा ध्वजकुथकङ्कटा येभ्यस्ते उ० । विदितो नयो यैस्ते विदितनयाः तैर्वि० । द्रुमाणां गहनानि द्रुमगहनानि आक्षिप्तानि द्रुमगहनानि येभ्यस्ते आ० । युगान्तस्य वाता युगान्तवातास्तैर्यु० । इति वृत्तार्थः ॥ ३० ॥

प्रस्थानश्रमजनितां विहाय निद्रामामुक्ते गजपतिना सदानपङ्के ।
शय्यान्ते कुलमलिनां क्षणं निलीनं संरम्भच्युतमिव शृङ्खलं चकाशे ॥ ३१ ॥

'प्रस्थान०' व्याख्या । **निलीनम्** आशक्तम् **अलिनां** भ्रमराणां **कुलं** वृन्दं **क्षणं** क्षणमात्रं **शय्यान्ते** वालुकामयहस्तिशयनस्थाने **चकासे** शुशुभे किं० अलिनां कुलम् ? उत्प्रेक्ष्यते **संरम्भच्युतं**

सहसा पतितं **शृङ्खलं** निगडमिव स्थितं 'शृङ्खले अन्दुको निगडोऽस्त्री स्याद्' *इत्यमरः* । लोके 'साङ्कल' इति प्रसिद्धिः। किं० शय्यान्ते ? **गजपतिना** गजेन्द्रेण **प्रस्थानश्रमजनितां** प्रस्थानपरिश्रमेणोत्पादितां **निद्रां विहाय** त्यक्त्वा **आमुक्ते** त्यक्ते पुनः किं० शय्यान्ते ? **सदानपङ्के** गजमदयुक्ते । अथ समासः । प्रस्थानस्य श्रमः प्रस्थानश्रमः प्रस्थानश्रमेण जनिता प्रस्थानश्रमजनिता तां प्र० । गजानां पतिः गजपतिस्तेन ग० । दानस्य पङ्कः दानपङ्कः सह दानपङ्केन वर्तते यः स सदानपङ्कस्तस्मिन् स० । शय्यायाः अन्तं शय्यान्तं तस्मिन् श० । संरम्भेण च्युतः संरम्भच्युतस्तं संर० । इति वृत्तार्थः ॥ ३१ ॥

आयस्तः सुरसरिदोघरुद्धवर्त्मा संप्राप्तुं वनगजदानगन्धि रोधः ।
मूर्धानं निहितशिताङ्कुशं विधुन्वन् यन्तारं न विगणयाम्बभूव नागः ॥ ३२ ॥

'आय०' व्याख्या । **नागो** गजः **यन्तारं** हस्तिपकं **न विगणयाञ्चकार** नाजीगणत् नागः किं-कुर्वन्? **मूर्धानं** मस्तकं विधुन्वन् रोषात् कम्पयन् किं० मूर्धानम् ? **निहितशिताङ्कुशं** स्थापिततीक्ष्णाङ्कुशं हस्तिपकेन इति शेषः । किं० नागः ? पुरो गन्तुं नाशकत् पश्चान्न ववृत्ते चेति भावः । तत्र हेतुमाह- **रोधः** परतटे **संप्राप्तुम् आयस्तः** उत्सुकः प्रयत्नवान् । आङ् पूर्वः यसु प्रयत्ने इति धातोः कर्तरि क्तः । तर्हि किमिति नागस्तमाह- पुनः किं० नागः ? **सुरसरिदोघरुद्धवर्त्मा** गङ्गाप्रवाहेण रुद्धमार्गः रोधोगमने हेतुमाह- किं० रोधः ? **वनगजदानगन्धि** काननहस्तिमदवारिगन्धयुक्तम्। अथ समासः । सुराणां सरित् सुरसरित् सुरसरितः ओघः सुरसरिदोघः सुरसरिदोघेन रुद्धं वर्त्म यस्य स सु० । वनानां गजाः वनगजाः दानस्य गन्धः दानगन्धः वनगजानां दानगन्धोऽस्यास्तीति व० । निहितः शितोऽङ्कुशो यस्मिन् स निहितशिताङ्कुशस्तं नि०। इति वृत्तार्थः ॥ ३२ ॥

आरोढुः समवनतस्य पीतशेषे साशङ्कं पयसि समीरिते करेण ।
संमार्जन्नरुणमदस्रुती कपोलौ सस्यन्दे मद इव शीकरः करेणोः ॥ ३३ ॥

'आरोढुः' व्याख्या । **करेणोः** गजस्य **शीकरो** वमथुः करशीकरः मदश्च मदवारीव **सस्यन्दे** सुस्राव किंकुर्वन् शीकरः ? **कपोलौ** गल्लौ **संमार्जन्** प्रक्षालयन् किं० कपोलौ ? **अरुणमदस्रुती** आरक्तमदवारिधारौ किं० करेणोः ? **समवनतस्य** जलपानार्थम् आनतपूर्वकायस्य कस्मिन् सति ? **आरोढुः** हस्तिपकात् **साशङ्कं** सभयं यथा स्यात्तथा **पीतशेषे** पीतावशेषे पयसि **करेण** सुण्डादण्डेन **समीरिते** क्षिप्ते सति तापप्रशमनाय जातिस्वभावात् वा हस्तिपकात् बिभ्यता करेणुना यत्पीतावशिष्टं पयः शिरसि क्षिप्तं तस्मिन् क्षिप्ते सति स शीकरः करेणोः गलदरुणदानलेखौ गण्डौ क्षालयन् मदरूपतया सस्यन्दे इत्यर्थः । अथ समासः । पीतस्य शेषं पीतशेषं तस्मिन् पी० । सह आशङ्कया वर्तते यत् तत् साशङ्कम्। मदस्य स्रुती मदस्रुती अरुणे मदस्रुती ययोस्तौ अ० । इति वृत्तार्थः ॥ ३३ ॥

आघ्राय क्षणमतितृष्यतापि रोषादुत्तीरं निहितविवृतलोचनेन ।
संपृक्तं वनकरिणां मदाम्बुसेकैर्नाचेमे हिममपि वारि वारणेन ॥ ३४ ॥

१. मदसंपृक्तस्य मदसादृश्यान्मदोपमा -म. ।

'आघ्रा०' व्याख्या । **वारणेन** गजेन **हिमं** शीतलमपि **वारि** पानीयं **नाचेमे** न पीतं 'चमु अदने' इति धातोः प्रयोगः । किंकृत्वा ? **क्षणं** क्षणमात्रम् **आघ्राय** गन्धयित्वा तर्हि तस्य तृषैव नास्ति इत्याह- किं० वारणेन ? **अतितृष्यतापि** अत्यर्थं तृषार्तेनापि यदि जलं शीतलं स्वयं च तृषितः तत्कथं न पीतम् इत्याह- किं० वारि ? **वनकरिणां** वनगजानाम् **अम्बुसेकैः** मदजलस्रावैः **संपृक्तं** मिलितम् अत एव पुनः किं० वारणेन ? **रोषात्** कोपात् **उत्तीरं** तटसमीपे **निहितविवृतलोचनेन** इतस्ततो निक्षिप्तघूर्णितेन । प्रतिवन्यवारणदिदृक्षया प्रसारितलोचनेनेतिभावः । अथ समासः । निहिते विवृते लोचने यस्य स निहितविवृतलोचनस्तेन नि० । वनेषु करिणः वनकरिणस्तेषां व० । मदस्य अम्बु मदाम्बु मदाम्बूनां सेका मदाम्बुसेकास्तैर्म० । इति वृत्तार्थः ॥ ३४ ॥

प्रश्च्योतन्मदसुरभीणि निम्नगायाः क्रीडन्तो गजपतयः पयांसि कृत्वा ।
किञ्जल्कव्यवहितताम्रदानलेखैरुत्तेरुः सरसिजगन्धिभिः कपोलैः ॥ ३५ ॥

'प्रश्च्यो०' व्याख्या । **गजपतयो** गजेन्द्राः **उत्तेरुः** परतीरं प्रापुः किं० गजपतयः ? **क्रीडन्तो** रममाणाः किंकृत्वा ? **निम्नगायाः** गङ्गायाः **पयांसि** जलानि **प्रश्च्योतन्मदसुरभीणि** गलता मदेन सुगन्धीनि **कृत्वा** पुनः किं० गजपतयः ? **कपोलैः** गल्लैः उपलक्षिताः किं० कपोलैः ? **किञ्जल्कव्यवहित-ताम्रदानलेखैः** केसरैराच्छादितारुणमदलेखैः पुनः किं० कपोलैः ? **सरसिजगन्धिभिः** कमलगन्धयुक्तैः[1] । अथ समासः । प्रश्च्योतंश्चासौ मदश्च प्रश्च्यो० प्रश्च्योतन्मदेन सुरभीणि प्र० । गजानां पतयः ग० । किञ्जल्कैर्व्यवहिता ताम्रदानलेखा येषु ते किञ्जल्कव्यवहितताम्रदानलेखाः तैः कि० । सरसिजवत् गन्धो येषां ते सरसिजगन्धयः तैः सर० । इति वृत्तार्थः ॥३५॥

आकीर्णं बलरजसा घनारुणेन प्रक्षोभैः सपदि तरङ्गितं तटेषु ।
मातङ्गोन्मथितसरोजरेणुपिङ्गं कौसुम्भं वसनमिवाम्बु निर्बभासे ॥ ३६ ॥

'आकी०' व्याख्या । **अम्बु** गङ्गाजलं **कौसुम्भं** कुसुमनेत्ररक्तं **वसनं** वस्त्रमिव **निर्बभासे** शुशुभे 'कौशेयम्' इति पाठे कृमिकोशोत्पन्नम् वसनमिव निर्बभासे । [1]'माञ्जिष्ठम्' इति पाठे मञ्जिष्ठेन महारञ्जनेनारक्तं माञ्जिष्ठं वसनमिव निर्बभासे । किं० अम्बु ? **घनारुणेन** सान्द्ररक्तेन **बलरजसा** सैन्यरेणुना **आकीर्णं** व्याप्तं पुनः किं० अम्बु ? **सपदि** शीघ्रं **प्रक्षोभैः** सैन्यानां प्रचलनैः **तटेषु तरङ्गितं** संजाततरङ्गं पुनः किं० अम्बु ? **मातङ्गोन्मथितसरोजरेणुपिङ्गं** गजोत्पाटितकमलपरागैः पीतम् । अथ समासः । बलस्य रजः बलरजस्तेन ब० । घनम् अरुणं घनारुणं तेन घ० । तरङ्गा जाता अस्येति त० । मातङ्गैरुन्मथितानि मातङ्गोन्मथितानि मातङ्गोन्मथितानि च तानि सरोजानि च मा० मातङ्गोन्मथितसरोजानां रेणवः मा०

---

1. एष पाठः म. मध्ये इदं च पा. ।

---

१. अत्र मदसरसिजगन्धयोः समयोर्विनिमयोक्त्या समपरिवृत्तिरलंकारः तेन च गजानां निम्नगायाश्च परिमलव्यत्ययान्तरसंरम्भो व्यज्यते -म. ।

मातङ्गोन्मथितसरोजरेणुभिः पिङ्गं मा० । कुसुम्भेन रक्तं कौ० । इति वृत्तार्थः ॥३६॥

श्रीमद्भिर्नियमितकन्धरापरान्तैः संसक्तैरगुरुवनेषु साङ्गहारम् ।
संप्रापे प्रसृतमदाम्बुभिर्गजेन्द्रैः प्रस्यन्दिप्रचलितगण्डशैलशोभा ॥ ३७ ॥

'श्रीमद्भिः०' व्याख्या । **गजेन्द्रैः** करीन्द्रैः **प्रस्यन्दिप्रचलितगण्डशैलशोभा** जलस्राविणां चलितुं प्रवृत्तानां स्थूलपाषाणानां कान्तिः **संप्रापे** प्राप्ता किं० गजेन्द्रैः ? **श्रीमद्भिः** शोभायुक्तैः पुनः किं० ग० ? **नियमितकन्धरापरान्तैः** बद्धग्रीवापश्चात्खुरप्रदेशैः पुनः किं० गजे० ? **अगुरुवनेषु** अगुरुकाननेषु कृष्णागुरुवृक्षेषु **साङ्गहारं** साङ्गविक्षेपं सविलासं यथा भवति तथा 'अङ्गहारोऽङ्गविक्षेपो' इति *हैमः* [२८२] । **संसक्तैः** संलग्नैः तत्र बद्धैरित्यर्थः । पुनः किं० गजेन्द्रैः ? **प्रसृतमदाम्बुभिः** निसृतमद-वारिभिः[१] । अथ समासः । श्रियो विद्यन्ते येषां ते श्रीमन्तः तैः श्री० । कन्धराश्च अपरान्ताश्च कन्धरापरान्ताः नियमिताः कन्धरापरान्ता येषां ते नियमितकन्धरापरान्तास्तैर्नि० । अगुरूणां वनानि अगुरुवनानि तेषु अ० । अङ्गहारेण सह यत् तत् सा० । प्रसृतानि मदाम्बुनि येषां ते प्रसृतमदाम्बवस्तैः प्र० । गजानामिन्द्राः गजेन्द्रास्तैर्ग० । प्रस्यन्दिनः प्रचलिताश्च ते गण्डशैलाश्च प्रस्यन्दिप्रचलितगण्डशैलाः प्रस्यन्दिप्रचलितगण्डशैलानां शोभा प्र० । इति वृत्तार्थः ॥ ३७ ॥

निःशेषं प्रशमितरेणु वारणानां स्रोतोभिर्मदजलमुज्झतामजस्रम् ।
आमोदं व्यवहितभूरिपुष्पगन्धं[1] भिन्नैलासुरभिमुवाह गन्धवाहः ॥ ३८ ॥

'निःशे०' व्याख्या । **गन्धवाहो** वायुः **वारणानां** गजानां संबन्धिनम् **आमोदं** परिमलम् **उवाह** वहते स्म किं० आमोदम् ? **व्यवहितभूरिपुष्पगन्धं** तिरस्कृतबहुपुष्पगन्धं पुनः किं० आमोदम् ? **भिन्नैलासुरभिं** चूर्णीकृतैलावत् सुगन्धिं घ्राणेन्द्रियतर्पणम् आमोदं वहति स्मेत्यर्थः । किं० वारणानाम् ? **स्रोतोभिः** मदनाडीभिः इन्द्रियैः **अजस्रं** निरन्तरं **मदजलं** मदवारि **उज्झतां** मुञ्चतां किं० मदजलम् ? **निःशेषं** समग्रं यथा स्यात्तथा **प्रशमितरेणु** शान्तधूलि । अथ समासः । प्रशमितो रेणुर्येन तत् प्र० । मदस्य जलं म० । पुष्पाणां गन्धः पु० । व्यवहितो भूरिः पुष्पगन्धो येन स व्यवहितभूरिपुष्पगन्धस्तं व्य० । भिन्नाश्च ताः एलाश्च भिन्नैलाः भिन्नैलावत् सुरभिः भिन्नैलासुरभिस्तं भि० । गन्धं वहतीति गन्धवाहः । इति वृत्तार्थः ॥ ३८ ॥

सादृश्यं दधति गभीरमेघघोषैरुन्निद्रक्षुभितमृगाधिपश्रुतानि ।
आतेनुश्चकितचकोरनीलकण्ठान् कच्छान्तानमरमहेभबृंहितानि ॥ ३९ ॥

'सादृश्यं०' व्याख्या । **अमरमहेभबृंहितानि** सुरगजगर्जितानि कर्तॄणि **कच्छान्** तान् अनूपप्रदेशान्

1. गन्धो -म. इदं च पा. ।

१. अत्रान्यशोभाप्राप्त्यसंभवात्तत्सदृशी शोभेति प्रतिबिम्बत्वाक्षेपान्निदर्शनालंकारः -म.

'अनूपोऽम्बुमान् कच्छस्तु तद्विधः' इति *हैमः* [९५३] । **चकितचकोरनीलकण्ठान्** गर्जितभ्रान्त्या त्रस्तचकोरमयूरान् **आतेनुः** चक्रुः किं० अम० ? **गभीरमेघघोषैः** अगाधजलधरशब्दैः **सादृश्यं** तुलां **दधति** धारयति पुनः किं० अम० ? **उन्निद्रक्षुभितमृगाधिपश्रुतानि** बृंहितश्रवणात् प्रबुद्धकुपितसिंहैः आकर्णितानि[1]। अथ समासः । सदृशस्य भावः सादृश्यम् । मेघानां घोषाः मेघघोषाः गभीराश्च ते मेघघोषाश्च गभीरमेघघोषास्तैर्ग० । मृगानामधिपाः मृगाधिपाः उन्निद्राः क्षुभिताश्च ते मृगाधिपाश्च उन्निद्रक्षुभित-मृगाधिपाः उन्निद्रक्षुभितमृगाधिपैः श्रुतानि उ० । चकोराश्च नीलकण्ठाश्च चकोरनीलकण्ठाः चकिताश्चकोर-नीलकण्ठा येषु ते चकितचकोरनीलकण्ठास्तान् च० । कच्छानाम् अन्ता कच्छान्तास्तान् कच्छान्तान् । महान्तश्च ते इभाश्च महेभाः अमराणां महेभाः अमरमहेभाः अमरमहेभानां बृंहितानि अ० । इति वृत्तार्थः ॥३९॥

शाखावसक्तकमनीयपरिच्छदानामध्वश्रमातुरवधूजनसेवितानाम् ।
जज्ञे निवेशनविभागपरिष्कृतानां लक्ष्मीः पुरोपवनजा वनपादपानाम् ॥४०॥ (व०)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *सुरसैन्यवर्णनो* नाम सप्तमः सर्गः ॥७॥

'शाखा०' व्याख्या । **वनपादपानाम्** अरण्यवृक्षाणां **परोपवनजा** नगरोद्यानसमुत्था **लक्ष्मीः** शोभा **जज्ञे** संजाता किं० वनपादपानाम् ? **शाखावसक्तकमनीयपरिच्छदानां** शाखासंस्थापितरम्यव-सनाभरणभरतालवृन्तादिपरिकराणाम् । पुनः किं० वनपादपानाम् ? **अध्वश्रमातुरवधूजनसेवितानां** मार्गखेदातुरदेवाङ्गनाश्रितानां पुनः किं० वनपा० ? **निवेशनविभागपरिष्कृतानां** आवसतिकावच्छेदेन अलंकृतानाम्[2]। अथ समासः । परिच्छाद्यति अनेनेति परिच्छदः कमनीयाश्च ते परिच्छदाश्च कमनीयपरिच्छदाः शाखासु अवसक्ताः कमनीयपरिच्छदा येषां ते शाखावसक्तकमनीयपरिच्छदास्तेषां शाखा० । अध्वनि श्रमः अध्वश्रमः अध्वश्रमेण आतुरा अध्वश्रमातुराः वधूनां जनाः वधूजनाः अध्वश्रमातुराश्च ते वधूजनाश्च अध्वश्रमातुरवधूजना अध्वश्रमातुरवधूजनैः सेविता अध्वश्रमातुरवधूजनसेवितास्तेषाम् अ० । निवेशनश्च विभागश्च निवेशनविभागः निवेशनविभागेन परिष्कृता निवेशनविभागपरिष्कृतास्तेषां नि० । पुरे उपवनं पुरोपवनं पुरोपवने जाता पु० । वने पादपाः वनपादपाः तेषां वन० । इति वृत्तार्थः ॥ ४० ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद्गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गस्तुरङ्गममितः समवाप पूर्तिम् ॥ २ ॥

भट्टश्रीभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***सुरसैन्यवर्णनो*** नाम सप्तमः सर्गः ॥ ७ ॥ शुभं भवतुतराम् । श्रीरस्तु । श्री सरस्वत्यै नमः । ॐ नमः ।

---

१. भ्रान्तिमदलंकारः -म. । २. अत्रान्योन्यलक्ष्मीसंबन्धासंभवात्तत्सदृशीति सादृश्याक्षेपादसंभवे तद्वस्तुसंबन्धेयं निदर्शना -म. ।

अष्टमः सर्गः।

अथ स्वमायाकृतमन्दिरोज्ज्वलं ज्वलन्मणि व्योमसदां सनातनम् ।
सुराङ्गना गोपतिचापगोपुरं पुरं वनानां विजिहीर्षया जहुः ॥ १ ॥

[का. ५४ यावद् वंशस्थवृत्तम्]

'अथ' व्याख्या । **अथ** गिरौ निवेशनानन्तरं **सुराङ्गना** देवाङ्गनाः **वनानां** काननानां **विजिहीर्षया** विहर्तुमिच्छया क्रीडितुं वाञ्छया **पुरं** स्वनिर्मितनगरं **जहुः** तत्यजुः तत्र नगराभावात् नगरं जहुरित्यनुपपन्नमित्याशङ्क्याह- किं० पुरम् ? **स्वमायाकृतमन्दिरोज्ज्वलं** स्वेच्छया निर्मितमन्दिरैः शोभितं पुनः किं० पुरम् ? **ज्वलन्मणि** देदीप्यमानमणि एतद्विशेषणद्वयेन मनोहारित्वं क्रीडायोग्यता च सूचिते नगरस्य । पुनः किं० पुरम् ? **व्योमसदां** गन्धर्वाणां **सनातनं** सदाभवं शाश्वतमित्यर्थः । यत्र गान्धर्वाः तत्र नगरं भवतीति नियमात् सनातनमुच्यते । पुनः किं० पुरम् ? **गोपतिचापगोपुरं** गौः वज्रं तत्पतिरिन्द्रः तच्चापं धनुस्तद्वर्णानि गोपुराणि प्रतोल्यो यस्य तत्तथोक्तमित्युपमा[१] । अथ समासः । स्वेषां माया स्वमाया स्वमायया कृतानि स्वमायाकृतानि स्वमायाकृतानि च तानि मन्दिराणि च स्व० स्वमायाकृतमन्दिरैरुज्ज्वलं स्व० । ज्वलन्तो मणयो यस्मिन् तत् ज्व० । व्योम्नि सीदन्तीति व्योमसदः तेषां व्यो० । सुराणाम् अङ्गना सुराङ्गना । गोः पतिः गोपतिः गोपतेः चापं गोपतिचापं गोपतिचापमिव गोपुरं यस्मिन् तत् गो० । विहर्तुमिच्छा विजिहीर्षा तया वि० । [का. ५४ यावद्] वंशस्थवृत्तं तल्लक्षणं चेदं 'जतौ तु वंशस्थमुदीरितं जरौ' । इति वृत्तार्थः ॥१॥

यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः ।
वनं विशन्त्यो वनजायतेक्षणाः क्षणद्युतीनां दधुरेकरूपताम् ॥ २ ॥

'यथा०' व्याख्या । **ताः** पूर्वोक्ता **वनजायतेक्षणाः** कमलदलदीर्घलोचना अप्सरसः **वनं** काननं **विशन्त्यः** प्रविशन्त्यः सत्यः **क्षणद्युतीनां** विद्युताम् **एकरूपतां** समानरूपतां **दधुः** धारयामासुः वारं वारं द्रुमान्तरालेषु तासां स्फुरणस्य क्षणिकत्वात् विद्युतां सादृश्यमिति भावः । किं० ताः ? **यथायथं** यथा स्वं स्वकीयमनतिक्रम्य **नभश्चरैः** गान्धर्वैः **सहिता** मिलिता यो यस्या वल्लभः सा तेन सहिता इत्यर्थः । पुनः किं० ताः ? **प्रभाभिः** स्वदीप्तिभि**रुद्भासितशैलवीरुधः** प्रकाशितगिरिलताः क्षणद्युतयोऽप्येवंविधाः । किं० क्षणद्युतयः ? **यथायथं नभश्चरैः** मेघैः **सहिताः** पुनः किं० क्ष० ? **प्रभाभिः** स्वतेजोभिः **उद्भासितशैलवीरुधः** प्रकटितपर्वतवल्ल्यः पुनः किं० क्ष० ? **वनं विशन्त्यः** काननं प्रति गच्छन्त्यः[२] । अथ समासः । स्वं स्वमनतिक्रम्य यथायथम् । नभसि चरन्तीति नभश्चराः तैर्न० । शैलस्य वीरुधः शैलवीरुधः उद्भासिताः शैलवीरुधो याभिस्ताः उ० । वने जातानि वनजानि वनजवत् आयतानि ईक्षणानि यासां ताः व० । क्षणं द्युतिर्यासां ताः क्षणद्युतयः तासां क्ष० । एकं च तत् रूपं च ए० एकरूपस्य

१. अत्र ज्ज्वलंज्वलदिति पुरंपुरमिति चासकृद्व्यञ्जनद्वयावृत्त्या छेकानुप्रासः । अन्यत्र, -तद्वैपरीत्याद्वृत्त्यनुप्रास इति तथोपमायाश्च संसृष्टिः -म. । २. श्लेषानुप्राणितेयमुपमा । श्लेषत्वमिति केचित् । उभयथाप्यनुप्रासेन संसर्गः -म.।

भावः एकरूपता तामे० । इति वृत्तार्थः ॥ २ ॥

निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तनिर्ह्रादिविभूषणारवः ।
नितम्बिनीनां भृशमादधे धृतिं नभःप्रयाणादवनौ परिक्रमः ॥ ३ ॥

'निवृ०' व्याख्या । **अवनौ परिक्रमः** पृथिवीतले चरणन्यासः **नभःप्रयाणात्** गगनगमनात् **नितम्बिनीनां** देवाङ्गनानां **भृशम्** अत्यर्थं **धृतिं** प्रीतिम् **आदधे** चकार नभःप्रयाणात् भूमिगमनं सुखहेतुत्वेन सुराङ्गनानां प्रमोदाय जातमिति भावः । किं० अवनौ० ? **निवृत्तवृत्तोरुपयोधरक्लमः** गतवर्तुलोरुस्तनश्रमः पदप्रक्षेपेषु विश्रान्तिसंभवात् इति भावः । पुनः किं० अवनौ० ? **प्रवृत्तनिर्ह्रादिविभूषणारवः** संजातशब्दायमान- मेखलानूपुराद्यलंकाररवः चङ्क्रमणेन हि आभरणानि शब्दायमानानि भवन्ति[१] । अथ समासः । वृत्ता उरवश्च ते पयोधराश्च वृत्तोरुपयोधराः निवृत्तः वृत्तोरुपयोधराणां क्लमो यत्र स नि० । प्रवृत्तो निर्ह्रादि विभूषणानाम् आरवो यस्मिन् स प्र० । नभसि प्रयाणं नभःप्रयाणं तस्मात् न० । इति वृत्तार्थः ॥३॥

घनान्निकामं[1] कुसुमानि बिभ्रतः करप्रचेयान्यपहाय शाखिनः ।
पुरोऽभिसस्त्रे सुरसुन्दरीजनैर्यथोत्तरेच्छा हि गुणेषु कामिनः ॥ ४ ॥

'घना०' व्याख्या । **सुरसुन्दरीजनैः** देवाङ्गनालोकैः **शाखिनो** वृक्षान् **अपहाय** त्यक्त्वा **पुरो**ऽग्रे **अभिसस्त्रे** अभिसृतम् अग्रेगतमित्यर्थः । कदाचित्स्तोकाः स्युरित्याह- किं० शाखिनः ? **घनान्** बहून् तर्हि कुसुमानि न स्युरित्याह- पुनः किं० शाखिनः ? **निकाम**मत्यर्थं **कुसुमानि** पुष्पाणि **बिभ्रतो** धारयतः तर्हि उच्चैस्तरा भवेयुरत्याह- पुनः किं० शाखिनः ? **करप्रचेयान्** हस्तप्राप्यान् ननु यद्येवं गुणयुक्तास्तरवः तत्कथं तान् परित्यज्य सुराङ्गनाभिः अग्रेगतमित्याह- युक्तोऽयमर्थः । **हि** यतः कारणात् **कामिनो** विलासिनः **गुणेषु** अतिशयेषु विषयेषु **यथोत्तरेच्छा** उत्तरोत्तराभिलाषुका भवन्ति । यो योऽधिको गुणस्तं तमिच्छन्तीत्यर्थः । अथ समासः । सुराणां सुन्दर्यः सुरसुन्दर्यः सुरसुन्दरीणां जनाः सुरसुन्दरीजनास्तैः सु० । उत्तरम् उत्तरमिति यथोत्तरं यथोत्तरमिच्छा येषां ते य० । इति वृत्तार्थः ॥ ४ ॥

तनूरलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमञ्जरीभृतः ।
विलासिनीबाहुलता वनालयो विलेपनामोदहृताः सिषेविरे ॥ ५ ॥

'तनू०' व्याख्या । **वनालयो** वनभ्रमराः **विलासिनीबाहुलताः** स्त्रीभुजवल्लीः **सिषेविरे** सेवन्ते स्म किं० वनालयः ? **विलेपनामोदहृताः** कस्तूर्यादिविलेपनगन्धैराकृष्टाः किं० विला० ? **तनूः** कृशाः पुनः किं० विला० ? **अलक्तारुणपाणिपल्लवाः** अलक्तारक्तहस्तकिसलयाः पुनः किं० विला० ? **स्फुरन्नखांशूत्कर-मञ्जरीभृतः** उल्लसन्नखकिरणसमूहवल्लरीधारिणीः[२] । अथ समासः । अलक्तैः अरुणाः पाणयः एव पल्लवा

1. घनानि कामं -म. ।

१. अत्र विशिष्टपरिक्रमस्य धृत्या दानहेतुत्वात् काव्यलिङ्गमलंकारः -म. । २. अत्र समस्तविषयरूपकालंकारः, बाह्वयवानां लतावयवानां च पल्लवादीनां निरूपणात् -म. ।

यासां ता अलक्तारुणपाणिपल्लवाः । नखानामंशवो नखांशवः नखांशूनामुत्कराः नखांशूत्कराः स्फुरन्तश्च ते नखांशूत्कराश्च स्फुरन्नाखांशूत्कराः स्फुरन्नखांशूत्करा एव मञ्जर्यः स्फुरन्नखांशूत्करमञ्जर्यः स्फुरन्नखांशूत्कर-मञ्जरीर्बिभ्रतीति स्फुरन्नखांशूत्करमञ्जरीभृतस्ताः स्फु० । विलासिनीनां बाहव एव लता वि० । वने अलयः वनालयः । विलेपनस्यामोदाः विलेपनामोदाः विलेपनामोदैर्हृता वि० । इति वृत्तार्थः ॥ ५ ॥

निपीयमानस्तबका शिलीमुखैरशोकयष्टिश्चलबालपल्लवा ।
विडम्बयन्ती ददृशे वधूजनैरमन्ददष्टौष्ठकरावधूननम् ॥ ६ ॥

'निपी०' व्याख्या । **वधूजनैः** कर्तृभिः अप्सरोजनसमूहैः **अशोकयष्टिः** कर्म अशोकलता **ददृशे** दृष्टा किंकुर्वती अशोकयष्टिः ? **अमन्ददष्टौष्ठ**करावधूननं गाढं दष्टौष्ठैर्यत् **करावधूननं** हस्तकम्पनं तत् **विडम्बयन्ती** अनुकुर्वन्ती कुत इत्याह- हेतुगर्भितं विशेषणम् । किं० अशोकयष्टिः ? **शिलीमुखैः** भ्रमरैः **निपीयमानस्तबका** स्वाद्यमानगुच्छा पुनः किं० अशोकयष्टिः ? **चलबालपल्लवा** चञ्चलनूतनकिसलया स्तबकपानेन ओष्टदशनं पल्लवचलनेन करावधूननं च कुर्वतीत्यर्थः । अथ समासः । निपीयमानः स्तबको यस्याः सा नि० । अशोकस्य यष्टिः अ० । चला बालाः पल्लवा यस्याः सा च० । वधूनां जनाः वधूजनाः तैःव० । न मन्दम् अमन्दम् अमन्दं दष्टः अमन्ददष्टः अमन्ददष्टश्चासौ ओष्ठश्च अ० करयोरवधूननं करावधूननम् अमन्ददष्टौष्ठे करावधूननम् अम० । इति वृत्तार्थः ॥ ६ ॥

अथ कश्चिन्नायकः भ्रमराक्रान्तां काञ्चिन्नायिकां युग्मेनाह -

मानपरिहारेण भ्रमराश्रयणेन कश्चित् मामनुसरिष्यतीत्याशयेन तां बोधयति -

करौ धुनाना नवपल्लवाकृती वृथा कृथा मानिनि मा परिश्रमम् ।
उपेयुषी कल्पलताभिशङ्कया कथं न्वितस्त्रस्यति षट्पदावलिः ॥ ७ ॥

'करौ०' व्याख्या । **हे मानिनि** ! हे अहंकारिणि स्त्रि ! त्वं **वृथा** व्यर्थं **परिश्रमम्** उपक्रमं **मा कृथा** मा कुरु किं० त्वम् ? **नवपल्लवाकृती** नूतनकिसलयाकारौ **करौ** हस्तौ **धुनाना** धुन्वती कम्पमानेत्यर्थः । वृथात्वे हेतुमाह- **इतः** करतलसकाशात् **षट्पदावलिः** भ्रमरश्रेणी **नु** इति वितर्के **कथं त्रस्यति** कथं बिभेति न वित्रस्यत्येवेत्यर्थः । किं० षट्पदावलिः ? **कल्पलताभिशङ्कया** कल्पवल्लीभ्रान्त्या **उपेयुषी** आगच्छन्ती त्वदभिमुखमिति शेषः । अथ समासः । नवपल्लवस्याकृतिरिव आकृतिर्ययोस्तौ न० । मानोऽस्या अस्तीति मानिनी तस्याः संबोधनं हे मानिनि ! । कल्पलतायाः अभिशङ्का कल्पलताभिशङ्का तया क० । षट्पदानाम् आवलिः षट्पदावलिः । इति वृत्तार्थः ॥७॥

अथ काचित्सखी काञ्चित् प्रणयकुपितामाह -

१. अत्र विडम्बयन्तीति प्रस्तुताशोकशाखाविशेषणभूतोपमामहिम्ना अप्रस्तुतनायिकाप्रतीतेः समासोक्तिरुतिष्ठमानतयैवो-पमयाङ्गाङ्गिभावेन संकीर्यते -म. । २. अत्र कान्तापरिश्रमवैयर्थ्यरूपकार्यस्य षट्पदावलेः कल्पवल्लीभ्रमनिबन्धनवित्रास-रूपकारणसमर्थनात् कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासो भ्रान्तिमताङ्गाङ्गिभावेन संकीर्णः । स·तूपमया संसृज्यते -म.

जहीहि कोपं दयितोऽनुगम्यतां पुराऽनुशेते तव चञ्चलं मनः ।
इति प्रियं काञ्चिदुपैतुमिच्छतीं पुरोऽनुनिन्ये निपुणः सखीजनः ॥ ८ ॥

'जहीहि०' व्याख्या । **निपुणो** दक्षः **सखीजनः प्रियं** भर्तारम् **उपैतुं** प्राप्तुम् **इच्छतीं** वाञ्छतीं **काञ्चित्** सखीं प्रति **पुरो**ऽग्रे **इति** वक्ष्यमाणप्रकारेण **अनुनिन्ये** अनुनीतवान् प्रसादयामास प्रतिबोधितवानित्यर्थः । इतीति किं ? हे मानिनि ! त्वं **कोपं जहीहि** त्यज त्वया **दयितो** भर्ता **अनुगम्यताम्** आश्रीयताम् अन्यथेति पदमध्याहर्तव्यं नो चेत् । **तव चञ्चलम्** अस्थिरं **मनः** चित्तं **पुरा**ऽग्रेऽ**नुशेते** अनुतप्स्यते पश्चात्तापं करिष्यतीत्यर्थः। अथ समासः । सखीनां जनः सखीजनः । इति वृत्तार्थः ॥८॥

अथ चतुर्भिः कलापकमाह –

समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपङ्क्तिमेखलैः ।
प्रतीरदेशैः स्वकलत्रचारुभिर्विभूषिताः कुञ्जसमुद्रयोषितः ॥ ९ ॥

विदूरपातेन भिदामुपेयुषश्च्युताः प्रवाहादभितः प्रसारिणः ।
प्रियाङ्कशीताः शुचिमौक्तिकत्विषो वनप्रहासा इव वारिबिन्दवः ॥ १० ॥

सखीजनं प्रेमगुरूकृतादरं निरीक्षमाणा इव नम्रमूर्तयः ।
स्थिरद्विरेफाञ्जनशारितोदरैर्विसारिभिः पुष्पविलोचनैर्लताः ॥ ११ ॥

उपेयुषीणां बृहतीरधित्यका मनांसि जह्रुः सुरराजयोषिताम् ।
कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्च चन्दनाः ॥ १२ ॥

'समु०' 'विदु०' 'सखी०' 'उपे०' व्याख्या । **कुञ्जसमुद्रयोषितः** वननंद्यः **सुरराजयोषिताम्** अप्सरसां **मनांसि** चित्तानि **जह्रुः** वशीचक्रुः अतिरमणीयत्वाच्चेतांसि हरन्ति स्मेत्यर्थः । किं० कुञ्ज० ? **प्रतीरदेशैः** प्रकृष्टतटप्रदेशैः **विभूषिताः** अलंकृताः किं० प्रती० ? **स्वकलत्रचारुभिः** निजकटिप्रदेशवत् मनोहरैः कलत्रैश्च । पुनः किं० प्रती० ? **समुन्नतैः** उन्नतैः पुनः किं० प्र० ? **काशदुकूलशालिभिः** काशकुसुमरूपपटकूलशोभितैः पुनः किं० प्र० ? **परिक्वणत्सारसपङ्क्तिमेखलैः** शब्दायमानसारसश्रेणीरूपकाञ्चिभिः । अथ समासः । काशा एव दुकूलाः काशदुकूलाः काशदुकूलैः शालन्त इति काशदुकूलशालिनस्तैः का० । सारसानां पङ्क्तयः सारसपङ्क्तयः परिक्वणन्त्यः सारसपङ्क्तय एव मेखलाः प० तैः परिक्वणत्सारसपङ्क्तिमेखलैः। प्रकृष्टं च तीरं प्रतीरं प्रतीरस्य देशाः प्रतीरदेशाः तैः प्र० । स्वेषां कलत्राणि स्वकलत्राणि स्वकलत्रवत् चारवः स्वकलत्रचारवस्तैः स्व० । समुद्रस्य योषितः स० कुञ्जेषु समुद्रयोषितः कु०। इति वृत्तार्थः ॥ ९ ॥

'विदू०' व्याख्या । पुनः **वारिबिन्दवो** जलकणाः सुरराजयोषितां मनांसि जह्रुः । किं० वारि० ? **प्रवाहात्** निर्झरात् **च्युताः** पतिताः किं० प्रवाहात् ? **विदूरपातेन** दूरगमनेन **भिदां** भेदम् **उपेयुषः** प्राप्तात्

१. अत्र तीरादीनां कलत्राद्यौपम्योपमेयत्वाद्योषिच्छब्दसामर्थ्याच्च नदीनां योषिदौपम्यं गम्यते -म. ।

पुनः किं० वारि० ? **प्रियाङ्कशीताः** आनन्दायित्वात् वल्लभोत्सङ्गवत् शीतलाः पुनः किं० वा० ? **शुचिमौक्तिकत्विषः** निर्मलमुक्ताफलसदृशकान्तयः पुनः किं० वा० ? **वनप्रहासाः** काननहासा **इव** स्थिताः[1]। अथ समासः । विदूरं पातः विदूरपातस्तेन वि० । प्रियायाः अङ्कः प्रियाङ्कः प्रियाङ्कवत् शीताः प्रि० । शुचीनि तानि मौक्तिकानि च शुचिमौक्तिकानि शुचिमौक्तिकानां त्विष इव त्विषो येषां ते शु० । वनस्य प्रहासा व० । वारीणां बिन्दवः वा० । इति वृत्तार्थः ॥१०॥

'सखी०' व्याख्या । पुन**र्लता** वल्ल्यः सुरराजयोषितां मनांसि जहुः । किं० लताः ? **पुष्पविलोचनैः** कुसुमरूपनेत्रैः **प्रेमगुरुकृतादरं** रागेण बृहत्कृतादरं यथा स्यात्तथा **सखीजनं** स्त्रीजनं **निरीक्षमाणाः** विलोकमाना **इव** स्थिताः । पुनः किं० लताः ? **नम्रमूर्तयः** नतशरीराः पुनः किं० पुष्प० ? **स्थिरद्विरेफाञ्जनशारितोदरैः** निश्चलभ्रमरकज्जलकर्बुरितमध्यैः पुनः किं० पुष्प० ? **विकासिभिः** विकसितैः[2]। अथ समासः । सखीनाञ्जनः सखीजनः तं स० । प्रेम्णा गुरुः कृत आदरो यस्मिन् कर्मणि तत् प्रे०। नम्रा मूर्तयो यासां ता न०। द्वौ रेफौ वर्णविशेषौ येषां ते द्विरेफाः स्थिराश्च ते द्विरेफाश्च स्थिरद्विरेफाः स्थि० एव अञ्जनानि स्थिरद्विरेफाञ्जनानि स्थिरद्विरेफाञ्जनैः शारितानि उदराणि येषां तानि स्थिरद्विरेफाञ्जनशारितोदराणि तैः स्थि०। पुष्पाण्येव विलोचनानि पुष्पविलोचनानि तैः पु० । इति वृत्तार्थः ॥ ११ ॥

'उपे०' व्याख्या । **च** पुनश्**चन्दनाः** चन्दनवृक्षाः सुरराजयोषितां मनांसि जहुः । किं० चन्दनाः ? **मदारुणैः** मदेन अरुणैः अव्यक्तरागैः अव्यक्तरागस्त्वरुण इति। **करिणां** हस्तिनां **कपोलकाषैः** गण्डस्थलघर्षणैः **उपाहितश्यामरुचः** उत्पादितकृष्णरुचः किं० सुर० ? **बृहतीः अधित्यकाः** पर्वतोर्ध्वभूमीः **उपेयुषीणां** प्राप्तवतीनाम् अत्र चतुःश्लोक्यां नद्यादीनां विशिष्टानाम् एवाप्सरसो मनोहरणे हेतुत्वोक्त्या काव्यलिङ्गमुन्नेयम् । अथ समासः । सुराणां राजा सुरराजः सुरराजस्य योषितः सुरराजयोषितस्तासां सु०। कपोलानां काषाः कपोलकाषाः तैः क० । मदेन अरुणाः मदारुणाः तैः म० । उपाहिता श्यामा रुक् येषां ते उ० । इति वृत्तार्थः ॥ १२ ॥ चतुर्भिः कलापकम् ॥

स्वगोचरे सत्यपि चित्तहारिणा विलोभ्यमानाः प्रसवेन शाखिनाम् ।
नभश्चराणामुपकर्तुमिच्छतां प्रियाणि चक्रुः प्रणयेन योषितः ॥ १३ ॥

'स्वगो०' व्याख्या । **योषितः** अप्सरसः **प्रणयेन** स्नेहातिशयेन **नभश्चराणां** गन्धर्वाणां **प्रियाणि** अभीष्टानि **चक्रुः** अकार्षुः किं० नभ० ? **उपकर्तुं** सेवां कर्तुम् **इच्छतां** वाञ्छतां स्वकरग्राह्यमपि प्रसवं स्वकान्तप्रियार्थं तद्दीयमानमेवाग्रहीषुरित्यर्थः । किं० योषितः ? **चित्तहारिणा** मनोहारिणा **शाखिनां** तरूणां **प्रसवेन** पुष्पेण **विलोभ्यमानाः** विप्रतार्यमाणाः कस्मिन् सति ? **स्वगोचरे** निजविषये स्वहस्तप्राप्ते सत्यपीत्यर्थः । अथ समासः । स्वस्य गोचरः स्वगोचरः तस्मिन् स्व० । चित्तं हरतीति चित्तहारि तेन चि० । नभसि चरन्तीति नभश्चराः तेषां न० । इति वृत्तार्थः ॥ १३ ॥

१. अत्रोपमयोरुभयोरुत्प्रेक्षायाश्च संसृष्टिः -म. । २. अत्र रूपकोत्प्रेक्षयोः संकरः -म. ।

प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लम्भिता ।
न किंचिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवम् ॥ १४ ॥

'प्रय०' व्याख्या । **मानिनी किंचित् न उचे** उवाच तर्हि किं चकारेत्याह- **चरणेन** पादेन केवलं **भुवं** भूमिं **लिलेख** अलिखत् पुनः किं० मा० ? **दयितेन** भर्त्रा **विपक्षगोत्रं** सपत्नीनामधेयं **लम्भिता** प्रापिता सपत्नीनाम्ना आहूतेत्यर्थः । किं० दयितेन ? **उच्चैः** उच्चस्थानात् **कुसुमानि** पुष्पाणि **प्रयच्छता** ददता पुनः किं० मा० ? **बाष्पाकुललोचना** अश्रुव्याप्तनयना नामस्खलितोत्पादितकोपनिमित्तनिर्वेदात् इति। अत एव मानिनी न किंचिदूचे इत्युक्तम् । अथ समासः । मानोऽस्या अस्तीति मानिनी । विपक्षस्य गोत्रं विपक्षगोत्रम् । बाष्पेनाकुले लोचने यस्याः सा बा० । इति वृत्तार्थः ॥ १४ ॥

प्रियेऽपरा यच्छती वाचमुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया ।
समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवम् ॥ १५ ॥

'प्रिये०' व्याख्या । **अपरा** काचिन्नायिका **अंशुकं** वस्त्रं **न समादधे** न धारयामास रागपारवश्यात् वस्त्रं नाग्रहीत् इत्यर्थः । **पुष्पेषु** कुसुमेषु **वृथा** व्यर्थम् **आहितम्** आरोपितम् अस्थानप्रसारितं **पाणिपल्लवं** करकिसलयं **न विवेद** नाज्ञासीत् व्यापारशून्यं (या) हस्तं न ज्ञातवतीत्यर्थः । एषा प्रगल्भा नायिका प्रियासक्तत्वादिति भावः । किं० अपरा ? **प्रिये** भर्तरि **निबद्धदृष्टिः** स्तब्धलोचना किं० प्रिये ? **वाचं** वाणीं **यच्छति** ददति आकरयतीत्यर्थः । पुनः किं० अपरा ? अत एवो**न्मुखी** ऊर्ध्ववदना पुनः किं० अपरा ? **शिथिलाकुलोच्चया** श्लथचलितनीविः 'नारीकट्यंशुकग्रन्थौ नीवी स्यादुच्चयोऽप्यथ' इति *मार्तण्डः* । प्रियवचनश्रवणादिति भावः । अथ समासः । उत् ऊर्ध्वं मुखं यस्याः सा उन्मुखी। निबद्धा दृष्टिः यया सा निबद्धदृष्टिः । शिथिल आकुल उच्चयो यस्याः सा शि०। पाणिरेव पल्लवः तं पाणिपल्लवम् । इति वृत्तार्थः ॥ १५ ॥

सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम् ।
स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया ॥ १६ ॥

'सलिल०' व्याख्या । कान्तया कयाचिन्नायिकया **कश्चित्** कामी पुमान् **घनेन** निबिडेन **जघनेन** कटिप्रदेशेन **स्तनोपपीडं** स्तनाभ्याम् उपपीड्य **नुनुदे** आहतः अंशुकातिरेकादिति भावः । एषापि प्रगल्भनायिका। जघनेन किं० ? **नितम्बिना** प्रशस्तनितम्बवता किंकुर्वन्त्या कान्तया ? **सलीलं** सविलासं यथा स्यात्तथा **कुसुमावतंसकं** पुष्पशेखरं **समासजन्त्या** बध्नन्त्या शिरसि प्रतिनिवेशयन्त्या प्रकरणात् कान्तदत्तमिति गम्यते। किं० कुसु० ? **आसक्तलतान्तभूषणं** ग्रथितपल्लवभूषणं परागपल्लवैः सह ग्रथितमित्यर्थः । सुरताभिलाषिण्याः कामिन्या ईदृशी चेष्टा भवतीति स्वभावोक्तिरलंकारः । सूक्ष्मवस्तु स्ववस्तु यथावद्वर्णनं स्वभावोक्तिः । अथ समासः । सह लीलया वर्तते यत् तत्सलीलम् । लतानाम् अन्ताः लतान्ताः आसक्ताश्च ते लतान्ताश्च आसक्तलतान्ताः आसक्तलतान्ता भूषणं यस्य स आसक्तलतान्तभूषणस्तम् आ० । कुसुमानाम् अवतंसकः कुसुमावतंसकस्तं कु० । स्तनाभ्यामुपपीड्य स्तनोपपीडम्।

प्रशस्तो नितम्बो यस्यासौ नितम्बी तेन नितम्बिना प्रशंसायामिनिः । इति वृत्तार्थः ॥ १६ ॥

युग्मं लिख्यते -

कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा ।
वलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता ॥ १७ ॥

विलम्बमानाकुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया ।
तरुप्रसूनान्यपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥ १८ ॥

'कल०' व्याख्या । 'विल०' व्याख्या । **कयाचि**न्नायिकया **मनोधिनाथस्य** भर्तुः **मन**श्चित्तं **समाददे** जगृहे आवर्जितमित्यर्थः । कान्तां पश्यतः कामिनो मनस्तदधीनं जातमिति भावः । किंकृत्वा ? **सादरम्** आदरसहितं साभिलाषम् इत्यर्थः । 'आदरेऽभिलाषः स्याद्' *इत्यनेकार्थः* । **तरुप्रसूनानि** वृक्षपुष्पाणि **अपदिश्य** व्याजं कृत्वा प्रसूनग्रहणं व्याजीकृत्येत्यर्थः । पुष्पग्रहणं तु व्याजः स्वाङ्गदर्शनं प्रयोजनं सर्वाङ्गसौष्ठवदर्शनात् सद्यो लग्नं प्रियमनस्तत्रेतिभावः । 'व्यपदेशो मिषं लक्ष्म' इति *हैमः* [३७८] । किं० कयाचित् ? **विलम्बमानाकुलकेशपाशया** लम्बमानचपलकेशपाशया पुनः किं० कया० ? **आविष्कृतबाहुमूलया** प्रकटीकृतकक्षाप्रदेशमूलया पुनः किं० कया० ? **कलत्रभारेण** श्रोणिभारेण उपलक्षितया । किं० कल० ? **विलोलनीविना** शरीरोन्नमनेन विश्लिष्टवस्त्रग्रन्थिना पुनः किं० कया० ? **उरसा** वक्षस्थलेन उपलक्षितया किं० उरसा ? **गलद्दुकूलस्तनशालिना** पतद्दुकूलपयोधरशोभिना पुनः किं० कया ? **उदरेण** उपलक्षितया किं० उदरेण ? **वलिव्यपायस्फुटरोमराजिना** वलिविनाशेन प्रकटरोमराजिना पुनः किं० उद० ? **निरायतत्वात्** प्रस्तारितत्वात् नितरां दीर्घत्वादिति भावः । **ताम्यता** तनूभवता ह्रस्वत्वात् कृशीभवतेत्यर्थः । अथ समासः । कलत्रस्य भारः कलत्रभारः तेन क० । विलोला नीविर्यस्मिन् स विलोलनीविस्तेन वि० । गलद् दुकूलं याभ्यां तौ गलद्दुकूलौ गलद्दुकूलौ च तौ स्तनौ च गलद्दुकूलस्तनौ गलद्दुकूलस्तनाभ्यां शालत इति गलद्दुकूलस्तनशालि तेन ग० । वलीनां व्यपायः वलिव्यपायः वलिव्यपायेन स्फुटरोमराजिर्यस्मिन् तत् वलिव्यपायस्फुटरोमराजि तेन व० । आयतस्य भाव आयतत्वं निर्गतम् आयतत्वं निरायतत्वं तस्मात् नि० ॥ १७ ॥ आकुलश्चासौ केशपाशश्च आकुलकेशपाशः विलम्बमानः आकुलकेशपाशो यस्याः सा विलम्बमानाकुलकेशपाशा तया वि० । बाहोर्मूलं बाहुमूलम् आविष्कृतं बाहुमूलं यया सा आविष्कृतबाहुमूला तया आ० । तरूणां प्रसूनानि तरुप्रसूनानि । सहादरेण वर्तते यत् तत् सादरम् । मनसोऽधिनाथः मनोधिनाथस्तस्य म० ॥१८॥ इति युग्मवृत्तार्थः ॥ १७-१८ ॥

व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥ १९ ॥

१. अत्र प्रियमनोहरणहेतुभिः कान्ताविशेषणपदार्थैः काव्यलिङ्गमुत्तिष्ठमानं स्वभावोक्त्या सहाङ्गाङ्गिभावेन संकीर्यते -म. ।

'व्यपो०' व्याख्या । **काचिन्नायिका पयोधरेण** स्तनेन **उरसि** हृदये **प्रियं** भर्तारं **जघान** आहतवती अताडयत् इत्यर्थः । इयमपि प्रगल्भा नायिका पयोधरेण उरसि जघान इत्येतत् कपटपरिज्ञानजन्यादौत्सुक्यादिति भावः । किं० काचित् ? **उन्मनाः** उत्कण्ठितचित्ता प्रियं प्रति उत्सुका इत्यर्थः । पुनः किं० का० ? **उन्नतपीवरस्तनी** उच्चैस्तरं स्थूलपयोधरा किं० प्रियम् ? **किले**त्यलीको **मुखानिलैः** वदनवातैः **लोचनतो** नेत्रसकाशात् **पुष्पजं** कुसुमजं **रजो** रेणुं **व्यपोहितुं** स्फेटयितुम् **अपारयन्तम्** अशक्नुवन्तम् उद्यमं न कुर्वन्तमित्यर्थः । अथ समासः । लोचनादिति लोचनतः । मुखस्य अनिला मुखानिलास्तैर्मु० । पुष्पजातं पु० । उद्गतं मनो यस्याः सा उ० । उन्नतौ पीवरौ स्तनौ यस्याः सा उ० । इति वृत्तार्थः ॥ १९ ॥

इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे ।
विहाय निःसारतयेव भूरुहः[1] पदं वनश्रीर्वनितासु संदधे ॥ २० ॥

'इमा०' व्याख्या । **वनश्रीः** काननलक्ष्मीः **भूरुहो** वृक्षान् **निःसारतया** निःशूकतयेव[१] **विहाय** त्यक्त्वा **वनितासु** देवाङ्गनासु **पदं** स्थानकं **संदधे** चकार तत्र स्थिता इत्यर्थः । क्व सति ? **कुसुमाग्रपल्लवे** पुष्पाग्रकिसलये **यथाभिरामं** यथा रमणीयम् **इत्य**मुना प्रकारेण **इमानि** निकटस्थानि **अमूनि** दूरस्थानि पुष्पाणि **शनैः** मन्थरम् **अपवर्जिते** त्यक्ते सति स्खलने सती[२]त्यर्थः । अथ समासः । कुसुमानि च अग्रपल्लवानि च कुसुमाग्रपल्लवं तस्मिन् कुसुमाग्रपल्लवे । वनानां श्रीः वनश्रीः । इति वृत्तार्थः ॥ २० ॥

प्रवालभङ्गारुणपाणिपल्लवः परागपाण्डूकृतपीवरस्तनः ।
महीरुहः पुष्पसुगन्धिराददे वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥ २१ ॥

'प्रवा०' व्याख्या । **अङ्गनाजनः** देवाङ्गनाजनः **महीरुहो** वृक्षसमूहाद् **वपुर्गुणोच्छ्रायं** वपुर्गुणप्रकर्षशरीरस्य अरुणादेः उत्कर्षमि**वाददे** जग्राह लब्धवानित्युत्प्रेक्षा । वस्तुतस्तु स्वाभाविक एव प्रवालभङ्गादिति अभिव्यज्यते । किंलक्षणोऽङ्गनाजनः ? **प्रवालभङ्गारुणपाणिपल्लवः** किसलयच्छेदात् आरक्तकरपल्लवः तद्रसरञ्जनादरुण इति भावः । पुनः किं० ? **परागपाण्डूकृतपीवरस्तनः** पुष्परजसा पाण्डुरीकृतपुष्टपयोधरः पुनः किं० अ० ? **पुष्पसुगन्धिः** कुसुमवत् सुगन्धिः । अथ समासः । प्रवालस्य भङ्गः प्रवालभङ्गः प्रवालभङ्गेन अरुणाः पाणिपल्लवा यस्य स प्र० । परागेण पाण्डूकृतौ पीवरौ स्तनौ यस्य स प० । पुष्पैः सुगन्धिः पु० । वपुर्गुणस्य उच्छ्रायः वपुर्गुणोच्छ्रायस्तं व० । अङ्गना एव जनः अ० । इति वृत्तार्थः ॥२१॥

1. भूरुहान् -म. इदं च पा. ।

१. इति हेतूत्प्रेक्षा -म. । २. अत्र वनितागतायाः पुष्पप्रसाधनसंभाव्यमानाया लक्ष्म्या विषयभूताया निगरणेन विषयेण वनश्रियो वनितागतत्वोक्त्याऽसंबन्धे संबन्धरूपाऽभेदे भेदरूपा वातिशयोक्तिरलंकारः 'विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात्कविप्रौढोक्तिजीविता ॥' इति लक्षणादुत्प्रेक्षाङ्गत्वमस्याः -म. ।

वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः ।
समेऽपि यातुं चरणाननीश्वरान् मदादिव प्रस्खलतः पदे पदे ॥ २२ ॥

विसारिकाञ्चीमणिरश्मिलब्धया मनोहरोच्छ्रायनितम्बशोभया ।
स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः ॥ २३ ॥

समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः ।
दधन्ति मध्येषु वलीविभङ्गिषु स्तनातिभारादुदराणि नम्रताम् ॥ २४ ॥

समानकान्तीनि तुषारभूषणैः सरोरुहैरस्फुटपत्रपङ्क्तिभिः ।
चितानि घर्माम्बुकणैः समन्ततो मुखान्यनुत्फुल्लविलोचनानि च ॥ २५ ॥

विनिर्यतीनां परिखेदमन्थरं सुराङ्गनानामनुसानु वर्त्मनः ।
सविस्मयं रूपयतो नभश्चरान् विवेश तत्पूर्वमिवेक्षणादरः ॥ २६ ॥ (प.कु.)

'वरो०' 'विसा०' 'समु०' 'समा०' 'विनि०' व्याख्या । **ईक्षणादरः** विलोकनादरः **नभश्चरान्** गन्धर्वान् **तत् पूर्वम्** तदेव प्रथमं यथा स्यात्तथा **विवेश** प्रविष्टः किंकुर्वतः ? **सविस्मयं** विस्मयसहितं **सुराङ्गनानां** देवाङ्गनानाम् **एतान्** पूर्वोक्तान् प्रकारान् **रूपयतो** वर्णयतः किं० सुराङ्गनानाम् ? **परिखेदमन्थरं** श्रमेण मन्दं यथा स्यात्तथा **वर्त्मनः** मार्गसकाशात् **अनुसानु** सानुसमीपे **विनिर्यतीनां** निर्गच्छन्तीनाम् । अथ समासः । परिखेदेन मन्थरं प० । सुराणाम् अङ्गनाः सुराङ्गनास्तासां सु० । सानोः समीपम् अनुसानु । सह विस्मयेन वर्तते यत् तत् स० । नभसि चरन्तीति नभश्चरास्तान् न० । तदेव पूर्वं तत्पूर्वम्। ईक्षणानाम् आदरः ई० ॥ २६ ॥

किंकुर्वतो नभश्चरान् ? सविस्मयं सुराङ्गनानां चरणान् रूपयतः किं० चरणान् ? **वारणहस्तपीवरैः** हस्तिशुण्डादण्डवत् स्थूलैः **वरोरुभिः** प्रधानसक्थिभिः **चिराय** अत्यर्थं चिरकालं वा **खिन्नान्** खेदप्राप्तान् भारपीडितान् इत्यर्थः । पुनः किं० चरणान् ? **नवपल्लवश्रियः** अभिनवकिसलयकान्तान् अनेन सुकुमारत्वोक्तिः सुकुमारस्य भारोद्वहने खेद इति भावः । पुनः किं० चर० ? **समे** समप्रदेशेऽपि **यातुं** गन्तुम् **अनीश्वरान्** असमर्थान् चरणान् किंकुर्वतः ? उत्प्रेक्ष्यते **मदात्** मद्यपाना**दिव पदे पदे** स्थाने स्थाने **प्रस्खलतः** स्खलनं प्राप्तवतः । अथ समासः । वराश्च ते उरवश्च वरोरवः तैर्व० । वारणानां हस्ता वारणहस्ता वारणहस्तवत् पीवरा वारणहस्तपीवरास्तैर्वा० । नवाश्च ते पल्लवाश्च नवपल्लवाः नवपल्लवानां श्रीरिव श्रीर्येषां ते नवपल्लवश्रियस्तान् न० । न ईश्वरा अनीश्वरास्तान् अ० । इति वृत्तार्थः ॥ २२ ॥

किंकुर्वतो नभश्चरान् ? सविस्मयं सुराङ्गनानां **जघनानि** कटिप्रदेशानि रूपयतः । किं० जघनानि ? **गौरवैः** गुरुत्वैः उपलक्षितानि नितरां भारायमाणानीत्यर्थः । किं० गौरवैः ? **श्रमातिरिक्तैः** श्रमेणाधिकैः श्रमेण ह्यङ्गानि गुरुतरीभवन्तीत्यर्थः । पुनः किं० जघनानि ? **मनोहरोच्छ्रायनितम्बशोभया** मनोज्ञोन्नतकटिपश्चाद्भागकान्त्या **नवसैकतद्युतिं** नवपुलिनशोभां जित्वा **पराभूय** स्थितानि रहितानि

तत्तुल्यानीत्यर्थः । मनोह० किं० ? **विसारिकाञ्चीमणिरश्मिलब्धया** प्रसरणशीलकटिमेखलामणि-किरणप्राप्तया । अथ समासः । काञ्चीषु मणयः काञ्चीमणयः तेषां रश्मयः काञ्चीमणिरश्मयः विसारिणश्च ते काञ्चीमणिरश्मयश्च विसारिकाञ्चीमणिरश्मयः विसारिकाञ्चीमणिरश्मिभिःलब्धा विसारि० तया वि० । मनोहरः उच्छ्रायो येषां ते मनोहरोच्छ्राया मनोहरोच्छ्रायाश्च ते नितम्बाश्च मनोहरोच्छ्रायनितम्बाः मनोहरोच्छ्रायनितम्बानां शोभा मनोहराच्छ्रायनितम्बशोभा तया म० । नवानि च तानि सैकतानि च नवसैकतानि नवसैकतानां द्युतिः नवसैकतद्युतिस्तां न० । श्रमेण अतिरिक्तानि श्रमातिरिक्तानि तैः श्र० । गुरुत्वानि गौरवाणि तैः गौरवैः । इति वृत्तार्थः ॥२३॥

पुनः किंकुर्वतो नभश्चरान् ? सविस्मयं सुराङ्गनानाम् उदराणि रूपयतः । यतः किं० उदराणि ? **नाभिभिः** प्रतारिकाख्यैः **उपनीवि** वसनग्रन्थिसमीपे **उपाहितश्रीणि** जनितशोभानि 'नाभिसंज्ञं चाङ्गं यस्य संज्ञा प्रतारिका' इति *केशवः* । अथ नाभिशब्दस्य पुंलिङ्गतायां कविरेव प्रमाणम् । किं० नाभिभिः ? **समुच्छ्वसत्पङ्कजकोशकोमलैः** विकसत्कमलमुकुलसुकोमलैः मनोहरैरित्यर्थः । उदराणि किंकुर्वन्ति ? **वलीविभङ्गिषु** त्रिवलीयुक्तेषु **मध्येषु** जघनस्थलेषु **स्तनातिभारात् नम्रतां** निमज्जतां **दधन्ति** बिभ्रति । अथ समासः । पङ्कजानां कोशः पङ्कजकोशः समुच्छ्वसंश्चासौ पङ्कजकोशश्च समुच्छ्वसत्पङ्कजकोशः समुच्छ्वसत्पङ्कजकोशवत् कोमला स० तैः समु० । उपाहिता श्रियः येषां तानि उ० । नीवेः समीपम् उ० । वलीनां विभङ्गो येषु तानि वलीविभङ्गीनि तेषु व० । स्तनानाम् अतिभारात् स्त० । नम्रस्य भावो नम्रता तां न० । इति वृत्तार्थः ॥ २४ ॥

पुनः किंकुर्वतो नभश्चरान् ? सविस्मयं सुराङ्गनानां **मुखानि** वदनानि रूपयतः । किं० मुखानि ? [**चितानि** व्याप्तानि कैः ? **घर्माम्बुकणैः** स्वेदबिन्दुभिः **समन्ततः** सर्वत्र पुनः किं० ? **अनुत्फुल्ल-विलोचनानि** अविकसदक्षीणि **च** पुनः] **सरोरुहैः** कमलैः **समानकान्तीनि** सदृशकान्तीनि तुल्यशोभानि इत्यर्थः । किं० सरो० ? **तुषारभूषणैः** हिमकणाभरणैः सीकरपरिवृतैः इत्यर्थः । पुनः किं० सरो० ? **अस्फुटपत्रपङ्क्तिभिः** अप्रकटपत्रश्रेणि[१]भिः । अथ समासः । समाना कान्तिर्येषां तानि स० । तुषारेण भूषणं येषां तानि तुषारभूषणानि तैः तु० । पत्राणां पङ्क्तयः पत्रपङ्क्तयः न स्फुटा पत्रपङ्क्तयो येषां तानि अस्फुटपत्रपङ्क्तीनि तैः अ० । अम्बूनां कणाः अम्बुकणाः घर्मस्य अम्बुकणाः घर्माम्बुकणास्तैर्घ० । न उत्फुल्लानि अनुत्फुल्लानि अनुत्फुल्लानि विलोचनानि येषां तानि अनु० । इति वृत्तार्थः ॥ २५ ॥ इति कुलकार्थः पञ्चभिः कुलकम् ।

अथ कविर्जलरतिं वर्णयति -

अथ स्फुरन्मीनविधूतपङ्कजा विपङ्कतीरस्खलितोर्मिसंहतिः ।
पयोऽवगाढुं कलहंसनादिनी समाजुहावेव वधूः सुरापगा ॥ २७ ॥

'अथ०' व्याख्या । **अथ** पुष्पावचयानन्तरं **सुरापगा** गङ्गा **पयो** जलम**वगाढुम्** अवगाहितुं

१. अत्र कुलके स्वभावोक्तिरुत्प्रेक्षाङ्गम् -म. ।

जलक्रीडार्थमित्यर्थः । **वधूः** अप्सरसः **समाजुहाव** आकारयामास **इव** यथा काचिन्नायिका कांचित् सखीं प्रति क्रीडानिमित्तम् आकारयति तद्वदित्यर्थः । किं० सुरापगा ? **स्फुरन्मीनविधूतपङ्कजा** चलन्मत्स्यैश्चालितकमला अनेन सन्मुखवीक्षणोक्तिः । पुनः किं० सुरापगा ? **विपङ्कतीरस्खलितोर्मिसंहतिः** कर्दमरहिततटे प्रतिहतकल्लोलमाला 'विपङ्कतीरम्' इत्यनेन विहारयोग्यत्वं सूचितम् 'उर्मिसंहतिः' अनेन हस्तसंज्ञोक्तिः दर्शिता। पुनः किं० सुरापगा ? **कलहंसनादिनी** कादम्बपक्षीशब्दवती अनेन वाग्व्यापारोक्तिः । अथ समासः । स्फुरन्तश्च ते मीनाश्च स्फुरन्मीनाः तैः विधूतानि पङ्कजानि यस्यां सा स्फु० । विगतः पङ्को यस्मात्तत् विपङ्कं विपङ्कं च तत्तीरं च वि० विपङ्कतीरे स्खलिता उर्म्मीणां संहतिर्यस्यां सा वि० । कलहंसानां नादो विद्यते अस्यामिति क० । सुराणामापगा सुरापगा । इति वृत्तार्थः ॥ २७ ॥

प्रशान्तघर्माभिभवः शनैर्विवान् विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥ २८ ॥

'प्रशान्त०' व्याख्या । **तरङ्गमालान्तरगोचरः** कल्लोलमालामध्यवर्ती **अनिलो** वायुः **विलासिनीभ्यो** देवाङ्गनाभ्यो **भुजालम्बं** करावलम्बनमिव **ददौ** दत्तवान् अहं जाने इति शेषः । विलासिन्यो विशिष्टवायुसंयोगात् उछ्वासं प्रापुरित्यर्थः । यथा कथंचित् पुमान् कस्यचित् श्रान्तस्य हस्तावलम्बनैर्ददाति तद्वदिति भावः । कविना वायुस्त्रिधा वर्ण्यते किंलक्षणोऽनिलः ? **प्रशान्तघर्माभिभवः** प्रशमिततापोपद्रवः एतेन शैत्योक्तिः । पुनः किं० अनि० ? **शनैः** मन्दमन्दं **विवान्** वहन् एतेन मान्द्योक्तिः । पुनः किं० ? **परिमृष्टपङ्कजः** स्पृष्टकमलः पद्मगन्धीत्यर्थः । एतेन सौरभ्योक्तिः । पुनः किं० अनि० ? **आत्तशीकरः** गृहीतजलकणः । अथ समासः । घर्मस्य अभिभवः घर्माभिभवः प्रशान्तो घर्माभिभवो येन स प्र० । परिमृष्टानि पङ्कजानि येन स प० । भुजाभ्यामालम्बः भुजालम्बस्तं भु० । आत्ता शीकरा येन स आ० । तरङ्गानां माला तरङ्गमाला तरङ्गमालानाम् अन्तरं तरङ्गमालान्तरं तरङ्गमालान्तरे गोचरो यस्य स त० । इति वृत्तार्थः ॥ २८ ॥

गतैः सहावैः कलहंसविभ्रमं[1] कलत्रभारैः पुलिनं नितम्बिभिः ।
मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः साम्यगुणान्निरासिरे ॥ २९ ॥

'गतैः०' व्याख्या । **सुरस्त्रियो** देवाङ्गनाः एतैः प्रकारैः एतान् **साम्यगुणान्** साधारणगुणान् **निरासिरे** निराचक्रिरे तदेव विशेषणद्वारेणाह- **सहावैः गतैः** सविलासैः गमनैः **कलहंसविभ्रमं** राजहंसगतिं कामिनीनां गमनापेक्षया कलहंसगतेः विलासविधुरत्वात् इति भावः । **नितम्बिभिः** प्रशस्तनितम्बैः **कलत्रभारैः** जघनभारैः **पुलिनं** तटं निरासिरे **दीर्घलोचनैः** दीर्घनेत्रैः **सरोजानि** कमलानि निरासिरे निरस्तवत्यः गुणवदगुणयोः कुतः साम्यमिति भावः । **चः** पुनरर्थे । अथ समासः । सहावेन वर्तमानानि सहावानि तैः स० । कलहंसानां विभ्रमो कलहंसविभ्रमस्तं क० । कलत्राणां भाराः कलत्रभारास्तैः क० ।

1. विक्रमं -म. इदं च पा. ।

प्रशस्ता नितम्बा विद्यन्ते येषां ते नितम्बिनस्तैर्नि० । दीर्घानि लोचनानि येषां तानि दीर्घलोचनानि तैः दी० । सुराणां स्त्रियः सु० । साम्यस्य गुणाः साम्यगुणाः तान् सा० । इति वृत्तार्थः ॥२९॥

विभिन्नपर्यन्तगमीनपङ्क्तयः पुरोऽवगाढाः[1] सखिभिर्मरुत्वतः ।
कथंचिदापः सुरसुन्दरीजनैः सभीतिभिस्तत्प्रथमं प्रपेदिरे ॥ ३० ॥

'विभि०' व्याख्या । **सुरसुन्दरीजनैः** देवाङ्गनाजनैः **तत्प्रथमं** तदेव पूर्वम् अवगाहनं यथा स्यात्तथा **आपो** जलानि **कथंचिन्**महता कष्टेन **प्रपेदिरे** अवजगाहिरे प्राप्ता इत्यर्थः । किं० सुर० ? **सभीतिभिः** सभयैः भययुक्तैरित्यर्थः । पूर्वमप्रविष्टविषयत्वात्तदेव जलावगाहनं प्रथममिति कृत्वा तासां सभयत्वम् इति भावः । 'विषादिभिः' इति पाठेऽप्ययमेवार्थः । किं० आपः ? **मरुत्वतः** इन्द्रस्य **सखिभिर्गन्धर्वैः पुरः** पूर्वमेव **अवगाढाः** आक्रान्ताः गर्तग्रावादिपरीक्षार्थं च प्रविष्टा इत्यर्थः । पुनः किं० आपः ? **विभिन्नपर्यन्तगमीनपङ्क्तयः** त्रासितप्रान्तगामिमत्स्यश्रेणयः अनेन विशेषणेन भयावहत्वमपां द्योतितम् । अथ समासः । पर्यन्ते गच्छन्तीति पर्यन्तगाः मीनानां पङ्क्तयो मीनपङ्क्तयः विभिन्नाः पर्यन्तगामिनो मीनपङ्क्तयो यासां ताः वि० । मरुतो विद्यन्तेऽस्य स मरुत्वान् तस्य म० । सुराणां सुन्दर्यः सुरसुन्दर्यः सुरसुन्दरीणां जनाः सुरसुन्दरीजनास्तैः सु० । विषादो विद्यते येषां ते विषादिनस्तैर्वि० । तदेव प्रथमं तत्प्रथमम् । इति वृत्तार्थः ॥ ३० ॥

विगाढमात्रे रमणीभिरम्भसि प्रयत्नसंवाहितपीवरोरुभिः ।
विभिद्यमाना विससार सारसानुदस्य तीरेषु तरङ्गसंहतिः ॥ ३१ ॥

'विगा०' व्याख्या । **तरङ्गसंहतिः** कल्लोलमाला **तीरेषु** तटेषु **सारसान्** पक्षिविशेषान् यद्वा **सारसान्** हंसान् 'चक्राङ्गः सारसो हंसः' इति *शब्दार्णवे* । **उदस्य** प्रक्षिप्य **विससार** प्रससार तीरेषु सारसान् उत्सार्य वितस्तारेत्यर्थः । किं० तर० ? **रमणीभिः** स्त्रीभिः **अम्भसि** पानीये **विगाढमात्रे** प्रविष्टे एव सति प्रवेशक्षण एवेत्यर्थः । **विभिद्यमाना** स्वयंविशीर्णमाना स्वयं भेदं गच्छन्तीत्यर्थः । किं० रमणीभिः ? **प्रयत्नसंवाहितपीवरोरुभिः** महता कष्टेन उत्पाटितपुष्टसक्थिभिः । अथ समासः । विगाढ एव विगाढमात्रम् । [प्रयत्नेन संवाहिताः पीवराः उरवः] याभिस्ता प्रयत्नसंवाहितपीवरोरवस्ताभिः प्र० । तरङ्गाणां संहतिः त० इति वृत्तार्थः ॥ ३१ ॥

द्युतिं वहन्तो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः ।
उपप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥ ३२ ॥

'द्युति०' व्याख्या । **वनितावतंसकाः** देवाङ्गनामुकुटाः **च्युताधिकाराः** भ्रष्टाधिकाराः **सचिवाः** अमात्या **इव तत् क्षणं** तत्क्षणमेव **शोचनीयतां** शोच्यताम् **आययुः** प्रापुः अप्रयोजकतां गता इत्यर्थः । कष्टदशां गताः क्वचित् 'हृताधिकाराः अमात्या इव' इति पाठस्तत्र हृतोऽधिकारो येभ्यस्ते हृताधिकाराः किं०

1. पुरो विगाढाः -म. इदं च पा.

वनि० ? **द्युतिं** कान्तिं **वहन्तो** धारयन्तः यदि द्युतिमन्तस्तर्हि कथं शोचनीयताम् आपुरित्याह- किं० व० ? **वेगिभिः** वेगवद्भिः **जलैः** सलिलैः **प्रलोभात्** मोहात् **हृता** गृहीताः पुनः किं० व० ? **उपप्लुताः** प्लवमानाः तरन्त इत्यर्थः । क्वचित् 'उपहृता' इति पाठस्तत्र उपहृता पातिता इत्यर्थः । अथ समासः । वनितानामवतंसका व० । वेगो विद्यते येषां तानि वेगीनि तैः वे० । शोचनीयानां भावः शोचनीयता तत्क्षणं शोचनीयता तत्क्षणशोचनीयता तां त० । च्युतोऽधिकारो येभ्यस्ते च्युताधिकाराः । इति वृत्तार्थः ॥ ३२ ॥

शिलाघनैर्नाकसदामुरःस्थलैर्बृहन्निवेशैश्च वधूपयोधरैः ।
तटान्तनीतेन[1] विभिन्नवीचिना रुषेव भेजे कलुषत्वमम्भसा ॥ ३३ ॥

'शिला०' व्याख्या । **अम्भसा** पानीयेन **रुषा** कोपेनेव **कलुषत्वं** कालुष्यं मनःक्षोभश्च **भेजे** प्रासम् आश्रितमित्यर्थः । यथा कश्चिन्मृदुस्वभावः केनचित्कठिनादिना साङ्गभङ्गं ताडयित्वा निष्कासितः क्षुभ्यति तद्वदिति भावः । किं० अम्भसा ? **शिलाघनैः** शिलावत् कठिनैः **नाकसदां** गन्धर्वाणाम् **उरस्थलैः** वक्षस्थलैः **बृहन्निवेशैः** महासंस्थानैरतिस्थूलैरित्यर्थः । **वधूपयोधरैः** देवाङ्गनास्तनैश्च **तटान्तनीतेन** तटसमीप-प्रापितेन पुनः किं० अम्भसा ? **विभिन्नवीचिना** भग्नोर्मिणा भग्नतरङ्गेणेत्यर्थः । अथ समासः । शिलावत् घनानि शि० तैर्शिलाघनैः । नाके सीदन्ति ते नाकसदः तेषां नाकसदाम् । बृहन्निवेशो येषां ते बृहन्निवेशा तैर्बृ० । वधूनां पयोधराः वधूपयोधराः तैर्व० । तटस्य अन्तो तटान्तः तटान्तं नीतस्तटा० तेन त० । विभिन्ना वीचयो यस्य स विभिन्नवीचिस्तेन वि० । कलुषस्य भावः कलुषत्वम्। इति वृत्तार्थः ॥३३॥

विधूतकेशाः परिलोलितस्रजः सुराङ्गनानां प्रविलुप्तचन्दनाः ।
अतिप्रसंगाद्विहितागसो मुहुः प्रकम्पमीयुः सभया इवोर्मयः ॥ ३४ ॥

'विधू०' व्याख्या । **ऊर्मयः** कल्लोलाः **मुहुरत्यर्थं** **प्रकम्पं** कम्पम् **ईयुः** प्रापुः किं० ऊर्मयः ? **अतिप्रसंगात्** अत्यन्तसामीप्यात् सुराङ्गनानां **विहितागसः** कृतमण्डनखण्डनरूपापराधाः। पुनः किं० ऊ० ? अत एवोत्प्रेक्ष्यते **सभयाः** स्त्रीभ्यो भीता **इव** यथा स्त्रीणां कृतापराधा नराः भयेन कम्पन्ते तद्वदिति भावः। पुनः किं० उ० ? **सुराङ्गनानां** देवाङ्गनानां **विधूतकेशाः** विक्षिप्तशिरोरुहा इत्यर्थः। पुनः किं० ऊर्मयः ? **परिलोलितस्रजः** व्याकुलीकृतपुष्पमालाः पुनः किं० उ० ? **प्रविलुप्तचन्दनाः** प्रमृष्टाङ्गरागाः प्रक्षालितचन्दनाः इत्यर्थः । अथ समासः । विधूताः केशाः यैस्ते वि० । परि समन्तात् लोलिताः स्रजो यैस्ते प० । सुराणामङ्गनाः सुराङ्गनास्तासां सु० । प्रविलुप्तानि चन्दनानि यैस्ते प्र०। अति अत्यन्तं प्रसंगः अतिप्रसंगस्तस्मात् अ० । विहितमागो यैस्ते वि०। सह भयेन वर्तन्ते इति स० । इति वृत्तार्थः ॥३४॥

विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममण्डनेन ये ।
हृतस्य शेषानिव कुङ्कुमस्य तान् विकत्थनीयान्दधुरन्यथा स्त्रियः ॥ ३५ ॥

'विप०' व्याख्या । **स्त्रियोऽप्सरसः** **तान्** नखव्रणान् **अन्यथा** **दधुः** प्रकटान् धारयामासुः किं०

1. तटाभिनीतेन -म. इदं च पा. ।

तान् ? **विकत्थनीयान्** भर्तृवाल्लभ्यस्य व्यञ्जकत्वेन श्लाघनीयान् । पुनः किं० तान् ? उत्प्रेक्ष्यते **हृतस्य** अम्भसा क्षालितस्य **कुङ्कुमस्य शेषान्** अवशिष्टलेशानिव स्थितान् । तान् कान् ? येन **नखव्रणाः** नखक्षता **विभ्रममण्डनेन** विलासार्थं धृतं चन्दनाद्याभरणं तेन **तिरोहिताः** आच्छादिताः किं० नख० ? **विपक्षचित्तोन्मथनाः** सपत्नीहृदयदुःखदायिनः । अथ समासः । विपक्षस्य चित्तानि विपक्षचित्तानि तेषाम् उन्मथनाः वि० । नखानां व्रणाः न० । विभ्रमस्य मण्डनं विभ्रममण्डनं तेन वि० । इति वृत्तार्थः ॥३५॥

प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ ३६ ॥

'प्रिये०' व्याख्या । **काचित्** कन्यका **जलाविलाम्** अम्भसा क्लिन्नां मृदितां **स्रजं** पुष्पमालां **न विजहौ** न तत्याज किं० स्रजम् ? **प्रियेण** भर्त्रा **संग्रथ्य** स्वयमेव रचयित्वा **विपक्षसन्निधौ** सपत्नीजनसमीपे **पीवरस्तने** पुष्टपयोधरे **वक्षसि** उरःस्थले **उपाहितां** न्यस्तां यदि जलक्लिन्ना तत्कथं तां निर्गुणां नात्याक्षीत् इत्यर्थान्तरन्यासेन द्रढयति - **हि** यतः कारणात् **गुणाः प्रेम्णि** स्नेहे **वसन्ति** तिष्ठन्ति **न वस्तुनि** न पदार्थे यत्स्नेहास्पदं तदेव गुणवत् अन्यत्तु गुणवदपि निर्गुणमेव प्रेम तु वस्तुपरीक्षां नापेक्षते इति । अथ समासः। विपक्षस्य संनिधिः विपक्षसंनिधिः तस्मिन् वि० । पीवरौ स्तनौ यस्मिन् तत् पीवरस्तनं तस्मिन् पी० । जलेन आविला जलाविला तां ज० इति वृत्तार्थः ॥३६॥

असंशयं न्यस्तमुपान्तरक्ततां यदेव रोद्धुं रमणीभिरञ्जनम् ।
हृतेऽपि तस्मिन्सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियम् ॥ ३७ ॥

'असंशयं०' व्याख्या । **रमणीभि**र्देवाङ्गनाभिः **यदेव अञ्जनं** कज्जलं **न्यस्तं** स्थापितं तदिति शेषः। यत्तदोर्नित्याभिसंबन्धात् तदञ्जनम् **उपान्तरक्ततां** नेत्रपर्यन्तलोहित्यं **रोद्धुं** स्थगितुमिव **असंशयं** निस्सन्देहं न्यस्तं न तु शोभार्थम् इत्यर्थः । **रागो** रक्तिमा **नयनेषु** लोचनेषु **शुक्लतां** शुभ्रत्वं **निरास** निरस्तवान् न तु श्रियं शोभां निरास[१] । कस्मिन् सति ? **सलिलेन** वारिणा **तस्मिन्न**ञ्जने कज्जले **हृतेऽपि** विस्फेटितेऽपि सति । अथ समासः । न विद्यते संशयो यत्र यस्यां क्रियायां तदशंसयम् । उपान्तयो रक्तता उपान्तरक्तता ताम् उ० । शुक्लस्य भावः शुक्लता तां शु० । इति वृत्तार्थः ॥३७॥

विपत्रलेखा निरलक्तकाधरा हृतां[1]ञ्जनाक्षीरपि बिभ्रतीः श्रियः ।
निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मण्डनम् ॥ ३८ ॥

'विपत्र०' व्याख्या । **नभश्चरैः** गन्धर्वैः **रामाः** देवाङ्गनाः **निरीक्ष्य** विलोक्य **तद्वपुषा** देवाङ्गना

1. निरञ्जनाक्षीः -म. इदं च पा. ।

१. अतः शुक्लत्वविरोधिरागनिरोधार्थमेवेदमञ्जनं स्यात् न तु शोभार्थम्, तस्यास्तदभावेऽपि सद्भावादिति । अत्राञ्जनन्यासमनूद्य तस्य शोभार्थत्वनिषेधेन रागरोधार्थत्वोत्प्रेक्षणमुदितम् उत्तरार्धे तस्यैव समर्थनात्, एवमुपान्तरक्ततां रोद्धुं यदञ्जनं न्यस्तमित्येकान्वये विध्यनुवादविरोधः स्यात् -म. ।

नाममण्डनेनैव[देहेन] **मण्डनं** पत्रलेखादि अलंकृतं **बुबुधे** ज्ञातम् आभरणानि अलङ्कृतानि इति एवकारो निश्चयार्थः । किं० रामाः ? **विपत्रलेखाः** गतपत्रवल्लिकाः जलावगाहेन तिलकरहिता इत्यर्थः । पुनः किं० रामाः ? **निरलक्तकाधराः** अलक्तरागरहितौष्ठाः पुनः किं० रामाः ? **हृताञ्जनाक्षीः** अञ्जनरहितनेत्राः । पुनः किं० रामाः ? तथापि **श्रियः** शोभाः **बिभ्रतीः** दधानाः शोभाकारणाभावेऽपि शोभमाना इति भावः[१]। अथ समासः । विगताः पत्रलेखाः यासां ताः वि० । निर्गता अलक्तका येभ्यस्ते निरलक्तकाः निरलक्तका अधरा यासां ताः नि० । हृतम् अञ्जनं येभ्यस्तानि हृताञ्जनानि हृताञ्जनानि अक्षीणि यासां ताः हृताञ्जनाक्षयस्ता हृ० । तासां वपुः तद्वपुस्तेन तद्वपुषा । इति वृत्तार्थः ॥ ३८ ॥

तथा न पूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः ।
यथा जलार्द्रो नखमण्डनश्रिया ददाह दृष्टीः प्रति[1]पक्षयोषिताम् ॥ ३९ ॥

'तथा०' व्याख्या । **विलासिनीजनः** देवाङ्गनाजनः **पूर्वं** जलविहारात् प्राग् **प्रियानुरागेण** भर्तृस्नेहेन **कृतभूषणादरः** विहितालंकारादरः **प्रतिपक्षयोषितां** सपत्नीनां **दृष्टीः** नेत्राणि **न ददाह** न अदहत तथा कथम् ? **यथा** येन प्रकारेण **जलार्द्रो** जलक्लिन्नः सन् **नखमण्डनश्रिया** नखशब्देन क्षतानि विवक्ष्यते नखक्षतमण्डनस्य श्रिया शोभया प्रतिपक्षयोषितां दृष्टीः ददाह तापयामास मण्डनादपि नखक्षतं प्रियसंगमव्यञ्जकत्वेन सपत्नीनां महादुःखहेतुरितिभावः[२] । अथ समासः । कृतो भूषणेषु आदरो येन स कृ० । प्रियस्य अनुरागः प्रियानुरागः तेन प्रि० । विलासिनीनां जनो वि० । जलेन आर्द्रो ज० । नखक्षतान्येव मण्डनानि नखमण्डनानि तेषां श्रीः नखमण्डनश्रीस्तया न० । प्रतिपक्षा इव योषितः प्रतिपक्षयोषितः तासां प्र० । इति वृत्तार्थः ॥ ३९ ॥

शुभाननाः साम्बुरुहेषु भीरवो विलोलहाराश्चलफेनपङ्क्तिषु ।
नितान्तगौर्यो हृतकुङ्कुमेष्वलं न लेभिरे ताः परभागमूर्मिषु ॥ ४० ॥

'शुभा०' व्याख्या । **ताः** स्त्रियः **ऊर्मिषु** कल्लोलेषु **अलमत्यर्थं परभागं** गुणोत्कर्षं **न लेभिरे** न प्रापुः 'परभागो गुणोत्कर्षः' इति *यादवः* । तासामूर्मीणां चारुणत्वादिगुणसाम्यान्न कश्चिद्विशेषो लक्ष्यते[३] इत्यर्थः । अपितु प्रापुरेव । किंलक्षणास्ताः ? **शुभाननाः** सौम्यवदनाः किं० ऊर्मिषु ? **साम्बुरुहेषु** कमलयुक्तेषु पुनः किं० ताः ? **भीरवो** भयत्रस्ताः पुनः किं० ताः ? **विलोलहाराः** चपलहाराः पुनः किं० ताः ? **नितान्तगौर्यः** अत्यन्तम् अरुणाः पुनः किं० ऊर्मि० ? **हृतकुङ्कुमेषु** गृहीतकुङ्कुमलेपादिषु कुङ्कुमसंक्रमादरुणेष्वित्यर्थः । मुखानां कमलानां च समानधर्मता हाराणां **चलफेनपङ्क्तिषु** [चञ्चलफेनराजिषु] गौरवत्त्वस्य कुङ्कुमरागस्येति[४] । अथ समासः । शुभान्याननानि यासां ताः शुभाननाः । सह अम्बुरुहैः

---

1. दृष्टीश्च विपक्ष० -म. इदं च पा० ।

---

१. विभावनालंकारः -म. । २. 'जलार्द्रो ददाह' इति विरुद्धकार्योत्पत्तिरूपो विषमालंकारः । ३. अत एव सामान्यालंकारः -म. । ४. शुभाननत्वसाम्बुरहत्वाद्युभयविशेषणानां क्रमेणोभयस्मिन् समन्वयाद्यथासंख्यालंकारः -म. ।

वर्तमाना साम्बुरुहास्तेषु साम्बुरुहेषु । विलोला हारा यासां ता विलोलहाराः फेनानां पङ्क्यः फेनपङ्क्यः चलाः फेनपङ्क्यो येषु ते चलफेनपङ्क्यस्तेषु च० । नितान्तं गौर्यो नितान्तगौर्यः । हृतानि कुङ्कुमानि यैस्ते हृतकुङ्कुमास्तेषु हृ० । इति वृत्तार्थः ॥ ४० ॥

ह्रदाम्भसि व्यस्तवधूकराहते रवं मृदङ्गध्वनिधीरमुज्झति ।
मुहुः स्तनैस्तालसमं समाददे मनोरमं नृत्यमिव प्रवेपितम् ॥ ४१ ॥

'ह्रदां०' व्याख्या । **स्तनैः** पयोधरैः **मुहुर्**वारंवारं **तालसमं** तालतुल्यं 'तालः कालक्रियामाने हस्तमानद्रुभेदयोः' इति *हैमानेकार्थः* [२-४७९] । चञ्चपुटा चाचपुटादयस्तालास्तैस्तुल्यं तालानुरूपमित्यर्थः । **मनोरमं** मनोहरं **नृत्यं** नाटक**मिव प्रवेपितं** कम्पितं **समाददे** स्वीकृतं कस्मिन् सति ? **ह्रदाम्भसि** ह्रदजले **मृदङ्गध्वनिधीरं** मुरजगम्भीरं घोषं यथा भवति तथा **रवं** शब्दम् **उज्झति** सति मुञ्चति सति धूनति सतीत्यर्थः । किं० ह्रदाम्भसि ? **व्यस्तवधूकराहते** विपरीताभ्यां वधूकराभ्याम् आहते एकेन करेणोत्सार्य अन्येन करेण ताडिते इत्यर्थः । अथ समासः । ह्रदस्याम्भो ह्रदाम्भस्तस्मिन् ह्र० । वध्वाः करौ वधूकरौ व्यस्तौ च तौ वधूकरौ च व्यस्तवधूकरौ व्यस्तवधूकराभ्यामाहते व्य० । मृदङ्गस्य ध्वनिः मृदङ्गध्वनिः मृदङ्गध्वनिवत् धीरः मृदङ्गध्वनिधीरस्तं मृ० । तालेन समं तालसमम् । इति वृत्तार्थः ॥ ४१ ॥

श्रिया हसद्भिः कमलानि सस्मितैरलंकृताम्बुः प्रतिमागतैर्मुखैः ।
कृतोपकारा सुरराजयोषितां प्रसादसाफल्यमवाप जाह्नवी ॥ ४२ ॥

'श्रिया०' व्याख्या । **जाह्नवी** गङ्गा **प्रसादसाफल्यं** निर्मल[ता]फलम् **अवाप** प्राप प्रसन्नफलत्वं प्रपेदे इत्यर्थः । किं० जाह्नवी ? **सुरराजयोषितां** देवाङ्गनानां **कृतोपकारा** विहितोपकृतिः क्वचित् 'कृता[1]नुकूल्या' इति पाठः तत्र कृतमानुकूल्यं विहाराद्युपकारो यस्या यया वा सा । इत्थं योषिद्भिः उपकृता स्वयं च तासां उपकृतवतीति कृत्वा प्रसादसाफल्यं प्राप्ते[1]त्यर्थः । स्वच्छा एव हि परैरुपक्रियन्ते स्वयं चोपकुर्वते तेषामिति भावः । 'कृता[2]नुकारा' इति पाठे अनुकारोऽनुकूलकरणमुपकार इत्येव व्याख्येयम् । पुनः किं० जाह्नवी ? **मुखैर्**वदनैः **अलंकृताम्बुः** भूषितजला किं० मुखैः ? **श्रिया** शोभया **कमलानि** पद्मानि **हसद्भिः** तिरस्कुर्वद्भिः कमलसदृशैरित्यर्थः । पुनः किं० मुखैः ? **सस्मितैः** हास्ययुक्तैः पुनः किं० मुखैः ? **प्रतिमागतैः** प्रतिबिम्बे[2]गतैः । अथ समासः । सह स्मितेन वर्तमानानि सस्मितानि तैः स० । अलंकृतानि अम्बूनि यस्याः सा अ० । प्रतिमां गतानि प्रतिमागतानि तैः प्र० । कृत उपकारो यया सा कृ० । सुराणां राजा सुरराजः सुरराजस्य योषितः सु० तासां सु० । सफलस्य भावः साफल्यं प्रसादस्य साफल्यं प्र० । इति वृत्तार्थः ॥ ४२ ॥

---

1. एष पाठः म. मध्ये । 2. म. मध्ये पाठान्तररूपेण निर्दिष्टोऽयं पाठः ।

---

१. अस्वच्छाम्भसि विहारबिम्बग्रहणयोरसंभवादित्यर्थः - म. । २. अत्र जाह्नवीविशेषणपदार्थस्य साफल्यं प्रति हेतुत्वात् काव्यलिङ्गमलंकारः -म. ।

परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥ ४३ ॥

'परि०' व्याख्या । **सुराङ्गना** देवाङ्गनाः **सखीजनस्य** आलीलोकस्यापि **विलोकनीयतां** दर्शनीयताम् **उपाययुः** जग्मुः किमुत वल्लभजनस्येति भावः । किं० सुराङ्गनाः ? **परिस्फुरन्मीनविघट्टितोरव** उच्चलन्मत्स्यैः विघर्षितसक्थयः पुनः किं० सुराङ्गनाः ? अत एव **त्रासविलोलदृष्टयः** मीनभयात् चञ्चलनेत्राः पुनः किं० सुराङ्गनाः ? **कम्पितपाणिपल्लवाः** भयात् चलितकरकिसलयाः । अथ समासः । परिस्फुरन्तश्च ते मीनाश्च परिस्फुरन्मीनाः परिस्फुरन्मीनैः विघट्टिता उरवो यासां ताः प० । सुराणामङ्गनाः सुराङ्गनाः । त्रासात् विलोला दृष्टयो यासां ताःत्रा० । पाणयः एव पल्लवाः पाणिपल्लवाः कम्पिता पाणिपल्लवा यासां ताः क० । सखीनां जनः सखीजनः तस्य स० । विलोकनीयस्य भावो विलोकनीयता तां वि० । इति वृत्तार्थः ॥४३॥

भयादिवाश्लिष्य झषाहतेऽम्भसि प्रियं मुदानन्दयति स्म मानिनी ।
अकृत्रिमप्रेमरसाहितैर्मनो हरन्ति रामा कृतकैरपीहितैः ॥ ४४ ॥

'भया०' व्याख्या । **मानिनी** मनस्विनी **प्रियं** भर्तारम् **आनन्दयति स्म** तोषयति स्म मानिनीति दुर्लभग्रहणेति भावः । **आश्लिष्य** आलिङ्ग्य उत्प्रेक्ष्यते **भयात्** भीतेरिव कुतो भीतिरित्याह- **कस्मिन्** सति ? **अम्भसि** जले **झषाहते** मत्स्येनोच्छालिते सति तथा **रामा** स्त्रियः **अकृत्रिमप्रेमरसाहितैः** निबिडस्नेहरसजनितैः स्वाभाविकप्रीतिरसेन उत्पादितैः इत्यर्थः । **कृतकैः** कृत्रिमैर**पि ईहितैः** चेष्टितैः **मनो** मानसं **हरन्ति** विलोलयन्ति आरोपितमपि भयं प्रेममूलत्वात् मनोहरं बभूवेत्यर्थः । अथ समासः । झषेणाहतं झषाहतं तस्मिन् झ० । प्रेमैव रसः प्रेमरसः अकृत्रिमश्चासौ प्रेमरसश्च अकृत्रिमप्रेमरसः तेन आहितानि अ० तैः अ० । इति वृत्तार्थः ॥ ४४ ॥

तिरोहितान्तानि नितान्तमाकुलैरपां विगाहादलकैः प्रसारिभिः ।
ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृन्दान्तरितैः सरोरुहैः ॥ ४५ ॥

'तिरो०' व्याख्या । **वधूनां** देवाङ्गनानां **वदनानि** मुखानि **सरोरुहैः** कमलैः **तुल्यतां** सदृशत्वं **ययुः** प्रापुः किं० सरोरुहैः ? **द्विरेफवृन्दान्तरितैः** भ्रमरसमूहाच्छादितैः किं० वदनानि ? **अलकैः** केशैः **तिरोहितान्तानि** आच्छादितप्रान्तानि कथम् अलकैराच्छादितपर्यन्तानीत्याह- किं० अलकैः ? **अपां** जलानां **विगाहात्** विहारात् **नितान्तम**त्यर्थम् **आकुलैः** प्रविकीर्णैः पुनः किं० ? अत एवालकैः **प्रसारिभिः** प्रसरणशीलैः आयतैरित्यर्थः । अथ समासः । तिरोहिता अन्ता येषां तानि ति० । प्रसरणशीलाः प्रसारिणः तैः प्र० । तुल्यस्य भावः तुल्यता तां तु० । द्विरेफाणां वृन्दानि द्विरेफवृन्दानि अन्तरितानि द्विरेफवृन्दान्तरितानि तैर्द्वि० । इति वृत्तार्थः ॥ ४५ ॥

---

१. स्वभावोक्तिरलंकारः -म. । २. अत्राल्पानुभावेन भयेन सहजरागनिगूहनान्मीलनालंकारः । 'मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम्' इति लक्षणान्तरसंभवादर्थान्तरन्यासेन संसृज्यते -म. ।

सरोजपत्रे परिलीनषट्पदे विशा[1]लदृष्टेः स्विदमू विलोचने ।
शिरोरुहाः स्विन्नतपक्ष्मसन्ततेर्द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥ ४६ ॥

अगूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विकसन्नु पङ्कजम् ।
इति प्रलीनां नलिनीवने सखीं विदाम्बभूवुः सुचिरेण योषितः ॥ ४७ ॥

'सरो०' 'अगू०' व्याख्या । **योषितो** नार्यः **नलिनीवने** कमलिनीकानने **प्रलीनां** गुप्तां **सखीम् इति** वक्ष्यमाणप्रकारेण **सुचिरेण** चिरकालेन **विदाम्बभूवुः** विदुः निश्चिक्युरिति वाक्यार्थः । इतीति किं० ? **स्विद् न्विति** वितर्के **एतत्** इदं **मुखं** वदनं **विकसत्** विकस्वरं **पङ्कजं** कमलं वर्तते । कमले केसराणि भवन्ति मुखे दन्ताः अत एव भ्रान्तिः । किं० मुखम् ? **अगूढहासस्फुटदन्तकेसरं** प्रकटहास्येन परिदृश्यमानकिञ्जल्कं **स्विदिति** वितर्के **अमू** पुरोवर्तिनी **परिलीनषट्पदे** आसक्तभ्रमरे **सरोजपत्रे** कमलपत्रे **विशालदृष्टेः** विस्तीर्णनेत्रायाः **स्त्रियाः** **विलोचने** नेत्रे स्यातां सकनीनिकत्वात् साम्यार्थसिद्धिरित्युपमा विशिष्यते । अथवा **स्विदिति** वितर्के **नतपक्ष्मसन्ततेः** चञ्चलाक्ष्याः **शिरोरुहाः** केशाः **नु** इति वितर्के **निशब्दनिश्चलं** नीरवं निश्चलं च **द्विरेफवृन्दं** भ्रमरसमूहं तु कमलवने भ्रमराः संभाव्यन्ते । मुखे च नयने अत एव भ्रा[१]न्तिः । अथ समासः । सरोजानां पत्रे स० । परिलीनाः षट्पदाः ययोस्ते प० । विशाला दृष्टिः यस्याः सा विशालदृष्टिः तस्याः वि० । शिरसि रुहन्तीति शि० । पक्ष्मणां सन्ततिः पक्ष्मसन्ततिः नता पक्ष्मसन्ततिर्यस्या सा नतपक्ष्मसन्ततिस्तस्या न० । द्विरेफाणां वृन्दं द्वि० । निशब्दं च निश्चलं च तत् नि० ॥ ४६ ॥ अगूढश्चासौ हासश्च अगूढहासः अगूढहासेन स्फुटा दन्ताः केसरा इव यस्य तत् अ० । नलिन्याः वनं नलिनीवनं तस्मिन् न० ॥४७॥ इति वृत्तद्वयार्थः ॥४६-४७॥ युग्मम् ॥

करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसंभ्रमा ।
सखीषु निर्वाच्यमधार्ष्ट्यदूषितं प्रियाङ्गसंश्लेषमवाप मानिनी ॥ ४८ ॥

'करौ०' व्याख्या । काचिन्**मानिनी** आग्रहपरा अपरा कामिनी **प्रियाङ्गसंश्लेषं** पत्युरङ्गालिङ्गनम् **अवाप** प्राप किं० प्रि० ? **सखीषु निर्वाच्यं** सखीषु विषये वचनीयतारहितं गतनिन्द्यमित्यर्थः । पुनः किं० प्रि० ? **अधार्ष्ट्यदूषितं** निर्लज्जतादोषेणादूषितं वस्तुतो रागमूलमपि भयमूलकत्वारोपान्न दूषणास्पदमिति भावः । किं० मानिनी ? **नवपल्लवाकृती** नूतनकिसलयाकारौ **करौ** हस्तौ **धुनाना** धुन्वती कम्पयतीत्यर्थः । पुनः किं० मानिनी ? **किल** इत्यलीके **अगाधे** अपारे **पयसि** पानीये **जातसंभ्रमा** संजातभया अत्र भयं व्याजः आलिङ्गने तात्पर्[२]यम् । अथ समासः । नवपल्लवयोराकृतिरिवाकृतिर्ययोस्तौ न० । जातः संभ्रमो

1. विलोल० -म. इदं च पा. ।

१. अत्र युग्मे निश्चयान्तसंदेहालंकारः -म. । २. अत्रापि तुल्याङ्गेन भयेनागन्तुकेन सहजानुरागनिगूहना-न्मीलनालंकारः । तदुक्तं काव्यप्रकाशे-'समानलक्षणं वस्तु वस्तुना यन्निगूह्यते । निजेनागन्तुना वापि तन्मीलनमुदाहृतम् ॥१०-१३०॥ इति -म. ।

यस्याः सा जा० । धाष्टर्येन दूषितश्च न भवतीति अधाष्टर्यदूषितस्तम् अ० । प्रियस्य अङ्गः प्रियाङ्गः प्रियाङ्गस्य संश्लेषः प्रियाङ्गसंश्लेषस्तं प्रि० । इति वृत्तार्थः ॥ ४८ ॥

प्रियैः सलीलं करवारिवारितः प्रवृद्धनिःश्वासविकम्पितस्तनः ।
सविभ्रमाधूतकराग्रपल्लवो यथार्थतामाप विलासिनीजनः ॥ ४९ ॥

'प्रियै०' व्याख्या । **विलासिनीजनः** कामिनीजनः **यथार्थतां** सत्यार्थताम् **आप** प्राप उक्तरीत्या अनेकविलासवत्तया यथार्थनामकत्वमवापेत्यर्थः । यथा *रघुवंशे* (६-२१) 'परंतपो नाम यथार्थनामेति' (५२) । *नैषधेऽपि* (२-१६) 'स जयत्यरिसार्थसार्थकीकृतनामा किल भीमभूपतिः' इति । किं० विलासिनीजनः ? **प्रियैः** कर्तृभिः **सलीलं** सक्रीडं यथा स्यात्तथा **करवारिवारितः** हस्तोदकैः सिक्तः अञ्जल्युदकेन निषिद्ध इत्यर्थः। पुनः किं० वि० ? **प्रवृद्धनिःश्वासविकम्पितस्तनः** अवच्छिन्ननिःश्वासेन कम्पमानपयोधरः पुनः किं० वि० ? **सविभ्रमं** सविलासं यथा भवति तथा **आधूतकराग्रपल्लवः** कम्पितहस्ताग्रकिसलयः । अथ समासः । सह लीलया वर्तते यत् तत् स० । करयोर्वारीणि करवारीणि करवारिभिर्वारितः क० । प्रवृद्धाश्च ते निःश्वासाश्च प्रवृद्धनिःश्वासा प्रवृद्धनिःश्वासैर्विकम्पितौ स्तनौ यस्य स प्र० । सविभ्रमम् आधूतानि कराग्रपल्लवानि येन स स० । यथार्थस्य भावो यथार्थता तां य०। विलसनशीला विलासिनी विलासिन्येव जनः वि० । जातावेकवचनम् । इति वृत्तार्थः ॥४९॥

उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारिवारितम् ।
मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे ॥ ५० ॥

'उद्०' व्याख्या । **नतभ्रुवः** स्त्रियाः **मुखं** वदनं **सपत्नीवदनात्** प्रतियुवतिमुखा**दिव श्रियम् आददे** शोभां जग्राह तदानीं तन्मुखस्य निःश्रीकत्वात्तदीयमुखश्रीग्रहणमुत्प्रेक्ष्यते । किं० नतभ्रुवः ? **धैर्यं** धीरत्वं काठिन्यं वा **उदस्य** परित्यज्य त्यक्त्वेत्यर्थः । **दयितेन** वल्लभेन **सादरं** साभिलाषं यथा स्यात्तथा **प्रसादितायाः** आवर्जितायाः प्रसन्नीकृतायाः सौमनस्यं गमिताया इत्यर्थः । एतदेव सपत्नीवदनस्य निःश्रीकत्वहेतुः। किं० मुखम् ? **करवारिवारितं** हस्तोदकेन सिक्तं करोदकैरवरुद्धमित्यर्थः । पुनः किं० मुखम् ? अत एव **निमीलन्नयनं** संकोचनेत्रम् । अथ समासः । सह आदरेण वर्तते यत् तत् सा० । करवारिभिर्वारितं क० । नतौ भ्रुवौ यस्याः सा नतभ्रूस्तस्या न० । सपत्न्या वदनं सपत्नीवदनं तस्मात् स०। इति वृत्तार्थः ॥ ५० ॥

विहस्य पाणौ विधृते धृताम्भसि प्रियेण वध्वा मदनार्द्रचेतसः ।
सखीव काञ्ची पयसा घनीकृता बभार वीतोच्चयबन्धमंशुकम् ॥ ५१ ॥

'विह०' व्याख्या । **वध्वाः** नायिकायाः **काञ्ची** कटिमेखला **वीतोच्चयबन्धं** गतनीविग्रन्थि **अंशुकं** वस्त्रं **बभार** धारयामास केव ? **सखीव** यथा सखी स्वसख्याः अंशुकं वस्त्रं बिभर्ति धारयति।

१. स्वभावोक्तिरलंकारः -म. ।

स्त्रीणां किल स्त्रीष्वेवायत्तं लज्जारक्षणमिति भावः । कस्मिन् सति ? **प्रियेण** वल्लभेन **विहस्य** हसित्वा **धृताम्भसि** गृहीतोदके वध्वा इति काकाक्षिगोलकन्यायेन उभयत्रापि संबन्ध्यते तेन वध्वाः **पाणौ** हस्ते **विधृते** सति प्रियसेचनार्थं गृहीते सति अञ्जलावित्यर्थः । तदा प्रियेण हस्ते धृते सतीत्यर्थः । किं० वध्वाः ? **मदनार्द्रचेतसः** कन्दर्पाकुलितचित्तायाः किं० काञ्ची ? **पयसा घनीकृता** जलेन सान्द्रीकृता उदकसिक्तो गुणो गाढतरो भवति इति स्वभावः । अथ समासः । मदनेन आर्द्रं चेतो यस्याः सा मदनार्द्रचेताः तस्य म० । अघना घना कृता इति घ० । उच्चयस्य बन्धः उच्चयबन्धः वीतः उच्चयबन्धो यस्मात् तत् वी० । इति वृत्तार्थः ॥ ५१ ॥

निरञ्जने साचिविलोकितं दृशावयावकं वेपथुरोष्ठपल्लवम् ।
नतभ्रुवो मण्डयति स्म विग्रहे वलिक्रिया चातिलकं तदास्पदम् ॥ ५२ ॥

'निर०' व्याख्या । **नतभ्रुवो** नायिकायाः **विग्रहे** शरीरे प्रणयकोपे वा **साचिविलोकितं** तिर्यगीक्षणं **निरञ्जने** अञ्जनरहिते **दृशौ** नेत्रे **मण्डयति स्म** भूषयति स्म **च** पुनः विग्रहे **वेपथुः** कम्पः **अयावकम्** अलक्तकरहितम् **ओष्ठपल्लवम्** अधरपल्लवं मण्डयति स्म । पुनः नतभ्रुवो विग्रहे **वलिक्रिया** रेखाबन्धः **अतिलकं** तिलकरहितं 'तदास्पदं' **तस्य** तिलकस्य**आस्पदं** स्थानं भालं मण्डयति स्म तदा जलकेलौ निरलङ्कारस्यापि अङ्गनाशरीरस्य तच्छरीरविकारैरेवालंकारः समजनीति वाक्यार्थः । अथ समासः । निर्गतम् अञ्जनं ययोस्ते नि० । साच्या विलोकितं सा० । न विद्यते यावको यस्मिन् स अयावकस्तम० । ओष्ठ एव पल्लवः ओष्ठपल्लवः तमो० । नतौ भ्रुवौ यस्याः सा नतभ्रूस्तस्याः न० । न विद्यते तिलकं यस्मिन् तत् अ० । इति वृत्तार्थः ॥ ५२ ॥

निमीलदाकेकरलोलचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः ।
निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ॥५३॥

'निमी०' व्याख्या । **तासां** स्त्रीणां किं० ? **निमीलदाकेकरलोलचक्षुषां** निमिषदाकेकरसुन्दरचक्षुषां पुनः किं० ता० ? **प्रियोपकण्ठं** प्रियसमीपे **निमज्जतीनां** जलकेलिं कुर्वतीनां भर्तुः समीपे जलं विगाहमानानामित्यर्थः । **पप्रथे** प्रादुर्बभूव कः ? **श्रमः** खेदः द्वौ **नु**शब्दौ इति वितर्के पुनः कः ? मदनो मारः किं० श्रमो मदनश्च ? **कृतगात्रवेपथुः** कृतशरीरकम्पः पुनः किं० श्रमो मदनश्च ? **श्वसितोद्धतस्तनः** निःश्वासेनोन्नतपयोधरः[१] । अथ समासः । निमीलन्ति आकेकराणि लोलानि चक्षूंषि यासां ताः निमीलदाकेकरलोलचक्षुषस्तासां नि० । प्रियस्य उपकण्ठं प्रि० । कृतो गात्राणां वेपथुर्येन स कृ० । श्वसितैरुद्धतौ स्तनौ येन स श्व० । इति वृत्तार्थः ॥५३॥

प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तुतोष सान्त्वनैः ।
जनस्य रूढप्रणयस्य चेतसः किमप्यमर्षोऽनुनये भृशायते ॥ ५४ ॥

१. निमज्जनप्रियसंनिधानरूपोभयकारणसंभवान्नेत्रनिमीलनगात्रकम्पनिःश्वासधारणाच्च संदेहः । स एवालंकारः-म.

['प्रिये०' व्याख्या । काचित् प्रिया किं० ? **प्रियेण** गन्धर्वेण **विपक्षतः** सपत्नीतः **चरमं** पश्चात् **सिक्ता** जलार्द्रा सती **चुकोप** क्रोधं चकार **सान्त्वनैः**] मनोहरवचनैः **न तुतोष** तुष्टा न बभूव यतः कारणात् **रूढप्रणयस्य** अत्यन्तस्नेहस्य **जनस्य** लोकस्य संबन्धी **चेतस**श्चित्तस्य **अमर्षः** कोपः **किमपि** कुतो हेतोः **अनुनये** [विनये **भृशायते** गाढीभवति । अथ समासः । रूढः प्रणयः यस्य स रूढ० । इति वृत्तार्थः ॥५४॥]

इत्थं विहृत्य वनिताभिरुदस्यमानं पीनस्तनोरुजघनस्थलशालिनीभिः ।
उत्संगितोर्मिचयलङ्घिततीरदेशमौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥ ५५ ॥ (व०)

'इत्थं०' व्याख्या । **वारि** पानीयं **पुरः प्रतस्थे** अग्रे जगाम किं० वारि ? **वनिताभिः** देवाङ्गनाभिः **इत्थम्** अमुना प्रकारेण **विहृत्य** क्रीडित्वा **उदस्यमानं** न्यस्यमानं किं० वनिताभिः ? **पीनस्तनोरुजघनस्थलशालिनीभिः** पुष्टपयोधरैः गुरुजघनस्थलैश्च शोभमानाभिः इत्यनेन विशेषणेन सलिलनोदनसामर्थ्योक्तिरुक्ता । पुनः किं० वारि० ? **उत्संगितोर्मिचयलङ्घिततीरदेशम्** उत्सारितकल्लोल-समूहैरुल्लङ्घिततटप्रदेशं पुनः किं० वारि ? वारि उत्प्रेक्ष्यते **औत्सुक्यनुन्नं** विरहासहिष्णुत्वेन प्रेरितमिव पुरः प्रतस्थे स्वजनवदिति भावः । अथ समासः । पीनाश्च ते स्तनाश्च पीनस्तनाः उरवश्च ते जघनस्थलाश्च उरुजघनस्थलाः पीनस्तनाश्च उरुजघनस्थलाश्च पीनस्तनोरुजघनस्थलाः पीनस्तनोरुजघनस्थलैः शालन्त इति पी० ताभिः पी० । ऊर्मीणां चयाः ऊर्मिचया उत्संगिताश्च ते ऊर्मिचयाश्च उत्संगितोर्मिचयाः उत्संगितोर्मि-चयैर्लङ्घितस्तीरदेशो येन तत् उ० । उत्सुकस्य भावः औत्सुक्यम् औत्सुक्येन नुन्नम् औत्सुक्यनुन्नम् । इति वृत्तार्थः ॥ ५५ ॥

तीरान्तरेषु[1] **मिथुनानि रथाङ्गनाम्नां नीत्वा विलोलितसरोजवनश्रियस्ताः ।**
संरेजिरे सुरसरिज्जलधौतहारास्तारावितानतरला इव यामवत्यः ॥ ५६ ॥ (व०)

'तीरा०' व्याख्या । **ता** देवाङ्गनाः **संरेजिरे** शुशुभिरे किंकृत्वा ? **रथाङ्गनाम्नां** चक्रवाकानां **मिथुनानि** द्वन्द्वानि **तीरान्तरेषु** तटान्तरेषु **नीत्वा** नियोज्य । किं० ताः ? **विलोलितसरोजवनश्रियः** व्याकुलीकृतसरोजवनशोभाः पुनः किं० ताः ? **सुरसरिज्जलधौतहारा** गङ्गापानीयैः प्रक्षालितमुक्ताफलहाराः का **इव** ? यामवत्य **इव** यथा **यामवत्यो** रात्रयः संराजन्ते किं० यामवत्यः ? **तारावितानतरलाः** नक्षत्रविस्तरेण भास्वराः 'तरलो भास्वरे चले' इति *हैमानेकार्थः* [३-६४६] । अपि ता चक्रवाकद्वन्द्वानि विश्लिष्य तीरान्तरेषु नीत्वा विलोडितसरोजनश्रियः । अथ समासः । एकेभ्यस्तीरेभ्योऽन्यानि तीराणि तीरान्तराणि तेषु ती० । रथाङ्गं नाम्नि येषां ते रथाङ्गनामानः तेषां र० । सरोजानां वनानि सरोजवनानि सरोजवनानां श्रियः सरोजवनश्रियः विलोलिता सरोजवनश्रियो याभिस्ताः वि० । सुराणां सरित् सुरसरित् सुरसरितो जलानि सु० सुरसरिज्जलैः धौता हारा यासां ताः सु० । ताराणां वितानाः तारावितानाः

1. तीरान्तराणि -म. इदं च पा.

ताराविताने: तरला ता० । यामा विद्यन्ते यासां ताः यामवत्य: । इति वृत्तार्थः ॥ ५६ ॥

संक्रान्तचन्दनरसाहितवर्णभेदं विच्छिन्नभूषणमणिप्रकरांशुचित्रम् ।
बद्धोर्मि नाकवनितापरिभुक्तमुक्तं सिन्धोर्बभार सलिलं शयनीयलक्ष्मीम् ॥ ५७ ॥ (व.)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *सुरवनिताविहारो* नामाष्टमः सर्गः ।

'संक्रान्त०' व्याख्या । **सिन्धोर्**नद्याः **सलिलं** पानीयं **शयनीयलक्ष्मीं** शय्याशोभां **बभार** धारयामास किं० सलिलम् ? **संक्रान्तचन्दनरसाहितवर्णभेदं** तदङ्गसंक्रान्तचन्दनरसोत्पादितरूपविशेषं पुनः किं० स० ? **विच्छिन्नभूषणमणिप्रकरांशुचित्रं** क्रीडावशात् त्रुटिताभरणमणिगणकिरणैः नानावर्णं पुनः किं० सलि० ? **बद्धोर्मि** उत्पन्नकल्लोलं पुनः किं० सलि० ? **नाकवनितापरिभुक्तमुक्तं** देवाङ्गनाभिः पूर्वं परिभुक्तम् अनुभूतं पश्चान्मुक्तं त्यक्तम् एतानि विशेषणानि शयनीयपक्षे योज्यानि[१] । अथ समासः । चन्दनस्य रसाः चन्दनरसाः संक्रान्ताश्च ते चन्दनरसाश्च संक्रान्तचन्दनरसाः वर्णस्य भेदः वर्णभेदः संक्रान्तचन्दनरसैराहितो वर्णभेदो यस्य तत् सं० । विच्छिन्नानि च तानि भूषणानि च विच्छिन्नभूषणानि मणीनां प्रकराः मणिप्रकराः विच्छिन्नभूषणानां मणिप्रकराः विच्छिन्नभूषणमणिप्रकराः तेषाम् अंशवः वि० विच्छिन्नभूषणमणिप्रकरांशुभिः चित्रं वि० । बद्धा ऊर्मयो यस्य तत् बद्धोर्मि । नाकस्य वनिता नाकवनिताः ताभिः पूर्वं परिभुक्तं पश्चान्मुक्तम् इति ना० । शेरतेऽत्रेति शयनीयं तस्य लक्ष्मीः शयनीयलक्ष्मीः तां श० । इति वृत्तार्थः ॥ ५७ ॥ ८ ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद्गणभृतस्तैस्तैर्गुणै रेजिरे ॥ १ ॥
तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गो मतङ्गजमितस्समवाप पूर्तिम् ॥ २ ॥

इति भट्टश्रीभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***जलक्रीडावर्णनो*** नामाष्टमः सर्गः ।

---

१. अत एव निदर्शनालंकारः -म.

नवमः सर्गः।

वीक्ष्य रन्तुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः ।
तत्प्रियार्थमिव यातुमथास्तं भानुमानुपपयोधि ललम्बे ॥ १ ॥

[का. ७३ यावद् स्वागतावृत्तम्]

'वीक्ष्य०' व्याख्या । **अथ** जलक्रीडानन्तरं **भानुमान्** सूर्यः **उपपयोधि** समुद्रसमीपे **ललम्बे** लम्बते स्म पश्चिमाम्भोनिधिम् आश्रयामासेत्यर्थः । किंकर्तुम् ? **अस्तं यातुं** अस्तमितुम् उत्प्रेक्ष्यते **तत् प्रियार्थं** तासां स्त्रीणां हितार्थम् **इव** अवसरदानलक्षणरूपं प्रियं कर्तुमिवेत्यर्थः[१] । किंकृत्वा ? **सुरनारीः** अप्सरसः **रन्तुमनसः** रन्तुकामाः **वीक्ष्य** दृष्ट्वा किं० सुरनारीः ? **आत्तचित्रपरिधानविभूषाः** स्वीकृत-विविधवस्त्राभरणाः परिहितसुरतनेपथ्या इत्यर्थः । अथ समासः । रन्तुं मनांसि यासां ताः रन्तुमनसस्ताः र० । सुराणां नार्य्यः सुरनार्यः ताः सु० । परिधानानि च विभूषाणि च परिधानविभूषाणि चित्राणि च तानि परिधानविभूषाणि च चि० आत्तानि चित्रपरिधानविभूषाणि याभिस्ताः आ० । तासां प्रियार्थम् इति तत्प्रियार्थम् । भानवो विद्यन्तेऽस्येति भानुमान् । पयोधेः समीपे उपपयोधि । [का. ७३ यावद्] स्वागताच्छन्दः तल्लक्षणं चेदं 'स्वागतेति रनभाद् गुरुयुग्मम्' । इति वृत्तार्थः ॥ १ ॥

मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ ।
द्यौरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मीम् ॥ २ ॥

'मध्य०' व्याख्या । **द्यौर्गगनं** **वासरलक्ष्मीं** दिवसशोभाम् **उवाह** वहति स्म कस्मिन् सति ? **भानौ** सूर्ये **एकतः** एकस्मिन् भागे **च्युतिं** पतनम् **उपेयुषि** प्राप्ते सति किं० भानौ ? **मध्यमोपलनिभे** नायकमणिसदृशे मध्यमोपलो हारस्थो नायकमणिरुच्यते । 'उपलो ग्रावरत्नयोः' इति *हैमानेकार्थः* [३-६१९] । पुनः किं० भानौ ? **लसदंशौ** प्रसरत्किरणे किं० वा० ? **परिवृत्तिविलोलां** मध्याह्नातिक्रमेण गत्वरीं पुनः किं० वा० ? उत्प्रेक्ष्यते **हारयष्टिं** हारलतामिव स्थिताम् किं० हारयष्टिम् ? **परिवृत्तिविलोलां** गात्रस्य तिर्यगावृत्या मुहुश्चलन्तीं स्थानात् इति शेषः । अथ समासः । मध्यमश्चासौ उपलश्च मध्यमोपलः मध्यमोपलस्य निभः मध्यमोपलनिभः तस्मिन् म० । लसन्तो अंशवो यस्य स लसदंशुस्तस्मिन् लसदंशौ । परिवृत्त्या विलोला परिवृत्तिविलोला तां प० । हारस्य यष्टिः हारयष्टिः । वासरस्य लक्ष्मीः वासरलक्ष्मीस्तां वा० । इति वृत्तार्थः ॥ २ ॥

अंशुपाणिभिरतीव पिपासुः पद्मजं मधु भृशं रसयित्वा ।
क्षीबतामिव गतः क्षितिमेष्यँल्लोहितं वपुरुवाह पतङ्गः ॥ ३ ॥

'अंशु०' व्याख्या । **पतङ्गो** रविः 'पतङ्गः सूर्यपक्षिणोः' इति *हैमानेकार्थः* [३-११५] **क्षितिं** भूमिम् **एष्यन्** आगमिष्यन् **लोहितं** [रक्तं] **वपुः** शरीरम् **उवाह** वहति स्म किंकृत्वा ? **अंशुपाणिभिः**

---

१. फलोत्प्रेक्षेयम् -म. ।

किरणरूपहस्तैः **पद्मजं** कमलोत्पन्नं **मधु** मकरन्दं 'मद्यं मधु क्षीरे जले मद्ये क्षौद्रे, पुष्परजसेऽपि च' इति *हैमानेकार्थः* [२-२४१] । **भृशम**त्यर्थं **रसयित्वा** पीत्वा किं० पतङ्गः ? **अतीवपिपासुः** अत्यन्ततृषितः पुनः किं० पतङ्गः ? उत्प्रेक्ष्यते **क्षीबतां** मत्ततां **गतः** प्राप्तः इव यथा कश्चित्पुमान् हस्तेन अतीवपिपासुः सन् मद्यं पीत्वा भूमौ पतिष्यन् रक्तं वपुः वहति तथा रविस्तदानीं पाटलो बभूवेतिभावः[१] । श्वेतरक्तस्तु पाटल इति । अथ समासः । अंशवः एव पाणयः अंशुपाणयस्तैरंशुपाणिभिः । पातुमिच्छुः पिपासुः । पद्मेषु जातं पद्मजम् । क्षीबस्य भावः क्षीबता तां क्षीबताम् । इति वृत्तार्थः ॥ ३ ॥

गम्यतामुपगते नयनानां लोहितायति सहस्रमरीचौ ।
आससाद विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ॥ ४ ॥

'गम्य०' व्याख्या । **अभितापः** आतपः **धरित्रीं** भूमिं **विरहय्य** त्यक्त्वा **चक्रवाकहृदयानि** कोकमनांसि **आससाद** प्राप सूर्ये अस्तं प्राप्तुमुद्यते सति विरहयुक्तानां चक्रवाकानां हृदयानि संतप्तानि आसन्निति भावः । कस्मिन्सति ? **सहस्रमरीचौ** रवौ **नयनानां** नेत्राणां **गम्यतां** मन्दातपत्वात् विलोकनीयताम् **उपगते** प्राप्ते सति किं० सह० ? **लोहितायति** रक्ततां प्राप्नुवति पाटलीभवतीत्यर्थः[२] । अथ समासः । गम्यस्य भावो गम्यता तां ग० । लोहिताम् अयतीति लोहितायन् तस्मिन् लो० । सहस्रं मरीचयो यस्य स सहस्रमरीचिः तस्मिन् स० । चक्रवाकानां हृदयानि च० । इति वृत्तार्थः ॥४॥

मुक्तमूललघुरुज्झितपूर्वः पश्चिमे नभसि संभृतसान्द्रः ।
सामिमज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥ ५ ॥

'मुक्त०' व्याख्या । **रवौ** सूर्ये **सामिमज्जति** अर्द्धास्तमिते सति 'सामि त्वर्द्धे जुगुप्सिते' इति *हैमानेकार्थः* [५-४१] । **रश्मिसमूहः** किरणसमूहो **न विरेजे** न शुशुभे किं० रश्मिसमूहः ? **खिन्नजिह्मः** दुःखेन जिह्मो दीन **इव** स्थितः पुनः किं० र० ? **मुक्तमूललघुः** त्यक्तोदयाचलः अत एव **लघुः** स्वल्पः पुनः किं० र० ? **उज्झितपूर्वः** त्यक्तपूर्वदिक्कः पुनः किं० र० ? **पश्चिमे नभसि संभृतसान्द्रः** पाश्चात्ये नभोभागे संहृतः एकत्र जातः अत एव घनः यथा कश्चित्भृत्यजनः स्वामिनि आपदि मज्जति सति न शोभते सोऽपि मुक्तमूललघुः मुक्तं मूलं स्थानं रागलक्षणं येन स मुक्तमूलः पूर्वं मूक्तमूलः पश्चाल्लघुः पूर्वकालेत्यादिना समासः । पुनः उज्झितपूर्वः उज्झितास्त्यक्ता पूर्वजना येन स इति पुनः किंविधः ? पश्चिमे नभसि चरमभागे संभृतः नीचस्थले समूहीभूतस्तिष्ठति खिन्नजिह्म इवेति पदं श्लिष्टं खिन्नेन दुःखेन जिह्मो दीन इति[३] । अथ समासः । मुक्तं मूलं येन स मुक्तमूलः मुक्तमूलश्चासौ लघुश्च मु० । उज्झिता

१. अत्र रूपकोत्प्रेक्षयोः सापेक्षत्वादङ्गाङ्गिभावेन संकरः -म. । २. अत्र धरित्र्या यादृशस्तीव्रार्ककरकृतसंतापस्तादृक्च-क्रवाकहृदयेषु विरहसंतापः संजात इति परमार्थः । परन्तु तदुपक्रमानन्तरमेतस्याविर्भावात् स एवात्र संक्रान्त इत्यभेदाध्यवसायेनोपदेशः । अत एव भेदेऽभेदरूपातिशयोक्तिरलंकारः -म. । ३. अत्र मुक्तमूलत्वादिविशेषणसाम्यादप्रस्तुताश्रित-जनप्रतीतेः समासोक्तिः । तत्र वाच्यस्य रश्मिसमूहस्याचेतनस्यापि प्रतीयमानेन चेतनेनाभेदाभिधानाद्दुःखितत्वाद्युत्प्रेक्षेति तयोरङ्गाङ्गिभावेन संकरः -म.

पूर्वा येन स उ०। संभृतश्चासौ सान्द्रश्च सं० । खिन्नश्चासौ जिह्मश्च खि० । रश्मिनां समूहो र०। इति वृत्तार्थः ॥ ५ ॥

कान्तदूत्य इव कुङ्कुमताम्राः सायमण्डनमभित्वरयन्त्यः ।
सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः ॥ ६ ॥

'कान्त०' व्याख्या । **वनिताभि**र्देवाङ्गनाभिः **सौधजालपतिता** धवलगृहगवाक्षैः प्रविष्टाः 'जालं तु गवाक्षे क्षारके गणे' इति *हैमानेकार्थः* [२-४७६] । **रविभासः** सूर्यकिरणाः **सादरं** साभिलाषं यथा स्यात्तथा **ददृशिरे** दृष्टाः सायन्तनार्कभासां प्रियसमागमसूचकत्वादेव तासु स्त्रीणाम् आदरो बभूवेति भावः । किं० रविभासः ? **कुङ्कुमताम्रा** कुङ्कुमवद्रक्ताः पुनः किं० रवि० ? **सायमण्डलं** संध्यासमयभूषणम् **अभित्वरयन्त्यः** त्वराकारयन्त्यः । पुनः किं० रवि० ? उत्प्रेक्ष्यते **कान्तदूत्यः** वल्लभस्य दूतिका **इव** यथा दयितसकाशात् आगता दूत्यो नक्तं भूषणं त्वरया ग्राहयन्ति दूतिका अप्येवंविधाः कुङ्कुमेन ताम्राः साय-मण्डनं संध्याकालसंबन्धी यत् मण्डनं संभोगयोग्यम् आभरणं तल्लक्ष्यीकृत्य नायिकाः प्रेरयन्ती तथा सौधजालमार्गेण प्रविशन्ति चेति। अथ समासः । कान्तानां दूत्यः कान्तदूत्यः । कुङ्कुमवत् ताम्राः कुङ्कुमताम्राः । सह आदरेण वर्तते यत्तत्सादरम्। सौधानां जालानि सौधजालानि तैः पतिताः सौ० । रवेर्भासो र० । इति वृत्तार्थः ॥ ६ ॥

अग्रसानुषु नितान्तपिशङ्गैर्भूरुहान्मृदुकरैरवलम्ब्य ।
अस्तशैलगहनानि विवस्वानाविवेश जलधिं नु महीं नु ॥ ७ ॥

'अग्र०' व्याख्या । **विवस्वान्** सूर्यः **अस्तशैलगहनानि** अस्ताचलकाननानि **आविवेश** प्रविष्टः क्वचित् 'अस्तशैलगहनम्'[1] इति पाठस्तत्र अस्तगिरेर्वनं प्रविष्टः प्रविष्टवानित्यर्थः । **नु** इति वितर्के **जलधिं** समुद्रम् आविवेश अथवा **नु** इति वितर्के **महीं** भूमिम् आविवेश किंकृत्वा ? **मृदुकरैः** कोमलकिरणैः **अग्रसानुषु** अस्ताचलशृङ्गाग्रेषु **भूरुहान्** वृक्षान् **अवलम्ब्य** आश्रित्य यो हि कूपादिनिम्नम् अवतरति सोऽवश्यं किंचिदालम्बते क्वचित् 'भूधरान्' इति पाठस्तत्र भूधरान् पर्वतान् अवलम्ब्य धृत्वेति[१] । किं० मृदुकरैः ? **नितान्तपिशङ्गैः** [अत्यन्तारुणैः] । अथ समासः । मृदवश्च ते कराश्च मृदुकरास्तैर्मृ० । अस्तश्चासौ शैलश्च अस्तशैलः अस्तशैलस्य गहनानि अ० । इति वृत्तार्थः ॥ ७ ॥

आकुलश्चलपतत्त्रिकुलानामारवैरनुदितौषसरागः ।
आययावहरिदश्वविपाण्डुस्तुल्यतां दिनमुखेन दिनान्तः ॥ ८ ॥

'आकु०' व्याख्या । **दिनान्तः** संध्यासमयो **दिनमुखेन** प्रभातकालेन **तुल्यतां** सादृश्य**मायया**

1. अयं पाठः म. मध्ये ।

१. तपनस्य पतनसंदेह एव दृष्टः । पतने तु क्व चास्य तत्र ज्ञायते शीघ्रगमनादितिभावः । अत्र तपने आरोप्यमाणस्य गहनाद्यनेकविषयत्वेन संदेहात्संदेहालंकारः -म. ।

प्राप किं० दिनान्तः ? **चलपतत्त्रिकुलानां** चञ्चलपक्षिसमूहानाम् **आरवैः** शब्दैः **आकुलो** व्याप्तः पुनः किं० दिना० ? **अनुदितौषसरागः** अविद्यमानसंध्यारागः एकत्रानुदयात् अन्यत्रोदयाच्चेति भावः । अनुदितशब्देन अभावमात्रम्, उषस् शब्देन संध्यामात्रं विवक्ष्यते । पुनः किं० दि० ? **अहरिदश्वविपाण्डुः** अविद्यमानसूर्यः अत एव विपाण्डुः दिनमुखमपि देवाङ्गनानां प्रबुद्धानां पक्षिकुलानां वा रूतैर्व्याप्तं भवति । अथ समासः । चलाश्च ते पत्रत्रिणश्च चलपतत्त्रिणः तेषां कुलानि चलपतत्त्रिकुलानि तेषां च० । उषसि भवः औषसः अनुदित औषसरागो यस्मिन् स अनुदितौषसरागः । हरितोऽश्वा यस्य स हरिदश्वः न विद्यते हरिदश्वो यस्मिन् असौ अहरिदश्वः अहरिदश्वश्चासौ विपाण्डुश्च अ० । तुल्यस्य भावः तुल्यता तां तुल्यताम् । दिनस्य मुखं दिनमुखं तेन दि० । दिनस्य अन्तो दिनान्तः । इति वृत्तार्थः ॥ ८ ॥

आस्थितः स्थगितवारिदपङ्क्त्या संध्यया गगनपश्चिमभागः ।
सोर्मिविद्रुमवितानविभासा रञ्जितस्य जलधेः श्रियमूहे ॥ ९ ॥

'आस्थि०' व्याख्या । **गगनपश्चिमभागः** आकाशपाश्चात्यप्रदेशः **जलधेः** समुद्रस्य **श्रियं** शोभाम् **ऊहे** बभार दधावित्यर्थः । किं० ग० ? **संध्यया आस्थितः** आश्रितः किं० सं० ? **स्थगितवारिदपङ्क्त्या** आच्छादितमेघमालया किं० जलधेः ? **सोर्मिविद्रुमवितानविभासा** कल्लोलसंक्रान्तप्रवालप्रकरकान्त्या **रञ्जितस्य** स्वसावर्ण्यं प्रापितस्य[1] । अथ समासः । वारिदानां पङ्क्तिः वारि० स्थगिता वारिदपङ्क्तिर्यया सा स्थ० तया स्थगितवारिदपङ्क्त्या । पश्चिमश्चासौ भागश्च पश्चिमभागः गगनस्य पश्चिमभागः ग० । सह ऊर्मिभिर्वर्तमाना सोर्मि, विद्रुमानां वितानानि विद्रुमवितानानि विद्रुमवितानानां विभाः विद्रुमवितानविभाः सोर्मिश्चासौ विद्रुमवितानविभाश्च सोर्मिविद्रुमवितानविभाः तया सो० । इति वृत्तार्थः ॥ ९ ॥

प्राञ्जलावपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा ।
संध्ययानुविदधे विरमन्त्या चापलेन सुजनेतरमैत्री ॥ १० ॥

'प्राञ्ज०' व्याख्या । **संध्यया चापलेन** चपलत्वेन अस्थैर्येण **सुजनेतरमैत्री** दुर्जनमैत्री **अनुविदधे** अनुचक्रे यथा दुर्जनस्य मैत्री स्निह्यन्तमपि जनं जहाति तद्वत् संध्याऽऽपि सेवमानं जनमहासीदित्यर्थः । अत एव संध्यादुर्जनमैत्र्योश्चापलस्य समानधर्मेऽनुविधानं तेन अर्थरूपेणेयमुपमा । किंकुर्वत्या संध्यया ? **विरमन्त्या** निवर्तमानया **जने** लोके **प्रेम** प्रीतिं **हित्वा** त्यक्त्वा स जनः प्रेमवान्न भविष्यतीति मत्वा प्रेम जहातीति चेत्, नेत्याह- किं० जने ? **प्राञ्जलौ** बद्धकरसंपुटे पुनः किं० जने ? **नतमूर्ध्नि** नतमस्तके पुनः किं० जने ? **तत्प्रवणचेतसि** तत्र संध्यायामेवाहितं चेतो यस्य । अथ समासः । चपलस्य भावश्चापलं तेन चापलेन । सुष्ठु जनः सुजनः सुजनात् इतरः सुजनेतरः सुजनेतरस्य मैत्री सु० । इति वृत्तार्थः ॥१०॥

औषसातपभयादपलीनं वासरच्छविविरामपटीयः ।
संनिपत्य शनकैरथ निम्नादन्धकारमुदवाप समानि ॥ ११ ॥

---

१. अत एव निदर्शमालंकारः -म. ।

'औष०' व्याख्या । **अथ** संध्यागमनानन्तरम् **अन्धकारं** ध्वान्तं **समानि** समस्थलानि **उदवाप** व्यानशे किंकृत्वा ? **शनकैर्मन्दं** मन्दं **निम्नात्** नीचप्रदेशात् निम्नस्थलादित्यर्थः । **संनिपत्य** उत्थाय आगत्य वेत्यर्थः । किं० अन्ध० ? **औषसातपभयात्** प्रभातकालीनातपभयात् **अपलीनं** क्वचिन्निगूढं पुनः किं० अन्ध० ? **वासरच्छविविरामपटीयः** दिवसकान्तेरभावात् प्रकटम् अन्योऽपि चौरः वासरभयात् क्वापि गहनवने निलीनोऽपि वासरालोकनिवृत्तेः बलीयान् सन् निसृत्य समस्थलमाक्रामति तद्वदिति भावः[1] । अथ समासः । उषसि भवः औषसः औषसश्चासौ आतपश्च औषसातपः औषसातपाद्भयम् औषसातपभयं तस्मात् औ० । वासरस्य च्छविः वासरच्छविः वासरच्छवेर्विरामः वासरच्छविविरामः तस्मात् पटीयः वा० । इति वृत्तार्थः ॥११॥

एकतामिव गतस्य विवेकः कस्यचिन्न महतोऽप्युपलेभे ।
भास्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः ॥ १२ ॥

'एक०' व्याख्या । **कस्यचित्**कस्यापि **महतः** पर्वतादेरपि पदार्थस्य **विवेको** भेदो विचारो **न उपलेभे** न गृहीतः किं० कस्यचित् ? **एकताम्** अभेदं **गतस्य** प्राप्तस्य अत एवोत्प्रेक्ष्यते **पतितेना**स्तङ्गतेन **भास्वता** सूर्येण **भुवनानां** भुवनस्य पदार्थानां **विशेषाः** भूधरभूरुहादिभेदाः **आत्मनि** स्वस्मिन् इव **निदधिरे** आरोपिताः सविता भुवनपदार्थान् गृहीत्वेव गत इत्यर्थः[2] । अथ समासः । एकस्य भाव एकता । इति वृत्तार्थः ॥ १२ ॥

इच्छतां सह वधूभिरभेदं यामिनीविरहिणां विहगानाम् ।
आपुरेव मिथुनानि वियोगं लङ्घ्यते न खलु कालनियोगः ॥ १३ ॥

'इच्छ०' व्याख्या । **यामिनीविरहिणां** रात्रिवियोगिनां **विहगानां** चक्रवाकपक्षिणां **मिथुनानि** द्वन्द्वानि **वियोगं** विरहं प्रापुरेव किं० विह० ? **वधूभिः** चक्रवाकीभिः **सह** सार्द्धम् **अभेदम्** अविरहम् **इच्छतां** वाञ्च्छतां तर्हि कथं वियोगं प्रापुरेवेत्याह- तथाहि **खलु** इति निश्चितं **कालनियोगः** दैवाज्ञा **न लङ्घ्यते** अतिक्रमितुं न शक्यते । अथ समासः । न भेदो अभेदस्तमभेदम् । यामिनीषु विरहिणः यामिनीविरहिणस्तेषां या० । कालस्य नियोगः का० । इति वृत्तार्थः ॥ १३ ॥

यच्छति प्रतिमुखं दयितायै वाचमन्तिकगतेऽपि शकुन्तौ ।
नीयते स्म नतिमुज्झितहर्षं पङ्कजं मुखमिवाम्बुरुहिण्या ॥ १४ ॥

'यच्छ०' व्याख्या । **अम्बुरुहिण्या** कमलिन्या **पङ्कजं** कमलं **मुखमिव नतिं** नम्रतां **नीयते स्म** नीतं यथा कदाचित् कस्यचित् **स्त्रियः** दुर्दशां विलोक्य आत्मीयं मुखं त्यक्तहर्षं यथा स्यात्तथा आनतिं नीयते तद्वदिति । प्रायशो दुःखदर्शनात् **स्त्रियः** खिद्यन्ते विशेषेणानुविरहदर्शनादिति भावः । किं०

१. अत्र प्रस्तुतान्धकारविशेषणसाम्यादप्रस्तुतार्थप्रतीतेः समासोक्तिरलंकारः । उत्प्रेक्षा त्वङ्गतः स्यात् -म. ।
२. अत्रोत्प्रेक्षयोः सापेक्षत्वादङ्गाङ्गिभावेन संकरः -म. ।

पङ्कजम् ? **उज्झितहर्षं** चक्रवाकदुर्दशादर्शनादिव त्यक्तविकाशं कस्मिन् सति ? **शकुन्तौ** चक्रवाकपक्षिणि **अन्तिकगतेऽपि** समीपस्थेऽपि सति किं० शकुन्तौ ? **प्रतिमुखं** सन्मुखं यथा स्यात्तथा **दयितायै** चक्रवाक्यै **वाचं** वाणीं **यच्छति** ददति सति वाचमेव ददाने न तु संगच्छमाने सतीत्यर्थः[1] । अथ समासः । मुखं मुखं प्रति इति प्रतिमुखम् । अन्तिकं गतः अन्तिकगतस्तस्मिन् अ० । उज्झितो हर्षो येन तत् उ० । पङ्काज्जातं पङ्कजम् । इति वृत्तार्थः ॥ १४ ॥

रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥ १५ ॥

'रञ्जि०' व्याख्या । **नु** इति वितर्के **तिमिरेण** अन्धकारेण **विविधाः** अनेकरूपाः **तरवो** वृक्षाः **शैलाः** पर्वताश्च **रञ्जिताः** श्यामीकृताः स्वसावर्ण्यमापादिता **नु** अन्यथा कथम् एषां नीलाढ्यत्वमिति भावः । तदानीं सर्वेषां तरूणां पर्वतानां च श्यामीभूतत्वात् अन्धकारेण रञ्जिता इत्यर्थः । **नु** इति वितर्के तिमिरेण भूतलादिति शेषः । **गगनमा**काशं **नामितम्** आकर्षितं यथा गगनं **स्थगितमा**च्छादितम् उभयावपि तमसावृतत्वान्न दृश्यत इत्यर्थः । तिमिरेण **विषमेषु** निम्नोन्नतेषु **धरित्री** भूमिः **पूरिता** समीकृता **नु** अन्यथा तद्विवेकः कथं न स्यादिति भावः । तथा तिमिरेण **ककुभो** दिशश्च **संहृता** गुप्ता **नु** किं कथमन्यथा न दृश्यन्त इति भावः[2]। अथ समासः । तरवश्च शैलाश्च तरुशैलाः । इति वृत्तार्थः ॥१५॥

रात्रिरागमलिनानि विकासं पङ्कजानि रहयन्ति विहाय ।
स्पष्टतारकमियाय नभः श्रीर्वस्तुमिच्छति निरापदि सर्वः ॥ १६ ॥

'रात्रि०' व्याख्या । **श्रीः** शोभा **पङ्कजानि** कमलानि **विहाय** त्यक्त्वा **नभो** गगनम् **इयाय** गता किं० पङ्कजानि ? **रात्रिरागमलिनानि** संध्यारागेण श्यामीकृतानि संध्यारागेण संकुचितानीत्यर्थः । अत एव किंकुर्वतो पङ्कजानि ? **विकासं** विकश्वरत्वं **रहयन्ति** त्यजन्ति किं० नभः ? **स्पष्टतारकं** प्रकटनक्षत्रं तथाहि **सर्वो** जनः **निरापदि** निर्बाधस्थले आपद्रहिते स्थाने **वस्तुं** वासं कर्तुम् **इच्छति** वाञ्छति अस्तंगते रवौ कमलानि निमीलन्ति तारका उद्गच्छतीति स्वभावोक्तिः । अथ समासः । रात्रेः रागः रात्रिरागः रात्रिरागेण मलिनानि रा० । पङ्के जातानि पङ्कजानि । स्पष्टास्तारका यस्मिन् तत् स्पष्टतारकम् । निर्गता आपद् यस्मात्तन्निरापत् तस्मिन् नि० । इति वृत्तार्थः ॥ १६ ॥

अस्तादिसंध्यान्तं वर्णयित्वा चन्द्रोदयवर्णनमारभते -

१. अत्र पङ्कजावनतेश्चक्रवाकविक्रोशानन्तर्यात्तद्धेतुकत्वमुत्प्रेक्ष्यते । तच्च मुखोपमेयमम्बुरुहिण्या कामिनीसाम्यं गमयन्त्या निरुध्यत इत्युपमोत्प्रेक्षयोरङ्गाङ्गिभावेन संकरः । व्यञ्जकाप्रयोगात्प्रतीयमानोत्प्रेक्षा -म. । २. अत्र तिमिरे तरुशैलाद्यनेकविषयरञ्जकत्वादिकमारोप्य संदिग्ध इति संदेहालंकारः । अनेन 'नु'शब्दस्य संभावनाद्योतकत्वमत्रोत्प्रेक्षा-प्रकारमित्यलंकारसर्वस्वकारः -म. ।

व्यानशे शशधरेण विमुक्तः केतकीकुसुमकेसरपाण्डुः ।
चूर्णमुष्टिरिव लम्भितकान्तिर्वासवस्य दिशमंशुसमूहः ॥ १७ ॥

'व्या०' व्याख्या । **शशधरेण** चन्द्रमसा **विमुक्तः** [क्षिप्तः] प्रेरितो वा **अंशुसमूहः** किरणसमूहः **वासवस्य** इन्द्रस्य **दिशं** पूर्वां दिशं **व्यानशे** व्याप्नोति स्म किं० अंशुसमूहः ? **केतकीकुसुमकेसरपाण्डुः** केतकीपुष्पकेसरवत् गौरः ईषत्पाण्डुरित्यर्थः । पुनः किं० अंशु० ? उत्प्रेक्ष्यते **चूर्णमुष्टिः** परिहासार्थे चन्द्रेण क्षिप्तः कर्पूरक्षोदमुष्टिरिव यथा केनचित् कामिना कामिनीं प्रति प्रेरितकर्पूरादेः क्षोदस्य मुष्टिर्दिशं व्याप्नोतीति अनेन निशानिशाकरयोः नायिकानायकौपम्यं गम्यते । चूर्णमुष्टिरपि केतकीकुसुमकेसरपाण्डुः लम्भित-कान्तिश्च भवतीत्यर्थः । पुनः किं० अंशु० ? **लम्भितकान्तिः** प्रापितदीप्तिः । अथ समासः । शशं धरतीति शशधरस्तेन श० । केतक्याः कुसुमं के० तस्य केसरः के० केतकीकुसुमकेसरवत् पाण्डुः के० । चूर्णस्य मुष्टिः चूर्णमुष्टिः । लम्भिता कान्तिर्यस्य स ल० । अंशुनां समूहः अं० । इति वृत्तार्थः ॥ १७ ॥

उज्झती शुचमिवाशु तमिस्रामन्तिकं व्रजति तारकराजे ।
दिक्प्रसादगुणमण्डनमूहे रश्मिहासविशदं मुखमैन्द्री ॥ १८ ॥

'उज्झती०' व्याख्या । **ऐन्द्री दिक्** पूर्वदिक् **रश्मिहासविशदं** किरणहास्येन निर्मलं **मुखं** वदनम् **ऊहे** वहति स्म किं० मुखम् ? **प्रसादगुणमण्डनं** निर्मलगुणरूपभूषणं किं० दिक् ? **आशु** शीघ्रं **तमिस्राम्** अन्धकारं **शुचं** शोकमिव **उज्झती** त्यजन्ती कस्मिन् सति ? **तारकराजे** नक्षत्रनाथे चन्द्रे **अन्तिकं** समीपं **व्रजति** गच्छति सति अत्र दिक्चन्द्रयोर्नायिकानायकौपम्यं गम्यते यथा प्रिये समीपमागच्छति काचित् नायिका शोकं मुञ्चती प्रसन्नतागुणभूषणं हास्यविशदं मुखं च धारयतीति भावः । अथ समासः । तारकाणां राजा तारकराजस्तस्मिन् ता० । प्रसादस्य गुणः प्रसादगुणः प्रसादगुण एव मण्डनं प्र० । रश्मय एव हासः रश्मिहासः रश्मिहासेन विशदं र० । इन्द्रस्य इयम् ऐन्द्री । इति वृत्तार्थः ॥ १८ ॥

नीलनीरजनिभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः ।
खे रराज निपतत्करजालं वारिधेः पयसि गाङ्गमिवाम्भः ॥ १९ ॥

'नील०' व्याख्या । **खे** आकाशे **सितरश्मेः** चन्द्रस्य **निपतत्** प्रसरत् **करजालं** किरणसमूहं **रराज** शुशुभे शोभते स्मेत्यर्थः । किं० करजालम् ? **हिमगौरं** तुषारधवलं किं० खे ? **नीलनीरजनिभे** नीलोत्पलसदृशे यत्र 'नीलनीरद' इति पाठस्तत्र श्याममेघसदृशे किं० सितरश्मेः ? **शैलरुद्धवपुषः** उदयाचलाच्छादितमण्डलस्य कस्य कस्मिन् किमिव ? 'वारिधेः पयसि गाङ्गमम्भ' **इव** यथा **वारिधेः** समुद्रस्य **पयसि** पानीये **गाङ्गं** गङ्गासंबन्धि जलं राजते उपमानेऽपि विशेषणानि योज्यानि । किं० वारिधेः ? शैलरुद्धवपुषः किं० पयसि ? नीलनीरजनिभे । [अथ समासः ।] हिमवत् गौरं [हिमगौरम् ।] शैलेन रुद्धं वपुर्यस्य स शैलरुद्धवपुः तस्य शै० । सिताः रश्मयो यस्य स सितरश्मिस्तस्य सि० । कराणां जालं करजालम् । गङ्गाया इदं गाङ्गम् । इति वृत्तार्थः ॥ १९ ॥

द्यां निरुन्धदतिनीलघनाभं ध्वान्तमुद्यतकरेण पुरस्तात् ।
क्षिप्यमाणमसितेतरभासा शम्भुनेव ग[1]जचर्म चकासे ॥ २० ॥

'द्यां नि०' व्याख्या । **ध्वान्तम्** अन्धकारं **चकासे** शुशुभे किं० ध्वान्तम् ? **असितेतरभासा** चन्द्रेण **पुरस्तात्** अग्रे प्राच्यां दिशि **क्षिप्यमाणं** किंकुर्वद् ध्वान्तम् ? **द्याम्** आकाशं **निरुन्धत्** आवृण्वन् पुनः किं०ध्वान्तम् ? **अतिनीलघनाभम्** अत्यन्तं श्याममेघसदृशं किं० असि० ? **उद्यतकरेण** प्रकटकिरणेन किमिव ? **गजचर्म** करिचर्म इव गजासुरस्य कृत्ति**रिव** यथा गजचर्म **चकासे** शुशुभे किं० गजचर्म ? **शम्भुना** महादेवेन पुरोऽग्रे क्षिप्यमाणं तदपि नीलमेघसदृशम् आकाशं निरुन्धत् एवं सर्वाण्यपि विशेषणानि गजचर्मणो योज्यानि उपमालङ्कारः । अथ समासः । अतिनीलश्चासौ घनश्च अ० अतिघननीलघनवत् आभा यस्य तत् अ० । उद्यताः करा यस्य स उद्यतकरस्तेन उ० । असितेतरा भा यस्य स असितेतरभास्तेन अ० । गजस्य चर्म गजचर्म । इति वृत्तार्थः ॥ २० ॥

अन्तिकान्तिकगतेन्दुविसृष्टे जिह्मतां जहति दीधितिजाले ।
निःसृतस्तिमिरभारनिरोधादुच्छ्वसन्निव रराज दिगन्तः ॥ २१ ॥

'अन्त०' व्याख्या । **दिगन्तः** दिक्प्रान्तः **तिमिरभारनिरोधात्** अन्धकारसमूहोपरोधात् **निःसृतो** निर्गतः सन् **रराज** शुशुभे किं० दिगन्तः ? उत्प्रेक्ष्यते **उच्छ्वसन्** प्राणन्निव यथा क्वचिद्द्वारान्निर्गतः सन् पश्चादुछ्वसति तद्वदितिभावः । कस्मिन् सति ? **अन्तिकान्तिकगतेन्दुविसृष्टे** अतिसमीपवर्त्तिना चन्द्रेण विमुक्ते **दीधितिजाले** किरणवृन्दे **जिह्मतां** संकोचं **जहति** त्यजति सति । अथ समासः । अन्तिकात् अन्तिकम् अन्तिकान्तिकम्, अन्तिकान्तिकं गतः अन्तिकान्तिकगतः, अन्तिकान्तिकगतश्चासाविन्दुश्च अन्तिकान्तिकगतेन्दुः, अन्तिकान्तिकगतेन्दुना विसृष्टम् अन्तिकान्तिकागतेन्दुविसृष्टं तस्मिन् अ० । जिह्मस्य भावो जिह्मता तां जिह्मताम् । दीधितीनां जालं [दीधितिजालं तस्मिन्] दी० । तिमिरस्य भारस्तिमिरभारस्तिमिरभारस्य निरोधः तिमिरभारनिरोधस्तस्मात् ति० । दिशाम् अन्तो दिगन्तः । इति वृत्तार्थः ॥ २१ ॥

लेखया विमलविद्रुमभासा संततं तिमिरमिन्दुरुदासे ।
दंष्ट्रया कनकटङ्कपिशङ्ग्या मण्डलं भुव इवादिवराहः ॥ २२ ॥

'लेख०' व्याख्या । **इन्दुश्चन्द्रः** **विमलविद्रुमभासा** निर्मलप्रवालसवर्णया **लेखया** कलया **संततं** निबिडं **तिमिरम्** अन्धकारम् **उदासे** उच्चिक्षिपे क इव ? **आदिवराह इव** यथा आदिवराहः **कनकटङ्कपिशङ्ग्या** सुवर्णटङ्कणवत् पिशङ्ग्या टङ्कःशिलाभेदकं शस्त्रं 'टङ्कः पाषाणदारकः' इति *हैमः* [९१९] । **दंष्ट्रया** दाढया **भुवो मण्डलं** पृथिव्या मण्डलम् उच्चिक्षिपे रसातलादुत्पाटितवानित्यर्थः । **'कनकभङ्गपिशङ्ग्या'** इति पाठान्तरम् । सुवर्णछेदवत् पिशङ्ग्या लोहितवर्णया **दंष्ट्रया भुवो मण्डलम्**

1. करिचर्म -म. इदं च पा. ।

उच्चिक्षिपे इति वाच्यम् । अथ समासः । विमलश्चासौ विद्रुमश्च विमलविद्रुमः विमलविद्रुमस्य भा इव भा यस्याः सा विमलविद्रुमभास्तया वि० । कनकस्य टङ्कः कनकटङ्कः कनकटङ्कवत् पिशङ्गी कनकटङ्कपिशङ्गी तया क० । इति वृत्तार्थः ॥ २२ ॥

अथ समुद्गच्छश्चन्द्रो वर्ण्यते-

दीपयन्नथ नभः किरणौघैः कुङ्कुमारुणपयोधरगौरः ।
हेमकुम्भ इव पूर्वपयोधेरुन्ममज्ज शनकैस्तुहिनांशुः ॥ २३ ॥

'दीप०' व्याख्या । **अथ** उदयानन्तरं **तुहिनांशुः** चन्द्रः **हेमकुम्भ इव** सुवर्णकलश इव **शनकैः** मन्दं मन्दं **पूर्वपयोधेः** पूर्वसमुद्रात् **उन्ममज्ज** प्रकटीबभूव यथा तडागाद् सकाशात् सुवर्णकलशो निस्सरति तद्वदित्यारोपादुत्प्रेक्षा शनकैरित्यनेन प्रथमं लेखा ततोऽर्द्धम् किंकुर्वन् ? तुहितांशुः **किरणौघैः** किरणसमूहैः **नभ** आकाशं **दीपयन्** प्रकाशयन् पुनः किं० तुहि० ? अत एव **कुङ्कुमारुणपयोधरगौरः** कुङ्कुमारक्तस्तनवत् गौरः इति उपमा हिमकुम्भोऽपि कुङ्कुमारुणो वर्तुलश्च भवति। अथ समासः । किरणानाम् ओघाः किरणौघास्तैः कि० । कुङ्कुमेन अरुणौ कुङ्कुमारुणौ कुङ्कुमारुणौ च तौ पयोधरौ च कुङ्कुमारुणपयोधरौ कुङ्कुमारुणपयोधरवत् गौरः कु० । हेम्नः कुम्भः हेमकुम्भः । पूर्वश्चासौ पयोधिश्च पूर्वपयोधिस्तस्मात्पूर्वपयोधेः । तुहिना अंशवो यस्य स तुहिनांशुः। इति वृत्तार्थः ॥ २३ ॥

उद्गतेन्दुमविभिन्नतमिस्त्रां पश्यति स्म रजनीमवितृप्तः ।
व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः ॥ २४ ॥

'उद्ग०' व्याख्या । **लोको** जनः **अवितृप्तो**ऽसंतुष्टः सन् तृप्तिरहितः सन् सादरमित्यर्थः । **रजनीं** रात्रिं **पश्यति स्म** विलोकयामास किं० रजनीम् ? **उद्गतेन्दुम्** उद्गतचन्द्रां पुनः किं० रजनीम् ? **अविभिन्नतमिस्त्रां** बालत्वाच्चन्द्रेण ईषत् स्फेटितान्धकारां कामिव ? **नववधूमिव** यथा लोकः नववधूं पश्यति किं० वधूम् ? **व्यंशुकस्फुटमुखीं** गतांशुकत्वात् प्रकटवदनां पुनः किं० वधूम् ? **व्रीडया अतिजिह्माम्** अत्यन्तवक्राश्यां नवोढाम् यथा लोकः सादरः सन् पश्यतीति उपमालङ्कारः । उद्गतेन्दुवद्रजन्याः स्पष्टत्वम् अविभिन्नतमिस्त्रत्वात् अस्पष्टत्वम्, अत एव नवोढया व्यंशुकत्वेऽपि वस्त्ररहितत्वेऽपि लज्जावशादस्पष्टत्वं मुखस्येति भावः । अथ समासः । उद्गत इन्दुर्यस्यां सा उद्गतेन्दुस्ताम् उ०। अविभिन्नं तमिस्त्रं यस्यां सा अविभिन्नतमिस्त्रा ताम् अ० । विगतोऽशुंकं व्यंशुकः व्यंशुकेन स्फुटं मुखं यस्याः सा व्यंशुकस्फुटमुखी तां व्यं० । अति अत्यन्तं जिह्मा अतिजिह्मा ताम् अ०। नवा चासौ वधूश्च नववधूस्तां न० । इति वृत्तार्थः ॥ २४ ॥

न प्रसादमुचितं गमिता द्यौर्नोद्धृतं तिमिरमद्रिवनेभ्यः ।
दिङ्मुखेषु न च धाम विकीर्णं भूषितैव रजनी हिमभासा ॥ २५ ॥

'न प्रसा०' व्याख्या । **हिमभासा** चन्द्रेण **द्यौ**र्गगनम् **उचितं** योग्यं **प्रसादं** नैर्मल्यं **न गमिता** न प्रापिता च पुनः **अद्रिवनेभ्यः** पर्वतकाननेभ्यः सकाशात् **तिमिर**मन्धकारं **न उद्धृतं** न स्फेटितम् च पुनः **दिङ्मुखेषु धाम** तेजो **न विकीर्णं** न विक्षिप्तम् च परं **रजनी** रात्रिर्हिमभासा **भूषिता** अलंकृता[1] । अथ समासः । अद्रयश्च वनानि च अद्रिवनानि तेभ्यः अ० । दिशां मुखानि दिङ्मुखानि तेषु दि० । हिमा भाः यस्य स हिमाभास्तेन हि० । इति वृत्तार्थः ॥ २५ ॥

मानिनीजनविलोचनपातानुष्णबाष्पकलुषान् प्रतिगृह्णन् ।
मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥ २६ ॥

'मानि०' व्याख्या । **उदितः** उद्गतः **शीतमयूख**श्चन्द्रः **मन्दमन्दं** शनैः शनैः **खम्** आकाशं **प्रययौ** जगाम उत्प्रेक्ष्यते **भीतभीत** इव चकितचकित इव यथा अतिशयेन भीतः पुमान् मन्दं मन्दम् उच्चैः प्रदेशात् यातीत्युत्प्रेक्षा उभयत्रापि प्रकारे गुणवचनस्येति द्विर्भावः । भयस्य निमित्तमाह- चन्द्रः किंकुर्वन् ? **मानिनीजनविलोचनपातान्** अहंकारिणीरमणीजननेत्रकटाक्षान् **प्रतिगृह्णन्** स्वीकुर्वन् मानिनीभिः सहासया दृष्ट्या दृश्यमानः ताभ्यो बिभ्यदिव मन्दं मन्दं प्रययौ इत्यर्थः । किं० मानिनीज० ? **उष्णबाष्पकलुषान्** विरहतप्तेन बाष्पेनाकुलान् । अथ समासः । मानिनीनां जनः मानिनीजनः मानिनीजनस्य विलोचनानि मानिनीजनविलोचनानि तेषां पाताः मालिनीजनविलोचनपातास्तान् मा० । उष्णश्चासौ बाष्पश्च उष्णबाष्पः उष्णबाष्पेन कलुषा उष्णबाष्पकलुषास्तान् उ० । शीता मयूखा यस्य स शीतमयूखः । इति वृत्तार्थः ॥२६॥

श्लिष्यतः प्रियवधूरुपकण्ठं तारकास्ततकरस्य हिमांशोः ।
उद्वमन्नभिरराज समन्तादङ्गराग इव लोहितरागः ॥ २७ ॥

'**श्लिष्य०**' व्याख्या । **हिमांशोः** चन्द्रस्य **लोहितरागो**ऽरुणप्रभा **अङ्गरागो** विलेपनमिव **समन्तात्** सर्वतः क्वचिद् 'दिगन्तान्' इति पाठस्तत्र दिशिप्रान्तान् **उद्वमन्** प्रसरन् सन् **अभिरराज** बभौ हिमांशोः किं० ? **उपकण्ठं** कण्ठसमीपे अत्यन्तसंयोगे द्वितीया । **प्रियवधूः** प्रियभार्याः **तारकाः** नक्षत्राणि **श्लिष्यतः** आलिङ्गितवतः पुनः किं० हिमांशोः ? **ततकरस्य** प्रसारितांशुहस्तस्य यथा प्रसारितहस्तस्य प्रियवधूरुपकण्ठ-मालिङ्गितप्रियस्य **अङ्गरागः** समन्तात् क्षरन्नपि शोभते आलिङ्गनाद्रागो गलतीति प्रसिद्धिरिति भावः[2] । अथ समासः । प्रियाश्च ता वधूश्च प्रियवधूस्ताः प्रि० । कण्ठस्य समीपम् उपकण्ठम् । तताः करा येन स ततकरस्तस्य त० । हिमा अंशवो यस्य स हिमांशुस्तस्य हि० । लोहितश्चासौ रागश्च लो० । इति वृत्तार्थः ॥२७॥

प्रेरितः शशधरेण करौघः संहतान्यपि नुनोद तमांसि ।
क्षीरसिन्धुरिव मन्दरभिन्नः काननान्यविरलोच्चतरूणि ॥ २८ ॥

१. अत्र प्रसाधनकारणाभावेऽपि भूषणकार्योक्त्या विभावनालंकारः -म. । २. अत्र रूपकोपमयोरङ्गाङ्गिभावेन संकरः -म. ।

'प्रेरि०' व्याख्या । **शशधरेण** चन्द्रेण **प्रेरितो** विसृष्टः नुन्नः **करौघः** किरणसमूहः **संहितान्यपि** निबिडान्यपि **तमांसि** अन्धकाराणि **नुनोद** स्फेटयामास क इव **क्षीरसिन्धुरिव** यथा क्षीरसमुद्रः **मन्दरभिन्नः** मन्दराचलेन विलोडितः सन् **अविरलोच्चतरूणि** संहतोन्नतपादपानि **काननानि** वनानि **नुनोद** बभञ्ज । अथ समासः । शशं धरतीति शशधरस्तेन श० । कराणामौघः करौघः । मन्दरेण भिन्नः मन्दरभिन्नः । अविरला उच्चाश्च तरवो येषु तानि अ० । इति वृत्तार्थः ॥ २८ ॥

शारतां गमितया शशिपादैश्छायया विटपिनां प्रतिपेदे ।
न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्ममहीभिः ॥ २९ ॥

'शार०' व्याख्या । **विटपिनां** वृक्षाणां **छायया** कान्त्या आतपाभावेन **वसतिवेश्ममहीभिः** वासगृहमध्यगृहाङ्गणभूमिभिः **तुल्यता** साम्यता **प्रतिपेदे** प्राप्ता किं० छायया ? **शशिपादैः** चन्द्रकिरणैः **शारतां** कर्बुरत्वं **गमितया** प्रापितया किं० वसतिवेश्ममहीभिः ? **न्यस्तशुक्लबलिचित्रतलाभिः** स्थापितश्वेतपूजोपहारेण विचित्रतलाभिः अत्र वृक्षच्छायावेश्ममहीनां समानधर्मत्वादुपमा 'छायासूर्यप्रियाकान्तिः प्रतिबिम्बमनातपे' *इत्यमरः* । अथ समासः । शारस्य भावः शारता तां शा० । शशिनः पादाः शशिपादास्तैः श० । शुक्लश्चासौ बलिश्च शुक्लबलिः न्यस्तशुक्लबलिना चित्रं तलं यासां ताः न्यस्तशुक्लबलिचित्रतलास्ताभिः न्य० । वसतीनां वेश्म व० वसतिवेश्मनो मह्यो वसतिवेश्ममह्यस्ताभिः व० । इति वृत्तार्थः ॥ २९ ॥

आतपे धृतिमता सह वध्वा यामिनीविरहिणा विहगेन ।
सेहिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम् ॥ ३० ॥

'आत०' व्याख्या । **यामिनीविरहिणा** रात्रिवियोगिना यामिन्यां रात्रिनियतं विरहोऽस्याऽस्तीति यामिनीविरहिणी इत्यनेन विशेषणेन चक्रवाक एव लभ्यते **विहगेन** चक्रवाकेन **हिमरश्मेः** चन्द्रस्य **किरणा न सेहिरे** न सोढाः द्रष्टुं नाशक्नुवन् इत्यर्थः । किं० विहगेन ? **आतपे** सूर्यातपे **वध्वा** चक्रवाक्या **सह** सार्द्धं वर्तमानस्य **धृतिमता** संतोषवता चक्रवाकस्य आतपोऽपि दुःसहो नाभूत् सुखकारी जातः । [तथाहि- **दुःखिते** संजातदुःखे **मनसि** चित्ते **सर्वं** मनोहरमपीति भावः । **असह्यं** सोढुमशक्यम् ।] क्वचित् 'आतपाः' इति पाठः तत्र वध्वा सहातपा अपि सेहिरे किंतु तद्विरहात् शशिकिरणा अपि न सेहिरे इति योज्यं फलं तु समानम् अर्थान्तरन्यासः अनुप्रासश्चालङ्कारौ । अथ समासः । धृतिरस्यास्तीति धृतिमान् तेन धृ० । यामिन्यां विरही यामिनीविरही तेन या० हिमा रश्मयो यस्य स हिमरश्मिस्तस्य हि० । दुःखं संजातमस्येति दुःखितं तस्मिन् दु० । न सह्यम् अ० । इति वृत्तार्थः ॥ ३० ॥

गन्धमुद्धतरजः कणवाही विक्षिपन्विकसतां कुमुदानाम् ।
आदुधाव परिलीनविहङ्गा यामिनीमरुदपां वनराजीः ॥ ३१ ॥

'गन्ध०' व्याख्या । **यामिनीमरुन्**रात्रिसंबन्धी वायुः **वनराजीः** वनश्रेणीः **आदुधाव** ईषत्

कम्पयामास किं० वनराजी: ? **परिलीनविहङ्गाः** संस्थितपक्षिण: विहङ्गानां न विरोधी मन्दत्वादित्यर्थ: । आदुधावेत्यनेन मन्दत्वोक्ति: यामिनीमरुत् किंकुर्वन् ? **विकसतां** विकस्वराणां **कुमुदानां** चन्द्रविकाशिकमलानां **गन्धं** सौरभं **विक्षिपन्** विकिरन् गन्धं विक्षिपन्निति सुरभित्वोक्ति: । किं० यामिनीमरुत् ? **उद्धतरज:** चालितरेणु यथा स्यात्तथा **अपां** जलानां **कणवाही** इत्यनेन शीतत्वोक्ति: । यथा कश्चित्कामी काञ्चित् कामिनीं गन्धोदकादिना सिञ्चन्नाकर्षतीति ध्वनि: । वायोरयं स्वभाव इति नायकेन सहोपमानत्वादार्थी उपमा च । अथ समास: । उद्धतं रजो यस्मिन् कर्मणि तत् उद्धतरज: । कणान् वहतीति कणवाही । परिलीना विहङ्गा यासु ता: प० । यामिन्या मरुत् यामिनीमरुत् । वनानां राजयो वनराजयस्ता: व० । इति वृत्तार्थ: ॥ ३१ ॥

संविधातुमभिषेकमुदासे मन्मथस्य लसदंशुजलौघः ।
यामिनीवनितया ततचिह्नः सोत्पलो रजतकुम्भ इवेन्दुः ॥ ३२ ॥

'संवि०' व्याख्या । **इन्दुश्चन्द्रः उदासे** प्रकटीबभूव किंकर्तुम् ? **मन्मथस्य** कामस्य **अभिषेकं** भुवनजैत्रयात्राभिषेकं स्नानं **संविधातुं** सम्यक्कर्तुम् किं० इन्दु: ? **लसदंशुजलौघः** स्फुरत्किरणजलसमूह: पुन: किं० इन्दु: ? **यामिनीवनितया ततचिह्नः** रात्रिनायिकया उत्पादितचिह्नः पुन: किं० इन्दु: ? उत्प्रेक्ष्यते **सोत्पलो रजतकुम्भ इव** नीलोत्पलसहितो रूप्यकलश इव यथा वनितया राज्ञ: अभिषेकाय रजतकलश उदस्यते तद्[1]वदिति । अथ समास: । लसन्तश्च ते अंशवश्च लसदंशव: लसदंशव एव जलौघो यत्र स ल० । यामिनी एव वनिता यामिनीवनिता तया या० । ततं चिह्नं यस्य ततचिह्नः । सह उत्पलेन वर्तमान: सोत्पल: । रजतस्य कुम्भ: र० । इति वृत्तार्थ: ॥ ३२ ॥

तेज[1]साऽपि खलु नूनमनूनं नासहाय[2]मभियाति जयश्रीः ।
यद्विभुः शशिमयूखसखः सन्नाददे विजयि चापमनङ्गः ॥ ३३ ॥

'तेज०' व्यख्या । **जयश्रीः** जयलक्ष्मी: **तेजसा** ओजसा **अनूनं** परिपूर्णमपि पुरुषम् **असहायं** पुरुषम् **न अभियाति** न उपयाति अयं भाव:-बलवानपि पुरुष: सत्सहायरहितश्चेद्भवति तदा तादृशं पुरुषम् असहायं सहायरहितं जनं जयलक्ष्मी: नोपयाति न प्राप्नोति । **खलु** इति वाक्यालंकारे **ननु** इति निश्चितं **यत्** यस्मात्कारणात् **विभुः** समर्थोऽपि **अनङ्गः** कन्दर्पः **शशिमयूखसखः सन्** चन्द्रकिरणसहाय: सन् **विजयि चापं** विजयधनु: **आददे** जग्राह। अथ समास: । न नूनम् अनूनम् । न विद्यते सहायो यत्र तत् अ०। जयस्य श्री: जयश्री: । शशिन: मयूखा: शशिमयूखा: ते सखा यस्य स श० । विजयोऽस्यास्तीति विजयि । इति वृत्तार्थ: ॥ ३३ ॥

इत्थम् उद्दीपनसामग्रीमुपवर्ण्य संप्रति तत्कार्यभूतं रतिवर्णनमारभते -

1. ओजसा -म. । 2. उप० -म. एते च पा.

१. अत्र 'संविधातुम्' इति तुम्प्रत्ययेन प्रतीयमानोत्प्रेक्षयाऽनुप्राणितोऽयमुपमोत्प्रेक्षयो: संकर: -म. ।

सद्मनां विरचनाहितशोभैरागतप्रियकथैरपि दूत्यम् ।
संनिकृष्टरतिभिः सुरदारैर्भूषितैरपि विभूषणमीषे ॥ ३४ ॥

'सद्म०' व्याख्या । **संनिकृष्टरतिभिः** आसन्नसुरतोत्सवैः हेतुगर्भितं विशेषणम् औत्सुक्यातिरेकादिति भावः । **सुरदारैः** देवाङ्गनाभिः **सद्मनां** केलिगृहाणां **विरचना** मण्डनादिका रचना **आहितशोभैः** प्रागेव कृतकेलिगृहमण्डनैरपि **ईषे** अभिलषे आसन्नसंभोगोत्सवात् सुरस्त्रीभिः अलंकृतान्यपि गृहाणि पुनरप्यलंकर्तुं वाञ्छितानि इत्यर्थः । पुनः किं० सुरदारैः ? **आगतप्रियकथैरपि** प्राप्तप्रियजनवृत्तान्तैरपि **दूत्यं** दूतीव्यापारः ईषे तथा सुरदारैः **भूषितैः** अलंकृतैरपि पुष्पमालादिभिः कृतमण्डनैरपि **विभूषणम्** अलंकरणम् ईषे । अथ समासः। आहिता शोभा यैस्ते आहितशोभास्तैरा० । आगता प्रियाणां कथा येषां ते आगतप्रिय-कथास्तैरा० । दूतस्य कर्म दूत्यम् । संनिकृष्टा रतिर्येषां ते सं० तैः सं० । सुराणां दाराः सुरदारास्तैः सु० । इति वृत्तार्थः ॥ ३४ ॥

न स्त्रजो रुरुचिरे रमणीभ्यश्चन्दनानि विरहे मदिरा वा ।
साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम एव ॥ ३५ ॥

'न स्र०' व्याख्या । **रमणीभ्यः** नारीभ्यः **विरहे** भर्तृवियोगे सति **स्त्रजः** पुष्पमालाः **वा** अथवा **चन्दनानि** श्रीखण्डानुलेपनानि गन्धाः कस्तूरीकर्पूरादीनि गन्धद्रव्याणि वा अथवा **मदिरा** आसवो वा मद्यानि **न रुरुचिरे** न रोचते स्म एतानि मनोरमाणि अपि प्रियवियोगे सति नारुचन् इत्यर्थः । **हि** यस्मात् कारणात् **साधनेषु** स्त्रक्चन्दनमदिरादिषु विषयभूतेषु मध्ये **रतेः** सुरतस्य **प्रियसमागम एव** भर्तृसंगम एव **रम्यतां** मनोहरत्वं रुचिकरत्वं प्रति तत्कार्यभूत **उपधत्ते** करोति अत एव भर्तृवियोगे मनोहराण्येव तानि न संभवन्तीति भावः । प्रियसमागमाभावात् एतानि रुचिकराण्यपि साधनान्यरुचिकराणीति तात्पर्यार्थः । अथ समासः । रम्यस्य भावो रम्यता तां रम्यताम् । प्रियाणां समागमः प्रियसमागमः । इति वृत्तार्थः ॥३५॥

प्रस्थिताभिरधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः ।
मानिनीभिरपहस्तितधैर्यः सादयन्नपि मदोऽवललम्बे ॥ ३६ ॥

'प्रस्थि०' व्याख्या । **मानिनीभिः** कोपनाभिः कामिनीभिः 'स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासंगिनि प्रिये' इति लक्षणात् **सादयन्नपि** लाघवं निष्पादयन्नपि मानं शरीरं च त्याजयन्नपि सदोषोऽपीत्यर्थः । **मदो** मानोऽ**वललम्बे** आश्रितः किं० मानि० ? **अधिनाथनिवासं** भर्तृगृहमभिलक्ष्यीकृत्य **प्रस्थिताभिः** प्रचलिताभिः वल्लभगृहं गन्तुं प्रवृत्ताभिरित्यर्थः । पुनः किं० मा० ? **ध्वंसितप्रियसखीवचनाभिः** खण्डितवल्लभालीवाचोभिः स्वयं प्रस्थानं लाघवायेत्येवमादिरूपाणि वचनानि अवगणय्य स्वयं प्रस्थिताभिरिति भावः । अत एव मदस्य गुणतेत्यर्थः । किं० मदः ? **अपहस्तितधैर्यः** निरस्तधैर्यः आक्षिप्ताभिमानः मानिन्योऽपि मदेन कन्दर्पगृहं प्रापिता इत्यर्थः । अथ समासः । नाथस्य निवासः ना० तम् अधिकृत्य अधिनाथनिवासम् । प्रियाश्च ताः सख्यश्च प्रियसख्यः प्रियसखीनां वचनानि प्रि० ध्वंसितानि प्रियसखीवचनानि

याभिस्ता: ध्वं० ताभि: ध्वं० । अपहस्तितं धैर्यं येन स अ० । इति वृत्तार्थ: ॥ ३६ ॥

कान्तवेश्म बहु संदिशतीभिर्यातमेव रतये रमणीभि: ।
मन्मथेन परिलुप्तमतीनां प्रायश: स्खलितमप्युपकारि ॥ ३७ ॥

'कान्त०' व्याख्या । **रमणीभि:** देवाङ्गनाभि: **कान्तवेश्म** भर्तृगृहं **यातमेव** न तु मध्ये-मार्गान्निवृत्तमित्यर्थ: । किं० रम० ? **रतये** सुरताय **बहुसंदिशतीभि:** अनेकं वाचिकं कथयन्तीभि: अनेकवारं सन्देशं प्रेषयन्तीभि: वल्लभादिति शेष: । सन्देशव्यसनात् गन्तव्यमप्यजानतीभिरित्यर्थ: । तथाहि **मन्मथेन** कन्दर्पेन **परिलुप्तमतीनां** व्याकुलीकृतबुद्धीनां स्त्रीणां **प्रायसो** बाहुल्येन **स्खलितं** स्वयमेव गमनलक्षणविरुद्धाचरणमपि **उपकारि** उपकारकृदेव भवतीत्यर्थ: । अथ समास: । कान्तानां वेश्म कान्तवेश्म । परिलुप्ता मतिर्यासां ता: परिलुप्तमतय: तासां प० । इति वृत्तार्थ: ॥ ३७ ॥

आशु कान्तमभिसारितवत्या योषित: पुलकरुद्धकपोलम् ।
निर्जिगाय मुखमिन्दुमखण्डं खण्डपत्रतिलकाकृति कान्त्या ॥ ३८ ॥

'आशु०' व्याख्या । **योषितो** नार्या: संबन्धि **पुलकरुद्धकपोलं** रोमाञ्चव्याप्तकपोलं **मुखं** वदनं **कान्त्या** शोभया **अखण्डं** परिपूर्णम् **इन्दुं** चन्द्रं **निर्जिगाय** अजयत् किं० मुखम् ? **खण्डपत्रतिलकाकृति** भ्रष्टपत्रलतातिलकाकारम् । अयमभिप्राय:-पत्रलेखासु नष्टासु अपि तिलके नष्टेऽपि तन्निवेश: स्वच्छपाण्डु-कपोलयो: श्यामतया प्रतीयमान: सन् दृश्यते चन्द्रे च श्यामकलङ्करेखा दृश्यते अत एव मुखचन्द्रयोरुप-मानोपमेयता प्रतीयते निर्जिगायेति क्रिययां सदृशमभिधीयते तस्मादुपमालंकार: । किं० योषित: ? **आशु कान्तमभिसारितवत्या** शीघ्रं भर्तारम् अभिगतवत्या: । अथ समास: । पुलकै: रुद्धौ कपोलौ यस्य तत् पु० । न विद्यते खण्डं यस्याऽसौ अखण्डस्तमखण्डम् । पत्राणि च तिलकाश्च पत्रतिलका: [खण्डाश्चामी पत्रतिलकाश्च खण्ड०] खण्डपत्रतिलकानाम् आकृतिर्यस्य तत् ख० । इति वृत्तार्थ: ॥ ३८ ॥

अथ श्लोकद्वयेन सखीनायिकासंवादमाह -

उच्यतां स वचनीयमशेषं नेश्वरे परुषता सखि ! साध्वी ।
आनयैनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेय: ॥ ३९ ॥

किं गतेन न हि युक्तमुपैतुं क: प्रिये सुभगमानिनि ! मान: ।
योषितामिति कथासु समेतै: कामिभिर्बहुरसा धृतिरूहे ॥ ४० ॥

'उच्यतां० किं गते०' व्याख्या । **योषितां** देवाङ्गनानाम् **इति** इत्येवंरूपासु **कथासु** वार्तासु विषये **समेतै:** समीपमागत्य शृण्वद्भिरित्यर्थ: । **कामिभि**र्विलासिभि: पुरुषै: **बहुरसा** प्रचुरस्वादा **धृति:** प्रीति: **ऊहे** उढा इतीति किम् ? सखीनायिक्यो: संवादमाह- तत्र नायिका कथयति हे सखि ! त्वया मम भर्ता पूर्वम् **अशेषं** समस्तं **वचनीयं** वाच्यं वक्तव्यम् **उच्यतां** कथ्यतां नि:शङ्कमुपालभ्यतामित्यर्थ: । अथ सखी

प्रत्युत्तरमाह- हे **सखि** नायिके ! **ईश्वरे** भर्तरि विषये **परुषता** कठिनता **न साध्वी** न योग्या अत्रौत्सुक्य निर्वेदाद्यनेकभाववशाच्च परिपूर्णकान्ताकथाकर्णनादुत्तरोत्तरमपूर्वह्रदमानन्दनिष्यन्दमानन्दसंदोहं लेभे इत्यर्थः । प्रायेण अत्र प्रौढाः कलहान्तरिताश्च नायिका न हिता इत्यर्थः । अथ नायिका आह- तर्हि हे सखि ! त्वम् **एनं** भर्तारम् **अनुनीय** प्रसन्नं कृत्वा **आनय** मत्समीपं प्रापयेत्यर्थः । अथ पुनः सख्याह- हे नायिके ! स कान्तः **विप्रियाणि** अप्रियाणि **जनयन्** उत्पादयन् सन् **कथं वा अनुनेयः** अनुनेतुं कथं शक्यः आनयनार्हः कथं भवतीत्यर्थः। पुनः नायिका आह- हे सखि ! तर्हि तं प्रति गमनेन किं कोऽर्थः ? न किमपीत्यर्थः। **हि** निश्चयम् **उपैतुं** गन्तुं नहि **युक्तं** घटमानं पुनः सख्याह- हे **सुभगमानिनि** सौन्दर्यमानिनि ! तस्मिन् **प्रिये** भर्तरि विषये **मानः** अहंकारः **कः** मानो न कर्तव्य इत्यर्थः । यद्वा नहीत्यादि सखीवाक्यं तत्र नहीत्येकं वाक्यं तद्युक्तं सखीत्यर्थः । उपैतुं युक्तं कुतः हे सुभगमानिनि ! प्रिये को मानस्तादृग्जनस्य दुर्लभत्वादिति भावः । अथ समासः । वक्तुं योग्यं वचनीयम् । परुषस्य भावः प० । सुभगमात्मानं मन्यते इति सुभगमानिनी [तस्याः संबोधनं सु० ।] कामो विद्यते येषां ते कामिनः तैः का० । बहवो रसा यस्यां सा ब० । इति वृत्तार्थः ॥३९॥ ॥४०॥

योषितः पुलकरोधि दधन्त्या घर्मवारि नवसंगमजन्म ।
कान्तवक्षसि बभूव पतन्त्या भूषणं[1] लुलितमण्डनतैव ॥ ४१ ॥

'योषित०' व्याख्या । **योषितो** नार्याः सुरतवशात् **लुलितमण्डनता** उत्सृष्टभूषणता एव **भूषणम्** अलंकरणं **बभूव** आसीत् यदुक्तम्-

अवसरोचिता वाणी गुणगणरहिताऽपि शोभते पुंसाम् ।
रतिसमये रमणीनां भूषणहानिस्तु भूषणं भवति ॥५५॥ इति वचनात् ।

किं० योषितः ? **कान्तवक्षसि** वल्लभहृदये **पतन्त्याः** गच्छन्त्याः इत्यौत्सुक्योक्तिः लुलितमण्डनत्वे हेतुरप्युक्तः । पुनः किं० योषितः ? **घर्मवारि** प्रस्वेदजलं **दधन्त्याः** धारयन्त्याः किं० घर्मवारि ? **पुलकरोधि** रोमाञ्चव्यापि पुनः किं० घ० ? **नवसंगमजन्म** नूतनसंयोगोत्पन्नम् अनेन सात्त्विकोक्तिः घर्मवारीत्यनेन खेद उक्तः । अथ समासः । पुलकान् रूणद्धीत्येवंशीलं पु० । घर्मस्य वारि घ० । नवश्चासौ संगमश्च नवसंगमः नवसंगमेन जन्म यस्य तत् न०। कान्तस्य वक्षः कान्तवक्षस्तस्मिन् का०। लुलितं च तत् मण्डनं च लुलितमण्डनं लुलितमण्डनस्य भावो लु० । इति वृत्तार्थः ॥४१॥

शीधुपानविधुरासु निगृह्णन् मानमाशु शिथिलीकृतलज्जः ।
संगतासु दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ॥ ४२ ॥

'शीधु०' व्याख्या । **कामिनीषु** मानिनीषु **मदो** मदोन्मत्तता **नु मदनः** कन्दर्पो तु **उपलेभे** उत्पन्नः किं० मानिनीषु ? **शीधुपानविधुरासु** मद्यपानेन विमूढासु विह्वलासु षट्मासिकं मद्यम् ।

1. मण्डनं -म. इदं च पा.

किंकुर्वन्? मदो मदनश्च **आशु** शीघ्रं **मानम्** अहंकारं कोपं वा **निगृह्णन्** अपहरन् पुनः किं० मदनः मदश्च ? अत एव **शिथिलीकृतलज्जः** त्यक्तव्रीडः पुनः किं० मानिनीषु ? **दयितैः** वल्लभैः सह **संगतासु** मिलितासु अत्र प्रियसमागमशीधुपानरूपोभयकारणाभङ्गादुभयथा माननिग्रहानुभावसाधारणश्च संदेहः । अत एव संदेहालंकारः। अथ समासः । शेरते अनेनेति शीधुः क्वचित् सेधते अनेनेति सीधुः शीधोः पानं शीधुपानं तेन विधुराः शीधुपानविधुरास्तासु शी० । अशिथिला शिथिला कृता इति शिथिलीकृता शिथिलीकृता लज्जा येन शि० । इति वृत्तार्थः ॥ ४२ ॥

द्वारि चक्षुरधिपाणि कपोलौ जीवितं त्वयि कुतः कलहोऽस्याः ।
कामिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥ ४३ ॥

'द्वारि०' व्याख्या । **कामिनां** कामिजनानां वल्लभानां **प्रीतये** संतोषाय **इति पुनरुक्तम्** पुनरुच्यमानं **वचो** दूतीवाक्यं **नवनवत्वं** नवप्रकारत्वम् अपूर्वभावम् **इयाय** प्रपेदे कान्तानुरागप्रकटनात् कामिनः प्रहृष्यन्तीति भावः । तमेवानुरागप्रकटनप्रकारमाह- इतीति किं ? हे कामिन् ? अस्या मत्सख्याः नायिकायाः त्वद्दिदृक्षया **चक्षुर्नेत्रं द्वारि** त्वदागमनमार्गे वर्तते इति औत्सुक्योक्तिः । अस्या मत्सख्याः **कपोलौ** गल्लौ **अधिपाणि** पाणौ वर्तेते इति चिन्तोक्तिः । किं बहुना ? अस्या मत्सख्याः **जीवितं** जीवितव्यं त्वयि क्षिप्तं त्वदधीनं वर्तते त्वां विना न जीवतीत्यर्थः । अनेनातिगाढानुरागोक्तिः । अतो **अस्या** मत्सख्याः **कलहो** विग्रहो कुतः कस्मात् अपि तु न कस्मात् इत्यर्थः । अत्र इयं नायिका कलहान्तरिता औत्सुक्यचिन्ताप्रीतिनां भावानां शम्बलता। अथ समासः । पाणौ अधिकृत्य अधिपाणि । नवं च नवं च नवनवं तस्य भावो न० । इति वृत्तार्थः ॥४३॥

साचि लोचनयुगं नमयन्ती रुन्धती दयितवक्षसि पातम् ।
सुभ्रुवो जनयति स्म विभूषां संगतावुपरराम च लज्जा ॥ ४४ ॥

साचि० व्याख्या । **लज्जा** व्रीडा **सुभ्रुवो** नार्याः **विभूषां** शोभां **जनयति स्म** उत्पादयति स्म किंकुर्वती लज्जा ? **लोचनयुगं** नेत्रयुग्मं **साचि** तिर्यक् यथा स्यात्तथा प्रिये वल्लभे **नमयन्ती** पातयन्ती न तु ह्रीतयेत्यर्थः। पुनः किं० लज्जा ? **दयितवक्षसि** भर्तृहृदये **पातं** पतनं **रुन्धती** इष्टमपि प्रतिबध्नन्ती **च** पुनः सैव लज्जा **संगतौ** संभोगसंगमे सति **उपरराम** विरमति स्म सुरते अत एव स्त्रीणां लज्जा भूषणं न इति भावः । अथ समासः । लोचनयोः युगं लो० । दयितस्य वक्षः दयितवक्षस्तस्मिन् द०। सुष्ठु शोभने भ्रुवौ यस्याः सा सुभ्रूः तस्या सुभ्रुवः । इति वृत्तार्थः ॥ ४४ ॥

सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन ।
योषितः सुहृदिव स्म रुणद्धि प्राणनाथमभिबाष्पनिपातः ॥ ४५ ॥

'सव्यः' व्याख्या । **योषितो** नार्याः **अभिबाष्पनिपातः** सन्मुखाश्रुनिपातः **सुहृदिव** मित्रमिव **प्राणनाथं** वल्लभं रूपादिभस्म निवर्तयामास । यथा सुहृद् गच्छन्तं मित्रं निवर्त्तयति तद्वदित्यर्थः । किं०

प्राणनाथम् ? **सव्यलीकं** सापराधं पुनः किं० प्राणनाथम् ? **अवधीरितखिन्नम्** अवगणितं पश्चात् सोद्वेगं तिरस्कृतं पश्चात् सनिःश्वासम् इत्यर्थः । पुनः किं० प्राणनाथम् ? **सपदि** शीघ्रमेव **कोपपदेन** कोपच्छलेन **प्रस्थितं** प्रचलितं निर्गच्छन्तम् उपमा सुहृद्बाष्पनिपातयोः साम्यात् । अथ समासः । सह व्यलीकेन वर्तते यः स सव्यलीकः तं स० । अवधीरितश्चासौ खिन्नश्च अवधीरितखिन्नस्तम् अ० । कोपस्य पदं कोपपदं तेन को० । प्राणस्य नाथः प्राणनाथः तं प्रा० । बाष्पस्य निपातः बाष्पनिपातः अभिबाष्पनिपातः । इति वृत्तार्थः ॥४५॥

शङ्कितायकृतबाष्पनिपातामीर्ष्यया विमुखितां दयिताय ।
मानिनीमभिमुखस्थितचित्तां शंसति स्म घनरोमविभेदः ॥ ४६ ॥

'शङ्कि०' - व्याख्या । **घनरोमविभेदः** सान्द्ररोमाञ्चः **मानिनीम्** अहंकारिणीं मानग्रहिलां स्त्रियं **दयिताय** वल्लभाय **अभिमुखस्थितचित्तां** सन्मुखस्थितमानसां **शंसति स्म** इयं मानिनी तव सानूकुलेति उवाचेत्यर्थः । किं० दयिताय ? **शङ्किताय** नायिकाया अविश्वस्ताय भीतायेत्यर्थः । किं० मानिनीम् ? **ईर्ष्यया** कोपेन **विमुखितां** पराङ्मुखस्थितां पुनः किं० मा० ? अत एव **बाष्पनिपातं** विहिताश्रुपातम् । अथ समासः । बाष्पस्य निपातो बा० कृतो बाष्पनिपातो यया सा कृ० तां कृ० । अभिमुखं चित्तं यया सा अभिमुखचित्ता ताम० । घनानि च तानि रोमाणि च घ० घनरोम्णां विभेदो घ० । इति वृत्तार्थः ॥४६॥

अथ सुरतशृङ्गारमाह - तत्रापि बाह्यरतमाह -
तदाह *वात्स्यायनः* - बाह्यमाभ्यन्तरं चेति द्विविधं रतमुच्यते ।
तत्राद्यं चुम्बनाश्लेषनखदन्तक्षतादिकम् । द्वितीयं सुरतं साक्षात् नानाकारेण कल्पितम् ॥५६॥ इति ।

लोलदृष्टि वदनं दयितायाश्चुम्बति प्रियतमे रभसेन ।
व्रीडया सह विनीवि नितम्बादंशुकं शिथिलतामुपपेदे ॥ ४७ ॥

'लोल०' व्याख्या । दयिताया **अशुकं** वस्त्रं **नितम्बात्** कटिप्रदेशात् **व्रीडया** लज्जया **सह** सार्द्धं **शिथिलतां** श्लथत्वम् **उपपेदे** प्राप शिथिलं बभूवेत्यर्थः । लज्जांशुकं च उभे अपि वल्लभसंपर्कात् शिथिले जाते इति भावः । किंलक्षणमंशुकम् । **विनीवि** विनिर्गतरज्जुबन्धनं कस्मिन् सति ? **प्रियतमे** वल्लभे **रभसेन** बलात्कारेण **दयितायाः** वल्लभायाः **वदनं** मुखं **चुम्बति** आस्वादयति सति किं० वदनम् ? **लोलदृष्टि** चलनेत्रम् । प्रियतमे चुम्बति सति बाला लोलेक्षणा भवतीति स्वभावः ।

अथ समासः । लोला दृष्टिर्यस्मिन् तत् लोलदृष्टि । अतिशयेन प्रियः प्रियतमः तस्मिन् प्रियतमे । शिथिलस्य भावः शिथिलता तां शिथिलताम् । इति वृत्तार्थः ॥ ४७ ॥

ह्रीतया गलितनीवि निरस्यन्नन्तरीयमवलम्बितकाञ्चि ।
मण्डलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेशः ॥ ४८ ॥

१. अत्र व्रीडांशुकरुपसंबन्धिभेदभिन्नवृत्तिस्रंसनरुपशैथिल्यस्याभेदाध्यवसायनिबन्धनातिशयोक्तिमूलः सहोक्ति-विशेषोऽलंकारः -म. ।

'ह्रीत०' व्याख्या । **दयितया** स्त्रिया **हृदयेशः** प्राणेशः **मण्डलीकृतपृथुस्तनभारं** संकुचितगुरुपयोधरभारं यथा स्यात्तथा **सस्वजे** आलिलिङ्गे यथा वल्लभस्य हृदि स्वकीयो विस्तीर्णो स्तनभारो नमति अनेन गाढमालिङ्गनं सूचितम्। तेन गाढम् आलिङ्गत इत्यर्थः । प्रियदृष्टेः प्रतिबन्धार्थमिति भावः । हृदयेशः किंकुर्वन्? तत् **अन्तरीयं** प्रति अधोवस्त्रं **निरस्यन्** विक्षिपन् आकर्षन्नित्यर्थः । किं० अन्तरीयम्? **गलितनीवि** श्लथग्रन्थि क्वचिद् 'वलितनीवि' इति पाठः तत्र विगतबन्धनम्। पुनः किं० अन्तरीयम्? **अवलम्बितकाञ्चि** आश्रितकटिमेखलं कटिमेखलालग्नमित्यर्थः । किं० दयितया ? **ह्रीतया** वस्त्रापगमलज्जितया। अथ समासः । गलिता नीविर्यस्यां सा गलितनीविः । अवलम्बिता काञ्चि येन तत् अ० । मण्डलीकृतः पृथुः स्तनभारो यत्र यस्यां क्रियायां तत् म० । हृदयस्य ईशः हृदयेशः । इति वृत्तार्थः ॥४८॥

ननु सुकुमारे कामतन्त्रे कथं पीडाकरेष्वपि स आदर इत्याह -

आदृता नखपदैः परिरम्भाश्चुम्बितानि घनदन्तनिपातैः ।
सौकुमार्यगुणसंभृतकीर्तिर्वाम एव सुरेतष्वपि कामः ॥ ४९ ॥

'आद्य०' व्याख्या । **कामः** कन्दर्पः **सुरतेष्वपि** संभोगेष्वपि न केवलं विप्रलम्भेषु **वाम एव** वक्र एव वर्तते । किं० कामः ? **सौकुमार्यगुणसंभृतकीर्तिः** मृदुगुणत्वेन उपार्जितयशाः सुकुमारः कामः इति किंवदन्तीमात्रं, वस्तुतस्तु पीडयन्नपि सुखमावहतीति भावः । तथा **परिरम्भाः** आलिङ्गनानि **नखपदैः** नखव्रणैः **आदृता** अभिमताः तथा **चुम्बितानि घनदन्तनिपातैः** गाढदन्तव्रणैः आदृतानि इति लिङ्गपरिणामः सुरतसुखोद्दीपकत्वात् नखदन्तक्षतपूर्वकेषु आलिङ्गनचुम्बनेष्वादरः प्रवृत्त इत्यर्थः । अथ समासः । नखानां पदानि नखपदानि तैर्न० । घनाश्च ते दन्तनिपाताश्च घनदन्तनिपाताः तैर्घ० । सौकुमार्यमेव गुणः सौकुमार्यगुणः सौकुमार्यगुणेन संभृता कीर्तिर्येन स सौकु० । इति वृत्तार्थः ॥४९॥

बाह्यरतमभिधायेदानीमाभ्यन्तरसुरतमाह -

पाणिपल्लवविधूननमन्तः सीत्कृतानि नयनार्धनिमेषाः ।
योषितां रहसि गद्गद्वाचामस्त्रतामुपययुर्मदनस्य ॥ ५० ॥

'पाणि०' व्याख्या । **योषितां** स्त्रीणां संबन्धिनः एते पदार्थाः । **मदनस्य** कन्दर्पस्य **अस्त्रतां** शस्त्रताम् **उपययुः** प्रापुः एते शस्त्रवत् पुंसाम् उद्दीपनाः आसन्निति भावः । किं० योषिताम् ? **रहसि** एकान्ते **गद्गद्वाचाम्** अस्पष्टवाणीनां ते के पदार्थाः इत्याह- **पाणिपल्लवविधूननं** करकिशलयकम्पनम् **अन्तः सीत्कृतानि** सीत्कारशब्दोच्चारणानि एतेन कुट्टमिताख्यो भाव उक्तः । 'अधरपीडनादौ सुखेऽपि दुःखवदुपचारः कुट्टमितम्' (५७) इति लक्षणात्। **नयनार्धनिमेषाः** नेत्रार्धनिमिलनानि तथा विशेषणसामर्थ्यात् लब्धं गद्गद्कण्ठत्वं चेति एतानि कामस्य शस्त्रताम् उपययुः । अत्र सीत्कारार्धनिमेषादिना सुखपारवश्यं व्यज्यते। तदुक्तं *रतिरहस्ये*-

स्रस्तता वपुषि मीलनं दृशोः मूर्च्छना च रतिलाभलक्षणम् ।
श्लेषयेत् स्वजघनं मुहुर्मुहुः सीत्करोति च तथा पुनः पुनः ॥५८॥ इति ।

अथ समासः । पाणी एव पल्लवौ पा० पाणिपल्लवयोर्विधूननं पा० । नयनयोरर्धं नयनार्धं तस्य निमेषाः न० । गद्गदा वाचो यासां ताः गतासां ग० । अस्त्रस्य भावोऽस्त्रता ताम् अ० । इति वृत्तार्थः ॥ ५० ॥

पातुमाहितरतीन्यभिलेषुस्तर्षन्त्यपुनरुक्तरसानि ।
सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवानः ॥ ५१ ॥

'पातु०' व्याख्या । **युवानस्तरुणा वधूनां** नायिकानां **वदनानि** मुखानि **च** पुनः **मधूनि** मदिराः **पातुम्** आस्वादयितुम् **अभिलेषुः** वाञ्छुः किं० वदनानि ? तर्षय**न्ति** निबद्धरागाणि उत्पादितसंतोषानि **आहितरतीनि** पुष्टविकाराणीत्यर्थः । पुनः किं० वदनानि ? **अपुनरुक्तरसानि** पुनः रसपानेऽपि अपूर्वास्वादानि । पुनः किं० वदनानि ? **सस्मितानि** सहास्यानि पुनः किं० ? **सोत्पलानि** उत्पलसहितानि । अथ समासः । आहिता रतिर्यैस्तानि आहितरतीनि । अपुनरुक्तो रसो येषु तानि अ० । सह **स्मि**तेन वर्तमानानि स० । सह उत्पलेन वर्तमानानि सो० । इति वृत्तार्थः ॥ ५१ ॥

कान्तसंगमपराजितमन्यौ वारुणीरसनशान्तविवादे ।
मानिनीजन उपाहितसन्धौ संदधे धनुषि नेषुमनङ्गः ॥ ५२ ॥

'कान्त०' व्याख्या । **अनङ्गः** कामः **धनुषि** चापे इषुं बाणं **न संदधे** नारोपयामास सिद्धे साध्ये साधनवैयर्थ्यादिति भावः । कस्मिन् सति ? **मानिनीजने** अहंकारिणीस्त्रीलोके **उपाहितसन्धौ** प्रियैः सह कृतसंधाने कृतमैत्रीके सतीत्यर्थः । किं० मानिनीजने ? **कान्तसंगमपराजितमन्यौ** वल्लभसंयोगेन त्यक्तरोषे तदवधित्वात् कोपस्येति भावः । पुनः किं० मा० ? **वारुणीरसनशान्तविवादे** मदिरास्वादनेन शान्तवाक्कलहे कन्दर्पेण संधानादि यत्कार्यं क्रियते तत् प्रियसंगमवारुणीरसनाभ्यां कृतमिति संधानवैयर्थ्यमिति भावः । अथ समासः । कान्तस्य संगमः कान्तसंगमः कान्तसंगमेन पराजितो मन्युर्येन स कान्तसंगमपराजितमन्युस्तस्मिन् का० । वारुण्या रसनं वारुणीरसनं वारुणीरसनेन शान्तो विवादो यस्य स वारुणीरसनशान्तविवादस्तस्मिन् वा० । मानिनीनां जनः मानिनीजनस्तस्मिन् मा० । उपाहितः सन्धिर्येन स उपाहितसन्धिस्तस्मिन् उ० । न विद्यते अङ्गं यस्यासावनङ्गः । इति वृत्तार्थः ॥ ५२ ॥

कुप्यताशु भवतानतचित्ताः कोपितांश्च वरिवस्यत यूनः ।
इत्यनेक उपदेश इव स्म स्वाद्यते युवतिभिर्मधुवारः ॥ ५३ ॥

'कुप्य०' व्याख्या । **इति** पूर्वोक्ताख्या **अनेक उपदेश इव मधुवारो** मधुपानाभ्यासः **युवतिभिः स्त्रिभिः स्वाद्यते स्म** आस्वादितः अकारीत्यर्थः । उपदेशो यथा स्वीक्रियते तथेत्यर्थः । तदेव विवृणोति इतीति किंवत् हे वधूजनाः ! **आशु** शीघ्रं **यूनः** प्रियान् **कुप्यत** कोपं भजत अत्र कोपः कृत्रिम एव **च**

१. अत एव क्रुधद्रुहे० सि.२-२-२४ इति सूत्रेण न संप्रदानत्वं यतः तत्र यं प्रति कोपः स एव संप्रदानं भवति ।

पुनः **आनतचित्ताः** नम्रमनसो अनुकूलचित्ता प्रियान् प्रति **भवत** च पुनः **कोपितान्** कोपयुक्तान् यूनस्तरुणान् वरिवस्यत आराधयत परिचर्यां कुरुतेत्यर्थः । अनियताः खलु मत्तचेष्टा इति भावः । अथ समासः । आनतं चित्तं यासां ताः आ० । इति वृत्तार्थः ॥ ५३ ॥

भर्तृभिः प्रणयसंभ्रमदत्तां वारुणीमतिरसां रसयित्वा ।
ह्रीविमोहविरहादुपलेभे पाटवं नु हृदयं नु वधूभिः ॥ ५४ ॥

'भर्तृ०' व्याख्या । **वधूभिः** स्त्रीभिः **ह्रीविमोहविरहात्** लज्जामोहत्यागात् मदजाड्यापगमाद्वा **नु** इति वितर्के **पाटवं** पटुत्वं [**नु हृदयं**] तत्कार्यज्ञानसामर्थ्यम् **उपलेभे** किंकृत्वा ? **अतिरसां** सुस्वादां **वारुणीं** मदिरां **रसयित्वा** पीत्वा मद्यमास्वाद्येत्यर्थः । किं० वारुणीम् ? **भर्तृभिः** वल्लभैः **प्रणयसंभ्रमदत्तां** प्रेमादराभ्यां दत्ताम् । अथ समासः । प्रणयश्च संभ्रमश्च प्रणयसंभ्रमौ प्रणयसंभ्रमाभ्यां दत्ता प्रणयसंभ्रमदत्ता तां प्रण० । अति अत्यन्तं रसो यस्यां सा अतिरसा ताम् अतिरसाम् । ह्रियो विमोहः ह्रीविमोहः ह्रीविमोहस्य विरहः ह्रीविमोहविरहस्तस्मात् ह्री० । पटोर्भावः पाटवम् । इति वृत्तार्थः ॥ ५४ ॥

स्वादितः स्वयमथैधितमानं लम्भितः प्रियतमैः सह पीतः ।
आसवः प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥ ५५ ॥

'स्वादित०' व्याख्या । **आसवो** मदिरा **प्रमदानां** सुन्दरीणां **प्रतिपदं** पदे पदे प्रतिवासरं वा **नैकरूपरसताम्** अनेकविधस्वादुत्वं **भेजे** प्राप **इव** उपचारविशेषात् भोज्येषु रसविशेषः स्यादिति भावः । किं० आसवः ? **स्वयमा**त्मना **स्वादितः** आदौ स्वयमेव गृहीत्वा **पीतः अथ** पश्चात् **एधितमानं** वर्धितबहुमानं यथा स्यात्तथा **प्रियतमैः** वल्लभैः **लम्भितः** ग्राहितः पतिभिः स्वहस्तेन पायित इत्यर्थः । पुनः किं० आसवः ? प्रियतमैः सह पीतः समकालम् एकभाजनेन पीतः अत एवानेकरसवत्ता आसवस्य जातेत्यर्थः[२] । अथ समासः । एधितो मानो यत्र यस्यां क्रियायां तत् एधितमानम् । न एकरूपं नैकरूपं नैकरूपस्य रसता नैकरूपरसता तां नै० । इति वृत्तार्थः ॥ ५५ ॥

भ्रूविलाससुभगाननुकर्तुं विभ्रमानिव वधूनयनानाम् ।
आददे मृदुविलोलपलाशैरुत्पलैश्चषकवीचिषु कम्पः ॥ ५६ ॥

'भ्रूवि०' व्याख्या । **उत्पलैः** कमलैः **चषकवीचिषु** मदिरापात्रकल्लोलेषु **कम्पः आददे** स्वीकृतः[३] किं० उत्पलैः ? **मृदुविलोलपलाशैः** सुकुमाल(र)चञ्चलपत्रैः किंकर्तुम् ? उत्प्रेक्ष्यते **वधूनयनानां** स्त्रीनेत्राणां

१. अत एव हृदयस्य तत्कार्यज्ञानसामर्थ्यात् हृदयमेव प्रागसत्यश्चाल्लब्धमिति संदेहः । अन्यथा कथं प्रियं प्रति वक्रोक्त्याद्यर्थेषु प्रवृत्तिरिति भावः । संदेहालंकारः -म. । २. आस्वादनादिपदार्थानामनेकरसताप्राप्तिहेतुत्वात् काव्यलिङ्गं तावदेकं स्वादनादीनामनेकधर्माणामेकस्मिन्नेव सर्वक्रमेण संबन्धात्पर्यायभेदश्च, तयोश्च संसृष्टयोरनेकरसत्वोत्प्रेक्षाबीजत्वात्तया सहाङ्गाङ्गिभावेन संकरः -म. । ३. मधूर्मिषु यः कम्पः स स्वीकृतः, न तु स्वकम्पस्तस्य विलोलविशेषणैवोक्तत्वात्तत्स्वीकारश्च तद्योग एव, पूर्वं नेत्रसाम्यभाजामुत्पलानां कम्पमानवीचियोगात्सुभ्रूविलासनेत्रसाम्यं जातमित्यर्थः -म. ।

विभ्रमान् विलासान् **अनुकर्तुं** तैरात्मानं समीकर्तुं **स्थितैः** किं० विभ्रमान् ? **भ्रूविलाससुभगान्** भ्रूविभ्रमरम्यान्। अथ समासः । भ्रुवो विलासाः भ्रूविलासा भ्रूविलासैः सुभगा भ्रूविलाससुभगास्तान् भ्रू० । वधूनां नयनानि वधूनयनानि तेषां व० । मृदूनि विलोलानि पलाशानि येषां तानि मृदुविलोलपलाशानि तैर्मृ० । चषकेषु वीचयः चषकवीचयस्तेषु च० । इति वृत्तार्थः ॥ ५६ ॥

ओष्ठपल्लवविदंशरुचीनां हृद्यतामुपययौ रमणानाम् ।
फुल्ललोचनविनीलसरोजैरङ्गनास्यचषकैर्मधुवारः ॥ ५७ ॥

'ओष्ठ०' व्याख्या । **मधुवारो** मधुपानवृत्तिः मधुमदः **रमणानां** वल्लभानाम् **अङ्गनास्यचषकैः** नायिकावदनरूपपानपात्रैः **हृद्यतां** मनोहरतां मनसः प्रियत्वम् **उपपयौ** प्राप किं० रमणानाम् ? **ओष्ठपल्लव-विदंशरुचीनाम्** अधरपल्लवखण्डनाभिलाषाणां मुखसुरापानमिषेण अधररसपिपासितानामित्यर्थः । किं० अङ्ग० ? **फुल्ललोचनविनीलसरोजैः** विकस्वरनेत्ररूपनीलोत्पलैः[१] । अथ समासः । ओष्ठ एव पल्लवः ओष्ठपल्लवः तस्य विदंशः ओष्ठपल्लवविदंशः तस्मिन् रुचिर्येषां ते ओष्ठपल्लवविदंशरुचयस्तेषाम् ओ० । हृद्यस्य भावो हृ० तां हृद्यताम् । फुल्लानि च तानि लोचनानि च फुल्ललोचनानि फुल्ललोचनान्येव विनीलसरोजानि येषु तानि फुल्ललोचनविनीलसरोजानि तैः फु० । अङ्गनायाः आस्यम् अङ्गनास्यम् अङ्गनास्यमेव चषकाः अङ्गनास्यचषकाः तैर० । इति वृत्तार्थः ॥ ५७ ॥

प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः ।
तत्तथा हि दयिताननदत्तं व्यानशे मधु रसातिशयेन ॥ ५८ ॥

'प्राप्य०' व्याख्या । **गुणवतापि** सुगुणेनापि पुरुषेण **आश्रयवशेन** स्थानकवशेन **व्यक्तं** स्फुटं यथा स्यात्तथा **गुणानां विशेषः** आधिक्यं **प्राप्यते** लभ्यते **तत्तथा** यदुक्तं तत्तथैवेत्यर्थः । **हि** यस्मात् कारणात् **दयिताननदत्तं** वल्लभामुखेन दत्तं **मधु** मद्यं **रसातिशयेन** स्वादप्रकर्षेण कर्त्रा **व्यानशे** व्याप्तं जातमित्यर्थः। पूर्वमेव कर्पूरादिवासितं मुखं गुणवत् मध्वपि गुणवदेव अत एव गुणवन्मुखं दत्तं सत् अतिरसवद्जातमिति अनुरागस्योक्तिः । अथ समासः । गुणोऽस्यास्तीति गुणवान् तेन गुणवता । आश्रयस्य वशस्तेन आ० । दयितायाः आननं दयिताननं दयिताननेन दत्तं द० । रसस्यातिशयः रसातिशयस्तेन र० । इति वृत्तार्थः ॥५८॥

वीक्ष्य रत्नचषकेष्वतिरिक्तां कान्तदन्तपदमण्डनलक्ष्मीम् ।
जज्ञिरे बहुमताः प्रमदानामोष्ठयावकनुदो मधुवाराः ॥ ५९ ॥

'वीक्ष्य०' व्याख्या । **मधुवाराः** पुनर्मधुपानाभ्यासाः **प्रमदानां** वनितानां **बहुमताः** अतिशयेन वल्लभाः **जज्ञिरे** बभूवुः तेषां प्रियानुरागचिह्नप्रकाशकत्वादिति भावः । किं० मधुवाराः ? **ओष्ठयावकनुदः** ओष्ठालक्तकहराः अधरलाक्षाहारिण[:] इत्यर्थः । यदि ओष्ठयावकनुदः तत्कथं बहुमता जातास्तदाह-

१. रमणविशेषणार्थहेतुककाव्यलिङ्गसंकीर्णरूपकालंकारः -म.

किंकृत्वा ? **रत्नचषकेषु** रत्नमयमदिरापानपात्रेषु प्रतिबिम्बतामिति शेषः । **कान्तदन्तपदमण्डनलक्ष्मीं** वल्लभदन्तव्रणालंकरण-शोभाम् **अतिरिक्तां** यावकापगमात्पूर्वाभ्यधिकां **वीक्ष्य** विलोक्य । अथ समासः । रत्नैर्युक्ताः चषका रत्नचषकास्तेषु र० । दन्तानां पदं दन्तपदं कान्तस्य दन्तपदं कान्तदन्तपदं कान्तदन्तपदमेव मण्डनं कान्तदन्तपदमण्डनं तस्य लक्ष्मीः कान्तदन्तपदमण्डनलक्ष्मीस्तां का० । ओष्ठे यावकः ओष्ठयावकः ओष्ठयावकस्य नुदः ओष्ठयावकनुदः । इति वृत्तार्थः ॥ ५९ ॥

मधुपानाद्विलोचनेषु रागोत्पत्तिः अधरेभ्यश्च लाक्षारागनिवृत्तिर्मध्वाननयोश्चान्योऽन्यगन्धसंक्रान्तिरिति स्थिते सत्युत्प्रेक्षमाण इत्याह -

लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा ।
वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ॥ ६० ॥

'लोचन०' व्याख्या । **वारुणी** मदिरा **परगुणात्मगुणानाम्** अन्यगुणनिजगुणानां **व्यत्ययं** परगुणानाम् आत्मन्यध्यारोपो व्यत्ययः चित्तेन प्रमादिकवस्तुपरिवृत्तिर्वा व्यत्ययः **नु** इति वितर्के **विनिमयं** परस्परकरणं विनिमयः बुद्धिपूर्ववस्तुपरिवृत्तिर्वा विनिमयः **वितेने** विस्तारयामास किं० वारुणी ? **लोचनाधरकृतरागा** नेत्रोष्ठकृताहृतरागा अधराणां यावकरागमपहृत्य वारुण्या तत् नेत्रयोः रागः कृतः इत्यर्थः । अनेन परगुणस्य व्यत्ययः उक्तः । पुनः किं० वारुणी ? **वासिताननविशेषितगन्धा** सुगन्धीकृतमुखेन अधिकीकृतगन्धा अनेन विनिमयः उक्तः । अत्र लोचनाधररागयोः भेदेऽप्यभेदाध्यवसाया-देकत्ववाचोयुक्तिः तस्मात्तन्मूलाति-शयोक्त्यनुप्राणिता चेयं व्यत्ययविनिमययोरन्यतरकरणोत्प्रेक्षेति संक्षेपः सा च प्रतीयमाना व्यञ्जकाप्रयोगात् नुशब्दः संशये इति *घण्टापथः* । अथ समासः । लोचने च अधरश्च लोचनाधरं लोचनाधरस्य कृतो हृतो रागो यया सा लो० । वासितं च तत् आननं च वासिताननं वासिताननेन विशेषितो गन्धो यस्याः सा वा० । परयोर्गुणः परगुणः परस्य गुणः परगुणः परगुणश्च परगुणश्च परगुणो परगुणश्च आत्मगुणश्च परात्मगुणो परगुणौ च परात्मगुणौ च परगुणात्मगुणास्तेषां प० । इति वृत्तार्थः ॥ ६० ॥

तुल्यरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा ।
योषितः सुहृदिव प्रविभेजे लम्भितेक्षणरुचिर्मदरागः ॥ ६१ ॥

'तुल्य०' व्याख्या । **मदरागो** मदलौहित्यं **योषितो** वनितायाः **कर्णगं** कर्णस्थम् **असितोत्पलं** नीलोत्पलं **प्रविभेजे** पृथक् विभागीचकार किंकृत्वा ? **निरुपकारि** उपकाररहितं **विदित्वा** ज्ञात्वा इति भावः । किं० असि० ? **अक्ष्णोः** नेत्रस्य **तुल्यरूपं** समानरूपं शोभातिशयसंपादनात् किं० मदरागः ? **लम्भितेक्षणरुचिः** प्रापितनेत्रकान्तिः क इव ? **सुहृदिव** यथा सुहृत् मित्रम् किमपि विभागीकुरुते। अथ समासः । तुल्यं रूपं यस्य स तुल्यरूपस्तं तु० । न सितम् असितम् असितं च तदुत्पलं च अ० । कर्णयोर्गच्छतीति कर्णगम्। लम्भिता ईक्षणयो रुचिर्येन स ल० । मदस्य रागः म० । इति वृत्तार्थः ॥ ६१ ॥

क्षीणयावकरसोऽप्यतिपानैरार्द्रदन्तपदलम्भितशोभः ।
आययावतितरामिव वध्वाः सान्द्रतामधरपल्लवरागः ॥ ६२ ॥

'क्षीण०' व्याख्या । **वध्वा** देवाङ्गनायाः **अधरपल्लवरागः** ओष्ठपल्लवरक्तिमा **अतितराम्** अतिशयेन **सान्द्रतां** बहुत्वम् **आययौ इव** आप्रपेदे इव वल्लभोपभोगचिह्नमण्डितानां कामिन्यवयवानां किमन्यैः मण्डनैरिति भावः । किं० अ० ? **अतिपानैः** अतिशयपानैः मधुपानाभ्यासैरित्यर्थः । **क्षीणयावकरसोऽपि** क्षयंगतालक्तकरसोऽपि पुनः किं० अध० ? **आर्द्रदन्तपदलम्भितशोभः** आर्द्रैः दन्तव्रणैः उत्पादितरक्तकान्तिः[1] । अथ समासः । यावकस्य रसो यावकरसः क्षीणो यावकरसो यस्मिन् स क्षी० । अति अत्यन्तं पानानि अतिपानानि तैः अ० । दन्तानां पदानि दन्तपदानि आर्द्राणि च तानि दन्तपदानि च आर्द्रदन्तपदानि आर्द्रदन्तपदैर्लम्भिता शोभा यस्य स आ० । सान्द्रस्य भावः सान्द्रता तां सा० । अधर एव पल्लवः अधरपल्लवः त रागः अ० । इति वृत्तार्थः ॥६२॥

रागकान्तनयनेषु नितान्तं विद्रुमारुणकपोलतलेषु ।
सर्वगापि ददृशे वनितानां दर्पणेष्वपि मुखेषु मदश्रीः ॥ ६३ ॥

'राग०' व्याख्या । **सर्वगापि** सर्वगतापि सर्वाङ्गव्यापिन्यपि **मदश्रीः** मदशोभा **वनितानां** प्रमदानां **मुखेषु** वदनेषु **ददृशे** दृष्टा वल्लभैरिति शेषः । केष्विव ? **दर्पणेष्विव** यथा दर्पणेषु आदर्शेषु किंचित् वस्तु दृश्यते एतेन नयनारक्तत्वेन रागाभिव्यक्तिसंभवादिति नियमात् मुखेषु मदश्रीर्दृष्टेतिभावः । किं० मुखेषु ? **रागकान्तनयनेषु** मदिरारागेषन्मनोहरैर्नेत्रेषु[2] । अथ समासः । [रागेण कान्तानि नयनानि येषु] तानि रागकान्तनयनानि तेषु रा० । विद्रुमवदरुणानि कपोलतलानि येषु तानि विद्रुमारुणकपोलतलानि तेषु वि० । सर्वेषु गच्छतीति सर्वगा। मदस्य श्रीः मदश्रीः । इति वृत्तार्थः ॥ ६३ ॥

बद्धकोपविकृतीरपि रामाश्चारुताभिमततामुपनिन्ये ।
वश्यतां मधुमदो दयितानामात्मवर्गहितमिच्छति सर्वः ॥ ६४ ॥

'बद्ध०' व्याख्या । **चारुता** सुन्दरता **बद्धकोपविकृतीरपि** बद्धकोपविकारा अपि **रामाः** प्रमदाः **अभिमततां** प्रियवाल्लभ्यम् **उपनिन्ये** नीतवती सौन्दर्यं हि विकृतमपि रोचयते इति भावः । **मधुमदो** मदिरामदः **दयितानां** भर्तृणां **वश्यतां** विधेयत्वम् उपनिन्ये तथाहि- युक्तोऽयमर्थः **सर्वः** समग्रोपि **आत्मवर्गहितं** निजवर्गहितम् **इच्छति** वाञ्छति अतः कारणात् चारुता स्त्रीत्वात् स्त्रीणामुपचकार । मधुमदस्तु पुंसामिति युक्तमित्यर्थः । अत्र विकृतापि अभिमता कुपिता अपि वश्या इति विरोधस्य चारुतामदाभ्यां साधनादुभयथापि विरोधाभासो भवन्नर्थान्तरन्यासेन संसृज्यते । अथ समासः । बद्धा

१. अत्र क्षीणस्यापि सान्द्रतेति विरोधात् कान्तदन्तेत्यादिविशेषणगत्या सान्द्रत्वे हेतूक्त्या काव्यलिङ्गं तत्संकीर्णा चोत्प्रेक्षा -म. । २. अत्र मदश्रीः सर्वगताऽपि मुखेष्वेव ददृश इति विरोधः । तस्य मुखविशेषणैः समाधानात् काव्यलिङ्गानुप्राणितो विरोधवदाभासोऽलंकारः । स चोपमया संसृज्यते -म.

कोपविकृतिर्याभिस्ताः बद्धकोपविकृत्यस्ताः ब० । चारोर्भावः चारुता । अभिमतस्य भावो अभिमतता ताम् अ० । आत्मनो वर्गः आत्मवर्गः आत्मवर्गस्य हितम् आ० । इति वृत्तार्थः ॥ ६४ ॥

वाससां शिथिलतामुपनाभि ह्रीनिराससमपदे कुपितानि ।
योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयम् ॥ ६५ ॥

'वास०' व्याख्या । **मदिरा योषितां** स्त्रीणां **वचनीयं** गुरुजनेभ्यो न नाभिं दर्शयेत् इति शास्त्रनिषिद्धाचरणं निन्द्यं वा **निर्ममार्ज** स्फेटयामास तथा दोषाणामपि वस्त्रशैथिल्यादीनां तदानीं गुणत्वान्न कश्चिद् वचनीयावकाश इत्यर्थः । प्रियकारिणी सखी चेति उपरिष्टादुपमा ज्ञेया मदिरा किंकुर्वती ? **उपनाभि** नाभिसमीपे **वाससां** वस्त्राणां **शिथिलतां** शिथिलत्वं **विदधती** कुर्वती पुनः किं० म० ? **ह्रीनिरासं** लज्जाविनाशं **अपदे** अस्थाने **कुपितानि** कोपांश्च विदधती **गुणपक्षे** गुणकोटौ विदधती निवेशयन्ती दोषानप्येतान्गुणीकुर्वतीत्यर्थः । अथ समासः । शिथिलस्य भावः शिथिलता तां शि० । नाभेः समीपम् उ० । ह्रियो निरासो यत्र यस्यां क्रियायां ह्रीनिरासम् । गुणानां पक्षो गुणपक्षस्तस्मिन् गु० । इति वृत्तार्थः ॥६५॥

भर्तृषूपसखि निक्षिपतीनामात्मनो स्फुटमदोद्यमितानाम्[1] ।
व्रीडया विफलया वनितानां न स्थितं न विगतं हृदयेषु ॥ ६६ ॥

'भर्तृ०' व्याख्या । **व्रीडया** लज्जया **वनितानाम्** अनुरक्तदेवाङ्गनानां **हृदयेषु न स्थितं** न रहितं **न विगतं** न गतं किं० व्रीडया ? **विफलया** निष्फलया अनुचिताचरणात् इति भावः । किं० वनितानाम् ? **उपसखि** सखीसमीपे **भर्तृषु** वल्लभेषु **आत्मनो** देहान् **निक्षिपन्तीनां** पतीनामुपरि शरीराणि पातयन्तीनामित्यर्थः । पुनः किं० व० ? **स्फुटमदोद्यमितानां** स्पष्टमदिरामदेन प्रेरितानां न तु स्वच्छयेति । अथ समास । सख्याः समीपम् उपसखि । स्फुटश्चासौ मदश्च स्फुटमदः स्फुटमदेन उद्यमिता स्फुटमदोद्यमिताः तासां स्फु० । विगतं फलं यस्याः सा विफला तया वि० । इति वृत्तार्थः ॥ ६६ ॥

रुन्धती नयनवाक्यविकासं सादितोभयकरा परिरम्भे ।
व्रीडितस्य ललितं युवतीनां क्षीबता बहुगुणैरनुजह्रे ॥ ६७ ॥

'रुन्ध०' व्याख्या । **युवतीनां** वनितानां संबन्धिनी **क्षीबता** मत्तता **बहुगुणैः** दृष्टिसंकोचादिभिः **व्रीडितस्य** व्रीडायाः **ललितं** विलासम् **अनुजह्रे** अनुचकार व्रीडाकार्यकारकत्वात् व्रीडानुकरणमित्युपमालंकारः किंकुर्वती क्षीबता ? **नयनवाक्यविकाशं** नेत्रवचनप्रागल्भ्यप्रसरं **रुन्धती** निवारयन्ती किं० क्षीबता ? **परिरम्भे** आलिङ्गने **सादितोभयकरा** निरुद्यमीकृतोभयहस्ता जडतानीतोभयकरा इत्यर्थः । अथ समासः । नयनानि च वाक्यानि च नयनवाक्यानि नयनवाक्यानां विकाशः नयनवाक्यविकाशस्तं न० । सादितौ उभौ करौ यया सा सा० । क्षीबस्य भावः क्षीबता । बहवश्च ते गुणाश्च बहुगुणास्तैर्बहुगुणैः । इति वृत्तार्थः ॥६७॥

1. मधुमदो० -म. इदं च पा. ।

योषिदुद्यतमनोभवरागा मानवत्यपि ययौ दयिताङ्कम् ।
कारयत्यनिभृता गुणदोषे वारुणी खलु रहस्यविभेदम् ॥ ६८ ॥

'योषि०' व्याख्या । **मानवत्यपि** अहंकारयुक्तापि **योषित्** स्त्री **दयिताङ्कं** वल्लभोत्संगं **ययौ** जगाम किं० योषित् ? **उद्यतमनोभवरागा** उत्कटकन्दर्परागा मानाद्रागो बलवान् इति मानम् उत्सृज्य प्रेयां संप्रापेत्यर्थः । **खलु** इति यस्मात् कारणात् **वारुणी** मदिरा **गुणदोषे** गुणेषु दोषेषु च विषये **रहस्यविभेदं** गुप्तभङ्गं **कारयति** निष्पादयति गूढापि मदिरा गुणदोषौ प्रकाशयतीत्यर्थः । किं० वारुणी ? **अनिभृता** चपला अकार्यकारिणीत्यर्थः । यतो निगूढरागप्रकटनं प्रकटमानत्यागश्च मत्ताया न लाघवमावहत्यबुद्धिपूर्वकत्वा-दितिभावः । अथ समासः । उद्यतश्चासौ मनोभवश्च उद्यतमनोभवः उद्यतमनोभवे रागो यस्याः सा उ० । दयितस्य अङ्को दयिताङ्कस्तं द० । न निभृता अनिभृता । गुणाश्च दोषाश्च गुणदोषं तस्मिन् गुणदोषे। रहस्यस्य विभेदः रहस्यविभेदस्तं र० । इति वृत्तार्थः ॥ ६८ ॥

आहिते नु मधुना मधुरत्वे चेष्टितस्य गमिते नु विकासम् ।
आबभौ नव इवोद्यतरागः कामिनीष्ववसरः कुसुमेषोः ॥ ६९ ॥

'आहि०' व्याख्या । **कुसुमेषोः** कामस्य **कामिनीषु** वनितासु विषये **अवसरः** सुरतसंयोगः **नव इव** नूतन इव **आबभौ** शुशुभे नित्यं संनिहितोऽपि मदनः कामिनीषु मदकृततात्कालिकचेष्टामाधुर्याद्रागोद्रेके सत्यपूर्ववदुद्दीपनमभूदित्यर्थः । संशयानुगुणितेयमुत्प्रेक्षा किंलक्षणोऽवसरः ? **उद्यतरागः** उत्कृष्टविषयाभिलाषः कस्मिन् सति ? **नु** इति वितर्के **मधुना** मद्येन **चेष्टितस्य** सुरतव्यापारस्य **मधुरत्वे आहिते** उत्पादिते सति प्राग् सत्येव मनोहरत्वे संप्रत्युत्पादिते सतीत्यर्थः । अथवा **नु** इति वितर्के **विकासं गमिते** प्राग् सत्येव माधुर्ये प्रकर्षं प्रापिते सति । अथ समासः । मधुरस्य भावो मधुरत्वं तस्मिन् मधुरत्वे। उद्यतो रागो यत्र स उद्यतरागः । कुसुमान्येव इषवो यस्य स कुसुमेषुः तस्य कुसुमेषोः । इति वृत्तार्थः ॥ ६९ ॥

मा गमन्मदविमूढधियो नः प्रोज्झ्य रन्तुमिति शङ्कितनाथाः ।
योषितो न मदिरा भृशमीषुः प्रेम पश्यति भयान्यपदेऽपि ॥ ७० ॥

'मा ग०' व्याख्या । **योषितो** नार्यः इति हेतोः **भृशमत्यर्थं मदिरा नेषुर्न** ववाञ्छुः नेच्छन्ति स्मेत्यर्थः । किन्तु भर्तृवियोगभयादीषदेव पपुरित्यर्थः । किं० योषितः ? **शङ्कितनाथाः** अविश्वस्तपुरुषाः **इती**ति किं **मदविमूढधियो** मत्ततया मूढमतीः **नो**ऽस्मान् प्रोज्झ्य विसृज्य **रन्तुं** क्रीडितुं **मागमन्** मा गच्छन्त्विति मनीषयैवेति शेषः । यतो हेतोः **प्रेम** स्नेहः **अपदेऽपि** अस्थानेऽपि **भयानि** भीतीः **पश्यति** विचारयति । अथ समासः । मदेन विमूढा धीर्येषां ते म० । शङ्किता नाथा याभिस्ताः श० । इति वृत्तार्थः ॥७०॥

चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमदः शशिभासः ।
संगमश्च दयितैः स्म नयन्ति प्रेम कामपि भुवं प्रमदानाम् ॥ ७१ ॥

'चित्त०' व्याख्या । एते पदार्थाः **प्रमदानां** नायिकानां **प्रेम** स्नेहं **कामपि भुवं** काञ्चिद्दशां **नयन्ति स्म** प्रापयन्ति स्म रत्यवस्थामप्यतिक्रम्य शृङ्गारावस्थां क्रीडामयीं निन्युरित्यर्थः । ते के पदार्थाः तन्निर्दिशति- एकं **विविक्तं** विजनम् एकान्तप्रदेशः किं० विविक्तम् ? **चित्तनिर्वृतिविधायि** मनसः पूर्तिकारकं **च** पुनः **मन्मथः** कन्दर्पः अत्र मन्मथपदं साभिप्रायं मनो मथ्नातीति मन्मथः उत्कण्ठाकरत्वात् । च पुनः **मधुमदः** मद्यमदः **शशिभास**श्चन्द्रकान्तयश्च पुनः **दयितैः** वल्लभैः सह **संगमः** संयोगः एते पदार्थाः प्रमदानां वियोगासहत्वावस्थां संभोगलक्षणां निन्युरिति । अथ संभोगोऽवस्थाभेदात् सप्तविधः -

यथा- प्रेमाभिलाषो रागश्च स्नेहः प्रेमरतिस्तथा । शृङ्गारश्चेति संभोगः सप्तावस्थः प्रकीर्तितः ॥५९॥

इत्युक्तं *रसरत्नाकरे*।

प्रेमा दिदृक्षा रम्येषु तच्चिन्ताप्यभिलाषकः । रागस्तत्संगबुद्धिः स्यात् स्नेहस्तत्प्रवणक्रिया ॥६०॥

तद्वियोगासहं प्रेम रतिस्तत्सहवर्तनम् । शृङ्गारस्तत्समं क्रीडा संभोगः सप्तधा मतः ॥६१॥

अथ समासः । चित्तस्य निर्वृतिं विदधातीति चि० । मधुनो मदः मधुमदः । शशिनो भासः [श०] । इति वृत्तार्थः ॥ ७१ ॥

अथ क्रीडावस्थामेवाह -

धार्ष्ट्यलङ्घितयथोचितभूमौ निर्दयं विलुलितालकमाल्ये ।
मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ॥ ७२ ॥

'धार्ष्ट्य०' व्याख्या । **कुसुमेषुः** कामः **मानिनीरतिविधौ** नायिकासंबधिसुरतक्रियायां **मत्तमत्त इव** मत्तो मत्तप्रकार इव मत्तः किं किं न करोतीति भावः । **विभ्रमं** विलासं विश्रमणं वा **आप** प्रपेदे किं० मानि० ? **धार्ष्ट्यलङ्घितयथोचितभूमौ** लज्जापगमात् उल्लङ्घितमर्यादौ चुम्बनताडनमणित-सीत्कारपुरुषायितादौ स्वयमृच्छृङ्खलवृत्तिरिति भावः । पुनः किं० मानि० ? **निर्दयं** यथा स्यात्तथा **विलुलितालकमाल्ये** विलुलिताकर्षणकुसुममाले । अथ समासः । धृष्टस्य भावो धार्ष्ट्यं धार्ष्ट्येन लङ्घिता यथोचिता भूमिर्यस्मिन् स धार्ष्ट्यलङ्घितयथोचितभूमिस्तस्मिन् धा० । विलुलितानि अलकमाल्यानि यस्मिन् स विलुलितालकमाल्यस्तस्मिन् वि० । रतेर्विधिः रतिविधिः मानिनीनां रतिविधिः मानिनीरतिविधिस्तस्मिन् मा० । कुसुमानाम् इषवो यस्य स कुसुमेषुः । इति वृत्तार्थः ॥ ७२ ॥

[1]सीधुपानविधुरेषु वधूनां निघ्नतामुपगतेषु वपुःषु ।
ईहितं रतिरसाहितभावं वीतलक्ष्यमपि कामिषु रेजे ॥ ७३ ॥

'सीधु०' व्याख्या । **कामिषु** कामिजनेषु विषयेषु **वीतलक्ष्यमपि** गतवेध्यमपि त्यक्तविषयस्थानम्

1. शीधु० -म. ।

१. कारयितरि कर्तृत्वोपचारादुत्प्रेक्षा -म. ।

ईहितं भर्तृषु विषये चुम्बनताडनादि चेष्टितं **रेजे** शुशुभे निर्विषयमस्थानकृतमपि इत्यर्थः । रागिणां स्खलितमपि शोभते इति भावः । किं० ईहितम् ? **रतिरसाहितभावं** सुरतस्वादे दत्तचित्तं किं० कामिषु ? **सीधुपानविधुरेषु** मदिरापानेन विह्वलेषु पुनः किं० का० ? **वधूनाम्** अप्सरसां **वपुःषु** शरीरेषु **निघ्नतां** पराधीनताम् आयत्तताम् **उपगतेषु** प्राप्तेषु सत्सु[1] । अथ समासः । सीधोः पानं सीधुपानं सीधुपानेन विधुराः सीधुपानविधुरास्तेषु सी० । निघ्नस्य भावो निघ्नता तां नि० । रतेः रसो रतिरसः रतिरसे आहितो भावो येन तत् र० । वीतं लक्ष्यं यस्मात्तत् वी० । इति वृत्तार्थः ॥ ७३ ॥

अन्योन्यरक्तमनसामथ ब्रिभ्रतीनां चेतोभुवो सुरसखाप्सरसां निदेशम् ।
वैबोधिकध्वनिविभावितपश्चिमार्धा सा संहृतेव परिवृत्तिमियाय रात्रिः ॥ ७४ ॥ (व०)

'अन्यो०' व्याख्या । **अथा**नन्तरं **सा रात्रिः** सा रजनी **परिवृत्तिं** विनाशम् **इयाय** प्राप प्रभातकल्पा बभूवेत्यर्थः । यस्याम् अमरस्त्रियः क्रीडां चक्रुः सेति । किं० रात्रिः ? उत्प्रेक्ष्यते **संहृतेव** संक्षिप्तेव सुखिनां भूयानपि कालो लघीयानिव भवतीति भावः । पुनः किं० रात्रिः ? **वैबोधिकध्वनिविभावितपश्चिमार्धा** बन्दिनां ध्वनिभिः कथितपश्चात्प्रहरा कासां सतीनां ? **सुरसखाप्सरसां** गन्धर्वाणां देवाङ्गनानां च **चेतोभुवः** कामस्य **निदेशम्** आज्ञां **बिभ्रतीनां** दधानानां स्मरविधेयानां सुरतेन रममाणानामित्यर्थः । किं० सुर० ? **अन्योन्यरक्तमनसां** परस्परानुरक्तचित्तानां स्मरविधेयत्वं कुर्वतीनामित्यर्थः । अथ समासः । अन्यश्च अन्यश्च अन्योन्यम् अन्योन्यं रक्तानि मनांसि यासां ताः अन्योन्यरक्तमनसस्तासाम् अ० । सुराणां सखायः सुरसखाः सुरसखाश्च अप्सरसश्च सुरसखाप्सरसस्तासां सु० । विबोधः प्रबोधनं शीलं येषां ते वैबोधिकाः वैबोधिकानां ध्वनिः वैबोधिकध्वनिः वैबोधिकध्वनिना विभावितः पश्चिमार्धो यस्याः सा वै० । इति वृत्तार्थः ॥ ७४ ॥

निद्राविनोदितनितान्तरतिक्लमानामायामिमङ्गलनिनादविबोधितानाम् ।
रामासु भाविविरहाकुलितासु यूनां तत्पूर्वतामिव समादधिरे रतानि ॥ ७५ ॥ (व०)

'निद्रा०' व्याख्या । **यूनां** तरुणावस्थायुक्तनराणां **रतानि** सुरतानि **रामासु** वनितासु विषये **तत्पूर्वतामिव** तत्प्रथमतामिव **समादधिरे** प्रापुः तदानीं पूर्वमप्राप्तसुरता इव युवानः प्रवृत्ता इत्यर्थः । आद्यसुरतवदादरात् प्रावर्तन्त इत्यर्थः । यदुत्तरकाल(लं) दुर्ज(र्ल)भं तदतितृष्णयानुभूयत इत्यर्थः । किं० रामासु ? **भाविविरहाकुलितासु** भाविना वियोगेन आकुलितासु लोलासु किं० यूनाम् ? **निद्राविनोदितनितान्तरतिक्लमानां** निद्रया स्फेटितातिशयसुरतश्रमाणाम् । पुनः किं० यूनाम् ? **आयामिमङ्गलनिनादविबोधितानां** दीर्घेण मङ्गलध्वनिना विबोधितानाम् । अथ समासः । निद्रया विनोदितो नितान्तो रत्याः क्लमो येषां ते निद्राविनोदितनितान्तरतिक्लमास्तेषां नि० । मङ्गलानां निनादाः मङ्गलनिनादाः आयामो विद्यते येषां ते आयामिनः आयामिनश्च ते मङ्गलनिनादाश्च आयामिमङ्गलनिनादाः

१. विरोधालंकारः -म.

आयामिमङ्गलनिनादैः विबोधिताः आयामिमङ्गलनिनादविबोधितास्तेषामा० । भावी चासौ विरहश्च भाविविरहः तेनाकुलिताः भाविविरहाकुलितास्तासु भा० । तान्येव पूर्वाणि तत्पूर्वाणि तेषां भावस्तत्पूर्वता तां तत्पूर्वताम् । इति वृत्तार्थ ॥७५॥

कान्ताजनं सुरतखेदनिमीलिताक्षं संवाहितुं समुपयानिव मन्दमन्दम् ।
हर्म्येषु माल्यमदिरापरिभोगगन्धानाविश्चकार रजनीपरिवृत्तिवायुः ॥ ७६ ॥ (व०)

'कान्ता०' व्याख्या । **रजनीपरिवृत्तिवायुः** निशान्तवातः प्रभातवायुरिति यावत् । **हर्म्येषु** धवलगृहेषु 'माल्यमदिरापरिभोगगन्धान्' कुसुममद्यसौरभ्यान् **आविश्चकार** प्रकटीचकार **माल्यानि** पुष्पस्रजः **मदिरा** आसवः **परिभोगश्च** सुरतसंमर्दः तेषां **गन्धाः** तान् बहिः प्रसारयामासेत्यर्थः । किं० रज० ? उत्प्रेक्ष्यते **कान्ताजनं** वधूजनम् **संवाहितुम्** आश्वासयितुं वा अथवा स्वेदापनोदादत्यर्थं शरीरमर्दनं कर्तुम् इवेत्यर्थः । 'संवाहनं वाहनेऽपि नरादेरङ्गमर्दने' इति *विश्वः* । **मन्दमन्दं** शनैः **समुपयानिव** आगच्छन्निव वा यथा कश्चित् कार्यकरणजनितस्वेदखिन्नं पुरुषं संवाहितुं मन्दं मन्दं याति तद्वदिति भावः । किं० कान्ताजनम् ? **सुरतखेदनिमीलिताक्षं** संभोगश्रमेण निमीलितनयनम्[१] । अथ समासः । कान्तानां जनः कान्ताजनस्तं का० । सुरतस्य खेदः सुरतखेदः तेन निमीलितान्यक्षिणी येन स सुरतखेदनिमीलिताक्षः तं सु० । माल्यानि च मदिरा च परिभोगाश्च माल्यमदिरापरिभोगाः तेषां गन्धाः माल्यमदिरापरिभोगगन्धास्तान् मा० । रजन्याः परिवृत्तिः रजनीपरिवृत्तिः रजनीपरिवृत्तेः वायू र० । इति वृत्तार्थः ॥ ७६ ॥

आमोदवासितचलाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु ।
व्यामृष्टपत्रतिलकेषु विलासिनीनां शोभां बबन्ध वदनेषु मदावशेषः ॥ ७७ ॥ (व.)

'आमो०' व्याख्या । **मदावशेषः** मदिरामदस्य शेषः **विलासिनीनां** स्त्रीणां **वदनेषु** मुखेषु **शोभां** श्रियं **बबन्ध** बध्नाति स्म मण्डनान्तरापाये मदशेष एव मण्डनं बभूवेत्यर्थः । स्त्रीणां मद एव भूषणं जातमिति भावः । किं० वदनेषु ? **आमोदवासितचलाधरपल्लवेषु** मद्यगन्धेन सुरभीकृतचञ्चलौष्ठ-किसलयेषु पुनः किं० व० ? **निद्राकषायितविपाटललोचनेषु** निद्रया कषायगुणयुक्तीकृतरक्तलोचनेषु पुनः किं० व० ? **व्यामृष्टपत्रतिलकेषु** लग्नपत्रवल्लीतिलकेषु । अथ समासः । चलाश्च ते अधरपल्लवाश्च चलाधरपल्लवाः आमोदेन वासिताश्चलाधरपल्लवा येषु तानि आमोदवासितचलाधरपल्लवानि तेषु आ० । निद्रया कषायितविपाटले लोचने येषु तानि निद्राकषायितविपाटललोचनानि तेषु नि० । व्यामृष्टानि पत्राणि तिलकाश्च येषां तानि व्यामृष्टपत्रतिलकानि तेषु व्यामृ० । मदस्य अवशेषो मदावशेषः । इति वृत्तार्थः ॥७७॥

गतवति नखलेखालक्ष्यतामङ्गरागे समददयितपीताताम्रबिम्बाधराणाम् ।
विरहविधुरमिष्टा सत्सखीवाङ्गनानां हृदयमवललम्बे रात्रिसंभोगलक्ष्मीः ॥७८॥ (मा०)

इति श्रीकिरातार्जुनीये महाकाव्ये *वधूवर्णनो* नाम नवमः सर्गोऽगमत् ॥ ९ ॥ ऐं नमः

१. मान्द्यगुणमूलत्वाद् गुणनिमित्तक्रियाफलोत्प्रेक्षा -म. ।

'गत०' व्याख्या । 'रात्रिसंभोगलक्ष्मीः' **रात्रौ संभोगस्य** नखपददन्तादेः **लक्ष्मीः** शोभा **अङ्गनानां** वनितानां **हृदयं** वक्षस्थलं **विरहविधुरम्** आह्निकवियोगेन विह्वलम् **अवललम्बे** अवलम्बते स्म धारयामासेत्यर्थः । प्रियोपभोगचिह्नशोभावलोकनलालसाः कथंचिदपि विरहं न सहत इत्यर्थः । कस्मिन् सति ? **अङ्गरागे** कुङ्कुमादिविलेपने **नखलेखालक्ष्यताम्** नखव्रणे रेखासदृशतां **गतवति** प्राप्तवति सति सुरतविमर्दनात्तासु अवशेषे सतीत्यर्थः । किं० अङ्गनानाम् ? **समददयितपीताताम्रबिम्बाधराणां** मदसहितवल्लभास्वादितरक्तबिम्बतुल्याधराणां किं० रात्रि० ? उत्प्रेक्ष्यते '**इष्टा** सत्सखी**व**' यथा **इष्टा** आप्ता **सत्सखी** निपुणा सखी हृदयम् आश्वासयति तद्वदित्यर्थः । अथ समासः । नखानां लेखा नखलेखा नखलेखासु लक्ष्यता नखलेखालक्ष्यता तां न० । सह मदेन वर्तमानाः समदाः समदाश्च ते दयिताश्च स० बिम्बतुल्याधरा बिम्बाधराः समददयितैः पीताः समददयितपीताः समददयितपीता आताम्रा बिम्बाधरा यासां ताः समददयितपीताताम्रबिम्बाधरास्तासां स० । विरहेण विधुरं वि० । रात्रौ संभोगः रात्रिसंभोगः तस्य लक्ष्मीः रा० । इति वृत्तार्थः ॥ ७८ ॥

इति श्रीभट्टभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां[वृत्तौ] ***सूर्यास्तचन्द्रोदय-मधुपानसंभोगवर्णनो*** नाम नवमः सर्गः ॥ ९ ॥

दशमः सर्गः।

अथागन्तुकसहजशोभासंपन्नतया समग्रसाधनास्ताः **स्त्रियः** मुनिमनःप्रलोभनार्थं प्रस्थिता इत्यादि वक्तुं दशमं सर्गमारभमाण आह –

अथ परिमलजामवाप्य लक्ष्मीमवयवदीपितमण्डनश्रियस्ताः ।
वसतिमभिविहाय रम्यहावाः सुरपतिसूनुविलोभनाय जग्मुः ॥ १ ॥

[का. ६२ यावद् पुष्पिताग्राछन्दः]

'अथ०' व्याख्या । **अथ** प्रभातानन्तरं **ताः** अप्सरसः **वसतिं** निवासस्थानम् **अभिविहाय** त्यक्त्वा **सुरपतिसूनुविलोभनाय** अर्जुनस्य लोभनार्थं **जग्मुः** ययुः किंकृत्वा ? **परिमलजां** संभोगोत्पन्नां **लक्ष्मीं** शोभाम् **अवाप्य** प्राप्य 'संभोगः स्यात् परिमले' इति *वैजयन्ती* । संभोगात् स्त्रियः शोभन्ते इति *घण्टापथः*। एतेनागन्तुकशोभासंपत्तिरुक्ता । अत एव सुरतादिविमर्दवर्णनस्य प्रस्तुतोपयोगित्वमुक्तम्। अथ सहजशोभासंपत्तिमाह– किं० ताः ? **अवयवदीपितमण्डनश्रियः** हस्तपादाद्यवयवैः शोभितालंकरणलक्ष्म्यः। पुनः किं० ताः ? **रम्यहावाः** मनोहरविलासाः[१] । अथ समासः । परिमलाज्जाता परिमलजा तां प० । अवयवैः दीपिता मण्डनश्रीः याभिस्ता अ० । रम्यो हावो यासां ताः र० । सुरपतेः सूनुः सुरपतिसूनुः सुरपतिसूनोर्विलोभनं सु० तस्मै सुरपतिसूनुविलोभनाय । इति वृत्तार्थः ॥ १ ॥

द्रुतपदमभियातुमिच्छतीनां गगनपरिक्रमलाघवेन तासाम् ।
अवनिषु चरणैः पृथुस्तनीनामलघुनितम्बतया चिरं निषेदे ॥ २ ॥

'द्रुत०' व्याख्या । **तासां** देवाङ्गनानां **चरणैः** पादैः **अवनिषु** भूमितलेषु भूप्रदेशेषु **चिरं** मन्दं वाऽथवा चिरकालं **निषेदे** स्थितं कया ? **अलघुनितम्बतया** स्थूलकटिप्रदेशतया अभ्यासपाटवेन यद्यपि गन्तुं मनसा त्वरमाणानामपि तासां स्तनजघनभाराच्चरणा[:] नोत्तस्थुरिति भावः । किं० तासाम् ? **गगनपरिक्रमलाघवेन** गगनगमनपाटवेन **द्रुतपदं** त्वरितपदं यथा स्यात्तथा **अभियातुं** गन्तुम् **इच्छतीनां** वाञ्छतीनां पुनः किं० तासाम्? **पृथुस्तनीनाम्** उपचितपयोधराणाम् । अथ समासः । द्रुतं पदानि यत्र यस्यां क्रियायां तद्द्रु० । गगने परिक्रमः गगनपरिक्रमः तस्य लाघवं गगनपरिक्रमलाघवं तेन ग० । पृथवः स्तनाः यासां ताः पृथुस्तन्यः तासां पृ० । न लघवोऽलघवः अलघवश्च ते नितम्बाश्च अलघुनितम्बा तया अ० । इति वृत्तार्थः ॥ २ ॥

निहितसरसयावकैर्बभासे चरणतलैः कृतपद्धतिर्वधूनाम् ।
विरलावविततेव शक्रगोपैररुणितनीलतृणोलपा धरित्री ॥ ३ ॥

---

१. अत्रावयवदीपकतया प्रसिद्धस्य मण्डनस्य तद्दीपकत्वासंबन्धेऽपिसंबन्धाभिधानादवयवसौन्दर्यातिशयद्योत- नार्थत्वादतिशयोक्तिरलंकारः –म.

'निहि०' व्याख्या । **धरित्री** भूमिः **बभासे** शुशुभे किंलक्षणा धरित्री ? **वधूनां** देवाङ्गनानां **चरणतलैः** पादाधोभागैः पदतलैरित्यर्थः । **कृतपद्धतिः** विहितपदपङ्क्तिः कृतरेखा इत्यर्थः । किं० चरणतलैः ? **निहितसरसयावकैः** निक्षिप्तार्द्रालक्तकैः । पुनः किं० धरित्री ? **अरुणितनीलतृणोलपा** आरक्तीकृतनी- लतृणोलपा उलपशब्देन मृदुसूक्ष्मतृणविशेषः । वल्वजाख्याः तृणविशेषाश्च । पुनः किं० धरित्री ? उत्प्रेक्ष्यते **शक्रगोपैः** इन्द्रगोपाख्यकीटकैः **विरलं** स्तोकं क्वचिदविरलं तत्र निबिडं यथा स्यात् तथा [अ] **व[वि]ततेव** व्याप्तेव यथेन्द्रगोपाभिव्या(र्व्या)प्ता मही शोभते तद्वदिति । अथ समासः । सरसाश्च ते यावकाश्च सरसयावकाः निहिताः सरसयावकाः येषु तानि निहितसरसयावकानि तैः नि० । चरणानां तलानि चरणतलानि तैः च० । कृता पद्धतिर्यस्यां सा कृ० । तृणानि च उलपाश्च तृणोलपाः नीलाश्च ते तृणोलपाश्च नीलतृणोलपाः अरुणिता नीलतृणोलपा यस्याः सा अ० । इति वृत्तार्थः ॥ ३ ॥

ध्वनिरगविवरेषु नूपुराणां पृथुरशनागुणशिञ्जितानुयातः ।
प्रतिरववितततो वनानि चक्रे मुखरसमुत्सुकहंससारसानि ॥ ४ ॥

'ध्वनि०' व्याख्या । **नूपुराणां** लोकभाषया 'नेहकारदीनां' **ध्वनिः** शब्दः **वनानि** काननानि **मुखरसमुत्सुकहंससारसानि** वाचालसोत्कण्ठहंससारसानि **चक्रे** चकार किं० ध्वनिः ? **अगविवरेषु** पर्वतरन्ध्रेषु गुहास्वित्यर्थः । **प्रतिरववितततः** प्रतिशब्देन विस्तारितः प्रतिध्वनिभिः अधिकीकृत इत्यर्थः । पुनः किं० ध्वनिः ? **पृथुरस(श)नागुणशिञ्जितानुयातः** महत्कटिमेखलागुणकूजितेन मिलितः अत्र शिञ्जितादिषु हंससारसमुखरसमुत्सुकीकरणरूपेण वस्तुना तेषां नूप(पु)रादिसादृश्यात् हंससारसानां कूजितभ्रान्तिप्रतीतेः भ्रान्तिमदलंकारो व्यज्यते । अथ समासः । अगस्य विवराणि तेषु अ० । रस(श)नायाः गुणः र० रस(श)नागुणस्य शिञ्जितं रस(श)नागुणशिञ्जितं पृथु च तत् रस(श)नागुणशिञ्जितं च पृ० । पृथुरशनागुणशिञ्जितेन अनुयातः पृ० । प्रतिरवेन विततः प्र० । मुखराश्च समुत्सुकाश्च मु० मुखरसमुत्सुका हंससारसा येषां तानि मु० । इति वृत्तार्थः ॥ ४ ॥

अवचयपरिभोगवन्ति हिंस्रैः सहचरितान्यमृगाणि काननानि ।
अभिदधुरभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः ॥ ५ ॥

'अव०' व्याख्या । **काननानि** वनानि **वधूभ्यो** देवाङ्गनाभ्यः **मुनिम्** अर्जुनम् **अभितः** समन्तात् **अभिदधुः** कथयामासुः सूचयामासुरित्यर्थः । अवचयपरिभोगादिलिङ्गचतुष्टयेन आसन्नो मुनिरित्यन्वमीयत इति भावः । **च** पुनः **चेतः** चित्तं कथयामास किं० चेतः ? **समुदितसाध्वसविक्लवं** समुत्पन्नभयाकुलम् उत्पन्नभयेन विक्लवमित्यर्थः । किं० काननानि ? **अवचयपरिभोगवन्ति** पुष्पपलाशादिच्छेदनम् अवचयः परिभोगो वल्कलाद्युपभोगस्तद्वन्ति लघुक्तानीत्यर्थः (?) । पुनः किं० कान० ? **हिंस्रैः**पुष्टसत्त्वैर्व्याघ्रादिभिः **सह** सार्धं **चरितान्यमृगाणि** चरितहिंस्रेतरवनसत्त्वानि । अथ समासः । अवचयश्च परिभोगश्च अ० अवचयपरिभोगौ विद्येते येषां तानि अ० । अन्ये च मृगाश्च अन्यमृगाः सह चरिता अन्यमृगा येषु तानि स० । समुदितं

च तत्साध्वसं च स० समुदितसाध्वसेन विक्लवं स० । इति वृत्तार्थः ॥ ५ ॥

नृपतिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार तेजः ।
उपहितपरमप्रभावधाम्नां न हि जयिनां तपसामलङ्घ्यमस्ति ॥ ६ ॥

'नृप०' व्याख्या । **सा भूः** भूमिः **नृपतिमुनिपरिग्रहेण** अर्जुनाश्रितेन अर्जुनस्वीकारेण हेतुना इत्यर्थः । **सुरसचिवाप्सरसां** गन्धर्वदेवाङ्गनानां **तेजः** कान्तिं **जहार** हरति स्म तदाश्रमप्रवेशादेव निस्तेजसका अभूवन्नित्यर्थः । कथं मानुषेण अमानुषं तेजो निरस्तमित्याह- **हि** यतः कारणात् **जयिनां** विजयिनां जयनशीलानां 'महताम्' इति पाठे उत्कटानां **तपसाम् अलङ्घ्यम्** अतिक्रमणीयम् असाध्यं **नास्ति** न विद्यते सर्वं साध्यमेवेत्यर्थः । किं० तपसाम् ? **उपहितपरमप्रभावधाम्नाम्** आरोपितप्रकृष्टप्रभावतेजसाम् । अथ समासः । नृपतिरेव मुनिर्नृ० नृपतिमुनेः परिग्रहः नृ० तेन नृपतिमुनिपरिग्रहेण । सुराणां सचिवाः सु० सुरसचिवाश्च अप्सरसश्च सुरसचिवाप्सरसस्तासां सु० । प्रभावश्च धाम च प्रभावधाम्नी परमे च ते प्रभावधाम्नी च परमप्रभावधाम्नी उपहिते परमप्रभावधाम्नी यैस्तानि उ० तेषाम् उ० । इति वृत्तार्थः ॥६॥

सचकितमिव विस्मयाकुलाभिः शुचिसिकतास्वतिमानुषाणि ताभिः ।
क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथाङ्गलाञ्छनानि ॥ ७ ॥

'सच०' व्याख्या । **ताभिः** देवाङ्गनाभिः **क्षितिषु** भूमिषु **जिष्णोः**रर्जुनस्य **पदानि** चरणतलानि **सचकितं** सभीतमिव **ददृशिरे** दृष्टानि अद्भुतवस्तुदर्शनात् भयविस्मयौ भवतः इति भावः । किं० पदानि ? **उपहितकेतुरथाङ्गलाञ्छनानि** रेखास्वरूपविन्यस्तपरिपूर्णध्वजचक्रचिह्नानि पुनः किं० पदानि ? अत एव **अतिमानुषाणि** अतिक्रान्तमानुषाणि किं० क्षितिषु ? **शुचिसिकतासु** निर्मलपादरेखाभिव्यक्तियोग्यवालुकासु किं०ताभिः ? **विस्मयाकुलाभिः** आश्चर्यव्यग्राभिः । अथ समासः। विस्मयेन आकुला विस्मयाकुलास्ताभिर्वि० । शुचयः सिकता यासु ताः शुचिसिकतास्तासु शु० । मनुष्यसंबन्धीन्यतिक्रम्य वर्तन्ते तानि अ० । उपहितानि केतुरथाङ्गान्येव लाञ्छनानि येषु तानि उ० । इति वृत्तार्थः ॥ ७ ॥

अतिशयितवनान्तरद्युतीनां फलकुसुमावचयेऽपि तद्विधानाम् ।
ऋतुरिव तरुवीरुधां समृद्ध्या युवतिजनैर्जगृहे मुनिप्रभावः ॥ ८ ॥

'अति०' व्याख्या । **युवतिजनैः** देवाङ्गनाजनैः **मुनिप्रभावः** अर्जुनमहिमा **तरुवीरुधां** वृक्षवल्लीनां **समृद्ध्या** संपदा **ऋतुरिव जगृहे** ज्ञातः निश्चित इत्यर्थः । किं० तरुवीरुधाम् ? **अतिशयितवनान्तरद्युतीनाम्** अतिक्रान्तान्यकाननकान्तीनां पुनः किं० तरु० ? **फलकुसुमावचये** फलपुष्पग्रहणेऽपि **तद्विधानां** फलपुष्पयुक्तानाम् । अथ समासः । अतिशयिता वनान्तराणां द्युतिर्याभिस्ता अतिशयितवनान्तरद्युतयस्तासाम् अ० । फलानि च कुसुमानि च फलकुसुमानि फलकुसुमानाम् अवचयः फलकुसुमावचयस्तस्मिन् फ० । तथैवविधाः प्रकाराः यासां तास्तद्विधास्तासां तद्विधानाम् । तरवश्च वीरुधश्च तरुवीरुधस्तासां त० । युवतीनां जनाः युवतिजनास्तैर्यु० । मुनेः प्रभावः मु० । इति वृत्तार्थः ॥८॥

मृदितकिश(स)लयः सुराङ्गनानां ससलिलवल्कलभारभुग्नशाखः ।
बहुमतिमधिकां ययावशोकः परिजनतापि गुणाय सद्गुणानाम् ॥ ९ ॥

'मृदि०' व्याख्या । **अशोकः** कङ्केल्लिर्वृक्षविशेषः **सुराङ्गनानां** देवाङ्गनानां संबन्धिनीम् **अधिकाम्** अतितरां **बहुमतिं** संमतिं सज्जनसेवी धन्योऽयमिति वल्लभत्वं **ययौ** जगाम किं० अशोकः ? **मृदितकिश(स)लयः** मर्दितपल्लवः पुनः किं० अशोकः ? **ससलिलवल्कलभारभुग्नशाखः** सजलवल्कलभारेण नम्रीभूतविटपः ननु सेवकेषु का (कः) श्लाघ्यते तत्राह– **सद्गुणानां** सत्पुरुषाणां **परिजनतापि** सेवकत्वमपि **गुणाय** उत्कर्षाय भवतीति शेषः । एतेन तासां मुनिप्रभावदर्शनादेव तत्पारवश्यं गम्यते इति भावः । अथ समासः । मृदितानि किश(स)लयानि यस्य स मृ० । सुराणामङ्गनाः सुराङ्गनास्तासां सु० । सलिलेन सह वर्तमानानि ससलिलानि ससलिलानि च तानि वल्कलानि च स० ससलिलवल्कलानां भारः स० ससलिलवल्कलभारेण भुग्ना शाखा यस्य स स० । परिजनस्य भावः परिजनता । इति वृत्तार्थः ॥ ९ ॥

पञ्चभिः कुलकमाह –

यमनियमकृशीकृतस्थिराङ्गः परिददृशे विधृतायुधः स ताभिः ।
अनुपमशमदीप्तितागरीयान् कृतपदपङ्क्तिरथर्वणेव वेदः ॥ १० ॥

'यमनिय०' व्याख्या । **ताभिर्देवाङ्गनाभिः स** मुनिरर्जुनः **परिददृशे** दृष्टः स किं० ? **यमनियमकृशीकृतस्थिराङ्गः** यमनियमैर्दुर्बलीकृतदृढदेहः अष्टाङ्गयोगमध्ये यमनियमौ प्रथमौ विद्येते । यदुक्तं– 'यम १ नियमा २ सन ३ ध्यान ४ प्राणायाम ५ समाधिभिः ६ प्रत्याहारैः ७ धारणाभिः ८ यमो देशकालाद्यनपेक्षया शुद्धिहेतुरहिंसादिः नियमः तदपेक्षया शुद्धिहेतुस्तपःस्वाध्यायादिः ताभ्याम् अष्टाङ्गो योग उच्यते' (६२) पुनः किं० सः ? **विधृतायुधः** धृतशस्त्रः पुनः किं० सः ? **अनुपमशमदीप्तितागरीयान्** निरुपमोपशमतेजस्विताभ्यां गरिष्ठः पुनः किं० स ? **अथर्वणा** वशिष्ठमुनिना **कृतपदपङ्क्तिः वेद इव** विहितपदपरिच्छेद वेद इव ददृशे चतुर्थवेद इवेत्यर्थः । 'अथर्वणस्तु मन्त्रो वशिष्ठकृत' (६३) *इत्यागमः*। स एव ताभिर्दृष्ट इत्यर्थः। सोऽपि कीदृशः ? अनुपमशमदीप्तितागरीयान् शमः शान्तिकर्ममन्त्रः दीप्तिता अभिचारकर्ममन्त्रः ताभ्यां वरिष्ठः। अथ समासः। यमश्च नियमश्च यमनियमौ यमनियमाभ्यां कृशीकृतान्यपि स्थिराणि अङ्गानि यस्य स य० । विधृतम् आयुधं येन स वि० । शमश्च दीप्तिता च शमदीप्तिते न विद्यते उपमा ययोस्ते अनुपमे अनुपमे च ते शमदीप्तिते च अ० अनुपमशमदीप्तिताभ्यां गरीयान् अ०। कृता पदपङ्क्तिर्यस्य स कृ० । इति वृत्तार्थः ॥ १० ॥

सुरसरिति परं तपोऽधिगच्छन् विधृतपिशङ्गबृहज्जटाकलापः ।
हविरिव विततः शिखासमूहैः समभिलषन्नुपवेदि जातवेदाः ॥ ११ ॥

'सुर०' व्याख्या । ताभिः किंकुर्वन् सोऽर्जुनः दृष्टः इति संबन्धः । किं० सः ? **सुरसरिति**

गङ्गायां कूले **परमुत्तमं तपः** कृच्छ्रादिकर्म **अधिगच्छन्** उपार्जयन् उत्कृष्टं तपः कुर्वन् इत्यर्थः । फलाभिलाषेणेति शेषः । पुनः किं० सः ? **विधृतपिशङ्गबृहज्जटाकलापः** धृतपीतमहज्जटासमूहः पुनः किं० सः ? उत्प्रेक्ष्यते **उपवेदि** वेद्याः समीपे **शिखासमूहैः** ज्वालाजालैः **विततो** विस्तीर्णः **हविराज्यादिकं समभिलषन्** अत्तुं वाञ्छन् **जातवेदाः** वह्निरिव स्थितः अत्रापि उपमा वह्न्यर्जुनयोः गङ्गावेद्योः हविस्तपसश्च । अथ समासः । सुराणां सरित् सुरसरित् तस्यां सु० । जटानां कलापो जटाकलापः बृहच्चासौ जटाकलापश्च बृ० पिशङ्गश्चासौ बृहज्जटाकलापश्च पि० विधृतः पिशङ्गबृहज्जटाकलापो येन स वि० । शिखानां समूहाः शिखासमूहाः तैः शि० । वेद्याः समीपम् उपवेदि । जातं वेदो हिरण्यं यत्र स जा० । इति वृत्तार्थः ॥११॥

शशधर इव लोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः ।
शिखरनिचयमेकसानुसद्मा सकलमिवापि दधन्महीधरस्य ॥ १२ ॥

'शश०' व्याख्या । किं० सः ? **गगनविसारिभिः** आकाशगामिभिः **अंशुभिः** किरणैः शरीरकान्तिभिः **परीतः** व्याप्तः **शशधरः** चन्द्रमा **इव** स्थितः किं० अंशुभिः ? **लोचनाभिरामैः** नेत्रसुखदैः हृद्यैरित्यर्थः । पुनः किं० सः ? **एकसानुसद्मापि** पर्वतस्य एकप्रदेशे स्थितोऽपि **महीधरस्य** इन्द्रकीलपर्वतस्य **सकलं** समस्तं **शिखरनिचयं** शृङ्गसमूहं **दधत्** आच्छादयन्निव स्थितः । चन्द्रोऽपि पर्वतैकदेशस्थोऽपि शृङ्गसमूहम् आच्छादयति घटतीत्युत्प्रेक्षा । अथ समासः । लोचनानाम् अभिरामा लोचनाभिरामास्तैर्लो० । गगने विसरन्तीति गगनविसारिणस्तैर्गग० । शिखराणां निचयः शिखरनिचयः तं शि० । एकं सानुसद्म यस्य स ए०। इति वृत्तार्थः ॥ १२ ॥

सदृशमतनुमाकृतेः प्रयत्नं तदनुगुणामपरैः क्रियामलङ्घ्याम् ।
दधदलघु तपः क्रियानुरूपं विजयवतीं च तपःसमां समृद्धिम् ॥ १३ ॥

'सदृ०' व्याख्या । पुनः किं० सः ? **आकृतेः** स्वशरीराकारस्य **सदृशं** तुल्यं योग्यम् **अतनुं** महान्तं **प्रयत्नम्** उद्यमं **दधत्** बिभ्रत् पुनः किंकुर्वन् सः ? **क्रियानुरूपं** क्रियायोग्यम् **अलघु** महत् बहु **तपः** कृच्छ्राचरणं दधत् **च** पुनः **तपःसमां** तस्य तपसः सदृशां तपोनुरूपां **विजयवतीं** जययुक्तां **समृद्धिम्** ऐश्वर्यम् ऋद्धिं वा [1]दधत् । अथ समासः । तस्या अनुगुणाः तदनुगुणास्तां त० । क्रियायाः अनुरूपं क्रि० । विजयो विद्यते यस्यां सा विजयवती तां वि० । तपसः समा तपःसमा तां त० । इति वृत्तार्थः ॥ १३ ॥

चिरनियमकृशोऽपि शैलसारः शमनिरतोऽपि दुरासदः प्रकृत्या ।
ससचिव इव निर्जनेऽपि तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः ॥ १४ ॥

'चिर०' व्याख्या । पुनः किं० सः ? **चिरनियमकृशोऽपि** दीर्घकालतपसा क्षीणोऽपि **शैलसारः**

१. अत्र पूर्वं प्रत्युत्तरस्य विशेषणतया स्थापनात्प्रथमैकावल्यलङ्कारः -म. ।

पर्वतवत् दृढः पुनः किं० सः ? **शमनिरतोऽपि** इन्द्रियसंयमनतत्परोऽपि शान्तिनिरतोऽपीत्यर्थः । **प्रकृत्या** स्वभावेन **दुरासदः** अनभिभवनीयः परेषां दुराकलनीय इत्यर्थः । पुनः किं० सः ? **निर्जनेऽपि** विजनदेशे एकान्तेऽपि **तिष्ठन्** वर्तमानः **ससचिव इव** अमात्यैः सहित इव मुनिरपि परिवारसहित इवेत्यर्थः । पुनः किं० सः ? **मुनिरपि** ऋषिरपि **त्रिलोकभर्तुरिन्द्रस्य तुल्यरुचिः** समानकान्तिः । अत्र 'अपि' शब्दः सर्वत्र विरोधद्योतनार्थः । अथ समासः । चिरं नियमेन कृशः चिर० । शैलवत् सारं बलं यस्य स शै० । शमे निरतः श० । दुःखेनासाद्यते इति दुरासदः । सह सचिवेन वर्तमानः इति स० । तुल्य(या)रुचिर्यस्यासौ तु० । त्रयाणां लोकानां भर्ता त्रिलोकभर्ता तस्य त्रि० । इत्याद्यक्रियाकुलकम् ॥१४॥

तनुमवजितलोकसारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयन्त्यः ।
अवययुरमरस्त्रियोऽस्य यत्नं विजयफले विफलं तपोधिकारे ॥ १५ ॥

'तनु०' व्याख्या । **अमरस्त्रियो** देवाङ्गनाः **अस्या**र्जुनस्य **यत्नं** प्रयत्नं **विजयफले** विजयार्थे **तपोधिकारे** तपोनुष्ठाने **विफलं** निष्फलम् **अवययुः** मेनिरे त्रैलोक्याधिपत्यादिमहाफलसाधनसमर्थस्य तुच्छफलाभिलाषो मत्तमातङ्गमांसभोगोचितस्य कण्ठीरवस्य जीर्णतृणचर्वणोत्कण्ठेव न शोभामावहती-त्यज्ञासिषुरिति भावः । किंकुर्वत्योऽमरस्त्रियः ? तस्य **तनुं** शरीरं **विलोकयन्त्यः** पश्यन्त्यः किं० तनुम् ? **अवजितलोकसारधाम्नीं** तिरस्कृतजगत्सत्त्वतेजसम् । पुनः किं० तनुम् ? **त्रिभुवनगुप्तिसहां** त्रैलोक्यरक्षण-समर्थाम् । अथ समासः । सारं च धाम च सारधाम्नी लोकानां सारधाम्नी लोकसारधाम्नी अवजिते लोकसारधाम्नी यया सा अवजितलोकसारधाम्नी ताम् अ० । त्रयाणां भुवनानां समाहारः त्रिभुवनं त्रिभुवनस्य गुप्तिः त्रिभु० त्रिभुवनगुप्तौ सहाः त्रिभु० तां त्रि० । अमराणां **स्त्रियः** अ० । विजय एव फलं यस्य स विजयफलस्तस्मिन् वि० । तपसोऽधिकारः तपोधिकारस्तस्मिन् त० । इति वृत्तार्थः ॥१५॥

मुनिदनुतनयान् विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि ।
अलघुनि बहुमेनिरे च ताः स्वं कुलिशभृता विहितं पदे नियोगम् ॥ १६ ॥

'मुनि' व्याख्या । **ताः** देवाङ्गनाः **स्वं** स्वकीयं **नियोगम्** अधिकारम् आदेशं वा **बहु** यथा स्यात्तथा **मेनिरे** निकृष्टपदवृत्तीनाम् उत्कृष्टपदलाभं महद्बहुमानमूलमिति भावः । किं० नियोगम् ? **कुलिशभृता** इन्द्रेण **अलघुनि** महति **पदे** स्थाने **विहितं** कृतं दत्तं वा किंकृत्वा ? **मुनिदनुतनयान्** ऋषिदानवान् सद्यस्तत्क्षणमेव **विलोभ्य** वञ्चयित्वा विलोभनं कृत्वेत्यर्थः । किं० मुनि० ? **प्रतनुबलानि** अनुत्कृष्टसाराणि **तपांसि अधितिष्ठतः** कुर्वतः **चकारः** पादपूरणे । अथ समासः । मुनयश्च दनुतनयाश्च मुनिदनुतनयास्तान् मु० । प्रतनूनि बलानि येषां तानि प्र० । न लघु अलघु तस्मिन् अलघुनि । कुलिशं बिभर्तीति कुलिशभृत् तेन कु० । इति वृत्तार्थः ॥ १६ ॥

१. स च मुनेरतर्क्यमहिमत्वेन निरस्त इति विरोधालंकारः, 'विरोधाभासत्वं विरोधः' इति सूत्रात् -म. । २. अत्र विशिष्टतनुविलोकनस्य स्त्रीविशेषणवैफल्यज्ञानहेतुत्वोक्त्या पदार्थहेतुकं काव्यलिङ्गमलंकारः -म. ।

अथ कृतकविलोभनं विधित्सौ युवतिजने हरिसूनुदर्शनेन ।
प्रसभमवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः ॥ १७ ॥

'अथ०' व्याख्या । **अथा**नन्तरं **युवतिजने** देवाङ्गनाजने **हरिसूनुदर्शनेन** अर्जुनविलोकनेन **प्रसभं** बलात्कारेण **चित्तजन्मा** कन्दर्पः **अवततार** अवतीर्णः स्वयं मुनिवञ्चने प्रवृत्ताः स्त्रियस्तेन वञ्चिता इत्यर्थः । किं० युवतिजने ? **कृतकविलोभनं विधित्सौ** कृत्रिमरञ्जनं कर्तृकामे किंकारणं तं दृष्ट्वा कामः तासु उत्पन्नस्तत्राह-**हि** यस्मात् कारणात् **मधुरा** सुन्दरा **यौवनश्रीः** तारुण्यशोभा **मनो** मानसं **हरति** बलात् युवतीनामिति शेषः । अथ समासः । कृतकं च तद्विलोभनं च कृ० विधातुम् इच्छतीति विधित्सति विधित्सतीति विधित्सुः तस्मिन् वि० । युवतीनां जनः युवतिजनस्तस्मिन् यु० । हरेः सूनुर्हरिसूनुः हरिसूनोः दर्शनं हरिसूनुदर्शनं तेन ह० । चित्ते जन्म यस्य स चि० । यौवनस्य श्रीः यौ० । इति वृत्तार्थः ॥१७॥

सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदङ्गैः ।
युगपदृतुगणस्य संनिधानं वियति वने च यथायथं वितेने ॥ १८ ॥

'सपदि०' व्याख्या । **हरिसखैः** गान्धर्वैः **वियति** आकाशे **च** परं **वने** कानने **युगपदृतुगणस्य संनिधानं** समकालं वसन्तादि षड् ऋतुसमूहस्य समीपं **यथायथं वितेने** विस्तारितम् उद्दीपनसामग्री संपादितेत्यर्थः । किं० हरिसखैः ? **वधूनिदेशात्** अप्सरोवचनात् **सपदि** शीघ्रमेव **ध्वनितमनोरमवल्लकीमृदङ्गैः** वादितमनोहरवीणामर्दलैः । अथ समासः । हरेः सखायः हरिसखायस्तैर्ह० । वधूनां निदेशो वधूनिदेशस्तस्मात् व० । वल्लक्यश्च मृदङ्गाश्च वल्लकीमृदङ्गाः मनोरमाश्च ते वल्लकीमृदङ्गाश्च म० ध्वनिता मनोरमवल्लकीमृदङ्गा यैस्ते ध्वनितमनोरमवल्लकीमृदङ्गास्तैः ध्व० । ऋतूनां गणः ऋतुगणः तस्य ऋ०। इति वृत्तार्थः ॥ १८ ॥

तत्र सर्वेषाम् ऋतूनां युगपद्वर्णयितुमशक्यत्वात् संनिधानं वर्णयितुमाह -

सजलजलधरं नभो विरेजे विहृतमियाय रुचिस्तडिल्लतानाम् ।
व्यवहितरतिविग्रहैर्वितेने जलगुरुभिः स्तनितैर्दिगन्तरेषु ॥ १९ ॥

'सजल०' व्याख्या । **नभो** गगनं **विरेजे** शुशुभे किं० नभः ? **सजलजलधरं** जलव्याप्तमेघनिचयं तथा **तडिल्लतानां** विद्युल्लतानां **रुचिः** दीप्तिः कर्त्री **विहृतं** विलसितम् **इयाय** प्राप तथा **स्तनितैः** मेघगर्जितैः **दिगन्तरेषु** आशामध्येषु **वितेने** वितस्तरे प्रसृतमित्यर्थः । किं० स्तनितैः ? **व्यवहितरतिविग्रहैः** त्यक्तरतिकलहैः निराकृतप्रणयकलहैरित्यर्थः । पुनः किं० स्तनितैः ? **जलगुरुभिः** तोयवद्भिः जलभाराद्गम्भीरैरित्यर्थः । अथ समासः । सह जलेन वर्तन्ते ये ते सजलाः सजला जलधरा यस्मिन् तत् स० रतेर्विग्रहाः रतिविग्रहाः व्यवहिता रतिविग्रहा यैस्तानि व्यवहितरतिविग्रहाणि तैः व्य० । जलैर्गुरूणि जलगुरूणि तैर्ज० । दिशामन्तराणि दिगन्तराणि तेषु दि० । इति वृत्तार्थः ॥१९॥

परिसुरपतिसूनुधाम सद्यः समुपदधन्मुकुलानि मालतीनाम् ।
विरलमपजहार बद्धबिन्दुः सरजसतामवनेरपां निपातः ॥२०॥

'परि०' व्याख्या । **परिसुरपतिसूनुधाम** सुरपतिसूनुधाम्नि अर्जुनाश्रमं प्रति इत्यर्थः । **अपांनिपातः** जलवृष्टिः किं० अपां० ? **सद्यः** शीघ्रं **मालतीनां** जातीलतानां 'सुमना मालती जातिः' *इत्यमरः* । **मुकुलानि समुपदधत्** जनयन् पुनः किं० अपां० ? **विरलं** यथा स्यात्तथा **बद्धबिन्दुः** क्षरद्बिन्दुकः **अवनेः** सम्बन्धिनीं **सरजसतां** सरजस्कत्वम् **अपजहार** धूलिं शमयामास इत्यर्थः । अथ समासः । सुरपतेः सूनुः सुरपतिसूनुः तस्य धाम सु० सुरपतिसूनुधाम्नीति प० । बद्धं बिन्दुः यस्मिन् स ब० । इति वृत्तार्थः ॥२०॥

प्रतिदिशमभिगच्छताभिमृष्टः ककुभविकाससुगन्धिनानिलेन ।
नव इव विबभौ सचित्तजन्मा गतधृतिराकुलितश्च जीवलोकः ॥ २१ ॥

'प्रति०' व्याख्या । **जीवलोकः** मनुष्यलोकः **नव इव** नूतन इव अवस्थान्तरं प्राप्त्वा अपूर्व इवेत्यर्थः । **विबभौ** शुशुभे किं० जीव० ? **ककुभविकाससुगन्धिना** अर्जुनवृक्षकुसुमप्रबोधेन मनोज्ञगन्धिना **अनिलेन** वायुना **अभिमृष्टः** संस्पृष्टः आलिङ्गित इत्यर्थः । किं० अनि० ? **प्रतिदिशं** दिशं दिशं प्रति **अभिगच्छता** संवाता पुनः किं० जीव० ? अत एव **सचित्तजन्मा** कामाक्रान्तः मनोभुवा सह वर्तमान इत्यर्थः । पुनः किं० जीव० ? अत एव **गतधृतिः** विगतधैर्यः पुनः किं० जीव० ? **आकुलितः** क्षोभितः रतिं प्रतीति भावः । अथ समासः । ककुभानां विकासः ककुभविकासः तेन सुगन्धिः ककुभविकाससुगन्धिः तेन क० । सह चित्तजन्मना वर्तते यः स स० । गता धृतिर्यस्मात्स ग० । इति वृत्तार्थः ॥२२॥

व्यथितमपि भृशं मनो हरन्ती परिणतजम्बुफलोपभोगहृष्टा ।
परभृतयुवतिः स्वनं वितेने नवनवयोजितकण्ठरागरम्यम् ॥ २२ ॥

'व्यथि०' व्याख्या । **परभृतयुवतिः** कोकिलवनिता **स्वनं** शब्दं **वितेने** चकार वर्षास्वपि मधुराः कोकिलालापाः भवन्तीति प्रसिद्धिः । किं० स्वनम् ? **नवनवयोजितकण्ठरागरम्यम्** अभिनवनिष्पादित-कण्ठमाधुर्येण मनोरमं किंकुर्वती परभृत० ? **भृशम्** अत्यर्थं **व्यथितं** दुःखितमपि **मनश्चित्तं** **हरन्ती** आवर्जयन्ती किमुत सुखीति भावः । मधुरकोकिलालापश्रवणेन चेतो हृष्यतीति तात्पर्यार्थः । कुतः स्वनस्य रम्यता जाने(ते)ति हेतुगर्भविशेषणमाह- किं० परभृ० ? **परिणतजम्बुफलोपभोगहृष्टा** परिपक्वजम्बु-फलस्वादेन हर्षितचित्ता । अथ समासः । परिणतं च तज्जम्बुफलं च परिणतजम्बुफलं परिणतजम्बुफलस्य उपभोगः परिणतजम्बुफलोपभोगः परिणतजम्बुफलोपभोगेन हृष्टा प० । परभृतस्य युवतिः प० । नवनवं यथा स्यात्तथा योजितः नवनवयोजितः नवनवयोजितश्चासौ कण्ठरागश्च न० तेन रम्यं न० । इति वृत्तार्थः ॥२२॥

अभिभवति मनः कदम्बवायौ मदमधुरे च शिखण्डिनां निनादे ।
जन इव न धृतेश्चचाल जिष्णुर्न हि महतां सुकरः समाधिभङ्गः ॥ २३ ॥

'अभि०' व्याख्या । **जिष्णुरर्जुनः** **जन इव** पृथग् जन इव **धृतेर्धैर्यात्** **न चचाल** वर्षा अपि तदुद्दीपनाय न शेकुरित्यर्थः । धैर्यरहितम् उद्दीपनाय ये भावाः यथा चालयन्ति तथा तं नेति भावः ।

कस्मिन् सति ? **कदम्बवायौ** कदम्बवृक्षसंबन्धिवाते **मदमधुरे** मदसुन्दरे **शिखण्डिनां** मयूराणां **निनादे** शब्दे **च मनः** चित्तम् **अभिभवति** पराभवति सति किंकारणमेवंविधे काले धृतेर्न चलित इत्याह- **हि** यस्मात् कारणात् **महतां** सत्त्वाशययुक्तानां महानुभावानां नराणां **समाधिभङ्गः** तपोभङ्गः **सुकरो** न वर्तते सुखेन कर्तुं केनापि न शक्यते इत्यर्थः । अथ समासः । जयनशीलो जिष्णुः । कदम्बस्य वायुः कदम्बवायुः तस्मिन् क० । मदेन मधुरो मदमधुरस्तस्मिन् म० । समाधेर्भङ्गः समाधिभङ्गः । इति वृत्तार्थः ॥२३॥

अथ शरदृतुवर्णनम् -

धृतबिसवलयावलिर्वहन्ती कुमुदवनैकदुकूलमात्तबाणा ।
शरदमलतले सरोजपाणौ घनसमयेन वधूरिवाललम्बे ॥ २४ ॥

'धृत०' व्याख्या । **घनसमयेन** वर्षाकालेन वरेणेति शेषः । **अमलतले** निर्मलतले सरोजपाणौ कमलरूपहस्ते **वधूरिव** जायेव **शरत्** शरदृतुः **आललम्बे** धृता शरद्वधूः घनसमयो वरवध्वोः समागमवत् ऋतुसन्धिरशोभत इत्यर्थः । यथा केनापि वरेण करतले आलम्ब्यते तद्वदिति । किं० शरत् ? **धृतबिसवलयावलिः** गृहीतकमलनालरूपकङ्कणश्रेणिः किंकुर्वती शरत् ? **कुमुदवनैकदुकूलं** कैरवकाननरूपवत् दुकूलं **वहन्ती** धारयन्ती पुनः किं० शरत् ? **आत्तबाणा** गृहीतबाणवृक्षकुसुमा वधूरपि धृता बिससदृशानां वलयानामावलिः यया सा वधूरपि कुमुदोज्ज्वलम् एकं दुकूलं बिभ्राणा । वरणसमये हि श्वेतदुकूलधारणं वध्वा युज्यते इति रूढिः । वधूरपि आत्तबाणा गृहीतकटाक्षविक्षेपा वा अथवा आत्तबाणा गृहीत[1]शरा 'गृह्णीयात् क्षत्रिया शरम्' इति (६४) *याज्ञवल्क्यस्मरणात्* । अथ समासः । बिसान्येव वलयानि बिसवलयानि बिसवलयानामावलिः बिसवलयावलिः धृता बिसवलयावलिः यया सा धृ० । कुमुदानां वनं कुमुदवनं कुमुदवनमेव एकदुकूलं कु० । आत्तं बाणं यया सा आ० । अमलं तलं यस्य स अमलतलस्तस्मिन् अ० । सरोजमेव पाणिः सरोजपाणिः तस्मिन् स० । घनस्य समयः घनसमयः तेन घ० । इति वृत्तार्थः ॥२४॥

अथ ऋतुसन्धिं वर्णयति -

समदशिखिरुतानि हंसनादैः कुमुदवनानि कदम्बपुष्पवृष्ट्या ।
श्रियमतिशयिनीं समेत्य जग्मुर्गुणमहतां महते गुणाय योगः ॥ २५ ॥

'सम०' व्याख्या । **समदशिखिरुतानि** मत्तमयूरशब्दितानि कूजितानि कर्तृणि **हंसनादैः** कलहंसशब्दैः सह **समेत्य** मिलित्वा **अतिशयिनीम्** अधिकां विशेषवतीं **श्रियं** शोभां **जग्मुः** प्रापुः तथा **कुमुदवनानि** कैरवकाननानि **कदम्बपुष्पवृष्ट्या** कदम्बकुसुमवर्षेण सह समेत्य परां श्रियं जग्मुः प्रापुः एकस्यापगमः एकस्य समागमः तथाहि यतः कारणात् **गुणमहतां** गुणाधिकानां पुरुषाणां **योगः** परस्परसमागमः **महते गुणाय** उत्कर्षाय [2]भवति । अथ समासः । सह मदेन वर्तन्ते ये ते समदाः

१. अत्र बाणवृक्षकुसुमशरयोः अभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिरुपमाङ्गमित्यनयोः संकरः -म. । २. अत्र त्रिपाद्यां समालंकारः- 'सा समालंकृतिर्योग्यवस्तुनोरुभयोरपि' - इति लक्षणात् । सोऽपि चतुर्थेनार्थान्तरन्यासेन स्वसमर्थकेनाङ्गाङ्गिभावेन संकीर्यते -म.

समदाश्च ते शिखिनश्च समदशिखिनः समदशिखिनां रुतानि स० । हंसानां नादा हंसनादास्तैः हं० । कुमुदानां वनानि कु० । कदम्बस्य पुष्पाणि क० कदम्बपुष्पाणां वृष्टिः कदम्बपुष्पवृष्टिस्तया क० । अतिशयो विद्यते यस्याः सा अतिशयिनी ताम् अ० । गुणैर्महान्तो गुणमहान्तस्तेषां गु० । इति वृत्तार्थः ॥ २५ ॥

सरजसमपहाय केतकीनां प्रसवमुपान्तिकनीपरेणुकीर्णम् ।
प्रियमधुरसनानि षट्पदाली मलिनयति स्म विनीलबन्धनानि ॥ २६ ॥

'सर०' व्याख्या । **षट्पदाली** भ्रमरालिः **असनानि** बीजकवृक्षपुष्पाणि **मलिनयति स्म** तत्रोपविष्टेत्यर्थः । किंकृत्वा ? **सरजसं** सपरागं **केतकीनां प्रसवं** पुष्पम् **अपहाय** त्यक्त्वा परित्यज्य किं० प्रसवम् ? **उपान्तिकनीपरेणुकीर्णं** समीपकदम्बवृक्षपुष्परेणुना व्याप्तं स्वत एव सरजसं ततोऽपि नीपरेणुना व्याप्तम् अतो रजोबाहुल्यं केतकीकुसुमस्य त्यागहेतुः सह रजसा सरजसं न त्वरजसमिति भावः । किं० षट्पदाली ? **प्रियमधुरि**ष्टमकरन्दा किं० असनानि ? **विनीलबन्धनानि** श्यामवृन्तानि मलिनवृन्तानीत्यर्थः । यथा वृन्तादन्यत्रापि मालिन्यं स्यात्तथा मधुलोभाच्छादयामासेत्यर्थः । नहि मध्वासक्तो मधुलाभेऽसति विभूतिष्वासज्जतीति भावः । अथ समासः । सह रजसा वर्तमानं सरजसम् । उपान्तिके नीपानि उपान्तिकनीपानि उपान्तिकनीपानां रेणवः उपान्तिकनीपरेणवः ताभिः कीर्णम् उ० । प्रियं मधु यस्याः सा प्रि० । षट्[प]दानाम् आली ष० । विनीलानि बन्धनानि येषां तानि वि० । इति वृत्तार्थः ॥२६॥

मुकुलितमतिशय्य बन्धुजीवं धृतजलबिन्दुषु शाद्वलस्थलीषु ।
अविरलवपुषः सुरेन्द्रगोपा विकचपलाशचयश्रियं समीयुः ॥ २७ ॥

'मुकु०' व्याख्या । **सुरेन्द्रगोपाः** इन्द्रगोपाः **शाद्वलस्थलीषु** नीलतृणभूमिषु **विकचपलाशचयश्रियं** विकसितकिंशुकराशिशोभां तत्सदृशश्रियमित्यर्थः । **समीयुः** प्रापुः 'विकचपलाशवनश्रियम्' इति पाठे विकसितपलाशवनश्रियं शोभां समीयुः । किं० सुरेन्द्रगोपाः ? **अविरलवपुषः** स्थूलदेहाः किं० शाद्व० ? **धृतजलबिन्दुषु** गृहीतोदककणासु किंकृत्वा ? **मुकुलितं** मुकुलीभूतमध्यं **बन्धुजीवं** बन्धुकवृक्षकुसुमम् **अतिशय्य** अतिक्रम्य । अथ समासः । बन्धुजीवस्य कुसुमं बन्धुजीवम् । धृता जलबिन्दवो यासु ताः धृतजलबिन्दवस्तासु धृ० । शाद्वलानां स्थल्यः शाद्वलस्थल्यः तासु शा० । अविरलानि वपूंषि येषां ते अ० । पलाशानां चयं पलाशचयं विकचं च तत् पलाशचयं च वि० विकचपलाशचयस्य श्रीः विकचपलाशचयश्रीः तां वि० । इति वृत्तार्थः ॥ २७ ॥

अथ हेमन्तमाह -

अविरलफलिनीवनप्रसूनः कुसुमितकुन्दसुगन्धिगन्धवाहः ।
गुणमसमयजं चिराय लेभे विरलतुषारकणस्तुषारकालः ॥ २८ ॥

अवि० व्याख्या । **तुषारकालः** हेमन्तः **चिराय** दीर्घकालेन **असमयजम्** अकालसंभवं **गुणम्**

१. अत एव निदर्शनालंकारः -म.

उत्कर्षं **लेभे** प्राप किं० तुषा० ? **विरलतुषारकणः** स्वल्पहिमलवः पुनः किं० तुषार० ? **अविरलफलिनीवनप्रसूनः** निबिडप्रियङ्गुलताकुसुमः पुनः किं० तुषा० ? **कुसुमितकुन्दसुगन्धिगन्धवाहः** संजातकुसुमकुन्दः शोभनगन्धयुक्तवायुः शिशिरसंबन्धिनामपि कुन्दानां हेमन्ते प्रादुर्भावसंभवात् अविरोधः । अथ समासः । अविरलानि फलिनीवनानां प्रसूनानि यस्मिन् स अ० । कुसुमितकुन्दैः सुगन्धिगन्धवाहो यत्र कु० । समयात् जातः समयजः न समयजोऽसमयजस्तम् अ० । विरलाः तुषाराणां कणाः यत्रासौ वि० । तुषारस्य कालः तु० । इति वृत्तार्थः ॥ २८ ॥

निचयिनि लवलीलताविकासे विदधति लोध्रसमीरणे च हर्षम् ।
विकृतिमुपययौ न पाण्डुसूनुश्चलति नयान्न जिगीषतां हि चेतः ॥ २९ ॥

'निच०' व्याख्या । **पाण्डुसूनुः** अर्जुनः **विकृतिं** विकारं विक्रियां **न उपययौ** न प्राप कस्मिन् सति ? **लवलीलताविकाशे(से)** लवलीलतापुष्पविजृम्भणे **निचयिनि** उपचयवति बहुले सतीत्यर्थः । **च** पुनः कस्मिन् सति ? **लोध्रसमीरणे** लोध्रवृक्षवायौ **हर्षमा**नन्दं **विदधति** कुर्वति सति कुतः **हि** यतः कारणात् **जिगीषतां** जेतुमिच्छतां पुरुषाणां **चेतो** मनः **नयात्** नीतेः **न चलति** । अथ समासः । निचयोऽस्यास्तीति निचयी तस्मिन् नि० । लवलीलतायाः विकाशः(सः)लवलीलताविकाशः(सः) तस्मिन् ल० । लोध्रस्य समीरणः लोध्रसमीरणः तस्मिन् लो० । पाण्डोः सूनुः पाण्डुसूनुः । जेतुमिच्छन्ति जिगीषन्ति जिगीषन्तीति जिगीषन्तस्तेषां जिगीषताम् । इति वृत्तार्थः ॥ २९ ॥

अथ शिशिरं वर्णयितुमाह -

कतिपयसहकारपुष्परम्यस्तनुतुहिनोऽल्पविनिद्रसिन्दुवारः ।
सुरभिमुखहिमागमान्तशंसी समुपययौ शिशिरः स्मरैकबन्धुः ॥ ३० ॥

'कति०' व्याख्या । **शिशिरः** शिशिराख्या ऋतुः **समुपययौ** आजगाम किं० शिशिरः ? **कतिपयसहकारपुष्परम्यः** कतिचिदाम्रकुसुमैः मनोहरः न तु वसन्तवत्समग्रैः नापि हेमन्तवत्तद्विरहितैरिति भावः । अनेन शिशिरारम्भोक्तिः । पुनः किं० शि० ? **तनुतुहिनः** स्तोकहिमः न तु हेमन्तवद्बहुतुहिनो नापि वसन्तवद्विरलतुहिन इति भावः । इत्यनेन हेमन्तापगमः उक्तः । पुनः किं० शि० ? **अल्पविनिद्रसिन्दुवारः** स्तोकविकसितनिर्गुण्डीकुसुमः । 'सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणि केत्यपि' *इत्यमरः* । अत्रापि सहकारवदभिप्रायो द्रष्टव्यः । इत्यनेन वसन्तारम्भोक्तिः । पुनः किं० शि० ? **सुरभिमुखहिमागमान्तशंसी** वसन्तागमनप्रारम्भ-हेमन्ताऽवसानसूचकः । उभयोर्मध्यवर्ती इत्यर्थः । पुनः किं० शि० ? **स्मरैकबन्धुः** कन्दर्पस्यैकमित्रम् । अथ समासः । सहकारस्य पुष्पाणि सहकारपुष्पाणि कतिपयानि च तानि सहकारपुष्पाणि च कतिपयसहकारपुष्पाणि कतिपयसहकारपुष्पैः रम्यः क० । तनवस्तुहिना यस्मिन् स त० । अल्पानि विनिद्रसिन्दुवाराणि यस्मिन् स अ० । सुरभेर्मुखं सुरभिमुखं

१. इति प्रारम्भोक्तिः - म. ।

हिमस्य आगमः हिमागमः हिमागमस्य अन्तः हिमागमान्तः सुरभिमुखं च हिमागमान्तश्च सुरभिमुखहिमागमान्तौ सुरभिमुखहिमागमान्तौ शंसतीत्येवंशीलः सु० । एकश्चासौ बन्धुश्च एकबन्धुः स्मरस्य एकबन्धुः स्म० । इति वृत्तार्थः ॥ ३० ॥

अथ वसन्तारम्भमाह -

कुसुमनगवनान्युपैतुकामा किसलयिनीमवलम्ब्य चूतयष्टिम् ।
क्वणदलिकुलनूपुरं[1] निरासे नलिनीवनेषु पदं वसन्तलक्ष्मीः ॥ ३१ ॥

'कुसु०' व्याख्या । **वसन्तलक्ष्मीः** वसन्तर्तुशोभा **नलिनीवनेषु** कमलवनेषु **पदं** स्थानं **निरासे** निश्चिक्षेप तेषु प्रथमं प्रादुरासीदित्यर्थः । किं० वसन्त० ? **कुसुमनगवनानि** पुष्पितवृक्षकाननानि **उपैतुकामा** आगन्तुकामा आरोढुकामा इत्यर्थः । किंकृत्वा ? **किशलयिनीं** पल्लविनीं **चूतयष्टिं** सहकारशाखाम् **अवलम्ब्य** अवष्टभ्य अन्यथा आरोहाशक्यत्वादिति भावः । किं० पदम् ? **क्वणदलिकुलनूपुरं** शब्दायमानभ्रमर-वृन्दरूपमञ्जीरं 'नेपुर' इति लोके । कामिनीपक्षेऽपि इदं व्याख्येयं यथा काचित् नायिका कंचित् उपैतुकामा लीलायष्टिम् अवलम्ब्य भ्रमरसमूहसदृशतुलाकोटिकं पदं निक्षिपति तद्वद्वि(दि)ति[१] । अथ समासः । कुसुमानां नगाः कुसुमनगाः तेषां वनानि कु० । उपैतुं कामो यस्याः सा उ० । किशलया विद्यन्ते यस्याः सा किशलयिनी तां कि० । चूतस्य यष्टिः चूतयष्टिः तां चू० । अलीनां कुलम् अलिकुलं क्वणच्च तत् अलिकुलं च क्वणदलिकुलं क्वणदलिकुलमेव नूप(पु)रं यत्र तत् क्व० । नलिनीनां वनानि नलिनीवनानि तेषु न० । वसन्तस्य लक्ष्मीः व० । इति वृत्तार्थः ॥ ३१ ॥

विकसितकुसुमाधरं हसन्तीं कुरबकराजिवधूं विलोकयन्तम् ।
ददृशुरिव सुराङ्गना निषण्णं सशरमनङ्गमशोकपल्लवेषु ॥ ३२ ॥

'विक०' व्याख्या । **सुराङ्गना** देवाङ्गना **अशोकपल्लवे[षु]** अशोकवृक्षकिसलयेषु **निषण्णम्** उपविष्टं रिरंसया पल्लवसंस्तरे स्थितमिति यावत् । **सशरं** सबाणं नित्यविजयित्वादिति भावः । **अनङ्गं ददृशुः** साक्षाददद्राक्षुरिव अशोकाद्यवलोकनान्मदनसाक्षात्कारादिव महान्मनःक्षोभस्तासाम् आसीदित्यर्थः । किंकुर्वन्तम् अनङ्गम् ? **कुरबकराजिवधूं** कुरबकवृक्षश्रेणिरूपां युवतिं **विलोकयन्तं** पश्यन्तं कामुकतयेति भावः । किं० कुरू(र)ब० ? **विकसितकुसुमाधरं** विकश्वरपुष्पौष्ठं यथा स्यात्तथा **हसन्तीं** स्मयमानां 'वहन्तीम्' इति पाठे विकसितं कुसुममेव अधरः तं वहन्तीम्[२] । अथ समासः । विकसितकुसुममेवाधरो यत्र यस्मिन् कर्मणि तत् वि० । कुरबकानां राजिः कुरबकराजिः कुरबकराजिरेव वधूः कुरबकराजिवधूस्तां कु० । सुराणामङ्गनाः सु० । शरेण सह वर्तमानः सशरस्तं सशरम् । अशोकश्च पल्लवाः अशोकपल्लवास्तेषु

1. नूपुरा -म. । इदं च म. मध्ये पाठान्तररूपेण निर्दिष्टम् ।

१. अत्र प्रक्रान्तवसन्तलक्ष्मीविशेषणसामर्थ्यादप्रस्तुतनायिकाव्यवहारसमारोपात् समासोक्तिरलंकारः -म. । २. अत्र रूपकोत्प्रेक्षयोः संसृष्टिः -म. ।

अ० । इति वृत्तार्थः ॥ ३२ ॥

श्वसनचलितपल्लवाधरोष्ठी[1] नवनिहितेर्ष्यमिवावधूनयन्ती ।
मधुसुरभिणि षट्पदेन पुष्पे मुख इव शाललतावधूश्चुचुम्बे ॥ ३३ ॥

'श्वस०' व्याख्या । **षट्पदेन** भ्रमरेण **मुख इव** वदन इव **पुष्पे शाललतावधूः** सर्जवृक्षमञ्जरी-रूपयुवतिः **चुचुम्बे** चुम्बिता 'शालः सर्जतरुः स्मृतः' इति *शाश्वतः* । किं० पुष्पे मुखे च ? **मधुसुरभिणि** मकरन्देन मद्येन च सुगन्धिनि 'मधु मद्ये पुष्परसे' इति *नानार्थे* । यथा केनचित् कान्तेन काचिन्नायिका मुखे चुम्ब्यते इत्युपमा । किं० शाललताव० ? **श्वसनचलितपल्लवाधरोष्ठी** वायुना निःश्वासेन च चलितकिशलयाधरतनोष्ठी । किंकुर्वती शाल० ? उत्प्रेक्ष्यते **नवविहितेर्ष्यं** नूतनकृतकोपमिव यथा स्यात्तथा **अवधूनयन्ती** कम्पयन्ती[१] । अथ समासः । श्वसनेन चलितः पल्लव एव अधरोष्ठो यस्याः सा श्व० । नवा यथा स्यात्तथा विहिता ईर्ष्या यत्र यस्मिन् कर्मणि तत् न० । मधुना सुरभि मधुसुरभि तस्मिन् म० । शाललता एव वधूः शा० । इति वृत्तार्थः ॥ ३३ ॥

मुहुरनुपतता विधूयमानं विरचितसंहति दक्षिणानिलेन ।
अलिकुलमलकाकृतिं प्रपेदे नलिनमुखान्तविसर्पि पङ्कजिन्याः ॥ ३४ ॥

'मुहु०' व्याख्या । **अलिकुलं** भ्रमरसमूहं **पङ्कजिन्याः** कमलिन्याः **अलकाकृतिं** केशाकारम् अलकसादृश्यं **प्रपेदे** प्रपन्नं किं० अलिकुलम् ? **नलिनमुखान्तविसर्पि** कमलरूपवदनसमीपे प्रसरणशीलं पुनः किं० अलि० ? **मुहुर्वा**रंवारम् **अनुपतता** अनुधावता आगच्छता **दक्षिणानिलेन** दक्षिणसमीरणेन मलयमारुतेन **विधूयमानं** कम्पमानं चाल्यमानमित्यर्थः । पुनः किं० अलि० ? **विरचितसंहति** रचितपङ्क्ति । अथ समासः । विरचिता संहतिर्येन तत् वि० । दक्षिणस्यानिलः दक्षिणानिलस्तेन द० । अलीनां कुलम् अ० । अलकानामाकृतिः अलकाकृतिस्ताम० । नलिनमेव मुखं नलिनमुखं तस्य अन्तो नलिनमुखान्तः तस्मिन् विसर्पतीत्येवंशीलं न० । इति वृत्तार्थः ॥ ३४ ॥

<u>प्रभवति न तदा परो विजेतुं भवति जितेन्द्रियता यदात्मरक्षा</u> ।
अवजितभुवनस्तथाहि लेभे सिततुरगे विजयं न पुष्पमासः ॥ ३५ ॥

'प्रभु०' व्याख्या । **यदा जितेन्द्रियता** वशीकृतेन्द्रियता **आत्मरक्षा** आत्मगुप्तिः **भवति तदा** तस्मिन् काले **परोऽन्यः** शत्रुर्वा **विजेतुं** जयनाय **न प्रभवति** न समर्थो भवति तथाहि दृष्टान्तेन दर्शयति- **अवजितभुवनः** वशीकृतविश्वः **पुष्पमासो** वसन्तः **सिततुरगे** अर्जुनविषये **विजयं** जयं **न लेभे** न प्राप

---

1. धरोष्ठे -म. ।

---

१. अत्र 'श्वसन'शब्दार्थ 'मधु'शब्दार्थयोश्च स्वस्वभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिः । सा चोपमाङ्गमित्यनयोः संकरः -म. ।

अतो जितेन्द्रियता दुर्जया इत्यर्थः । अथ समासः । जितानि इन्द्रियाणि येन असौ जितेन्द्रियः जितेन्द्रियस्य भावो जि० । आत्मानं रक्षतीति आत्मरक्षा । अवजितानि भुवनानि येन सोऽव० । सितास्तुरगा यस्य असौ सिततुरगस्तस्मिन् सि० । इति वृत्तार्थः ॥ ३५ ॥

वसन्तवर्णनान्तरं ग्रीष्मसमयवर्णनमाह -

कथमिव तव संमतिर्भवित्री सममृतुभिर्मुनिनावधीरितस्य ।
इति विरचितमल्लिकाविकाशः स्मयत इव स्म मधुं निदाघकालः ॥ ३६ ॥

'कथ०' व्याख्या । **निदाघकालः** ग्रीष्मसमयः **मधुं** वसन्तम् अमुना प्रकारेण **स्मयते स्म इव** जहास इव 'चैत्रे दैत्ये वसन्ते च जीवे शो(को)के मधुः स्मृतः' इति *विश्वः* । किं० निदाघकालः ? **विरचितमल्लिकाविकाशः** कृतमल्लिकाप्रबोधः[1] **इती**ति किंचन हे वसन्त ! **ऋतुभिः समं** वर्षादिऋतुभिः सार्धं **मुनिना** अर्जुनेन **अवधीरितस्य** अवगणितस्य तिरस्कृतस्य **तव संमतिः** लोके सन्मानता **कथमिव** कथंचित् **भवित्री** भविष्यति अपितु न भविष्यतीत्यर्थः[2] । अथ समासः । मल्लिकाया विकाशः मल्लिकाविकाशः विरचितो मल्लिकाविकाशो येन स वि० । निदाघस्य कालः नि० । इति वृत्तार्थः ॥ ३६ ॥

एवं तटस्थस्योद्दीपनसामग्री विफलेत्युक्तं संप्रति विपरीता चेत्याह -

श्रुतिसुखमुपवीणितं सहायैरविरललाञ्छनहारिणश्च कालाः ।
अविहितहरिसूनुविक्रियाणि त्रिदशवधूषु मनोभवं वितेनुः ॥ ३७ ॥

'श्रुति०' व्याख्या । एतानि वस्तूति प्रत्युत वैपरीत्येन **त्रिदशवधूषु** देवाङ्गनासु **मनोभवं** कन्दर्पं **वितेनुः** विस्तारयामासु अयं भावः- परप्रहारार्थमुद्यमितम् आयुधं स्वात्मानमेव प्रहरति इत्ययं न्यायो जात इति। एतानि कानीत्याह-**सहायैः** गान्धर्वैः **श्रुतिसुखं** कर्णसुखकारि **उपवीणितं** वीणया गानं कृतमिति शेषः । पुनः **अविरललाञ्छनहारिणः** प्रचुरफलकुसुमेन्द्रगोपप्रभृतिचिह्नैर्मनोहराः **कालाः** वसन्तादिऋतवः एतानि किं० ? **अविहितहरिसूनुविक्रियाणि** अकृतार्जुनविकाराणि[3] । अथ समासः । श्रुतीनां सुखं श्रु० । वीणया उपगीतम् उ० । अविरलानि च तानि लाञ्छनानि च अ० अविरललाञ्छनैः हारिणः अ० । हरेः सूनुः ह० न विहिता अविहिता अविहिता हरिसूनोः विक्रिया यैस्तानि अ० । त्रिदशानां वधूः त्रि० तासु त्रिदशवधूषु । इति वृत्तार्थः ॥३७॥

बलवदपि बलं मिथोविरोधि प्रभवति नैव विपक्षनिर्जयाय ।
भुवनपरिभवी न यत्तदानीं तमृतुगणः क्षणमुन्मनीचकार ॥ ३८ ॥

---

१. प्रहासस्य शुभ्रत्वात्कविप्रसिद्धेर्मल्लिकाविकासे हासत्वाध्यवसायः -म. । २. अत्रर्तुभिः सममवधीरितस्येत्यत्राभेदाध्यवसायमूला सहोक्तिरलंकारः । संबन्धभेदभिन्नस्यावधीरणस्याभिन्नतयाध्यवसायात् तदेवावधीरणमसंमतिद्वारा स्मयोत्प्रेक्षेत्यनयोरङ्गाङ्गिभावेन संकरः -म. । ३. अत्र मुनिविक्रियार्थं स्त्रीणां विक्रियारूपानर्थोत्पत्तिकथनाद् द्वितीयो विषमालंकारः तथा च सूत्रम् - 'विरूपकार्थानर्थयोरुत्पत्तिरूपसंघटनाद्विषमालंकारः' -म. ।

'बल०' व्याख्या । **यत्** यस्मात् कारणात् **तदानीं** तस्मिन् काले **ऋतुगणः** ऋतुसमूहः **तम्** अर्जुनं **क्षणं** क्षणमात्रमपि **नोन्मनीचकार** नोत्सुकं चक्रे । उन्मनत्वं विषयाभिलाषः । न च ऋतुगणो दुर्बलो भविष्यतीत्याह- किं० ऋतुगणः ? **भुवनपरिभवी** त्रिभुवनजेता । यतो हेतोः **बलवदपि** बलिष्ठमपि समर्थमपि **बलं** सैन्यं **मिथोविरोधि** परस्परं विरोधि परस्परस्य स्पर्धीत्यर्थः । विसंवादीति भावः । सत् **विपक्षनिर्जयाय** शत्रुविजयाय **नैव प्रभवति** नैव समर्थं भवति । अथ समासः । बलमस्यास्तीति बलवत् । विपक्षानां निर्जयः विपक्षनिर्जयः तस्मै वि० । भुवनं परिभवतीति भु० । ऋतूनां गणः ऋ० अनुन्मना उन्मनाश्चकार इति उ० । इति वृत्तार्थः ॥ ३८ ॥

तटस्थवदालम्बनगुणोऽपि विपरीतोऽभूदिति श्लोकद्वयेनाह -

न दलति निचये तथोत्पलानां न च विषमच्छदकुन्दयूथिकासु ।
अभिरतिमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥ ३९ ॥

'न दल०' व्याख्या । **यथा** येन प्रकारेण **आसां** देवाङ्गनानां **लोचनानि** नेत्राणि **हरितनयावयवेषु** अर्जुनहस्तपादाद्यवयवेषु **अभिरतिं** प्रीतिम् **उपलेभिरे** प्रापुः निर्वृतिं लेभिरे इत्यर्थः । तथा **दलति** विकसति **उत्पलानां** कमलानां **निचये** समूहे नाभिरतिम् उपलेभिरे **च** पुनः **विषमच्छदकुन्दयूथिकासु** सप्तच्छदकुन्दकुसुमयूथिकासु नाभिरतिम् उपलेभिरे रमणीयत्वात् तदवयवानाम् इत्यर्थः । इति चक्षुःप्रीतिरुक्ता । अथ समासः । विषमच्छदानि च कुन्दानि च यूथिकाश्च विषमच्छदकुन्दयूथिकास्तासु वि० । हरितनयस्य अवयवाः हरितनयावयवास्तेषु ह० । इति वृत्तार्थः ॥ ३९ ॥

मनःसंगं सूचयति -

मुनिमभिमुखतां निनीषवो याः समुपययुः कमनीयतागुणेन ।
मदनमुपदधे स एव तासां <u>दुरधिगमा हि गतिः प्रयोजनानाम्</u> ॥ ४० ॥

मुनि० व्याख्या । **याः** देवाङ्गनाः **कमनीयतागुणेन** रम्यतागुणेन **मुनिम्** अर्जुनम् **अभिमुखतां** सन्मुखतां वश्यतामिति यावत् । **निनीषवः** नेतुकामा सत्यः **समुपययुः** अर्जुनम् उद्दिश्य समागमत इत्यर्थः । **स** मुनिरेव **तासां** देवाङ्गनानां **मदनं** कन्दर्पम् **उपदधे** उत्पादयामास युक्तोऽयमर्थः - **हि** यस्मात् कारणात् **प्रयोजनानाम्** उद्देश्यानां कार्याणां **गतिर्गमनं** **दुरधिगमा** दुर्ज्ञेया वर्तते कृच्छ्रेण ज्ञायते इत्यर्थः । अतः खलु क्वचिद्भवन्ति क्वचिन्न भवन्ति इति भावः । इति मनःसंग उक्तः । अथ समासः । अभिमुखस्य भावोऽभिमुखता ताम् अ० । नेतुमिच्छन्तीति निनीषन्ति निनीषन्तीति निनीषवः । कमनीयस्य भावः कमनीयता तस्याः गुणः कमनीयतागुणस्तेन क० । इति वृत्तार्थः ॥ ४० ॥

अथासामनुरागमेव कार्यतः प्रपञ्चयति -

प्रकृतमभिससार नाभिनेयं प्रविकसदङ्गुलि पाणिपल्लवं वा ।
प्रथममुपहितं विलासि चक्षुः सिततुरगे न चचाल नर्तकीनाम् ॥ ४१ ॥

प्रकृ० व्याख्या । **नर्तकीनां** नृत्ये प्रवृत्तानां देवाङ्गनानां **चक्षु**र्नेत्रं **प्रथमं** प्रवेशसमय एव **सिततुरगे** अर्जुने **उपहितं** स्थापितं तत् **न चचाल** नाचलत् तत्रैव लग्नं तस्थौ । रागार्ताभिर्न किंचित् करणीयान्तरमनुसंहितं किंतु विस्मृतमिति भावः । किं० चक्षुः ? **विलासि** विलासयुक्तं तथा **प्रकृतं** कर्तुमुपक्रान्तम् **अभिनेयम्** अभिनेतव्यं रसभावादिव्यञ्जकमित्यर्थः । **न अभिससार** नाभिजगाम एतच्च दूषणं तदानुगुण्येनैव दृष्टिप्रयोग-नियमादिति भावः । **वा** अथवा **पाणिपल्लवं** करतलं न अभिससार न प्रससार स च दोषः यतो हस्तस्ततो दृष्टिः इति नियमादिति भावः । किं० पाणिपल्लवम् ? **प्रविकसदङ्गुलि** विरलीभवदङ्गुलि हस्तानुसारेण प्रवि[क]सदङ्गुलिकमित्यर्थः । अथ समासः । प्रविकसत् अङ्गुलयो यस्मिन् तत् प्र० । पाणिरेव पल्लवं पा० । सिताः तुरगा यस्य स सिततुरगस्तस्मिन् सि० । इति वृत्तार्थः ॥ ४१ ॥

अभिनयमनसः सुराङ्गनाया निहितमलक्तकवर्तनाभिताम्रम् ।
चरणमभिपपात षट्पदाली धृतनवलोहितपङ्कजाभिशङ्का ॥ ४२ ॥

'अभि०' व्याख्या । **षट्पदाली** भ्रमरश्रेणिः **सुराङ्गनायाः** अप्सरसः **निहितं** नृत्तावसाने भूमौ निक्षिप्तं **चरणं** पादम् **अभि** [अभि]मुखीभूय **पपात** धावति स्म किं० सुराङ्गनायाः ? **अभिनयमनसः** रसभावादिव्यञ्जकचेष्टा-विशेषे आसक्तचित्ताया 'व्यञ्जकोऽभिनयो समौ' इति *हैमः* [२८२] । व्यासंगात् भृङ्गापातं जानत्या इत्यर्थः । अत्र भ्रमरपङ्क्तेः स्त्रीचरणे पङ्कजभ्रमाधानात् भ्रान्तिमदलंकारः । किं० चरणम् ? **अलक्तकवर्तनाभिताम्रं** लाक्षारागरञ्जनेन रक्तं किंलक्षणा षट्पदा० ? **धृतनवलोहितपङ्कजाभिशङ्का** स्वीकृतनूतनारक्तकमलभ्रान्ति जातरक्तोत्पलभ्रान्तिरित्यर्थः । स्तिमितमिति पाठे किं० चरणम् ? **स्तिमितं** निश्चलम् । अथ समासः । अभिनये मनो यस्याः सा अ० । सुराणाम् अङ्गना सुराङ्गना तस्याः सु० । अलक्तकस्य वर्तनम् अलक्तकवर्तनम् तेन अभिताम्रम् अ० । षट्पदानाम् आली ष० । धृता नवलोहितपङ्कजानामभिशङ्का यया सा धृ० । इति वृत्तार्थः ॥ ४२ ॥

अविरलमलसेषु नर्तकीनां द्रुतपरिषिक्तमलक्तकं पदेषु ।
सवपुषमिव चित्तरागमूहुर्नमितशिखानि कदम्बकेसराणि ॥ ४३ ॥

'अवि०' व्याख्या । **कदम्बकेसराणि** कदम्बवृक्षकुसुमानि रङ्गपूजार्थं दत्तानि इति शेषः । **अलक्तकं** लाक्षारागम् **ऊहुः** प्रापुः वहन्ति स्मेत्यर्थः । किं० अलक्तकम् ? **नर्तकीनां पदेषु** चरणन्यासेषु **द्रुतं** शीघ्रं **परिषिक्तं** किं० पदेषु ? **अलसेषु** मन्थरगमनेषु सात्त्विकभावेन मन्देष्वित्यर्थः । किं० अलक्तकम् ? **अविरलं** निबिडं किं० कदम्ब० ? **नमितशिखानि** नर्तकीपादपीडनान्नमिताग्राणि पुनः किं० अ० ? उत्प्रेक्ष्यते **सवपुषं** मूर्तिमन्तं **चित्तरागम्** उत्कृष्टं कायाद् बहिः निःसृतं मुनिविषयाणामनुराग-मिवेत्युत्प्रेक्षा **ऊहुः** वहन्ति स्म । अथ समासः । न विरलम् अविरलम् । सह वपुषा वर्तते यः सवपुषस्तं[स]वपुषम् । चित्तस्य रागः चित्तरागस्तं चि० । नमिता शिखा येषां तानि न० । कदम्बस्य केसराणि क० । इति वृत्तार्थः ॥४३॥

अथासां शृङ्गारचेष्टां कथयति -

नृपसुतमभितः समन्मथायाः परिजनगात्रतिरोहिताङ्गयष्टेः ।
स्फुटमभिलषितं बभूव वध्वा वदति हि संवृत्तिरेव कामितानि ॥ ४४ ॥

'नृप०' व्याख्या । **वध्वा** देवाङ्गनायाः **अभिलषितं** वाञ्छितं **स्फुटं** प्रकटं **बभूव** जातं किं० वध्वाः ? **नृपसुतम्** अर्जुनम् **अभितः** समन्तात् **समन्मथायाः** सकामायाः पुनः किं० वध्वाः ? **परिजनगात्रतिरोहिताङ्गयष्टेः** लज्जया सखीशरीराच्छादितदेहलतायाः **हि** यस्मात् कारणात् **कामितानि** वाञ्छितानि **संवृत्तिरेव** संवरणमेव सम्यग् गोपनमेव **वदति** कथयति प्रकटयतीत्यर्थः । अयमनुरागस्य स्वभावः उक्तः । यद्यया चेष्टया संव्रीडयति सैवास्य प्रकाशिका इति भावः । अथ समासः । नृपस्य सुतः नृपसुतस्तं नृ० । सह मन्मथेन वर्तमाना समन्मथा तस्याः स० । परिजनगात्रैः तिरोहिता अङ्गयष्टिः यस्याः सा प० तस्याः प० । इति वृत्तार्थः ॥ ४४ ॥

अभिमुनि सहसा हृते परस्या घनमरुता जघनांशुकैकदेशे ।
चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥ ४५ ॥

'अभि०' व्याख्या । **परस्याः** कस्याश्चिन्नायिकायाः **अवसनोरु** वस्त्ररहितं सक्थि **चकितं** भयसंभ्रमः **प्रतियुवतीः** सपत्नीरपि **विस्मयम्** आश्चर्यं **निनाय** प्रापयामास किमुतान्यजनमित्यपिशब्दार्थः । किं० परस्याः ? **सत्रपायाः** सलज्जायाः कस्मिन् सति ? **घनमरुता** मेघवायुना **अभिमुनि** अर्जुनसमक्षं **जघनांशुकैकदेशे** जघनवस्त्रैकदेशे **सहसा** अकस्मात् **हृते** गृहीते सति । अथ समासः । घनस्य मरुत् घनमरुत् तेन घन० । जघनस्य अंशुकं जघनांशुकं जघनांशुकस्य एकदेशः जघनांशुकैकदेशस्तस्मिन् ज० । अवसनौ उरू यस्मिन् तत् अ० त्रपया सह वर्तमाना सत्रपा तस्याः स० । इति वृत्तार्थः ॥४५॥

धृतबिसवलये निधाय पाणौ मुखमव[1]रूषितपाण्डुगण्डलेखम् ।
नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ ॥ ४६ ॥

'धृत०' व्याख्या । **अपरा** काचिन्नायिका **नृपसुतम्** अर्जुनं मुनिं **स्मराभितापात्** कन्दर्पस्य तापात् **अमधुमदालसलोचनं** मधुमदरहितनेत्रं यथा स्यात्तथा **निदध्यौ** सस्मार पश्यति स्मेत्यर्थः । यद्यपि ध्यै-धातुश्चिन्तायां वर्तते तथाप्यत्र अवलोकनमर्थः[१] । उपसर्गसाचिव्येन धातूनामनेकार्थत्वात् । किंकृत्वा ? **मुखं** वदनं **पाणौ** हस्ते **निधाय** आरोप्य किं० पाणौ ? **धृतबिसवलये** किं० मुखम् ? **अवरूषित-पाण्डुगण्डलेखं** चन्दनादिचर्चितगौरगण्डस्थलम् । अथ समासः । धृतानि बिसान्येव वलयानि येन स धृतबिसवलयस्तस्मिन् धृ० । अवरूषिते पाण्डुगण्डलेखे यस्य तत् अ० । नृपस्य सुतः नृपसुतस्तं नृ० । स्मरस्य अभितापः स्मराभितापस्तस्मात् स्म० । अमधुमदे अलसे लोचने यस्मिन् तत् अ० । इति वृत्तार्थः ॥४६॥

1. मधि० -म. ।

१. 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमरः -म. ।

अथार्जुनं प्रति दूतिका वाक्यमाह-

सखि ! दयितमिहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता ।
हृदयमहृदया न नाम पूर्वं भवदुपकण्ठमुपागतं विवेद ॥ ४७ ॥

'सखि०' व्याख्या । हे मुने ! **कुसुमेषुणा** कन्दर्पेण **अभितप्ता** पीडिता दुःखिता शून्यचित्ता **सा** मत्सखी **माम् इति प्रहितवती** प्रेषितवती इतीति किम् ? **हे सखि !** त्वं **दयितं** प्रियं मनोदृधं मुनिम् **इह** अत्र **आनय** मां प्रापय इत्यर्थः । किंतु अविमृश्यकारिणीयं नायिकेत्याह- **अहृदया** अचित्ता अमनस्का तस्य तद्द्रुतत्वादिति भावः । अत एव सा सखी **नाम** इति संबोधने **हृदयं** चित्तं **पूर्वं** प्रथमं हृदयमात्मनो **भवदुपकण्ठं** भवत्समीपम् **उपागतम्** आगतं **न विवेद** न ज्ञातवती मत्प्रेषणं व्यर्थम् अन्तरङ्गत्वात् बहिरङ्गस्य दुर्बलत्वादिति भावः । एतेन मनःसंग उक्तः । चक्षुःप्रीतिस्तु प्रागेव सर्वासामुक्तेति न पृथगुच्यते। अथ समासः। कुसुमान्येव इषवो यस्य स कुसुमेषुः तेन कु० । भवतः उपकण्ठः भ० । इति वृत्तार्थः ॥४७॥

'दृग्मनःसंगसंकल्पा जागरः कृशता रतिं(तिः) । ह्रीत्यागोन्मादमूर्छान्ता इत्यनङ्गदशा दश' ॥६५॥ इति तत्राद्यमवस्थाद्वयमभ्यधायि । अथ काश्चित् क्रमनिरपेक्षेण सूचयति-

चिरमपि कलितान्यपारयन्त्याः परिगदितुं परिशुष्यता मुखेन ।
गतघृण ! गमितानि सत्सखीनां नयनयुगैः सममार्द्रतां मनांसि ॥ ४८ ॥

'चिर०' व्याख्या । **हे गतघृण** ! हे निर्दय ! तया मत्सख्या **नयनयुगैः** नेत्रयुगलैः **समं** सह **सत्सखीनां** शोभनालीनां **मनांसि** मानसानि **आर्द्रतां** क्लिन्नत्वं सरसत्वं **गमितानि** प्रापितानि शोकबाष्पैरिति भावः । अथ सखीशोकोक्त्या मूर्छावस्था सूच्यते - तया किंकुर्वत्या ? **परिशुष्यता मुखेन** शोषं गच्छता वदनेन **चिरं** चिरकालं **कलितान्यपि** ज्ञातान्यपि संदेष्टुं बुद्ध्या योजितान्यपि वचनानीति शेषः । **परिगदितुं** कथयितुम् **अपारयन्त्याः** अशक्नुवन्त्याः हे गतघृण ! अद्यापि तां नानुकम्पसे इति भावः । अथ समासः । गता घृणा यस्मात्स गतघृणस्तस्य संबोधनं हे गतघृण ! । सत्यश्च ताः सख्यश्च सत्सख्यस्तासां स० । नयनानां युगानि नयनयुगानि तैर्न० । आर्द्रस्य भाव आर्द्रता ताम् आर्द्रताम् । इति वृत्तार्थः ॥ ४८ ॥

अचकमत सपल्लवां धरित्रीं मृदुसुरभिं विरहय्य पुष्पशय्याम् ।
भृशमरतिमवाप्य तत्र चास्यास्तव सुखशीतमुपैतुमङ्कमिच्छा ॥ ४९ ॥

'अच०' व्याख्या । हे अर्जुन ! सा मत्सखी **सपल्लवां** सकिशलयां **धरित्रीं** भूमिम् **अचकमत** वाञ्छति स्म किंकृत्वा ? **मृदुसुरभिं** कोमलसुगन्धिनीं **पुष्पशय्यां** कुसुमस्रस्तरं **विरहय्य** त्यक्ता(क्त्वा) **च** पुनः

---

१. नाम संभावनायाम् -म. । २. अत्र शोकबाष्परूपकारणभेदात् प्रतियोगिभेदाच्चार्द्रत्वभेदेऽप्यभेदाध्यवसायः । तन्मूला चेयं नयनयुगैः सममिति सहोक्तिरलंकारः -म. ।

किंकृत्वा ? **तत्र** पुष्पशय्यायां **भृशमत्यर्थम् अरतिम्** असुखम् **अवाप्य** प्राप्य **अस्याः** सख्याः **तव अङ्कम्** उत्संगम् **उपैतुं** प्राप्तुम् **इच्छा** वर्तते किं० अङ्कम् ? **सुखशीतं** सुखकारि शीतलं चं। अथ समासः। पल्लवैः सह वर्तमाना सपल्लवा तां स०। म(मृ)द्वी च सुरभी च मृदुसुरभी तां मृ०। पुष्पैः रचिता युक्ता सा शय्या पुष्पशय्या तां पु०। सुखयतीति सुखः सुखश्च शीतश्च सुखशीतस्तं सु०। इति वृत्तार्थः ॥४९॥

तदनघ ! तनुरस्तु सा सकामा व्रजति पुरा हि परासुतां त्वदर्थे ।
पुनरपि सुलभं तपोऽनुरागी युवतिजनः खलु नाप्यतेऽनुरूपः ॥ ५० ॥

'तद०' व्याख्या। हे **अनघ** ! हे निष्पाप ! **तत्** तस्मात् कारणात् तस्याः दुरवस्थत्वात् **सा** सखी **सकामा** साभिलाषा सफलमनोरथा **अस्तु** भवतु किं० सा ? **तनुः** कृशाङ्गी विरहादिति भावः। **हि** निश्चितं **पुरा** पश्चात् **त्वदर्थे** भवदर्थे **परासुतां** पञ्चत्वं **व्रजति** गमिष्यति मरिष्यतीत्यर्थः। तथा च ते त्वन्निमित्तहत्यया अनघत्वव्याघातः स्यादिति भावः। इदं च दशमावस्थाप्रदर्शनं [न च] तपोनिष्ठत्वाद् भेतव्यमित्याह- **तपः** कृच्छ्रादिकर्म **पुनरपि** भूयोऽपि **सुलभं** सुप्रापं कर्तुं शक्यं वर्तते **खलु** इति निश्चितम् **अनुरूपः** योग्यः **अनुरागी** प्रीतिमान् **युवतिजनो** अङ्गनाजनः **न आप्यते** न प्राप्यते न लभ्यत इत्यर्थः। अथ समासः। न विद्यते अघं यस्य स अनघस्तस्य संबोधनं हे अनघ !। सह कामेन वर्तमाना सकामा। त्वमेव अर्थः त्वदर्थस्तस्मिन् त्वदर्थे। युवतीनां जनो यु०। अनु सदृशं रूपं यस्य सः अनुरूपः। इति वृत्तार्थः ॥५०॥

एवं प्रलोभितस्यापि मुनेर्मौनं न भग्नमित्याह -

जहिहि कठिनतां प्रयच्छ वाचं ननु करुणामृदु मानसं मुनीनाम् ।
उपनतमवधीरयन्त्यभव्याः स निपुणमेत्य कयाचिदेवमूचे ॥ ५१ ॥

'जहि०' व्याख्या। **कयाचित्** नायिकया **एत्य** समीपमागत्य **सोऽर्जुनः निपुणं** प्रचुरं यथा भवति तथा **एवम्** उक्तप्रकारेण **ऊचे** उक्तः हे मुने ! त्वं **कठिनतां** कठोरत्वं **जहिहि** निस्पृहत्वं त्यज इत्यर्थः। हे मुने ! त्वं **वाचं** वचनं **प्रयच्छ** देहि कुतो हेतोः **मुनीनाम्** ऋषीणां **मानसं** चित्तं **ननु** निश्चितं **करुणामृदु** दयार्द्रं भवति **अभव्याः** अयोग्याः भाग्यरहिता जना इति शेषः। **उपनतं** स्वयमेव प्राप्तम् **अवधीरयन्ति** अवगणयन्ति न तु योग्या इति भा[२]वः। अथ समासः। कठिनस्य भावः कठिनता तां क०। करुणया मृदु क०। न भव्याः अभव्याः। इति वृत्तार्थः ॥ ५१ ॥ पञ्चभिः कुलकम्।

---

१. अत्रारतिजागरौ सुव्यक्तावित्यस्या नायिकायाः क्रमेण पुष्पशय्याद्यनेकाधारसंबन्धकथनात् प्रथमः पर्यायालंकारः। तदुक्तम् - 'क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि। एकस्मिन्नथवानेकं पर्यायालंकृतिर्द्विधा ॥' इति लक्षणात् -म.। २. अत्र पञ्चश्लोक्यां विप्रलम्भशृङ्गारस्यौत्सुक्यनाम्नो व्यभिचारिभावस्य चापुनरुक्तिः। अनौचित्येन नायिकायाः प्रवृत्तेराभासत्वमनुसंधेयम्। तदुक्तम् - 'एकत्र चेन्नानुरागस्तिर्यङ्म्लेच्छगतोऽपि वा। योषितां बहुसक्तिश्चेद्रसाभासस्त्रिधा मतः ॥' इति। तन्निबन्धनादूर्जस्वलमलंकारः। तथा च सूत्रम् - 'सरसभेदतदाभासतत्प्रप्रकाशानां निबन्धनेन रसवत्प्रायमूर्जस्वलम्'। [समाहितातिरसबन्धे रसवदलंकारः भावनिबन्धे प्रेयोऽलंकारः, रसभावनिबन्धे तूर्जस्वलालंकारः। तत्प्रशमनिबन्धे समाहितालंकार इति सूत्रार्थः] -म.

सललितवलितत्रिकाभिरामा शिरसिजसंयमनाकुलैकपाणिः ।
सुरपतितनयेऽपरा निरासे मनसिजजैत्रशरं विलोचनार्धम् ॥ ५२ ॥

'सल०' व्याख्या । **अपरा** काचिन्नायिका **सुरपतितनये** अर्जुने **मनसिजजैत्रशरं** कन्दर्पस्य जयनशीलबाणं शरकार्यकारित्वात् **विलोचनार्धं** कटाक्षं **निरासे** चिक्षेप विससर्जेत्यर्थः । किं० अपरा ? **सललितवलितत्रिकाभिरामा** सविलासं यथा भवति तथा तिर्यक्कृतकटिभागेन मनोरमा मनोज्ञेत्यर्थः। पुनः किं० ? **शिरसिजसंयमनाकुलैकपाणिः** केशबन्धने व्याकुलैकहस्ता । अथ समासः । सह ललितेन वर्तते यत् तत् सललितं वलितं च तत् त्रिकं च वलितत्रिकं सललितं वलितत्रिकेण अभिरामा स० । शिरसि जाताः शिरसिजाः तेषां संयमनं शिरसिजसंयमनं शिरसिजसंयमने आकुल एकपाणिः यस्याः सा शि० । सुरपतेस्तनयः सुरपतितनयः तस्मिन् सु०। मनसि जातो मनसिजः मनसिजस्य जैत्रशरः मनसिजजैत्रशरस्तं म०। विलोचनस्यार्धं वि०। इति वृत्तार्थः ॥ ५२ ॥

[1]सकुसुममवलम्ब्य चूतमुच्चैस्तनुरिभकुम्भपृथुस्तनानताङ्गी ।
तदभिमुखमनङ्गचापयष्टिर्विसृतगुणेव समुन्ननाम काचित् ॥ ५३ ॥

'सकु०' व्याख्या । **काचित्** नायिका **तदभिमुखं** तस्य अर्जुनस्य सन्मुखं **समुन्ननाम** समुन्नता बभूव अङ्गभङ्गं चकारेत्यर्थः । किंकृत्वा ? **उच्चैः** उन्नतं **सकुसुमं** सपुष्पं **चूतं** सहकारवृक्षम् **अवलम्ब्य** आश्रित्य किं० का० ? **तनुः** कृशाङ्गी पुनः किं० का० ? **इभकुम्भपृथुस्तनानताङ्गी** गजकुम्भस्थलपृथुलस्तनाभ्यां नम्राङ्गी पुनः किं० का० ? उत्प्रेक्ष्यते **विसृतगुणा** अन्तर्भूतण्यर्थत्वादारोपित-प्रत्यञ्चा **अनङ्गचापयष्टिः** कन्दर्पधनुर्लता इव स्थिता आकृष्टमुक्तेति भावः । अथ समासः । सह कुसुमेन वर्तते यः स सकुसुमस्तं स० । इभस्य कुम्भौ इभकुम्भौ इभकुम्भवत् पृथू इभकुम्भपृथू इभकुम्भपृथू च तौ स्तनौ च इ० इभकुम्भपृथुस्तनाभ्याम् आनतमङ्गं यस्याः सा इ० । तस्य अभिमुखं तदभिमुखम् । अनङ्गस्य चापयष्टिः अ०। विसृतो गुणो यस्याः सा वि० । इति वृत्तार्थः ॥ ५३॥

सरभसमवलम्ब्य नीलमन्या विगलितनीवि विलोलमन्तरीयम् ।
अभिपतितुमनाः ससाध्वसेव च्युतरशनागुणसंयतावतस्थे[2] ॥ ५४ ॥

'सर०' व्याख्या । **अन्या** काचिन्नायिका **नीलं** नील्या रञ्जितम् **अन्तरीयं** परिधानवस्त्रं **सरभसम्** औत्सुक्यं यथा स्यात्तथा **अवलम्ब्य** हस्तेन गृहीत्वा आश्रित्येत्यर्थः । **च्युतरशनागुणसंयता** पतितकटिमेखलागुणेन बद्धा **अवतस्थे** तस्थौ पुरस्तात् न चचालेत्यर्थः । यथा गुणैर्बद्धो गन्तुं न शक्नोति तद्वदित्यर्थः । किं० अन्या ? **अभिपतितुमनाः** अर्जुनं प्रति गन्तुमनाः किं० अन्तरीयम् ? **विगलितनीवि** पतितवसनग्रन्थि पुनः किं० अन्तरीयम् ? **विलोलं** चञ्चलं स्थानात् चलितम् अत एव वस्त्राचलनं युक्तं पुनः किं० अन्या ? **ससाध्वसा** सभया **इव** स्थिता मुनिं दृष्ट्वा जातशङ्केत्यर्थः । अत्रायमभिप्रायः-

1. कुसुमित -म. इदं च पा० । 2. संदिता० -म. । इदं च पा० ।

ससाध्वसेव न तु वस्तुतः ससाध्वसा, किन्तु [**च्युतेन**] त्रुटितेन गलितेन **रसनागुणेन संयता** बद्धा सती अवतस्थे । अथ समासः । विगलिता नीविः यस्य तत् वि० । अभिपतितुं मनो यस्याः सा अ० । सह साध्वसेन वर्तमाना स० । रशनाया गुणः रशनागुणः च्युतश्चासौ रशनागुणश्च च्यु० च्युतरशनागुणेन संयता च्यु० । इति वृत्तार्थः ॥ ५४ ॥

काचित् श्लोकद्वयेनाह–

यदि मनसि शमः किमङ्ग चापं शठ ! विषयास्तव वल्लभा न मुक्तिः ।
भवतु दिशति नान्यकामिनीभ्यस्तव हृदये हृदयेश्वरावकाशम् ॥ ५५ ॥

'यदि०' व्याख्या । **अङ्ग** इति अभीष्टप्रश्ने हे अर्जुन ! **यदि तव मनसि** चित्ते **शमः** शान्तिः वर्तते तर्हि **चापं** धनुः **किं** किमर्थम् ? **हे शठ** ! हे धूर्त ! तव **विषयाः** शब्दादयो भोगाः **वल्लभा** इष्टाः **न मुक्तिः** न मोक्षपदं भवतु ज्ञातं वल्लभा प्रिया तदेव दृढयितुमाह– **भवतु** को दोषः इति शेषः । यद्ययं रागी तर्हि किमिति भवतीं न गणयतीति **तव हृदयेश्वरा** काचित् वल्लभा तव **हृदये** मनसि **अन्यकामिनीभ्यः** अन्यस्त्रीभ्यः **अवकाशं** स्थानकं **न दिशति** न ददाति रूपान्तरासक्त्या नास्मान् गणयति न तु वैराग्यात् तदर्थ एवायं ते सकलः प्रयासोऽपीत्यर्थः । अथ समासः । अन्याश्च ताः कामिन्यश्च अन्यकामिन्यः ताभ्यः अ० । इति वृत्तार्थः ॥ ५५ ॥

इति विषमितचक्षुषाभिधाय स्फुरदधरोष्ठमसूयया कयाचित् ।
अगणितगुरुमानलज्जयाऽसौ स्वयमुरसि श्रवणोत्पलेन जघ्ने ॥ ५६ ॥

'इति०' व्याख्या । **कयाचित्** नायिकया **असौ** अर्जुनः **स्वयं** स्वयमेव स्वहस्तेनेति शेषः । **श्रवणोत्पलेन** कर्णकमलेन **उरसि** वक्षसि **जघ्ने** ताडितः हत इत्यर्थः । किं० कयाचित् ? 'अगणितगुरुमान-लज्जया' **अवगणिताः** अवज्ञाताः **गुरवो** ज्येष्ठाचार्यादयः **मानो**ऽभिमानो **लज्जा** त्रपा च यया अव० तया अवगणिताचार्याभिमानव्रीडया इत्यर्थः । किंकृत्वा ? **इति** पूर्वश्लोकोक्तं गुणेषु दोषाविष्करणम् **असूयया** मत्सरेण **स्फुरदधरोष्ठम्** उल्लसत् अधरोष्ठं यथा स्यात्तथा **अभिधाय** उक्त्वा पुनः किं० कयाचित् ? **विषमितचक्षुषा** वक्रीकृतनेत्रया । अथ समासः । विषमिते चक्षुषी यस्याः सा विषमितचक्षुः तया वि० । स्फुरन् अधरोष्ठो यत्र यस्मिन् कर्मणि तत् स्फु० । गुरवश्च मानश्च लज्जा च गुरुमानलज्जा अगणिता गुरुमानलज्जा यया सा अगणितगुरुमानलज्जा तया अग० । श्रवणे उत्पलं श्रवणोत्पलं तेन श्र० । इति वृत्तार्थः ॥ ५६ ॥ युग्मम् ॥

सविनयमपराभिसृत्य साचि स्मितसुभगैकलसत्कपोललक्ष्मीः ।
श्रवणनियमितेन तं निदध्यौ सकलमिवासकलेन लोचनेन ॥ ५७ ॥

'सवि०' व्याख्या । **अपरा** काचिन्नायिका **सविनयं** यथा स्यात्तथा [**साचि** तिर्यक्] **अभिसृत्य** समीपमागत्य सन्मुखं गत्वा **तम्** अर्जुनम् **असकलेन लोचनेन** कटाक्षेण **सकलमिव** संपूर्णमिव

निदध्यौ पश्यति स्म कटाक्षेणैव गाढमद्राक्षीदित्यर्थः । किं० काचित् ? **स्मितसुभगैकलसत्कपोललक्ष्मीः** हास्यमनोहरैकलसद्गल्लस्थललक्ष्मीः किं० असक० ? **श्रवणनियमितेन** कर्णप्रापितेन श्रवणायतेनेत्यर्थः । अथ समासः । सह विनयेन वर्तते यत्तत् स० । स्मितेन सुभगा स्मितसुभगा एका लसन्ती कपोललक्ष्मीः यस्याः सा स्मि० । श्रवणयोर्नियमितं श्रवणनियमितं तेन श्र० । इति वृत्तार्थः ॥५७॥

करुणमभिहितं त्रपा निरस्ता तदभिमुखं च विमुक्तमश्रु ताभिः ।
अकुपितमभिसारणेऽनुनेतुं प्रियमियती ह्यबलाजनस्य भूमिः ॥ ५८ ॥

'कुरु०' व्याख्या । **ताभिः** देवाङ्गनाभिः **करुणं** दीनम् **अभिहितम्** उक्तं **च** पुनः ताभिः **त्रपा** लज्जा **निरस्ता** त्यक्ता पुनः ताभिर्देवाङ्गनाभिः **तदभिमुखं** तस्यार्जुनस्य समक्षम् **अश्रु** नेत्रजलं **विमुक्तं** मुक्तं रुदितम् इत्यर्थः । पुनः ताभिः **अभिसारणे** सन्मुखगमने **अकुपितं** कोपम् अकृत्वैव गमनं कृतमित्यर्थः । किं बहुना यद्विधेयं तत्कृतम् अतः परं न किञ्चिद्विधेयमवशिष्यत इति भावः । ताभिरेतत्सर्वं कथं कृतमित्याह- **हि** निश्चितम् **अबलाजनस्य** स्त्रीजनस्य क्वचित् 'प्रकुपितम्'[1] इति पाठः तत्र कुपितं कोपयुक्तं **प्रियं** वल्लभम् **अनुनेतुं** प्रसादयितुम् अनुकूलयितुम् इति यावत् । **इयती** एतावत्येव पूर्वोक्ता **भूमिः** मर्यादा शक्तिर्वा एभ्योऽन्यो उपायो नास्तीति भावः । अथ समासः । तस्य अभिमुखं तदभिमुखम् । अबलाया जनः अबलाजनस्तस्य अ० । इति वृत्तार्थः ॥ ५८ ॥

अथासामनुरागदार्ढ्यं निगमयति -

असकलनयनेक्षितानि लज्जा गतमलसं परिपाण्डुता विषादः ।
इति विविधमियाय तासु भूषां प्रभवति मण्डयितुं वधूरनङ्गः ॥ ५९ ॥

'अस०' व्याख्या । **इति** एवंप्रकारं **विविधं** नानाचेष्टितं **तासु** देवाङ्गनासु **भूषाम्** अलंकरणम् **इयाय** प्राप अभवत् इत्यर्थः । किं तच्चेष्टितमित्याह- इतीति किम् ? यत् **असकलनयनेक्षितानि** कटाक्षविलोकितानि नयनानि **लज्जा** त्रपा **अलसं** सविलासं **गतं** मन्थरगमनं **परिपाण्डुता** गौरता पाण्डुवर्णत्वं **विषादः** इष्टानवाति(प्ति)निमित्तश्चेतोभङ्गः यतः कारणात् **अनङ्गः** कन्दर्पः **वधूः** अप्सरसः **मण्डयितुम्** अलंकर्तुं **प्रभवति** समर्थो भवति सर्वावस्थास्विति शेषः । अतस्तासां मदनालंकृतानाम् अखिलं भूषणमेवेति भावः । अथ समासः । असकलानि च तानि नयनानि च असकलनयनानि असकलनयनैरीक्षितानि अ० । परिपाण्डोः भावः प० । न विद्यते अङ्गं यस्य स अनङ्गः । इति वृत्तार्थः ॥ ५९ ॥

इदानीमेतासां त्रिभिर्मुनिविलोभनप्रयासवैफल्यमाह -

---

1. अयं पाठः म. मध्ये ।

---

१. एषु श्लोकेषु भावाभासनिबन्धादूर्जस्वलालंकारः । औत्सुक्यमत्र भावः । आभासत्वं चास्य विरक्तमुनावनौचित्यादित्युक्तं प्राग् -म. ।

अलसपदमनोरमं प्रकृत्या जितकलहंसवधूगति प्रयातम् ।
स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणं वा ॥ ६० ॥

भृशकुसुमशरेषुपातमोहादनवसितार्थपदाकुलोऽभिलापः ।
अधिकविततलोचनं वधूनामयुगपदुन्नमितभ्रु वीक्षितं वा ॥ ६१ ॥

रुचिकरमपि नार्थवद्बभूव स्तिमितसमाधिशुचौ पृथातनूजे ।
ज्वलयति महतां मनांस्यमर्षे न हि लभतेऽवसरं सुखाभिलाषः ॥ ६२ ॥

'अल०', 'भृश०', 'रुचि०' व्याख्या । एतत्पूर्वद्वयश्लोकोक्तम् **रुचिकरमपि** मनोहरमपि स्पृहाजनकमपि सुखावहत्वात् तथापि **पृथातनूजे** अर्जुने **अर्थवत्** सार्थतां सप्रयोजनं वा **न बभूव** न जातं किं० पृथातनूजे ? **स्तिमितसमाधिशुचौ** निश्चलसमाधिना पवित्रे स्थिरतपोयोगेन शुद्धे निर्विकारे चेतसीत्यर्थः । तथाहि यस्मात् कारणात् **सुखाभिलाषः अमर्षे** कोपे **महतां** पुरुषाणां **मनांसि ज्वलयति** दीपयति सति **अवसरम्** अवकाशं **न लभते** प्राप्नोति रौद्रस्य शृङ्गारविरोधित्वात् इति भावः । अथ समासः । रुचिं करोतीति रुचिकरस्तं रुचिकरम् । स्तिमितश्चासौ समाधिश्च स्तिमितसमाधिः स्तिमितसमाधिना शुचिः स्तिमितसमाधिशुचिस्तस्मिन् स्ति० । पृथायाः तनूजः पृथातनूजस्तस्मिन् पृ० । सुखस्य अभिलाषः सु० ॥ ६२ ॥

एतत्किमित्याह- देवाङ्गनानां संबन्धि **प्रयातं** गमनं किं० प्रयातम् ? **प्रकृत्या** स्वभावेन **अलसपदमनोरमं** मन्थरपदविन्यासेन मनोरमं मञ्जुलं पुनः किं० प्रयातम् ? **जितकलहंसवधूगति** पराभूतकलहंसीगमनं पुनः किं० प्र० देवाङ्गनानाम् ? **स्थितं** रहितं कस्मात् ? **उरुजघनस्थलातिभारात्** महाकटिप्रदेशस्थलातिभारात् दुर्वहलक्षणात् **वा** अथवा देवाङ्गनानाम् **उदितपरिश्रमजिह्मितेक्षणम्** उत्पन्नखेदेन घूर्णितेक्षणं यद्वा गमनं स्थितिश्चोभयमपि निरर्थकं जातमिति वाक्यार्थः। अथ समासः । अलसानि च तानि पदानि च अलसपदानि अलसपदैर्मनोरमम् अ० । कलहंसानां वध्वः कलहंसवध्वः कलहंसवधूनां गतिः कलहंसवधूगतिः जिता कलहंसवधूगतिर्येन तत् जि० । उरुश्चासौ जघनश्च उरुजघनः उरुजघनस्य स्थलम् उरुजघनस्थलम् उरुजघनस्थलस्य अतिभारः उ० तस्मात् उ० । उदितश्चासौ परिश्रमश्च उदितपरिश्रमः उदितपरिश्रमेण जिह्मिते ईक्षणे यस्य तत् उ० । इति वृत्तार्थः ॥ ६० ॥

'भृश०' । **वधूनां** देवाङ्गनानां **भृशम**त्यर्थं **कुसुमशरेषुपातमोहात्** कन्दर्पबाणपतनमोहात् क्वचित् **अनवसितार्थपदाकुलः** अज्ञाताभिधेयपदव्याप्तः अस्फुटोच्चारणादनव-धारिताभिधेयैः पदैः क्षुभितशब्दैः **आकुलः** संकीर्णः इत्यर्थः क्वचित् 'अवहितार्थ०' इति पाठस्तत्र अस्फुटोच्चारणात् अवहित आच्छादितोऽभिधेयार्थो येषां तानि पदानि तैः सुरतादिशब्दैः आकुलः संकीर्णः । **अभिलापः** संभाषणं वा अर्थवन्न बभूव। अथवा **वधूनाम्** अप्सरसां **वीक्षितं** विलोकितम् अर्थवन्न बभूव । किं० वीक्षितम् ? **अधिकविततविलोचनम्** अतिशयेन विस्तीर्णनेत्रं पुनः किं० वि० ? **अयुगपदुन्नमितभ्रु** असमकालोन्न-

मितभ्रूकुटि एवंभूतं वीक्षणं चार्थवन्न बभूवेत्यर्थः । अथ समासः । कुसुमशरस्य इषवः कुसुमशरेषवः कुसुमशरेषूणां पातः कुसुमशरेषुपातः कुसुमशरेषुपातेन मोहः कुसुमशरेषुपातमोहस्तस्मात् कु० । अनवसितोऽर्थो येषां तानि अ० अनवसितार्थानि च तानि पदानि अ० अनवसितार्थपदैराकुलः अन० । अधिकं यथा स्यात्तथा वितते लोचने यस्मिन् तत् अ० । न युगपत् अयुगपत् उन्नमिते भ्रुवौ यस्य तत् अयुगपदुन्नमितभ्रु । इति वृत्तार्थः ॥६०॥६१॥६२॥

स्वयं संराध्येशं[1] शतमखमखण्डेन तपसा
परोच्छित्या लभ्यामभिलषति लक्ष्मीं हरिसुते ।
मनोभिः सावेगैः प्रणयविहतिध्वस्तरुचयः
सगन्धर्वा धाम त्रिदशवनिताः स्वं प्रतिययुः ॥ ६३ ॥ (शि.)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *अर्जुनविलोभो* नाम दशमः सर्गः ॥१०॥

'स्वयं०' व्याख्या । **त्रिदशवनिताः** देवाङ्गनाः **सगन्धर्वाः** गन्धर्वयुक्ताः सत्यः **स्वं** स्वकीयं **धाम** स्थानं **प्रतिययुः** प्रतिजग्मुः कैः ? **सावेगैः** सपश्चात्तापैः **मनोभिः** चेतोभिः कृत्वा क्वचित् '[2]सोद्वेगैः' इति पाठस्तत्र कार्यसिद्ध्यभावात् सनिर्वेदैर्मनोभिरुपलक्षिता । किं० त्रिद० ? **प्रणयविहति-ध्वस्तरुचयः** प्रार्थनाहान्या नष्टकान्तयः 'प्रणयः प्रसरे प्रेम्णि याच्ञाविश्रम्भयोरपि' इति *हैमानेकार्थः* [३-४८३] । कस्मिन् सति ? **अखण्डेन** निर्दोषेण **तपसा शतमखम्** इन्द्रम् **इशं** प्रभुं **स्वयं** स्वयमेव **संराध्य** आराध्य प्रीणयित्वा **हरिसुते** अर्जुने राज्य**लक्ष्मीम् अभिलषति** वाञ्छति सति किं० लक्ष्मीम् ? **परोच्छित्या** शत्रुवधेन **लभ्यां** साध्यां प्राप्यामित्यर्थः । अथ समासः । परेषाम् उच्छितिःपरोच्छितिस्तया प० । हरेः सुतः हरिसुतः तस्मिन् ह० । प्रणयस्य विहतिः प्रणयविहतिः प्रणयविहत्या ध्वस्ता रुचिर्यासां ताः प्र० । गन्धर्वैः सह वर्तमानाः स० । त्रिदशानां वनिता त्रि० । इति वृत्तार्थः ॥ ६३ ॥ १० ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद् गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गः समाप्तिममलो दशमः समाप्तः ॥ २ ॥

इति श्रीभट्टभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***विलोभप्रत्याख्यो*** नाम दशमः सर्गः ॥

1. ०ध्यैवं -म. इदं च पा. । 2. अयं पाठः म. मध्ये

एकादशः सर्गः।

ऐं नमः ॥

अथामर्षान्निसर्गाच्च जितेन्द्रियतया तया । आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः ॥१॥

[का. ७९ यावद् अनुष्टुप्छन्दः]

'अथ०' व्याख्या । **अथ** देवाङ्गनानन्तरं शक्रस्यागमनं प्रतिपादयितुमेकादशं सर्गमारभते । **पाकशासनः** इन्द्रः **जिष्णोरर्जुनस्य आश्रमं** स्थानम् **आजगाम** प्राप किं० पाकशासनः ? **अमर्षात्** कोषा(पा)त् **च** पुनः **निसर्गात्** स्वभावात् **तया जितेन्द्रियतया** जितेन्द्रियत्वेन अप्सरसां मुखेभ्यः श्रुतयेति शेषः । **प्रतीतः** प्रसन्नः अमर्षात् द्विषत्द्वेषात् निसर्गात् तया जितेन्द्रियतया आगन्तुकानागन्तुको-भयविधहेतुकया प्रतीतो हृष्टः सन् आजगाम इति वाक्यार्थः । अमर्षनिसर्गयोः जितेन्द्रियताहेतुकं रुचिकरमपीति श्लोकः स्फुटमवगम्यते। अथ समासः। जितेन्द्रियस्य भावो जितेन्द्रियता तया जि० । पाको नाम कश्चिद्राक्षसस्तस्य शासनः [पाकशासनः]। इति वृत्तार्थः ॥ १ ॥

किमिन्द्रो निजरूपेण गतो नेत्याह -

मुनिरूपोऽनुरूपेण सूनुना ददृशे पुरः । द्राघीयसा वयोऽतीतः परिश्रान्तः[1] किलाध्वना ॥२॥

'मुनि०' व्याख्या । **सूनुना** अर्जुनेन **पुरो**ऽग्रे **मुनिरूपः** मुनिवेषधारी इन्द्रो **ददृशे** दृष्टः किं० सूनुना ? **अनुरूपेण** दर्शनप्रदानयोग्येन किं० मुनिरूपः ? **वयोऽतीतः** यौवनादिकमतीतो वृद्धः **किले**त्यलीके **द्राघीयसा** अतिदीर्घेण **अध्वना** मार्गेण **परिश्रान्तः** खिन्नः दूराध्वश्रान्त वृद्ध इव स्थित इत्यर्थः। प्रियस्थिरेत्यादिना दीर्घशब्दस्य द्राघादेशः । अथ समासः । मुनिरूपमिव रूपं यस्य स मुनिरूपः। अतिशयेन दीर्घो द्राघीयान् तेन द्राघीयसा । वयसा अतीतः वयोऽतीतः । इति वृत्तार्थः ॥ २ ॥

अथ चतुर्भिः श्लोकैरिन्द्रं विशिनष्टि -

जटानां कीर्णया केशैः संहत्या परितः सितैः । पृक्तयेन्दुकरैरह्नः पर्यन्त इव सन्ध्यया ॥३॥

'जटा०' व्याख्या । किं० मुनिरूपशक्रः ? **जटानां** सप्ततीनां **संहत्या** समूहेन भारेण वा **परितः** समन्तात् उपलक्षितः युक्त इत्यर्थः । किं० संहत्या ? **सितैः** श्वेतैः **केशै**श्चिकुरैः **कीर्णया** व्याप्तया पुनः किं० मुनि० ? उत्प्रेक्ष्यते **अह्नो** दिवसस्य **पर्यन्तः** अवसान इव स्थितः सन्ध्याकाल इति यावत् । किं० पर्यन्तः ? **इन्दुकरैः** चन्द्रकिरणैः **पृक्तया** मिलितया **संध्यया** उपलक्षितः दिनान्तस्यापि परिणतरूपत्वात् वृद्धोपमानत्वम्। जटासंहतेरित्युक्त्वात् संध्यासाम्यमिति। अथ समासः । इन्दोः करा इन्दुकरास्तैः इ० । इति वृत्तार्थः ॥ ३॥

---

1. परिक्लान्तः -म.

---

१. काव्यलिङ्गं स्फुटमवगम्यते -म. ।

विशदभ्रूयुगच्छन्नवलितापाङ्गलोचनः । प्रालेयावततिम्लानपलाशाब्ज इव ह्रदः ॥ ४ ॥

'विश०' व्याख्या । पुनः किं० मुनिरूपशक्रः ? **विशदभ्रूयुगच्छन्नवलितापाङ्गलोचनः** निर्मलभ्रूयुग्माच्छादितवलिमत्प्रान्तनेत्रः । पुनः किं० मु० ? उत्प्रेक्ष्यते **प्रालेयावततिम्लानपलाशाब्जो** हिमश्रेणितप्तपर्णाम्बुज एवंविधो **ह्रदः** द्रह **इव** स्थितः । अथ समासः । भ्रुवो युगं भ्रूयुगं विशदं च तत् भ्रूयुगं च विशदभ्रूयुगं विशदभ्रूयुगेन छन्ने विशदभ्रूयुगच्छन्ने विशदभ्रूयुगच्छन्ने वलितापाङ्गे लोचने यस्य स वि० । प्रालेयस्य अवततिः प्रालेयावततिः प्रालेयावतत्या म्लानानि पलाशानि येषां तानि प्रालेयावततिम्लान-पलाशानि प्रालेयावततिम्लानपलाशानि क्लान्तपत्राणि अब्जानि यस्मिन् स प्रा० । इति वृत्तार्थः ॥ ४ ॥

आसक्तभरनीकाशैरङ्गैः परिकृशैरपि । आद्यूनः सद्गृहिण्येव प्रायो यष्ट्यावलम्बितः ॥५॥

'आस०' व्याख्या । पुनः किं० मुनि० ? **प्रायो** बाहुल्येन **यष्ट्या** अवलम्बनदण्डेन **अवलम्बितः** धारितः न तु स्वशक्त्येतिभावः । पुनः किं० मु० ? उत्प्रेक्ष्यते **सद्गृहिण्या** गुणवद्भार्यया अवलम्बितः कार्श्याल्लघून्यपि स्वाङ्गानि स्वयं वोढुमसमर्थः इत्यर्थः । अत एव **आद्यूनः** औदरिक इव स्थितः 'आद्यूनः स्यादौदरिकः' इति *हैमः* [४२८] । पुनः किं० मु० ? **अङ्गैः** शरीरैः उपलक्षितः किं० अङ्गैः ? **आसक्तभरनीकाशैः** आरोपितभारतुल्यैः भाराक्रान्तसदृशैः इत्यर्थः । 'नीकाशो निश्चये तुल्ये' इति *हैमानेकार्थः* [३-७१६] । पुनः किं० अङ्गैः ? **परिकृशैरपि** दुर्बलैरपि । अथ समासः । आसक्तश्चासौ भरश्च आसक्तभरः आसक्तभरवत् नीकाशानि आसक्तभरनीकाशानि तैः आ० । सती चासौ गृहिणी च सद्गृहिणी [तया सद्०] । इति वृत्तार्थः ॥ ५ ॥

गूढोऽपि वपुषा राजन् धाम्ना लोकाभिभाविना । अंशुमानिव तन्वभ्रपटलच्छन्नमण्डलः ॥६॥

'गूढो०' व्याख्या । पुनः किं० मु० ? **वपुषा** शरीरेण **गूढोऽपि** गुप्तरूपोऽपि **लोकाभिभाविना** जनपराभवकारिणा **धाम्ना** तेजसा **राजन्** शोभमानः ददृशेति पूर्वेण संबन्धः । पुनः किं० मुनि० ? उत्प्रेक्ष्यते **तन्वभ्रपटलच्छन्नमण्डलः** स्तोकाभ्रवृन्दान्तरितमूर्तिः सूक्ष्ममेघपटलाच्छादितबिम्ब इत्यर्थः । **अंशुमान्** सूर्य **इव** स्थितः । अथ समासः । राजते इति राजन् । लोकैरभिभवतीत्येवंशीलो लोकाभिभावी तेन लो० । अंशवः किरणा विद्यन्ते यस्यासौ अंशुमान् । अभ्राणां पटलम् अभ्रपटलं तनु च तत् अभ्रपटलं च तन्वभ्रपटलं तन्वभ्रपटलेन च्छन्नं मण्डलं यस्य स त० । इति वृत्तार्थः ॥ ६ ॥ (आदिक्रिया पं. कु. ।)

जरतीमपि बिभ्राणस्तनुमप्राकृताकृतिः । चकाराक्रान्तलक्ष्मी[कः]ससाध्वसमिवाश्रमम् ॥७॥

'जरती०' व्याख्या । स शक्रः अर्जुना**श्रमम्** अर्जुनमुनिस्थानं **ससाध्वसं** सभयमिव **चकार** इव तेजस्विदर्शनाद् भयं भवति तत्तु न दुःखजनकं तेषां मानुषत्वादिति सूचयितुमिवशब्द इति । स किं० ? **आक्रान्तलक्ष्मीकः** पराभूताश्रमशोभः स किंकुर्वाणः ? **जरतीं** जीर्णां **तनुं** शरीरं वार्धक्योपलक्षितां **बिभ्राणः** दधानः पुनः किं० सः ? **अप्राकृताकृतिः** उत्तमजनाकृतिः । अथ समासः । अप्राकृता इव

आकृतिर्यस्य स अ० । आक्रान्ता लक्ष्मीर्येन स आ० । सह साध्वसेन वर्त्तते यत्तत् ससाध्वसम्। इति वृत्तार्थः ॥७॥

अभितस्तं पृथासूनुः स्नेहेन परितस्तरे । अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः ॥८॥

'अभि०' व्याख्या । **पृथासूनुरर्जुनः तमिन्द्रम् अभितः** अभिलक्ष्यीकृत्य **स्नेहेन** प्रेम्णा **परितस्तरे** व्याप्तः नन्वज्ञातसंबन्धविशेषस्य तस्येन्द्रे कथं स्नेहोदय इत्यत आह- **हि** इति निश्चितं **बन्धौ** स्वजने **अविज्ञातेऽपि** बन्धुरयम् इत्यज्ञातमपि **मनः** चेतः **बलात्** हठात् बान्धवसत्तावशादेव **प्रह्लादते** प्रीतिं भजते। अथ समासः । पृथायाः सूनुः पृथासूनुः । इति वृत्तार्थः ॥ ८ ॥

आतिथेयीमथासाद्य सुतादपचितिं हरिः । विश्रम्य विष्टरे नाम व्याजहारेति भारतीम् ॥९॥

'आतिथेयी०' व्याख्या । **अथ** अर्जुनाश्रमं प्रति आगमानन्तरं **हरिरिन्द्र इति** वक्ष्यमाणप्रकारेण **भारतीं** वाचं **व्याजहार** उवाच किंकृत्वा ? **सुतात्** अर्जुनात् **आतिथेयीम्** अतिथियोग्याम् **अपचितिं** पूजाम् **आसाद्य** प्राप्य पुनः किंकृत्वा ? **नाम** इत्यलीके **विष्टरे** आसने **विश्रम्य** उपविश्य श्रमापनयनं कृत्वेत्यर्थः। अथ समासः । अतिथिषु योग्या आतिथेयी ताम् आ० । इति वृत्तार्थः ॥ ९ ॥

अथ तावन्मुनिवदेनं मुमुक्षुम् उद्दिश्य इन्द्रः किमुवाच इत्याह -

त्वया साधु समारम्भि नवे वयसि यत्तपः । ह्रियते विषयैः प्रायो वर्षीयानपि मादृशः ॥१०॥

'त्वया०' व्याख्या । हे अर्जुन ! हे तपस्विन् ! **त्वया** भवता **साधु** सम्यक् रुचिरं **समारम्भि** प्रारब्धं कुतः ? **यत्** यस्मात् कारणात् त्वया **नवे** नूतने **वयसि** यौवने **तपः** कृच्छाचरणं चर्यते इति शेषः। तथाहि **प्रायः** स्वभावेन **मादृशः** मत्सदृशः **वर्षीयान्** 'प्रियस्थिर०' इत्यादिना वृद्धशब्दस्य वर्षादेशः अतिवृद्धोऽपि **विषयैः** स्रक्चन्दनवनितादिभोगैः **ह्रियते** आकृष्यते त्वं तु महाप्रभावोऽसि यतो विषयैर्नाह्रियते इति भावः। अथ समासः । अहमिव दृश्यते इति मादृशः । इति वृत्तार्थः ॥१०॥

अथायं तवाकारोऽपि न विफलः इत्याशयेनाह -

श्रेयसीं तव संप्राप्ता गुणसंपदमाकृतिः । सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ॥११॥

'श्रेय०' व्याख्या । हे साधो ! **तवाकृतिः** मूर्तिः रम्येति शेषः । **श्रेयसीं** श्रेष्ठां कल्याणीं **गुणसंपदं** गुणसमृद्धिं तपःसमारम्भरूपां प्राप्ता न निष्फलेति भावः । **हि** यस्मात् कारणात् **लोके रम्यता** मनोहरता **सुलभा** सुप्रापा पुन**र्गुणार्जनं** गुणोपार्जनं तु **दुर्लभं** दुष्प्रापं त्वयि तु उभयमपि संपद्यते । इति हेम्नः सौरभ्यमिति भावः । अथ समासः । गुणानां संपत् गुणसंपत् तां गु० । रम्यस्य भावो रम्यता । गुणानाम् अर्जनं गु० । इति वृत्तार्थः ॥ ११ ॥

संसारस्यानित्यत्वं युग्मेनाह -

शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः । आपातरम्या विषयाः पर्यन्तपरितापिनः ॥ १२ ॥

'शर०' व्याख्या । **यौवनश्रियः** तारुण्यलक्ष्म्यः **शरदम्बुधरच्छायागत्वर्यः** शरत्कालीनमेघच्छायावत् गमनशीलाः चञ्चला इत्यर्थः । पुनः **विषया** भोगाः शब्दादयस्तु **आपातरम्याः** तत्कालरम्याः तत्काल-रमणीया इत्यर्थः । 'आपातः पाततत्कालेऽपि' इति *हैमानेकार्थः* [३-२३४] । पुनः किं० विषयाः ? **पर्यन्तपरितापिनः** अवसाने दुःखदायिनः । अथ समासः । शरदोऽम्बुधरः शरदम्बुधरः शरदम्बुधरस्य छाया शरदम्बुधरच्छाया शरदम्बुधरच्छायावत् गत्वर्यः श० । यौवनस्य श्रियः यौ० । आपाते रम्याः आ० । पर्यन्ते परितापयन्ति इत्येवंशीलाः प० । इति वृत्तार्थः ॥१२॥

अन्तकः पर्यवस्थाता जन्मिनः संततापदः । इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः ॥१३॥

'अन्त०' व्याख्या । **इति** हेतोः **भव्यो** योग्यो **जनो** लोकः **त्याज्ये** त्यजनीये त्यक्तुं योग्ये **भवे** संसारे **मुक्तौ** मोक्षे **उत्तिष्ठते** उद्यमं कुरुते इतीति किम् ? **संततापदः** निरन्तरकष्टस्य **जन्मिनः** प्राणिनः **अन्तको** यमः **पर्यवस्थाता** परिरोद्धा शत्रुरूप इत्यर्थः । प्रथमं तावत् प्राणिनो जन्मोत्पत्तिर्दुःखमेव दुस्तरं ततो जातस्य जीवनमपि सततं दुःखमिश्रिततया विषयुक्तान्नप्रायं तदपि मृत्युग्रस्तमिति सोऽयं 'काकमांसं शुनोच्छिष्टं [दुर्गन्धं क्रिमिसंकुलम् । म्लेच्छपक्वं सुरासिक्तं] स्वल्पं तदपि दुर्लभम् ॥६६॥' इति न्यायादिति भावः । अथ समासः । संततम् आपत् यस्य स संततापत् तस्य सं० । इति वृत्तार्थः ॥१३॥ ॥यु०॥

संप्रति प्रशंसापूर्वकं स्वाभिसन्धिं दर्शयति -

चित्तवानसि कल्याणी यत्त्वां मतिरुपस्थिता । विरुद्धः केवलं वेषः संदेहयति मे मनः ॥१४॥

'चित्त०' व्या० । हे अर्जुन ! त्वं **चित्तवान्** प्रशस्तचित्तः **असि** वर्तसे **यद्**यस्मात्कारणात् **त्वां कल्याणी** साध्वी **मतिर्बुद्धिः उपस्थिता** संगता प्राप्ता किन्तु ते तव **वेषः केवल**मेकं यथा स्यात्तथा **मे** म[म] **मन**श्चित्तं **संदेहयति** संदेहमुत्पादयति किं० वेषः ? **विरुद्धः** यद्वा वेषः केवलं वेष एव इत्यर्थः । इति वृत्तार्थः ॥ १४ ॥

वेषविरोधमेवाह -

युयुत्सुनेव कवचं किमामुक्तमिदं त्वया । <u>तपस्विनो हि वसने केवलाजिनवल्कले</u> ॥१५॥

'युयु०' व्याख्या । हे अर्जुन ! तपस्विन् ! **युयुत्सुनेव** योद्धुमिच्छतेव त्वया **इदम्** एतत् **कवचं** सन्नाहं **किं** कथम् **आमुक्तं** गृहीतं यथा योद्धुमिच्छता पुरुषेण कवचं गृह्यते तद्वदिति को विरोध इत्यत्राह - **हि** निश्चितं **तपस्विनो** मुनेः **केवलाजिनवल्कले** केवलं मृगचर्मवल्कले **वसने** वस्त्रे परिधाने भवत इति शेषः । न तु कवचमित्यर्थः । वसत[1] इति पाठे वसते आच्छादयन्ति । अतः तपस्विनः कवचधारणं विरुद्धमित्यर्थः । अथ समासः । योद्धुमिच्छतीति युयुत्सति युयुत्सतीति युयुत्सुः तेन यु० । अजिनं च

1. एष पाठः म. मध्ये ।

वल्कलं च अजिनवल्कलं केवले च ते अजिनवल्कले च के० । इति वृत्तार्थः ॥ १५ ॥

प्रपित्सोः किं च ते मुक्तिं निःस्पृहस्य कलेवरे । महेषुधी धनुर्भीमं भूतानामनभिद्रुहः ॥१६॥

'प्रपि०' व्याख्या । हे अर्जुन ! **ते** तव **कलेवरे** देहे [**निःस्पृहस्य** गर्तस्पृहस्य] **महेषुधी** महान्तौ तूणौ **किं** किमर्थम् **च** पुनः **भीमं** रौद्रं **धनुः** चापं किं किमर्थम् । किं० ते ? **मुक्तिं** मोक्षं **प्रपित्सोः** प्राप्तुमिच्छोः पुनः किं० ते ? [२] **भूतानां** प्राणिनाम् **अनभिद्रुहः** अहिंसकस्य हितकारिण इत्यर्थः । अथ समासः । निर्गता स्पृहा यस्मात् स निःस्पृहस्तस्य नि० । महान्तौ च तौ इषुधी च म० । इति वृत्तार्थः ॥१६॥

भयङ्करः प्राणभृतां मृत्योर्भुज इवापरः । असिस्तव तपःस्थस्य न समर्थयते शमम् ॥१७॥

'भयं' व्याख्या । **असिः** खड्गः **तपःस्थस्य** तपसि वर्तमानस्य तपस्यायां स्थितस्येत्यर्थः । **तव** ते **शमं** क्षमां न **समर्थयते** न संभावयति न प्रतिपादयतीत्यर्थः । शान्तस्य किं शस्त्रेणेति भावः । किं० असिः ? **प्राणभृतां** जन्तूनां **भयङ्करो** भयदः भयोत्पादक इत्यर्थः । पुनः किं० असिः ? उत्प्रेक्ष्यते **मृत्योर्**यमस्य **अपरो** द्वितीयो **भुजो** बाहुरिव स्थितः भयङ्करत्वात् भुजस्योपमानम् । अथ समासः । भयङ्करोतीति भयङ्करः । प्राणान् बिभ्रतीति प्राणभृतस्तेषां प्रा० । तपसि तिष्ठतीति तपःस्थस्तस्य त० । इति वृत्तार्थः ॥१७॥ (यु०)

नन्वशान्तस्य किं तपसेत्याशङ्क्य जयार्थमित्याह -

जयमत्र भवान्नूनमरातिष्वभिलाषुकः । क्रोधलक्ष्म क्षमावन्तः क्वायुधं क्व तपोधनाः ॥१८॥

'जय०' व्याख्या । **नूनं** निश्चितं **भवान्** त्वम् **अत्र** संसारे **अरातिषु** शत्रुषु **जयम् अभिलाषुकः** वाञ्छको वर्तते द्वौ **क्व**शब्दौ महदन्तरं सूचयतः । हे अर्जुन ! **क्रोधलक्ष्म** कोपसूचकम् **आयुधं** शस्त्रं क्व **क्षमावन्तो** दयावन्तस्**तपोधनाः** मुनयः क्व न क्वापि, क्रोधशान्त्योर्विरोधात् । तत्कार्ययोः शस्त्रतपसोरप्येकत्रासंगतेः । शस्त्रेण ते तपो जयार्थं न तु मोक्षार्थम् इति निश्चय उभयमपि न संघटते इति भावः । अथ समासः । क्रोधस्य लक्ष्म क्रो० । क्षमा विद्यते येषां ते क्ष० । तप एव धनं येषां ते त० । इति वृत्तार्थः ॥ १८ ॥

तपसो जयार्थत्वे दोषमाह -

यः करोति वधोदर्का निःश्रेयसकरीः क्रियाः । ग्लानिदोषच्छिदः स्वच्छाः स मूढः पङ्कयत्यपः ॥१९॥

'यः क०' व्या. । **स मूढः** स मूर्खः **ग्लानिदोषच्छिदः** श्रमदोषहारिणीः पिपासाहारिणीर्वा **स्वच्छाः** निर्मलाः **अपो** जलानि **पङ्कयति** पङ्कवतीः **करोति** कलुषयतीत्यर्थः । स कः ? **यः निःश्रेयसकरीः** मोक्षमार्गविधायिनीः **क्रियास्**तपोदानादिकाः **वधोदर्का** हिंसाफलकाः करोति । अथ समासः । वध एव उदर्को यासां ता व० । निःश्रेयसं कुर्वतीति नि० । ग्लानिरेव दोषः ग्लानिदोषः ग्लानिदोषं च्छिन्दन्तीति

१. अतो नात्मरक्षार्थं धनुर्धारणं युक्तम् -म. । २. नापि परहिंसार्थमित्याह -म.

ग्लानिदोषच्छिदः । इति वृत्तार्थः ॥ १९ ॥

कथं कामार्थौ न पोषणीयावित्याशङ्क्याह -

मूलं दोषस्य हिंसादेरर्थकामौ स्म मा पुषः । तौ हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ ॥२०॥

'मूलं०' व्याख्या । हे अर्जुन ! त्वम् **अर्थकामौ मा स्म पुषः** नोपचिनुष्व किं० अर्थकामौ ? **हिंसादेः** 'दोषस्य मूलम्' उत्पत्तिस्थानम् आदिशब्दादनृतस्तेयादीनां संग्रहः **दोषस्या**वगुणस्य **मूलं** कारणभूतौ इत्यर्थः । यतः 'स्त्रीकामा धनकामाश्च किं न कुर्वन्ति पातकम् (६७) इति वचः । **हि** यस्मात् कारणात् **तौ** अर्थकामौ **तत्त्वावबोधस्य** तत्त्वविज्ञानस्य मोक्षसाधनभूतस्येति शेषः । **दुरुच्छेदौ** दुर्वारौ **उपप्लवौ** हिंसादिप्रवर्तकत्वात् अन्तकौ अन्तकारिणौ अतः पुरुषार्थपरिपन्थिनावेतौ न पुरुषार्थावित्यर्थः । अथ समासः । अर्थश्च कामश्च अर्थकामौ । तत्त्वस्य अवबोधो यस्य स तत्त्वावबोधस्तस्य त० । इति वृत्तार्थः ॥२०॥

मुक्तिप्रतिबन्धकत्वादपुरुषार्थावर्थकामावित्युक्तम्, तत्रार्थस्य दुःखैकनिदानत्वादप्यपुरुषार्थत्वमिति पञ्चभिः श्लोकैः प्रपञ्चयति -

अभिद्रोहेण भूतानामर्जयन् गत्वरीः श्रियः । उदन्वानिव सिन्धूनामापदामेति पात्रताम् ॥२१॥

'अभि०' व्याख्या । हे मुने ! स पुरुषः **आपदां** विपदां **पात्रतां** पात्रत्वम् **एति** प्राप्नोति क्लेशानां पात्रं भवतीत्यर्थः । स किंकुर्वन् ? **भूतानां** प्राणिनाम् **अभिद्रोहेण** हिंसया **गत्वरीः** अस्थिराः गमनशीलाः **श्रियो** लक्ष्मीः संपदः **अर्जयन्** उपार्जयन् क इव ? उदन्वा**निव** यथा **उदन्वान्** समुद्रः **सिन्धूनां** नदीनां पात्रताम् एति । अथ समासः । उदकमस्यास्तीति उ० । पात्रस्य भावः पात्रता तां पा० । इति वृत्तार्थः ॥२१॥

आपत्पात्रतामेव व्यनक्ति -

या गम्याः सत्सहायानां यासु खेदो भयं यतः । तासां किं यन्न दुःखाय विपदामिव संपदाम् ॥२२॥

'या ग०' व्याख्या । हे मुने ! किं बहुना **तासां संपदां** संबन्धि तत्किमस्ति **यत् दुःखाय न भवति** अपि सर्वं दुःखावहमेवेत्यर्थः । यतः-

"अर्थानामर्जने दुःखमर्जितानां च रक्षणे । नाशे दुःखं व्यये दुःखं धिगर्थो दुःखभाजनम् ॥"
इति अतो हेतोः हेया इति भावः । किं० संपदाम् ? उत्प्रेक्ष्यते **विपदामिव** यथा विपदां सर्वमपि उद्वेगाय भवति। **याः** संपदः **सत्सहायानां** विद्यमानसहायानामेव पुंसां **गम्याः** प्राप्याः विपदोऽपि सत्सहायैः अतिवाहितुम् अतिक्रमितुं शक्यन्ते । **यासु** संपत्सु सत्सु 'खेदो' भवति **खेदः** रक्षणादिक्लेशः । **यतः** याभ्यो संपद्भ्यः **भयम्** अनेकानर्थमूलत्वादिति भावः । विपदस्तु स्वरूपतो भयमिति भावः। इति वृत्तार्थः ॥२२॥

दुरासदानरीनुग्रान् धृतेर्विश्वासजन्मनः । भोगान् भोगानिवाहेयानध्यास्यापन्न दुर्लभा ॥२३॥

'दुरा०' व्याख्या । हे मुने ! **भोगान्** विषयान् **अध्यास्य** आश्रित्य **आपत्** विपत् **न दुर्लभा**

किन्तु सुलभैव भोगिनं पुमांसम् आपत् बलादनुसन्दधातीत्यर्थः । किं० भोगान् ? उत्प्रेक्ष्यते **आहेयान्** सर्पसंबधिनो **भोगान्** देहान् **इव** पुनः किं० भोगान् ? **दुरासदान्** दुष्प्रापान् पुनः किं० भो० ? **धृतेः** सन्तोषस्य **उग्रान्** उत्कटान् **अरीन्** शत्रून् धनिकस्य सर्वत्रानाश्वाससम्भवाद्विस्रम्भसुखभञ्जकानित्यर्थः । किं० धृतेः ? **विश्वासजन्मनः** विश्वासोत्पन्नायाः । अथ समासः । दुःखेन आसाद्यन्ते इति दुरासदास्तान् दु० । विश्वासात् जन्म यस्याः सा विश्वासजन्मा तस्याः वि० । भुज्यन्त इति भोगास्तान् भोगान् । अहिषु भवा आहेयास्तान् आ० । इति वृत्तार्थः ॥ २३ ॥

इतोऽपि श्रियो हेया इत्याह -

नान्तरज्ञाः श्रियो जातु प्रियैरासां न भूयते । आसक्तास्तास्वमी मूढा वामशीला हि जन्तवः ॥२४॥

'नान्त०' व्याख्या । हे मुने ! **श्रियो** लक्ष्म्यः **अन्तरज्ञाः** नीचानीचविशेषज्ञा **न** भवन्ति गुणिनमपि विहाय निर्गुणमाश्रयन्ते इत्यर्थः । अत एव **जातु** कदाचित् **आसां** लक्ष्मीनां **प्रियैः** वल्लभैः **न भूयते** न ताः कुत्राप्यनुरज्यन्तीत्यर्थः । ननु श्रीदोषो न पुरुषदोष इति चेत्तत्राह- अभीष्टा न भवन्ति केऽपि आसाम् **अमी मूढा** अविवेकिनो जनाः **तासु** पूर्वोक्तदोषयुक्तास्वपि अपिरध्याहार्यः । **आसक्ता** अनुरक्ता अतो मूढत्वात् पुंसामेवायं दोष इत्यर्थः । किमर्थं तर्हि तासु लक्ष्मीषु आसक्ताः भवन्तीत्यत्रार्थान्तरं न्यस्यति- **हि** निश्चितं **जन्तवः** प्राणिनः **वामशीला** वक्रस्वभावा भवन्ति । स्वभावस्य दुर्वारत्वादित्यर्थः । अथ समासः। अन्तरं जानन्ति ते अ० । वामं शीलं येषां ते वा० । इति वृत्तार्थः ॥ २४ ॥

[1]कोऽपवादः स्तुतिपदे यदशीलेषु चञ्चलाः । साधुवृत्तानपि क्षुद्रा विक्षिपन्त्येव संपदः ॥२५॥

'कोऽप०' व्याख्या । **यत्संपदः** श्रियः **अशीलेषु** अविनयेषु दुःशीलेषु विषये **चञ्चलाः** चपलाः तत् **स्तुतिपदे** स्तुतिविषये स्तवनस्थाने **कोऽपवादः** का निन्दा न कापीत्यर्थः । इयं स्तुतिरेव न निन्देति भावः। एताः **क्षुद्रा** रन्ध्रान्वेषिण्यः संपदः **साधुवृत्तान्** सदाचारान् **अपि विक्षिपन्त्येव** अपहरन्त्येव तदेवासां निन्दापदमेवेत्यर्थः । तस्मादर्थो न पुरुषार्थ इति संदर्भार्थः । अथ समासः । स्तुतेः पदं स्तुतिपदं तस्मिन् स्तु० न शीला अशीलास्तेषु अशीलेषु । साधुवृत्तं येषां ते सा० तान् साधुवृत्तान् । इति वृत्तार्थः ॥२४॥

ननु नार्थमह[म]र्थये, किन्तु विरुद्ध(वीर)धर्ममनुपालयन् वैरनिर्यातनमिच्छामीत्याशङ्क्य तदपि परपीडात्मकत्वादयुक्तमिति श्लोकचतुष्टयेनाचष्टे तत्रात्मदृष्टान्तेनैव परपीडातो निवर्तितव्यमित्याशयेनाह -

कृतवानन्यदेहेषु कर्ता च विधुरं मनः । अप्रियैरिव संयोगो विप्रयोगः प्रियैः सह ॥२६॥

'कृत०' व्याख्या । **प्रियैः सह** वल्लभैः सार्द्धं **विप्रयोगो** विरहः **अन्यदेहेषु** स्वस्यैव देहान्तरेष्विव अतीतानागतेष्विति शेषः । **मनश्चित्तं** **विधुरं** दुःखितं **कृतवान्** चकार **च** पुनः **कर्ता** करिष्यति क इव ? अप्रियैः सह **संयोगो** मेलापक **इव** यथा **अप्रियैः** अहितकारिभिः जनैः सार्धं संयोगो मनः विधुरं चित्तं

---

१. यदुक्तं 'नान्तरज्ञाः' (का० २४) तदेव भङ्गी-अन्तरेणाह -म ।

दुःखितं कृतवान् च कर्ता च अयमभिसन्धिः-यथात्मनो विप्रयोगो इष्टवस्तुवियोगो विरहो मनःसंतापकारी तथा परस्यापीति बोधव्यम् । तस्मात्परपीडनान्निवर्तितव्यमिति । अथ समासः । अन्येषां देहाः अन्यदेहास्तेषु अ० । इति वृत्तार्थः ॥ २६ ॥

इदानीं प्रियसमागमे सति सुखहेतुत्वं दर्शयति -

शून्यमाकीर्णतामेति तुल्यं व्यसनमुत्सवैः । विप्रलम्भोऽपि लाभाय सति प्रियसमागमे ॥२७॥

'शून्य०' व्याख्या । **प्रियसमागमे** इष्टसंयोगे **सति शून्यं** रिक्तमपि **आकीर्णतां** संकीर्णताम् **एति** प्राप्नोति समृद्धमिव प्रतीयते । किं च **व्यसनं** कष्टम् **उत्सवैः तुल्यं** समानं भवति **विप्रलम्भोऽपि** वञ्चनापि **लाभाय** भवति किं बहुना ? प्रियसंगमस्य सर्वावस्थास्वपि सुखमेवेत्यर्थः । अथ समासः । आकीर्णस्य भाव आकीर्णता तामा० । प्रियस्य समागमः प्रियसमागमः तस्मिन् प्रि० । इति वृत्तार्थः ॥ २७ ॥

पुनः प्रकारान्तरेण प्रियवियोगस्य दुःखदायित्वं प्रतिपादयन्नाह -

तदा रम्याण्यरम्याणि प्रियाः शल्यं तदासवः । तदैकाकी सबन्धुः सन्निष्टेन रहितो यदा ॥२८॥

'तदा०' व्याख्या । यः पुमान् **यदा** यस्मिन् काले **इष्टेन** वस्तुना धनादिना **रहितो** भवति तेन त्यक्तो भवतीत्यर्थः । **तदा रम्याण्यरम्याणि** मनोहराणि अमनोहराणि किं बहुना [**प्रियाः**] अभीष्टा **असवः** प्राणाः अपि **तदा शल्यं** शल्यवदसह्या भवन्ति तदा **सबन्धुः सन्** बन्धुसहितः सकलज्ञातिः **एकाकी** असहायो भवति । अथ समासः । सह बन्धुभिर्वर्तते यः सः सबन्धुः । सहार्थे बहुव्रीहिः । इति वृत्तार्थः ॥२८॥

युक्तः प्रमाद्यसि हितादपेतः परितप्यसे । यदि नेष्टात्मनः पीडा मासञ्जि भवता जने ॥२९॥

'युक्त०' व्याख्या । हे अर्जुन ! **त्वं युक्तो** हितोपेतः सन् हितेन इष्टेन युक्तः सन् प्राप्ताभिलाषः सन् **प्रमाद्यसि** प्रकर्षेण हृष्यसि **हितात्** इष्टात् **अपेतो** रहितः सन् **परितप्यसे** परितापं करोषि दुःखितो भवसीत्यर्थः । तपेर्दैवादिकात् यप्रत्ययः । सत्यमेवं ततः किम् ? अत आह- **यदि आत्मनः** स्वस्य पीडा **न इष्टा** न वल्लभा तर्हि **भवता** त्वया **जने** लोके **पीडा मासञ्जि** मा कारि आत्मदृष्टान्तेन परपीडातो निवर्तितव्यं पीडायाः परात्मनोः समत्वादिति भावः ॥ २९ ॥ (च. क.)

अथ देहास्थैर्यश्रद्धया च परपीडा न कार्येत्याह -

जन्मिनोऽस्य स्थितिं विद्वाँल्लक्ष्मीमिव चलाचलाम् ।
भवान्मा स्म वधीन्न्याय्यं <u>न्यायाधारा हि साधवः</u> ॥३०॥

'जन्मि०' व्याख्या । हे अर्जुन ! यद[र्थम]र्थमीहसे तदेव अशाश्वतमित्येतद्दर्शयितुमाह-**भवान्** त्वं **न्याय्यं** साधुकर्म्म धर्मपथं [**मा स्म वधीत्**] मा नाशयेत् त्वं किंकुर्वन् ? **अस्य जन्मिनः** प्राणिनः

स्थितिमवस्थानं **लक्ष्मीमिव चलाचलाम्** अतिशयेन अस्थिरां **विद्वान्** जानन् अयमभिसन्धिः-एवं ज्ञात्वा त्वं मुक्तिमार्गं विहाय संसारदशायां मा विशेति तात्पर्यार्थः । **हि** यस्मात् कारणात् **साधवः** सज्जनाः **न्यायाधाराः** न्यायावलम्बाः भवन्ति । न्यायत्यागे साधुत्वमेव न स्यादिति भावः । अथ समासः । जन्मास्यास्तीति जन्मी तस्य जन्मिनः । चला च अचला च चलाचला तां च० । न्यायादनपेतं न्याय्यम् । न्याय एवाधारो येषां ते न्या० । इति वृत्तार्थः ॥ ३० ॥

किं तर्हि कर्तव्यं तत्राह -

विजहीहि रणोत्साहं मा तपः साधु नीनशः । उच्छेदं जन्मनः कर्तुमेधि शान्तस्तपोधन ! ॥३१॥

'विजही०' व्याख्या । हे **तपोधन** ! पुण्याचरणस्त्वं **रणोत्साहं** संग्रामोद्यमं **विजहीहि** त्यज लोकोत्तरेषु कार्येषु स्थेयान् प्रयत्नः उत्साहः । **साधु** शोभनं समीचीनं श्रेयस्करत्वात् त्वं **तपः** कृच्छ्रादिकर्म **मा नीनशः** मा विनाशय किन्तु **जन्मनः** संसारस्य **उच्छेदं कर्तुं** विनाशं कर्तुं मोक्षं साधयितुम् इति शेषः । **शान्तो** विजिगीषानिवृत्तः **एधि** भव । अथ समासः । रणस्य उत्साहः रणोत्साहः तं र० । तप एव धनं यस्य स तपोधनस्तस्य संबोधनं हे तपोधन ! । इति वृत्तार्थः ॥ ३१ ॥

सर्वथा शत्रुविजयेन चेत्तव प्रयोजनं तर्हि शत्रुविजयोपायं शृणु इत्याह -

जीयन्तां दुर्जया देहे रिपवश्चक्षुरादयः । जितेषु ननु लोकोऽयं तेषु कृत्स्नस्त्वया जितः ॥३२॥

'जीयन्तां०' व्याख्या । हे अर्जुन ! हे तपोधन ! त्वया **देहे** शरीरे **दुर्जया** अजेयाः दुरभिभवाः **चक्षुरादयः रिपवः** शत्रवः **जीयन्तां** देहे वर्तमानाश्चेद्रिपवो न जीयन्ते तर्हि बहिस्थाः शत्रवः कथं जेतुं शक्या इत्यर्थः । **ननु तेषु** चक्षुरादिषु रिपुषु **जितेषु** किं स्यादित्याह- तेषु चक्षुराद्यन्तःशत्रुषु जितेषु पराभूतेषु सत्सु **त्वया कृत्स्नो**ऽपि समस्तोऽपि **अयं लोको**ऽयं जनो **जितः** वशीकृतः किमुतान्ये शत्रवस्तदन्तर्गता इत्यर्थः। अथ समासः । दुःखेन जीयन्ते इति दुर्जयाः । चक्षुरादि येषां ते चक्षुरादयः । इति वृत्तार्थः ॥३२॥ अजितेन्द्रियस्यानिष्टमाचष्टे -

परवानर्थसंसिद्धौ नीचैर्वृत्तिरपत्रपः । अविधेयेन्द्रियः पुंसां गौरिवैति विधेयताम् ॥३३॥

'पर०' व्याख्या । **अविधेयेन्द्रियः** अजितेन्द्रियः **पुसां** पुरुषाणां मध्ये **गौः** वृषभ **इव विधेयतां** सेवकतां यथोक्तकारितां वश्यतामित्यर्थः । [**एति** प्राप्नोति] किं० अविधेयेन्द्रियः पुमान् बलीवर्दश्च ? **अर्थसंसिद्धौ** अभ्यव्यवहारादिस्वार्थसाधने प्रयोजननिष्पत्तौ च **परवान्** परायत्तश्च पुनः किं० अवि० पुमान् बलीवर्दश्च ? **नीचैर्वृत्तिः** नीचवृत्तिः कर्षणवहनादिनिकृष्टकर्मा गौरपि गोणीवहनादौ नियुक्तो भवति। पुनः किं० अ० ? **अपत्रपः** निर्लज्जः । अथ समासः । परो विद्यते यस्यासौ परवान् । अर्थस्य संसिद्धिः अर्थसंसिद्धिः तस्याम० । नीचैर्वृत्तिर्यस्य स नी० । अपगता त्रपा यस्यासौ अ० । न विधेयानि अविधेयानि अविधेयानि इन्द्रियाणि यस्यासौ अ० । विधेयस्य भावो विधेयता तां वि० । इति वृत्तार्थः ॥ ३३ ॥

न केवलं हिंसादिदोषमूलत्वाद्विषयाणां हेयत्वं किन्तु अपारमार्थिकत्वादपीत्याह -

श्वस्त्वया सुखसंवित्तिः स्मरणीयाधुनातनी । इति स्वप्नोपमान्मत्वा कामान्मा गास्तदङ्गताम् ॥३४॥

'श्व०' व्याख्या । **इति कामान्** विषयान् **स्वप्नोपमान् मत्वा** स्वप्नतुल्यान् ज्ञात्वा अतात्त्विकान्निश्चित्य **तदङ्गतां** कामवश्यतां कामपरतन्त्रताम् इत्यर्थः । **मा गाः** मा यासीः इतीति किम् ? **अधुनातनी** इदानीन्तनी **सुखसंवित्तिः** सुखानुभूतिः **श्वः** कल्ये परेऽह्नि **त्वया स्मरणीया** स्मर्या न तु अनुभवनीया । अथ समासः । सुखानां संवित्तिः सु० । अधुना भवा अ० । स्वप्नस्य उपमा येषां ते स्वप्नोपमास्तान् स्व० । यद्वा स्वप्नैरुपमीयन्ते इति स्वप्नोपमास्तान् स्व० । काम्यन्ते इति कामास्तान् कामान् । तेषाम् अङ्गता तदङ्गता तां त० । इति वृत्तार्थः ॥ ३४ ॥

अतो हेतोः हेयाः कामा इत्याह -

श्रद्धेया विप्रलब्धारः प्रिया विप्रियकारिणः । सुदुस्त्यजास्त्यजन्तोऽपि कामाः कष्टा हि शत्रवः ॥३५॥

'श्रद्धे०' व्याख्या । **हि** निश्चितं **कामाः** विषयाः **कष्टाः** कष्टकारिणः **शत्रवो** वैरिणो प्रसिद्धशत्रुभ्यो विलक्षणा वर्तन्ते इत्यर्थः । तदेव विरुद्धविशेषणैः प्रतिपादयन्नाह- किं० कामाः ? **श्रद्धेयाः** विश्वासनीयाः तथा हि **विप्रलब्धारः** वञ्चकाः प्रतारकाः विश्वासघातेन इत्यर्थः । पुनः किं० कामाः ? **प्रिया** प्रीतिजनकाः सन्तः **विप्रियकारिणो** दुःखोत्पादनशीलाः पुनः किं० कामाः ? **त्यजन्तोऽपि** पुरुषं विहाय गच्छन्तोऽपि **सुदुस्त्यजाः** स्वयं त्यक्तुमशक्याः । यस्मात् यो विरुद्धमाचरति स शत्रुः नान्यच्छत्रुलक्षणमिति । अथ समासः । श्रद्धातुमर्हाः श्रद्धेयाः । प्रीणयन्तीति प्रियाः विप्रियं कुर्वन्तीति वि० । सुतरां दुस्त्यजाः सु० । इति वृत्तार्थः ॥ ३५ ॥

तर्हि किमत्र मे कर्तव्यमित्याशङ्क्योपसंहरन्नाह -

विविक्तेऽस्मिन्नगे भूयः पाविते जह्नुकन्यया । प्रत्यासीदति मुक्तिस्त्वां पुरा मा भूरुदायुधः ॥३६॥

'विवि०' व्याख्या । हे तपस्विन् ! **अस्मिन् नगे** इन्द्रकीले पर्वते **मुक्ति**र्मोक्षः संनिकृष्यति मुक्तिः समीपे वर्तते इत्यर्थः । **त्वां प्रत्यासीदति पुरा** निकटे 'पुरा पुराणे निकटे' इति *विश्वः* । किं० नगे ? **विविक्ते** जनरहिते एकान्ते पुनः किं० नगे ? **भूयः** पुनरपि **जह्नुकन्यया** गङ्गया **पाविते** पवित्रीकृते 'प्ला[1]विते' इति पाठस्तत्र सिक्ते हे अर्जुन ! त्वम् अत **उदायुधः** उद्यतशस्त्रो **मा भूः** मा भूयाः आयुधानि परित्यज्य तपः कुर्वित्युपदेशः । अथ समासः । जह्नोः कन्या जह्नुकन्या तया ज० । उद्यतानि आयुधानि येन स उ० । इति वृत्तार्थः ॥ ३६ ॥

व्याहृत्य मरुतां पत्याविति वाचमवस्थिते । वचः प्रसन्नगम्भीरमथोवाच कपिध्वजः ॥३७॥

'व्याह०' व्याख्या । **अथ** इन्द्रवचनानन्तरं **कपिध्वजो**ऽर्जुनो **वचो** वचनम् **उवाच** कथयामास किं० वचः ? **प्रसन्नगम्भीरं** विनयमधुरं 'विनयप्रश्रयौ समौ' इति *यादवः* । क्वचित् 'प्र[2]श्रयगम्भीरम्' इति पाठस्तत्र प्रश्रयगुणयुक्तं गम्भीरं च महार्थमिति । कस्मिन् सति ? **मरुतां पत्यौ** इन्द्रे **इति** अमुना

1. एष पाठः म. मध्ये, इदं च पाठान्तरं तत्र टीकाकृता एव सूचितम् । 2. एष पाठः म. मध्ये

प्रकारेण **वाचं** वाक्यं **व्याहृत्य** उक्त्वा **अवस्थिते** तूर्ष्णींस्थिते सति । अथ समासः । प्रसन्नेन गम्भीरं प्र० । कपिर्ध्वजो यस्य स कपिध्वजः । इति वृत्तार्थः ॥ ३७ ॥

किं बभाषे इत्याकाङ्क्षायां प्रथमं चतुर्भिः श्लोकैः इन्द्रवाक्यं स्तुवन्नाह -

प्रसादरम्यमोजस्वि गरीयो लाघवान्वितम् । साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम् ॥३८॥

'प्रसा०' व्याख्या । किं० वचः ? **प्रसादरम्यं** प्रसिद्धार्थपदत्वं प्रकटार्थपदत्वं तेन रम्यं 'प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते' इति लक्षणात् (६९) । पुनः किं० ? **ओजस्वि** समासभूयिष्ठम् 'ओजः समास-भूयस्त्वम्' इति शासनात् (७०) । पुनः किं० वचः ? **गरीयः** अर्थभरितं न तु शब्दाडम्बरमात्रम्। पुनः किं० वचः ? **लाघवान्वितं** विस्तारदोषवर्जितं यद्गरीयः तद्विस्तारवद् भवतीति नियमात्तन्न पुनः किं० वचः ? **साकाङ्क्षम्** अभिलषनीयम् आकाङ्क्षावत्पदकदम्बात्मकं न तु दशदाडिमादिवाक्यवत् कुतर्कयुक्तमित्यर्थः । पुनः किं० वचः ? **अनुपस्कारम्** अध्याहारदोषवर्जितं पुनः किं० वचः ? **विश्वगति** विश्वव्यापि कृत्स्नार्थप्रतिपादकं न तु सावशेषार्थम् । पुनः किं० वचः ? अत एव **निराकुलम्** आकुलतारहितम् असंकीर्णार्थमित्यर्थः । अथ समासः । प्रसादेन रम्यं प्र० । ओजो विद्यते यस्मिन् तत् ओजस्वि । अतिशयेन गुरु गरीयः । लाघवेन अन्वितं ला० सह आकाङ्क्षया वर्तते यत्तत् साकाङ्क्षम् । न उपस्कारो यस्मिन् तत् अ० । विष्वग्गतिर्यस्मिन् तत् वि० । इति वृत्तार्थः ॥ ३८ ॥

न्यायनिर्णीतसारत्वादनपेक्षमिवागमे । अप्रकम्पतयाऽन्येषामाम्नायवचनोपमम् ॥ ३९ ॥

'न्याय०' व्याख्या । पुनः किं० वचः ? **न्यायनिर्णीतसारत्वादनपेक्षं** युक्तिनिश्चलत्वात् प्रसन्न**मिव स्थितं** कस्मिन् **आगमे** शास्त्रविषये निरपेक्षमिति[1] पाठस्तत्र आगमे शास्त्रविषये निरपेक्षं स्वतन्त्रमिव **स्थितं** कस्मात् न्यायनिर्णीतसारत्वात् न्यायो न्यायशास्त्रं नीतिशास्त्रं वा तेन निर्णीतः सारो यस्य तत् तस्य भावः तस्मात् निश्चितार्थाद् हेतोः निरपेक्षमित्यर्थः । युक्तिदार्ढ्यात् प्रतीयते वस्तुतस्तु शास्त्रसिद्धार्थमेवेतीवशब्दार्थः । पुनः किं० वचः ? **अन्येषां** प्रतिवादिनाम् **अप्रकम्पतया** अप्रत्याक्षेपतया अचाल्यतया **आम्नायवचनोपमं** वेदवाक्यतुल्यम् । अथ समासः । न्यायेन निर्णीतं सारं यस्य तत् न्यायनिर्णीतसारं न्यायनिर्णीतसारस्य भावः न्यायनिर्णीतसारत्वं तस्मात् न्या० । न प्रकम्पः अप्रकम्पः अप्रकम्पस्य भावोऽप्रकम्पता तया अ० । आम्नायवचनेन उपमीयते तत् आ० । इति वृत्तार्थः ॥ ३९ ॥

अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम् । औदार्यादर्थसंपत्तेः शान्तं चित्तमृषेरिव ॥४०॥

'अलं०' व्याख्या । पुनः किं० वचः ? **अन्यैः जनैः अलङ्घ्यत्वात्** दुर्ल्लङ्घनीयत्वात् **क्षुभितोदन्वदूर्जितम्** उद्वेलसमुद्रवत् गम्भीरं यथा क्षुभितोऽपि समुद्रः जनैर्दुर्लङ्घ्यः तद्वदित्युपमा । पुनः किं० वचः ? उत्प्रेक्ष्यते औदार्याद् उक्तिविशेषात् **अर्थसंपत्तेः** अन्यत्राणिमादिसिद्ध्या **ऋषेर्मुनेः शान्तं चित्तमिव** उपशान्त[ता]युक्तमानसमिव । अथ समासः । क्षुभितश्चासौ उदन्वांश्च क्षुभितोदन्वा

1. एषोऽपि म. मध्ये ।

क्षुभितोदन्ववत् उर्जितं यस्य तत् क्षु० । अर्थस्य संपत्तिः अर्थसंपत्तिस्तस्याः अ० । इति वृत्तार्थः ॥४०॥

इदमीदृग्गुणोपेतं लब्धावसरसाधनम् । व्या[1]कुर्यात् कः प्रियं वाक्यं यो वक्ता नेदृगाशयः ॥४१॥

'इद०' व्याख्या । **इदम् ईदृग्गुणोपेतं** यथोक्तगुणयुक्तं **वाक्यं** वचनं **कः व्याकुर्यात्** को ब्रूयात् किं० वाक्यम् ? **लब्धावसरसाधनं** प्राप्तकार्योपायं पुनः किं० वाक्यम् ? **प्रियं** वल्लभं **यो वक्ता ईदृगाशयो न** भवति ईदृग्विधाशयो बुद्धिमान् क्षमो वा न भवति स ईदृशं वाक्यं वक्तुं न जानातीत्यर्थः । तदेव वाक्यं विशिनष्टि । अथ समासः । ईदृग्गुणैः उपेतम् ईदृग्गुणोपेतम् । अवसरश्च साधनं च अवसरसाधने लब्धे अवसरसाधने येन तत् ल० । ईदृग् आशयो यस्य स ई० । इति वृत्तार्थः ॥४१॥ [कुलकम्]

एवमिन्द्रवाक्यमुपश्लोक्य नाहमस्योपदेशस्याधिकारीति परिहरति -

न ज्ञातं तात ! यत्नस्य पौर्वापर्यममुष्य ते । शासितुं येन मां धर्मं मुनिभिस्तुल्यमिच्छसि ॥४२॥

'न ज्ञातं०' व्याख्या । **हे तात** ! हे पूज्य ! 'पुत्रे पूज्ये च पितरि तातशब्दं प्रचक्षते' इति (७१) । **अमुष्य** अस्य **यत्नस्य** तपोरूपमहायोगप्रयाशस्य **पौर्वापर्यं ते** त्वया **न ज्ञातं** न अवसितं त्वया न ज्ञायते इत्यर्थः । कुतो न ज्ञायते ? इत्याह- **येन** कारणेन **मां मुनिभिः** ऋषिभिः **तुल्यं** समानं **धर्ममा**चारं मोक्षधर्मं वा **शासितुम्** उपदेष्टुम् **इच्छसि** वाञ्छसि शासिरयं धातुर्दुहादित्वाद्द्विकर्मकः । पौर्वापर्यानभिज्ञ एवेदं धर्मम् उपदिशति इत्यर्थः । अथ समासः । पूर्वापरे एव पौर्वापर्यम् । इति वृत्तार्थः ॥ ४२ ॥

अथ पौर्वापर्यमज्ञात्वाप्युपदेशे दोषमाह -

अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि । व्रजत्यफलतामेव नयद्रुह इवेहितम् ॥ ४३ ॥

'अवि०' व्याख्या । हे तात ! **अविज्ञातप्रबन्धस्य** अज्ञातपूर्वापरसंगतः(तस्य) **वाचस्पतेः** बृहस्पतेरपि **वचः** उपदेशवचनम् **अफलतां** निष्फलत्वं **व्रजति** प्रयाति निरर्थकत्वं यातीत्यर्थः । अपिशब्दः अन्यस्य का कथेतिद्योतनार्थः । कस्य किमिव ? 'नयद्रुह इवेहितम्' **इव** यथा **नयद्रुहो** नीतिं परित्यज्य वर्तमानस्य पुंसः **ईहितं** चेष्टितम् अफलतां **व्रजति** याति । नीतिविरुद्धकारिणः पुंसो यत्नो विफलतां व्रजत्येवेत्युपमा । अथ समासः । अविज्ञातः प्रबन्धो येन स अविज्ञातप्रबन्धस्तस्य अ० । इति वृत्तार्थः ॥४३॥

ननु सदुपदेशस्य कुतो वैफल्यमित्याशङ्क्य सोऽप्यस्थाने प्रयुक्त ऊषरक्षेत्रोप्तशालिबीजवद्विफल एवेत्याशयेनाह -

श्रेयसोऽप्यस्य ते तात ! वचसो नास्मि भाजनम् । नभसः स्फुटतारस्य रात्रेरिव विपर्ययः ॥४४॥

'श्रेय०' व्याख्या । **हे तात** ! अहं **श्रेयसोऽपि** हितार्थयोगात् प्रशस्ततरस्यापि **अस्य ते** तव **वचसो** हितोपदेशरूपवाक्यस्य **भाजनं** पात्रं **नास्मि** स्थानं न भवामीत्यर्थः । यद्यपि ते वाक्यं प्रशस्ततरं भवति तथापि तस्य नाहं योग्य इत्यर्थः । कस्य क इव ? **स्फुटतारस्य** दीप्ततारकस्य **नभसो** गगनस्य

१. तुलना - इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ? ॥ किरात० २-२८

रात्रेर्विपर्ययो दिवस इव यथा रात्रेर्विपर्ययः नभसो भाजनं न भवति । उभयत्राप्यनधिकारित्वादिति भावः । अत्राह्नो नभसो मात्रसंबन्धसंभवेऽपि तारासंबन्धासंभवात्तद्विशिष्टनभःसंबन्धनिषेधो युक्तः । तारकितस्य नभसो न पात्रं भवतीत्युपमा । अथ समासः । अतिशयेन प्रशस्यं श्रेयस्तस्य श्रेयसः । स्फुटा तारा यस्मिन् तत् स्फुटतारं तस्य स्फु० । इति वृत्तार्थः ॥ ४४ ॥

कुतस्ते मोक्षोपदेशानधिकारित्वं किं च ते तपसः पौर्वापर्यमित्यपेक्षायां तत्सर्वं स्वजात्यादिकथनपूर्वकं निरूपयति -

क्षत्रियस्तनयः पाण्डोरहं पार्थो धनञ्जयः । स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥४५॥

'क्षत्रि०' । व्याख्या । कथं न भाजनमित्याह-अहं **क्षत्रियो** राजन्योऽस्मि क्षत्रियः कदाचिदन्यो भविष्यतीत्याह- पुनः **पाण्डोः** पाण्डुभूपस्य **तनयः** पुत्रोऽस्मि पाण्डुपुत्रोऽपि यस्यां तस्याम् उत्पन्नो भवेत् नेत्याह- पुनः **पार्थः** कुन्तीपुत्रोऽस्मि एतेन माद्रेयनिरासः । पार्थोऽपि अन्यः कश्चित् भविष्यसि नेत्याह- पुनः **धनञ्जयो**ऽर्जुनोऽस्मि उत्तरकुरून् जित्वा धनाहरणाद् धनञ्जयोऽस्मीत्यर्थः एतेन युधिष्ठिरादिनिरासः । प्राक् अथैवमिति चेत् तर्हि किमर्थं तपस्यसि मोक्षार्थं वा किं न ? तत्राह- तपस्यानिमित्तमित्याह अहं **ज्येष्ठस्य भ्रातु**र्युधिष्ठिरस्य **शासने** निर्देशे **स्थितः** सहितोऽस्मि तदाज्ञया तपस्यामीत्यर्थः । किं० भ्रातुः ? **दायादैः** 'दायादो ज्ञातिपुत्रयोः' 'विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिणः' इति *विश्वः* । गोत्रजैः **प्रास्तस्य** राज्यात्तिरस्कृतस्य तस्य जयार्थं तपस्यामीत्यर्थः । अन्यथा मानहानिः सौभ्रात्रभङ्गःपूज्यपूजाव्यतिक्रमदोषश्च स्फुरतीति भावः । अत एव हिंसैकरसिकस्य रागद्वेषकषायितचेतसो मे कुतो मोक्षाधिकारः इति तात्पर्यम् । अथ समासः । क्षतात् त्राता क्षत्रियः । पृथाया अपत्यं पार्थः । दायं पैतृकं धनम् आदद्म इति दायादास्तैः दायादैः । इति वृत्तार्थः ॥ ४५ ॥

तर्हि यदुक्तम्-'विरुद्धः केवलं वेषः' (का० १४) तर्हि शस्त्रधारणं कस्मादित्याशङ्काहरणमाह -

कृष्णद्वैपायनादेशात् बिभर्मि व्रतमीदृशम् । भृशमाराधने यत्नः स्वाराध्यस्य मरुत्वतः ॥४६॥

'कृष्ण०' व्याख्या । **कृष्णद्वैपायनादेशात्** व्यासवचनात् अहम् **ईदृशं** विरुद्धवेषं धनुर्धारणादिलक्षणं **व्रतं** तपोनियमं **बिभर्मि** धारयामि न तु स्वेच्छया इति भावः । एवंविधतपसोपास्यां देवतामाह-**स्वाराध्यस्य** सुखेन आराधितुं शक्यस्य **मरुत्वतः** इन्द्रस्य **भृशं** सम्यग् **आराधने** प्रसाधने **यत्नः** प्रयासो वर्तते इति शेषः । तस्य क्षत्रियस्य दैवतत्वादिति भावः । अथ समासः । द्वीपमयनं स्थानं जन्मभूमिः यस्य द्वीपायनः द्वीपायन एव द्वैपायनः कृष्णवर्णत्वात् कृष्णः कृष्णश्चासौ द्वैपायनश्च कृष्णद्वैपायनः कृष्णद्वैपायनस्य आदेशः कृष्णद्वैपायनादेशस्तस्मात् कृ० । सुतरामाराध्यते इति स्वाराध्यस्तस्य स्वा० । इति वृत्तार्थः ॥ ४६ ॥

ननु भवादृशभ्रातृसहायसंपन्नस्य स्वयं महावीरस्य युधिष्ठिरस्य कथम् अरिपरिभवप्राप्तिरित्यत आह -

दुरक्षान् दीव्यता राज्ञा राज्यमात्मा वयं वधूः । नीतानि पणतां नूनमीदृशी भवितव्यता ॥४७॥

'दुर०' व्याख्या । **दुरक्षान्** कुत्सितान् पाशान् कपटपाशैरित्यर्थः । **दीव्यता** क्रीडता 'आहतो न

निवर्तेत द्यूतादपि रणादपि' इति शास्त्रात् (७२) [न तु] व्यसनितयेति भावः । **राज्ञा** युधिष्ठिरेण एतानि सर्वाणि वस्तूनि **पणतां** ग्लहत्वम् 'पणोऽक्षेषु ग्लहोऽक्षास्तु देवनाः पाशकाश्च ते' इत्*यमरः* । तानि कानि ? **राज्यं** राष्ट्रम् **आत्मा** स्वयं **वयं** चत्वारो भ्रातरः **वधू**र्जाया द्रौपदी च **नीतानी**तिसंबन्धः राज्ञेति साभिप्रायं पदं साधु असाधु वा कर्म कुर्वाणं राजानं निवारयितुं न कोऽपि समर्थः इत्यर्थः । ननु तादृशविवेकिनो राज्ञः कथमियमविमृश्यकारिता जाता तत्रेत्याह- **नूनं** निश्चितं **भवितव्यता** अर्थानामवश्यं-भाविता **ईदृशी** एतादृशी भवति बुद्धिरपि भवितव्यतानुसारिण्येव भवति न स्वतन्त्रेत्यर्थः । अथ समासः । दुष्टाश्च ते अक्षाश्च दुरक्षाः तान् दु० । दीव्यतीति दिव्यन् तेन दी० । पणस्य भावः पणता तां प० । इति वृत्तार्थः ॥४७॥

ननु तथापि तवै[व] तेषु आसङ्गो न तेषां त्वयीत्याह -

तेनानुजसहायेन द्रौपद्या च विना मया । भृशमायामियामासु यामिनीष्वभितप्यते ॥४८॥

'तेना०' व्याख्या । **तेन** राज्ञा युधिष्ठिरेण **मया** अर्जुनेन **विना** कृते मद्विरहादित्यर्थः । **आयामियामासु** दीर्घप्रहरासु **यामिनीषु** रात्रिषु **भृश**मत्यर्थम् **अभितप्यते** संतप्यते संतापः प्राप्यत इत्यर्थः । सुदुःखितस्य रात्रयो महन्त्यः सत्यो न यान्तीत्यर्थः । तर्हि किम् एकाकिना नेत्याह - किं० तेन ? **अनुजसहायेन** सभ्रातृभीमादिकेन अनुजयुक्तेनेत्यर्थः । तथा अनुजा अपि तप्यन्तीत्यर्थः । तुल्ययोगः सहायार्थः एतदुक्तं भवति मम वियोगात् राज्ञा भ्रातृभिः **द्रौपद्या** च अभितप्यते अत एतान् उपेक्ष्य कथं तवोपदेशं करोमीति भावः। अथ समासः। अनुजाः सहायाः यस्य स अनुजसहायस्तेन अ० । आयामिनो यामा यासु ताः आयामियामास्तासु आ० । इति वृत्तार्थः ॥ ४८ ॥

अथ वैरिनिर्यातनस्यावश्यंभावद्योतनाय चतुर्भिः श्लोकैः परापकृतिं दर्शयति । परनिकारान् वर्णयति-

हृतोत्तरीयान् प्रसभं सभायामागतह्रियः । मर्मच्छिदा नो वचसा निरतक्षन्नरातयः ॥ ४९ ॥

'हृतो०' व्याख्या । **अरातयो** वैरिणो **मर्मच्छिदा** मर्मच्छेदिना **वचसा** वाक्येन **नो**ऽस्मान् **निरतक्षन्** अपीडयन् पीडयामासुरित्यर्थः । किं० अस्मान् ? **प्रसभं** बलात्कारेण **हृतोत्तरीयान्** गृहीतपरिधानवस्त्रान् पुनः किं० अस्मान् ? अत एव **सभायां** सदसि **आगतह्रियः** संप्राप्तलज्जान् वस्त्राद्यपहारवाक्यपारुष्याभ्यां व्यथयामासुरित्यर्थः । अथ समासः । हृतानि उत्तरीयाणि येषां ते हृतोत्तरीयास्तान् हृतो० । आगता ह्रीर्येषां ते आ० । मर्माणि च्छिनत्तीति मर्मच्छित् तेन म०। इति वृत्तार्थः ॥ ४९ ॥

अर्थात् दुःसहं निकारान्तरमाह -

उपाधत्त सपत्नेषु कृष्णाया गुरुसन्निधौ । भावमानयने सत्याः सत्यङ्कारमिवान्तकः ॥५०॥

'उप०' व्याख्या । **अन्तको** यमः **सपत्नेषु** शत्रुषु विषये **कृष्णायाः** द्रौपद्याः **आनयने** केशाम्बरकर्षणे **भावं** चित्ताभिप्रायं वाञ्छां वा **गुरुसंनिधौ** भीष्मद्रोणादिसमक्षम् **उपाधत्त** निहितवान् तेषां विनाशकाले विपरीतबुद्धिम् उत्पादितवानित्यर्थः । किं० द्रौपद्याः ? **सत्याः** पतिव्रतायाः यद्वा अकारप्रश्लेषे **असत्याः**

अप्रशस्तायाः रजस्वलाया इत्यर्थः । किं० भावम् ? उत्प्रेक्ष्यते **सत्यङ्कारं** सत्यंकारमिव यूयं मया क्रीताः इति क्रियादौ सत्यदाढ्र्याय प्राग्दीयमानो मूल्यैकदेशः सत्यङ्कार इत्यर्थः । अथ समासः । गुरूणां संनिधिः गुरुसंनिधिस्तस्मिन् गु० । क्रियते अनेनेति कारः करणे घञ् सत्यस्य कारः सत्यङ्कारस्तं सत्यङ्कारं 'कारे सत्यागदस्य' इति मुमागमः । इति वृत्तार्थः ॥ ५० ॥

केनेयं आकृष्टा सभ्यैर्वा किं कृतं तत्राह -

तामैक्षन्त क्षणं सभ्या दुःशासनपुरस्सराम् । अभिसायार्कमावृत्तां छायामिव महातरोः ॥५१॥

'तामै०' व्याख्या । **सभ्याः** सभासदो जनाः **तां** द्रौपदीं **दुःशासनपुरस्सरां** दुर्योधनानुजाग्रसरां **क्षणं** मुहूर्तमात्रम् **ऐक्षन्त** अपश्यन् किं० ताम् ? तथोक्तां सभां प्रति दुःशासनेनाकृष्यमाणामिति शेषः । कमिवैक्षन्त ? **अभिसायार्कं** दिनान्तसूर्याभिमुखं स्थितस्येति शेषः । 'सायो नाशदिनान्तयोः' इति *विश्वः* । **महातरोः** महद्वृक्षसंबन्धिनी**मावृत्तां** परिवृताम् आच्छादितां **छायामिव** क्षणमैक्षन्त न तु चिरं जुगुप्सितत्वात् । नापि किंचिद्व्याप्रियन्त माध्यस्थभङ्गभयात् । ते त्वर्कवदेव साक्षित्वमात्रमास्थिता इत्यर्थः । अत्राकृष्यमाणायाः द्रौपद्याः आकृष्टारं प्रति पराङ्मुखत्वादावृत्तछायौपम्यम् । तथापि तां न मुञ्चतीति दुःशासनस्य तरुसाम्यं तेन सभ्याः सायार्कतुल्याः । दुःशासनो महाक्रमतुल्यः । तस्य पश्चात् स्थिता द्रौपदी छायातुल्या । अथ समासः । सभायां साधवः सभ्याः । दुःशासनः पुरस्सरो यस्याः सा दुःशासनपुरस्सरा तां दु० । सायमर्कः सायार्कः सायार्कम् अभि इति अभिसायार्कम् । महांश्चासौ तरुश्च महातरुस्तस्य म० । इति वृत्तार्थः ॥५१॥

[१]अथास्याः पतित्वमतः अयाथार्थ्यं वर्णयति -

अयथार्थक्रियारम्भैः पतिभिः किं निरीक्षितैः । अरुध्येतामितीवास्या नयने बाष्पवारिणा ॥५२॥

'अय०' व्याख्या । **अस्याः** द्रौपद्याः **नयने** लोचने **बाष्पवारिणा** अश्रुजलेन **इतीव** इत्थं विचार्येव **अरुध्येताम्** आवृत्ते अशरणा रुरोदेत्यर्थः । बाष्पवारिणा इति कर्तृपदं नयने कर्मपदम् । इतीति किम् ? **अयथार्थक्रियारम्भैः** मिथ्याभूतपतिशब्दप्रवृत्तिनिमित्तकर्मोद्योगैः त्वां द्रौपदीम् अरक्षद्भिरित्यर्थः । **पतिभिः** भर्तृभिः **निरीक्षितैः** विलोकितैः **किं** किं प्रयोजनं पतयो लोचनाभ्याम् आवाभ्यां न दृष्टव्याः तेन दृष्टैः न किञ्चित्फलमस्तीति भावः । अथ समासः । अयथार्थाः क्रियारम्भा येषां ते अयथार्थक्रियारम्भास्तैः अ० । पान्ति रक्षन्तीति पतयस्तैर्प० । बाष्पस्य वारि बाष्पवारि तेन बा० । इति वृत्तार्थः ॥ ५२ ॥

भवद्भिरीदृशी दुरवस्था कस्मात् सोढेत्याह -

सोढवान्नो दशामन्त्यां ज्यायानेव गुणप्रियः । सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्ववाच्यता ॥५३॥

1. तवेक्षितैः -म. इदं च पा० ।

१. अथास्यास्तादात्मिकमायथार्थ्यं वर्णयति -म. ।

'सोढ०' व्याख्या । **नोऽस्माकं ज्यायानेव** ज्येष्ठभ्रातैव युधिष्ठिर एव **अन्त्याम्** अन्तिमां **दशाम**वस्थां निकृष्टां दशां **सोढवान्** न वयं सोऽपि किमसामर्थ्यात् सोढवान्नेत्याह- किं० ज्यायान् ? **गुणप्रियः** गुणवल्लभः **हि** यस्मात् कारणात् **द्विषां** शत्रूणां **भङ्गो** उच्छेदः **सुलभः** कालान्तरेऽपि इति शेषः । परं **सत्सु** उत्तमजनेषु **अवाच्यता** अनि[१]न्द्यता **दुर्लभा** । अथ समासः । अतिशयेन वृद्धो ज्यायान् । गुणाः प्रिया यस्य स गुणप्रियः प्रियगुणो वा 'प्रियस्य' इति परनिपातः । अवाच्यस्य भावोऽवाच्यता । इति वृत्तार्थः ॥५३॥

ननु वैरिवधे राज्ञो को नामापवादः प्रत्युत कीर्तिरेवेत्याशङ्क्य, सत्यं, स एव समयोल्लङ्घन-कलङ्कितकीर्त्या महानिन्दानिदानमित्याशयेनाह -

स्थित्यतिक्रान्तिभीरूणि स्वच्छान्यक[1]लितानि च । तोयानि तोयराशीनां मनांसि च मनस्विनाम् ॥५४॥

'स्थित्य०' व्याख्या । **तोयराशीनां** जलनिधीनां **तोयानि** जलानि **च** पुनः **मनस्विनाम्** अभिमानिनाम् उत्तमानां **म[नां]सि** चित्तानि एवंविधानि [**स्थित्यतिक्रान्तिभीरूणि** मर्यादोल्लङ्घनाद् भीरूणि] पुनः किं० मनांसि ? **स्वच्छानि** रागादिदोषराहित्येन निर्मलानि किं० तोयानि ? [**स्वच्छानि**] अकलुषाणि निर्मलानि पुनः किं० मनांसि ? **अकलितानि** अपरिच्छेद्यानि अकलनीयानीत्य[२]र्थः । अथ समासः । अतिक्रमणमतिक्रान्तिः स्थित्या अतिक्रान्तिः स्थित्यतिक्रान्तिः स्थित्यतिक्रान्त्या भीरूणि स्थि० । तोयानां राशयो येषु ते तोयराशयस्तेषां तो० । प्रशस्तं मनो येषां ते मनस्विनस्तेषां मनस्विनाम् । इति वृत्तार्थः ॥५४॥

ननु अजातशत्रोः स्वजनवैरे किं कारणम् इत्याशङ्क्यास्य सौहार्दमेवेत्याह -

धार्तराष्ट्रैः सह प्रीतिर्वैरमस्मास्वसूयताम् । असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥५५॥

'धार्त०' व्याख्या । **धार्त्तराष्ट्रैः** दुर्योधनादिभिः **सह** सार्धं **प्रीति**र्मैत्री **अस्मासु** विषये **वैरं** विरोधम् **असूयतां** जनितवती ननु सौहार्दं वैरजनकं चेत्तर्हि विप्रतिषिद्धं तत्राह- **हि** यस्मात् कारणात् **असन्मैत्री** खलमैत्री दुर्जनसंगतिः **दोषाय** अनर्थाय भवति न खलु दुर्जनः सुजनमित्रद्रोहपातकं पश्यतीति भावः । केव ? कूलच्छा**येव** यथा **कूलच्छाया** आसन्नपातनदीतटच्छाया **सेविता** श्रिता सती नियतमुपरिपत-नादपकाराय भवति तद्व[दि]त्यर्थः । अथ समासः । असतां मैत्री असन्मैत्री । इति वृत्तार्थः ॥ ५५ ॥

नन्वादावेव तेषां वृत्तिमविज्ञाय कथं मैत्री कृतेत्याशङ्क्य किं कुर्मो दुर्जनवृत्तं दुर्विज्ञानमित्याह -

अपवादादभीतस्य समस्य गुणदोषयोः । असद्वृत्तेरहो वृत्तं दुर्विभा[2]व्यं विधेरिव ॥ ५६ ॥

'अप०' व्याख्या । **अहो** इति आश्चर्ये **असद्वृत्तेः** दुराचारस्य धूर्तस्य **वृत्त**माचरणं **विधे**र्दैवस्य

1. ०न्याकुलितान्यपि -म. । 2. दुर्विभावं -म. इदं च पा. ।

१. अवाच्यता - अनिन्द्यता दुर्लभा, न तु शत्रूपेक्षा । हिः प्रसिद्धौ । शत्रूपेक्षातो लोकापवाद एव बलवान् तस्योत्पन्नस्य पुनरप्रतिविधेयत्वात् स च समयोल्लङ्घने स्यादेवेति भावः -म. । २. अत्र तोयानां सामान्यतो मनस्विनां चापकृतानामेव गुणतौल्यादौपम्यस्य गम्यतया तुल्ययोगितालंकारः गुणश्चात्र भीरुत्वं स्वच्छता च. -म. ।

वृत्तमिव दुर्विभाव्यं ज्ञातुमशक्यं वर्तते किं० असद्वृतेः ? **अपवादात्** अपयशोभयात् **अभीतस्य** न भयं प्राप्तस्य निन्दाभयमुक्तस्य पुनः किं० अस० ? **गुणदोषयोः समस्य** समानस्य विधावप्येतद्विशेषणं योज्यम्। अथ समासः । गुणश्च दोषश्च गुणदोषौ तयोर्गु० । असती वृत्तिर्यस्यासौ असद्वृत्तिस्तस्य अ०। इति वृत्तार्थः ॥ ५६ ॥

ध्वंसेत हृदयं सद्यः परिभूतस्य मे परैः । यद्यमर्षः प्रतीकारं भुजालम्बं न लम्भयेत् ॥५७॥[1]

'ध्वंसे०' व्याख्या । **परैः** शत्रुभिः **परिभूतस्य** पराभूतस्य **मे** मम **सद्यस्**तत्कालमेव **हृदयं ध्वंसेत** पतेत् **यदि** चेत् **अमर्षः** क्रोधः कर्ता **प्रतीकारं** प्रतिक्रियारूपं **भुजालम्बं** हस्तग्रहणं **न लम्भयेत्** न प्रापयेत्[2]। अथ समासः । भुजाया आलम्बः भुजालम्बस्तं भु० । इति वृत्तार्थः ॥ ५७ ॥

ननु तवैव कोऽयमभिमानः शत्रुषु तत्राह -

अवधूयारिभिर्नीता हरिणैस्तुल्यवृत्तिताम् । अन्योऽन्यस्यापि जिह्रीमः किं पुनः सहवासिनाम् ॥ ५८॥

'अव०' व्याख्या । **अरिभिः** वैरिभिः **अवधूय** अवगणय्य **हरिणैः** कुरङ्गैः सह **तुल्यवृत्तितां** समानवृत्तितां तुल्यजीवनत्वं वन्याहारतां च **नीता** प्रापिता सन्तो वयं पञ्चापि हरिणा इव वने चरामः तेन **अन्योऽन्यस्यापि** परस्परस्यापि **जिह्रीमः** लज्जामहे **किं पुनः सहवासिनां** सहचारिणां सेवकानां मध्ये इत्यर्थः । अत्र वयं पञ्चापि तुल्याभिमाना एव । इदं तु मदेकसाध्यं कर्म्मेति मुनिशासनान्मयानुष्ठीयते इति भावः । अथ समासः । तुल्या चासौ वृत्तिश्च तुल्यवृत्तिः तुल्यवृत्तेर्भावः तुल्यवृत्तिता तां तु० । अन्यश्च अन्यश्च अन्योऽन्यं तस्य अन्योऽन्यस्य । सह वसन्तीति सहवासिनस्तेषां स० । इति वृत्तार्थः ॥ ५८ ॥

कथमन्योऽन्यस्य लज्जध्वम् इत्याशङ्क्याह -

शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः । जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥५९॥

'शक्ति०' व्याख्या । **मानहीनस्य** उन्नतिरहितस्य **जन्मिनः** प्राणिनः **च** पुनः **तृणस्य समा गतिः** तुल्यावस्था वर्तते उभयोर्न कोऽपि विशेषोऽस्तीत्यर्थः । किं० प्राणिनः ? **शक्तिवैकल्यनम्रस्य** उत्साहादिशक्तिराहित्येन नम्रस्य अशक्तितया प्रणतस्येत्यर्थः । पुनः किं० प्राणिनः ? **निःसारत्वाल्लघीयसः** दुर्बलत्वात् गौरवहीनस्य पुनः किं० जनस्य तृणस्य चावस्था समेति । [मानहीनस्य] तृणादपि निकृष्टत्वान्न त्याज्यो मान इति भावः[3] । अथ समासः । शक्तेः वैकल्यं शक्तिवैकल्यं शक्तिवैकल्येन नम्रः शक्तिवैकल्यनम्रस्तस्य श० । निर्गतः सारो यस्मात् तत् निःसारं निःसारस्य भावो निःसारत्वं तस्मात् नि० । अतिशयेन लघुर्लघीयान् तस्य ल० । मानेन हीनः मानहीनस्तस्य मा० । इति वृत्तार्थः ॥५९॥

मानत्यागे दोषमुक्त्वा तत्सद्भावे षड्भिः श्लोकैः गुणमाह -

अलङ्घ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृतः । प्रियतां ज्यायसीं मा गान्महतां केन तुङ्गता ॥६०॥

---

१. नन्वेवं मानी कथं परिभूतो जीवसि ? तत्राह- इत्यवतरणिका म. । २. हृदयेनेति शेषः । सत्यं, जीवामि प्रतिविधित्सया न तु निर्लज्जतयेति भावः -म. । ३. श्लेषालंकारोऽयं तदनुप्राणितेयमुपमेत्यनेकार्थदीपिकेति व्यज्यते -म.

'अलङ्घ्य०' व्याख्या । **महीभृतः** पर्वतस्य संबन्धि **यत् यत्** शृङ्गम् अधिकम् **उच्चैरुन्नतं तत् तत् अलङ्घ्यम्** अनतिक्रमणीयमेव **उद्वीक्ष्य** उत्प्रेक्ष्य तर्कयित्वेति यावत् । **महताम्** उत्तमानां **तुङ्गता** मानोन्नत्यम् उच्चैस्तरता **केन** कारणेन **ज्यायसीं** प्रेयसीं **प्रियताम्** अतिप्रियत्वं **मा गात्** मा यासीत् सर्वप्रकारेणापि प्रियत्वं यातीत्यर्थः । अथ समासः । न लङ्घ्यम् अलङ्घ्यम् । प्रियस्य भावः प्रियता तां प्रियताम् । अतिशयेन वृद्धा ज्यायसी तां ज्यायसीम् । तुङ्गस्य भावस्तुङ्गता । इति वृत्तार्थः ॥ ६० ॥

तावदाश्रीयते लक्ष्म्या तावदस्य स्थिरं यशः । पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥६१॥

'ताव०' व्याख्या । **लक्ष्म्या** श्रिया **तावत्** तावत्कालं पुमान् **आश्रीयते** सेव्यते लक्ष्म्या भाजनं भवतीत्यर्थः । **अस्य** पुरुषस्य **तावत् स्थिरं यशः** वर्तते यशोवान् भवति । **तावत् एव असौ पुरुषः** पुरुषत्वेन गण्यते । **यावत् मानात्** अहंकारात् **न हीयते** न भ्रश्यति मानहीनस्य पुरुषस्य न किंचिच्छुभमस्ति । तस्मान्मानस्य रक्षणं विधेयम् इति भावः । अथ समासः । तिष्ठतीति **स्थिरम्** । इति वृत्तार्थः ॥६१॥

स पुमानर्थवज्जन्मा यस्य नाम्नि पुरः स्थिते । नान्यामङ्गुलिमभ्येति संख्यायामुद्यताङ्गुलिः ॥६२॥

'स पु०' व्याख्या । **स पुमान् अर्थवज्जन्मा** सार्थकजीवितः अन्वर्थजन्मवानित्यर्थः । सः कः ? **यस्य** पुरुषस्य **नाम्नि पुरो**ऽग्रे **स्थिते** सति **संख्यायां** पुरुषगणनाप्रस्तावे **उद्यता** गुण्यं पुरुषम् अधिकृत्योन्नमिता **अङ्गुलिः अन्यां** द्वितीयाम् **अङ्गुलिम्** उद्यतामिति शेषः । **न अभ्येति** न प्राप्नोति अद्वितीयत्वादस्येत्यर्थः । एतन्मानहीनस्य न संभवतीति भावः । अथ समासः । अर्थेन तुल्यम् अर्थवत् अर्थवत् जन्म यस्य स अ० । इति वृत्तार्थः ॥ ६२ ॥

सर्वस्मात् उन्नतात् मानोन्नतस्य विशेषं दर्शयितुमाह -

दुरासदवनज्यायान् गम्यस्तुङ्गोऽपि भूधरः । न जहाति महौजस्कं मानप्रांशुमलङ्घ्यता ॥६३॥

'दुरासद०' व्याख्या । **दुरासदवनज्यायान्** दुष्प्रापवनैर्ज्यायान् प्रवृद्धः श्रेष्ठो वा **तुङ्गोऽपि** उच्चैस्तरोऽपि **भूधरः** पर्वतः **गम्यो** अवगाहनीयो गन्तुम् उल्लङ्घयितुं शक्यो वर्तते । **अलङ्घ्यता** अतिक्रमणीयता **महौजस्कं** तेजस्विनं महाबलिष्ठं वा **मानप्रांशुं** मानोन्नतं जनं **न जहाति** न त्यजति न कदाचिल्लङ्घयितुं शक्यत इत्यर्थः । तस्मात्पुरुषेणौन्नत्यमाश्रयणीयं गिरेरपि गरीयान्मानाधिकभावः[१] । अथ समासः । दुःखेन आसाद्यन्ते तानि दुरासदानि दुरासदानि च तानि वनानि च दुरासदवनानि दुरासदवनैर्ज्यायान् दु० । महत् ओजो यस्य स महौजस्कस्तं म० । मानेन प्रांशुः मानप्रांशुस्तं मा० । न लङ्घ्यता अलङ्घ्यता । इति वृत्तार्थः ॥६३॥

गुरून्कुर्वन्ति ते वंश्यानन्वर्था तैर्वसुन्धरा । येषां यशांसि शुभ्राणि ह्रेपयन्तीन्दुमण्डलम् ॥६४॥

'गुरू०' व्याख्या । **ते** जनाः **वंश्यान्** पूर्वजान् **गुरून्** महतः **कुर्वन्ति** गुरुत्वं प्रापयन्ति स्वेन

---

१. अत्रोपमानाद्भूधरादुपमेयस्य मानिनो धर्मान्तरसाम्येऽप्यलङ्घ्यत्वेनाधिक्यकथनाद्व्यतिरेकालंकारः -म. ।

नाम्ना प्रथयन्ति रघुदिलीपादिवदित्यर्थः । तैर्जनैः इयं **वसुन्धरा** भूमिः **अन्वर्था** वसुभूतानां धारणात् सार्थकाभिधाना जाता **तैरेव** नरैः उत्तमैः पुरुषैरित्यर्थः । वसुशब्दो रत्नवाची । ते के ? **येषां शुभ्राणि** धवलानि **यशांसि इन्दुमण्डलं** चन्द्रमण्डलं **ह्रेपयन्ति** लज्जयन्ति निष्कलङ्कत्वात् तेन पुरुषरत्नवत्त्वं पृथिव्याः सूचितम्[1] । अथ समासः । वंशे भवा वंश्यास्तान् वंश्यान् । वसूनि धारयतीति वसुन्धरा । अनुगता अर्था येषां ते अन्वर्थाः। इन्दोर्मण्डलम् इ० । इति वृत्तार्थः ॥ ६४ ॥

उदाहरणमाशीःषु प्रथमे ते मनस्विनाम् । शुष्काशनिरिवामर्षो यैररातिषु पात्यते ॥ ६५ ॥

'उदा०' व्याख्या । **ते** पुरुषाः **मनस्विनां** मानिनां प्रशस्तचेतसां **प्रथमे** अग्रेसराः श्रेष्ठा प्रधाना इत्यर्थः। 'प्रथमः स्यात्प्रधानाद्योः' इति *हैमानेकार्थः* [३-४६०] । सन्तः **आशीःषुः** विजयीभव विजयस्वेत्याद्याशीर्वादेषु **उदाहरणं** निदर्शनं भवन्ति रामादिवदुपमानं भवतीत्यर्थः । अतो न त्याज्यो मान इति संदर्भार्थः । ते के ? **यैः** पुरुषैः **अमर्षः** कोपः **अरातिषु** शत्रुषु **शुष्के** काष्ठे **अशनिः** ज्वलन् वज्रमिव **पात्यते** निपात्यते प्रक्षिप्यते इत्यर्थः । यथा वृक्षेषु वज्रं पतति तद्वदित्यर्थः । अथ समासः । उदाह्रियते इति उदाहरणम् । प्रशस्तं मनो येषां ते मनस्विनः तेषां मनस्विनाम् । इति वृत्तार्थः ॥ ६५ ॥

'अभिद्रोहेण भूतानाम्' इति (का.२१) यदुक्तं तत्रोत्तरमाह-

न सुखं प्रार्थये नार्थमुदन्वद्वीचिचञ्चलम् । नानित्यताशनेस्त्रस्यन्विविक्तं ब्रह्मणः पदम् ॥६६॥

'न सुखं०' व्याख्या । हे तात ! अहं **सुखं न प्रार्थये** न याचे नाभिलषामीत्यर्थः । पुनः **अर्थं** धनं न प्रार्थये न याचे किं० सुखम् अर्थं च ? **उदन्वद्वीचिचञ्चलं** समुद्रकल्लोलवत् चञ्चलं हे तात ! अहम् **अनित्यताशनेः** अनित्यतालक्षणाद्वज्रात् **त्रस्यन्** बिभ्यन् **ब्रह्मणो** वेधसः **पदं** स्थानम् ऐक्यलक्षणं मुक्ति **विविक्तं** निर्बाधं न प्रार्थये न कामये । न तत्रापि मम प्रीतिरस्तीति भावः । अथ समासः । उदन्वतो वीचिः उदन्वद्वीचिः उदन्वद्वीचिरिव चञ्चलम् उ० । अनित्यतैव अशनिः अनित्यताशनिस्तस्या अ० । त्रस्यतीति त्रस्यन् । इति वृत्तार्थः ॥ ६६ ॥

यदि सुखम् अर्थं ब्रह्मणः पदं च नाभिलषसि तर्हि किमिच्छसीत्याह -

प्रमार्ष्टुमयशःपङ्कमिच्छेयं छद्मनागतम् । वैधव्यतापितारातिवनितानयनाम्बुभिः ॥ ६७ ॥

'प्रमा०' व्याख्या । हे तात ! अहं **वैधव्यतापितारातिवनितानयनाम्बुभिः** पतिमारणपीडित-शत्रुवनितानेत्रजलैः कृत्वा यथा कश्चित् पानीयैः कृत्वा पङ्कं क्षालयति तद्वदित्यर्थः । **अयशःपङ्कम्** अपकीर्तिकर्दमं **प्रमार्ष्टुं** क्षालयितुम् **इच्छेयं** वाञ्छेयम् इत्यनेन वैरिनिर्यातनं मुक्त्वा अन्यत्र किञ्चिदिच्छामीत्यर्थः । किं० अय० ? **छद्मना** छलेन **आगतं** कपटेन कृतं वैरिभिरिति । अथ समासः। न यशः अयशः[अयशश्चासौ] पङ्कश्च[अ०] तम् अ० । विधवाया भावो वैधव्यं वैधव्येन तापिता

१. अत्र ह्रेपणस्य सादृश्यपर्यवसानादुपमालंकारः -म. ।

वैधव्यतापिता अरातीनां वनिता: अरातिवनिता: वैधव्यतापिता अरातिवनिताश्च वैधव्यतापितारातिवनिता: वैधव्यतापितारातिवनितानां नयनाम्बूनि वै० तैः वैधव्यतापितारातिवनितानयनाम्बुभि: । इति वृत्तार्थः ॥६७॥

एवं तर्हि 'यः करोति वधोदर्का:' (का० १९) इत्याद्युक्तदोषः स्यादित्याशङ्कामङ्गीकृत्य ग्लानिर्न दोषायेति न्यायमाश्रित्य श्लोकद्वयेनोत्तरमाह -

अपहस्येऽथवा सद्भिः प्रमादो वाऽस्तु मे धियः । अस्थानविहितायासः कामं जिह्रेतु वा भवान् ॥६८॥

'अप०' व्याख्या । **अथवा सद्भिः** पण्डितैः अहम् **अपहस्ये** अपहसिष्ये ममोद्यममीदृशम् आकर्ण्य दृष्ट्वा सन्तो हसन्त्वि[त्य]र्थः । **वा** अथवा **मे** मम **धियो** बुद्धेः **प्रमादो**ऽनवधानता **अस्तु** भवतु **वा** अथवा **भवान्** त्वं **काम**मत्यर्थं **जिह्रेतु** लज्जतां किं० भवान् ? **अस्थानविहितायासः** अयोग्यविषये मल्लक्षणे जने कृतोपदेशप्रयासः विफलप्रयत्नः सन् इत्यर्थः । अथ समासः । अस्थाने विहित आयासो येनासौ अ० । इति वृत्तार्थः ॥ ६८ ॥

वंशलक्ष्मीमनुद्धृत्य समुच्छेदेन विद्विषाम् । निर्वाणमपि मन्येऽहमन्तरायं जयश्रियः ॥६९॥

'वंश०' व्याख्या । हे तात ! **अहं विद्विषां** शत्रूणां **समुच्छेदेन** उन्मूलनेन **वंशलक्ष्मीं** कुलक्रमायात-लक्ष्मीम् **अनुद्धृत्य** लक्ष्म्या उद्धरणमकृत्वेत्यर्थः । अयमाशयः-यावत्स्ववंशजाया लक्ष्म्याः शत्रुगृहीताया उद्धारो न क्रियते तावन्ममान्यत्किमपि कर्तव्यं नास्तीतिभावः । तु पुनः **निर्वाणमपि** मोक्षमपि **जयश्रियो** जयलक्ष्म्याः **अन्तरायं** विघ्नं **मन्ये** मोक्षमपि अपुरुषार्थं जाने किमुतान्योत्सवादिकमिति भावः । अथ समासः । वंशस्य लक्ष्मीः वंशलक्ष्मीस्तां वं० । जयस्य श्रीः जयश्रीस्तस्या ज० । इति वृत्तार्थः ॥ ६९ ॥

अजन्मा पुरुषस्तावद्गतासुस्तृणमेव वा । यावन्नेषुभिरादत्ते विलुप्तमरिभिर्यशः ॥ ७० ॥

'अजन्मा' व्याख्या । **पुरुषः तावत् अजन्मा** अजातप्रायो निरर्थको वर्तते ननु जातोऽपि जननानन्तरमुपयुज्यत एवेति अरुच्या पक्षान्तरमाह-**वा** अथवा पुरुषः **गतासुः** जीवन्नपि मृतप्रायो वर्तते मृतोऽपि प्रागुक्तवानिति अरुच्याह-वा अथवा पुरुष**स्तृणमेव** तृणसदृशो वर्तते अकिञ्चित्करस्य त्रैकाल्यानुपयोगात् जीवन्नपि मृत इत्यर्थः । अतो नाहम् आग्रहाद्ब्रवीमि किन्तु वीरधर्ममनुपालयामीति भावः । तावत् कियत् ? **यावत्** पुरुषः **अरिभिः** शत्रुभि**र्विलुप्त**मपहृतं **यश इषुभि**र्बाणैः कृत्वा **न आदत्ते** अरिवधेन न गृह्णाति । अथ समासः । न विद्यते जन्म यस्य स अजन्मा । गताः असवो यस्मादसौ गतासुः । इति वृत्तार्थः ॥७०॥

सर्वथा वैरनिर्यातनमेव कर्तव्यमित्युक्तम् । तदकरणे पुरुषगुणानां हानिदोषमाह -

अनिर्जयेन द्विषतां यस्यामर्षः प्रशाम्यति । पुरुषोक्तिः कथं तस्मिन् ब्रूहि त्वं हि तपोधन ! ॥७१॥

'अनि०' व्याख्या । **यस्य** पुरुषस्य **अमर्षः** कोपः **द्विषतां** शत्रूणाम् **अनिर्जयेन** जयं विनैव अरीनजित्वेत्यर्थः । **प्रशाम्यति** शमं याति **तस्मिन्** पुरुषे **कथं पुरुष** इत्युक्तिः पुरुष इति शब्दकथनं

कथं स्यात् न कथंचिदित्यर्थः । प्रवृत्तिनिमित्तस्य पुरुषकारस्याभावात् इति भावः । हे **तपोधन** ! **त्वं हि** स्वयमेव **ब्रूहि** वद न च ते किञ्चिदविदितमस्तीतिभावः । अथ समासः । न निर्जयः अनिर्जयः तेन अ० । पुरुष इति उक्तिः पु० । तप एव धनं यस्य स तपोधनः तस्य संबोधनं हे त० !। इति वृत्तार्थः ॥७१॥

ननु पुरुषत्वजातिरेव पुरुषोक्तिप्रवृत्तौ निमित्तं भविष्यति किं पुरुषकारेणेति तत्राह -

कृतं पुरुषशब्देन जातिमात्रावलम्बिना । योऽङ्गीकृतगुणैः श्लाघ्यः सविस्मयमुदाहृतः ॥७२॥

'कृतं०' व्याख्या । **जातिमात्रावलम्बिना** जातिमात्राभिधायिना **पुरुषशब्देन कृतं** पूर्यतां न तेन किंचित् साध्यत इत्यर्थः । यद्येवं तर्हि कः पुरुषः श्लाघ्य इत्याशङ्क्याह- **यः** पुरुषः **अङ्गीकृतगुणैः** गुणपक्षपातिभिः **श्लाघ्यः** स्तुत्यः सः पुरुषः **सविस्मयं** यथा स्यात्तथा **उदाहृतः** कथितः पुंसा ईदृशेन भवितव्यमिति दर्शितः । अथ समासः । पुरुष इति शब्दः पुरुषशब्दस्तेन पु० । जातिरेव मात्रं जातिमात्रं जातिमात्रम् अवलम्बत इत्येवंशीलः जातिमात्रावलम्बी तेन जा० । अङ्गीकृताश्च ते गुणाश्च अङ्गीकृतगुणास्तैः अ० । सह विस्मयेन वर्तते यत्तत् सविस्मयम् । इति वृत्तार्थः ॥ ७२ ॥

ग्रसमानमिवौजांसि सदसा गौरवेरितम् । नाम यस्याभिनन्दन्ति द्विषोऽपि स पुमान्पुमान् ॥७३॥

'ग्रस०' व्याख्या । हे मुने ! **स पुमान्** नरः **पुमान्** सः पुरुषः पुरुषत्वेन गण्यते लोकेषु इत्यर्थः । अत्र प्रथमः शब्दो जातिवचनः द्वितीयो गुणवर्चनः स एव श्लाघ्य इत्यर्थः । स कः ? **यस्य** पुरुषस्य **नाम द्विषोऽपि** शत्रवोऽपि **अभिनन्दन्ति** अनुमोदन्ते किमुत सुहृद इत्यर्थः । किं० नाम ? **सदसा** सभया **गौरवेण** आदरेण **ईरितं** कथितं सभास्थजनैः कथाप्रसंगेषु गौरवपूर्वकमुच्चारितमित्यर्थः । पुनः किं० नाम ? **ओजांसि** शृण्वन्तस्तेजांसि **ग्रसमानं** गिल**दिव** स्थितं शृण्वतां रिपूणामिति भावः । अथ समासः । ग्रसत इति ग्रसमानम् । गौरवेण ईरितं गौरवेरितम् । इति वृत्तार्थः ॥ ७३ ॥

ननु भीमादिषु सत्सु कथं भवान्श्लि(क्लि)श्यतीत्याह -

यथाप्रतिज्ञं द्विषतां युधि प्रतिचिकीर्षया । ममैवाध्येति नृपतिस्तृष्यन्निव जलाञ्जलिम् ॥७४॥

'यथा०' व्याख्या । **नृपतिः** युधिष्ठिरः **युधि** संग्रामे **यथाप्रतिज्ञं** प्रतिज्ञाया अनतिक्रमेण प्रतिज्ञानुसारेण **द्विषतां** शत्रूणां **प्रतिचिकीर्षया** प्रतिकारं कर्तुमिच्छया जिघांसेच्छया **ममैव अध्येति** ध्यायति स्मरयतीत्यर्थः । कार्यसिद्धेर्मदायत्तत्वात् मामेवानुस्मरतीत्यर्थः । क इव ? कश्चित् पुमान् **इव** यथा पुमान् **तृष्यन्** पिपासुः **जलाञ्जलिं** वारिचुलुकमेव स्मरति तथेत्यर्थः । अथ समासः । प्रतिज्ञां अनतिक्रम्य यथा करोतीति य० । प्रतिकर्तुमिच्छा प्रतिचिकीर्षा तया प्र० । तृष्यतीति तृष्यन् । जलस्य अञ्जलिः जलाञ्जलिस्तं ज० । इति वृत्तार्थः ॥ ७४ ॥

---

१. अत्र पुमान्पुमानिति तात्पर्यमात्रभेदभिन्नशब्दार्थपौनरुक्त्यलक्षणो लाटानुप्रासोऽलंकारः -म. ।

ननु स्वार्थमुद्दिश्य प्रवर्तते सर्वः कोऽपि न परेच्छयानुरुध्यमान इत्याशङ्क्याह -

स वंशस्यावदातस्य शशाङ्कस्येव लाञ्छनम् । कृच्छ्रेषु व्यर्थया यत्र भूयते भर्तुराज्ञया ॥७५॥

'स वं०' व्याख्या । **स** पुमान् **अवदातस्य** निर्मलस्य **वंशस्या**न्वयस्य **लाञ्छनं** कलङ्को भवति। तेन कलङ्करूपपुरुषेण वंशो मलिनीक्रियत इति भावः । स्वस्येति शेषः । कस्येव ? शशाङ्क**स्येव** यथा अवदातस्य शुभ्रस्य **शशाङ्कस्य** चन्द्रस्य लाञ्छनं भवति । यथा शशी कलङ्केन मलिनो विधीयते तथा तेनेति भावः । सः कः **यत्र** यस्मिन् नरे **कृच्छ्रेषु** कष्टेषु व्यसनेषु **भर्तुः** स्वामिनः **आज्ञया** आदेशेन **व्यर्थया** निष्फलया **भूयते** भर्तृव्यसने चेद्भृत्यो वचनकारी न स भृत्यो लाञ्छनं स्ववंशस्येति भावः । आपदि स्वार्थापेक्षकः कुलघातकः तत्कथं स्वार्थनिष्ठकार्ययुक्तः स्यादनुचर इत्यर्थः । इति वृत्तार्थः ॥७५॥

'एधि शान्तस्तपोधन !' (का० ३१) इति यदुक्तं तत्रोत्तरमाह -

कथं वादीयतामर्वाङ्मुनिता धर्मरोधिनी । आश्रमानुक्रमः पूर्वैः स्मर्यते न व्यतिक्रमः ॥७६॥

'कथं०' व्याख्या । हे मुने ! **धर्मरोधिनी** धर्मविरोधिनी धर्मातिक्रमे अधर्मो भवतीति **अर्वाक्** गार्हस्थ्यात् प्रागेव **मुनिता** वानप्रस्थत्वं चतुर्थाश्रमो **वा कथं** वा **आदीयतां** गृह्यतां मयेति शेषः । तथाहि **पूर्वैः** मन्वादिभिः **आश्रमानुक्रमः** आश्रमपरिपाटी **स्मर्यते** ध्यायते परं **न व्यतिक्रम** न तूल्लङ्घनं 'ब्रह्मचारी भूत्वा गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् ।' (७३) इति श्रुत्यनुसारात् [परमहंस उ. १] इत्यर्थः[१] । अथ समासः । मुनेर्भावो मुनिता । धर्मं रुणद्धीत्येवंशीला ध० । आश्रमानामनुक्रमः आ० । इति वृत्तार्थः ॥७६॥

चतुर्थाश्रम(मा)ग्रहणे हेत्वन्तरमाह -

आसक्ता धूरियं रूढा जननी दूरगा च मे । तिरस्करोति स्वातन्त्र्यं ज्यायांश्चाचारवान्नृपः ॥७७॥

'आस०' व्याख्या । **आसक्ता** लग्ना अवश्यं कर्तव्या इत्यर्थः । **रूढा** प्रसिद्धा महतीत्यर्थः । अत्याज्येति **इयं** पूर्वोक्ता **धू**र्वैरनिर्यातनभारलक्षणा **च** पुनः **ज्यायान्** ज्येष्ठो **नृपो** युधिष्ठिरो मे स्वातन्त्र्यं तिरस्करोति । पुनः **दूरगा** दूरवर्तिनी **जननी** माता कुन्ती मे स्वातन्त्र्यं तिरस्करोति । 'येभ्यः माता गरीयसी' इति वचनात् (७४) । पितृसमो ज्येष्ठ इति तत्रापि नृप इति नावज्ञेयः कदाचनेति । किं० नृपः ? **आचारवान्** प्रशस्ताचारयुक्तः एते पदार्थाः **मे** मम **स्वातन्त्र्यं** स्वायत्तत्वं **तिरस्करोति** निषेधयति आश्रमान्तरं प्रतिबध्नातीत्यर्थः। तिरस्करोतीति प्रत्येकमभिसंबध्यते अन्यथा बहुवचनप्रसंगात् । अथ समासः । दूरंगतवर्तीति दूरगा । स्वस्य तन्त्रं स्वतन्त्रं तस्य भावः स्वा० अतिशयेन वृद्धो ज्यायान् । प्रशस्त आचारोऽस्याऽस्तीति आ० । इति वृत्तार्थः ॥ ७७ ॥

---

१. अत्रेदं बोध्यम् - इदं विधानं तथाविधजनमाश्रित्योक्तम् यतः 'यदहरेव विरज्येत तदहरेव परिव्रजेत्' 'यदि चेद्वैराग्यं तदा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा वनाद्' (नारद.प. ३/७७)' इति व्युत्क्रमपक्षस्यापि श्रवणात् ।

[उक्तमर्थमुपसंहरति]-

स्वधर्ममनुरुध्यन्ते नातिक्रममरातिभिः । पलायन्ते कृतध्वंसा नाहवान्मानशालिनः ॥७८॥

'स्वध०' व्याख्या । **मानशालिनः** अहंकारशालिनः **आहवात्** संग्रामात् **न पलायन्ते** न त्रस्यन्ति अयमेव स्वधर्मानुरोध इत्यर्थः । 'उपसर्गस्यायतौ' इति रेफस्य लत्वम् । अत्र *मनुः* (७-८७) 'न निवर्तेत संग्रामात् क्षात्रधर्ममनुस्मरन्निति' । (७५) किं० मान० ? **अरातिभिः** शत्रुभिः **कृतध्वंसा** विहितपराभवाः परं मानशालिनः **स्वधर्मं** क्षात्रं कर्म प्रजापालनं वा **अनुरुध्यन्ते** अनुवर्तन्ते निजाचारं कामयन्ते इत्यर्थः । परम् **अतिक्रमं** स्वधर्मातिक्रमं **न** अनुरुध्यन्ते । अथ समासः । स्वस्य धर्मः स्वधर्मस्तं स्व० । कृतो ध्वंसो येषां ते कृ० । मानेन शालन्त इति मा० । इति वृत्तार्थः ॥ ७८ ॥

किं बहुनोक्तेनेत्यपुसंहरन्नाह -

विच्छिन्नाभ्रविलायं वा विलीये नगमूर्धनि । आराध्य वा सहस्राक्षमयशःशल्यमुद्धरे ॥७९॥

'विच्छि०' व्याख्या । हे तात ! अहं **वा** अथवा **विच्छिन्नाभ्रविलायं** विच्छेदप्राप्ताभ्रवत् विलीय **नगमूर्धनि** गिरिशृङ्गे **विलीये** विलयं प्राप्नोमि यथा विलीनं मूलाच्चलितं विच्छिन्नाभ्रं तत्रैव विलीयते । तथाहमपि अस्मिन्नेव नगशिरसि विलयं यास्यामि इत्यर्थः । **वा** अथवा **सहस्राक्ष**मिन्द्रम् **आराध्य अयशःशल्यम्** अपयशःशल्यम् **उद्धरे** उद्धरोमि न तु गत्यन्तरशङ्केत्यर्थः । वा-शब्दौ विकल्पे । अथ समासः । विछिन्नं च तदभ्रं च वि० विछिन्नाभ्रवत् विलीयेति विछिन्नाभ्रविलायम् । नगस्य मूर्द्धा नगमूर्द्धा तस्मिन् न० । अक्ष्णां सहस्रं यस्यासौ सहस्राक्षस्तं स० । अयशः एव शल्यम् अ० । इति वृत्तार्थः ॥७९॥

इत्युक्तवन्तं परिरभ्य दोर्भ्यां तनूजमाविष्कृतदिव्यमूर्तिः ।
अघोपघातं मघवा विभूत्यै तस्मै भवाराधनमादिदेश ॥ ८० ॥ (उ.)

'इत्यु०' व्याख्या । **मघवा** इन्द्रस्**तस्मै** अर्जुनाय **विभूत्यै** श्रेयसे उत्तरभाविने ऐश्वर्याय वा **विभूत्यै** श्रियै राज्यलाभार्थं **भवाराधनं** महारुद्रस्याराधनम् उपासनम् **आदिदेश** कथयामास शिवमुद्दिश्य तपश्चर वरं दास्यतीत्याज्ञापयामासेत्यर्थः । किं० भवाराधनम् ? **अघोपघातं** दुरितध्वंसकं दुःखनाशकमित्यर्थः । किं० मघवा ? **आविष्कृतदिव्यमूर्तिः** प्रकटीकृतनिजस्वरूपः दर्शितदिव्यमूर्तिरित्यर्थः । किंकृत्वा ? **इति** पूर्वोक्तप्रकारेण **उक्तवन्तं** ब्रुवन्तं **तनूजम्** अर्जुनं **दोर्भ्यां** बाहुभ्यां **परिरभ्य** आलिङ्ग्य । अथ समासः । आविष्कृता दिव्यमूर्तिर्येन स आ० । उपहन्यतेऽनेनेति उपघातः अघानाम् उपघातो यस्मात् तत् अ० । भवस्य आराधनं भ० । इति वृत्तार्थः ॥ ८० ॥

यदि भगवन्तं भवोद्भवमाराधयामि तदा त्वया किं कृतमित्याह -

1. भवोद्भवा० -म. इदं च पा.

प्रीते पिनाकिनि मया सह लोकपालैर्लोकत्रयेऽपि विहिताप्रतिवार्यवीर्यः ।
लक्ष्मीं समुत्सुकयितासि भृशं परेषामुच्चार्य वाचमिति तेन तिरोबभूवे ॥८१॥ (व.)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *महेन्द्रागमनो* नामैकादशः सर्गः ॥

'प्रीते पि०' व्याख्या । **तेन** इन्द्रेण **इति वाचं** वाणीं **भृश**मत्यर्थम् **उच्चार्य** कथयित्वा **तिरोबभूवे** अन्तर्दधे इतीति किम् ? हे पार्थ ! हे अर्जुन ! **परेषां** शत्रूणां **लक्ष्मीं** श्रियं **समुत्सुकयितासि** त्वमनुरक्तां कर्तासि पुनराहरिष्यसीत्यर्थः । वीरयोग्या संपदः इति भावः । कस्मिन् सति ? **पिनाकिनि** महादेवे **प्रीते** तपसा तुष्टे सति त्वं किं० ? **लोकपालैः** यमवरुणादिभिः **सह** सार्द्धं **मया लोकत्रयेऽपि** त्रिभुवनेऽपि **विहिताप्रतिवार्यवीर्यः** निष्पादितानिवार्यबलः । इति वृत्तार्थः ॥ ८१ ॥ १२ ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद् गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गेण रुद्रगणितेन समाप्तिरासा ॥ २ ॥

इति श्रीकिरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधायां वृत्तौ ***महेन्द्रागमन***नामैकादशः सर्गः ॥

॥ शुभं भवतुतराम् ॥

द्वादशः सर्गः।

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जयः ॥ १ ॥

[का. ५३ यावद् उद्‌गताच्छन्दः]

'अथ०' व्याख्या । **अथेन्द्र**तिरोधानानन्तरं **वासवस्य वचनेन** इन्द्रस्योपदेशवाक्येन **धनञ्जयो**ऽर्जुनः **विधिवत्** विधिसहितं विधिना[१] वा **तपांसि विदधे** चकार किं० धनञ्जयः ? **रुचिरवदनः** इन्द्रसाक्षात्कारसंतोषात् प्रसन्नमुखः किंकर्तुम् ? **त्रिलोचनं** रुद्रं **क्लान्तिरहितं** श्रमरहितं यथा स्यात्तथा। **अभिराधयितुं** समन्तादाराधयितुं सेवितुमित्यर्थः । अथ समासः । रुचिरं वदनं यस्य स रु० । त्रीणि लोचनानि यस्य स त्रिलोचनस्तं त्रि० । क्लान्त्या रहितः क्लान्तिरहितस्तं क्ला० । इति वृत्तार्थः ॥ १ ॥

तान्येव तपांसि दर्शयन्नाह -

अभिरश्मिमालि विमलस्य धृतजयधृतेरनाशुषः ।
तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणं निषीदतः ॥ २ ॥

'अभि०' व्याख्या । **तस्य** अर्जुनस्य **बहुतिथा** बहुसंख्याकाः **तिथयो** वासरा **प्रतिजग्मुः** निर्जग्मुः अत्र तिथिशब्दः पुल्लिङ्गः अन्यथा बहुतिथा इत्यत्र टित्वात् ङीप् स्यात् । तस्य किंकुर्वतः ? **अभिरश्मिमालि** सूर्यसन्मुखम् **एकचरणम्** एकपादं **भुवि** भूम्यां **निषीदतः** सूर्याभिमुखं भूम्याम् एकाङ्घ्रिणा तिष्ठत इत्यर्थः। पुनः किं० तस्य ? **विमलस्य** बाह्याभ्यन्तरशुद्धिमतः पुनः किं० तस्य ? **धृतजयधृतेः** गृहीतजयेच्छस्य पुनः किं० तस्य ? **अनाशुषः** अभुञ्जानस्य कृतोपवासस्येत्यर्थः । अथ समासः । रश्मिमालम् अभि इति अ० । जयस्य धृतिः जयधृतिः धृता जयधृतिर्येन स धृतजयधृतिस्तस्य धृ० । आश इति आशिवान् न आशिवान् अनाशिवान् तस्य अ० । बहूनां पूरण्यः बहुतिथाः । एक एव चरणो यस्यां क्रियायां तदेकचरणं निषीदतीति निषीदन् तस्य निषीदतः । इति वृत्तार्थः ॥ २ ॥

वपुरिन्द्रियोपतपनेषु सततमसुखेषु पाण्डवः ।
व्याप नगपतिरिव स्थिरतां महतां हि धैर्यमविचि[1]न्त्यवैभवम् ॥ ३ ॥

'वपु०' व्याख्या । **पाण्डवो**ऽर्जुनः **सततं** निरन्तरम् **असुखेष्वपि** अनशनादिदुःखेषु अपि **स्थिरतां** निश्चलतां **व्याप** प्राप चपलो नाभूदित्यर्थः । किं० असुखेषु ? **वपुरिन्द्रियोपतपनेषु** मनःप्रभृति-बाह्याभ्यन्तरशरीरेन्द्रियसंतापकरेषु कः कामिव ? **नगपतिरिव** हिमाचल इव यथा हिमाचलः तापकरेष्वपि

---

1. अविभाव्य० -म. इदं च पा.

---

१. यथाशास्त्रमित्यर्थः -म.

दु:खेषु सक्तोऽपि निश्चलत्वं न जहाति तथेतिभावः **हि** यस्मात् कारणात् **महतां** धैर्यवताम् उत्तमपुरुषाणां **धैर्यम् अविचिन्त्यवैभवम्** अविभावनीयसामर्थ्यं भवति धीराणाम् अकिंचित्करं दु:खमित्यर्थः। अर्जुनगिरीन्द्रयोः सादृश्यात् उपमालंकारः। अथ समासः। वपुश्च इन्द्रियाणि च वपुरिन्द्रियाणि वपुरिन्द्रियाणाम् उपतपनानि वपुरिन्द्रियोपतपनानि तेषु व०। न सुखानि असुखानि तेषु अ०। पाण्डोरपत्यं पुमान् पाण्डवः नगानां पतिः न०। स्थिरस्य भावः स्थिरता। अविचिन्त्यो वैभवो यस्य तत् अ०। इति वृत्तार्थः॥

न पपात सन्निहितपक्तिसुरभिषु फलेषु मानसम्।
तस्य शुचिनि शिशिरे च पयस्यमृतायते हि सुतपः सुकर्मणाम्॥ ४॥

'न प०' व्याख्या। **तस्य** अर्जुनस्य **मानसं** चित्तं **फलेषु न पपात** न च काङ्क्षा फलविषये तस्य स्पृहा न जातेत्यर्थः। फलानि स्पृहायोग्यानि न भविष्यन्तीति चेत् तत्राह- किं० फलेषु ? **सन्निहितपक्तिसुरभिषु** समीपस्थेन पाकेन सुगन्धिषु च पुनः तस्य मनः **शुचिनि** स्वच्छे पवित्रे **शिशिरे च** शीतले एवं गुणवति **पयसि** जले न पपातेत्यद्भुतं तस्य प्राणधारणं तु तप एव जातमित्याह- **हि** यस्मात् कारणात् **सुकर्मणां** सुकृतिनां **सुतपः** सुष्ठुकृच्छ्रादिकर्म **अमृतायते** अमृतवदाचरति। किं तपसः तृप्तानां तर्पणान्तरैरितिभावः। अथ समासः। सन्निहितश्चासौ पक्तिसुरभिश्च सन्निहितपक्तिसुरभिस्तेषु स०। सुष्ठुकर्म येषां ते सुकर्माणस्तेषां सुकर्म्मणाम्। इति वृत्तार्थः॥ ४॥

न विसिस्मये न विषसाद मुहुरलसतां न चाददे।
सत्त्वमुरुधृति रजस्तमसी न हतः स्म तस्य हतशक्तिकोम[1]ले॥ ५॥

'न वि०' व्याख्या। **सोऽर्जुनो** न **विसिस्मये** अहो महदेतावन्मया तपस्तप्तमिति विस्मयं न जगाम 'तपःक्षरति विस्मयात्' (७६) इति निषेधादिति भावः। च पुनः सोऽर्जुनो **न विषसाद** भग्नचित्तो न बभूव तपःफलविलम्बात् भग्नोत्साहो न बभूवेत्यर्थः। 'विषादश्चेतसो भङ्ग' इति विषादलक्षणम् च पुनः सोऽर्जुनः **मुहुर्वा**रंवारम् **अलसताम्** आलस्यं तपसि मन्दोद्यमं च **न आददे** न जगाम किं च **रजस्तमसी** रजस्तमोगुणौ उभे अपि **तस्य सत्त्वम्** अर्जुनस्य धैर्यं सत्त्वगुणं **न हतः स्म** न हतवती किं० सत्त्वम् ? **उरुधृति** महत्बलं महत्संतोषं वा किं० रजस्तमसी ? **हतशक्तिकोमले** हतसामर्थ्ये अत एव सुकोमले अप्रियजने स्वव्यापारप्रसराभावादिति भावः। तस्य सत्त्वगुणेन रजस्तमोगुणौ हतशक्तिकौ जातौ इत्यर्थः। अथ समासः। अलसस्य भावोऽलसता ताम०। उरुःधृतिर्यस्य तत् उरुधृति। रजश्च तमश्च रजस्तमसी। हता शक्तिर्ययोस्ते हतशक्तिनी हतशक्तिनी च ते कोमले च ह०। इति वृत्तार्थः॥५॥

तपसा कृशं वपुरुवाह स विजितजगत्त्रयोदयम्।
त्रासजननमपि तत्त्वविदां किमिवास्ति यन्न सुकरं मनस्विभिः॥ ६॥

'तप० व्याख्या'। **सोऽर्जुनः तपसा कृशं** दुर्बलं **वपुः** शरीरम् **उवाह** वहति स्म किं० वपुः ?

1. ०पेलवे -म.

विजितजगत्त्रयोदयं जितभुवनत्रयोत्कर्षं पुनः किं वपुः ? **तत्त्वविदां** तत्त्वज्ञानिनां **त्रासजननं** भयोत्पादकं भयङ्करमित्यर्थः । न चैतच्चित्रमित्याह- **यत् मनस्विभिः** अहङ्कारिभिः **न सुकरं** न सुलभं तत् **किमिवास्ति** इवशब्दो वाक्यालंकारे 'मनस्विनाम्' इति पाठे मनस्विनां दुःसाध्यं किमपि नास्तीत्यर्थः । अथ समासः । जगतां त्रयं जगत्त्रयं जगत्त्रयस्य उदयः जगत्त्रयोदयः विजितो जगत्त्रयोदयो येन तत् वि० । त्रासस्य जननं त्रा०। तत्त्वं विदन्तीति तत्त्वविदस्तेषां त० । प्रशस्तं मनो येषां ते मनस्विनः तैः म० । इति वृत्तार्थः ॥६॥

ज्वलतोऽनलादनुनिशीथमधिकरुचिरम्भसां निधेः ।
धैर्यगुणमवजयन्विजयी ददृशे समुन्नततरः स शैलतः ॥ ७ ॥

'ज्वल०' व्याख्या । **सोऽर्जुनः अनुनिशीथं** मध्यरात्रे **ज्वलतो** देदीप्यमानात् **अनलात्** वैश्वानरात् **अधिकरुचिः** अधिककान्तिः जनैर्ददृशे दृष्टः पुनः सोऽर्जुनः **अम्भसां निधेः** समुद्रस्य **'धैर्यगुणं' धैर्यं** गाम्भीर्यं तदेव **गुणः** तम् **अवजयन्** तिरस्कुर्वन् जनैर्ददृशे दृष्टः किं० सः ? **विजयी** विजयवान् पुनः किं० सः ? **शैलतः** पर्वतात् **समुन्नततरः** अधिकोन्नतः जनैर्ददृशे तेभ्योऽनलसमुद्रधैर्यशैलेभ्योऽपि तेजसा गाम्भीर्येण सारेणाधिकतरो जनैः दृष्ट इत्यर्थः[1] । अथ समासः । निशीथम् अनु इति अ० । अधिका रुचिर्यस्य स अ० । धैर्यमेव गुणः धैर्यगुणस्तं धै० । विजयोऽस्यास्तीति विजयी । अतिशयेन समुन्नतः स० । इति वृत्तार्थः ॥ ७ ॥

जपतः सदा जपमुपांशु वदनमभितो विसारिभिः ।
तस्य दशनकिरणैः शुशुभे परिवेषभीषणमिवार्कमण्डलम् ॥ ८ ॥

'जप०' व्याख्या । **तस्य** अर्जुनस्य **वदनं** मुखं **दशनकिरणैः** दन्तकान्तिभिः **शुशुभे** बभौ किं० तस्य ? **उपांशु** अश्रूयमाणशब्दं यथा स्यात्तथा **सदा** सर्वदा **जपं** जापं जप्यं मन्त्रं **जपतः** किं० किरणैः ? **अभितः** समन्तात् **विसारिभिः** प्रसरणशीलैः किं० वदनम् ? उत्प्रेक्ष्यते **परिवेषभीषणं** जलकुडेन रौद्रम् **अर्कमण्डलं** सूर्यमण्डलमिव स्थितम् । अथ समासः । जपतीति जपन् तस्य जपतः । दशनानां किरणाः दशनकिरणास्तैर्दश० परिवेषेण भीषणं प० । अर्कस्य मण्डलम् अ० । इति वृत्तार्थः ॥८॥

कवचं स बिभ्रदुपवीतपदनिहितसज्यकार्मुकः ।
शैलपतिरिव महेन्द्रधनुःपरिवीतभीमगहनो विदिद्युते ॥ ९ ॥

'कव०' व्याख्या । **सोऽर्जुनः शैलपतिरिव** हिमाचल इव **विदिद्युते** शुशुभे स किं कुर्वन् ? **कवचं** सन्नाहं **बिभ्रत्** धारयत् किं० सः ? **उपवीतपदनिहितसज्यकार्मुकः** यज्ञोपवीतस्थाने समारोपित-सप्रत्यञ्चचापः किं० शैलपतिः ? **महेन्द्रधनुःपरिवीतभीमगहनः** इन्द्रधनुषा परिवेष्टितरौद्रवनः । अथ समासः । उपवीतस्य पदम् उपवीतपदम् उपवीतपदे निहितं सज्यं कार्मुकं येन स उ० । शैलानां पतिः शै० ।

१. अत्र रुच्यादिभिरनलाद्याधिक्यासंबन्धे संबन्धाभिधानादतिशयोक्तिरलंकारः -म.

महेन्द्रस्य धनुः महेन्द्रधनुः महेन्द्रधनुषा परिवीतं भीमं गहनं यस्य स म० । इति वृत्तार्थः ॥ ९ ॥

प्रविवेश गामिव कृशस्य नियतसवनाय गच्छतः ।
तस्य पदविनमितो हिमवान् गुरुतां नयन्ति हि गुणा न संहतिः ॥ १० ॥

'प्रवि०' व्याख्या । **तस्य** अर्जुनस्य **पदविनमितो हिमवान्** पादन्यासैः नमी(ती)कृत आक्रान्तो वा हिमाचलः **गां** भुवं **प्रविवेश** प्रविष्ट इवेत्युत्प्रेक्षा तस्य किं० ? **कृशस्य** दुर्बलस्य तस्य किं कुर्वतः ? **नियतसवनाय** नित्यं स्नानाय **गच्छतः** 'सवनं पूजने स्नाने' इति *विश्वः* । ननु दुर्बलस्य कथमियद् गौरवम् ? तत्राह- **हि** यतः कारणात् **गुणाः** सारादयो **गुरुतां** महत्तां **नयन्ति** प्रापयन्ति परं **न संहतिः** स्थूलता गुरुतां नयति बाह्यस्थूलत्वे न गौरवं न प्राप्यते अन्तःसारादेव गौरवमिति न्यायात् अयःपिण्डकर्प्पासपिण्डाविह निदर्शनमिति भावः । अथ समासः । नियतं सवनं नियतसवनं तस्मै नि० । पद्भ्यां विनमितः प० । हिममस्मिन्निति हिमवान् । गुरोर्भावः गुरुता तां गुरुताम् । इति वृत्तार्थः ॥ १० ॥

परिकीर्णमुद्यतभुजस्य भुवनविवरे दुरासदम् ।
ज्योतिरुपरि शिरसो विततं जगृहे निजान्मुनिदिवौकसां पथः ॥ ११ ॥

'परि०' व्याख्या । तस्यार्जुनस्य **ज्योतिस्तेजः मुनिदिवौकसां** ऋषिदेवानां **निजान्** स्वकीयान् नियतानित्यर्थः **पथो** मार्गान् **जगृहे** जग्राह किं० ज्योतिः ? **भुवनविवरे** द्यावापृथिव्योरन्तराले **परिकीर्णं** व्याप्तम् अतिव्याप्य स्थितमित्यर्थः । पुनः किं० ज्योतिः ? अत एव **दुरासदं** दुष्प्रापं दुर्धर्षमित्यर्थः । पुनः किं० [ज्योतिः] ? **शिरसः** मस्तकस्य **उपरि विततं** विस्तीर्णं तस्य किं० ? **उद्यतभुजस्य** उद्र्ध्वबाहोः । अथ समासः । उद्यतौ भुजौ यस्य स उद्यतभुजस्तस्य उ० । भुवनयोर्विवरं भुवनविवरं तस्मिन् भु० । दुःखेन आसाद्यते तत् दुरासदम् । मुनयश्च दिवौकसश्च मुनिदिवौकसस्तेषां मु० । इति वृत्तार्थः ॥११॥

रजनीषु राजतनयस्य बहुलसमयेऽपि धामभिः ।
भिन्नतिमिरनिकरं न जहे शशिरश्मिसंगमयुजा नभः श्रिया ॥ १२ ॥

'रज०' व्याख्या । **नभ** आकाशं **श्रिया** शोभया **न जहे** न त्यक्तं किं० श्रिया ? **शशिरश्मिसंगमयुजा** चन्द्रकिरणसंगमयुक्तया किं० नभः ? **बहुलसमयेऽपि** कृष्णपक्षेऽपि **रजनीषु** रात्रिषु **राजतनयस्या**र्जुनस्य **धामभिः** तेजोभिः **भिन्नतिमिरनिकरं** स्फेटितान्धकारसमूहम् । अथ समासः । राज्ञस्तनयो राजतनयः तस्य रा० । बहुलस्य समयः बहुलसमयः तस्मिन् बहु० तिमिरस्य निकरः तिमिरनिकरः भिन्नस्तिमिरनिकरो यस्य तत् भि० । शशिनो रश्मयः शशिरश्मयः शशिरश्मीनां संगमः शशिरश्मिसंगमः शशिरश्मिसंगमं युनक्तीति शशिरश्मिसंगमयुज् तया श० । इति वृत्तार्थः ॥१२॥

महता मयूखनिचयेन शमितरुचि जिष्णुजन्मना ।
ह्रीतमिव नभसि वीतमले न विराजते स्म वपुरंशुमालिनः ॥ १३ ॥

'मह०' व्याख्या । **अंशुमालिनः** सूर्यस्य **वपुः** बिम्बं **वीतमले** निर्मले मेघहिमाद्यावरण-रहितेऽपीत्यर्थः। **नभसि** आकाशे **न विराजते स्म** न शोभते स्म किं० वपुः ? उत्प्रेक्ष्यते **ह्रीतमिव** जितत्वात् लज्जितमिव पुनः किं० वपुः ? **जिष्णुजन्मना** अर्जुनोत्पन्नेन **महता** महीयसा **मयूखनिचयेन** तेजःपटलेन **शमितरुचि** अपह्नुतकान्ति हतदीप्ति इत्यर्थः । अर्जुनतेजसा सूर्यःपराभूत इत्यर्थः । अथ समासः। मयूखानां निचयः मयूखनिचयस्तेन म० । शमिता रुचिर्यस्य तत् श० । जिष्णोर्जन्म यस्य स जिष्णुजन्मा तेन जि० । वीतो मलो यस्मिन् तत् वीतमलं तस्मिन् वी० । अंशुभिर्मालते इत्येवं शीलोंऽशुमाली तस्य अं० यद्वा अंशून् मालति धारयतीति अंशुमाली तस्य अं० यद्वा अंशूनां मालास्यास्तीति अंशुमाली तस्य अं० । इति वृत्तार्थः ॥ १३ ॥

तमुदीरितारुणजटांशुमधिगुणशरासनं जनाः ।
रुद्रमनुदितललाटदृशं ददृशुर्मिमन्थिषुमिवासुरीः पुरीः ॥ १४ ॥

'तुम०' व्याख्या । **जनाः** लोका **तम**र्जुनं **ददृशुः** विलोकयामासुः किं० तम् ? **उदीरितारुण-जटांशुम्** उद्गतरक्तजटाकान्तम् पुनः किं० तम् ? **अधिगुणशरासनम्** अधिज्यकार्मुकम् आरोपित-धनुषमित्यर्थः । पुनः किं० तम् ? **इवो**त्प्रेक्ष्यते **आसुरीः** असुरसंबन्धिनीः **पुरीः** नगरीः **मिमन्थिषुं** मथितुमिच्छन्तम् **अनुदितललाटदृशम्** अनुद्गतभालनयनं **रुद्रं** महादेवं दितितनयं पुराणिदिधक्ष्मण (?) रुद्रेण तुल्याभं जना मेनिरे इति भाव:[1] । अथ समासः । जटानामंशवो जटांशवः अरुणाश्चेते जटांशवश्च अरुणजटांशवः उदीरिता अरुणजटांशवो यस्य स उदीरितारुणजटांशुस्तम् उ० । शराः अस्यन्ते क्षिप्यन्ते अनेनेति श० । अधिगुणं शरासनं यस्य सोऽधिगुणशरासनः तम० । अनुदिता ललाटे दृग् यस्य स अनुदितललाटदृग् तम् अ० । मथितुमिच्छतीति मिमन्थिषतीति मिमन्थिषुः । असुराय्यामिमाः आसुर्य्यः ताः आसुरीः । इति वृत्तार्थः ॥१४॥

मरुतां पतिः स्विदहिमांशुरुत पृथुशिखः शिखी तपः ।
तप्तुमसुकरमुपक्रमते न जनोऽयमित्यवययये स तापसैः ॥ १५ ॥

'मरु०' व्याख्या । **तापसैः** तपस्विभिः **सो**ऽर्जुनः **इति अवयये** अवगतो ज्ञात इत्यर्थः । इतीति किम् ? यत् **अयम्** असौ **जनः** नीचजनो न किन्तु अयं **मरुतां पतिः** देवानां स्वामी इन्द्रो वा **स्विदिति** वितर्के **अहिमांशुः** सूर्यः **उत** अथवा **पृथुशिखः** महज्ज्वालः **शिखी** वैश्वानरः यत् असौ **असुकरं** दुष्करं कर्तुमशक्यं तपः **तप्तुं** तपः कर्तुम् आचरितुम् **उपक्रमते** उपक्रमं करोति[2] । अथ समासः । अहिमा अंशवो यस्य सोऽहिमांशुः । पृथवः शिखा यस्य स पृ० । सुखेन क्रियते इति सुकरं न सुकरम् इति अ० । इति वृत्तार्थः ॥१५॥

---

१. अत्राभालाक्षस्य रुद्रस्यासंभवात्स्वतः सिद्धोपमानासिद्धेर्नेयमुपमा, किंतूत्प्रेक्षा, सा चाभालाक्षमित्युपमानादुपमेयस्य न्यूनत्वकथनार्थेऽन्वयव्यतिरेकेणोज्जीवितेत्यनयोरङ्गाङ्गिभावेन संकरः । उपमा तु व्यज्यत इत्यलंकारेणालंकारध्वनिः -म.
२. अत्रेन्द्रत्वादिकं धर्ममारोप्य जनत्वापवादात्साम्यमारोप्यापह्नवालंकारः -म. ।

न ददाह भूरुहवनानि हरितनयधाम दूरगम् ।
न स्म नयति परिशोषमपः सुसहं बभूव न च सिद्धतापसैः ॥ १६ ॥

'न द०' व्याख्या । **दूरगं** व्यापकं **हरितनयधाम** अर्जुनतेजः **भूरुहवनानि** वृक्षकाननानि अरण्यानि **न ददाह** न भस्मीचकार तथा **अपः** पानीयानि **परिशोषं न नयति स्म** न प्रापयति स्म तथापि **च** पुनः **सिद्धतापसैः** देवविशेषैः तपस्विभिश्च **सुसहं** सुखेन सोढुं **न बभूव** न जातं तेषां दुःसहम-भूदित्यर्थः । अतोऽस्य एतद्वयस्तेजोवैलक्ष्यण्येनालौकिकं तेज इति भावः । अथ समास । भूरुहैर्युक्तानि वनानि भूरुहवनानि हरितनयस्य धाम ह० । दूरं गच्छतीति दूरगस्तं दूरगं परिसमन्तात् भावेन शोषः परिशोषः तं प० । सिद्धाश्च ते तापसाश्च सिद्धतापसास्तैः सि० । इति वृत्तार्थः ॥ १६ ॥

विनयं गुणा इव विवेकमपनयभिदं नया इव ।
न्यायमवधय इवाशरणाः शरणं ययुः शिवमथो महर्षयः ॥ १७ ॥

'विनयं०' व्याख्या । **अथा**नन्तरं **महर्षयो** मुनयः **शिवं** महादेवं **शरणं** रक्षितारं **ययुः** शरणत्वे प्रापुः शिवम् आत्मत्राणार्थं गता इत्यर्थः । 'शरणं रक्षणे गेहे वधरक्षकयोरपि' इति *हैमानेकार्थः* [३-२१८] किं० महर्षयः ? **अशरणाः** गतशरणाः के कमिव गुणा विनय**मिव** यथा **गुणाः** औदार्यादयः **विनयं** शिक्षागुणम् उद्दिश्य अशरणाः सन्तः शरणं यान्ति अशिक्षितस्य तदभावात् इति भावः । पुनः को कमिव ? नया विवेक**मिव** यथा **नया** नीतयः **विवेकं** शरणं यान्ति किं० विवेकम् ? **अपनयभिदं** दुर्नीतिनिवारकम् अविवेकिनो नीत्यभावात् इत्यर्थः । नीतिः षाड्गुण्यप्रयोगः । पुनः के कमिव ? अवधयो न्याय**मिव** यथा **अवधयो** मर्यादा **न्यायं** शरणं यान्ति अप्रमाणिकस्य समयोल्लङ्घितत्वादिति भावः । उपमानेष्वपि यथायोग्यं योज्यम् । अथ समासः । अपनयं भिनत्तीति अपनयभिद् तम० । नीयतेऽननेति न्यायः । न विद्यते शरणं येषां ते अ० । महान्तश्चेते ऋषयश्च महर्षयः । इति वृत्तार्थः ॥ १७ ॥

परिवीतमंशुभिरुदस्तदिनकरमयूखमण्डलैः ।
शम्भुमुपहतदृशः सहसा न च ते निरीक्षितुमभिप्रसेहिरे ॥ १८ ॥

'परि०' व्याख्या । **ते** महर्षयः **शम्भुं** श्रीमहादेवं **सहसा** झटिति **निरीक्षितुं** विलोकयितुं **न अभिप्रसेहिरे** न शेकुः न समर्था बभूवुरित्यर्थः । 'निचा[1]यितुम्' इति पाठे **निचायितुं** निशामयितुं द्रष्टुमित्यर्थः । किं०ते ? **उपहतदृशः** तत्तेजःप्रतिहतनेत्राः किं० शम्भुम् ? **अंशुभिः** किरणैः **परिवीतं** वेष्टितं व्याप्तं किं० अंशुभिः ? **उदस्तदिनकरमयूखमण्डलैः** निरस्तसूर्यकिरणसमूहैः सूर्यतेजोविजयिभिरित्यर्थः । अथ समासः । मयूखानां मण्डलं भयूखमण्डलं दिनकरस्य मयूखमण्डलं दिनकरमयूखमण्डलम् उदस्तं दिनकर-मयूखमण्डलं यैस्ते उदस्तदिनकरमयूखमण्डलास्तैः उद० । उपहता दृशो येषां ते उ० । इति वृत्तार्थः ॥१८॥

---

1. एष पाठः म. मध्ये ।

---

१. अत एव दुःसहत्वदाहाद्यजनकत्वयोर्विरोधाद्विरोधाभासोऽलंकारः -म. ।

अथ भूतभव्यभवदीशमभिमुखयितुं कृतस्तवाः ।
तत्र महसि ददृशुः पुरुषं कमनीयविग्रहमयुग्मलोचनम् ॥ १९ ॥

'अथ०' व्याख्या । **अथ** दृगुपघातानन्तरं ते महर्षयः **तत्र** तस्मिन् **महसि** तेजसि **कमनीयविग्रहं** मनोज्ञदेहम् **अयुग्मलोचनं** त्रिनेत्रं **पुरुषं ददृशुः** अद्राक्षुः । किं० पुरुषम् ? **अभिमुखयितुं** सन्मुखीकर्तुं **कृतस्तवाः** विहितस्तुतयः कृतस्तोत्रा इत्यर्थः न तु अन्यथेतिभावः । किं० पुरुषम् ? **भूतभव्यभवदीशं** अतीतभविष्यद्वर्तमानेश्वरं त्रिकालविदमित्यर्थः । अथ समासः । भूतं च भव्यं च भवच्च [भूतभव्यभवन्ति।] भूतभव्यभवतामीशो भूतभव्यभवदीशस्तं भू० । कृताः स्तवा यैस्ते कृत० । कमनीयो विग्रहो यस्यासौ कमनीयविग्रहस्तं क० । न युग्मानि अयुग्मानि अयुग्मानि लोचनानि यस्यासौ अयुग्मलोचनस्तम् अ० । इति वृत्तार्थः ॥ १९ ॥

ते महर्षयः अयुग्मलोचनं पुरुषं ददृशुः । अथ पञ्चभिः श्लोकैः पुरुषं विशिनष्टि -

ककुदे वृषस्य कृतबाहुमकृशपरिणाहशालिने ।
स्पर्शसुखमनुभवन्तमुमाकुचयुग्ममण्डल इवार्द्रचन्दने ॥ २० ॥

'ककु०' व्याख्या । किं० पुरुषम् ? **वृषस्य** बलीवर्दस्य **ककुदे** स्कन्धे **कृतबाहुं** स्थापितकरं किं० ककुदे ? **अकृशपरिणाहशालिने** महाविशालतया शोभमाने 'परिणाहो विशालता' इति *हैमः* [१४३१] । पुनः किं० पुरुषम् ? **उमाकुचयुग्ममण्डले** पार्वतीपयोधरयुगलतटे **स्पर्शसुखम् अनुभवन्तमिव** स्थितं किं लक्षणे उमा० ? **आर्द्रचन्दने** सरसचन्दनविलेपने । अथ समासः । कृतो बाहुर्येन स कृतबाहुस्तं कृ० । अकृशश्चासौ परिणाहश्च अकृशपरिणाहः अकृशपरिणाहेन शालत इति अकृशपरिणाहशाली तस्मिन् अ० । स्पर्शस्य सुखं स्पर्शसुखम् अनुभवतीति अनुभवन् तम् अ० । कुचयोर्युग्मं कुचयुग्मम् उमायाः कुचयुग्मम् उमाकुचयुग्मम् उमाकुचयुग्मस्य मण्डलम् उमाकुचयुग्ममण्डलं तस्मिन् उ० । आर्द्रं चन्दनं यस्मिन् असौ आर्द्रचन्दनस्तस्मिन् आ० । इति वृत्तार्थः ॥ २० ॥

पुनस्ते महर्षयः किं० अयुग्मलोचनं ददृशुः ?

स्थितमुन्नते तुहिनशैलशिरसि भुवनातिवर्तिना ।
साद्रिजलधिजलवाहपथं सदिगश्नुवानमिव विश्वमोजसा ॥ २१ ॥

'स्थित०' व्या० । किं० अयुग्मलोचनम् ? **उन्नते** उच्चैस्तरे **तुहिनशैलशिरसि** हिमाचलशिखरे **स्थितं** क्वचित्कोणे स्थितम् इत्यर्थः । पुनः किं० पुरुषम् ? उत्प्रेक्ष्यते **ओजसा** तेजसा **विश्वं** त्रैलोक्यं जगत् **अश्नुवानं** व्याप्नुवन्तमिव स्थितं किं० ओजसा ? **भुवनातिवर्तिना** सर्वलोकातिशायिना किं० विश्वम् ? **साद्रिजलधिजलवाहपथं** पर्वतसमुद्राकाशयुक्तं पुनः किं० विश्वम् ? **सदिग्दिग्भिः** सहितम् एकदेशस्थितोऽपि सर्वमभिव्याप्य वर्तते इवेत्यर्थः । अथ समासः । तुहिनस्य शैलः तुहिनशैलः तुहिनशैलस्य शिरः तुहिनशैलशिरः तस्मिन् तु० । भुवनानि अतिवर्तत इत्येवंशीलो भुवनातिवर्ती तेन

भु० । अद्रयश्च जलधयश्च जलवाहपथश्च अद्रिजलधिजलवाहपथाः अद्रिजलधिजलवाहपथैः सह वर्तत इति साद्रिजलधिजलवाहपथस्तं सा० । दिग्भिः सह वर्तत इति सदिग् । अश्नुते इति अश्नुवान् तम् अश्नुवानम् । इति वृत्तार्थः ॥२१॥

पुनः ते मुनयः किं० अयुग्मलोचनं ददृशुः ।

अनुजानुमध्यमवसक्तविततवपुषा महाहिना ।
लोकमखिलमिव भूमिभृता रवितेजसामवधिनाभि[1]वेष्टितम् ॥ २२ ॥

'अनु०' व्याख्या । किं० अ० ? **अनुजानुमध्यं** जानुकटिप्रदेशमध्यम् अनुलक्षीकृत्य **महाहिना** महासर्प्पेण वासुकिनेति यावत् **अभिवेष्टितं** समन्तात् वेष्टितम् आवृत्तमित्यर्थः । किं० महाहिना ? **अवसक्तविततवपुषा** संलग्नविस्तीर्णशरीरेण 'अवशक्तिविततवपुषा' इति क्वचित् पाठस्तत्र अवशक्तिः नाम बन्धविशेषस्तेन विततं दीर्घीभूतं वपुर्यस्येति स्वभावोक्तिः पुनः किं० महाहिना ? उत्प्रेक्ष्यते **रवितेजसां** सूर्यत्विषाम् **अवधिना** मर्यादाभूतेन विपुल**भूमिभृता** लोकालोकाचलेन अभिवेष्टितम् **अखिलं** समग्रं जगदिव **स्थितमित्यर्थः** । इत्युत्प्रेक्षा 'असूर्यंपश्यापरभागो लोकालोकाचल' (७७) *इत्यागमः* । अथ समासः। जान्वोर्मध्ये अनुजानुमध्यं विभक्त्यर्थे अव्ययीभावः । अवसक्तं विततं च वपुर्यस्य सोऽवसक्तविततवपुस्तेन अ० । महांश्चासौ अहिश्च महाहिस्तेन म० । विपुलश्चासौ भूमिभृच्च विपुलभूमिभृत् तेन विपुलभूमिभृता। रवेस्तेजांसि रवितेजांसि तेषां र० । इति वृत्तार्थः ॥ २२ ॥

ते महर्षयः किं० अयुग्मालोचनं ददृशुः ?

परिणाहिना तुहिनराशिविशदमुपवीतसूत्रताम् ।
नीतमुरगमनुरञ्जयता शितिना गलेन विलसन्मरीचिना ॥ २३ ॥

'परिणा०' व्या । किं० अयु० ? **शितिना** नीलेन **गलेन** कण्ठेन उपलक्षितं 'कालो नीलोऽसितः शितिः' इति *हैमः* [१३९७] । किं० गलेन ? **परिणाहिना** विशालेन 'परिणाहो विशालता' इति *हैमः* [१४३१] । गलेन किंकुर्वता ? **उरगं** शेषनागम् **अनुरञ्जयता** स्वगणोपरक्तं कुर्वता श्यामीकुर्वतेत्यर्थः । किं० उरगम् ? **तुहिनराशिविशदं** हिमसमूहवत् धवलं पुनः किं० उरगम् ? **उपवीतसूत्रतां** यज्ञोपवीतत्वं **नीतं** प्रापितं किं० गलेन ? **विलसन्मरीचिना** स्फुरत्किरणेन । अथ समासः । परिणाहोऽस्यास्तीति परिणाही तेन प० । तुहिनस्य राशयः तुहिनराशयः तुहिनराशिवत् विशदः तुहिनराशिविशदः तं तु० । उपवीतसूत्रस्य भावः उपवीतसूत्रता तामु० । विलसन्तो मरीचयो यस्मिन् स विलसन्मरीचिस्तेन वि० । इति वृत्तार्थः ॥२३॥

(ते महर्षयः किं० अयुग्मलोचनं ददृशुः ?

1. ०धि० -म. इदं च पा ।

बहुभिश्च बाहुभिरहीनभुजगवलयैर्विराजितम् ।
चन्दनतरुभिरिवालघुभिः धवलायितैर्मलयमेदिनीभृतम् ॥

'बहु०' व्याख्या । **च** पुनः किं० अयु० ? **बहुभिरनेकैः** सहस्रभुजत्वात् **बाहुभिर्भुजैः विराजितं** शोभितं किं० बाहुभिः ? **अहीनभुजगवलयैः** सर्पराजभुजगरूपकङ्कणैः सर्पाभरणैरित्यर्थः । किं० अयु० ? उत्प्रेक्ष्यते **मलयमेदिनीभृतं** मलयाचलमिव स्थितं किं० मल० ? **धवलायितैः** धवलीभूतैः यद्वा 'धवलायतैः'[1] धवला आयताश्च तैः **अलघुभिः** महद्भिः **चन्दनतरुभिः** चन्दनवृक्षैः विराजितम् । अथ समासः । अहीनाम् इनः अहीनः अहीनाश्चैते भुजगाश्च अहीनभुजगाः । अहीनभुजगा एव वलयः येषु येषां वा ते अहीनभुजगवलयास्तैः अ० । चन्दनसंज्ञिकास्तरवः चन्दनतरवः तैश्च० । न लघवो अलघवस्तैर० । मलयश्चासौ मेदिनीभृत् च मलयमेदिनीभृत् तं म० । इति वृत्तार्थः ॥)

ते महर्षयः किं० अयुग्मलोचनं ददृशुः ?

प्लुतमालतीसितकपालकुमुदमुपरुद्धमूर्धजम् ।
शेषमिव सुरसरित्पयसः शिरसा विकाशि शशिधाम बिभ्रतम् ॥ २४ ॥

'प्लुत०' व्या० । किं० अयुग्मलोचनम् ? **शिरसा** मस्तकेन **विकाशि** विसृत्वरं प्रसरणशीलं **शशिधाम** चन्द्रतेजो **बिभ्रतं** धारयन्तं किं० शशिधाम ? उत्प्रेक्ष्यते **सुरसरित्पयसः** गङ्गाजलस्य **शेषं** निर्गतावशिष्टांशमिव स्थितं किं० पयः शेषम् ? **प्लुतमालतीसितकपालकुमुदं** विकसितमालतीकुसुमवत् श्वेतकपालरूपकैरवं पुनः किं० पयः शेषम् ? **उपरुद्धमूर्धजं** व्याप्तशिरोरुहं सशेषम् उज्झरितमित्यर्थः । अत्र शेषशब्दो नपुंसकलिङ्गः । अथ समासः । मालतीवत् सितं मालतीसितं मालतीसितं च तत् कपालं च मालतीसितकपालं प्लुतं मालतीसितकपालमेव कुमुदं येन तत् प्लु० । उपरुद्धा मूर्धजा येन तत् उ० वा मूर्धजैरुपरुद्धम् उ० इति समासः । सुरसरितः पयः सुरसरित्पयस्तस्य सु० । शशिनो धाम श० । इति वृत्तार्थः ॥ २४ ॥ (प.कु.)

मुनयस्ततोऽभिमुखमेत्य नयनविनिवेशनोदिताः ।
पाण्डुतनयतपसा जनितं जगतामशर्म भृशमाचचक्षिरे ॥ २५ ॥

'मुनय०' व्याख्या । **ततो**ऽयुग्मलोचनदर्शनानन्तरं **मुनयो** महर्षयः **अभिमुखं** श्रीमहादेवस्य सन्मुखम् **एत्य** आगत्य **जगतां** भुवनानाम् **अशर्म** असुखं दुःखं **भृशम**तिशयेन **आचचक्षिरे** कथयामासुः किं० अशर्म ? **पाण्डुतनयतपसा जनितम्** अर्जुनतपसोत्पादितं किं० मुनयः ? **अस्य** श्रीमहादेवस्य **नयनविनिवेशनोदिताः** नेत्रसंज्ञया प्रेरिताः । अथ समासः । नयनानां विनिवेशः नयनविनिवेशः नयनविनिवेशेन नोदिता न० । पाण्डोः तनयः पाण्डुतनयः पाण्डुतनयस्य तपः पाण्डुतनयतपः तेन पा० । न शर्म अशर्म। इति वृत्तार्थः ॥ २५ ॥

---

1. प्रबलायतैः -म. ।

तरसैव कोऽपि भुवनैकपुरुष ! पुरुषस्तपस्यति ।
ज्योतिरमलवपुषोऽपि रवेरभिभूय वृत्र इव भीमविग्रहः ॥ २६ ॥

'तरसै०' व्याख्या । **हे भुवनैकपुरुष** ! हे श्रीमहादेव ! **कोऽपि** अविज्ञातः **पुरुषो** नरः **तरसैव** वेगेनैव **तपस्यति** तपः करोति । किं० कोऽपि पुरुषः ? **भीमविग्रहः** रौद्रदेहः क इव ? वृत्रो वृत्रासुर **इव** यथा **वृत्रो** भीमविग्रहो भवति तथा किंकृत्वा ? **अमलवपुषोऽपि** मेघावरणरहितस्य उज्ज्वलशरीरस्यापि **रवेः** सूर्यस्य **ज्योतिस्**तेजो **अभिभूय** तिरस्कृत्य । अथ समासः । भुवनेषु एकपुरुषः भु० अमलं वपुर्यस्य सोऽमलवपुस्तस्य अ० । भीमो विग्रहो यस्य सः भी० । इति वृत्तार्थः ॥ २६ ॥

स धनुर्महेषुधि बिभर्ति कवचमसिमुत्तमं जटाः ।
वल्कमजिनमिति चित्रमिदं मुनिताविरोधि न च नास्य राजते ॥ २७ ॥

'स धनु०' व्याख्या । **अस्य** पुरुषस्य अर्जुनस्य **इदमे**तत् विरुद्धवेषधारणम् **इति** अमुना प्रकारेण **चित्रमा**श्चर्यकारिरूपं **मुनिताविरोधि** मुनिताविरोधकारिवत् **न राजत** इति **न** किन्तु राजत एवेत्यर्थः । इतीति किम् ? स पुरुषः **धनु**श्चापं **बिभर्ति** धारयति किं० धनुः ? **महेषुधि** महातूणीरयुक्तं **च** पुनः स पुरुषः **कवचं** सन्नाहं बिभर्ति धारयति च पुनः स पुरुषः **उत्तमम् असिं** खड्गं बिभर्ति च पुनः स पुरुषः **जटाः** केशरचनाविशेषान् बिभर्ति च पुनः स पुरुषः **वल्कं** वल्कलचीरं बिभर्ति च पुनः स पुरुषः **अजिनं** चर्म बिभर्ति । अथ समासः । इषवो बाणा धीयन्ते निक्षिप्यन्ते आभ्यामिति महेषुधी महान्ताविषुधी यस्य तन्महेषुधि । मुनेर्भावो मुनिता मुनितां विरोधयतीति मु० । इति वृत्तार्थः ॥ २७ ॥

चलनेऽवनिश्चलति तस्य करणनियमे सदिङ्मुखम् ।
स्तम्भमनुभवति शान्तमरुद्ग्रहतारकागणयुतं नभस्तलम् ॥ २८ ॥

'चल०' व्याख्या । हे महादेव ! **तस्यार्**जुनस्य **चलने** गमने स्नानादिक्रियासु चलनक्रियायां सति **अवनि**र्भूमि**श्चलति** कम्पते पुनस्तस्य **करणनियमे** इन्द्रियनिरोधे सति **नभस्तलम्** आकाशं **स्तम्भं** निश्चलत्वम् **अनुभवति** भजति किं० नभस्तलम् ? **सदिङ्मुखं** दिङ्मुखेन सहितं पुनः किं० नभस्तलम् ? **शान्तमरुद्ग्रहतारकागणयुतं** निश्चलवायुग्रहनक्षत्रवृन्दयुक्तम् अतो विश्वातिशायिनी तस्य शक्तिरुपलभ्यते इति भावः । अथ समासः । करणानां नियमः करणनियमस्तस्मिन् क० । दिङ्मुखेन सह वर्तमानं स० । मरुतश्च ग्रहाश्च तारकाश्च मरुद्ग्रहतारकाः मरुद्ग्रहतारकाणां गणाः मरुद्ग्रहतारकागणाः शान्ताश्च ते म० शा० शान्तमरुद्गहतारकागणैर्युतं शा० । नभसस्तलं नभस्तलम् । इति वृत्तार्थः ॥२८॥

न चैतदुपेक्ष्यमित्याशयेनाह –

स तदोजसा विजितसारममरदितिजोपसंहितम् ।
विश्वमिदमपिदधाति पुरा किमिवास्ति यन्न बत[1] तेन दुष्करम् ॥ २९ ॥

1. तपसामदुष्करम् -म. इदं च पा. ।

'स त०' व्याख्या हे महादेव ! **सोऽर्जुनः तदोजसा** तेन तेजसा **पुरा** अग्रे **इदमेतत् विश्वं** जगत् **अपिदधाति** अपिधास्यति शीघ्रमेव हरिष्यतीत्यर्थः । भविष्यत्काले पुरायोगे वर्तमाना । किं० विश्वम् ? **विजितसारं** निरस्ततत्त्वं पुनः किं० ? **अमरदितिजोपसंहितं** सुरासुरसंयुक्तं तत् **किमिवास्ति यत् बत** खलु **तेन** पुंसा **दुष्करं न** किंचित्तेन दुष्करमस्तीत्यर्थः । अथ समासः । विजितं सारं यस्य तत् वि० । अमराश्च दितिजाश्च अमरदितिजाः अमरदितिजैः उपसंहितम् अ० । इति वृत्तार्थः ॥ २९ ॥

न चैतदन्यफलकं तप इत्याह -

विजिगीषते यदि जगन्ति युगपदथ संजिहीर्षति ।
प्राप्तुमभवमभिवाञ्छति वा वयमस्य नो विसहितुं क्षमा रुचः ॥ ३० ॥

'विजि०' व्या० । वयं किंचिन्न विद्म इति शेषः । किं तन्न विद्म इत्याह- हे महादेव ! स पुरुषो **जगन्ति** भुवनानि **यदि** किम् **विजिगीषते** विजेतुमिच्छति ? अथवा **युगपत्** समकालमेव जगन्ति **संजिहीर्षति** संहर्तुमिच्छति **वा** अथवा **अभवं** मोक्षं **प्राप्तुम् अभिवाञ्छति** एतन्मध्ये एकमपि न जानीमहे इति भावः । किन्तु **वयं** मुनयः **अस्य** अर्जुनस्य **रुचो** वाञ्छाः कामितानि अभिलषितानि **विसहितुम्** अवधारयितुं ज्ञातुमिति यावत् **न क्षमा** न समर्थाः तत्र सहेरवधारणार्थत्वं विचार्य्यम् । 'रुक् शोभाकिरणेच्छासु' इति *हैमानेकार्थः* [१-७] । यद्वा वयमस्य रुचस्तेजांसि तपो वा विषहितुमिति पाठे सोढुं न क्षमाः । अथ समासः । न भवोऽभवस्तम् अभवम् । इति वृत्तार्थः ॥ ३० ॥

किमुपेक्षसे कथय नाथ ! न तव विदितं न किंचन ।
त्रातुमलमभयदार्हसि नस्त्वयि मा स्म शासति हि भवत्पराभवः ॥ ३१ ॥

'किमु०' व्याख्या । **हे नाथ** ! त्वं **कथय किं** किमर्थम् **उपेक्षसे** ? उदासीनो भवसि । **तव न विदितम्** अज्ञातं **किंचन** किमपि **न** नास्तीत्यर्थः । अपि तु ज्ञातमेवास्ति । हे अभयद ! त्वं **नो**ऽस्मान् **अल**मत्यर्थं **त्रातुं** रक्षितुम् **अर्हसि** योग्यो भवसि **त्वयि नो**ऽस्मान् **शासति** रक्षति सति **पराभवः** उपद्रवो **मा स्म भवत्** मा भूत् मा स्म योगे ह्यस्तनी । अथ समासः । अभयं ददातीति अभयदस्तस्य संबोधनं हे अभयद । इति वृत्तार्थः ॥ ३१ ॥

इति गां विधाय विरतेषु मुनिषु वचनं समाददे ।
भिन्नजलधिजलनादगुरु ध्वनयन् दिशां विवरमन्धकान्तकः ॥ ३२ ॥

'इति०' व्याख्या । **अथा**नन्तरम् **अन्धकान्तको** महादेवः अन्धकस्यान्धकासुरस्य अन्तको मृत्युः मारक इत्यर्थः । **वचनं** वाचं **समाददे** उवाच केषु सत्सु ? **मुनिषु** महर्षिषु **इति** पूर्वोक्तां **गां** वाणीं **विधाय** उक्त्वा **विरतेषु** मौनिभूतेषु सत्सु अन्धकान्तकः किंकुर्वन् ? **दिशां** ककुभां **विवरं** छिद्रं **ध्वनयन्** गर्जयन् मुखरयन् किं० वचनम् ? **भिन्नजलधिजलनादगुरु** क्षुब्धसमुद्रपानीयशब्दवत् गम्भीरं यदा भिन्नजलधि-जलनादगुरु इति क्रियाविशेषणं क्रियते तदा अन्धकान्तकः शिवः भिन्नस्योद्वेलस्य जलधेः जलस्य नादवत्

गुरु गम्भीरं यथा स्यात्तथा दिशां विवरम् अन्तरालं ध्वनयन् वचनं **समाददे** स्वीचकार उवाचेत्यर्थः । अथ समासः । भिन्नश्चासौ जलधिश्च भिन्नजलधिः जलस्य नादः जलनादः भिन्नजलधेर्जलनादः भिन्नजलधिजलनादः भिन्नजलधिजलनादवत् गुरु भि० । ध्वनयतीति ध्वनयन् । अन्धकस्य अन्तकः अ० । इति वृत्तार्थः ॥३२॥

महादेवः किमुवाचेत्याह -

बदरीतपोवननिवासनिरतमवगात मान्यथा ।
धातुरुदयनिधने जगतां नरमंशमादिपुरुषस्य गां गतम् ॥ ३३ ॥

'बद०' व्याख्या । हे मुनयः ! यूयं **बदरीतपोवननिवासनिरतं** बदरिकाश्रमे निवासनिरतं नित्य-निवासिनं बदरिकाश्रमनिवासतत्परमित्यर्थः । **गां भुवं गतम् अवतीर्णम् । नरम्** अर्जुनम् **अवगात** जानीत **अन्यथा** उक्तवैपरीत्येन **मावगात** मानुषमात्रं मा जानीतेत्यर्थः । किं० नरम् ? **आदिपुरुषस्य अंशं** विष्णोः भागं विष्णोरंशभूतं नरं नरसंज्ञं जानीतेत्यर्थः । यो नारायणसंज्ञः स एवेति भावः । पुनः किं० आदिपुरुषस्य ? **जगतां** भुवनानाम् **उदयनिधने** उत्पत्तिनाशौ सृष्टिसंहारौ इत्यर्थः । **धातुः** तयोः कर्तुः एतन्निमित्तं तपः कर्तुरिति भावः। अथ समासः । बदरीसंज्ञं तपोवनं बदरीतपोवनं बदरीतपोवने निवासः बदरीतपोवननिवासः बदरीतपोवननिवासे निरतः बदरीतपोवननिवासनिरतस्तं ब० । उदयश्च निधनं च उ० । आदिश्चासौ पुरुषश्च आदिपुरुषस्तस्य आ० । इति वृत्तार्थः ॥ ३३ ॥

अथ तपसो निमित्तमाह -

द्विषतः परासिसिषुरेष सकलभुवनाभितापिनः ।
क्रान्तकुलिशकरवीर्यबलान्मदुपासनं विहितवान् महत्तपः ॥ ३४ ॥

'द्विषतः' व्याख्या । हे मुनयः ! **एष** अयं पुरुषः **मदुपासनं** मदाराधनं **महत्तपः** कृच्छ्रादिकर्म **विहितवान्** कृतवान् अत्र निमित्तं किम् ? शत्रुशिक्षैव नान्यत् कस्मात्तपः करोति ? तत्राह- **क्रान्तं** कुलिशकरसंक्रान्तं यत् **कुलिशकर** इन्द्रः तस्य **वीर्यं** तेजः तस्य **बलात्** किं कर्तुमिच्छुः एष ? **द्विषतः** शत्रून् **परासिसिषुः** जिघांसुः किं० द्विषतः ? **सकलभुवनाभितापिनः** जगत्त्रयसंतापकारिणः । पुनः किं० द्विषतः ? **क्रान्तकुलिशकरवीर्यबलान्** आक्रान्तेन्द्रशक्तिसैन्यान् । अथ समासः । परासितुमिच्छतीति परासिसिषति परासिसिषतीति प० । सकलानि च तानि भुवनानि च सकलभुवनानि सकलभुवनानि अभितापयन्तीति स० । वीर्यं च बलं च वीर्यबलौ कुलिशं करे यस्याऽसौ कुलिशकरः कुलिशकरस्य वीर्यबले कुलिशकरवीर्यबले क्रान्ते कुलिशकरवीर्यबले यैस्ते क्रान्तकुलिशकरवीर्यबलास्तान् क्रा० । मम उपासनं म० । इति वृत्तार्थः ॥ ३४ ॥

अथास्य मानुषावतारे कारणमाह -

अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः ।
पातुमसुरनिधनेन विभू भुवमभ्युपेत्य मनुजेषु तिष्ठतः ॥ ३५ ॥

'अय०' व्याख्या । हे मुनयः ! **अयं** पुरुषोऽर्जुनः **च** पुनः **अच्युतो** नारायणः एतौ द्वौ **भुवं** भूमिम् **अभ्युपेत्य** आगत्य **मनुजेषु** मनुष्यलोकेषु **तिष्ठतः** वर्तेते केन ? **सरसिरुहजन्मनः** ब्रह्मणः **वचनेन** प्रार्थनया किंकर्तुम् ? **असुरनिधनेन** दैत्यानां वधेन **प्रजाः** लोकान् **पातुं** रक्षितुं किं० एतौ ? अत एव **विभू** प्रभू वर्तेते । अथ समासः । सरसिरुहात् जन्म यस्य स सरसिरुहजन्मा तस्य स० । असुराणां निधनम् असुरनिधनं तेन अ० । इति वृत्तार्थः ॥ ३५ ॥

अथास्य सत्त्वसंपदं प्रकाशितुमाह -

सुरकृत्यमेतदवगम्य निपुणमिति मूकदानवः ।
हन्तुमभिपतति पाण्डुसुतं त्वरया तदत्र सह गम्यतां मया ॥ ३६ ॥

'सुर०' व्याख्या । हे मुनयः ! **मूकदानवः** मूकाख्यः कश्चिद् दैत्यः **इति** अमुना प्रकारेण **निपुणं** साधु सम्यक् **अवगम्य** ज्ञात्वा **पाण्डुसुतम्** अर्जुनं **हन्तुं** विनाशयितुम् **अभिपतति** अभिमुखमागच्छति इतीति किम् ? **एतद्** पाण्डुसुतकृत्यं **सुरकृत्यं** देवकार्यं वर्तते अतो हेतोः **त्वरया** वेगेन **मया सह** तत्रार्जुनाश्रमविषये आश्रमं प्रति गम्यतां द्रष्टुमिति शेषः । आश्रमगमनं तु प्रतीत्यर्थमिति भावः । अथ समासः । सुराणां कृत्यं सु० । मूकसंज्ञको दानवः मू० । पाण्डोः सुतः पाण्डुसुतः तं पा० । इति वृत्तार्थः ॥३६॥

विवरेऽपि नैनमनिगूढमभिभवितुमेष पारयन् ।
पापनिरतिरविशङ्कितया विजयं व्यवस्यति वराहमायया ॥ ३७ ॥

'विव०' व्याख्या । **एष** मूकदानवः तत्रार्जुने **वराहमायया** शूकररूपेण **अविशङ्कितया** स्वरूपगूहनात् निःशङ्कितया **विजयं व्यवस्यति** विजयं प्रति उद्युक्तो विजयं वाञ्छतीत्यर्थः । वराहमिषेण तं वञ्चयित्वा हन्तुमिच्छतीत्यर्थः । साक्षाद् हन्तु नाम किं कपटेनेत्याह- एषः किंकुर्वन् ? **विवरे** रन्ध्रे एकान्तेऽपि एष अर्जुनम् **अनिगूढं** प्रकटं साक्षात् यथा भवति तथा **अभिभवितुं** पराभवितुं **न पारयन्न** शक्नुवन् प्रकटं हन्तुं न शक्नोतीत्यर्थः । किं० एषः ? **पापनिरतिः** पापात्मा । अथ समासः । न निगूढम् अनिगूढम् । पापे निरतिर्मतिर्यस्य स पा० । न विशङ्किता अविशङ्किता तया अ० । वराहस्य माया वराहमाया तया व० । इति वृत्तार्थः ॥ ३७ ॥

ततः किं भावीत्याह -

निहते विडम्बितकिरातनृपतिवपुषा रिपौ मया ।
मुक्तनिशितविशिखः प्रसभं मृगयाविवादमयमाचरिष्यति ॥ ३८ ॥

'निह०' व्याख्या । हे मुनयः ! **अयमर्जुनः प्रसभं** प्रसह्य **मया** सह **मृगयाविवादं** मृगप्रहारकलहम् आखेटकनिमित्तकलहमित्यर्थः । 'पापर्द्धिर्मृगयाऽऽखेटौ' इति *हैमः* [९२७] । **आचरिष्यति** करिष्यति

कस्मिन् सति **विडम्बितकिरातनृपतिवपुषा** स्वीकृतभिल्लराजशरीरेण तद्रूपधारिणेत्यर्थः । मयेति पदस्य डमरुकमणिन्यायेनात्रापि संबन्धात् **मया** महादेवेन **रिपौ** मूकदानवे **निहते** सत्यहम् अस्य मृगस्य प्रहर्तेति कलहयिष्यतीति भावः । किं० अयम् ? रिपौ **मुक्तनिशितविशिखः** वराहे क्षिप्ततीक्ष्णबाणः । अथ समासः । किरातश्चासौ नृपतिश्च किरातनृपतिः विडम्बितं किरातनृपतेर्वपुर्येन स विडम्बितकिरातनृपतिवपुस्तेन वि० । निशितश्चासौ विशिखश्च निशितविशिखः मुक्तो निशितविशिखो येन स मु० । मृगयायाः विवादः मृ०तं मृगयाविवादम् । इति वृत्तार्थः ॥ ३८ ॥

ततोऽपि किं भविष्यतीति तत्राह -

तपसा निपीडितकृशस्य विरहितसहायसंपदः ।
सत्त्वविहितमतुलं भुजयोर्बलमस्य पश्यत मृधेऽधिकुप्यतः ॥ ३९ ॥

'तप०' व्याख्या । हे मुनयः ! यूयं **मृधे** संग्रामे **अधिकुप्यतः** अधिकं कोपं कुर्वतः **अस्य** अर्जुनस्य **अतुलं** सादृश्यरहितं **भुजयो**र्बाह्वो**र्बलं** शक्तिं सामर्थ्यं वा **पश्यत** विलोकयत किं० अस्य ? **तपसा** तपश्चरणेन आहाराद्यभावेन **निपीडितकृशस्य** नितरां पीडितस्य अत एव दुर्बलस्य च पुनः किं० अस्य ? **विरहितसहायसंपदः** अविद्यमानमित्रसंपदः किं० बलम् ? **सत्त्वविहितं** स्वभावेन कृतं स्वाभाविकमित्यर्थः । अथ समासः । पूर्वं निपीडितः पश्चात् कृशः इति निपीडितकृशस्तस्य नि० । विरहिता सहायसंपत् येन स विरहितसहायसंपत् तस्य० । सत्त्वेन विहितं स० । न विद्यते तुला सादृश्यं यस्य तत् अ० । इति वृत्तार्थः ॥ ३९ ॥

अथ त्रिभिरस्य किरातभावं वर्णयति -

इति तानुदारमनुनीय विषमहरिचन्दनालिना ।
घर्मजनितपुलकेन लसद्गजमौक्तिकावलिगुणेन वक्षसा ॥ ४० ॥

वदनेन पुष्पितलतान्तनियमितविलम्बिमौलिना ।
बिभ्रदरुणनयनेन रुचं शिखिपिच्छलाञ्छितकपोलभित्तिना ॥ ४१ ॥

बृहदुद्वहञ्जलदनादि धनुरुपहितैकमार्गणम् ।
मेघनिचय इव संववृते रुचिरः किरातपृतनापतिः शिवः ॥ ४२ ॥

'इति०' 'वद०' 'बृहद्०' व्याख्या । **शिवः** श्रीमहादेवः **रुचिरः** मनोहरः **किरातपृतनापतिः** भिल्लसेनापतिः **संववृते** किरातसेनापतिवेषधारी बभूवेत्यर्थः । किं० शिवः ? उत्प्रेक्ष्यते **मेघनिचय इव** मेघसमूह इव स्थितः श्यामत्वात् । शिवः किंकुर्वन् ? [**बृहद्**] महत् **धनुः** धनुषम् **उद्वहन्** धारयन् किं० धनुः ? **जलदनादि** मेघवद्ध्वनि पुनः किं० धनुः ? **उपहितैकमार्गणम्** आरोपितैकबाणम् । अथ

१. अत्र विशेषके स्वभावोक्तिरलंकारः -म.

समासः । जलद इव नदतीति ज० । उपहित एको मार्गणो यस्मिन् तत् उ० । मेघानां निचयः मे० । किरातस्य पृतना किरातपृतना किरातपृतनायाः पतिः कि० । इति वृत्तार्थः ॥ ४२ ॥

किं० शिवः ? **वदनेन** मुखेन **रुचं** शोभां **बिभ्रत्** दधानः किं० वदनेन ? **पुष्पितलतान्तनियमित-विलम्बिमौलिना** कुसुमितलताग्रबद्धलम्बमानकेशेन 'मौलिः किरीटे धम्मिले चूडाकङ्केल्लिमूर्द्धसु' इति *हैमानेकार्थः* [२-४९६] । पुनः किं० वदनेन ? **अरुणनयनेन** रक्तलोचनेन पुनः किं० वदनेन ? **शिखिपिच्छलाञ्छितकपोलभित्तिना** मयूरपिच्छैरलंकृतगण्डस्थलेन एवंविधेन वदनेन रुचं दधदित्यर्थः । अथ समासः । लतानामन्ताः लतान्ताः पुष्पाणि संजातानि येषां ते पुष्पिताः पुष्पिताश्च ते लतान्ताश्च पुष्पितलतान्ताः पुष्पितलतान्तैः नियमिता विलम्बिनश्च मौलयो यस्य तत् पुष्पितलतान्तनियमितविलम्बिमौलिः तेन पुष्पि० । अरुणे नयने यस्य तत् अरुणनयनं तेन अरुण० । शिखिनां पिच्छानि शिखिपिच्छानि शिखिपिच्छैर्लाञ्छिते कपोलभित्ती यस्य तत् शिखिपिच्छलाञ्छितकपोलभित्ति तेन शि० । इति वृत्तार्थः ॥४१॥

पुनः किं० शिवः ? [**इति** इत्थं **तान्** मुनीन् **उदारं** युक्तियुक्तं यथा स्यात्तथा। **अनुनीय** शिक्षयित्वा उक्त्वा इति यावद् ।] **वक्षसा** हृदयेन **उपलक्षितः** दृष्टः किं० वक्षसा ? [**विषमहरिचन्दनालिना** विकृतविन्यासहरिचन्दनश्रेणिना पुनः किं० वक्षसा ?] **घर्मजनितपुलकेन** स्वेदोत्पादितरोमाञ्चेन पुनः किं० वक्षसा ? **लसद्गजमौक्तिकावलिगुणेन** [शोभमानकरिकुम्भमौक्तिकावलिसूत्रेण] करिणां मुक्तायोनित्वं तु प्रतीतम् । तदुक्तं- जीमूत[1]करि[2]मत्स्या[3]हि[4]वंश[5]शङ्ख[6]वराह[7]जाः । शुक्त्युद्भवाश्च[8] विज्ञेया अष्टौ मौक्तिकयोनयः ॥७८॥ इति । अथ समासः । विषमा हरिचन्दनस्यालयो यस्मिन् तत् [वि० तेन वि०] । घर्मेण जनिताः पुलकाः यस्मिन् तत् घर्मजनितपुलकं तेन घर्म० । लसन्त्यश्च ता गजमौक्तिकावलयश्च लसद्गजमौक्तिकावलयः ताः एव गुणा यस्मिन् तत् लसद्गजमौक्तिकावलिगुणं तेन ल०। इति वृत्तार्थः ॥ ४० ॥

अनुकूलमस्य च विचिन्त्य गणपतिभिरात्तविग्रहैः ।
शूलपरशुशरचापभृता[1] महती वनेचरचमूर्विनिर्ममे ॥ ४३ ॥

'अनु०' व्या० । प्रथमपादौ **गणपतिभिः** नन्दिचदिप्रभृतिभिः प्रमथमुख्यैर्गणैः **महती** बृहत्तरी **वनेचरचमूः** किरातसेना **विनिर्ममे** निर्मिता किं० गणपतिभिः ? **अस्य** ईश्वरस्य **अनुकूलम्** अभिमतं प्रियं **विचिन्त्य** विचार्य निश्चित्य **आत्तविग्रहैः** गृहीतकिरातदेहैः किं० वने० ? **शूलपरशुशरचापभृता** त्रिशूलकगरबाणकार्मुकैर्युक्ता । अथ समासः । गणानां पतयः गणपतयस्तैः ग० । आत्तो विग्रहो यैस्ते आत्तविग्रहास्तैः आ०। शूलानि च परशवश्च शराश्च चापानि च शूलपरशुशरचापानि शूलपरशुशरचापैः भृता शू० । वनेचराणां चम्वः(मूः) वनेचरचम्वः(मूः) ता० सा० व० । इति वृत्तार्थः ॥ ४४ ॥

विरचय्य काननविभागमनुगिरमथेश्वराज्ञया ।
भीमनिनदपिहितोरुभुवः परितोऽपदिश्य मृगयां प्रतस्थिरे ॥ ४४ ॥

1. भृतै० -म. ।

'विर०' व्याख्या । **अथा**नन्तरं ते सर्वे प्रमथादिगणाः **मृगयाम्** आखेटकम् **अपदिश्य** व्याजीकृत्य **परितः** समन्तात् **प्रतस्थिरे** चेलुः प्रस्थानं चक्रुरित्यर्थः । किंकृत्वा ? **ईश्वराज्ञया** महादेवादेशेन **अनुगिरं** गिरौ पर्वते विभक्त्यर्थे अव्ययीभावः । **काननविभागं** वनविभागं **विरचय्य** रचयित्वा अयमस्माकम् अस्यायमिति देशविभागं कृत्वेत्यर्थः । किं० ते गणाः ? **भीमनिनदपिहितोरुभुवः** मृगयारौद्रकोलाहल-शब्देनाच्छादितविशालभूमयः । अथ समासः । काननस्य विभागः काननविभागस्तं का० । गिरिमनु लक्षीकृत्य इति अनुगिरम् अत्र 'गिरेश्च सेनकस्य' (पा.५-४-११२ इति समासान्तः) । ईश्वरस्य आज्ञा ईश्वराज्ञा तया ई० । भीमाश्च ते निनदाश्च भीमनिनदाः भीमनिनदैः पिहिता ऊरवो भुवो यैस्ते भी० । इति वृत्तार्थः ॥ ४४ ॥

क्षुभिताभिनिःसृतविभिन्नशकुनिमृगयूथनिःस्वनैः ।
पूर्णपृथुवनगुहाविवरः सहसा भयादिव ररास भूधरः ॥ ४५ ॥

'क्षुभि०' व्या० । **भूधरः** पर्वतः **सहसा** अकस्मात् **भयादिव** भीतेरिव **ररास** आक्रन्दान् चकार किं० भूधरः ? **पूर्णपृथुवनगुहाविवरः** पूरितबृहत्काननगुफाविवरः कैः ? **क्षुभिताभिनिःसृतविभिन्न-शकुनिमृगयूथनिःस्वनैः** क्षुभितनिःसृतपक्षिमृगसमूहशब्दैः त्रस्ताः स्वस्थानाच्चलिताः मुक्तसङ्घाताश्च ते **शकुनयः** पक्षिमृगहरिणादयः तेषां **यूथानि** समूहाः तेषां **निःस्वनैः** शब्दैरित्यर्थः । अथ समासः। शकुनयश्च मृगाश्च शकुनिमृगाः क्षुभिताः अभिनिःसृता विभिन्नाश्च ते शकुनिमृगाश्च क्षुभिताभिनिः-सृतविभिन्नशकुनिमृगाः क्षुभिताभिनिःसृतविभिन्नशकुनिमृगाणां यूथानि क्षुभिता० तेषां निःस्वनाः क्षुभि० तैः क्षुभि० । गुहानां विवराणि गुहाविवराणि वनानि च गुहाविवराणि च वनगुहाविवराणि पृथूनि च तानि वनगुहाविवराणि च पृथुवनगुहाविवराणि पूर्णानि पृथुवनगुहाविवराणि यस्य स पू० । इति वृत्तार्थः ॥४५॥

न विरोधिनी रुषमियाय पथि मृगविहङ्गसंहतिः ।
घ्नन्ति सहजमपि भूरिभियः सममागताः सपदि वैरमापदः ॥ ४६ ॥

'न वि०' व्याख्या । **विरोधिनी** जातिवैरिणी 'मृगविहङ्गसंहतिः' **मृगाणां** सिंहव्याघ्रहरणादीनां **विहङ्गानां** काकयूकादीनां च **संहतिः** श्रेणिः **पथि** पलायनमार्गे **रुषं** परस्परक्रोधं **न इयाय** न प्रपेदे किन्तु सहैव संचचारेत्यर्थः । नै[स]र्गिकं वैरम् उत्सृज्य एकत्र चेरुरित्यर्थः । तथाहीति युक्तोऽयमर्थः । **भूरिभियः** बहुलभयाः **समं** सार्द्धम् **आगताः** प्राप्ताः **आपदः** कष्टानि **सपदि** शीघ्रं **सहजमपि** स्वाभाविकमपि **वैरं** विरोधं **घ्नन्ति** परित्यजन्ति न हि संघातव्यसनेषु प्रजायते वैरानुबन्ध इति भावः । अथ समासः । विरोधो विद्यते यस्याः सा वि० । मृगाश्च विहङ्गाश्च मृगविहङ्गाः मृगविहङ्गानां संहतिः मृ० । भूरि भीर्यासु ताः भू० । इति वृत्तार्थः ॥ ४६ ॥

चमरीगणैर्गणबलस्य बलवति भयेऽप्युपस्थिते ।
वंशविततिषु विषक्तपृथुप्रियबालवालधिभिराददे धृतिः ॥ ४७ ॥

'चम०' व्याख्या । **चमरीगणैः** चमरीवृन्दैः **धृतिः** संतोषः **आददे** प्रपेदे स्वीकृतस्थानात् न चलितमित्यर्थः । कस्मिन् सति ? **गणबलस्य** प्रमथगणसैन्यस्य **बलवति** प्रबलेऽपि **भये उपस्थिते** आगते सति किं० चमरीगणैः ? **वंशविततिषु** वंशजालेषु **विषक्तपृथुप्रियबालवालधिभिः** लग्नपृथुलप्रियरोमपुच्छैः 'पुच्छोऽस्त्री लोमलाङ्गूले वालहस्तश्च वालधिः' इत्यमरः । वालधिविभेदभयात् प्राणहानिमप्यवगणय्य स्थितैरित्यर्थः । अथ समासः । चमरीणां गणाः चमरीगणास्तैः च० । गणानां बलं गणबलं तस्य ग० । बलमस्यास्तीति बलवत् तस्मिन् ब० । वंशानां विततयः वंशविततयस्तासु वं० । प्रिया बाला येषु ते प्रियबाला प्रियबालाश्च ते वालधयश्च प्रियबालवालधयः विषक्ताः पृथवः प्रियबालवालधयो येषां ते विषक्तपृथुप्रियबालवालधयस्तैः वि० । इति वृत्तार्थः ॥ ४७ ॥

हरसैनिकाः प्रतिभयेऽपि गजमदसुगन्धिकेसरैः ।
स्वच्छमभिददृशिरे सहसा प्रतिबोधजृम्भितमुखैर्मृगाधिपैः ॥ ४८ ॥

'हर०' व्याख्या । **मृगाधिपैः** सिंहैः **प्रतिभयेऽपि** शत्रुभये भयङ्करे प्राप्ते सति **हरसैनिकाः** श्रीमहादेवसेनाचराः **स्वच्छं** निःशङ्कमेव [**अभि**] **ददृशिरे** दृष्टाः न तु किंचित् क्षुभितमित्यर्थः । युक्तं चैतत् राजनामधारिणां केसरिणाम् इति भावः । किं० मृगाधिपैः ? **गजमदसुगन्धिकेसरैः** हस्तिमदवारिभिः सुरभिस्कन्धकेसरैः हताऽनेकगजैरित्यर्थः । पुनः किं० मृगाधिपैः ? **सहसा** सेनाकोलाहलश्रवणानन्तरमेव **प्रतिबोधजृम्भितमुखैः** निद्रापगमेन विकसितवदनैः । अथ समासः । हरस्य सैनिकाः ह० । गजानां मदाः गजमदाः गजमदैः सुगन्धयः केसरा येषां ते गजमदसुगन्धिकेसरास्तैः ग० । प्रतिबोधेन जृम्भितानि मुखानि येषां ते प्रतिबोधजृम्भितमुखास्तैः प्र० । मृगाणामधिपाः मृगाधिपास्तैः मृ० । इति वृत्तार्थः ॥ ४८ ॥

बिभराम्बभूवुरप्रवृत्तजठरशफरीकुलाकुलाः ।
पङ्कविषमिततटाः सरितः करिभग्न[1]चन्दनरसारुणं पयः ॥ ४९ ॥

'बिभ०' व्याख्या । **सरितो** नद्यः **पयो** जलं **बिभराम्बभूवुः** धारयामासुः किं० सरितः ? **अपवृत्तजठरशफरीकुलाकुलाः** उच्छलितोदरमत्सीवृन्दैः तत्कालसेनागमनक्षोभाल्लुडितोदरैः शफरीकुलैरित्यर्थः । व्याप्ताः पुनः किं० सरितः ? **पङ्कविषमिततटाः** कर्दमेन विषमीकृतकूलाः किं० पयः ? **करिभग्नचन्दनरसारुणं** त्रासात् पलायमानैर्हस्तिभिर्मार्गरोधकत्वेन भग्नचन्दनवृक्षरसैरारक्तम् अनेन सेनागजबाहुल्यं सूचितमिति । अथ समासः । अप्रवृत्तं जठरं येषां तानि अप्रवृत्तजठराणि शफरीणां कुलानि शफरीकुलानि अप्रवृतजठराणि च तानि शफरीकुलानि च अप्रवृत्तजठरशफरीकुलानि तैराकुलाः अ० । पङ्कैः विषमितानि तटानि यासां ताः प० । करिभिः भग्नाः करिभग्नाः करिभग्नाश्च ते चन्दनाश्च करिभग्नचन्दनाः तेषां रसाः करिभग्नचन्दनरसाः करिभग्नचन्दनरसैररुणं क० । इति वृत्तार्थः ॥ ४९ ॥

1. रुग्ण० -म. ।

महिषक्षतागरुतमालनलदसुरभिः सदागतिः ।
व्यस्तशुकनिभशिलाकुसुमः प्रणुदन्ववौ वनसदां परिश्रमम् ॥ ५० ॥

'महि०' व्याख्या । **सदागति**र्वायु**र्ववौ** वाति स्म किंकुर्वन् ? **वनसदां** वनवासिनां भिल्लानां **परिश्रमं** खेदं **प्रणुदन्** स्फेटयन् एतेन मान्द्योक्तिः । किं० सदागतिः ? **महिषक्षतागरुतमालनलदसुरभिः** अरण्यमहिषोन्मथितभग्नागुरुवृक्षतमालवृक्षनलदवृक्षैः सुगन्धिः एतेन सुरभित्वोक्तिः । पुनः किं० सदागतिः ? **व्यस्तशुकनिभशिलाकुसुमः** विक्षिप्तशुकसवर्णशैलेयाख्यौषधिः शुकनिभेति स्वरूपकथनं शिलाकुसुमस्येति । एतेन शैत्यमुक्तं वायोरयं स्वभावः । अथ समासः । अगरवश्च तमालाश्च नलदानि च अगरुतमालनलदानि [महिषैः क्षतानि अग०] महिषक्षतागरुतमालनलदानि तैः सुरभिः म० । व्यस्तानि क्षिप्तानि प्रेरितानि शुकनिभानि शिलाकुसुमानि येन स व्य० । वने सीदन्ति गच्छन्ति ते वनसदस्तेषां व० । इति वृत्तार्थः ॥५०॥

मथिताम्भसो रयविकीर्णमृदितकदलीगवेधुकाः ।
क्लान्तजलरुहलताः सरसीर्विदधे निदाघ इव सत्त्वसंप्लवः ॥ ५१ ॥

'मथि०' व्याख्या । **सत्त्वसंप्लवः** प्राणिसंक्षोभः **सरसीः** महत्सरांसि एवंविधाः **विदधे** चकार किं० सरसीः ? **मथिताम्भसः** संक्षोभितोदकाः पुनः किं०सरसीः ? **रयविकीर्णमृदितकदलीगवेधुकाः** पलायनवेगेन व्याकीर्णपीडितकदलीतृणधान्यविशेषाः पुनः किं० सरसीः ? **क्लान्तजलरुहलताः** म्लानकमलिनीः क इव ? निदाघ **इव** यथा **निदाघो** ग्रीष्मर्तुः सरसीः एवंविधा विदधाति । अथ समासः । मथितानि अम्भांसि यासु ताः म० । रयेन विकीर्णा मृदिताः कदलीगवेधुकाः यासां ताः र० । क्लान्ताः जलरुहलताः यासां ताः क्ला० । सत्त्वानां संप्लवः स० । इति वृत्तार्थः ॥५१॥

इति चालयन्नचलसानुवनगहनजानुमापतिः ।
प्राप मुदितहरिणीदशनक्षतवीरुधं वसतिमैन्द्रसूनवीम् ॥ ५२ ॥

'इति०' व्याख्या । **उमापतिः** महादेव **ऐन्द्रसूनवीम्** अर्जुनसंबन्धिनीं **वसतिम्** आश्रमं **प्राप** प्रपेदे आजगामेत्यर्थः । उमापतिः किंकुर्वन् ? **इति** पूर्वोक्तप्रकारेण **अचलसानुवनगहनजान्** पर्वतशिखरवनगहनोत्पन्नान् जीवान् इति शेषः । **चालयन्** कम्पयन् स्थानात् निष्कासयन् इत्यर्थः । किं० वसतिम् ? **मुदितहरिणीदशनक्षतवीरुधं** मुनिसहवासेन विश्वासादिति शेषः । हर्षितहरिणीदन्तैर्लूनलतां भक्षितलतामित्यर्थः । अथ समासः । सानवश्च वनानि च गहनानि च सानुवनगहनानि अचलश्च सानुवनगहनानि च अचलसानुवनगहनानि अचलसानुवनगहनेषु जाताः अचलसानुवनगहनजास्तान् अच० । उमाया पति उमापतिः । मुदिताश्च हरिण्यश्च मुदितहरिण्यः तासां दशनाः मुदितहरिणीदशनाः तैः क्षता वीरुधो यस्यां सा मुदितहरिणीदशनक्षतवीरुत् तां मु० । वस्यते अनयेति वसतिस्तां व० । इन्द्रसूनोः इयम् ऐन्द्रसूनवी ताम् ऐ० । इति वृत्तार्थः ॥ ५२ ॥ (त्रि०वि०)

1. गुरु० -म. ।

स तमाससाद घननीलमभिमुखमवस्थितं मुनेः ।
पोत्रनिकषणविभिन्नभुवं दनुजं दधानमतिशौकरं वपुः ॥ ५३ ॥

'स त०' व्याख्या । **स** श्रीमहादेवः **तं दनुजं** मूकदानवम् **आससाद** प्राप शिवस्य दनुजः लक्ष्योऽभूदित्यर्थः । किं० दनुजम् ? **घननीलं** मेघवत् श्यामं मेचकं भयङ्करमित्यर्थः । पुनः किं० दनुजम् ? **मुनेर**र्जुनस्य **अभिमुखं** सन्मुखम् **अवस्थितम्** आगतं पुनः किं० दनुजम् ? **पोत्रनिकषणविभिन्नभुवं** मुखाग्रघर्षणेन विदारितभूमिं पुनः किं० दनुजम् ? **अतिशौकरं वपुः** वाराहं शरीरं **दधानं** बिभ्राणम्। अथ समासः । घनवत् नीलं घ० । पोत्रस्य निकषणं पोत्रनिकषणं पोत्रनिकषणेन विभिन्ना भूर्येन स पोत्रनिकषणविभिन्नभूस्तं पो० । शूकरस्य इदं शौकरम् अतिशयेन शौकरम् अतिशौकरम् । इति वृत्तार्थः ।।५३।।

कच्छान्ते सुरसरितो निधाय सेनामन्वीतः स कतिपयैः किरातवर्यैः ।
प्रच्छन्नस्तरुगहनैः सगुल्मजालैर्लक्ष्मीवाननुपदमस्य संप्रतस्थे ॥ ५४ ॥ (प्र.)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ द्वादशः सर्गोऽगमत् ॥

'कच्छा०' व्याख्या । **स** श्रीमहादेवः **अस्य** मूकवराहस्य **अनुपदं** पदानुसारेण पदम् उद्दिश्य **संप्रतस्थे** चचाल किंकृत्वा ? **सुरसरितो** गङ्गायाः **कच्छान्ते** तटान्ते प्रदेशे **सेनां** स्वचमूं **निधाय** स्थापयित्वा किं० सः ? **कतिपयैः** कियद्भिः **किरातवर्यैः** भिल्लश्रेष्ठैः **अन्वीतः** अनुगतः इङ् गतौ इतिधातोरनुपूर्वात् कर्मणि क्तः । युक्तः इत्यर्थः । पुनः स किं० ? **तरुगहनैः** वृक्षकाननैः **प्रच्छन्नः** आच्छादितः किं० तरुगहनैः ? **सगुल्मजालैः** अन्तरितविटपलताप्रतानयुक्तैः लतासहितैरित्यर्थः । पुनः किं० स ? **लक्ष्मीवान्** श्रीमान् शोभायुक्तः इत्यर्थः । अथ समासः । कच्छस्य अन्तः कच्छान्तः तस्मिन् क० । सुराणां सरित् सुरसरित् तस्याः सु० । किरातेषु वर्याः किरातवर्याः तैः कि० । तरवश्च गहनानि च तरुगहनानि तैः त० । गुल्मानां जालानि गु० गुल्मजालैः सह वर्तमानानि सगुल्मजालानि तैः स० । लक्ष्मीरस्यास्तीति लक्ष्मीवान् । इति वृत्तार्थः ।।५४।।

इति श्रीभट्टभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***मूकागमनो*** नाम द्वादशः सर्गः ॥

त्रयोदशः सर्गः।

वपुषा परमेण भूधराणामथ संभाव्यपराक्रमं विभेदे ।
मृगमाशु विलोकयाञ्चकार स्थिरदंष्ट्रोग्रमुखं महेन्द्रसूनुः ॥ १ ॥

[का. ३४ यावद् मालभारिणीवृत्तम्]

'वपु०' व्याख्या । **अथ** श्रीमहादेवप्रयाणानन्तरं **महेन्द्रसूनुः** अर्जुनः **आशु** शीघ्रं **मृगं** वराहं **विलोकयाञ्चकार** अद्राक्षीत् आशु इति तदागम[ना]नन्तरमविलम्बेनेत्यर्थः । मृगशब्दस्य सामान्यशब्दत्वेन शूकरमिति विशिनष्टि । किं० मृगम् ? **स्थिरदंष्ट्रोग्रमुखं** दृढदंष्ट्राभ्यां प्रचण्डवदनं पुनः किं० मृगम् ? **परमेण** महता **वपुषा** शरीरेण हेतुभूतेन **भूधराणां** पर्वतानां **विभेदे** विशेषेण विदारणे **संभाव्यपराक्रमं** समर्थोऽयमिति वितर्कणीयविक्रमम् । अथ समासः । भुवं धरन्तीति भूधरास्तेषां भू० । संभाव्यः पराक्रमो यस्य स संभाव्यपराक्रमस्तं सं० । स्थिरे च ते दंष्ट्रे च स्थिरदंष्ट्रे स्थिरदंष्ट्राभ्यामुग्रमुखं यस्य स स्थिरदंष्ट्रोग्रमुखस्तं स्थि० । महेन्द्रस्य सूनुः म० । मालभारिणीवृत्तं तल्लक्षणं चेदं 'विषमेससजागुरू समे स्युः सभरायो यदि मालभारिणी सा' इति वृत्तार्थः ॥ १ ॥

स्फुटबद्धसटोन्नतिः स दूरादभिधावन्नवधीरितान्यकृत्यः ।
जयमिच्छति तस्य जातशङ्के मनसीमं मुहुराददे वितर्कम् ॥ २ ॥

'स्फुट०' व्याख्या । **स** वराहरूपमूकदानवः **तस्य** अर्जुनस्य **मनसि** चित्ते **इमं वितर्कं** वक्ष्यमाणमूहम् 'अध्याहारस्तर्क ऊह' इति *हैमः* [३२३] । **मुहुर्**वारंवारम् **आददे** उत्पादयामास किं० स ? **स्फुटबद्धसटोन्नतिः** प्रकटं यथा स्यात्तथा रचितकेशरोन्नतिः कोपाद् घर्षितरोमेत्यर्थः । किंकुर्वन् ? **दूरात् अभिधावन्** शीघ्रमागच्छन् पुनः किं० सः ? **अवधीरितान्यकृत्यः** अवगणितपरकार्यः परित्यक्तदूर्वोत्पाटनादिककार्यान्तर इत्यर्थः । किं० मनसि ? **जयमिच्छति** स्वभावाज्जयाभिलाषिणि पुनः किं० मनसि ? अत एव **जातशङ्के** समुत्पन्नभ्रान्तौ जातजिघांसुके इत्यर्थः । अथ समासः । सटानाम् उन्नतिः सटोन्नतिः स्फुटबद्धा सटोन्नतिर्येन सः स्फु० । अन्यच्च तत् कृत्यं च अन्यकृत्यम् अवधीरितम् अन्यकृत्यं येन सोऽव० । जाता शङ्का यस्मिन् तत् जातशङ्कं तस्मिन् जा० । इति वृत्तार्थः ॥ २ ॥

अथैकादशभिर्वृत्तैर्वितर्कमेव निरूपयति -

घनपोत्रविदीर्णशालमूलो निबिडस्कन्धनिकाषरुग्णवप्रः ।
अयमेकचरोऽभिवर्तते मां समरायेव समाजुहूषमाणः ॥ ३ ॥

'घन०' व्याख्या । **अयमेव** शूकरः **एकचरः** एकाकी यूथादपेतः सन् **माम् अभिवर्तते** अभिधावति उपसर्गवशात् सकर्मकत्वं 'वृतु वर्तने' इत्यस्य धातोः । अतः सर्वथा नायमुपेक्ष्य इति भावः । किं० अयम् ? **घनपोत्रविदीर्णशालमूलः** कठिनमुखाग्रेण विदारितवृक्षमूलः पुनः किं० अयम् ?

निबिडस्कन्धनिकाषरुग्णवप्रः दृढस्कन्धघर्षणेन भग्नतटः अतो महासत्त्वसंपन्नः इति भावः । अथ समासः । घनं च तत् पोत्रं च घनपोत्रं शालानां मूलानि शालमूलानि घनपोत्रेण विदीर्णानि शालमूलानि येनासौ घ० । निबिडौ च तौ स्कन्धौ च निबिडस्कन्धौ निबिडस्कन्धयोर्निकाषः निबिडस्कन्धनिकाषः निबिडस्कन्धनिकाषेण रुग्णो वप्रो येन स नि० । एकश्चासौ चरश्च ए० । समाह्वातुम् इच्छतीति समाजुहूषते समाजुहूषते इति स० । इति वृत्तार्थः ॥ ३ ॥

इह वीतदयां तपोऽनुभावाज्जहति व्यालमृगाः परेषु वृत्तिम् ।
मयि तां सुतरामसौ विधत्ते विकृतिः किं नु भवेदियं नु माया ॥ ४ ॥

'इह०' व्याख्या । **इहास्मिन्** आश्रमे **तपोऽनुभावात्** तपसः प्रभावात् **व्यालमृगाः** सर्पव्याघ्रादयः दुष्टजीवाः **परेषु** जीवान्तरेषु शत्रुषु **वीतदयां** गतदयां 'वीतभयाम्' इतिपाठे लक्षणया विगतवैराम् इत्यर्थः । **वृत्तिम्** आजीविकां **जहति** त्यजन्ति हिंसया न जीवन्तीत्यर्थः । मृगशब्देन व्याघ्रसाहचर्यात् व्याघ्रादयो गृह्यन्ते। किन्तु **असौ** अयं शूकरो **मयि** मद्विषये **सुतराम**तिशयेन **तां** निर्दयां वृत्तिं **विधत्ते** करोति हन्तुमिच्छतीत्यर्थः । **नु** इति वितर्के **इयमे**षा **विकृतिः** तपःसामर्थ्यभङ्गरूपो विकारो **भवेत्** अन्यथा **नु** इति वितर्के **माया** कस्यचिद्दैत्यस्य वराहवेषो भवेत् किंनुशब्दौ वितर्के । अथ समासः । वीता दया यस्यां सा वीतदया तां वी० । तपसोऽनुभावः तपोनुभावस्तस्मात्त० । व्यालाश्च मृगाश्च व्या० । इति वृत्तार्थः ॥४॥

अथवैष कृतज्ञयेव पूर्वं भृशमासेवितया रुषा न मुक्तः ।
अवधूय विरोधिनीः किमारान्मृगजातीरभियाति मां जवेन ॥ ५ ॥

'अथ०' व्याख्या । **अथवा** पक्षान्तरे **एषो**ऽयं वराहः **रुषा** कोपेन **न मुक्तः** न परित्यक्तः किं० रुषा ? **पूर्वं** पूर्वेषु जन्मान्तरेषु **भृशम**त्यर्थम् **आसेवितया** अतिपरिचितया पुनः किं० रुषा ? **कृतज्ञया** सेवाकुशलयेत्युत्प्रेक्ष्यते अद्यापि नूनमिति शेषः । कुत इत्थम् उच्यते यस्मात् **आरात्** मत्समीपे **विरोधिनीः** बद्धवैराः **मृगजातीः अवधूय** त्यक्त्वा **जवेन** वेगेन **माम् अभियाति** मां प्रत्यभिगच्छति । अथ समासः । कृतं जानातीति कृतज्ञा तया कृ० । विरोधो विद्यते यासां ता विरोधिन्यस्ता वि० । मृगाणां जातयो मृगजातयः ता मृ० । इति वृत्तार्थः ॥ ५ ॥

न केवलम् अभियानमेव प्रमाणं किन्तु मनोवृत्तिरप्यत्र प्रमाणम् इत्याह -

न मृगः खलु कोऽप्ययं जिघांसुः स्खलति ह्यत्र तथा भृशं मनो मे ।
विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा ॥ ६ ॥

'न मृ०' व्याख्या । **खल्विति** निश्चितम् **अयम्** एष **न मृगः** न मृगजातिः **कोऽपि** अन्य **एव** कश्चि**ज्जिघांसुः** शत्रुः वर्तते कुतः **हि** यस्मात् कारणात् **अत्रास्मिन्** मृगविषये **मे** मम **मनो** मानसं **तथा** तेन प्रकारेण **भृशम**त्यर्थं **स्खलति** क्षुभ्यति अयं जिघांसुरिति मम बुद्धिरुदेतीत्यर्थः । **वा** अथवा **चेत**श्चित्तं

विमलं प्रसन्नं **कलुषीभवत्** सत् **हितैषिणं** मित्रं **च** पुनः **रिपुं** शत्रुं **कथयत्येव** यदा मनो निर्मलं भवति तदा हितैषिणं ज्ञापयति अन्यथा कलुषीभवत् रिपुं बोधयति । अतोऽयं वध्य इति भावः । अथ समासः । अकलुषं कलुषं भवतीति कलुषीभवत् । हितमिच्छतीत्येवंशीलः हितैषी तं हितैषिणम् । इति वृत्तार्थः ॥६॥

ननु मुनेः किमनया दुःशङ्कया तत्राह -

मुनिरस्मि निरागसः कुतो मे भयमित्येष न भूतयेऽभिमानः ।
परवृद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् ॥ ७ ॥

'मुनि०' व्याख्या । **इति एष** एवंविधोऽ**भिमानो** गर्वः भूतये समृद्ध्यर्थं न भवति अभिमानोऽयं दुरभिमानः इति भावः । इतीति किम् ? अहं **मुनिरस्मि** तापसोऽस्मि अत एव **निरागसः** निरपराधस्य **मे** मम **कुतः** कस्माद् **भयं** प्रतिभयं भवेत् । अनपकारिणं मां कोऽपि किं करिष्यतीति बुद्धिः श्रेयसे न भवतीत्यर्थः । **हि** यस्मात् कारणात् **दुरात्मनां** दुर्जनानां **किमिव** किम् **अलङ्घ्यम्** अनतिक्रमणीय**मस्ति** । न किंचित् कार्यम् अकरणीयमस्ति दुष्टेषु सर्वं संभाव्यते एव **इव**शब्दो वाक्यालंकारार्थे । किं० दुरात्मनाम् ? **परवृद्धिषु** अन्येषाम् अन्यस्य विषये **बद्धमत्सराणां** बद्धकोपानाम् । अथ समासः । निर्गतम् आगो यस्मादसौ निरागः तस्य नि० । परेषां वृद्धयः परवृद्धयस्तेषु प० । बद्धो मत्सरो यैस्ते बद्धमत्सरास्तेषां ब० । दुर् दुष्ट आत्मा येषां ते दुरात्मानस्तेषां दु० । इति वृत्तार्थः ॥ ७ ॥

अस्तु जिघांसुरिति क्षुद्रः किं करिष्यति तत्राह -

दनुजः स्विदयं क्षपाचरो वा वनजे नेति बलं बतास्ति सत्त्वे ।
अभिभूय तथा हि मेघनीलः सकलं कम्पयतीव शैलराजम् ॥ ८ ॥

'दनुज०' व्याख्या । **स्विदि**ति वितर्के **अयं दनुजो** दानवः **वा** अथवा **क्षपाचरो** राक्षसः न तु मृगो मृगमात्रं न भवतीत्यर्थः । कुतो हेतोः **बत इति** आश्चर्ये **वनजे** वन्ये **सत्त्वे** जीवे ईदृशं **बलं** पराक्रमो **नास्ति** इति हेतोर्मृगो न **तथा हि** अयं **मेघनीलः** मेघवत् कृष्णः **सकलं** समग्रं **शैलराजं** हिमाचलं पर्वतम् **अभिभूय** आक्रम्य **कम्पयतीव** पदविष्टम्भभराच्चालयतीव । अथ समासः । दनोः सकाशात् जातः दनुजः क्षपाञ्चरतीति क्षपाचरः । वने जातः वनजस्तस्मिन् वनजे । मेघवन्नीलः मेघनीलः । शैलानां राजा शैलराजस्तं शैलराजम् । इति वृत्तार्थः ॥ ८ ॥

योऽयमाखेटककोलाहलः श्रूयते सोऽपि अनेन मायया कृत्वा रचित एवेत्याह -

अयमेव मृगव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे ।
पृथुभिर्ध्वजिनीरवैरकार्षीच्चकितोद्भ्रान्तमृगाणि काननानि ॥ ९ ॥

'अय०' व्याख्या । **अयमेव** वराहः **पृथुभिः** महद्भिः **ध्वजिनीरवैः** मायापरिकल्पितसेनाकोलाहलैः **काननानि** वनानि **चकितोद्भ्रान्तमृगाणि** त्रस्तपलायितहरिणानि **अकार्षीत्** चकार किं० अयं वराहः ?

मृगव्यसत्रकामः आखेटकछलाभिलाषः मृगयाभूमिपरिग्रहार्थी सन् इत्यर्थः । स किंकरिष्यन् ? **मायया** कपटेन **शमस्थे** शान्तगुणस्थिते **मयि प्रहरिष्यन्** प्रहारं कर्तुमिच्छन् अयमेव छिद्रान्वेषणतत्परो मत्प्रहारार्थं स्वयमेव मृगयुः भूत्वा वधार्देरो भूत्वा सेनाशब्दं कल्पयामास वराहरूपेण चागच्छतीतिभावः । अथ समासः । मृगव्याय सत्रं वनं मृगव्यसत्रं मृगव्यसत्रं कामयते इति मृ० । शमे तिष्ठतीति शमस्थस्तस्मिन् श० । ध्वजिन्याः रवाः ध्वजिनीरवास्तैर्ध्व० । चकिता उद्भ्रान्ता मृगा येषु तानि च० । इति वृत्तार्थः ॥९॥

वितर्कान्तरमाह -

बहुशः कृतसत्कृतेर्विधातुं प्रियमिच्छन्नथवा सुयोधनस्य ।
क्षुभितं वनगोचराभियोगाद्गणमशिश्रियदाकुलं तिरश्चाम् ॥ १० ॥

'बहु०' व्याख्या । **अथवा** इति पक्षान्तरे अयं कश्चिदिति शेषः । **तिरश्चां** मृगजातीनां **गणं** समूहं **अशिश्रियत्** शिश्राय वराहरूपेण मृगाणां गणे प्रवेशम् अकरोत् इति भावः । किं० गणम् ? **आकुलं** चलाचलं पुनः किं० गणम् ? **वनगोचराभियोगात्** वनेरचरावरोधात् **क्षुभितम्** इतस्ततो गतं त्रस्तमित्यर्थः । अयं किंकुर्वन् ? **सुयोधनस्य** प्रियमिष्टं **विधातुं** कर्तुम् **इच्छन् प्रिय**मितिमद्वधलक्षणमित्यर्थः । विधातुमिति प्रविधातुं प्रत्ययं कर्तुम् इति भावः । किं० अस्य ? **बहुशो**ऽनेकवार**कृतसत्कृतेः** विहितसत्कारस्य । अथ समासः । बहून् वारान् इति बहुशः । 'बह्वदेशत्' इत्यनेन शस्प्रत्ययः सत्कारणं सकृतिः कृता सत्कृतिर्येन स कृतसत्कृतिस्तस्य कृ० । वनं गोचरं स्थानं येषां ते वनगोचराः वनगोचराणाम् अभियोगः वनगोचराभियोगः तस्मात् व० । इति वृत्तार्थः ॥ १० ॥

वितर्कान्तरमाह -

अवलीढसनाभिरुद्गतेन प्रसभं खाण्डवजातवेदसा वा ।
प्रतिकर्तुमुपागतः समन्युः कृतवैरो यदि वा वृकोदरेण ॥ ११ ॥

'अवलीढ०' व्या० । अश्वसेनस्तक्षकपुत्रः कश्चिन्महासर्पः **प्रतिकर्तुं** वैरिनिर्यातनार्थम् **उपागतो** वा वराहमाययेति शेषः । **वा** अथवा अयं वराहः **खाण्डवजातवेदसा** खाण्डववनवह्निना **प्रसभं** बलात्कारेण **अवलीढसनाभिः** दग्धबन्धुः **सन्** 'अथ बान्धवः । स्वो ज्ञातिः स्वजनो बन्धुः सगोत्रश्च निजः पुनः । आत्मीयः स्वः स्वकीयश्च सपिण्डास्तु सनाभयः' इति *हैम:* [५६१/२] । **प्रतिकर्तुं** प्रतिकारं कर्तुम् **उपागतः** आयातः किं० खाण्ड० ? **उद्गतेन** प्रवृद्धिं गतेन **यदि वा** पक्षान्तरे **वृकोदरेण** भीमेन सह **कृतवैरः** बद्धवैरः अत एव **समन्युः** सकोपः सन् प्रतिकर्तुमागतः पुरा किल पाण्डवः खाण्डववनदाहे पावकभयात्पलायमानान् तक्षकसूनोरश्वसेनकस्य बन्धून् शरैरव[रु]ध्य भस्मसादकरोदिति भारतकथा । अथ समासः । अवलीढा ज्वलिताः सनाभयो गोत्रिणो यस्य सोऽव० । खाण्डवस्य जातवेदाः खाण्डवजातवेदाः तेन खा० । सह मन्युना वर्तते यः स समन्युः । कृतं वैरं यस्यासौ कृ० । इति वृत्तार्थः ॥ ११ ॥

१. वनावरोधाय -म.

अथ द्वाभ्यामनन्तरकरणीयमध्यवस्यति -

बलशालितया यथा तथा वा धियमुच्छेदपरामयं दधानः ।
नियमेन मया निबर्हणीयः परमं लाभमरातिभङ्गमाहुः ॥ १२ ॥

'बल०' व्याख्या । **अयं** मृगोऽस्तु **वा** अथवा अन्यः कश्चिदस्तु **नियमेन** निश्चयेन **मया निबर्हणीयो** मारणीयो वध्य इत्यर्थः । 'निर्ग्रन्थनं प्रमथनं कदनं निबर्हणम्' इति *हैमः* [३७०] । किं० अयम् ? **बलशालितया** बलदृप्ततया **यथा तथा** येन तेन प्रकारेण मयि विषये **उच्छेदपराम्** उन्मूलनतत्परां **धियं** बुद्धिं **दधानो** बिभ्राणः मां जिघांसुरेवायं मया मारणीयः इति भावः । तस्मिन् हते सति मम को लाभ इत्यत्राह- यत इति शेषः । यतः कारणात् बुधाः **अरातिभङ्गं** शत्रुवधं **परमम्** उत्कृष्टं **लाभम् आहुः** कथयन्ति। अथ समासः। बलेन शालत इत्येवंशीलो बलशाली बलशालिनो भावो बलशालिता तया ब० । उच्छेदे परा उच्छेदपरा ताम् उ० । अरातीनां भङ्गोऽरातिभङ्गस्तमरा० । इति वृत्तार्थः ॥१२॥

ननु तपोविरोधिनी हिंसेत्याशङ्क्याह -

कुरु तात ! तपांस्यमार्गदायी विजयायेत्यलमन्वशान्मुनिर्माम् ।
बलिनश्च वधादृतेऽस्य शक्यं व्रतसंरक्षणमन्यथा न कर्तुम् ॥ १३ ॥

'कुरु०' व्याख्या । **मुनिः** कृष्णद्वैपायनः **माम्** इति **अलमत्यर्थम् अन्वशात्** शिक्षां दत्तवानित्यर्थः । इतीति किं हे **तात** ! हे पुत्रार्जुन ! त्वम् **अमार्गदायी** छिद्रान्वेषिणं मार्गमददत् सन् **विजयाय** दुर्योधनजयार्थं **तपांसि कुरु** आचर 'पुत्रे पितरि पूज्ये च तातशब्दः प्रचक्षते' इति । ननु कृष्णद्वैपायनो मुनिः अधर्मं कथम् अन्वशादिति तत्राह- **च** पुनः **अस्य** वराहस्य **वधादृते** वधं विना **अन्यथा** उपायान्तरेण **व्रतसंरक्षणं** तपोरक्षणं **कर्तुं** विधातुं **न शक्यम्** अस्य किं० ? **बलिनो** बलवतः दुष्टनिग्रहकारिणां हिंसापि धर्म एवेत्यर्थः। अथ समासः । मार्गदायी न भवतीत्यमार्गदायी । बलमस्यास्तीति बली तस्य बलिनः । व्रतस्य संरक्षणं व्र० । इति वृत्तार्थः ॥ १३ ॥

इति तेन विचिन्त्य चापनाम प्रथमं पौरुषचिह्नमाललम्बे ।
उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवाददे च बाणः ॥ १४ ॥

'इति०' व्याख्या । **तेन** अर्जुनेन **इति** पूर्वोक्तं **विचिन्त्य** वितर्क्य **चापनाम** धनुर्नाम **प्रथमं** मुख्यं **पौरुषचिह्नं** पराक्रमज्ञापकम् **आललम्बे** गृहीतं तस्य मुख्यायुधत्वात् इति भावः । अथानन्तरं तेन **बाणः** शर **आददे** जगृहे गृहीतः किं० बाणः ? **परस्य भेदे** शत्रोर्वधे शत्रुविदारणे **उपलब्धगुणः** प्राप्तपराक्रमः पुनः किं० बाणः ? **शुद्ध** ऋजुः सरलो दिग्धादिदोषरहितो वा पुनः किं० बाणः ? उत्प्रेक्ष्यते **सचिव इव** अमात्य इव किं० अमात्यः ? **परस्य भेदे** अन्यस्योपजापे **उपलब्धगुणः** ज्ञातशक्तिः पुनः किं० सचिवः ? **शुद्धः** निपुणः[1] । अथ समासः । चाप इति नाम यस्य तत् चापनाम । पौरुषस्य चिह्नं पौ० ।

१. अत्र बाणसचिवयोः शब्दमात्रसाधर्म्याच्छ्लेषालंकारः प्रकृताप्रकृतविषय इति सर्वस्वकारः । उपमैवेति केचित् ।-म.

उपलब्धो गुणो येन स उ० । इति वृत्तार्थः ॥ १४ ॥

अनुभाववता गुरु स्थिरत्वादविसंवादि धनुर्धनञ्जयेन ।
स्वबलव्यसनेऽपि पीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥ १५ ॥

'अनु०' व्याख्या । **धनुश्चापम् आनतिं** नम्रतां **प्रपेदे** प्राप किमिव ? **मित्रं सुहृदिव** यथा मित्रम् आनतिम् अनुकूलत्वं प्रपद्यते किं० धनुर्मित्रं च ? **गुरु** महत् पूज्यं च पुनः किं० धनुर्मित्रं च ? **स्थिरत्वात्** दृढत्वात् **अविसंवादि** अभङ्गुरम् अन्यत्र प्रतिष्ठितत्वात् असत्यरहितं पुनः किं० धनुर्मित्रं च ? **गुणवत्** मौर्वीयुक्तम् अन्यत्र औदार्यादिगुणयुक्तं पुनः किं० धनुः ? **धनञ्जयेन** अर्जुनेन **स्वबलव्यसनेऽपि** तपसा क्षीणबलत्वेऽपि **पीड्यमानम्** आकृष्यमाणं किं० धनञ्जयेन ? **अनुभाववता** प्रभावयुक्तेन पुनः किं० मित्रम्? स्वबलव्यसनेऽपि धनबलनाशेऽपि प्रभावयुक्तेन पुनः किं० मित्रम् ? स्वबलव्यसनेऽपि धनबलनाशेऽपि **पीड्यमानम्** अवरुध्यमानं स्वबलव्यसनेऽपि सन्मित्रं न जहातीति भावः[1] । अथ समासः । अनुभावोऽस्यास्तीति अनुभाववान् तेन अ० । स्थिरस्य भावः स्थिरत्वं तस्मात् स्थि० । न विसंवादो भङ्गलक्षणोऽस्यास्तीति अवि० । स्वस्य बलं स्वबलं स्वबलस्य व्यसनं स्वबलव्यसनं तस्मिन् स्व० । गुणोऽस्यास्तीति गुणवत् । इति वृत्तार्थः ॥ १५ ॥

प्रविकर्षनिनादभिन्नरन्ध्रः पदविष्टम्भनिपीडितस्तदानीम् ।
अधिरोहति गाण्डिवं महेषौ सकलः संशयमारुरोह शैलः ॥ १६ ॥

'प्रवि०' व्याख्या । **तदानीं** तस्मिन् धनुराकर्षणकाले **सकलः** समग्रः नत्वेकदेशः **शैलो** हिमाचल इन्द्रकीलपर्वतो वा **संशयं** जीवितसंदेहम् **आरुरोह** प्राप कस्मिन् सति ? **महेषौ** महाबाणे **गाण्डिवम्** अर्जुनधनुः **अधिरोहति** प्राप्ते सति किं० शैलः ? **प्रविकर्षनिनादभिन्नरन्ध्रः** धनुर्बलात्कर्षेण ज्याशब्देन विभिन्नविवरः विदलितगह्वरः पुनः किं० शैलः ? **पदविष्टम्भनिपीडितः** चरणाक्रमणेन नुन्नो अधस्तात् क्रान्त इत्यर्थः । अथ समासः । प्रविकर्षेण निनादः प्रविकर्षनिनादः प्रविकर्षनिनादेन भिन्नानि रन्ध्राणि यस्य स प्र० । पदस्य विष्टम्भः पदविष्टम्भः तेन निपीडितः प० । महांश्चासौ इषुश्च महेषुस्तस्मिन् म० । इति वृत्तार्थः ॥ १६ ॥

ददृशेऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमण्डलस्थः ।
रचितस्तिसृणां पुरां विधातुं वधमात्मेव भयानकः परेषाम् ॥ १७ ॥

'ददृशे०' व्याख्या । **अथ** बाणसन्धानानन्तरं **शिवेन** महादेवेन **सविस्मयं** साश्चर्यं यथा स्यात् तथा सोऽर्जुनो **ददृशे** दृष्टः किं० सः ? **स्थिरपूर्णायतचापमण्डलस्थः** दृढदीर्घाकृष्टधनुर्मण्डलस्थः । चापमण्डलमवधार्य स्थित इत्यर्थः । पुनः किं० सः ? उत्प्रेक्ष्यते **आत्मा** स्वयमिव किं० आत्मा ? **तिसृणां पुरां वधं** संहारं हननं **विधातुं** कर्तुं **रचितः** कृतः स्थानविशेषे स्थापितः स्थानविशेषाः धनुःशास्त्रे प्रतिपादिता

१. अलंकारस्तु पूर्ववत् -म.

वेदितव्याः । पुनः किं० आत्मा ? **परेषां** शत्रूणां **भयानको** भयङ्करः तिसृणामित्यत्र 'न तिसृचतसृच्छन्दसि वा' इत्यनेन दीर्घत्वप्रतिषेधः । अथ समासः । सह विस्मयेन वर्तमानं यस्यां क्रियायां तत् सविस्मयम् । स्थिरं पूर्णं यथा स्यात् तथा आयतं च तत् चापमण्डलं च स्थिरपूर्णायतचापमण्डलं स्थिरपूर्णायतचापमण्डले तिष्ठतीति स्थिर० । इति वृत्तार्थः ॥ १७ ॥

स भवस्य भवक्षयैकहेतोः सितसप्तेश्च विधास्यतोः सहार्थम् ।
रिपुराप पराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबन्धः ॥ १८ ॥

'स भ०' व्याख्या । **स रिपुः** मूकदानवो वराहः **भवस्ये**श्वरस्य **च** पुनः **सितसप्ते**रर्जुनस्य **मध्यमन्तरमाप** प्राप कस्मै **पराभवाय** उपद्रवाय किं० भवस्य ? **भवक्षयैकहेतोः** संसारनाशैककारणस्य यद्वा सृष्टिप्रलयैककारणस्य किं० भवार्जुनयोः ? 'सहार्थं विधास्यतोः' **सह** संभूय उभे मिलित्वा **अर्थं** शत्रुवधलक्षणं प्रयोजनं **विधास्यतोः** करिष्यतोः क इव ? अनुबन्ध **इव** यथा **अनुबन्धः** इत्संज्ञको वर्णः पराभवाय लोपार्थं प्रकृतिप्रत्यययोः मध्यं प्राप्नोति । यस्मात् प्रत्ययो विधीयते सा **प्रकृतिः** धात्वादिः **प्रत्ययः** इच्छायामात्मनः स इत्यादि किं० प्रकृतिप्रत्यययोः ? सहार्थमभिधेयमर्थं विधास्यतोः करिष्यतोः 'प्रकृतिप्रत्ययौ मिलितौ सन्तौ सहार्थं ब्रूवाते' इति वचनात् । अथ समासः । भवस्य क्षयः भवक्षयः एकश्चासौ हेतुश्च एकहेतुः भवक्षयस्य एकहेतुः भ० । सिताः सप्तयो यस्य स सितसप्तिस्तस्य सि० । विधास्यत इति विधास्यन्तौ तयोर्वि० । प्रकृतिश्च प्रत्ययश्च प्रकृतिप्रत्ययौ तयोः प्र० । इति वृत्तार्थः ॥१८॥

पिनाकिवृत्तान्तमाह -

विचकर्ष च संहितेषुरुच्चैश्चरणास्कन्दननामिताचलेन्द्रः ।
धनुराततभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि शम्भुः ॥ १९ ॥

'विच०' व्याख्या । **शम्भुः** महादेवः **धनुश्चा**पं **विचकर्ष** आकृष्टवान् किं० शम्भुः ? **संहितेषुः** गुणेन सह योजितबाणः पुनः किं० शम्भुः ? **उच्चै**रतितरां **चरणास्कन्दननामिताचलेन्द्रः** चरणाक्रमणेन अधोनीतपर्वतः किं० धनुः ? **आततभोगवासुकिज्यावदनग्रन्थिविमुक्तवह्नि** आकृष्टः कायो वासुकिरेव ज्या प्रत्यञ्चा तस्या वदनं मुखमेव ग्रन्थिस्तेन विमुक्त उत्सृष्टो वह्निर्यस्मिन् तत्[१] । अथ समासः । संहित इषुर्येन स सं० । चरणाभ्यामास्कन्दनम् अचलानामिन्द्रोऽचलेन्द्रः चरणास्कन्दनेन नामितोऽचलेन्द्रो येन स च० । आततो भोगो येन स आततभोगः आततभोगश्चासौ वासुकिश्च आततभोगवासुकिः । आततभोगवासुकिरेव ज्या आततभोगवासुकिज्या वदनमेव ग्रन्थिः व० आततभोगवासुकिज्यावदनग्रन्थिना विमुक्तो वह्निर्यस्मिन् तत् आ० । इति वृत्तार्थः ॥ १९ ॥

अथ दीपितवारिवाहवर्त्मा रववित्रासितवारणादवार्यः ।
निपपात जवादिषुः पिनाकान्महतोऽभ्रादिव वैद्युतः कृशानुः ॥ २० ॥

१. स्वभावोक्तिः -म. ।

'अथ०' व्याख्या । **अथा**नन्तरं रिपोर्मध्यपतनानन्तरमित्यर्थः । **जवात्** वेगेन **पिनाकात्** महादेवधनुः-सकाशात् **इषु**र्बाणः **निपपात** पतति स्म किं० इषुः ? **दीपितवारिवाहवर्त्मा** प्रकाशितगगनः । किं० पिनाकात् ? **रववित्रासितवारणात्** धनुष्टङ्कारेण त्रासितवनगजात् पुनः किं० इषुः ? **अवार्यः** वारयितुमशक्यः क इव ? **वैद्युतः** विद्युत्संबन्धी **कृशानुः** वह्निरिव यथा वैद्युतः कृशानु**र्महतोऽभ्रादिव** मेघात् निपतति किं० वैद्युतः ? कृशानुरपि दीपितवारिवाहवर्त्मा दीपिताकाशः किं० अभ्रात् ? रववित्रासितवारणात् गर्जितेन भीषितदिग्गजात् पुनः किं० वैद्युतः ? कृशानुः **अवार्यः** दुर्वारः । अथ समासः । दीपितं वारिवाहवर्त्म येन स दी० । रवेण वित्रासिता वारणा येन तत् रववित्रासितवारणं तस्मात् र० । विद्युतोऽयं वैद्युतः । इति वृत्तार्थः ॥२०॥

व्रजतोऽस्य बृहत्पतत्रजन्मा कृततार्क्ष्योपनिपातवेगशङ्कः ।
प्रतिनादमहान्महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः ॥ २१ ॥

'व्रज०' व्याख्या । **अस्य** बाणस्य **नादो** ध्वनिः **उत्पपात** उत्थितः किं० अस्य ? **व्रजतो** वेगवत्तया गच्छतः किं० नादः ? **बृहत्पतत्रजन्मा** महापिच्छोद्भवः पुनः किं० नादः? **कृततार्क्ष्यो-पनिपातवेगशङ्कः** कृतगरुडागमनवेगभ्रान्तिः पुनः किं० नादः ? **प्रतिनादमहान्** प्रतिध्वनेन संमूर्च्छन् पुनः किं० नादः ? **महोरगाणां** महासर्प्पाणां **हृदयश्रोत्रभित्** हृदयकर्णभेदी गरुडागमनशङ्कयेति भावः[1] । अथ समासः । बृहन्ति च तानि पतत्राणि च बृहत्पतत्राणि बृहत्पतत्रेभ्यो जन्म यस्य स बृ० । तार्क्ष्यस्य उपनिपातः तार्क्ष्योपनिपातः वेगेन शङ्का वेगशङ्का कृता तार्क्ष्योपनिपातस्य वेगशङ्का येन स कृ० । प्रतिनादैर्महान् प्रतिनादमहान् । महान्तश्चैते उरगाश्च महोरगास्तेषां म० । हृदयानि च श्रोत्राणि च हृदयश्रोत्राणि हृद० भिनत्तीति हृदयश्रोत्रभित् । इति वृत्तार्थः ॥ २१ ॥

नयनादिव शूलिनः प्रवृत्तैर्मनसोप्याशुतरं यतः पिशङ्गैः ।
विदधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः ॥ २२ ॥

'नय०' व्याख्या । तस्य महादेवस्य **मार्गणस्य** बाणस्य **किरणै**स्तेजोभिः **व्योमनि** आकाशे **मार्ग** उल्लेखाकारपथः **विदधे** कृतः । किं० किरणैः ? **विलसत्तडिल्लताभैः** विलसद्विद्युल्लतातुल्यैः पुनः किं०किरणैः ? **पिशङ्गैः** पीतैः पुनः किं० किरणैः ? उत्प्रेक्ष्यते **शूलिनो** महादेवस्य **नयनात्** भालस्य तृतीयलोचनात् **प्रवृत्तैः** उत्पन्नैर्निर्गतैरिव महादेवस्य नेत्राग्निशिखाकल्पैरित्यर्थः । किं० मार्गस्य ? **मनसोऽपि** मानसादपि **आशुतरं** शीघ्रतरं **यतः** गच्छतः[2] । अथ समासः । शूलमस्यास्तीति शूली तस्य शूलिनः । एतीति यत् तस्य यतः इण् गतौ इत्यस्माद्धातोः शतृप्रत्ययः विलसन्त्यास्तिडिल्लतायाः आभा येषां ते विलसत्तडिल्लताभास्तैः वि० । इति वृत्तार्थः ॥ २२ ॥

१. अत्र नादस्योरगहृदयभेदकत्वासंबन्धेऽपि संबन्धाभिधानादतिशयोक्तिः । सा च तार्क्ष्यवेगभ्रमोत्थापितेति तयोरङ्गाङ्गिभावेन संकरः -म. २. स्वभावोक्तिरलंकारः -म. ।

अपयन्धनुषः शिवान्तिकस्थैर्विवरेसद्भिरभिख्यया जिहानः ।
युगपद्ददृशे विशन्वराहं तदुपोढैश्च नभश्चरैः पृषत्कः ॥ २३ ॥

'अप०' व्याख्या । **नभश्चरैः** देवादिभिः **पृषत्को** बाणः **धनुषः** पिनाकात् **अपयन्** निःसरन् **वराहं** शूकरं **विशन्** प्रविशन् **युगपत्** समकालमेव **ददृशे** दृष्टः अनेन बाणवेगोक्तिः किं० नभश्चरैः ? **शिवान्तिकस्थैः** महादेवसमीपस्थैः च किं० नभश्चरैः ? **विवरे** अन्तराले शिवशूकरयोर्मध्ये **सद्भिर्**वर्तमानैः । च पुनः किं० नभ० ? **तदुपोढैः** वराहप्रत्यासन्नैः शूकरनिकटवर्तिभिरित्यर्थः । किं० पृषत्कः ? **अभिख्यया** शोभया **जिहानो** गच्छन्[1] । अथ समासः । अपयितीति अपयन् इण शतृप्रत्ययः शिवस्यान्तिकं शिवान्तिकं शिवान्तिके तिष्ठन्तीति शिवान्तिकस्था तैः शि० । विवरे सीदन्तीति विवरेसदस्तैर्विवरेसद्भिः । सन्तीति सन्तः तैः सद्भिः । जिहीते इति जिहानः । ओहाङ्गता विधातोः शान्प्रत्ययः तदुपोढाः तदुपोढास्तैः त० । नभसि चरन्तीति नभश्चराः तैर्न० । इति वृत्तार्थः ॥ २३ ॥

स तमालनिभे रिपौ सुराणां घननीहार इवाविषक्तवेगः ।
भयविप्लुतमीक्षितो वनस्थैर्जगतीं ग्राह इवापगां जगाहे ॥ २४ ॥

'स तमा०' व्याख्या । **स** शरो **जगतीं** भूमिं **जगाहे** प्रविवेश अन्तर्हित इत्यर्थः । क इव ? ग्राह **इव** यथा **ग्राहो** जलचरजन्तुविशेषः **आपगां** नदीं गाहते प्रविशति किं० सः ? **सुराणां** देवानां **रिपौ** वैरिणि वराहरूपमूकदानवे **अविषक्तवेगः** अस्खलितवेगः किं० रिपौ ? **तमालनिभे** तमालतरुतुल्ये श्यामवर्णे इत्यर्थः । पुनः किं० सः ? **वनस्थैर्**वनचरैः **भयविप्लुतं** भयेन विह्वलं यथा स्यात्तथा **ईक्षितो** दृष्टः 'नभस्थैः'[1] इति पाठे नभस्थैः खेचरैः भयविप्लुतम् ईक्षितं किं० ग्राहः ? **घननीहार इव** सान्द्रतुषार इव **अविषक्तवेगः** अप्रतिषिद्धवेगः । अथ समासः । [तमालेन निभः] तमालनिभः तस्मिन् त० । घनश्चासौ नीहारश्च घननीहारः तस्मिन् घ० । अविषक्तो वेगो यस्याऽसौ अ० । भयेन विप्लुतं यत्र यस्मिन् कर्म्मणि तत् भ० । वने तिष्ठन्तीति वनस्थाः तैर्व० । नभसि तिष्ठन्तीति नभस्थाः तैर्न० । अप्संबन्धिवेग आपः अपां समूहो वा आपम् आपेन गच्छन्तीत्यापगा ताम् आ० । गृह्णातीति ग्राहः [जलस्थः ग्राहः] ज० । इति वृत्तार्थः ॥ २४ ॥

सपदि प्रियरूपपर्वलेखः[2] शितलोहाग्रमुखः खमाससाद ।
कुपितान्तकतर्जनाङ्गुलिश्रीर्व्यथयन्प्राणभृतः कपिध्वजेषुः ॥ २५ ॥

'सप०' व्याख्या । **कपिध्वजेषुः** अर्जुनबाणः **सपदि** महादेवबाणपातसमये एव **खं** गगनम् **आससाद** प्राप किं० कपिध्वजेषुः ? **प्रियरूपपर्वलेखः** मनोहराकारग्रन्थिरचनाभिर्युक्तः पुनः किं०

1. एष पाठः म. मध्ये । 2. ०रेख -म.

१. अत्र क्रमेण पिनाकनिष्क्रमणादिक्रियाविशिष्टस्य बाणस्य शिवान्तिकादिभिन्नदेशस्थनभश्चरकर्तृक-दर्शनयौगपद्यासंबन्धेऽपि तत्संबन्धोक्तिमूलातिशयोक्त्यालोकोत्तरवेगप्रतीतेरलंकारेण वस्तुध्वनिः -म. ।

कपि० ? **शितलोहाग्रमुखः** तीक्ष्णलोहाग्रमुखः किंकुर्वन् कपिध्वजेषुः ? **प्राणभृतो** जन्तून् **व्यथयन्** पीडयन् पुनः किं० कपि० ? अत एव **कुपितान्तकतर्जनाङ्गुलिश्रीः** कुपितयमतर्जनाङ्गुलितुल्यः कुपितान्तकतर्जनाङ्गुलिरपि प्रियरूपपर्वलेखाः प्रियरूपाणि पर्वाणि रेखाश्च यस्याः सा शितलोहाग्रमुखो नखश्च भवति । प्राणभृतश्च व्यथयन् भीषयमान इत्युपमालंकृतिः । अथ समासः । रूपाणि च पर्वाणि च लेखाश्च रूपपर्वलेखाः प्रियाः रू० यस्य स प्रियरूपपर्वलेखः । शितं लोहस्य अग्रं मुखे यस्य स शि० । कुपितश्चासौ अन्तकश्च कुपितान्तकः तर्जनस्य अङ्गुलिः तर्जनाङ्गुलिः कुपितान्तकस्य तर्जनाङ्गुलिः कुपितान्तकतर्जनाङ्गुलिः कुपितान्तकतर्जनाङ्गुलेः श्रीरिव श्रीर्यस्य स कु० । प्राणान् बिभ्रतीति प्राणभृतः तान् प्रा० । कपिर्हनूमान ध्वजे यस्य स कपिध्वजः कपिध्वजस्य इषुः क० । इति वृत्तार्थः ॥ २५ ॥

परमास्त्रपरिग्रहोरु तेजः स्फुरदुल्काकृति विक्षिपन्वनेषु ।
स जवेन पतन्परःशतानां पततां व्रात इवारवं वितेने ॥ २६ ॥

'पर०' व्याख्या । **सो**ऽर्जुनस्य बाणः **आरवं** शब्दं **वितेने** चकार विस्तारयामासेत्यर्थः । क **इव** ? पततां व्रात **इव** यथा **पततां** पक्षिणां **व्रातः** समूहः आरवं वितनुते तद्वदिति भावः । किं० पतताम् ? **परःशतानां** शताधिकसंख्यानां 'परः शताद्यास्ते येषां परा संख्या शतादिकात्' इति *हैमः* [१४२५] । क्वचिदमाद्यन्तस्य परत्वं वक्तव्यम् इति वचनात् । उपसर्जनस्य शतशब्दस्य परनिपातः सुडागमश्च । किंकुर्वन् सः ? **जवेन** वेगेन **पतन्** गच्छन् पुनः किंकुर्वन् ? **वनेषु** काननेषु **तेजो** दीप्तिं **विक्षिपन्** विकिरयन् प्रसारयन्नित्यर्थः । किं० तेजः ? **परमास्त्रपरिग्रहोरु** दिव्यास्त्रपरिग्रहेण महत् पुनः किं० तेजः ? **स्फुरदुल्काकृति** स्फुरदुल्कावत् दीर्घायमाणं विलसज्ज्वालातुल्यम् । अथ समासः । परमं च तदस्त्रं च पर० परमास्त्रस्य परिग्रहः परमास्त्रपरिग्रहः परमास्त्रपरिग्रहेण उरु प० । स्फुरती चासौ उल्का च स्फुरदुल्का स्फुरदुल्कावत् आकृतिर्यस्य स स्फु० । शतात्परे परःशताः तेषां परःशतानामित्यत्र अन्यादीनां विभक्तिलोपे सुडागमो वक्तव्यः । इति वृत्तार्थः ॥ २६ ॥

अविभावितनिष्क्रमप्रयाणः शमितायाम इवातिरंहसा सः ।
सह पूर्वतरं नु चित्तवृत्तेरपतित्वा नु चकार लक्ष्यभेदम् ॥ २७ ॥

'अवि०' व्याख्या । **स** बाणः **लक्ष्यभेदं चकार** अकरोत् वेध्यं वराहं बिभेदेत्यर्थः । अत्र कविर्वितर्कयति किंकृत्वा ? चित्तवृत्त्या इति शेषः । **सह** सार्द्धं पतित्वा **नु** इति वितर्के लक्ष्यभेदं चकार अथवा न्विति वितर्के **चित्तवृत्तेः पूर्वतरं** प्रथमतरम् **अपतित्वा** लक्ष्यभेदं चकार किं० बाणः ? **अविभावितनिष्क्रमप्रयाणः** अविज्ञातगाण्डिवनिःसरणान्तरालगमनः पुनः किं० बाणः ? उत्प्रेक्ष्यते अत एव **अतिरंहसा** अतिवेगेन **शमितायाम** संक्षिप्तदैर्घ्य इव स्थितः । अथ समासः । निष्क्रमश्च प्रयाणश्च निष्क्रमप्रयाणे अविभाविते निष्क्रमप्रयाणे यस्य सोऽवि० । शमितः आयामो यस्य स श० । अतिशयेन पूर्वं

१. अत्रोपात्तवेगनिमित्ताद्बाणस्य चित्तवृत्त्या सहपातपूर्वपातपतनाभावोत्प्रेक्षास्तिस्र उत्तरोत्तरोत्कर्षेण वेगातिशयव्यञ्जिका इत्यलंकारेण वस्तुध्वनिः -म.

पूर्वतरम् । चित्तस्य वृत्तिः चित्तवृत्तिस्तस्याश्चि० । लक्ष्यस्य भेदो लक्ष्यभेदस्तं ल० । इति वृत्तार्थः ॥२७॥

स वृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायमेषणीयम् ।
लघु साधयितुं शरः प्रसेहे विधिनेवार्थमुदीरितं प्रयत्नः ॥ २८ ॥

'स वृष०' व्याख्या । **सः शरो**ऽर्जुनबाणः **प्रतिकायं** शत्रुशरीरं **लघु** शीघ्रं यथा स्यात्तथा **साधयितुं** साधनाय **प्रसेहे** समर्थो बभूव किं० सः ? **जयहेतुः** विजयस्य कारणं किं० प्रतिकायम् ? **वृषध्वजसायका-वभिन्नं** महादेवबाणेन समन्तात् विदारितं पुनः किं० प्रतिकायम् ? वेद्धुमिति **एषणीयं** वाञ्छनीयं कः कमिव ? प्रयत्नोऽर्थ**मिव** यथा **प्रयत्न** उद्यमः **अर्थं** साधयितुं प्रसहते समर्थो भवति किं० अर्थम् ? **विधिना** सानुकूलदैवेन **उदीरितं** फलसाधनतया प्रतिपादितम् । अथ समासः । वृषध्वजस्य सायकः वृषध्वजसायकः वृषध्वजसायकेन अवभिन्नः वृषध्वजसायकावभिन्नस्तं वृ० । जयस्य हेतुः ज० । इति वृत्तार्थः ॥२८॥

अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव संश्रितानुरागम् ।
विजिगीषुमिवानयप्रमादाववसादं विशिखौ विनिन्यतुस्तम् ॥ २९ ॥

'अवि०' व्याख्या । **विशिखौ** महादेवार्जुनबाणौ **तं** वराहम् **अवसादं** शरीरशैथिल्यं **विनिन्यतुः** नीतवन्तौ कौ कमिव ? अविवेकवृथाश्रमौ **इव** यथा **अविवेकवृथाश्रमौ** अन्तरानभिज्ञत्वनिष्फलप्रयासौ **अर्थं** धनम् **अवसादं** विनाशं विनयतः प्राप्नुतः अस्थानविनियोगहेतुत्वादनयोर्धनहानिकरत्वमिति भावः । पुनः कौ कमिव ? क्षयलोभौ संश्रितानुराग**मिव** यथा **क्षयलोभौ** अर्थहानितृष्णे **संश्रितानुरागं** सेवकानां प्रीतिम् अवसादं नयतः । अकिंचित्करे स्वामिनि अनुरागस्यानवस्थानात् इति भावः । पुनः कौ कमिव ? अनयप्रमादौ विजिगीषु**मिव** यथा **अनयप्रमादौ** दुर्नयालस्यौ **विजिगीषुं** जयकामिनं पुरुषम् अवसादं नयतः रन्ध्रभूयिष्ठस्य जयासिद्धेरिति भावः । मालोपमालंकारः । अथ समासः । न विवेकोऽविवेकः अविवेकश्च वृथाश्रमश्च अ० । क्षयश्च लोभश्च क्ष० । संश्रितानामनुरागः संश्रितानुरागः तं सं० । अनयश्च प्रमादश्च अ० । इति वृत्तार्थः ॥ २९ ॥

अथ दीर्घतमं तमः प्रवेक्ष्यत् सहसारुग्णरयः स संभ्रमेण ।
निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धरां च मेने ॥ ३० ॥

'अथ०' व्याख्या । **अथा**नन्तरं **स** मृगः **संभ्रमेण** भ्रान्त्या **उर्व्यां** पृथिव्याम् **उष्णरश्मिमा**दित्यं **निपतन्तमिव** नितरां पतन्तमिव **मेने** अमंस्त **च** पुनः **धरां** भूमिं **वलयीभूततरुं** कङ्कणीभूतवृक्षं मेने किंकुर्वन् स ? **दीर्घतमम्** अतिशयेन दीर्घं **तमो** निद्रां **प्रवेक्ष्यन्** प्राप्स्यमाणः मरिष्यन्नित्यर्थः । पुनः किं० सः ? **सहसा** शीघ्रं **रुग्णरयो** भग्नवेगः[1] । अथ समासः । अतिशयेन दीर्घं दीर्घतमम् । रुग्णो रयो यस्य स रु० । उष्णा रश्मयो यस्य स उष्णरश्मिस्तमु० । वलयीभूतास्तरवो यस्यां सा वलयीभूततरुस्तां

१. स्वभावोक्तिरलंकारः -म.

व० । इति वृत्तार्थः ॥ ३० ॥

स गतः क्षितिमुष्णशोणितार्द्रः खुरदंष्ट्राग्रनिपातदारिताश्मा ।
असुभिः क्षणमीक्षितेन्द्रसूनुर्विहितामर्षगुरुध्वनिर्निरासे ॥ ३१ ॥

'स ग०' व्याख्या । **स** वराहो **क्षितिं गतः** क्षितौ पतितः सन् **असुभिः** प्राणैः **निरासे** निरस्तः त्यक्त इत्यर्थः । किं० सः ? **उष्णशोणितार्द्रः** उष्णरुधिरप्लुतगात्रः आहतत्वात् पुनः किं० सः ? **खुरदंष्ट्राग्रनिपातदारिताश्मा** खुरदंष्ट्राग्राघातेन विदारितपाषाणः पुनः किं० सः ? **क्षणमीक्षितेन्द्रसूनुः** क्षणमात्रदृष्टार्जुनः स्वार्थविघातरोषादिति भावः । पुनः किं० सः ? **विहितामर्षगुरुध्वनिः** कृतकोप-महाशब्दः स्वभावोक्तिरियं तिरश्चां प्राणविरहे चेष्टेदृशी स्यादिति भावः । अथ समासः । उष्णं च तत् शोणितं च उष्णशोणितं तेनार्द्रः उ० । खुराश्च दंष्ट्रा च खुरद्रंष्ट्रे खुरदंष्ट्रयोरग्राणि खुरदंष्ट्राग्राणि खुरद्रंष्ट्राग्राणां निपातनं खुरदंष्ट्राग्रनिपातनं तेन दारितोऽश्मा येन स खु० । ईक्षित इन्द्रसूनुर्येन स ई० । विहितोऽमर्षेण गुरुध्वनिर्येन स वि० । इति वृत्तार्थः ॥ ३१ ॥

स्फुटपौरुषमापपात पार्थस्तमथ प्राज्यशरः शरं जिघृक्षुः ।
न तथा कृतवेदिनां करिष्यन् प्रियतामेति यथा कृतावदानः ॥ ३२ ॥

'स्फुट०' व्याख्या । **अथ** वराहपातनानन्तरं **पार्थो** धनञ्जयः **तं शरं** विशिखं **जिघृक्षुः** ग्रहीतुमिच्छुः सन् **आपपात** धावति स्म कृतज्ञतया शरग्रहणं न तु लोभादित्यर्थः । किं० तं शरम् ? **स्फुटपौरुषं** प्रकटपराक्रमं किं०अर्जुनः ? **प्राज्यशरः** बहुलबाणः नन्वन्येऽप्युपकर्तारः शराः सन्ति किमित्यत्रैवास्यादरः ? तत्राह- **कृतवेदिनां** कृतज्ञानां नराणां **कृतावदानः** विहिताद्भुतकर्मा **यथा प्रियतां** वल्लभत्वम् **एति** प्राप्नोति **तथा करिष्यन्** भृत्यादिः प्रियतां न एति कृतकरिष्यमाणयोः कृतं बलीयः । अथ समासः । स्फुटं पौरुषं यस्य स स्फुटपौरुषस्तं स्फु० । प्राज्याः शरा यस्य स प्रा० । कृतं विदन्ति ते कृतवेदिनस्तेषां कृ० । प्रियस्य भावः प्रियता तां प्रि० । कृतम् अवदानं येन स कृ० । इति वृत्तार्थः ॥ ३२ ॥

उपकार इवासति प्रयुक्तः स्थितिमप्राप्य मृगे गतः प्रणाशम् ।
कृतशक्तिरवाङ्मुखो गुरुत्वाज्जनितव्रीड इवात्मपौरुषेण ॥ ३३ ॥

'उप०' व्याख्या । किं० बाणः ? **मृगे** शूकरे **स्थितिम्** अवस्थानम् **अप्राप्य प्रणाश**मदर्शनं **गतः** प्राप्तः पुनः किं० बाणः ? उत्प्रेक्ष्यते **असति** नीचपुरुषे **प्रयुक्तः** कृतः **उपकार इव** यथा नीचपुरुषे प्रयुक्तः उपकारः स्थितिम् अप्राप्य प्रणाशं गच्छति पुनः किं० बाणः ? **कृतशक्तिः** कृतकार्यः पुनः किं० बाणः ? अत एव **गुरुत्वात्** लोहभरात् महत्त्वाच्च **अवाङ्मुखः** नम्रमुखः पुनः किं० बाणः ? उत्प्रेक्ष्यते **आत्मपौरुषेण** निजबलेन **जनितव्रीडः** उत्पादितलज्ज इव स्थितः । महान् इह अद्भुतं कर्म कृत्वा लज्जते अवाङ्मुखश्च भवति । अथ समासः । कृता शक्तिर्येन स कृ० । गुरोर्भावः गुरुत्वं तस्मात् गु० । जनिता व्रीडा यस्य स ज० । आत्मनः पौरुषम् आत्मपौरुषं तेन आ० । इति वृत्तार्थः ॥३३॥

स समुद्धरता विचिन्त्य तेन स्वरुचिं[1] कीर्तिमिवोत्तमां दधानः ।
अनुयुक्त इव स्ववार्तमुच्चैः परिरेभे नु भृशं विलोचनाभ्याम् ॥ ३४ ॥

'स समु०' व्याख्या । **तेनार्जुनेन** बाणः **विलोचनाभ्यां** नेत्राभ्यां **भृशमत्यर्थं परिरेभे नु** आलिङ्गितः उत्प्रेक्षा तेन अत्यादरेण दृष्टः इत्यर्थः । तेन किंकुर्वता ? इति **विचिन्त्य** इतीति किम् ? शरः सर्वथा ग्राह्योऽयमिति विमृश्य **समुद्धरता** सम्यक् प्रकारेणोद्धरता किं० बाणः ? **स्वरुचिम्** आत्मीयकान्तिं **दधानः** बिभ्राणः किं० रुचिम् ? उत्प्रेक्ष्यते **उत्तमां** प्रधानां **कीर्तिमिव** स्थितामिति शेषः । अत एव सर्वथास्य ग्रहणं युक्तमिति भावः । किमिव स्थितस्तत्राह- पुनः किं० बाणः ? उत्प्रेक्ष्यते **उच्चै**रत्यर्थं **स्ववार्तं** स्वपाटवं 'वार्तं पाटवमारोग्यं भाव्यं स्वास्थ्यमनामयम्' इति *यादवः* । **अनुयुक्त इव** पृष्ट इव स्थितः आदरात्तथा प्रतीयते इत्यर्थः । अथ समासः । स्वस्य रुचिः स्वरुचिस्तां स्व० । स्वस्य वार्तं स्व० । इति वृत्तद्वयार्थः ॥ ३४ ॥ (यु०)

तत्र कार्मुकभृतं महाभुजः पश्यति स्म सहसा वनेचरम् ।
सन्निकासयितुमग्रतः स्थितं शासनं कुसुमकेतुविद्विषः ॥ ३५ ॥ (र.)

[का. ७० यावद् रथोद्धतावृत्तम्]

'तत्र०' व्याख्या । स **महाभुजः** दीर्घभुजोऽर्जुनः **सहसा** शीघ्रं **तत्र** तस्मिन् बाणसमीपे **वनेचरं** भिल्लं **पश्यति स्म** अपश्यत् किं० वनेचरम् ? **कार्मुकभृतम्** चापं बिभ्राणं धनुर्धरमित्यर्थः । पुनः किं० वनेचरम् ? **कुसुमकेतुविद्विषः** श्रीमहादेवस्य **शासनं** वक्ष्यमाणमादेशं **सन्निकासयितुं** प्रकटयितुं वा निवेदयितुम् **अग्रतः** पुरस्तात् **स्थितम्** । अथ समासः । कार्मुकं बिभर्तीति कार्मुकभृत् तं का० । महती भुजे यस्य स म० । कुसुमानि केतौ यस्य स कुसुमकेतुः कुसुमकेतोः विद्विट् कु० तस्य कुसुमकेतुविद्विषः । इतः प्रभृति [७० यावद्] रथोद्धतावृत्तम् । 'रो नराविह रथोद्धता लगौ' । इति वृत्तार्थः ॥३५॥

स प्रयुज्य तनये महीपतेरात्मजातिसदृशीं किलानतिम् ।
सान्त्वपूर्वमभिनीतिहेतुकं वक्तुमित्थमुपचक्रमे वचः ॥ ३६ ॥

'स प्र०' व्याख्या । **स** वनेचरः **सान्त्वपूर्वं** सामवादपूर्वम् **इत्थ**ममुना प्रकारेण **वचो** वचनं **वक्तुं** जल्पितुम् **उपचक्रमे** आरेभे किंकृत्वा ? प्रथमं **महीपतेस्तनये** अर्जुने **किले**[१]त्यलीके **आत्मजातिसदृशीं** स्वजातिसमानां वनेचरा यथा नमस्कुर्वन्ति तथा **आनतिं** प्रणामं **प्रयुज्य** विधाय किं० वचः ? **अभिनीतिहेतुकं** अभितो नयकारणं नयप्रयुक्तमित्यर्थः । अथ समासः । आत्मनो जातिः आत्मजातिः आत्मजात्या सदृशी आत्मजातिसदृशी ताम् आ० । सान्त्वं पूर्वं यस्मिन् तत् सा० । नीतेर्हेतुकं नीतिहेतुकम् अभितो नीतिहेतुकम् अ० । इति वृत्तार्थः ॥ ३६ ॥

---

1. स्वरुचं -म. । १. 'किल' इति जातेरलीकतां दर्शयति -म. ।

शान्तता विनययोगि मानसं भूरिधाम विमलं तपः श्रुतम् ।
प्राह ते नु सदृशी दिवौकसामन्ववायमवदातमाकृतिः ॥ ३७ ॥

'शान्त०' व्याख्या । वनेचरः किमुवाचेत्याह- हे मुने ! **ते** तव **शान्तता** अनुद्धता **विनययोगि** विनयसंहितं **मानसं** चेतः **प्राह** ब्रूते च पुनः **भूरिधाम** बहुतेजोयुक्तं **तपः विमलं** निर्मलं परिपाट्या गतं **श्रुतम्** अध्ययनं प्राह च पुन**राकृति**राकारः **अवदात**मुज्ज्वलं शुद्धम् **अन्ववायं** वंशं प्राह किं० आकृतिः ? **दिवौकसां** देवानां **सदृशी** समाना शान्त्यादिभिर्लिङ्गैर्विनयादयोऽनुमीयते अन्यथा तदसंभवादिति भावः । अथ समासः । शान्तस्य भावः शा० । विनययोगोऽस्यास्तीति वि० । भूरि धाम यस्मिन् तत् भू० । द्यौरोको येषां ते दिवौकसस्तेषां दि० । इति वृत्तार्थः ॥ ३७ ॥

दीपितस्त्वमनुभावसंपदा गौरवेण लघयन्महीभृतः ।
राजसे मुनिरपीह धारयन्नाधिपत्यमिव शातमन्यवम् ॥ ३८ ॥

'दीपि०' व्याख्या । हे मुने ! **त्वम् इहात्र मुनिरपि** साधुरपि ऐश्वर्यरहितोऽपि **राजसे** शोभसे किं० त्वम् ? **अनुभावसंपदा** प्रभावसमृद्ध्या प्रभावातिशयेन **दीपितः** प्रकाशितः त्वं किंकुर्वन्? **गौरवेण** गुरुतया महत्तया **महीभृतो** महीपान् **लघयन्** अधरयन् पुनः त्वं किंकुर्वन् ? उत्प्रेक्ष्यते **शातमन्यवम्** ऐन्द्रम् **आधिपत्यम्** ऐश्वर्यं **धारयन्निव** बिभ्रदिव । अथ समासः । अनुभावस्य संपत् अनुभावसंपत् तया अ० । गुरोर्भावो गौरवं तेन गौ० । अधिपतेः कर्म आधिपत्यम् । शतमन्योरिदं शातमन्यवम्। इति वृत्तार्थः ॥३८॥

तापसोऽपि विभुतामुपेयिवानास्पदं त्वमसि सर्वसंपदाम् ।
दृश्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः ॥ ३९ ॥

'तापसो०' व्याख्या । हे मुने ! **तापसोऽपि** तपस्व्यपि सन् **सर्वसंपदां** समस्तर्द्धीनाम् **आस्पदं** स्थानं **त्वमसि** वर्तसे किं०त्वम् ? **विभुतां** प्रभुतां प्रभावं वा **उपेयिवान्** प्राप्तवान् तामेव विभुतां समर्थयति- **हि** यस्मात् कारणात् **जनैः** सेवकैः **विना** एकाकिनोऽपि **भवत**स्तव **सचिवैः** प्रधानैर**न्वितस्य** युक्तस्येव **द्युतिस्ते**जो **दृश्यते** अतः सर्वसंपदामास्पदत्वं युक्तमित्यर्थः । अथ समासः । विभोर्भावो विभुता तां वि० । उपेयाय इति उपेयिवान् । सर्वाश्च ताः संपदश्च सर्वसंपदस्तासां स० । इति वृत्तार्थः ॥३९॥

विस्मयः क इव वा जयश्रिया नैव मुक्तिरपि ते दवीयसी ।
ईप्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥ ४० ॥

'विस्मय०' व्याख्या । हे मुने ! **ते** तव **जयश्रिया** जयलक्ष्म्या हेतुना प्राप्तयापीतिशेषः । **क इव विस्मयः** किमिवाश्चर्यं न कश्चिदित्यर्थः । **मुक्तिरपि** मुक्तिपदवी अपि **ते** तव **नैव दवीयसी** न दूरतरा

न दुर्लभा भवतीत्यर्थः । यस्य मुक्तिपदवी अपि न दुर्लभा तस्य जयश्रियः का कथेति भावः । **निर्जितरजस्तमोगुणः** वशीकृतरजस्तमोगुणः पुमान् **कस्य ईप्सितस्य** वाञ्छितस्य **उपाश्रयः** स्थानं **न भवेत्** अपि तु सर्वेप्सितस्य उपाश्रयो भवेदित्यर्थः । अतः सर्वसंपदामाश्रयोऽसीति भावः । अथ समासः । जयस्य श्रीः जयश्रीः तया ज० । मुक्तेः पदवी मु० । अतिशयेन दूरा दवीयसी । रजश्च तमश्च रजस्तमसी निर्जिते रजस्तमसी एव गुणौ येन स नि० । इति वृत्तार्थः ॥४०॥

तदागमनप्रयोजनम् उपालम्भमुखेनाह -

ह्रेपयन्नहिमतेजसं त्विषा स त्वमित्थमुपपन्नपौरुषः ।
हर्तुमर्हसि वराहभेदिनं नैनमस्मदधिपस्य सायकम् ॥ ४१ ॥

'ह्रेप०' व्याख्या **स त्वं** भवान् एवंगुणविशिष्ट इत्यर्थः । **अस्मदधिपस्य** अस्मत्स्वामिनो महादेवस्य **एनं सायकं** बाणं **हर्तुं** ग्रहीतुं **न अर्हसि** न योग्योऽसि महान् भवान् परशरस्य ग्रहणे उचितो नासीत्यर्थः । तदेव महत्त्वं विशेषणेनोपपादयति- किंकुर्वन् त्वम् ? **त्विषा** कान्त्या **अहिमतेजसं** रविं **ह्रेपयन्** लज्जयन् किं० त्वम् ? **इत्थ**ममुना प्रकारेण **उपपन्नपौरुषः** संभावितविक्रमः पुरुषार्थयुक्त इत्यर्थः । किंलक्षणं सायकम् ? **वराहभेदिनं** शूकरभेदकं कृतोपकारकमिति भावः । एनं त्वत्करगतम् अस्मदधिपस्य सायकमित्थं साहसेन हर्तुं नार्हसीति भावः। अथ समासः । अहिमानि तेजांसि यस्य सोऽहिमतेजाः तम् अ० । उपपन्नं पौरुषं यस्य स उ०। वराहं भिनत्तीति वराहभेदी तं व० । अस्माकम् अधिपः अस्मदधिपस्तस्य अ०। इति वृत्तार्थः ॥ ४१ ॥

अनर्हत्वमेवाह -

स्मर्यते तनुभृतां सनातनं न्याय्यमा[1]चरणमुत्तमैर्नृभिः ।
ध्वंसते यदि भवादृशस्ततः कः प्रयातु वद तेन वर्त्मना ॥ ४२ ॥

'स्मर्य०' व्याख्या । हे मुने ! **उत्तमैः** सत्पुरुषैः **नृभिः** मन्वादिभिः **तनुभृतां** देहिनां **सनातनं** नित्यं **न्याय्यं** न्याययुक्तम् **आचरणम्** आचारः **स्मर्यते** कर्तव्यत्वेनेति शेषः न त्वनाचार इत्यर्थः । अथाप्यनाचारेण दोषमाह- **भवादृश**स्त्वादृश**स्ततः** सदाचारात् **ध्वंसते** भ्रंश्यते तर्हि **तेन वर्त्मना** न्यायमार्गेण **कः** पुमान् **प्रयातु** प्रकर्षेण गच्छतु **वद** कथय न कोऽपीत्यर्थः । अथ समासः । तनुं बिभ्रतीति तनुभृतस्तेषां त० । सदा भवं सनातनम् । न्यायादनपेतं न्याय्यम् । आचर्य्यते तदाचरणम् । भवानिव दृश्यते इति भवादृशः । इति वृत्तार्थः ॥४२॥

आकुमारमुपदेष्टुमिच्छवः संनिवृत्तिमपथान्महापदः ।
योगशक्तिजितजन्ममृत्यवः शीलयन्ति यतयः सुशीलताम् ॥ ४३ ॥

1. चरित० -म. इदं च पा० ।

'आ कु०' व्याख्या । हे मुने ! **यतयो** मुनयः **सुशीलतां** शोभनस्वभावतां **शीलयन्ति** अभ्यसन्ति अतो न त्याज्यं शीलमिति । किं० यतयः । **आकुमारं** कुमारावस्थां मर्यादीकृत्य **महापदः** बहुविपत्तेः महानर्थस्य हेतोरित्यर्थः । **अपथात्** अमार्गात् **संनिवृत्तिं** सम्यक् प्रकारेण निवर्तनम् **उपदेष्टुं** कथयितुम् **इच्छवः** वाञ्छनशीलाः सन्मार्गप्रवृत्तिं स्वाचरणदृष्टान्तेनान्येभ्यो दर्शयन्तीति तात्पर्यार्थः । पुनः किं० यतयः ? **योगशक्तिजितजन्ममृत्यवः** आत्मज्ञानमहिम्ना वशीकृतजन्ममरणाः । अथ समासः । आकुमारात् आकुमारम् । महती आपद् यस्मिन् तत् महापद् तस्मान्म० । योगस्य शक्तिः योगशक्तिः जन्म च मृत्युश्च जन्ममृत्यू योगशक्त्या जितौ जन्ममृत्यू यैस्ते योग० । [सुशीलस्य भावः] सुशीलता तां सु० । इति वृत्तार्थः ।।४३।।

तिष्ठतां तपसि पुण्यमासजन् संपदोऽनुगुणयन्सुखैषिणाम् ।
योगिनां परिणमन्विमुक्तये केन नास्तु विनयः सतां प्रियः ? ॥ ४४ ॥

'तिष्ठ०' व्याख्या । हे मुने ! **विनयः** कौशल्यं विशिष्टो नयो वा **केन** कारणेन **सताम्** उत्तमानां **प्रियो** वल्लभो **नास्तु** न भवतु अपि तु सर्वथा भवत्येव सर्वथा विनय एव चतुर्वर्गसाधनमित्यर्थः । अतस्त्वया सर्वथा अस्मत्स्वामिबाणस्तेयं न कार्यमितिभावः । किंकुर्वन् साधनं भवतीत्याह- किंकुर्वन् विनयः ? **तपसि तिष्ठतां** तपोनिष्ठानां धर्मार्थिनां **पुण्यं** सुकृतम् **आसजन्** निष्पादयन् पुनः किंकु० विनयः ? **सुखैषिणां** सुखार्थिनां **संपदः** सुखसाधनभूतानर्थान् **अनुगुणयन्** अनुकूलयन् अर्थकामयोर्विनयःहेतुभूत इत्यर्थः । पुनः किंकु० विनयः ? **योगिनां** योगवतां **विमुक्तये** मोक्षाय **परिणमन्** संपद्यमानः अत एव त्वया विनयोऽभ्यसनीयः इति भावः । अथ समासः । सुखमिच्छन्तीत्येवंशीलाः सुखैषिणस्तेषां सु० । योगो विद्यते येषां ते योगिनः तेषां यो० । इति वृत्तार्थः ॥ ४४ ॥

अथवा किं भवादृशेषु अन्यसंभावनया यद् भ्रान्तिरपि संभाव्यत इति मृदूक्तिमवलम्बते -

नूनमत्रभवतः शराकृतिं सर्वथायमनुयाति सायकः ।
सोऽयमित्यनुपपन्नसंशयः कारितस्त्वमपदे पदं यया ॥ ४५ ॥

'नून०' व्याख्या । हे मुने ! **नून**मिति वितर्के **अयम्** अस्मदीयः **सायको** बाणः **सर्वथा** सर्वप्रकारेण **अत्रभवत**स्तव पूज्यस्य **शराकृतिं** बाणाकारं रूपेण रेखादिना **अनुयाति** अनुगच्छति अत्यर्थमनुकरोतीत्यर्थः । अत्रभवत इति अत्र अत्रभवच्छब्दौ पूज्यार्थे निपात्येते । 'पूज्ये तत्रभवानत्रभवांश्च भगवानपि' इति *हैमः* [३२६] । हे मुने ! **यया** शराकृत्या **त्वम् अपदे** अस्थाने यत्र अपथे इति पाठस्तत्र **अपथे** अमार्गे शरहरणलक्षणरूपे **पदं** स्थानं **कारितः** विहितः किं० सोऽयमिति । यः स्वकीयः शरः **स** एवा**यमिति** **अनुपपन्नसंशयः** अत्यन्तसादृश्यात् अनुत्पन्नस्वान्यदीयत्वसन्देहः । अथ समासः । शरस्य आकृतिः

1. एष पाठः म. मध्ये

१. न केवलं सौशील्यादनर्थनिवृत्तिः, किन्त्वर्थप्राप्तिरपीत्याह-इत्यवतरणिका -म.

शराकृतिस्तां श० । न उपपन्नः अनुपपन्नः अनुपपन्नः संशयो यस्य स अ० । इति वृत्तार्थः ॥ ४५ ॥

पुनरपि स्तेयमेव द्रढयन् दोषान्तरमापादयति -

अन्यदीयविशिखे न केवलं निःस्पृहस्य भवितव्यमाहृते ।
निघ्नतः परनिबर्हितं मृगं व्रीडितव्यमपि ते सचेतसः ॥ ४६ ॥

'अन्य०' व्याख्या । हे मुने ! त्वया **अन्यदीयविशिखे** परकीयबाणे **आहृते** गृहीते सति **न केवलं निःस्पृहस्य ते** तव कृत्यानां कर्त्तरि षष्ठी **भवितव्यं** भवनीयं किंतु **परनिबर्हितम्** अन्येन हतं **मृगं** शूकरं **निघ्नतः** प्रहरतः **सचेतसो** ज्ञानवतः ते त्वया निघ्नता **व्रीडितव्यं** लज्जितव्यं भावे तव्यप्रत्ययः संप्रति तु त्वया अन्यहतं विद्ध्वापि न व्रीड्यते प्रत्युत स्तेयं क्रियते इति अहो महत्साहसमित्यर्थः । अथ समासः । अन्यस्य अयम् अन्यदीयः अन्यदीयश्चासौ विशिखश्च अन्यदीयविशिखस्तस्मिन् अ० । निर्गता स्पृहा यस्य स निःस्पृहस्तस्य नि० । निहन्तीति निहन् तस्य निघ्नतः । परेण निबर्हितः परनिबर्हितस्तं प० । चेतसा सह वर्तमानः सचेतास्तस्य सचेतसः । इति वृत्तार्थः ॥ ४६ ॥

अथास्मिन् कृतघ्नताभियोगाय स्वोपकारत्वं वर्णयितुं विकत्थनदोषं तावद्युग्मेन परिहरन्नाह -

संततं निशमयन्त उत्सुका यैः प्रयान्ति मुदमस्य सूरयः ।
कीर्तितानि हसितेऽपि तानि यं व्रीडयन्ति चरितानि मानिनम् ॥ ४७ ॥

'सततं०' व्याख्या । हे मुने ! **सूरयो** विबुधाः **अस्य** मत्स्वामिनः संबन्धिभिः **यैः** सच्चरितैः करणभूतैः **मुदं** हर्षं **प्रयान्ति** गच्छन्ति सूरयः किंकुर्वन्तः ? **संततं** निरन्तरम् **उत्सुकाः** उत्कण्ठिताः सन्तः **निशमयन्तः** अर्थात् चरितानि श्रुण्वन्तः **तानि चरितानि हसितेऽपि** परिहासेऽपि **कीर्तितानि** परैः कथितानि सन्ति **मानिनम्** अहंकारिणं **व्रीडयन्ति** लज्जयन्ति । अथ समासः । मानोऽस्यास्तीति मानी तं मानिनम् । इति वृत्तार्थः ॥ ४७ ॥

अन्यदोषमिव स स्वकं गुणं ख्यापयेत्कथमधृष्टताजडः ।
उच्यते स खलु कार्यवत्तया धिग्विभिन्नबुधसेतुमर्थिताम् ॥ ४८ ॥

'अन्य०' व्याख्या । हे मुने ! **सोऽस्मत्स्वामी स्वकं** स्वकीयं **गुणम् अन्यदोषमिव** परनिन्दामिव **कथं ख्यापयेत्** कथं प्रकटयेत् किं० सः ? 'अधृष्टताजडः' **अधृष्टतया** विकत्थनेन शालीनतया **जडः** स्तब्धः लज्जया जड इत्यर्थः । एवं जानन् सोऽस्मत्स्वामी स्वगुणं कथं कथयेत् इत्यर्थः । तर्हि कथं प्रकटयति तत्राह- **खलु** निश्चितं स स्वगुणः **कार्यवत्तया** कार्यार्थितया **उच्यते** कथ्यते कार्यार्थिनः कुतो गर्व इति भावः । **अर्थितां** याचितां **धिग्** धिक्कारोऽस्तु किं० अर्थिताम् ? **विभिन्नबुधसेतुम्** अतिक्रमसज्जनमर्यादाम् । अथ समासः । अन्यस्य दोषः अन्यदोषस्तम० । धृष्टस्य भावो धृष्टता न धृष्टता अधृष्टता अधृष्टतया जडः अ० । कार्यवतो भावः कार्यवत्ता तया का० । विभिन्नः बुधसेतुर्यया सा

विभिन्नबुधसेतुस्तां वि० । अर्थिनो भावोऽर्थिता ताम् अर्थिताम् । इति वृत्तद्वयार्थः ॥ ४८ ॥ (यु.)

संप्रति कृतोपकारं लक्षयति -

दुर्वचं तदथ मा स्म भून्मृगस्त्वय्यसौ यदकरिष्यदोजसा ।
नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्रिणा ॥ ४९ ॥

'दुर्वचं०' व्याख्या । हे मुने ! **वाहिनीपतिः** सेनापतिरस्मत्स्वामी **शितेन** तीक्ष्णेन **पत्रिणा** बाणेन **आशु** शीघ्रम् एनं वराहं **यदि** चेत् **न प्रत्यपत्स्यत** नाभियुञ्जीत तर्हि **असौ मृगः** वराहः **ओजसा** बलेन **त्वयि** भवति विषये **यत् अकरिष्यत्** यत् अनिष्टं कुर्यात् **तत् दुर्वचं** अमङ्गलतया वक्तुमशक्यं तदनिष्टम् अथानन्तरमपि **मास्म भूत्** इति सौहार्दकथनं तदुपेक्षणाकृदेव स मृगस्त्वां हन्यादिति भावः । अथ समासः । दुःखेनोच्येत तत् दुर्वचम् । वाहिन्याः पतिः वा० । इति वृत्तार्थः ॥ ४९ ॥

ननु वराहो मयैव हतः न भवत्स्वामिना सेनापतिना तत्राह -

को न्विमं हरितुरङ्गमायुधस्थेयसीं दधतमङ्गसंहतिम् ।
वेगवत्तरमृते चमूपतेर्हन्तुमर्हति शरेण दंष्ट्रिणम् ॥ ५० ॥

'को न्वि०' व्याख्या । हे मुने ! **न्विति** निश्चयेन **चमूपतेः** सेनापतेरस्मत्स्वामिनः **ऋते** विना **कः** पुमान् **इमं दंष्ट्रिणं** वराहं **शरेण** बाणेन **हन्तुं** विनाशयितुम् **अर्हति** योग्यो भवति अपि तु न कोऽपीत्यर्थः । यदि हन्यात् तर्हि असाविति भावः । किं० द्रंष्ट्रिणम् ? **वेगवत्तरं** शीघ्रगामिनं दुर्वारवेग-मित्यर्थः । पुनः किं० दंष्ट्रिणम् ? **अङ्गसंहतिम्** अवयवसङ्घातं **दधतं** धारयन्तम् अन्यस्य हनने असामर्थ्ये हेतुभूतं विशेषणमाह- किं० अङ्गसंहतिम् ? **हरितुरङ्गमायुधस्थेयसीम्** इन्द्रवज्रायुधवत् स्थिरतरां दृढामित्यर्थः। अथ समासः । हरयस्तुरङ्गमा यस्य असौ हरितुरङ्गमः हरितुरङ्गमस्य आयुधं हरितुरङ्गमायुधं हरितुरङ्गमायुधवत् स्थेयसी हरितुरङ्गमायुधस्थेयसी तां ह० । अङ्गस्य संहतिः अङ्गसंहतिः ताम् अ० । वेगोऽस्यास्तीति वेगवान् अतिशयेन वेगवान् वेगवत्तरस्तं वे० । चम्वाः पतिः चमूपतिस्तस्य च० । इति वृत्तार्थः ॥ ५० ॥

भवतु स एव वराहस्य हन्ता ततः मम किमित्याह -

मित्रमिष्टमुपकारि संशये मेदिनीपतिरयं तथा च ते ।
तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञता ॥ ५१ ॥

'मित्र०' व्याख्या । हे मुने ! **च** पुनः **तथा** येनायं तव घातको हतस्तेन प्रकारेण **अयं मेदिनीपतिः** किरातभूपतिः **ते** तव **संशये** प्राणसंदेहे **उपकारि** उपकारकारकम् **इष्टं** वल्लभं **मित्रं** बान्धवं वर्तते इति शेषः । अयं न केवलं मित्रमात्रं भवति प्राणसंदेहे प्राप्ते प्राणरक्षणद्वारा उपकारि अत एव इष्टं मित्रमित्यर्थः । **तं** मित्रभूतं किरातं किराताधिपतिं **विरोध्य भवता** त्वया **कृतज्ञता** उपकारवेदित्वं **मा**

निरासि न निराक्रियतां किं० कृतज्ञता ? **सज्जनैकवसतिः** सज्जनैकस्थानं भवादृशैकसुजनमुख्याधारेत्यर्थः । यदुक्तं 'हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः' (७९) अन्यथा जगति कृतज्ञतैवास्तमियात् कृतघ्नता च ते भवेदिति भावः। अथ समासः। मेदिन्याः पतिः मे० । सन्तश्च ते जनाश्च सज्जनाः सज्जना एव एकवसतिर्यस्या सा स० । कृतज्ञस्य भावः कृतज्ञता । इति वृत्तार्थः ॥ ५१ ॥

ननु सर्वस्यार्थमूलत्वात्स एवास्तु किं मित्रसंग्रहेणेत्याशङ्क्य मित्रस्य सर्वाधिक्यं युग्मेनाह -

लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्षभूतयः ।
स्वन्तमन्तविरसा जिगीषतां मित्रलाभमनु लाभसंपदः ॥ ५२ ॥

'लभ्य०' व्याख्या । हे मुने ! **जिगीषतां** जेतुमिच्छतां नराणां **लाभसंपदो**ऽर्थसमृद्धयः मित्रलाभं मित्रलाभात् **अनु** पश्चात् भवति अर्थलाभात् मित्रलाभः श्रेष्ठ इत्यर्थः । किं० लाभसंपदः ? **दुर्लभाः** कृच्छ्रेणापि लब्धुमशक्याः किं० मित्रलाभम् ? **एकसुकृतेन** एकोपकारेण **लभ्यं** प्राप्यं न तु दुर्लभम् अथवा एकं यत् सुकृतं पुण्यं पूर्वजन्मार्जितं तेन लभ्यं पुनः किं० मित्र० ? **रक्षितारं** रक्षकम् आत्मनो रक्षां नापेक्षते किंतु आपद्भ्योऽन्यं रक्षति । पुनः किं० लाभ० ? **असुरक्षभूतयः** रक्षितुमशक्यमहिमानः दुःखेन रक्षितुं शक्या इत्यर्थः । पुनः किं० मि० ? **स्वन्तं** प्रान्ते सुखकरं पुनः किं० लाभ० ? **अन्तविरसाः** अन्त अरम्याः प्रान्ते दुःखदायिन्य इत्यर्थः[1] । अथ समासः । एकं च तत् सुकृतं च एकसुकृतं तेन ए०। सुष्ठु रक्ष्यन्त इति सुरक्षा न सुरक्षा असुरक्षा असुरक्षा भूतयो यासां ताः अ० । शोभनोऽन्तो यस्य स स्वन्तस्तं स्वन्तम् । अन्ते विरसाः अ० । मित्रस्य लाभः मित्रलाभः तं मि० । लभ्यन्त इति लाभाः लाभानां संपदः ला०। इति वृत्तार्थः ॥ ५२ ॥

चञ्चलं वसु नितान्तमुन्नता मेदिनीमपहरन्त्यरातयः ।
भूधरस्थिरमुपेयमागतं माऽवमंस्त सुहृदं महीपतिम् ॥ ५३ ॥

'चञ्च०' व्याख्या । हे मुने ! **वसु** द्रव्यं **नितान्तं** निरन्तरं **चञ्चलं** वर्तते स्थिरं न भवति । वसु स्थिरं मा भवतु पृथ्वी स्थिरा भविष्यति नेत्याह- **उन्नताः** प्रबलाः **अरातयो** वैरिणः **मेदिनीं** भूमिम् **अपहरन्ति** गृह्णन्ति केवलं वसु नापहरन्ति किन्तु मेदिनीमपीत्यपिशब्दार्थः । मित्रं तु न तथेत्याह-भवान् इति शेषः। **महीपतिं** महादेवं **सुहृदं** मित्रं **मा अवमंस्त** मावज्ञासीत् किं० महीपतिम् ? **भूधरस्थिरं** पर्वतवत् निश्चलं पुनः किं० मही० ? **उपेयम्** अन्विष्य गन्तव्यमपि पुनः किं० मही० ? **आगतं** स्वतः प्राप्तं[2] भवानिति अन्यश्लोकगतो वा भवच्छब्दो विभक्तिपरिणामेनात्र द्रष्टव्यः । अन्यथा मध्यमपुरुषः स्यात् । अथ समासः। भूधरवत् स्थिरः भूधरस्थिरस्तं भू० । इति वृत्तार्थः ॥ ५३ ॥

ननु मुमुक्षोः किं मित्रसंग्रहेण तत्राह -

---

१. अत्रोपमेयस्य मित्रलाभस्य लाभान्तरं प्रत्याधिक्याभिधानाद् व्यतिरेकालंकारः -म. २. अलंकारस्तु व्यतिरेक एव । भूधरस्थिरमित्युपमासंगतिसंकरः -म.

जेतुमेव भवता तपस्यते नायुधानि दधते मुमुक्षवः ।
प्राप्यते च सकलं चमूपतेः संगमेन तपसः फलं त्वया ॥ ५४ ॥

'जेतु०' व्याख्या । हे मुने ! **भवता त्वया जेतुमेव** जयार्थमेव **तपस्यते** तपश्चर्यते कुतः ? **मुमुक्षवः** मुक्तिमिच्छवः मोक्षार्थिनः **आयुधानि** शस्त्राणि **न दधते** न धारयन्ति तथापि किं भवत्स्वामिसख्येन तत्राह- **च** पुनः त्वया **चमूपतेः** महादेवस्य **संगमेन** मेलापकेन **सकलं** समस्तं **तपसः फलं प्राप्यते** अतस्ते सख्यार्होऽस्मत्स्वामीत्यर्थः । तव शत्रुजयोऽनेनापि कर्तुं शक्यते इति भावः । अथ समासः । मोक्तुमिच्छन्तीति मुमुक्षन्ति मुमुक्षन्ति ते मुमुक्षवः । चम्वाः पतिः चमूपतिः तस्य च० । इति वृत्तार्थः ॥ ५४ ॥

तर्हि एवंविधश्चेत्तव पतिः किमिति मद्गृहीतबाणग्रहणे प्रयास इत्याह -

वाजिभूमिरिभराजकाननं सन्ति रत्ननिचयाश्च भूरिशः ।
काञ्चनेन किमिवास्य पत्रिणा केवलं न सहते विलङ्घनम् ॥ ५५ ॥

'वाजि०' व्याख्या । हे मुने ! **अस्य** मत्स्वामिनः **वाजिभूमिः** अस्ति वाजिनोऽश्वा उत्पद्यन्ते यत्र सा वाजिभूमिरित्युच्यते । **च** पुनः **इभराजकाननं** गजराजवनं गजोत्पत्तिस्थानम् इत्यर्थः । अस्ति च पुनः **भूरिशः** बहुला **रत्ननिचयाः** रत्नसमूहाः **सन्ति** ननु इदृग्समृद्धः किमेकस्मै बाणाय कलहयति(हायते) तत्राह- अस्य मत्स्वामिनः **काञ्चनेन** सुवर्णेन **पत्रिणा** शरेण **किमिव** किं भण्यते न किंचित्प्रयोजनमस्तीत्यर्थः । किन्तु पुमान् **केवलं विलङ्घनं** व्यतिक्रमं **न सहते** न क्षमते नायं बाणलुब्धः किं त्वधिक्षेपासहिष्णुरित्यर्थः । अथ समासः । वाजिनां भूमिः वा० । इभानां राजानः इभराजानः इभराजानां काननम् इ० । रत्नानां निचयाः र० । इति वृत्तार्थः ॥ ५५ ॥

नन्वीदृक् लुब्धः किमुपकर्ता तत्राह -

सावलेपमुपलिप्सिते परैरभ्युपैति विकृतिं रजस्यपि ।
प्रार्थितस्तु न महान्समीहते जीवितं किमु धनं धनायितुम् ॥ ५६ ॥

'साव०' व्याख्या । हे मुने ! **महान्** शौर्यादिगुणसंपन्नो विजिगीषुः पुमान् **विकृतिं** विकारम् **अभ्युपैति** प्राप्नोति प्रकुप्यतीत्यर्थः । कस्मिन् सति ? **परैः** अन्यैः शत्रुभिः वा **सावलेपं** सगर्वं यथा स्यात्तथा **रजस्यपि** धूल्यामपि **उपलिप्सिते** सति उपलब्धुमिष्टे जिघृक्षिते **प्रार्थितस्तु** याचितः सन् **जीवितं न समीहते** न वाञ्छति **धनं** द्रव्यं **धनायितुम्** आत्मन एषितुं दातुमित्यर्थः । **किमु** किम् उच्यते । अथ समासः । अवलेपेन सह वर्तमानं यत् तत् सावलेपम् । आत्मनः धनमेषितुं धनायितुमिति विग्रहः अत्र तु इच्छामात्रमर्थः अन्यथा धनं धनमित्यनेन पौनरुक्त्यं स्यात् । इति वृत्तार्थः ॥ ५६ ॥

नन्वेवं शरलोभान्मिथ्याभियुज्यसे इत्याह -

नाभियोक्तुमनृतं त्वमिष्यसे कस्तपस्विविशिखेषु चादरः ।
सन्ति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः ॥ ५७ ॥

'नाभि०' व्याख्या । हे मुने ! **त्वम् अनृतम्** असत्यम् **अभियोक्तुम्** अभ्याख्यातुं **नेष्यसे** नेष्टोऽसि 'मिथ्याभियोगोऽभ्याख्यानम्' इति *हैमः* [२६८] । **च** पुनः **तपस्विविशिखेषु** तपोधनबाणेषु **क आदरः** ममानास्थेत्यर्थः । **हि** यस्मात् कारणात् **नो**ऽस्माकं **भूभृति** शैले **परे** अन्येऽपि **शराः** बाणाः **सन्ति ये** शराः **वज्रिणः** इन्द्रस्य **पराक्रमवसूनि** पराक्रमधनानि शौर्यसर्वस्वभूता इत्यर्थः । वज्रिणः ग्रहणात् वज्रादपि अतिरिच्यते इति सूच्यते अत्र शरेषु पराक्रमसाधनेषु पराक्रमरूपेण वस्तु व्यज्यते । अथ समासः । तपस्विनां विशिखाः तपस्विविशिखास्तेषु त० । पराक्रमस्य वसूनि प० । इति वृत्तार्थः ॥५७॥

उक्तं निगमयति -

तत्तदीयविशिखातिसर्ज्जनादस्तु वां गुरु यदृच्छयागतम् ।
राघवप्लवगराजयोरिव प्रेम युक्तमितरेतराश्रयम् ॥ ५८ ॥

'तत्तदी०' व्याख्या । हे मुने ! **तत्**तस्मात् कारणात् **वां** युवयोः **राघवप्लवगराजयोरिव** राम-सुग्रीवयोरिव **इतरेतराश्रयम्** अन्योन्यविषयं **युक्तम**नुरूपं **प्रेम** सख्यम् **अस्तु** कस्मात् इति हेतुमाह-**तत्तदीयविशिखातिसर्ज्जनात्** महादेवबाणप्रत्यर्पणात् किं० प्रेम ? **गुरु** महत् पुनः किं० ? **यदृच्छयागतं** स्वेच्छया प्राप्तं दैवादागतं वा । अथ समासः । तदीयश्चासौ विशिखश्च तदीयविशिखः तदीयविशिखस्य अतिसर्जनं तदीयविशिखातिसर्जनं तस्मात् त० । राघवश्च प्लवगराजश्च राघवप्लवगराजौ तयोः रा० । इतरच्चेतरच्च इतरेतरम् इतरेतरस्य आश्रयम् इ० । इति वृत्तार्थः ॥५८॥

अथ तें शरापेक्षा वर्तते तर्ह्ययं याच्यतामित्याह -

मार्गणैरथ तव प्रयोजनं याचसे किमु पतिं न भूभृतः ? ।
त्वद्विधं सुहृदमेत्य सोऽर्थिनं किं न यच्छति विजित्य मेदिनीम् ॥ ५९ ॥

'मार्ग०' व्याख्या । हे मुने ! **अथ** अथवा **तव मार्गणैः** बाणैः **प्रयोजनं** कार्यं यद्यस्ति तर्हि **भूभृतः** पर्वतस्य **पतिं** प्रभुं महादेवं **किमु न याचसे** न प्रार्थयसे 'न नाथसे'[1] इति पाठस्तत्र **न नाथसे** न याचसे 'नाथृ याच्ञोपतापैश्वर्याशीःषु' इति धातोर्लट् । न च याच्ञाभङ्गशङ्का कार्येत्याह-**सो**ऽस्मत्स्वामी **त्वद्विधं** त्वादृशं महानुभावं **सुहृदं** मित्रभूतम् **अर्थिनं** याचकम् **एत्य** प्राप्य **मेदिनीं** पृथ्वीं **विजित्य** जित्वा **किं न यच्छति** न ददाति अपितु यच्छत्येव । किं पुनः शरानिति भावः । अथ समासः । तव इव विधा प्रकारो यस्य तं त्वद्विधम् । अर्थोऽस्यास्तीति अर्थी तम् अर्थिनम् । इति वृत्तार्थः ॥ ५९ ॥

यदुक्तं 'त्वद्विधं' (का० ५९) इत्यादि तत्रोपपत्तिमाह -

1. एष पाठः म. मध्ये

तेन सूरिरुपकारिताधनः कर्तुमिच्छति न याचितां वृथा ।
सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभङ्गवेदनाम् ॥ ६० ॥

'तेन०' व्याख्या । हे मुने ! **सूरिर्विद्वान् तेन** कारणेन **याचितां** याच्ञां **वृथा** व्यर्थं **कर्तुं न इच्छति** कुतः ? **यत्** येन कारणेन किं० सूरिः ? **उपकारिताधनः** उपकारपरः उपकारकत्वमात्रधनः **सीदतां** क्लिश्यताम् **अर्थिनां** याचकानां **प्रणयभङ्गवेदनां** याच्ञाभङ्गदुःखम् **अनुभवन्निव** स्वयमनुभवन्निव **वेद** वेत्ति अतो न वैफल्यशङ्का कार्येत्यर्थः । अथ समासः । उपकारित्वमेव धनं यस्य स उ० । प्रणयस्य भङ्गः प्रणयभङ्गः प्रणयभङ्गस्य वेदना प्र० तां प्र० । इति वृत्तार्थः ॥ ६० ॥

ननु स्वयंग्राहिणः किं याच्ञादैन्यं तत्राह -

शक्तिरर्थपतिषु स्वयंग्रहं प्रेम कारयति वा निरत्ययम् ।
कारणद्वयमिदं निरस्यतः प्रार्थनाऽधिकबले विपत्फला ॥ ६१ ॥

'शक्ति०' व्याख्या । हे मुने ! **अर्थपतिषु** धनपतिषु विषये **स्वयंग्रहं** स्वाम्यनुज्ञां विना ग्रहणं स्वयंग्रहः तं **शक्तिः** सामर्थ्यं **कारयति वा** अथवा **निरत्ययं** अपराधेऽपि अविनश्वरं **प्रेम** कर्तृ स्वयंग्रहं **कारयति** प्रबलः प्रियो वा परस्य धनं स्वयं गृह्णाति इत्यर्थः । अन्यथा दोषमाह- **इदं** पूर्वोक्तं शक्ति-प्रेमलक्षणं **कारणद्वयं निरस्यतः** त्यजतः पुंस इति शेषः । **अधिकबले** प्रबले विषये **प्रार्थना** तद्धनजिघृक्षा **विपत्फला** अनर्थकारिका अयं भावः-अशक्तस्य अप्रियस्य पुंसः प्रबलधनग्रहणाशा सर्प्पशिरोमणिग्रहण-साहसवत् अनर्थाय भवतीत्यर्थः । अथ समासः । अर्थस्य पतयोऽर्थपतयस्तेषु अ० । स्वयं गृह्णन्तीति स्वयंग्रहस्तं स्व० । निर्गतोऽत्ययो यस्मात् तत् नि० । कारणयोर्द्वयं का० । विपदेव फलं यस्याः सा वि० । इति वृत्तार्थः ॥ ६१ ॥

अथ शस्त्रार्थसंपत्त्या शक्तत्वाभिमानस्तत्राह -

अस्त्रवेदमधिगम्य तत्त्वतः कस्य चेह भुजवीर्यशालिनः ।
जामदग्न्यमपहाय गीयते तापसेषु चरितार्थमायुधम् ॥ ६२ ॥

'अस्त्र०' व्याख्या । हे मुने ! **इह** जगति **तापसेषु** तपस्विषु मध्ये **जामदग्न्यं** परशुरामम् **अपहाय** त्यक्त्वा **कस्य** पुरुषस्य **चरितार्थं** सत्यार्थम् **आयुधं** शस्त्रं **गीयते** एकं परशुरामं विना न कोऽपि तापसेषु सान्वर्थशस्त्रधारीत्यर्थः । किं० कस्य ? **तत्त्वतः** परमार्थतः **अस्त्रवेदम्** अस्त्रशास्त्रम् **अधिगम्य** प्राप्य **भुजवीर्यशालिनः** बाहुबलशोभिनः उभयसंपन्नस्येत्यर्थः । कस्य वा आयुधं चरितः प्राप्तोऽर्थो येन तत् चरितार्थं साधकं गीयते न कस्यापीत्यर्थः । अतस्तवापि तापसत्वादकिंचित्करस्य तेन सह सख्यमेव मुख्यमिति भावः । अथ समासः । भुजवीर्येण शालते इति भुजवीर्यशाली तस्य भु० । चरितोऽर्थो येन स चरितार्थस्तं च० । इति वृत्तार्थः ॥ ६२ ॥

ननु त्वन्मृगशरद्रोहिणः मम तेन कथं सख्यं स्यादिति चेत् सत्यं तथापि तावन्मृगवधापराधः क्षमिष्यत इत्याह -

अभ्यघानि मुनिचापलात्त्वया यन्मृगः क्षितिपतेः परिग्रहः ।
अक्षमिष्ट तदयं प्रमाद्यतां संवृणोति खलु दोषमज्ञता ॥ ६३ ॥

'अभ्य०' व्याख्या । हे मुने ! **यत् त्वया** भवता **मुनिचापलात्** ब्राह्मणचापलात् **मृगो** वराहः **अभ्यघानि** अभिहतः किं० मृगः ? **क्षितिपतेः** महादेवस्य **परिग्रहः** स्वीकारः **तद्**हननम् **अयं** महादेवः **अक्षमिष्ट** सोढवान् तथाहि **खलु** निश्चितम् **अज्ञता** मूर्खता **प्रमाद्यताम्** अविमृश्यकारिणां नराणां **दोष**मपराधं **संवृणोति** आच्छादयति अज्ञस्यापराधो न गण्यते इत्यर्थः । अथ समासः । मुनेः चापलं मुनिचापलं तस्मात् मु० । परिगृह्यते इति परिग्रहः । न ज्ञता अज्ञता । इति वृत्तार्थः ॥ ६३ ॥

अथ सुहृद्भावेन हितमुपदिशति -

जन्मवेषतपसां विरोधिनीं मा कृथाः पुनरमूमपक्रियाम् ।
आपदेत्युभयलोकदूषणी वर्तमानमपथे हि दुर्मतिम् ॥ ६४ ॥

'जन्म०' व्याख्या । हे मुने ! **पुनः** अतः परम् **अमूम् अपक्रियाम्** अपकारं **मा कृथा** मा कुरु किं० अपक्रियाम् ? 'जन्मवेषतपसां' जन्मवेषनियमानां **जन्म** सत्कुलप्रसूतिः **वेषो** जटावल्कलादिः **तपो** नियमस्तेषां **विरोधिनीं** विघातिनीम् अपक्रियाकरणे को दोष इत्याह- **हि** यस्मात् कारणात् **अपथे** कुमार्गे **वर्त्तमानम्** अकार्यकारकम् इत्यर्थः । **दुर्मतिं** नरम् **आपत् एति** प्राप्नोति किं० आपत् ? **उभयलोकदूषणी** इहलोकपरलोके दुःखदायिनी । अथ समासः । जन्म च वेषश्च तपांसि च जन्मवेषतपांसि तेषां ज० । उभौ लोकौ दूषयतीति उभयलोकदूषणी । समासविषये उभशब्दस्य स्थाने उभयशब्दप्रयोग एव साधुः । दुष्टा मतिर्यस्य स दुर्मतिस्तं दु० । इति वृत्तार्थः ॥ ६४ ॥

यदुक्तम् 'अभ्यघानि मुनिचापलाद्' (का० ६३) इति तदेव स्पष्टयति -

यष्टुमिच्छसि पितॄन्न सांप्रतं संवृतोऽर्चिचयिषुर्दिवौकसः ।
दातुमेव पदवीमपि क्षमः किं मृगेऽङ्ग ! विशिखं न्यवीविशः ॥ ६५ ॥

'यष्टु०' व्याख्या । हे मुने ! **त्वं सांप्रतम्** अधुना **पितॄन्** पूर्वजान् **यष्टुं** यागादिना तोषयितुं **न इच्छसि** न वाञ्छसि तत्र तवाभिनिवेशो नास्तीत्यर्थः । तथा **दिवौकसो** देवान् त्वं **न अर्चिचयिषुः** नार्चयितुमिच्छुः इयं मृगहिंसा पितृदेवतार्था स्यात्तदा तव नापराधः स्यात् शास्त्रविहितत्वात् हिंसाया इति भावः । अथेयं हिंसा आत्मरक्षार्थं भविष्यतीतिचेन्नेत्याह- **अङ्ग** इति संबोधने त्वं **मृगे** शूकरे **विशिखं** बाणं **किं न्यवीविशः** किमर्थं निवेशितवान् अभिधावतो मृगादपसरणेनैवात्मरक्षणे कर्तव्ये यन्मृगम्

अवधीत् तत् चापलम् एव किं० त्वम् ? **संवृतः** जितेन्द्रियः पुनः किं० त्वम् ? **पदवीं** मार्गं **दातुमेव** दानायैव **क्षमः** समर्थोऽसि। अथ समासः । अर्च्चयितुमिच्छतीति अर्च्चिचयिषति अर्च्चिचयिषतीति अर्चिचयिषुः । इति वृत्तार्थः ॥६५॥

किं बहुना परमार्थः श्रूयतामित्याह -

सज्जनोऽसि विजहीहि चापलं सर्वदा क इव वा सहिष्यते ।
वारिधीनिव युगान्तवायवः क्षोभयन्त्यनिभृता गुरूनपि ॥ ६६ ॥

'सज्ज०' व्याख्या । हे मुने ! त्वं **सज्जनोऽसि** वेदशास्त्रज्ञोऽसि अत**श्चापलं** चपलत्वं **विजहीहि** त्यज **सर्वदा** नित्यं **क इव वा** को वा **सहिष्यते** क्षमयिष्यते असहने कारणमाह- **अनिभृता**श्चपला जनाः **गुरूनपि** महतोऽपि **क्षोभयन्ति** चालयन्ति के इव ? युगान्तवायवः **इव** यथा **युगान्तवायवः** कल्पान्तवाताः **वारिधीन्** समुद्रान् क्षोभयन्ति अत एव चपलेन न भवितव्यमित्यर्थः । अथ समासः । चपलस्य कर्म चापलम्। युगान्तस्य वायवः यु० । न निभृता अनिभृता । इति वृत्तार्थः ॥ ६६ ॥

नन्वयं किरातः क्षुभितः सन् किं करिष्यति तत्राह -

अस्त्रवेदविदयं महीपतिः पर्वतीय इति माऽवजीगणः ।
गोपितुं भुवमिमां मरुत्वता शैलवासमनुनीय लम्भितः ॥ ६७ ॥

'अस्त्र०' व्याख्या । हे मुने ! त्वम् **अयं** चमूपतिर्महादेवः **पर्वतीयः** पर्वतवासी कश्चित् सामान्य-किरात इति **माऽवजीगणः** वनेचरबुद्ध्या माऽवज्ञासीः । किं० अयम् ? **अस्त्रवेदवित्** अस्त्रकलाकुशलः नन्वीदृशश्चेन्महानुभावः तर्हि इह वने किमर्थं निवसति ? पुनः किं० अयम् ? **मरुत्वता** इन्द्रेण **अनुनीय** प्रार्थ्य **शैलवासं** पर्वतनिवासं **लम्भितः** प्रापितः किंकर्तुम् ? इमां **भुवं** पृथ्वीं **गोपितुं** रक्षितुम् **इमाम्** इति अङ्गुल्यानिर्देशः । अथ समासः । अस्त्रवेदं वेत्तीति अ० । पर्वते भवः पर्वतीयः । शैलस्य वासः शैलवासः तं शै० । इति वृत्तार्थः ॥ ६७ ॥

उपसंहरन्नाह -

तत्तितिक्षितमिदं मया मुनेरित्यवोचत वचश्चमूपतिः ।
बाणमत्रभवते निजं दिशन् प्राप्नुहि त्वमपि सर्वसंपदः ॥ ६८ ॥

'तत्ति०' व्याख्या । **चमूपतिः** महादेवः **इति** अमुना प्रकारेण **वचो** वाचम**वोचत**ोक्तवान् इतीति किम् ? **मया** महादेवेन **मुने**रर्जुनस्य तत् **इदं** मृगवधलक्षणं चापलं **तितिक्षितं** क्षमितं शरद्रोहिणस्तु शरस्य प्रत्यपर्णमेव प्रतीकार इत्याह- **अत्रभवते** पूज्याय मत्स्वामिने **निजं बाणं** शरं **दिशन्** प्रत्यर्पयन् **त्वमपि** **सर्वसंपदः** सकलसमृद्धीः **प्राप्नुहि** सख्येनेति शेषः । अथ समासः । चमूनां पतिः च० । सर्वाश्च ताः

संपदश्च स० । इति वृत्तार्थः ॥ ६८ ॥

ननु ममैतत् सख्यमेव न रोचते किं पुनस्तन्मूलाः संपदस्तत्राह -

आत्मनीनमुपतिष्ठते गुणाः संभवन्ति विरमन्ति चापदः ।
इत्यनेकफलभाजि मा स्म भूदर्थिता कथमिवार्यसंगमे ॥ ६९ ॥

'आत्म०' व्याख्या । हे मुने । **आर्यसंगमे** साधुजनसंगतौ **अर्थिता** प्रार्थिता अपेक्षा **कथमिव** किमिव **मा स्म भूत् सर्वदा** भवत्येव किं० आर्यसंगमे ? **इति अनेकफलभाजि** बहुफलभाजि नानाफलोत्पादके इत्यर्थः । इतीति किम् ? **आत्मनीनम्** आत्मने हितम् **उपतिष्ठते** संगच्छते **च** पुनः **गुणाः** विनयादयः **संभवन्ति आपदो** विपदश्च **विरमन्ति** । अथ समासः । आत्मने हितम् आत्मनीनम् । अनेकानि फलानि भजतीति अनेकफलभाग् तस्मिन् अ० । आर्याणां संगमः आर्यसंगमः तस्मिन् आ० । इति वृत्तार्थः ॥६९॥

नन्वयं दूरे वर्तते इत्याह -

दृश्यतामयमनोकुहान्तरे तिग्महेतिपृतनाभिरन्वितः ।
साहिवीचिरिव सिन्धुरुद्धतो भूपतिः समयसेतुवारितः ॥ ७० ॥

'दृश्य०' व्याख्या । हे मुने ! त्वया **अनोकुहान्तरे** द्रुमान्तरे **अयं भूपति**र्महादेवः **दृश्यतां** विलोक्यतां किं० भूपतिः ? **तिग्महेतिपृतनाभिः** तीक्ष्णशस्त्रसेनाभिः **अन्वितः** युक्तः पुनः किं० भूपतिः ? 'समयसेतुवारितः' **समयो** मर्यादा स **सेतुरिव** समयसेतुस्तेन **वारितः** निषिद्धः सन् तत्र वर्तते पुनः किं० भूपतिः ? **उद्धतः** उत्कटः क इव ? **सिन्धुः** समुद्र **इव** यथा सिन्धुः समुद्रः समयसेतुवारितो भवति किं० सिन्धुः ? **साहिवीचिः** ससर्पकल्लोलः । अथ समासः । अनोकुहस्य अन्तरम् अनोकुहान्तरं तस्मिन् अनो० । तिग्मा हेतयो यस्यां सा तिग्महेतिः तिग्महेतयश्च ताः पृतनाश्च तिग्महेतिपृतनास्ताभिः ति० । अहिभिः सह वर्तन्ते ये ते साहयः साहयो वीचयो यस्मिन् स साहिवीचिः । समय एव सेतुः समयसेतुः समयसेतुना वारितः स० । इति वृत्तार्थः ॥ ७० ॥

अथान्यद्विज्ञापनमाह -

सज्यं धनुर्वहति योऽहिपतिस्थवीयः स्थेयान् जयन् हरितुरङ्गमकेतुलक्ष्मीम् ।
अस्यानुकूलय मतिं मतिमन्ननेन सख्या सुखं समभियास्यसि चिन्तितानि ॥७१॥ (व०)

इति श्रीकिरातार्ज्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ त्रयोदशः सर्गः ॥ १३ ॥

'सज्यं०' व्याख्या । हे मुने ! **यो** महादेवः **सज्यं** प्रत्यञ्चारूढम् आरोपितगुणं **धनुश्चापं वहति**

धारयति इत्यनेन भयं दर्शितम् । किं० धनुः ? **अहिपतिस्थवीयः** शेषनागवत् स्थूलतरं किं० यः ? **स्थेयान्** निश्चलः किंकुर्वद्धनुः ? **हरितुरङ्गमकेतुलक्ष्मीम्** इन्द्रध्वजशोभां **जयन्** हे **मतिमन्** ! हे अर्जुन ! **अस्य** महादेवस्य **मतिम् अनुकूलय** प्रसन्नां कुरु यथा वदति तथा वर्तस्वेत्यर्थः । मतिमत्तायाः फलमेतदित्यर्थः । कुतः **अनेन सख्या** मित्रेण चमूपतिना हेतुना **सुखं** यथा स्यात्तथा अक्लेशेन **चिन्तितानि** वाञ्छितानि **समभियास्यसि** । अथ समासः । ज्यया सह वर्तमानं सज्यम् । अतिशयेन स्थूलं स्थवीयः अहिपतिवत् स्थवीयः अ० । अतिशयेन **स्थिरः** स्थेयान् । हरयो नीलवर्णा तुरङ्गमा यस्य सः हरितुरङ्गमः हरितुरङ्गमस्य केतुः हरितुरङ्गमकेतुः हरितुरङ्गमकेतोः लक्ष्मीः हरितुरङ्गमकेतुलक्ष्मीस्तां ह० । प्रशस्ता मतिरस्यास्तीति मतिमान् तस्य संबोधनं क्रियते हे मतिमन् । वसन्ततिलकावृत्तम् । इति वृत्तार्थः ॥ ७१ ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद्गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गस्त्रयोदशमितः समवाप पूर्तिम् ॥ २ ॥

इति श्रीभट्टभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***दूतवाक्योपन्यासो*** नाम त्रयोदशः सर्गः ॥ १३ ॥

चतुर्दशः सर्गः।

किराताधिपतेः प्रौढदूतवचनानन्तरम् अर्जुनवचनचातुरीं वर्णयिष्यन् चतुर्दशं सर्गमारभते -

ततः किरातस्य वचोभिरुद्धतैः पराहतः शैल इवार्णवाम्बुभिः ।
जहौ न धैर्यं रुषितोऽपि पाण्डवः सुदुर्ग्रहान्तःकरणा हि सूरयः ॥ १ ॥

[का. ६३ यावद् वंशस्थवृत्तम्]

'ततः०' व्याख्या । **ततः** किरातवचनानन्तरं **रुषितोऽपि** कुपितोऽपि **पाण्डवो**ऽर्जुनः **धैर्यं** निर्विकारित्वं **न जहौ** न तत्याज उत्पन्नमपि कोपं स्तम्भयामासेत्यर्थः । कैः रुषित इत्याह- किं० पाण्डवः ? **किरातस्य** दूतस्य **उद्धतैर**नुचितैः **वचोभिः** वचनैः **पराहतो**ऽभिहतः क इव ? शैल **इव** यथा **शैलः** पर्वतः **अर्णवाम्बुभिः** समुद्रजलैः पराहतोऽपि आहतोऽपि धैर्यं न त्यजति । **हि** यस्मात् कारणात् **सूरयः** पण्डिताः **सुदुर्ग्रहान्तःकरणाः** अप्रकम्पमनसः भवन्ति केनापि परिकलितुमशक्याः भवन्तीत्यर्थः । अथ समासः । अर्णवस्य अम्बूनि अर्णवाम्बूनि तैर० । सुष्ठु दुर्ग्रहमन्तःकरणं येषां ते सुदुर्ग्रहान्तःकरणाः । वंशस्थवृत्तं तल्लक्षणं पूर्वोक्तम् । इति वृत्तार्थः ॥ १ ॥

सलेशमुल्लिङ्गितशात्रवेङ्गितः कृती गिरां विस्तरतत्त्वसंग्रहे ।
इदं[1] प्रमाणीकृतकालसाधनः प्रशान्तसंरम्भ इवाददे वचः ॥ २ ॥

'सलेश०' व्याख्या । **सो**ऽर्जुन **इदं** वक्ष्यमाणं **वचो** वचनम् **आददे** उवाच किं० सः ? **सलेशं** सलवम् 'अशेषम्' इति पाठस्तत्र सकलं यथा स्यात्तथा **उल्लिङ्गितशात्रवेङ्गितः** आविष्कृतशात्रवाभिप्रायः पुनः किं० सः ? **गिरां** वाचां **विस्तरतत्त्वसंग्रहे** प्रपञ्चवक्तव्यांशे **कृती** कुशलः पुनः किं० सः ? **प्रमाणीकृतकालसाधनः** प्रतिपन्नसमयसाधनः अवसरोचितं विवक्षुरित्यर्थः । पुनः किं० सः ? उत्प्रेक्ष्यते **प्रशान्तसंरभ इव** मन्दीभूतकोप इव स्थितः । अथ समासः । सह लेशेन वर्तमानं सलेशम् । शत्रुरेव शात्रवः शात्रवस्य इङ्गितं शात्रवेङ्गितम् उल्लिङ्गितं शात्रवेङ्गितं येन स उ० । विस्तरश्च तत्त्वसंग्रहश्च विस्तरतत्त्वसंग्रहस्तस्मिन् वि० । प्रमाणीकृतं काल एव साधनं येन स प्र० । प्रशान्तः संरम्भो यस्य स प्रशान्तसंरम्भः । इति वृत्तार्थः ॥ २ ॥

अर्जुनः किमुवाचेत्याह -

विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ॥ ३ ॥

'विवि०' व्याख्या । हे किरात ! **अकृतपुण्यकर्मणाम्** अविहितधर्मकर्मणां नराणां **सरस्वती** वाणी **न प्रवर्तते** न प्रसरति किन्तु पुण्यवतामेवेदृशी वाणी भवति नान्येषामिति भावः । स्तुतिपक्षे भवद्वाणी

1. अयं -म. इदं च पा.

चैवंविधेति । धन्यो भवानिति । किं० सरस्वती ? **विविक्तवर्णाभरणा** स्पष्टाक्षररूपाभरणा अन्यत्र च नायिकापक्षे विविक्तवर्णाभरणा शुद्धरूपनूपुराद्याभरणा पुनः किं० सरस्वती ? **सुखश्रुतिः** सुखकारिश्रवणा श्रव्येत्यर्थः । अन्यत्र च ना० सुखश्रुतिः श्रूयते इति श्रुतिर्वाणी सुखा सुखकारिणी श्रुतिर्वाणी यस्याः सा तथा मञ्जुभाषिणीत्यर्थः । पुनः किं० सरस्वती ? **द्विषां** वैरिणाम् **अपि हृदयानि** मनांसि **प्रसादयन्ती** निर्मलतां नयन्ती किं पुनः सुहृदामिति भावः । पुनः किं० सर० ? **प्रसन्नगम्भीरपदा** प्रसन्नगम्भीरार्था । अन्यत्र च प्रसन्नगम्भीरपदा विमलाऽलसचरणा[1] । निन्दापक्षे वक्रोक्त्या व्याख्येयानि पदानि सरस्वत्याः । अथ समासः । विविक्तवर्णा एव आभरणानि यस्याः सा वि० । सुखा श्रुतिर्यस्याः सुखश्रुतिः । अकृतं पुण्यकर्म यैस्ते अकृतपुण्यकर्माणस्तेषाम् अ० । प्रसन्नानि गम्भीराणि पदानि यस्याः सा प्र० । इति वृत्तार्थः ॥३॥

भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये ।
नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित्प्रकाशताम् ॥ ४ ॥

'भव०' व्याख्या । हे किरात ! **ते** पुरुषाः **विपश्चितां** पण्डितानां मध्ये **सभ्यतमाः** प्रधानसभ्याः **भवन्ति ये** नरा **मनोगतम्** अन्तःकरणस्थितं वस्तु वा अथवा मनसा गृहीतमर्थं **वाचि** वचने **निवेशयन्ति** समारोपयन्ति वाचा उद्गिरन्तीत्यर्थः । **तेषु** वाचि निवेशयत्स्वपि मध्ये **कतिचित्** पुरुषाः **उपपन्ननैपुणाः** प्राप्तदक्षत्वाः भवन्ति । ते के ? ये **गभीरं** दुर्बोध**मर्थं प्रकाशतां** प्रकटतां **नयन्ति** प्रापयन्ति लोके तावत् ज्ञातारो दुर्ल्लभाः तत्रापि वक्तारः । तत्रापि निगूढार्थप्रकाशकाः त्वयि तु सर्वमप्यस्तीति स्तुतिः । अत्र वनेचरो यथा वदति तथा तादृशं वाक्यं वक्रोक्त्या व्याख्येयम् । अथ समासः । सभायां साधवः सभ्याः अतिशयेन सभ्याः सभ्यतमाः । उपपन्नं नैपुणं येषां ते उ० । इति वृत्तार्थः ॥ ४ ॥

स्तुवन्ति गुर्वीमभिधेयसंपदं विशुद्धिमुक्तेरपरे विपश्चितः ।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः ॥ ५ ॥

'स्तुव०' व्याख्या । हे किरात ! केचित् **विपश्चितो** विचक्षणाः **गुर्वीं** महतीम् **अभिधेयसंपदम्** अर्थसंपत्तिं **स्तुवन्ति** वर्णयन्ति गिरामर्थचारुतया भवितव्यमिति वदन्तीत्यर्थः । **अपरे** विपश्चितः **उक्तेः** शब्दस्य **विशुद्धिं** शक्तिं स्तुवन्ति केचित् शब्दशक्तिं मन्यन्ते केचित् अर्थशक्तिं मन्यन्ते इति भावः । **इति** अमुना प्रकारेण **प्रतिपूरुषं** पुरुषं प्रति **रुचौ** अभिलाषे **स्थितायां** निश्चितायां सत्यां **सर्वमनोरमाः** सर्वेषां शब्दसौष्ठवरुच्यर्थसौष्ठवरुचीनां पुंसां मनोहरा **गिरो** वाचः **सुदुर्लभाः** सुष्ठुदुष्प्रापा भवद्वाण्यस्तु सर्वमनोरमाः उक्तोभयगुणसंपत्त्येति भावः । अथ समासः । अभिधेयस्य संपत् अभिधेयसंपत् ताम् अ० । पूरुषं पूरुषं प्रति इति प्र० । सर्वेषां मनोरमाः स० । इति वृत्तार्थः ॥ ५ ॥

---

१. अत्र काचिन्नायिका वाग्देवता च प्रतीयते, तत्रादौ समासोक्तिरलंकारः, विशेषणमात्रसाम्येनाप्रस्तुतप्रतीतेः । अत एव न श्लेषः -म.

समस्य संपादयता गुणैरिमां त्वया समारोपितभार ! भारतीम् ।
प्रगल्भमात्मा धुरि धुर्य ! वाग्मिनां वनेचरेणापि सताधिरोपितः ॥ ६ ॥

'सम०' व्याख्या । हे **समारोपितभार !** स्वामिनिहितसंध्यादिकार्यभार ! 'दूते सन्धिविपर्ययौ' इति (८०) *मनु*वचनात् । अन्यच्च 'वपुष्मान् वीतभीर्वाग्मी दूतो राज्ञः प्रशस्यते' इति (८१) । स्थापितदूतलक्षणभार इत्यर्थः । हे **धुर्य** ! कार्यनिर्वाहक ! **त्वया वनेचरेणापि** पामरेणापि **सता आत्मा** स्वयं **प्रगल्भं** निर्भीकं यथा स्यात् तथा **वाग्मिनां** वाचालानां वाचोयुक्तिपटूनामित्यर्थः । **धुर्य**ग्रे **अधिरोपितः** स्थापितः त्वया किंकुर्वता ? **गुणै**रौदार्यादिभिः **समस्य** समासं कृत्वा संयोज्य **इमां** शान्तताविनयोत्पादिकां **भारतीं** वाणीं **संपादयता** वदता व्याहरता इत्यर्थः । अथ समासः । समारोपितो भारो यस्य स समारोपितभारस्तस्य संबोधनं हे समारोपितभार ! । धुरं वहतीति धुर्यस्तस्य संबोधनं हे धुर्य ! । इति वृत्तार्थः ॥ ६ ॥

वाग्मितामेवाह -

प्रयुज्य सामाचरितं विलोभनं भयं विभेदाय धियः प्रदर्शितम् ।
तथाभियुक्तं च शिलीमुखार्थिना यथेतरन्न्याय्यमिवावभासते ॥ ७ ॥

'प्रयुज्य०' व्याख्या । हे किरात ! त्वया 'शान्तताविनययोगि०' [१३-३७] इत्यादिना **साम** सान्त्वोपायं **प्रयुज्यम् विलोभनं** प्रलोभनं 'मित्रमिष्टम्०' [१३-५१] इत्यादिना **आचरितं** संपादितमित्यर्थः । तथा **धियो** बुद्धे**र्विभेदाय** भेदनाय व्यामोहनाय इत्यर्थः । 'शक्तिरर्थपतिषु०' [१३-६१] इत्यादिना **भयं** भीतिं **प्रदर्शितं** च पुनः त्वया **शिलीमुखार्थिना** बाणार्थिना न तु न्यायार्थिना इति भावः । त्वयेति शेषः । 'नाभियोक्तुम्० [१३-५८] इत्यादिना **तथा अभियुक्तम्** अभिहतं **यथा इतरत्** न्यायादन्यत् **न्याय्यं** न्यायादनपेत**मिव अवभासते** शोभते अनेन वाग्मिनाम् अग्रेसरोऽसि इति भावः । अथ समासः । शिलीमुखस्यार्थोऽस्यास्तीति शिलीमुखार्थी तेन शि० । इति वृत्तार्थः ॥७॥

ततः किरातमाह -

विरोधि सिद्धेरिति कर्तुमुद्यतः स वारितः किं भवता न भूपतिः ।
हिते नियोज्यः खलु भूतिमिच्छता सहार्थनाशेन नृपोऽनुजीविना ॥ ८ ॥

'विरो०' व्याख्या । हे किरात ! **स भूपतिः** महादेवः **भवता** त्वया **किं** कथं **न वारितो** न निषिद्धः निषेधे किं कारणं तत्राह- किं० सः ? **इति** विरोधि **सिद्धेः** फलस्य **विरोधि** विरोधकारि कर्म इदमस्मदास्कन्दनरूपं कार्यं **कर्तुं** निष्पादयितुम् **उद्यतः** उद्युक्तः निवारणे हेतुमाह- किं० भवता ? **खलु** इति निश्चितं **भूतिमिच्छता** इहामुत्र श्रेयोऽर्थिना **अनुजीविना** सेवकेन **नृपो** भूपतिः **हिते नियोज्यः** नियम्यः किं० अनुजीविना ? **सहार्थनाशेन** स्वामितुल्यसुखदुःखेन अन्यथा स्वामिद्रोहपातकी श्रेयसो भ्रष्टः स्यादिति भावः । अथ समासः । सहचरितोऽर्थनाशो यस्य स सहार्थनाशस्तेन स० । इति वृत्तार्थः ॥८॥

तर्ह्यस्माकं बाणः क्व गतः किमत्र न्याय्यं तत्राह -

ध्रुवं प्रणाशः प्रहितस्य पत्रिणः शिलोच्चये तस्य विमर्शनं नयः ।
न युक्तमत्रार्यजनातिलङ्घनं दिशत्यपायं हि सतामतिक्रमः ॥ ९ ॥

'ध्रुवं०' व्याख्या । हे किरात ! **प्रहितस्य** प्रेषितस्य **पत्रिणः** बाणस्य **ध्रुवं** निश्चितं **प्रणाशः** अदर्शनं भवति स्मेति शेषः । **तस्य** नष्टबाणस्य **शिलोच्चये** पर्वते **विमर्शनं** विलोकनं **नयो** न्यायः **अत्र** विषये **आर्यजनातिलङ्घनं** सज्जनव्यतिक्रमो **न युक्तं** न घटमानं कृते सति किं भवतीत्याह- **हि** यस्मात् कारणात् **सतां** सत्पुरुषाणाम् **अतिक्रम**स्तिरस्कारः **अपायम्** अनर्थं नरकपतनादिकं वा **दिशति** ददाति अतः अविचारितं न वक्तव्यमिति भावः । अथ समासः । आर्यजनस्य अतिलङ्घनम् आ० । इति वृत्तार्थः ॥९॥

यदुक्तं 'हन्तुमर्हसि०' [१३-४१] इति तत्रोत्तरमाह -

अतीतसंख्या विहिता ममाग्निना शिलीमुखाःखाण्डवमत्तुमिच्छता ।
अनादृतस्यामरसायकेष्वपि स्थिता कथं शैलजनायुधे धृतिः ॥ १० ॥

'अती०' व्याख्या । हे किरात ! **अग्निना** वह्निना **मम अतीतसंख्याः** प्रचुराः **शिलीमुखाः** बाणा **विहिता** दत्ताः किं० अग्निना ? **खाण्डवं** वनम् **अत्तुं** भक्षयितुम् **इच्छता** वाञ्छता खाण्डवदाहे अक्षयतूणीरदानमुक्तं *भारते* अतो**ऽमरसायकेषु** देवबाणे**ष्वपि अनादृतस्य** अनादरपरस्य आस्थारहितस्येत्यर्थः । मम **शैलजनायुधे** भिल्लास्त्रे 'शैलजनाशुगे' इति पाठस्तत्र किरातबाणे **धृतिः** संतोषः आस्था **कथं स्थिता** न कथंचिदित्यर्थः । अतो नापहारशङ्का कार्या इत्यर्थः। एतदीयं बाणम् अस्पृश्यं कथमहं वह्निचित्तप्रसादको भूत्वा वाञ्छेयमिति भावः । अथ समासः । अतीता संख्या येभ्यस्ते अ० । अमराणां सायकाः अमरसायकास्तेष्व० । शैलजनस्य आयुधं शैलजनायुधं तस्मिन् शै० । इति वृत्तार्थः ॥१०॥

यदुक्तं 'स्मर्यते तनुभृताम्०' [१३-४२] इत्यादिना सदाचारः प्रमाणमिति तत्रोत्तरमाह -

यदि प्रमाणीकृतमार्यचेष्टितं किमित्यदोषेऽपि तिरस्कृता वयम् ।
अयातपूर्वा परिवादगोचरं सतां हि वाणी गुणमेव भाषते ॥ ११ ॥

'यदि०' व्याख्या । हे किरात ! **यदि आर्यचेष्टितं** सच्चरित्रं **प्रमाणीकृतं** साधुत्वेन अङ्गीकृतं तर्हि **अदोषेऽपि** दोषाऽभावेऽपि क्वचित् प्रसज्यनिषेधेऽपि [नञ्समासः ।] **वयं किमिति** कथं **तिरस्कृताः** धिक्कृताः एतत्तव न युक्तमित्यर्थः । **हि** यस्मात् कारणात् **सतां** सज्जनानां **वाणी** वचनं **गुणमेव भाषते** ब्रूते न तु दोषं किं० वाणी ? **परिवादगोचरं** परनिन्दास्पदं परापवादविषयम् **अयातपूर्वा** पूर्वं न याता परदोषकीर्तने पूर्वं न गतेत्यर्थः । अथ समासः । आर्याणां चेष्टितम् आ० । दोषाऽभावोऽदोषस्तस्मिन् अदोषे । पूर्वं न याता अयातपूर्वा । परिवादस्य गोचरः परिवादगोचरः तं प० । इति वृत्तार्थः ॥११॥

नन्वप्रत्यक्षा बुद्धिः कथं दुष्टेति निश्चीयते तत्राह -

गुणापवादेन तदन्यरोपणैर्भृशाधिरूढस्य समञ्जसं जनम् ।
द्विधेव कृत्वा हृदयं निगूहतः स्फुरन्नसाधोर्विवृणोति वागसिः ॥ १२ ॥

'गुणा०' व्याख्या । हे किरात ! **वागसिः** वाक्खड्गः असौ घोर[:] सज्जनस्य **हृदयं** चित्तं **द्विधा कृत्वा** भित्त्वेव **विवृणोति** प्रकटयति तदन्तर्गतभावं प्रत्यक्षीकृत्य प्रदार्यतीत्यर्थः । तरवारिरपि किमपि वस्तु द्विधा कुर्वन् सन् विवृणोति । किंकुर्वन् वागसिः ? **स्फुरन्** विलसन् किंकुर्वतः ? **असाधोः** हृदयं निजं चित्तं **निगूहतः** आच्छादयतः किं० असाधोः ? **गुणापवादेन** सद्गुणाच्छादनेन **तदन्यरोपणैः** असद्दोषारोपणैश्च **समंजसं जनं** सज्जनं लोकं **भृशाधिरूढस्य** अतिमात्रमाक्रम्य स्थितस्य अभिक्षिप्तस्येत्यर्थः । अथ समासः । गुणानामपवादः गुणापवादस्तेन गु० । तेभ्योऽन्ये तदन्ये तदन्येषां रोपणानि तदन्यरोपणानि तैस्त० । भृशमधिरूढः भृशाधिरूढस्तस्य भृ० । वागेवासिः वागसिः । इति वृत्तार्थः ॥१२॥

'अभ्यघानि मुनिचापलाद्०' [१३-६३] इत्यादिना यदुक्तं तत्तवानुचितमित्याह -

वनाश्रयाः कस्य मृगाः परिग्रहाः शृणाति यस्तान्प्रसभेन तस्य ते ।
प्रहीयतामत्र नृपेण मानिता न मानिता चास्ति भवन्ति च श्रियः ॥ १३ ॥

'वना०' व्याख्या । हे किरात ! **वनाश्रयाः** वनवासिनो **मृगाः** वराहहरिणादयः **कस्य परिग्रहाः** [? न कस्यापीत्यर्थः । किन्तु **यस्तान्** मृगान् **प्रसभेन** बलात्कारेण **शृणाति** हिनस्ति 'शॄ हिंसायाम्' इति धातुः । **ते** मृगाः **तस्य** हन्तुः **परिग्रहाः** परिग्राह्याः] हन्ता चाहमेवेति भावः । ननु ममायं मृगः इत्यभिमानात् नृपस्य स्वत्वम् इत्याशङ्क्याह- तस्मात् कारणात् **अत्र** मृगे **नृपेण** राज्ञा **मानिता** ममेत्यभिमानः अहंकारिता वा **प्रहीयतां** त्याज्यतां कुत इत्याशङ्क्याह- अत्र **च**कारः चेदर्थे चेत् यदि **मानितास्ति** तर्हि **श्रियो** लक्ष्म्यो **न भवन्ति** अथ चेत् मानिता न तर्हि श्रियो भवन्तीत्यर्थः । अथ समासः । वनमाश्रयो येषां ते वनाश्रयाः । इति वृत्तार्थः ॥ १३ ॥

'यष्टुमिच्छसि पितॄन्०' [१३-६४] इत्यादिना यन्निष्कारणमवधीरित्युपालब्धं तत्रोत्तरमाह -

न वर्त्म कस्मैचिदपि प्रदीयतामिति व्रतं मे विहितं महर्षिणा ।
जिघांसुरस्मान्निहतो मया मृगो व्रताभिरक्षा हि सतामलङ्क्रिया ॥ १४ ॥

'न वर्त्म०' व्याख्या । हे किरात ! **मे** मह्यं **महर्षिणा** कृष्णद्वैपायनेन **इत्य**मुना प्रकारेण **व्रतं विहितं** दत्तम् उपदिष्टम् इत्यर्थः । इतीति किम् ? यत्त्वया **कस्मैचिदपि वर्त्म** मार्गो **न प्रदीयतां** न प्रदातव्यम् **अस्माद्**धेतोः **मया** [**मृगः**] अयं शूकरः **जिघांसुरस्मान्** मां हन्तुमिच्छुः आपतन् आगच्छन्

1. रोपणाद् -म. इदं च पा.

१. 'वागसिः' इत्यत्र रूपकं द्विधाकरणरूपकसाधकम् -म. ।

निहतो मारितः **हि** यस्माद्धेतोः **व्रताभिरक्षा** व्रतसंरक्षणं **सतां** सत्पुरुषाणाम् **अलङ्क्रिया** अलङ्कारो भवति न तु दोषः अतः स्वऋणरक्षार्थमयं वधो विहितो न निष्कारणम् इति भावः । अथ समासः । व्रतस्याभिरक्षा व्रताभिरक्षा। इति वृत्तार्थः ॥१४॥

'दुर्वचं तद्०' [१३-४९] इत्यादिना यदजनि बन्धुत्वम् उक्तं तत्राह -

मृगान्विनिघ्नन्मृगयुः स्वहेतुना कृतोपकारः कथमिच्छतां तपः ।
कृपेति चेदस्तु मृगः क्षतः क्षणादनेन पूर्वं न मयेति का गतिः ॥ १५ ॥

'मृगा०' व्याख्या । हे किरात ! **स्वहेतुना** स्वार्थपरतया स्वकार्येण वा **मृगान्** हरिणादीन् **विनिघ्नन्** प्रहरन् व्यापादयन् **मृगयुः** व्याधो **तपः इच्छतां** तपस्विनां **कृतोपकारः** विहितोपकृतिः **कथं** भवेत् न कथंचिदित्यर्थः । अथ **चेत्** व्याधस्य **कृपेति** मन्यसे तर्हि [**अस्तु**] कृतं मया सह निष्कारणकलहेनेति भावः । परन्तु यदुक्तं 'निघ्नतः परनिबर्हितम्०' [१३-४६] इत्यादिना तस्य प्रथमप्रहर्तृत्वं तदयुक्तमित्याह- **मृगो** वराहः **क्षणात्** क्षणेन **क्षतो** मारितः आवाभ्यां युगपदेव विद्ध इत्यर्थः । एवं **सत्यनेन** नृपेणैव **पूर्वं** प्रथमं हतो **न मया इति का गतिः** इत्यत्र किं प्रमाणं पौर्वापर्यस्य दुर्ल्लक्ष्यत्वादिति भावः । तथा च 'व्रीडितव्यम्०' [१३-४६] इत्याद्युपालम्भस्तस्यैव नृपस्यैव किं न स्यादिति भावः । अथ समासः । मृगान् यातीति मृगयुः उणादिको युप्रत्ययान्तो निपातः । स्वस्य हेतुः स्वहेतुः तेन स्व० । कृत उपकारो येन सः कृतोपकारः। इति वृत्तार्थः ॥ १५ ॥

पूर्वं 'कृपेति चेदस्तु०' [का० १५] इत्युक्तं संप्रति तदप्यसहमान आह -

अनायुधे सत्त्वजिघांसिते मुनौ कृपेति वृत्तिर्महतामकृत्रिमा ।
शरासनं बिभ्रति सज्यसायकं कृतानुकम्पः स कथं प्रतीयते ॥ १६ ॥

'अना०' व्याख्या । हे किरात ! **अनायुधे** आयुधरहिते **सत्त्वजिघांसिते** एवंविधे केनचित् दुष्ट-सत्त्वेन प्राणिना हन्तुमिष्टे एवंविधे **मुनौ** साधौ **कृपा** दयेति **वृत्तिर्व्यवहारः महताम्** उत्तमानाम् **अकृत्रिमा** अकपटा स्वाभाविकी वर्तते । **सज्यसायकं** प्रत्यञ्चायुक्तबाणं **शरासनं** धनुः **बिभ्रति** दधति मयि विषये **स** सेनापतिः **कृतानुकम्पः** कृतकृपः **कथं प्रतीयते** कथं ज्ञायते न कथमपीत्यर्थः । अक्षमे कृपोचिता न तु क्षमे मल्लक्षणे मुनावित्यर्थः । अथ समासः । न विद्यते आयुधं यस्यासौ अनायुधस्तस्मिन् अ० । सत्त्वेन जिघांसितः सत्त्वजिघांसितस्तस्मिन् स० । न कृत्रिमा अ० । शराः अस्यन्ते क्षिप्यन्ते अनेनेति शरासनम् इति वाक्यम् । ज्यया सह वर्तते यः स सज्यः सज्यः सायको यस्मिन् तत् स० । कृता अनुकम्पा येन स कृ०। इति वृत्तार्थः ॥ १६ ॥

अथ कृपामभ्युपगम्याह -

अथो शरस्तेन मदर्थमुज्झितः फलं च तस्य प्रतिकायसाधनम् ।
अविक्षते तत्र मयात्मसात् कृते कृतार्थता नन्वधिका चमूपतेः ॥ १७ ॥

'अथो०' व्याख्या । हे किरात । **अथो** इति प्रश्ने **तेन** सेनापतिना यदि **शरो** बाणः **मदर्थ**मस्मदनु-कम्पार्थम् **उज्झित**स्त्यक्तः तर्हि **तस्य** शरस्य **प्रतिकायसाधनं** शत्रुमारणं **फलं** सार्थकत्वं जातम् **अविक्षते** अभग्ने कृतकार्य इति यावत् । **तत्र** तस्मिन् बाणे **मया आत्मसात् कृते** स्वाधीनीकृते सति **नन्विति** निश्चितं **चमूपतेः कृतार्थता अधिका** अधिकगुणा जाता । [अथ] समासः । प्रतिकायस्य साधनं प्र० । कृतार्थस्य भावः कृ० । चमूनां पतिश्चमूपतिस्तस्य च० । इति वृत्तार्थः ॥ १७ ॥

'मार्गणैरथ तव प्रयोजनम्०' [१३-५९] इति यदुक्तं तत्रोत्तरमाह -

यदात्थ कामं भवता स याच्यतामिति क्षमं नैतदनल्पतेजसाम् ।
कथं प्रसह्याहरणैषिणां प्रियाः परावनत्या मलिनीकृताः श्रियः ॥ १८ ॥

'यदात्थ०' व्याख्या । हे किरात ! **यत्** त्वम् इति माम् **आत्थ** कथयसि **इती**ति किं ? **भवता** त्वया सेनापतिः **कामं** वाञ्छतः **याच्यतां** प्रार्थ्यताम् **एतद्** भवदुक्तम् **अनल्पतेजसां** मानिनां **न क्षमं** न योग्यं महान्तोऽन्यं न याचन्ते इत्यर्थः । तत्र हेतुमाह- **प्रसह्याहरणैषिणां** बलात्कारेण ग्रहीतुकामानाम् अस्मदादीनां क्षत्रियाणां **परावनत्या** परप्रणामेन परयाच्ञादैन्येन वा **मलिनीकृताः** मलिनीभूताः **श्रियः** लक्ष्म्यः **कथं प्रियाः** कथमिष्टाः न किंचिदित्यर्थः । वयं राजानः हठाद्मर्तुमिच्छामः परं न याचामहे इति भावः । याच्ञाप्राप्तं क्षत्रियस्य निन्दितमिति स्मरणादिति । याच्ञया या लक्ष्मीः प्राप्यते सा माभूदित्यर्थः। अथ समासः। नाल्पमनल्पमनल्पं तेजो येषां ते अनल्पतेजसस्तेषामन० । प्रसह्याहरण-मिच्छन्तीत्येवंशीलाः प्रसह्याहरणैषिणस्तेषां प्र० । परेषामवनतिः परावनतिः तया प० । अमलिनाः मलिनीकृताः इति म० । इति वृत्तार्थः ॥ १८ ॥

अभूतमासज्य विरुद्धमीहितं बलादलभ्यं तव लिप्सते नृपः ।
विजानतोऽपि ह्यनयस्य रौद्रतां भवत्यपाये परिमोहिनी मतिः ॥ १९ ॥

'अभूत०' व्याख्या । हे किरात ! **तव** भवतः **नृपो** राजा **अलभ्यं** लब्धुमशक्यं **विरुद्धं** विपरीतफलकम् **ईहितम्** ईप्सितं मनोरथं **बलात्** कारेण **लिप्सते** प्राप्तुं वाञ्छति किंकृत्वा ? मयि विषये **अभूतम्** असत्यम् अविद्यमानम् **आसज्य** आरोप्य नैतच्चित्रं **हि** यस्मात् कारणात् **अनयस्य** अन्यायस्य **रौद्रतां** भीषणतां दुष्टपरिपाकं **विजानतोऽपि** विशेषेण जानतोऽपि जनस्य **मति**र्बुद्धिः **अपाये** विनाशकाले **परिमोहिनी** विपरीता **भवति** प्रायेण विनाशकाले विपरीतबुद्धिर्भवति इति भावार्थः अथ समासः । न नयोऽनयस्तस्य अ० । रौद्रस्य भावो रौद्रता तां रौ० । परिमुह्यतीति प० । इति वृत्तार्थः ॥१९॥

अथ सर्वथा लभ्यते शरस्तर्हि किमनेनाऽन्यदपि याच्यताम् इत्याह -

असिः शरा वर्म धनुश्च नोच्चकैर्विविच्य किं प्रार्थितमीश्वरेण ते ।
अथास्ति शक्तिः कृतमेव याच्ञया न दूषितः शक्तिमतां स्वयंग्रहः ॥ २० ॥

असि० व्याख्या । हे किरात ! **ते** तव **ईश्वरेण** त्वत्स्वामिना **उच्चकै**रत्यर्थं **किं न प्रार्थितं** किं

न याचितं किंकृत्वा ? **असिः** खड्गः **च** पुनः **शरा** बाणाः पुन**र्वर्म** सन्नाहं पुन**र्धनु**श्चापं **विविच्य** एकैकशो विभज्य येषां मध्ये तव स्वामिनः प्रयोजनं तदेकैकशः याच्यतां तद्दास्यामीति भावः । **अथ** अथवा यदि **शक्तिः** सामर्थ्य**मस्ति** तर्हि **याच्ञया** प्रार्थनया **कृतमेव** पूर्यता मृतमेवेत्यर्थः । साध्याभावान्न याचितव्यमित्यर्थः । यतः **शक्तिमतां** सामर्थ्यवतां **स्वयंग्रहः** बलात्कारेण ग्रहणं **न दूषितः** न निन्दितः वीराणां स्वयंग्रहो भूषणमेवेति भावः । अथ समासः । शक्तयो विद्यते येषां ते शक्तिमन्तस्तेषां श० । इति वृत्तार्थः ॥२०॥

अथ 'राघवप्लवगराजयोरिव' [१३-५७] इत्यादिनोपदिष्टं सख्यं पराचष्टे -
तेन सह तव मैत्रीयुक्तेति तस्योत्तरमाह -

सखा स युक्तः कथितः कथं त्वया यदृच्छयाऽसूयति यस्तपस्यते ।
गुणार्ज्जनोच्छ्रायविरुद्धबुद्धयः प्रकृत्यमित्रा हि सतामसाधवः ॥ २१ ॥

'सखा०' व्याख्या । हे किरात ! **त्वया स** नृपः **युक्तः** योग्यः **सखा** मित्रं **कथं कथितः** प्रतिपादितः कुतो नेत्याशङ्क्याह- स० कः ? नृपः **तपस्यते** तपः कुर्वते अनपराधिन इत्यर्थः । तपोधनाय **यदृच्छया** स्वेच्छया स्वैरवृत्या निष्कारणमिति यावत् **असूयति** ईर्ष्यां करोति एवंविधेन भवत्स्वामिना सार्धं कथं सख्यं युक्तिमत् । प्रत्युत शत्रुरेवायमित्याह- **हि** यस्माद्धेतोः **सतां** सज्जनानां [**प्रकृत्यमित्रा** प्रकृत्या शत्रवः] **असाधवः** [दुष्टाः] **गुणार्ज्जनोच्छ्रायविरुद्धबुद्धयः** गुणोपार्जनोत्कर्षे दुष्टबुद्धयः । अथ समासः । तपः कुर्वति तपस्यति तपस्यतीति तपस्यन् तस्मै त० । गुणानामर्जनं गुणार्जनं गुणार्ज्जनेन उच्छ्रायः गुणार्जनोच्छ्रायः गुणार्जनोच्छ्रायस्य विरुद्धा बुद्धिर्येषां ते गु० । प्रकृत्या अमित्राः प्र० । इति वृत्तार्थः ॥२१॥

किं च अन्यदपि कारणमस्ति हीनजातिवृत्तित्वादपि सखा न भवतीत्याह -

वयं क्व वर्णाश्रमरक्षणोचिताः क्व जातिहीना मृगजीवितच्छिदः ।
सहा[1]वकृष्टैर्महतां न संगतं भवन्ति गोमायुसखा न दन्तिनः ॥ २२ ॥

'वयं०' व्याख्या । हे किरात ! **वयं** सद्वृत्तयो राजानः **क्व** वर्तामहे किं० वयम् ? 'वर्णाश्रम-रक्षणोचिताः' **वर्णा** द्विजक्षत्रियवैश्यक्षुद्राः **आश्रमाः** ब्रह्मचारिगृहस्थवानप्रस्थयतयः तेषां **रक्षणे** पालने **उचिता** योग्याः **जातिहीनाः** हीनजातीयाः हिंसाजीविनः किरातादयः क्व किं० जातिहीनाः ? **मृगजीवितच्छिदः** मृगमारकाः फलितार्थमाह- **अवकृष्टैः** नीचैः जात्या वृत्त्या च निकृष्टैः हीनैः **सह** सार्द्धं महतां जात्या वृत्त्या **महतां** चोत्तमानां **संगतं** सख्यं न घटते । उक्तमर्थं समर्थयति-**दन्तिनः** गजाः **गोमायुसखाः** शृगालमित्रा **न भवन्ति** यथा दन्तिनो गोमायवः सखायो न स्युः तथास्माकं भिल्लाः मित्राणि न भवेयुरिति भावः । अथ समासः । वर्णाश्च आश्रमाश्च वर्णाश्रमाः वर्णाश्रमाणां रक्षणं

1. सहाप० -म. इदं च पा० ।

वर्णाश्रमरक्षणं वर्णाश्रमरक्षणे उचिता: व०। जात्या हीना जातिहीना: । मृगाणां जीवितं मृगजीवितं मृगजीवितं **च्छिदन्तीति** मृ० । गोमायूनां सखाय: इति गो० । दन्ता: सन्तीति दन्तिन: [गजा:] इति रूढि: पङ्कजवत्। इति वृत्तार्थ: ॥ २२ ॥

नीच: सखा कथमधिक्षिप्यत इति चेत् तत्राह-

परोऽवजानाति यदज्ञताजडस्तदुन्नतानां न विहन्ति धीरताम् ।
प्रतीतवीर्यान्वयपौरुषेषु य: करोत्यतिक्रान्तिमसौ तिरस्क्रिया ॥ २३ ॥

'परो०' व्याख्या । हे किरात ! **अज्ञताजड:** अज्ञतया मूर्ख: अविवेकीत्यर्थ: । **पर:** पृथग्जन: **यत् अवजानाति** अवगणयति अवज्ञां करोतीत्यर्थ: । **तत् उन्नतानाम्** उत्तमानां **धीरतां** धैर्यं **न विहन्ति** न नाशयति नीचवचनै: महान्तो न क्षुभ्यन्तीति भाव: । किन्तु एतत् न सन्देहे ते तत्किम् । इत्याह- **य:** पुमान् **प्रतीतवीर्यान्वयपौरुषेषु** विख्याते बलवंशविक्रमेषु मध्ये **अतिक्रान्तिम्** अतिक्रमणं **करोति असौ तिरस्क्रिया** भवति । यथा शृगाल: कण्ठीरवस्यातिक्रान्तिं करोति तदा कण्ठीरवस्य परिभवो न किन्तु कण्ठीरवेण कण्ठीरवस्यातिक्रान्ति: क्रियते तदा कण्ठीरवस्य परिभव इति भाव: । अथ समास: । अज्ञतया जड: अ० । धीरस्य भावो धीरता तां धी० । वीर्यं च अन्वयश्च पौरुषं च वीर्यान्वयपौरुषाणि प्रतीतानि वीर्यान्वयपौरुषाणि येषां ते प्रतीतवीर्यान्वयपौरुषास्तेषु प्र० । इति वृत्तार्थ: ॥ २३ ॥

तर्हि नीचे कीदृशी वृत्तिरित्याशङ्क्य सोपपत्तिकमाह -

यदा विगृह्णाति हतं तदा यश: करोति मैत्रीमथ दूषिता गुणा: ।
स्थितिं समीक्ष्योभयथा परीक्षक: करोत्यवज्ञोपहतं पृथग्जनम् ॥ २४ ॥

'यदा०' व्याख्या । हे किरात ! **परीक्षको** विवेकिजन: **उभयथा** उभयप्रकारेण **स्थितिं** मर्यादां **समीक्ष्य** विचार्य **पृथग्जनं** नीचजनम् **अवज्ञोपहतम्** आदरेण रहितं **करोति** उपेक्षितं करोतीत्यर्थ: । तत्कथमित्याह - **यदा** पृथग्जनै: सह **विगृह्णाति** विग्रहं करोति **तदा यशो हतं** विनाशितं भवेत् यशो नश्यतीत्यर्थ: । अथवा यदा **मैत्रीं** पृथग्जनै: सह करोति तदा **गुणा: दूषिता:** भवेयु: गुणा हता इत्यर्थ: । इत्युभयथापि स्थितिं समीक्ष्य विवेकी पुमान् अवज्ञोपहतं पृथग्जनं करोतीति वाक्यार्थ: । अथ समास: । परीक्षां करोतीति परीक्षक: । अवज्ञयोपहतोऽवज्ञोपहतस्तम् अ० । इति वृत्तार्थ: ॥ २४ ॥

उक्तवाक्यमुपसंहरन्नाह -

मया मृगान्हन्तुरनेन हेतुना विरुद्धमाक्षेपवचस्तितिक्षितम् ।
शरार्थमेष्यत्यथ लप्स्यते गतिं शिरोमणिं दृष्टिविषात् जिघृक्षत: ॥ २५ ॥

'मया०' व्याख्या । हे किरात ! **अनेन हेतुना** अनेन संधिविग्रहानर्हत्वेन कारणेन **मया मृगान् हन्तु:** व्याधस्य संबन्धि **विरुद्धं** विरोधयुक्तं निष्ठुरमपि **आक्षेपवच:** तिरस्कारवचनं **तितिक्षितं** क्षमितं ननु सख्यानङ्गीकारे बलाच्छरं ग्रहीतुम् एष्यति इत्याशङ्क्याह- **अथ शरार्थं** बाणार्थं यदि **एष्यति** आयास्यति

तर्हि **दृष्टिविषात्**सर्पात् **शिरोमणिं** शिरोरत्नं **जिघृक्षतो** ग्रहीतुमिच्छोः पुंसः **गतिं** दशां **लप्स्यते** प्राप्नोति । अथ समासः । आक्षेपस्य वचः आक्षेपवचः । इति वृत्तार्थः ॥ २५ ॥

इतीरिताकूतमनीलवाजिनं जयाय दूतः प्रतितर्ज्य तेजसा ।
ययौ समीपं ध्वजिनीसमेयुषः प्रसन्नरूपस्य विरूपचक्षुषः ॥ २६ ॥

'इती०' व्याख्या । **अथा**नन्तरं **दूतः** किरातः **विरूपचक्षुषः** महादेवस्य **समीपं** पार्श्वं **ययौ** जगाम किं० विरूपचक्षुषः ? **प्रसन्नरूपस्य** अर्जुनं प्रति प्रसादाभिमुखस्य पुनः किं० वि० ? **ध्वजिनीं** सेनां **समेयुषः** संगतस्य मिलितस्येत्यर्थः । किंकृत्वा ? **इति** पूर्वोक्तप्रकारेण **ईरिताकूतम्** उक्ताभिप्रायम् **अनीलवाजिनं** श्वेताश्वमर्जुनं **जयाय** जयार्थं **तेजसा** प्रतापेन **प्रतितर्ज्य** निर्भत्स्य अस्मान् अजित्वा क्व प्रयास्यसीति भाषित्वेत्यर्थः । अथ समासः । ईरितमाकूतं येन स ईरिताकूतस्तम् ई० । अनीला वाजिनो यस्य सोऽनीलवाजी तम् अ० । प्रसन्नं रूपं यस्य स प्रसन्नरूपस्तस्य प्र० । इति वृत्तार्थः ॥ २६ ॥

ततोऽपवादेन पताकिनीपतेश्चचाल निर्ह्लादवती महाचमूः ।
युगान्तवाताभिहतेव कुर्वती निनादमम्भोनिधिवीचिसंहतिः ॥ २७ ॥

'ततो०' व्याख्या । **ततो** दूतागमनानन्तरं **पताकिनीपतेः** सेनापतेर्महादेवस्य **अपवादेन** आदेशेन आज्ञया 'अपवादोऽथ आदेश' इति *सज्जनः* । **महाचमूः** महासेना **चचाल** प्रतस्थे अर्जुनं प्रति प्रयाणं चकारेत्यर्थः । किं० महाचमूः ? **निर्ह्लादवती** शब्दायमाना केव ? **अम्भोनिधिवीचिसंहतिरिव** यथा समुद्रकल्लोलमाला चलति किं० अम्भोनि० ? **युगान्तवाताभिहता** कल्पान्तवातक्षुभिता किंकुर्वती अम्भोनि० ? **निनादं** शब्दं **कुर्वती** कुर्वाणा किं० सेना ? 'युगान्तवाताभिहता' **युगान्ते** प्रलयकाले यो **वातः** तेन **अभिहता** आन्दोलिता पुनः किं० सेना ? अत एव निनादं ध्वनिं कुर्वतीति । अथ समासः । पताकिन्याः पतिः पताकिनीपतिस्तस्य प० । निर्ह्लादोऽस्या अस्तीति नि० । महती चासौ चमूश्च म० । युगान्तस्य वातः युगान्तवातः तेन अभिहताः यु० । अम्भोनिधेर्वीचयः अम्भोनिधिवीचयः तासां संहतिः अ० । इति वृत्तार्थः ॥ २७ ॥

रणाय जेतुः प्रदिशन्निव त्वरां तरङ्गितालम्बितचिह्न[1]संहतिः ।
पुरो बलानां सघनाम्बुशीकरः शनैः प्रतस्थे सुरभिः समीरणः ॥ २८ ॥

'रणाय०' व्याख्या । **सुरभिः** सुगन्धिः **समीरणो** वायुः **बलानां** सैन्यानां **पुरो**ऽग्रे **शनैः** मन्दं मन्दं **प्रतस्थे** ययौ शनैरित्यनेन वायोः सुखकारित्वं सूचितम् । किं० समीरणः ? **सघनाम्बुशीकरः** मेघजलकणसहितः इत्यनेन शीतत्वं सुरभिरिति अनेन सौरभ्यं तरङ्गितातिमेघं च दर्शितम् । पुनः किं० समीरणः ? उत्प्रेक्ष्यते **जेतु**र्महादेवस्य **रणाय** संग्रामाय **त्वराम्** उत्सुकतां **प्रदिशन्निव** ददिव रणार्थं बलानि चलन्त्विति । लोकेऽपि कस्मैचित्कार्याय कंचित्पुरुषं त्वरयन् कश्चित्पुरश्चलतीति ध्वनिः । क्वचित्

1. ०केतु० -म. इदं च पा.

जेतुःस्थाने 'जैत्रः'[1] इति पाठः तत्र जेतैव जैत्रो जयनशीलोऽनुकूल इत्यर्थः । पुनः किं० समी० ? **तरङ्गितालम्बितचिह्नसंततिः** संजाततरङ्गं यथा स्यात्तथा आलम्बिता अवस्थिता चिह्नसंहतिर्ध्वजसमूहो येन स तथा । अथ समासः । तरङ्गाः संजातास्तरङ्गितं चिह्नानां संततयः चिह्नसंततयः तरङ्गितमालम्बिताश्चिह्नसंततयो येन स त० । घनाश्च ते अम्बुशीकराश्च घनाम्बुशीकराः सह घनाम्बुशीकरैर्वर्तते यः स स० । इति वृत्तार्थः ॥ २८ ॥

जयारवक्ष्वेडितनादमूर्च्छितः शरासनज्यातलवारणध्वनिः ।
असंभवन् भूधरराजकुक्षिषु प्रकम्पयन् गामवतस्तरे दिशः ॥ २९ ॥

'जया०' व्याख्या । 'शरासनज्यातलवारणध्वनिः' **शरासनानां** धनुषज्यानां गुणानां **तलवारणानां** ज्याघातवारणानां **ध्वनिः** शब्दः चापमौर्वीतलगजध्वनिः इत्यर्थः । **दिश** आशाः **अवतस्तरे** व्यानशे व्यापेत्यर्थः । किं० शरासन० ? **जयारवक्ष्वेडितनादमूर्च्छितः** बन्दिनां मङ्गलपाठकानां जयशब्दैः सिंहनादैश्च वर्धितः किंकुर्वन् शरासन० ? **भूधरराजकुक्षिषु** हिमाचलगुहासु **असंभवन्** अमान् अवकाशमलभमान इत्यर्थः । पुनः किंकुर्वन् शरा० ? अत एव **गां** भुवं **प्रकम्पयन्** एतेन बलीनां बाहुल्यमुक्तम्[१] । अथ समासः । जयारवाश्च क्ष्वेडितनादाश्च जयारवक्ष्वेडितनादाः तैर्मूर्च्छितः ज० । शरासनस्य ज्याः शरासनज्याः शरासनज्याश्च तलानि च वारणाश्च शरासनज्यातलवारणास्तेषां ध्वनिः श० । संभवतीति संभवन् न संभवन् अ० । भूधराणां राजा भूधरराजः तस्य कुक्षयः भूधरराजकुक्षयस्तेषु भू० । इति वृत्तार्थः ॥२९॥

निशातरौद्रेषु विकाशतां गतैः प्रदीपयद्भिः ककुभामिवान्तरम् ।
वनेसदां हेतिषु भिन्नविग्रहैर्विपुस्फुरे रश्मिवतो मरीचिभिः ॥ ३० ॥

'निशात०' व्याख्या । **रश्मिवतो** रवेः **मरीचिभिः** किरणैः **वनेसदां** वनेचराणां **हेतिषु** आयुधेषु **विपुस्फुरे** स्फुरितं बभासे इत्यर्थः । किं० मरीचिभिः ? **भिन्नविग्रहैः** संक्रान्तमूर्तिभिः 'हेतिः शस्त्रेऽपि नृस्त्रियोः' इति *केशवः* । किं० हेतिषु ? **निशातरौद्रेषु** तीक्ष्णभीषणेषु पुनः किं० म० ? **विकाशतां गतैः** विकश्वरतां प्राप्तैः पुनः किं० म० ? **ककुभां** दिशाम् **अन्तरं** मध्यं **प्रदीपयद्भिरिव** विकाशयद्भिरिव स्थितैः । अथ समासः । निशाताश्च रौद्राश्च निशातरौद्रास्तेषु नि० । विकाशस्य भावो विकाशता तां वि० । वने सीदन्तीति वनेसदस्तेषां व० । भिन्नाः विग्रहा येषां ते भिन्नविग्रहास्तैर्भि० । रश्मयो विद्यन्ते यस्य स रश्मिवान् तस्य र० । इति वृत्तार्थः ॥ ३० ॥

उदूढवक्षःस्थगितैकदिङ्मुखो विकृष्टविस्फारितचापमण्डलः ।
वितत्य पक्षद्वयमापतन् बभौ विभुर्गणानामुपरीव मध्यगः ॥ ३१ ॥

---

1. अयं पाठः म. मध्ये ।

---

१. अत्र 'मूर्छा' पदार्थस्य विशेषणगत्याऽसंभवनहेतुत्वात्काव्यलिङ्गं, रूपकं तु गिरिकुक्षिरूपापेक्षया ध्वनेराधेयस्याधिक्योक्तेरधिकालंकारश्च । तेभ्यश्चेयमसंभवन्निति व्यञ्जकं विनोत्थाप्यमानोपात्तमूर्छागुणनिमित्ता प्रतीयमाना क्रियोत्प्रेक्षा तैरङ्गाङ्गिभावेन संकीर्यत इति संकरः -म.

'उदूढ०' व्याख्या । **विभुरीश्वरः गणानां** प्रमथादीनां **मध्यगः** मध्यस्थितोऽपि **उपरीव** उपरिष्टात् स्थित इव तदा **बभौ** शुशुभे तदेति शेषः । सर्वोन्नतत्वात् तथा लक्षित इत्यर्थः । विभुः किंकुर्वन् ? **पक्षद्वयं** सेनाद्वयं **वितत्य** विस्तार्य **आपतन्** आगच्छन् किं० विभुः ? **उदूढवक्षःस्थगितैकदिङ्मुखः** उन्नतहृदयाच्छादितैकदिङ्मुखः विशालवक्षा इत्यर्थः । पुनः किं० वि० ? **विकृष्टविस्फारितचापमण्डलः** आकृष्टनिर्घोषितकोदण्डमण्डलः । अथ समासः । उदूढं च तद् वक्षश्च उदूढवक्षः उदूढवक्षसा स्थगितमेकदिङ्मुखं येन स उदूढ० । विकृष्टं विस्फारितं चापमण्डलं येन स विकृष्ट० । पक्षयोर्द्वयं प० । इति वृत्तार्थः ॥ ३१ ॥

सुगेषु दुर्गेषु च तुल्यविक्रमैर्जवादहंपूर्विकया यियासुभिः ।
गणैरविच्छेदनिरुद्धमाबभौ वनं निरुच्छ्वासमिवाकुलाकुलम् ॥ ३२ ॥

'सुगे०' व्याख्या । **वनं** काननम् **आबभौ** विरराज किं० वनम् ? **गणैः** प्रमथादिगणैः 'अविच्छेदनिरुद्धम्' **अविच्छेदेन** विभागेन **निरुद्धम्** आवृत्तं निरन्तरव्याप्तमित्यर्थः । पुनः किं० वनम् ? अत एव **आकुलाकुलम्** आकुलप्रकारं 'प्रकारे गुणवचनस्य' [पा. ८-१-१२] इति द्विर्भावः । पुनः किं० वनम् ? उत्प्रेक्ष्यते **निरुच्छ्वासमिव** निरुद्धप्राणमिव स्थितं किं० गणैः ? **सुगेषु** समप्रदेशेषु **दुर्गेषु** विषमप्रदेशेषु **च तुल्यविक्रमैः** समानपराक्रमैः शरीरलाघवात् विषमसमस्थलेषु समसंचारैरित्यर्थः । पुनः किं० गणैः ? **जवात्** वेगात् **अहंपूर्विकया** अहमहमिकया **यियासुभिः** गन्तुकामैः यातुमिच्छुभिः । अथ समासः । क्वचित् 'सुखेषु' पाठः तत्र सुखेन गच्छतीति सुखास्तेषु सुखेषु । सुष्ठु गच्छतीति सुगाः तेषु सु० । दुःखेन गच्छतीति दुर्गास्तेषु दु० । तुल्यो विक्रमो येषां ते तुल्यविक्रमास्तैस्तु० । अविच्छेदेन निरुद्धम् अ० । आकुलादाकुलम् आ० । इति वृत्तार्थः ॥ ३२ ॥

तिरोहितश्वभ्रनिकुञ्जरोधसः समश्नुवानाः सहसातिरिक्तताम् ।
किरातसैन्यैरपिधाय रेचिता भुवः क्षणं निम्नतयेव भेजिरे ॥ ३३ ॥

'तिरो०' व्याख्या । **भुवः** भूमयः **क्षणं** क्षणमात्रं **निम्नतयैव** गाम्भीर्येणैव **भेजिरे** सेविता आश्रिता इत्यर्थः । किं० भुवः ? **किरातसैन्यैः** भिल्लकटकैः **अपिधाय** आच्छाद्य **रेचिता** मुक्ता रिक्तीकृता इत्यर्थः । पुनः किं० भुवः किरातसैन्यैः ? **तिरोहितश्वभ्रनिकुञ्जरोधसः** आच्छादितगर्तगह्वरतटाः 'गर्तश्वभ्रावटा ऽगाधः' इति *हैमः* [१३६४] । पुनः किं० भुवः ? अत एव **अतिरिक्तताम्** उन्नततां **सहसा** झटिति **समश्नुवानाः** श्नुत्यतां वा व्याप्नुवाना इत्यर्थः । अयमर्थः-भिल्लकटकैः या भुवो निरन्तरं व्याप्तास्ताः उन्नताः प्रतीयन्ते । तैः सैन्यैर्मुक्तास्ताः क्षणमात्रं निम्नाः प्रतीयन्ते इत्यर्थः । अथ समासः । श्वभ्राणि च निकुञ्जाश्च रोधांसि च श्वभ्रनिकुञ्जरोधांसि तिरोहितानि श्वभ्रनिकुञ्जरोधांसि यासां ताः ति० । किरातस्य सैन्यानि किरातसैन्यानि तैः कि० । निम्नस्य भावो निम्नता तया नि० । इति वृत्तार्थः ॥ ३३ ॥

पृथूरुपर्यस्तबृहल्लताततिर्जवानिलाघूर्णितशालचन्दना ।
गणाधिपानां परितः प्रसारिणी वनान्यवाञ्चीव चकार संहतिः ॥ ३४ ॥

'पृथू०' व्याख्या । **गणाधिपानां** गणेशानां **संहतिः** समूहः **वनानि** काननानि **अवाञ्चीव** अधोमुखानीव **चकार** अकरोत् किं० संहतिः ? **परितः प्रसारिणी** सर्वत्र गामिनी सर्वत्र प्रसरणशीला इत्यर्थः । पुनः किं० संहतिः ? **जवानिलाघूर्णितशालचन्दना** वेगसमुच्छ्वासभ्रामितसर्ज्जचन्दनद्रुमा 'सालः सर्ज्जतरुः स्मृत' इति *हैमः* [११३८] । पुनः किं० संहतिः ? **पृथूरुपर्यस्तबृहल्लताततिः** पृथुभिः विशालैः महद्भिः पुरोभागैः सक्थिभिः विशालसक्थिभिः पातितमहल्लताश्रेणिः । अथ समासः । पृथवश्च ते उरवश्च पृथूरवः पृथूरुभिः पर्यस्ता बृहल्लताततयो यया सा पृ० । जवस्य अनिलो जवानिलः जवानिलेन आघूर्णिता सालचन्दना यया सा जवानि० । गणानामधिपा गणाधिपास्तेषां ग० । इति वृत्तार्थः ॥३४॥

अथाष्टभिः श्लोकैरर्जुनं विशेषयन् गणानां तदभियोगमाह -

ततः सदर्पं प्रतनुं तपस्यया मदस्रुतिक्षाममिवैकवारणम् ।
परिज्वलन्तं निधनाय विद्विषां दहन्तमाशा इव जातवेदसम् ॥ ३५ ॥

'ततः०' व्याख्या । **ततस्तदनन्तरं** [1]**गणाः** प्रमथादयः **अनीलवाजिनम्** अर्जुनं **समासेदुः**प्रापुः किं० अनीलवाजिनम् ? **सदर्प्पम्** अभिमानयुक्तं सान्तःसारमित्यर्थः । पुनः किं० अर्जुनम् ? **तपस्यया** तपश्चर्यया **प्रतनुं** दुर्बलं पुनः किं० अर्जुनम् ? उत्प्रेक्ष्यते **मदस्रुतिक्षामं** मदस्रावेण दुर्बलम् **एकवारणमिव** मुख्यम् एकाकिगजमिव स्थितमित्यर्थः । पुनः किं० अर्जुनम् ? **विद्विषां** वैरिणां '[1]भूभृताम्' इति पाठस्तत्र राज्ञां **निधनाय** विनाशाय **परिज्वलन्तं** तेजस्विनं तपस्तेजसा देदीप्यमानं पुनः किं० अर्जुनम् ? उत्प्रेक्ष्यते **आशा** दिशो **दहन्तं** भस्मीकुर्वन्तं **जातवेदसं** वैश्वानरमिव स्थितम् इत्युपमैव अग्निरपि पर्वतान् ज्वलयन् दिशो दहतीति भावः । अथ समासः । सह दर्प्पेण वर्तते यः स सदर्प्पस्तं स० । मदस्य स्रुतिः मदस्रुतिः मदस्रुत्या क्षामः मदस्रुतिक्षामस्तं म० । एकश्चासौ वारणश्च एकवारणस्तमे० । इति वृत्तार्थः ॥३५॥

अनादरोपात्तधृतैकसायकं जयेऽनुकूले सुहृदीव सस्पृहम् ।
शनैरपूर्णप्रतिकारपेलवे निवेशयन्तं नयने बलोदधौ ॥ ३६ ॥

'अनाद०' व्याख्या । पुनः किं० अनीलवाजिनम् ? **अनादरोपात्तधृतैकसायकम्** अनादरेण हेलया अवगणनया उपात्तो निषङ्गादुद्धृतो धृतश्च एकः सायको बाणो येन स तम् अवज्ञया गृहीतकरधृतप्रकृष्ट-बाणमित्यर्थः । पुनः किं० अनी० ? **अनुकूले जये** विजये **सस्पृहं** साभिलाषं जयमिच्छन्तमित्यर्थः । कस्मिन्निव ? **सुहृदीव** मित्रेण यथा कश्चित् पुमान् अनुकूलमित्रे साभिलाषो भवति । पुनः किं० अर्जुनम् ? **बलोदधौ** सैन्यसमुद्रे **शनैरसंभ्रमेण** **नयने** लोचने **निवेशयन्तं** प्रेरयन्तम् आरोपयन्तमित्यर्थः । अनेन वीरस्वाभाविकोक्तिः । किं० बलोदधौ ? **अपूर्णप्रतिकारपेलवे** अपर्याप्तबाणाहरणप्रत्यर्प्पणरूपप्रतिकारेण प्रतिपक्षव्यापारेण लघीयसि 'अपूर्णप्रतिकायपेलवे' इति पाठस्तत्र अपूर्णः न्यूनः प्रतिकायो बाणाहरण-प्रत्यर्पणरूपो यस्य स अत एव पेलवो लघुस्तस्मिन् अपू० । अथ समासः । न आदरः अनादरः अनादरेण उपात्तो धृत एकसायको येन स अनादरोपात्तधृतैकसायकस्तम् अनाद० । स्पृहया सह वर्तमानः सस्पृहः

1. एष पाठः म. मध्ये । १. एतानि त्रीणि पदानि ४२ तम्याः कारिकातः अन्वयार्थमत्र स्थापितानि ।

तं सस्पृहम् । न पूर्णोऽपूर्णः अपूर्णः प्रतिकारो यस्य स अपूर्णप्रतिकारः अपूर्णप्रतिकारश्चासौ पेलवश्च अपूर्णप्रतिकारपेलवस्तस्मिन् अ० । निवेशयतीति निवेशयन् तं नि० । बलमेव उदधिः बलोदधिस्तस्मिन् ब० । इति वृत्तार्थः ॥ ३६ ॥

निषण्णमापत्प्रतिकारकारणे शरासने धैर्य इवानपायिनि ।
अलङ्घनीयं प्रकृतावपि स्थितं निवातनिष्कम्पमिवापगापतिम् ॥ ३७ ॥

'निषण्ण०' व्याख्या । पुनः किं० अनीलवाजिनम् ? **शरासने** गाण्डीवाख्ये धनुषि **निषण्णं** स्थितं वर्तमानमित्यर्थः । किं० शरासने ? **आपत्प्रतिकारकारणे** कष्टानां प्रतिकारस्य हेतौ पुनः किं० शरासने ? **अनपायिनि** अपायरहिते पुनः किं० शरासने ? उत्प्रेक्ष्यते **धैर्य इव** यथा धैर्यमपि आपत्प्रतिकारकारणं अनपायि च भवति । पुनः किं० अनी० ? **प्रकृतावपि** स्वभावेऽपि **स्थितं** निर्विकारमपि अत एव **अलङ्घनीयम्** अनतिक्रमणीयं पुनः किं० अनी० ? उत्प्रेक्ष्यते **निवातनिष्कम्पं** वाताभावान्निश्चलम् **आपगापतिं** समुद्रमिव स्थितम् । अथ समासः । आपदां प्रतिकारः आपत्प्रतिकारः आपत्प्रतिकारस्य कारणम् आपत्प्रतिकारकारणं तस्मिन् आ० । न विद्यते अपायो यस्य सोऽनपायी तस्मिन् अ०। न लङ्घनीयम् अ० । निवातात् निष्कम्पो निवातनिष्कम्पस्तं नि० । आपगायाः पतिः आपगापतिः तम् आ०। इति वृत्तार्थः ॥ ३७ ॥

उपेयुषीं बिभ्रतमन्तकद्युतिं वधाददूरे पतितस्य दंष्ट्रिणः ।
पुरःसमावेशितसत्पशुं द्विजैः पतिं पशूनामिव हूतमध्वरे ॥ ३८ ॥

'उपे०' व्याख्या । पुनः किं० अनी० ? **अन्तकद्युतिं** यमस्य प्रभां **बिभ्रतं** दधतं किं० अन्तकद्युतिम् ? **अदूरे** समीपे **पतितस्य दंष्ट्रिणो** वराहस्य **वधात्** विनाशात् **उपेयुषीं** प्राप्तवतीं प्राप्तामित्यर्थः। पुनः किं० अनी० ? **पशूनां पतिं** महादेवमिव स्थितं किं० पशूनां पतिम् ? **द्विजैः** ब्राह्मणैः **अध्वरे** यागे **हूतमा**हूतं यज्ञमन्त्रेणाकारितमित्यर्थः । पुनः किं० अनी० ? **पुरःसमावेशितसत्पशुम्** अग्रे स्थापितोत्तम-वृषभम् । अथ समासः । उपेयाय इति उपेयुषी ताम् उ० । बिभर्तीति बिभ्रत् तं बि० । उभयथापि वाक्यम् अन्तकस्य द्युतिरन्तकद्युतिस्ताम० । न दूरमदूरं तस्मिन् अ० । द्रंष्ट्राः सन्तीति दंष्ट्री तस्य दं०। पुरः समावेशितः सत्पशुर्येन यस्य वा पुरःसमावेशितसत्पशुः तं पु० । द्वाभ्यां जायत इति द्विजास्तैर्द्विजैः । हूयते स्म हूतस्तं हूतम्। इति वृत्तार्थः ॥ ३८ ॥

निजेन नीतं विजितान्यगौरवं गभीरतां धैर्यगुणेन भूयसा ।
वनोदयेनेव घनोरुवीरुधा समन्धकारीकृतमुत्तमाचलम् ॥ ३९ ॥

'निजेन०' व्याख्या । पुनः किं० अनील० ? **विजितान्यगौरवं** तिरस्कृतान्यगौरवं **गभीरतां** [दुरवगाहत्वं] **नीतं निजेन** स्वकीयेन स्वाभाविकेन वा **धैर्यगुणेन** धीरतागुणेन किं० धैर्य० ? **भूयसा** अतिशयेन बहुना पुनः किं० अनील० ? **वनोदयेन** अरण्यप्रादुर्भावेन **समन्धकारीकृतमुत्तमाचलं**

समन्तात्तिमिरीकृतं प्रधानपर्वतमिव **स्थितम्** । वर्षाकाले गहनत्वमी(?)त्यादितमित्यर्थः । किं० वनोदयेन ? **घनोरुवीरुधा** निबीडमहल्लतायुक्तेन । अथ समासः । गुरोर्भावो गौरवम् अन्येषां गौरवम् अन्यगौरवं विजितमन्यगौरवं यत्र यस्मिन् कर्मणि तत् वि० । गभीरस्य भावो गभीरता तां ग० । धीरस्य भावो धैर्यं धैर्यस्य गुणः धैर्यगुणः तेन धै० । अतिशयेन बहुर्भूयान् तेन भूयसा । वनस्य उदयः वनोदयस्तेन व० । उरवश्च ते वीरुधश्च उरुवीरुधः घना उरुवीरुधो यस्मिन् स घनोरुवीरुत् तेन घ० । समन्ततोऽन्धकारो यस्य स इति विग्रहः । उत्तमश्चासावचलश्च उत्तमाचलस्तम् उ० । इति वृत्तार्थः ॥ ३९ ॥

महर्षभस्कन्धमनूनकन्धरं बृहच्छिलावप्रघनेन वक्षसा ।
समुज्जिहीर्षुं जगतीं महाभरां महावराहं महतोऽर्णवादिव ॥ ४० ॥

'महर्ष०' व्याख्या । पुनः किं० अनी० ? **महर्षभस्कन्धं** प्रकृष्टबलीवर्दांशं पुनः किं० अ० ? **अनूनकन्धरं** स्थूलग्रीवं परिपूर्णग्रीवमित्यर्थः । पुनः किं० अ० ? **वक्षसा** हृदयेन उपलक्षितं किं० वक्षसा ? **बृहच्छिलावप्रघनेन** महच्छिलातटवत् कठिनेन पुनः किं० अनी० ? अत एव **महावराहम्** आदिशूकर**मिव** **स्थितं** किं० आदिवराहम् ? **महतोऽर्णवात्** महासमुद्रात् **जगतीं** पृथिवीं **समुज्जिहीर्षुं** समुद्धर्तुमिच्छुं किं० जगतीम् ? **महाभरां** दुष्टधिभिरतिभारवतीम्[1] । अथ समासः । महांश्चासौ वृषभश्च महर्षभः महर्षभस्य स्कन्धाविव स्कन्धौ यस्य स महर्षभस्कन्धः तं म० । अनूना कन्धरा यस्य सोऽनूनकन्धरस्तम० । बृहच्च तच्छिलावप्रं च बृहच्छिलावप्रं बृहच्छिलावप्रवत्घनं बृहच्छिलावप्रघनं तेन बृ० । समुद्धर्तुमिच्छतीति समुज्जिहीर्षति समुज्जिहीर्षतीति समुज्जिहीर्षुस्तं स० । महान् भरो यस्यां सा महाभरा तां म० । महांश्चासौ वराहश्च महावराहस्तं म० । इति वृत्तार्थः ॥ ४० ॥

हरिन्मणिश्याममुदग्रविग्रहं प्रकाशमानं परिभूय देहिनः ।
मनुष्यभावे पुरुषं पुरातनं स्थितं जलादर्श इवांशुमालिनम् ॥ ४१ ॥

'हरि०' व्याख्या । पुनः किं० अनी० ? **हरिन्मणिश्यामम्** इन्द्रनीलमणिवत् कृष्णं पुनः किं० अनी० ? **उदग्रविग्रहम्** उदारदेहं पुनः किं० अनी० ? **देहिनः** प्राणिनः **परिभूय** तिरस्कृत्य जित्वा **प्रकाशमानं** सर्वोत्कर्षेण देदीप्यमानं सर्वमनुष्यानतिक्रम्य राजमानमित्यर्थः । पुनः किं० अनी० ? **मनुष्यभावे** मानुषत्वेऽपि **स्थितं** वर्त्तमानं पुनः किं० अनी० ? **पुरातनम्** आद्यं **पुरुषं** नरं यो बदरीवननिवासी नारायणसहचरो नरो नाम स एवायं पुरुषः इत्यर्थः । पुनः किं० अनील० ? उत्प्रेक्ष्यते **जलादर्शे** पानीयदर्प्पणे **अंशुमालिनं** सूर्य**मिव** स्थितम् । अथ समासः । हरिन्मणिवत् श्यामो हरिन्मणिश्यामस्तं ह० । उदग्रो विग्रहो यस्य स उदग्रविग्रहस्तम् उ० । मनुष्यस्य भावो मनुष्यभावः तस्मिन् म० । जलमेवादर्शो जलादर्शस्तस्मिन् ज० । इति वृत्तार्थः ॥ ४१ ॥

गुरुक्रियारम्भफलैरलंकृतं गतिं प्रतापस्य जगत्प्रमाथिनः ।
गणाः समासेदुरनीलवाजिनं महाचलं तोयघना घना इव ॥ ४२ ॥

---

१. अर्थसाधर्म्यादियमुपमा, न श्लेषः, शब्दमात्रसाधर्म्येण तस्य विधानादिति रहस्यम् ।

'गुरु०' व्याख्या । पुनः किं० अनील० ? **गुरुक्रियारम्भफलैः** महत्क्रियारम्भाणां तपःप्रभृतीनां फलैः **अलंकृतं** शोभितं सफलकर्मारम्भमित्यर्थः । पुनः किं० अनी० ? **जगत्प्रमाथिनः** भुवनजयिनः **प्रतापस्य** तेजसो **गति**माश्रयं स्थानम् अतोऽस्य बहूनामेकलक्ष्यत्वं युज्यते इति संदर्भार्थः । [**अनीलवाजिनं** श्वेताश्वमर्जुनं **गणाः** प्रमथादयः] के कमिव ? घना महाचल**मिव** यथा **घना** मेघाः **महाचलं** महागिरिं **समासीदन्ति** प्राप्नुवन्ति [तपा[1]त्यये इतिपाठस्तत्र] किं० घनाः ? तपात्यये वर्षर्तौ **तोयघनाः** उदकेन सान्द्राः जलभारनम्रा इत्यर्थः । अथ समासः । क्रियाणामारम्भाः क्रियारम्भाः गुरवश्च ते क्रियारम्भाश्च गुरुक्रियारम्भाः गुरुक्रियारम्भाणां फलानि गुरुक्रियारम्भफलानि तैः गु० । जगत्प्रमथ्नाति इत्येवंशीलो जगत्प्रमाथी तस्य ज० । महांश्चासावचलश्च महाचलस्तं म० । तोयेन घना तोयघना इति वृत्तार्थः । इत्यन्तक्रियाकुलकम् ॥ ४२ ॥

यथास्वमाशंसितविक्रमाः पुरा मुनिप्रभावा[2]त्क्षततेजसः परे ।
ययुः क्षणादप्रतिपत्तिदी[3]नतां महानुभावः प्रणि[4]हन्ति पौरुषम् ॥ ४३ ॥

'यथा०' व्याख्या । **परे** वैरिणो गणाः **क्षणात्** क्षणमात्रेण **अप्रतिपत्तिदीनताम्....** अप्रतिपत्तिं मूढतां वा उभयत्रापि अज्ञानं मोहान्धतां **ययुः** प्रापुः किं० परे ? **पुरा** पूर्वं **यथास्वं** यथात्मीयं स्वं स्वम् आत्मानम् आत्मानम् अ[न]तिक्रम्य यथास्वं अहमेवैनं जेष्यामीति । **आशंसितविक्रमाः** कथितपराक्रमाः पुनः किं० परे ? **मुनिप्रभावात् क्षततेजसः** अर्जुनप्रभावात् हतकान्तयः युक्तोऽयमर्थः- **महानुभावः** सत्पुरुषप्रभावः **पौरुषं** पराक्रमं परेषामिति शेषः । **प्रणिहन्ति** विनाशयति । अथ समासः । स्वं स्वमनतिक्रम्य यथास्वम् आशंसिता विक्रमा यैस्ते आ० । मुनेः प्रभावो मुनिप्रभावः तस्मात् मु० । क्षतं तेजो येषां ते क्ष० । न प्रतिपत्तिः अप्रतिपत्तिः अप्रतिपत्त्या दीनता अप्रतिपत्तिदीनता ताम् अ० । महताम् अनुभावः म० । इति वृत्तार्थः ॥ ४३ ॥

ततः प्रजह्रे सममेव तत्र तैरपेक्षितान्योऽन्यबलोपपत्तिभिः ।
महोदयानामपि सङ्घवृत्तितां सहायसाध्याः प्रदिशन्ति सिद्धयः ॥ ४४ ॥

'ततः०' व्याख्या । **ततो**ऽनन्तरं **तैर्**गणैः **तत्रा**र्जुने **सममेव** युगपदेव समकालमेव **प्रजह्रे** प्रहारश्चक्रे किं० तैः ? **अपेक्षितान्योऽन्यबलोपपत्तिभिः** आकाङ्क्षितपरस्परसामर्थ्यारक्षापरम्परैः वाञ्छितान्योऽन्यशक्त्य-वष्टम्भैरित्यर्थः । **हि** यस्मात् कारणात् **महोदयानां** महानुभावानां **सिद्धयः** कार्यसिद्धयः **सङ्घवृत्तितां** संभूयकारितां समूहवृत्तित्वं वा **प्रदिशन्ति** ददति यत्र समूहस्तत्र जयस्ततो गणानामपि संभूयकारित्वं न दोषः इति भावः । किं० सिद्धयः ? **सहायसाध्याः** सहायैः साधयितुं योग्याः सचिवनृपाद्यैः करणभूतैः प्राप्याः । अथ समासः । बलं च उपपत्तिश्च बलोपपत्तिः अपेक्षिता अन्योऽन्यबलोपपत्तिर्यैस्ते अपेक्षितान्योऽन्यबलोपपत्तयस्तैः अ० । महान् उदयो येषां ते महोदयास्तेषां म० । सङ्घे वृत्तिर्येषां ते

1. एष पाठः म. मध्ये इदं च पा. 2. वक्षत० -म. इदं च पा० 3. ०मूढतां -म. इदं च पा० 4. प्रति० -म. इदं च पा०

सङ्घवृत्तयः सङ्घवृत्तीनां भावः संघवृत्तिता तां सं० । सहायैः सहायेन वा साध्याः स० । इति वृत्तार्थः ॥४४॥

किरातसैन्यादुरुचापनोदिताः समं समुत्पेतुरुपात्तरंहसः ।
महावनादुन्मनसः खगा इव प्रवृत्तपत्रध्वनयः शिलीमुखाः ॥ ४५ ॥

'किरात०' व्याख्या । **शिलीमुखाः** बाणाः **किरातसैन्यात्** वनेचरकटकात् **समं** समकालं यथा स्यात्तथा **समुत्पेतुः** समुत्पतन्ति स्म समन्ततो निरगच्छन्नित्यर्थः । किं० शिलीमुखाः ? **उरुचापनोदिताः** बृहद्धनुःप्रेरिताः महच्चापैः क्षिप्ता इत्यर्थः । पुनः किं० शिलीमुखाः ? अत एव **उपात्तरंहसः** प्राप्तवेगाः पुनः किं० शिलीमुखाः ? **प्रवृत्तपत्रध्वनयः** संजातपक्षनादाः कस्मात्के इव **महावनात्** बृहत्काननात् **खगाः** पक्षिण **इव** यथा महावनात् खगाः समं समुत्पतन्ति उल्लङ्घनं कुर्वन्ति । किं० खगाः ? **उन्मनसः** क्वापि गन्तुम् उत्सुकमानसाः उत्कण्ठितचित्ता इत्यर्थः । बाणविशेषणानि सर्वाण्यपि पक्षिपक्षेऽपि योज्यानि । अथ समासः । किरातस्य सैन्यं किरातसैन्यं तस्मात् कि० । उरवश्च ते चापाश्च उरुचापाः उरुचापैर्नोदिताः उ० । उपात्तं रंहो यैस्ते उ० । महच्च तद्वनं च महावनं तस्मान्म० । उद् उत्सुकं मनो येषां ते उन्मनसः । खे गच्छन्तीति खगाः । प्रवृत्तः पत्राणां ध्वनिर्येषां ते प्र० । इति वृत्तार्थः ॥४५॥

गभीररन्ध्रेषु भृशं महीभृतः प्रतिस्वनैरुन्नदितेषु सानुषु ।
धनुर्निनादेन जवादुपेयुषा विभिद्यमाना इव दध्वनुर्दिशः ॥ ४६ ॥

'गम्भीर०' व्याख्या । **दिशः** ककुभः **दध्वनुः** ध्वनीर्वितेनुः किं० दिशः ? उत्प्रेक्ष्यते **धनुर्निनादेन** धनुष्टङ्काररवेण **विभिद्यमाना इव** विशेषेण विदीर्यमाना इव किं० धनुर्नि० ? **जवात्** वेगेन **उपेयुषा** आगच्छता केषु सत्सु ? **महीभृतः** पर्वतस्य **सानुषु** शिखरेषु **प्रतिस्वनैः** प्रतिशब्दैः **भृशम**तिशयेन **उन्नदितेषु** शब्दायमानेषु सत्सु उन्नमितेनेति[1] पाठस्तत्र किं० धनु० ? महीभृतः सानुषु प्रतिध्वनैः उन्नमितेन उच्छ्रायितेन दीर्घीकृतेनेत्यर्थः । किं० सानुषु ? **गभीररन्ध्रेषु** गम्भीरगह्वरेषु । अथ समासः । गभीराणि रन्ध्राणि येषां ते गभीररन्ध्रास्तेषु ग० । धनुषां निनादो धनुर्निनादस्तेन ध० । इति वृत्तार्थः ॥ ४६ ॥

विधूनयन्ती गहनानि भूरुहां तिरोहितोपान्तनभोदिगन्तरा ।
महीयसी वृष्टिरिवानिलेरिता रवं वितेने गणमार्गणावलिः ॥ ४७ ॥

'विधू०' व्याख्या । **गणमार्गणावलिः** प्रमथादिगणबाणश्रेणिः **रवं** शब्दं **वितेने** विस्तारयामास केव ? **महीयसी वृष्टिरिव** यथा जलानां महती वृष्टिः रवं तनोति विस्तारयति तद्वत् । किं० गणमा० ? **भूरुहां** वृक्षाणां **गहनानि** वनानि **विधूनयन्ती** कम्पयन्ती पुनः किं० गणमा० ? **तिरोहितोपान्तनभोदिगन्तरा** आच्छादितसमीपाकाशदिगन्तरा पुनः किं० गणमार्ग० ? महीयसी महती पुनः किं० गणमा० ? **अनिलेरिता** वातेन प्रेरिता **वृष्टिरिवै**तावद्विशेषणयुक्ता भवतीति भावः । अथ समासः । विधूनयतीति विधूनयन्ती । उपान्ताश्च नभश्च दिगन्तराणि च उपान्तनभोदिगन्तराणि तिरोहितानि उपान्तनभोदिगन्तराणि यया सा ति० । अतिशयेन

1. एष पाठः म. मध्ये इदं च पा.

महती महीयसी । अनिलेन ईरिता अ० । मार्गणानामावलिः मार्गणावलिः गणानां मार्गणावलिः ग० । इति वृत्तार्थः ॥ ४७ ॥

त्रयीमृतूनामनिलाशिनः सतः प्रयाति पोषं वपुषि प्रहृष्यतः ।
रणाय जिष्णोर्विदुषेव सत्त्वरं घनत्वमीये शिथिलेन वर्मणा ॥ ४८ ॥

'त्रयी०' व्याख्या । **जिष्णो**रर्जुनस्य **वर्मणा** कवचेन **रणाय** संग्रामार्थं **शिथिलेन** श्लथेन **सत्त्वरं** शीघ्रं **घनत्वं** दृढत्वम् **ईये** प्रपेदे प्राप्तमित्यर्थः । अन्यथानुप्रयोगात् इत्यर्थः । किं० जिष्णोः ? **ऋतूनां त्रयीं** षण्मासान् **अनिलाशिनः** वायुभक्षकस्य **सतः** कृशस्येत्यर्थः । कस्मिन् सति ? **वपुषि** शरीरे **पोषं** पुष्टिं **प्रयाति** गच्छति सति पुनः किं० जिष्णोः ? **प्रहृष्यतः** उत्साहमानस्य हर्षं प्राप्नुवत इत्यर्थः । किं० वर्मणा ? **विदुषेवा**नन्तरं करणीयं जानतेव क्वचित् 'सुहृदेव' इति पाठस्तत्र केनेव सुहृदेव मित्रेणेव अनन्तरकरणीयं जानतेवेत्युत्प्रेक्षा । यथा जानता मित्रेण अवसरे प्राप्ते दृढेन भूयते तद्वदित्यर्थः । प्रस्तावोऽयं घनत्वस्य युद्धे कवचस्य दृढत्वं विलोक्यते । समुच्छ्रिते युद्धे दृढत्वं युक्तमिति मन्यमानेन बुद्धिपूर्वमिव शीघ्रमेव घनत्वमीये वर्मणेत्यर्थः । अथ समासः । अनिलमश्नातीति अनिलाशी तस्य अ० । वेत्तीति विद्वान् तेन विदुषा। घनस्य भावो घनत्वम् । इति वृत्तार्थः ॥ ४८ ॥

पतत्सु शस्त्रेषु वितत्य रोदसी समन्ततस्तस्य धनुर्दुधूषतः ।
सरोषमुल्केव पपात भीषणा बलेषु दृष्टिर्विनिपातशंसिनी ॥ ४९ ॥

'पतत्सु०' व्याख्या । **तस्या**र्जुनस्य **दृष्टिः उल्केव** उल्कापात इव **बलेषु** सैन्येषु **सरोषं** सकोपं यथा भवति तथा **पपात** किं० दृष्टिः ? **भीषणा** रौद्रा पुनः किं० दृष्टिः ? **विनिपातशंसिनी** रिपूणां नाशं कथयन्ती रिपुविनाशसूचका इत्यर्थः । किं० तस्य ? **धनु**श्चापं **दुधूषतः** कम्पयतः आस्फालयत इत्यर्थः। केषु सत्सु ? **समन्ततः** समन्तात् **रोदसी** द्यावापृथिव्यौ **वितत्य** व्याप्य **शस्त्रेषु पतत्सु** सत्सु। अथ समासः । धूनितुम् इच्छति दुधूषति दुधूषतीति दुधूषन् तस्य दु० । रोषेण सह वर्तमानं यत्र यस्मिन् कर्मणि तत् सरोषम् । भीषयतीति भीषणा । विनिपातं शंसतीति वि० । इति वृत्तार्थः ॥ ४९ ॥

दिशः समूहन्निव विक्षिपन्निव प्रभां रवेराकुलयन्निवानिलम् ।
मुनिश्चचाल क्षयकालदारुणः क्षितिं सशैलां चलयन्निवेषुभिः ॥ ५० ॥

'दिश०' व्याख्या । **मुनि**रर्जुनः बलं प्रति **चचाल** प्रतस्थे गतिमकरोदित्यर्थः । किंकुर्वन् ? उत्प्रेक्ष्यते **इषुभिः** बाणैः **दिशः** आशाः **समूहन्निव** एकत्र कुर्वन्निव अन्यथा तासां पारदर्शनं न स्यादिति भावः । पुनः किंकुर्वन्निव ? **रवेः** सूर्यस्य **प्रभां** कान्तिं **विक्षिपन्निव** आच्छादयन्निव अधःप्रक्षिपन्निव अन्यथा सा कथं न दृश्यते इति भावः । पुनः किम्० ? उत्प्रेक्ष्यते **अनिलं** वातम् **आकुलयन्निव** इषुगोलान्तराले आघूर्णयन्निव तस्य तथा गतिविघातादिति भावः । किं० मुनिः ? **क्षयकालदारुणः** कल्पान्तकालवत् भीषणः पुनः मुनिः किंकुर्वन् ? उत्प्रेक्ष्यते बाणैः **सशैलां** पर्वतयुक्तां **क्षितिं** पृथिवीं

चालयन् कम्पयन्निव क्षोभादिति भावः । सर्वत्र इवशब्द उत्प्रेक्षया । अथ समासः । क्षयकालवत् दारुणः क्ष० । शैलैः सह वर्तमाना सशैला तां स० । इति वृत्तार्थः ॥ ५० ॥

विमुक्तमाशंसितशत्रुनिर्जयैरनेकमेकावसरं वनेचरैः ।
[1]मुनिर्जघानायुधमन्तरा शरैः क्रियाफलं काल इवातिपातितः ॥ ५१ ॥

'विमु०' व्याख्या । स **मुनिरर्जुनः आयुधं** शस्त्रं **शरैः** बाणैः कृत्वा **अन्तरा** अन्तराले मध्ये आगच्छदेव **जघान** चिच्छेद खण्डयामासेत्यर्थः । किं० आयुधम् ? **वनेचरैः** किरातैः **विमुक्तं** प्रयुक्तम् **एकावसरं** यथा स्यात्तथा समकालं यथा भवति तथा । किं० वनेचरैः ? **आशंसितशत्रुनिर्ज्जयैः** वाञ्छितशत्रुजयैः संभावितारिविनाशैरित्यर्थः । पुनः किं० आयुधम् ? **अनेकं** बहुधासंख्यमित्यर्थः । आयुधं जातावेकवचनम् । क इव ? काल **इव** यथा **कालः** समयः **क्रियाफलं** कृष्यादीनां फलं कार्यलाभं यावत् हन्ति विनाशयति किं० कालः ? **अतिपातितः** अतिक्रान्तः यथा अतिक्रान्तकालः कर्मफलं हिनस्ति न साधयतीत्यर्थः । अतिक्रान्तकालस्य कर्मणो निष्फलत्वादिति भावः । अथ समासः । आशंसितः शत्रुनिर्जयो यैस्ते आशंसितशत्रुनिर्जयास्तैः आ० । न एकमनेकम् । एक अवसरो यत्र यस्यां क्रियायां तत् ए० । क्रियायाः फलं क्रि० । इति वृत्तार्थः ॥ ५१ ॥

गतैः परेषामविभावनीयतां निवारयद्भिर्विपदं विदूरगैः ।
भृशं बभूवोपचितो बृहत्फलैः शरैरुपायैरिव पाण्डुनन्दनः ॥ ५२ ॥

'गतैः०' व्याख्या । **पाण्डुनन्दनो**ऽर्जुनः **शरैः** बाणैः **भृशम**तितराम् **उपचितो** वर्द्धमानो **बभूव** आसीत् संग्रामेऽक्षयबाणत्वात् तस्येति भावः । किं० शरैः ? **परेषां** शत्रूणाम् **अविभावनीयताम्** अदृश्यतां **गतैः** प्राप्तैः लघुसंधानादिति शेषः । पुनः किं० शरैः ? **विपदं** परिभवलक्षणां निवारयद्भिः दूरीकुर्वद्भिः पुनः किं० शरैः ? **विदूरगैः** दूरे गच्छद्भिः दूरलक्ष्यगैः पुनः किं० शरैः ? **बृहत्फलैः** महाबाणाग्रैः 'फलं बाणाग्रलाभयोः' इति *शाश्वतः* । पुनः किं० शरैः ? उत्प्रेक्ष्यते उपायै**रिव** स्थितैः यथा **उपायैः** सामदानविधिभेदनिग्रहैरुपचितः प्रवृद्धो भवति किं० उपायैः ? **परेषामविभानीयतां गतैः** गूढप्रयोगादप्रकाशतां यातैः । पुनः किं० उपायैः ? **विपदम्** अनर्थं **निवारयद्भिः** पुनः किं० उपा० ? **विदूरगैः** परमण्डलप्रविष्टैः पुनः किं० उपायैः ? **बृहत्फलैः** महाफलैः महालाभैरिति । अथ समासः । विदूरे गच्छन्तीति विदूरगास्तैः वि० । बृहन्ति फलानि येषां ते बृहत्फलाः तैः बृ० । पाण्डोर्नन्दनः पाण्डुनन्दनः । इति वृत्तार्थः ॥५२॥

दिवः पृथिव्याः ककुभां नु मण्डलात्पतन्ति बिम्बादिव तिग्मतेजसः ।
सकृद्विकृष्टादथ कार्मुकान्मुनेः शराः शरीरादिति तेऽभिमेनिरे ॥ ५३ ॥

'दिव०' व्याख्या । **ते** गणाः **इति अभिमेनिरे** ज्ञातवन्तः इतीति किं० ? **शरा** बाणाः **दिवो**

1. स निर्ज० -म. इदं च पा० ।

गगनात्**पतन्ति नु** अथवा **पृथिव्याः** भूमेः सकाशात् पतन्ति अथवा **ककुभां** दिशां **मण्डलात्**समूहात् पतन्ति अथवा **तिग्मतेजसो** रवेः **बिम्बात्** पतन्ति अथवा **कार्मुकात्** धनुषः सकाशात् पतन्ति नु किं० कार्मुकात्? **सकृद्विकृष्टात्** एकवारमाकर्षितात् अथवा **मुनेर**र्जुनस्य **शरीरात्** देहादेव पतन्ति। अथवा कथममी विश्रान्तर्धायिनः शराः संभाव्यन्ते इति भावः । अत्र सर्वत्र शरसंपातदर्शनात्संभावनया पृथिव्यादीनामन्यतमस्योपादानत्वोत्प्रेक्षा। सा च प्रतीयमाना व्यञ्जकाप्रयोगात् 'नु' शब्दादयस्तु संशये । अथ समासः । तिग्मं तेजो यस्य स तिग्मतेजाः तस्य ति० । इति वृत्तार्थः ॥ ५३ ॥

गणाधिपानामविधाय निर्गतैः परासुतां मर्मविदारणैरपि ।
जवादतीये हिमवानधोमुखैः कृतापराधैरिव तस्य पत्रिभिः ॥ ५४ ॥

'गणा०' व्याख्या । **तस्या**र्जुनस्य **पत्रिभिः** शरैः **जवात्** वेगात् **हिमवान्** हिमाचलः **अतीये** अतिचक्राम प्रविष्ट इत्यर्थः । लज्जितस्य क्वचिन्निलयनमुचितमिति भावः । किं० पत्रिभिः ? **अधोमुखैः** अवाङ्मुखैः अधोमुखत्वं लज्जितस्य अत एव क्वचित् गमनमुचितं पुनः किं० पत्रिभिः ? उत्प्रेक्ष्यते **कृतापराधैरिव** शत्रुहननलक्षणस्वामिकार्याकरणात् सापराधैरिव योऽन्योऽपि कृतापराधो भवति स अधोमुखः सन् गच्छति । पुनः किं० पत्रिभिः ? **गणाधिपानां** प्रमथपतीनां **परासुतां** पञ्चत्वम् **अविधाय** अकृत्वा **निर्गतैः** निःसृतैः एतेन तेषाममरत्वमुक्तम् । पुनः किं० पत्रिभिः ? **मर्मविदारणैरपि** मर्मस्थानानि विदारयद्भिरपि। अथ समासः । गणानामधिपाः गणाधिपास्तेषां ग० । मर्माणि विदारयन्तीति मर्मविदारणानि तैर्म०। कृतोऽपराधो यैस्ते कृतापराधास्तैः कृ० । इति वृत्तार्थः ॥ ५४ ॥

द्विषां क्षतीर्याः प्रथमे शिलीमुखा विभिद्य देहावरणानि चक्रिरे ।
न तासु पेते विशिखैः पुनर्मुनेररुन्तुदत्वं महतां ह्यगोचरः ॥ ५५ ॥

'द्विषां०' व्याख्या । **प्रथमे** पूर्वं मुक्ताः **शिलीमुखा** मुनिबाणा **द्विषां** शत्रूणां **देहावरणानि** सन्नाहान् **विभिद्य** विदार्य **याः क्षतीः** प्रहारान् **चक्रिरे** कुर्वते स्म **तासु** क्षतीषु प्रहारेषु **पुन**र्भूयोऽपि मुक्तैः **मुनेर**र्जुनस्य **विशिखैः** बाणैः **न पेते** न पतितं पिष्टपेषणदोषपातभयादिति भावः । एकेनैव शरेण पाण्डुतनयः शत्रुं व्यापादयदित्यर्थः । **हि** युक्तोऽयमर्थः । **अरुन्तुदत्वं** पीडितपीडनं क्वचित् 'अरुन्तुदत्वे' इति पाठस्तत्र मर्मव्यथकत्वे । 'व्यथकस्तु स्यान्मर्मस्पृगरुन्तुदः' इति *हैमनाममालायाम्* [४०१] । **महतामु**त्तमानाम् **अगोचरः** अविषयः अकौशल्यं वर्जनीयमित्यर्थः । सन्तः पीडितपीडां न कुर्वन्तीति भावः । 'न हन्यात् व्यसनप्राप्तं नार्तं नातिपरिक्षतम्' (८२) इति निषेधस्मरणात् । अथ समासः । देहस्य आवरणानि दे० । अरुर्व्रणं तुदतीति अरुन्तुदः अरुन्तुदानां भावः अ० । इति वृत्तार्थः ॥ ५५ ॥

समुज्झिता यावदराति निर्यती सहैव चापान्मुनिबाणसंहतिः ।
प्रभा हिमांशोरिव पङ्कजावलिं निनाय संकोचमुमापतेश्चमूम् ॥ ५६ ॥

'समु०' व्याख्या । **मुनिबाणसंहतिः** अर्जुनबाणश्रेणिः **उमापते**र्महादेवस्य **चमूं** सेनां **संकोचम्**

अविकश्वरत्वं **निनाय** प्राप किं० मु० ? **यावदराति** अरातिसमसंख्यया **समुज्झिता** मुक्ता पुनः किं० मुनि० ? **चापात्** धनुषः सकाशात् **सहैव** सार्द्धं युगपद् च **निर्यती** निर्गच्छन्ती तादृशं तस्य कौशलमित्यर्थः। कस्य कामिव 'हिमांशोः प्रभा पङ्कजावलिम्' **इव** यथा **हिमांशोः** चन्द्रमसः **प्रभा** कान्तिः **पङ्कजावलिं** सूर्यविकाशिकमलश्रेणिं संकोचं नयति । अथ समासः । यावन्तोऽरातयो यावदराति[1] । मुनेर्बाणाः मुनिबाणाः मुनिबाणानां संहतिः मु० । पङ्कजानामावलिः पङ्कजावलिस्तां प० । उमायाः पतिः उमापतिः तस्य उ० । इति वृत्तार्थः ॥ ५६ ॥

अजिह्ममोजिष्ठममोघमक्लमं क्रियासु बह्वीषु पृथङ्नियोजितम् ।
प्रसेहिरे सादयितुं न सादिताः शरौघमुत्साहमिवास्य विद्विषः ॥ ५७ ॥

'अजि०' व्याख्या । **विद्विषो** गणाः **अस्या**र्जुनस्य **शरौघं** बाणसमूहं **सादयितुं** प्रतिकर्तुं **न प्रसेहिरे** न क्षमयामासुः तस्योत्साहवदेव शरवर्षं दुर्धर्षमभूदिति भावः । किं० शरौघम् ? **अजिह्मम्** अकुटिलं पुनः किं० शरौघम् ? **ओजिष्ठं** तेजोयुक्तं पुनः किं० शरौघम् ? **अमोघं** सफलं पुनः किं० शरौघम् ? **अक्लमं** श्रमरहितं पुनः किं० शरौघम् ? **बह्वीषु** प्रचुरासु **क्रियासु** छेदनभेदनपातनादिकार्येषु **पृथग्** भेदेन **नियोजितं** बहुशो व्यापारितं कर्मानुगुण्येन विनियुक्तमित्यर्थः । उत्साहमिव वीररसस्य स्थायिभूतं प्रयत्नविशेषमिवेत्यर्थः । कमिव ? उत्साह**मिव** यथा **उत्साहं** रणोद्यमं सादयितुं न प्रसहिरे किं० विद्विषः ? **सादिताः** कर्षिताः बाणैः पीडिता इत्यर्थः । अथ समासः । न जिह्मोऽजिह्मस्तम० । न मोघोऽमोघस्तम० । न विद्यते क्लमो यस्य सोऽक्लमस्तम० । शराणामोघः शरौघस्तं श० । इति वृत्तार्थः ॥५७॥

शिवध्वजिन्यः प्रतियोधमग्रतः स्फुरन्तमुग्रेषुमयूखमालिनम् ।
तमेकदेशस्थमनेकदेशगा निदध्युरर्कं युगपत्प्रजा इव ॥ ५८ ॥

'शिव०' व्याख्या । **शिवध्वजिन्यः** महादेवसेनाः **तम**र्जुनम् **एकदेशस्थम्** एकप्रदेशस्थितं **निदध्युः** ददृशुः किं० शिव० ? **अनेकदेशगाः** अनेकदेशस्थिताः किं० तम् ? **प्रतियोधं** योधं प्रति **अग्रतः** पुरस्तात् **स्फुरन्तं** प्रकाशमानं पुनः किं० तम् ? **उग्रेषुमयूखमालिनम्** उग्रबाणकिरणधारिणं का कमिव ? प्रजा **अर्कमिव** यथा **प्रजा** लोका **युगप**न्निरन्तरं सूर्यं पश्यन्ति तद्वदर्जुनं रुद्रसेनाः ददृशुः इत्यर्थः । अथ समासः । शिवस्य ध्वजिन्यः शि० । योधं योधं प्रति प्रतियोधम् । उग्राश्च ते इषवश्च उग्रेषवः उग्रेषव एव मयूखाः उग्रेषुमयूखाः उग्रेषुमयूखानां माला अस्यास्तीति उग्रेषुमयूखमाली तम् उ० । एकश्चासौ देशश्च एकदेशः एकदेशे तिष्ठतीति एकदेशस्थस्तमे० । न एकदेशोऽनेकदेशः अनेकदेशे गच्छन्तीति अ० । इति वृत्तार्थः ॥ ५८ ॥

मुनेः शरौघेण तदुग्ररंहसा बलं प्रकोपादिव विष्वगायता ।
विधूनितं भ्रान्तिमियाय संगिनीं महानिलेनेव निदाघजं रजः ॥ ५९ ॥

---

१. 'यावदियत्त्वे' (सि० ३-१-३५) इति सूत्रेण समासः ।

'मुनेः' व्याख्या । **तत् बलं** प्रमथगणसैन्यं **संगिनीं** मनुष्यसबन्धिनीं **भ्रान्तिम् इयाय** प्राप देवानां भ्रान्तेरभावाद्भ्रान्तेर्मनुष्यसंबन्धित्वमुक्तम् । किं० बलम् ? **मुने**रर्जुनस्य **शरौघेण** बाणसमूहेन **विधूनितं** कम्पितम् आकुलीकृतमित्यर्थः । किं० शरौघेण ? **उग्ररंहसा** अतिवेगेन **प्रकोपादिव** क्रोधादिव **विष्वगायता** समन्तादागच्छता पुनः किं० बलम् ? उत्प्रेक्ष्यते **महानिलेन** महावातेन विधूनितं **निदाघजं** ग्रीष्मसमयोत्थं **रजो** रेणुरिव **स्थितमिति** । अथ समासः । शराणामोघः शरौघस्तेन श० । उग्रं रंहो यस्य स उग्ररंहास्तेन उ० । संगोऽस्या अस्तीति संगिनी तां सं० । महांश्चासावनिलश्च महानिलस्तेन म० । निदाघाज्जातं निदाघजम् । इति वृत्तार्थः ॥ ५९ ॥

तपोबलेनैव विधाय भूयसीस्तनूरदृश्याः स्विदिषून्निरस्यति ।
अमुष्य मायाविहतं निहन्ति नः प्रतीपमागत्य किमु स्वमायुधम् ॥ ६० ॥

'तपो०' व्याख्या । **स्विदि**ति वितर्के एष मुनिरर्जुनः **तपोबलेन** तपःशक्त्या **अदृश्याः भूयसी**रनेकाः बह्वीः **तनू**र्देहान् **विधाय** कृत्वा **इषून्** बाणान् **निरस्यति** क्षिपति मुञ्चतीत्यर्थः । **किमु** अथवा **स्वं** स्वकीयम् **आयुधं** शस्त्रं **प्रतीपं** प्रतिकूलम् **आगत्य** पार्श्वादागत्य प्रत्यावृत्येत्यर्थः । **नो**ऽस्मान् **निहन्ति** अस्मान्कथम् आत्मीयमेवायुधं हन्यादित्याशङ्क्याह- किं० आयुधम् ? **अमुष्या**स्य मुनेरर्जुनस्य **मायाविहतं** प्रतिहतं अर्ज्जुनमायया निष्पादितमेवेत्यर्थः । अथ समासः । तपसः बलं तपोबलं तेन त० । मायया विहतं मा० । इति वृत्तार्थः ॥ ६० ॥

हृता गुणैरस्य भयेन वा मुनेस्तिरोहिताः स्वित्प्रहरन्ति देवताः ।
कथं न्वमी संततमस्य सायका भवन्त्यनेके जलधेरिवोर्मयः ॥ ६१ ॥

'हृता०' व्याख्या । **स्विद्देवताः तिरोहिता** अदृष्टाः सत्यः प्रहारं कुर्वन्ति किं० देवताः ? **अस्य मुनेः गुणैः** तपोजपनियमशान्त्यादिभिः **हृता** आकृष्टा वशीकृताः **वा** अथवा अस्य **भयेन** दरेण बिभ्यत्यः वेत्यर्थः । अस्मान् **प्रहरन्ति नु** अथवा अस्य मुनेः **अमी सायकाः** बाणाः **संततं** निरन्तरं **कथं** किमर्थम् **अनेके** असंख्या **भवन्ति** के इव ? 'जलधेरूर्मयः' **इव** यथा **जलधेः** समुद्रस्य **ऊर्मय**स्तरङ्गा अनेके भवन्ति तद्वदिति एतच्चोद्य(?)मन्यसपक्षसंभवेन न संभवतीत्यर्थः । अथ समासः । न एके अनेके । इति वृत्तार्थः ॥ ६१ ॥

जयेन कच्चिद्विरमेदयं रणाद्भवेदपि स्वस्ति चराचराय वा ।
ततप कीर्णा हरिसूनुमार्गणैरिति प्रतर्काकुलिता पताकिनी ॥ ६२ ॥

'जये०' व्याख्या । **पताकिनी** गणेशसेना किराताधिपतेरिति शेषः । **तताप** संतापं प्राप किं० सेना ? **हरिसूनुमार्गणैः** अर्जुनशरैः **कीर्णा** व्याप्ता पुनः किं० सेना ? **इति** पूर्वोक्ता ये **प्रतर्का** वितर्कास्तैः **आकुलिता** विह्वला संतापिता इत्यर्थः । इतीति किं० **कच्चित्** इष्टपरिप्रश्ने **अय**मर्जुनः **रणात्** संग्रामात् **जयेन** विजयेन कृत्वा **विरमेत्** अपसरेत् अस्मान्विजित्वा युद्धमुपसंहरेदिति । **वा** अथवा **चराचराय**

जङ्गमस्थावराय विश्वाय **स्वस्ति** कल्याणं **भवेत्** स्यात् स्थावरजङ्गमं जगत् न विनश्येदित्यर्थः । अथ समासः । चरं च अचरं च चराचरं तस्मै च० । हरिसूनोर्मार्गणाः हरिसूनुमार्गणास्तैर्ह० । प्रतर्कैराकुलिता प्र० । इति वृत्तार्थः ॥ ६२ ॥ [त्रि.वि.]

अमर्षिणा कृत्यमिव क्षमाश्रयं मदोद्धतेनेव हितं प्रियं वचः ।
बलीयसा तद्विधिनेव पौरुषं बलं निरस्तं न रराज जिष्णुना ॥ ६३ ॥

'अमर्षि०' व्याख्या । **जिष्णुना** अर्जुनेन **निरस्तं** विद्रावितं **तत् बलं** तत् किरातसैन्यं **न रराज** न बभौ न शुशुभे इत्यर्थः । यद्वा नरराजजिष्णुनेति एकपदं नरराजजिष्णुना बलं निरस्तं दूरीकृतं केन किमिव निरस्तम् ? अमर्षिणा कृत्य**मिव** यथा **क्षमाश्रयं** क्षान्तिसाध्यं **कृत्यं** कार्यम् **अमर्षिणा** कोपवता जनेन निरस्तं क्षिप्तं न राजते । पुनः केन किमिव ? 'मदोद्धतेन हितं वच' **इव** यथा **मदोद्धतेन** मदोत्कटेन पुंसा **हितं** हितकारि **प्रियं** वल्लभं च **वचो** वचनं निरस्तं न राजते । पुनः केन किमिव ? पौरुष**मिव** यथा **बलीयसा** शक्तिमता **विधिना** दैवेन **पौरुषं** पराक्रमं निरस्तं न राजते । बलिष्ठदैवप्रतिहतपुरुषव्यापारस्य निष्फलत्वादिति भावः । अथ समासः । अमर्षोऽस्यास्तीति अमर्षी तेन अ० । क्षमायाः आश्रयः क्षमाश्रयस्तं क्ष० । मदेन उद्धतः मदोद्धतस्तेन म० । अतिशयेन बलो बलीयान् तेन ब० । नराणां राजा नरराजः स चासौ जिष्णुश्चेति एकपदम् । इति वृत्तार्थः ॥ ६३ ॥

प्रतिदिशं प्लवगाधिपलक्ष्मणा विशिखसंहतितापितमूर्तिभिः ।
रविकरग्लपितैरिव वारिभिः शिवबलैः परिमण्डलताऽऽददे ॥ ६४ ॥ (द्रु०)

'प्रति०' व्याख्या । **शिवबलैः** महादेवसैन्यैः **परिमण्डलता** परितश्चक्राकारमण्डली **आददे** गृहीता प्रतिदिशं मण्डलाकारेण स्थितमित्यर्थः । किं० शिवबलैः ? **प्रतिदिशं** दिशं दिशं प्रति **प्लवगाधिप-लक्ष्मणा** वानरचिह्नेन कपिध्वजेन अर्जुनेन **विशिखसंहतितापितमूर्तिभिः** शरश्रेणिसंतापितदेहैः शरनिकर्तितकलेवरैरित्यर्थः । पुनः किं० शिवबलैः ? उत्प्रेक्ष्यते **वारिभिर्जलैरिव** यथा वारिभिः परिमण्डलता ध्रियते । किं० वारिभिः ? **रविकरग्लपितैः** सूर्यकिरणशोषितैः । अथ समासः । दिशं दिशं प्रति प्रतिदिशम् । प्लवगानामधिपः प्लवगाधिपः प्लवगाधिपो लक्ष्म यस्य स प्लव० तेन प्लव० । विशिखानां संहतिः विशिखसंहतिः विशिखसंहत्या तापिता मूर्तयो येषां ते विशिखसंहतितापितमूर्तयस्तैः विशि० । रवेः कराः रविकराः रविकरैः ग्लपितानि रविकरग्लपितानि तैः रवि० । शिवस्य बलानि शिवबलानि तैः शिव० । इति वृत्तार्थः ॥ ६४ ॥

प्रविततशरजालच्छन्नविश्वान्तराले
विधुवति धनुराविर्मण्डलं पाण्डुसूनौ ।
कथमपि जयलक्ष्मीर्भीतभीता विहातुं
विषमनयनसेनापक्षपातं विषेहे ॥ ६५ ॥ (मा०)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ चतुर्दशः सर्गः ॥१४॥

'प्रवि०' व्याख्या । **जयलक्ष्मी**र्विजयश्रीः **कथमपि** महता कष्टेन **विषमनयनसेनापक्षपातं** महादेवसेनात्मीयभावं **विहातुं** त्यक्तुं **विषेहे** समर्था जाता किं० जयलक्ष्मीः ? **भीतभीता** महादेवात् बिभ्यतीव कथंचित् तदीयां शोभां त्यक्तुं जयलक्ष्मीः न शशाकेत्यर्थः । कस्मिन् सति ? **पाण्डुसूनौ** अर्जुने **धनु**श्चापं **विधुवति** आस्फालयति सति किं० धनुः ? **आविर्मण्डलं** प्रकटीभूततेजोमण्डलं किं० पाण्डुसूनौ ? **प्रविततशरजालच्छन्नविश्वान्तराले** विस्तीर्णबाहुसमूहाच्छादितब्रह्माण्डोदरे । अथ समासः । प्रवितताश्च ते शराश्च प्रविततशराः प्रविततशराणां जालानि प्रविततशरजालानि प्रविततशरजालैः छन्नं विश्वान्तरालं येन स प्रविततशरजालच्छन्नविश्वान्तरालः तस्मिन् प्रवि० । आविर्भूतं मण्डलं यस्य तदा० । पाण्डोः सूनुः पाण्डुसूनुः तस्मिन् पा० । जयस्य लक्ष्मीर्ज० । विषमानि नयनानि यस्य स विषमनयनः विषमनयनस्य सेना विषमनयनसेना विषमनयनसेनायाः पक्षपातः विषमनयनसेनापक्षपातः तं वि० । इति वृत्तार्थः ॥६५॥

इति श्रीभट्टभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***धनञ्जयाभिगमनो*** नाम चतुर्दशः सर्गः ॥ १४ ॥

शुभं भवतु ।

पञ्चदशः सर्गः।

ऐं नमः ॥

अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः । भेजे दिशः परित्यक्तमहेष्वासा च सा चमूः ॥१॥

[का. ४६ यावद् अनुष्टुप्छन्दः]

'अथ०' व्याख्या । **अथा**नन्तरं **तत्र** रणे **भूतानि** स्थावरजङ्गमादीनि गणा वा **वार्त्रघ्नशरेभ्यः** अर्जुनसायकेभ्यः **तत्रसुः** बिभ्युः भयं भेजिरे इत्यर्थः । **च** पुनः **सा चमूः** किरातसेना **दिश** आशा **भेजे** सेवे पलायाञ्चक्रे इत्यर्थः । किं० सा चमूः ? **परित्यक्तमहेष्वासा** त्यक्तमहच्चापा त्यक्तायुधेत्यर्थः[1]। अथ समासः । वृत्रं हतवान् इति वृत्रहा वृत्रहणोऽपत्यं वार्त्रघ्नः अपत्ये अण् वार्त्रघ्नस्य शराः वार्त्रघ्नशरास्तेभ्यः वा० । महान्तश्च ते इष्वासाश्च महेष्वासाः परित्यक्ता महेष्वासा यया सा प० । पद्यावक्त्रम् । इति वृत्तार्थः ॥१॥

अपश्यद्भिरिवेशानं रणान्निववृते गणैः । मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः ॥२॥

'अप०' व्याख्या । **गणैः** प्रमथगणैः **रणात्** संग्रामात् **निववृते** निवृत्तं किंकुर्वद्भिः गणैः ? उत्प्रेक्ष्यते **इशानं** रुद्रम् **अपश्यद्भिरिव** पुरोवर्तिनमपि अनवलोकयद्भिरिव पश्यद्भिरप्यपश्यद्भिरिवेति भावः । **हि** युक्तोऽयमर्थः । **कृच्छ्रेषु** कष्टेषु **संभ्रमज्वलितं** भयेन तप्तं त्रासाकुलितमित्यर्थः । **मन**श्चित्तं **मुह्यत्येव** मोहमेति अत एव पुरोवर्तिनोप्यदर्शनमुपपद्यत इत्यर्थः । अथ समासः । पश्यन्तीति पश्यन्तः न पश्यन्तः अपश्यन्तः तैर० । संभ्रमेण ज्वलितं सं० । इति वृत्तार्थः ॥ २ ॥

खण्डिताशंसया तेषां पराङ्मुखतया तया । आविवेश कृपा केतौ कृतोच्चैर्वानरं नरम् ॥३॥

'खण्डि०' व्याख्या । **कृपा** करुणा **नरम्** अर्जुनाख्यम् **आविवेश** प्रविष्टा तदीयां दुर्दशां दृष्ट्वा कृपाविष्टोऽभूदर्जुनः इत्यर्थः । किं० नरम् ? **केतौ** ध्वजे **कृतोच्चैर्वानरं** विहितहनूमन्तं कपिध्वजमित्यर्थः । **तया** तथा प्रसिद्धया **तेषां** गणानां **पराङ्मुखतया** पलायनपरायणतया रणमुखात् पलायनेनेत्यर्थः । किं० परा० ? **खण्डिताशंसया** भग्नजयाशया एतेन अतिकष्टत्वं सूचितम्[2] । अथ समासः । खण्डिता आशंसा यस्यां सा खण्डिताशंसा तया खण्डिताशंसया । पराङ् मुखं येषां ते पराङ्मुखा पराङ्मुखानां भावः पराङ्मुखता तया प० । कृतः उच्चैर्वानरो येन स कृतोच्चैर्वानरस्तं कृ० । इति वृत्तार्थः ॥ ३ ॥

ननु वैरिषु तस्य कथं कृपा तत्राह -

आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु । व्यक्तिमायाति महतां माहात्म्यमनुकम्पया ॥४॥

---

१. अत्र भूतत्राससेनापलायनयोः समुच्चयकथनाद् भिन्नविषयः क्रियासमुच्चयोऽलंकारः । तस्य यमकेन संसृष्टिः -म. । २. यमकालंकारः -म.

'आस्था०' व्याख्या । **महतां** महानुभावानां **माहात्म्यं** महिमा **अनुकम्पया** दयया कृत्वा **व्यक्ति** स्फुटतरम् **आयाति** प्राप्नोति यदात्मीयपराक्रमावर्जितेष्वपि वैरिषु महतां करुणा भूषणं भवतीति भावः। केषु सत्सु ? **आस्थां** प्रयत्नम् **आलम्ब्य** आश्रित्य **क्षुद्रेषु** अल्पेषु नीचेषु वा । **अरातिषु** शत्रुषु **वशं नीतेषु** स्वाधीनत्वं प्रापितेषु सत्सु अनुपकारिषु यः उपकारी स कृपावान् महान् इति भावः । अथ समासः । महात्मनो भावः माहात्म्यम् । इति वृत्तार्थः ॥ ४ ॥

स सासिः सासुसूः सासो येयायेयाययायः । ललौ लीलां ललोऽलोलः शशीशशिशुशीः शशन् ॥५॥

(एकाक्षरपादः)

'स सा०' व्याख्या । **सोऽर्जुनः शशन्** 'शश् प्लुतगतौ' इति धातोः शतृप्रत्ययः । प्लुतगतिं कुर्वन् कुटिलया गत्या व्रजन् **लीलां** शोभां **ललौ** आददे प्रापेत्यर्थः । 'ला आदाने' । किं० सः ? सासिः सह असिना खड्गेन वर्तत इति **सासिः** सखड्गः । पुनः किं० सः ? **सासुसूः** असून् प्राणान् सुवते प्रेरयतीति असवः बाणाः कथ्यन्ते । 'षू प्रेरणे' इति धातोः 'सत्सूद्विष' इत्यादिना क्विप् । असुसूभिः सह वर्तते इति सासुसूः सशर इत्यर्थः । पुनः किं० सः ? सासः 'अस क्षेपणे' अस्यन्ते क्षिप्यन्ते बाणा अनेनेति असश्चापं तेन सह वर्तमानः **सासो** धनुष्मान् सधनुरित्यर्थः । सर्वत्र 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः । पुनः किं० सः ? **येयायेयाययायः** यातुं योग्या येयाः यातव्या यानसाध्याः । अयेयाः अयातव्याः यानं विनैव साध्याः । 'या प्रापणे' 'य एच्चात' इत्यनेन यप्रत्यये तेषामुभयेषां येयायेयानाम् आयो अयनं लाभः स्वर्णादिः तं याति प्राप्नोतीति येयायेयाययः अयं शुभावहं भाग्यं यातीति अययः येयायेयाययश्चासौ अययश्च येयायेयाययायः कर्मधारयः उभयत्रापि 'आतो०' इति डप्रत्ययः । पुनः किं० सः ? लल् विलासे ललति विलसतीति ललः **ललो** विलासवान् 'पचिनन्दिग्रहादेः' इत्यनेन अप्रत्ययः । यद्वाऽलुलः 'डलविलासे' डलतीतिडलःडलयोरेकत्वस्मरणात् ललः । पुनः किं० सः ? **अलोलः** अचपलः स्थिरो जितेन्द्रियो वा। पुनः किं० स ? **शशीशशिशुशीः** शशिनः ईशः शशीशः श्रीमहादेवस्तस्य शिशुः पुत्रः स्वामिकार्तिकेयः शशीशशिशुः तं 'शृ हिंसायां' शृणाति हिनस्तीति शशीशशिशुशीः । इति वृत्तार्थः ॥ ५ ॥

त्रासजिह्मान् यतश्चैतान् मन्दमेवान्वियाय सः । नातिपीडयितुं भग्नानिच्छन्ति हि महौजसः ॥६॥

'त्रास०' व्याख्या । **यतो** यस्माद्धेतोः **सोऽर्जुनः एतान्** गणान् **मन्दमेव** शनैरेव **अन्वियाय** पश्चाज्जगाम किं० एतान् ? **त्रासजिह्मान्** भयेन कुटिलगतीन् इतस्ततः पलायत गच्छत इत्यर्थः । **च**कारः समुच्चयार्थः मन्दं किमित्यन्वियायेत्याह- **हि** यतः कारणात् **महौजसः** तेजस्विनः **भग्नान्** पलायमानान् पलायतो गच्छतो योधान् **अतिपीडयितुं** हन्तुं **नेच्छन्ति** न वाञ्छन्तीत्यर्थः । अथ समासः । त्रासेन जिह्माः त्रा० तान् त्रासजिह्मान् । महत् ओजो येषां ते महौजसः । इति वृत्तार्थः ॥ ६ ॥

अथाग्रे हसता साचिस्थितेन स्थिरकीर्तिना । सेनान्या ते जगदिरे किञ्चिदायस्तचेतसा ॥७॥

(निरौष्ठ्यम्)

'अथा०' व्याख्या । **अथा**नन्तरं **सेनान्या** स्कन्देन **ते** गणाः प्रमथगणाः **जगदिरे** बभाषिरे वक्ष्यमाणेन प्रकारेण उक्ता इत्यर्थः । 'स्कन्दः स्वामी महासेनः सेनानीः' इति *हैमनामकोशे* [२०८] । किं० सेनान्या ? **अग्रे** पुरस्तान् बलानामिति । **हसता** हास्यं कुर्वता तेषां भङ्गदर्शनात् स्मयमानेनेत्यर्थः । पुनः किं० सेनान्या ? **साचिस्थितेन** तेषां निरोधनाय तिर्यग्व्यवस्थितेन पुनः किं० सेनान्या ? **स्थिरकीर्तिना** स्थिरयशसा समराङ्गणे निश्चलयशसेत्यर्थः । पुनः किं० सेनान्या ? **किंचिदायस्तचेतसा** स्वकीयगणभङ्गात् ईषत्खिन्नचित्तेन ओष्ठ्यवर्णाभावान्निरौष्ठ्यम् । अथ समासः । साच्या स्थितः साचिस्थितः तेन सा० । स्थिरा कीर्तिर्यस्य स स्थिरकीर्तिस्तेन स्थिर० । आयस्तं चेतो यस्य स आयस्तचेताः तेन आ० । इति वृत्तार्थः ॥७॥

अथैकोनविंशत्या श्लोकैः स्कन्दवाक्यमेवाह –

मा विहासिष्ट समरं समरन्तव्यसंयतः । क्षतं क्षुण्णासुरगणैरगणैरिव किं यशः ॥ ८ ॥

(पादान्तादियमकम्)

'मा वि०' व्याख्या । हे गणाः ! यूयं **समरं** संग्रामं **मा विहासिष्ट** मा त्यक्त किं० यूयम् ? **समरन्तव्यसंयतः** समानक्रीडासंग्रामाः तथा भवद्भिः **किं यशः क्षतं** किमर्थं कीर्तिर्विनाशिता किं० भवद्भिः ? **क्षुण्णासुरगणैः** हतदानवसमूहैः पुनः किं० भवद्भिः ? उत्प्रेक्ष्यते **अगणैरिव** गणव्यतिरिक्तैरिव स्थितैरिति शेषः । अगणा एव यशः परित्यजन्ति । अथ समासः । रन्तव्यं च संयत् च रन्तव्यसंयती समे रन्तव्यसंयती येषां ते स० । असुराणां गणाः असुरगणाः क्षुण्णा असुरगणा यैस्ते क्षुण्णासुरगणास्तैः क्षु० । न गणाः अगणाः तैरगणैः । पादान्ते यमकमिदम् । इति वृत्तार्थः ॥ ८ ॥

विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः । अमी वो मोघमुद्गीर्णा हसन्तीव महासयः ॥९॥

'विव०' व्याख्या । हे गणाः ! **अमी** इमे **महासयो** महाखड्गाः **वो** युस्मान् **हसन्तीव** हास्यं कुर्वन्तीव अचेतनेषु चेतनत्वधर्मारोप इत्युत्प्रेक्षा पलायमानानां किं खड्गैरिति हासः । किं० महासयः ? **मोघमुद्गीर्णा** वृथा आकृष्टाः कोशान्निष्फलमाकर्षिता इत्यर्थः । पुनः किं० महासयः ? **विवस्वदंशुसंश्लेषद्विगुणीकृततेजसः** सूर्यकिरणस्पर्शेण अधिकानीतप्रतापाः । अथ समासः । विवस्वतो [अं]शवः विवस्वदंशवः विवस्वदंशूनां संश्लेषः विवस्वदंशुसंश्लेषः विवस्वदंशुसंश्लेषेण द्विगुणीकृतं तेजो येषां ते विव० । महान्तश्च ते असयश्च महासयः । इति वृत्तार्थः ॥ ९ ॥

वनेऽवने वनसदां मार्गं मार्गमुपेयुषाम् । बाणैर्बाणैः सहासक्तं शङ्केऽशं केन शाम्यति ॥१०॥

(पादादियमकम्)

'वने०' व्याख्या । हे गणाः ! अहमिति **शङ्के** विचारयामि इतीति किम् ? यत् वनेचराणां युष्माकमिति शेषः । **अशं** दुःखम् अस्मिन् **वने** कानने **केन** केनोपायेन **शाम्यति** केनचिन्निवर्तते पलायनेन नैतत् शाम्यतीत्यर्थः । किं० वने ? **वनसदां** वननिवासिनाम् अवने रक्षकदुर्गतुल्ये अवने वने यदि भवन्तः

पलायन्ते तदाऽन्येन केन दुःखं निवर्तेतेति भावः । किं० युष्माकम् ? **मार्गं** मृगसंबन्धिनं **मार्गं** पन्थानम् **उपेयुषां** प्राप्तवतां पलायमानानामित्यर्थः । हरिणाः पलाय्य येन मार्गेण गच्छन्ति तेन मार्गेण भवन्तोऽपि गच्छन्तीत्यर्थः । किं० अशम् ? **बाणैः** ध्वनिमद्भिः **बाणैः** शरैः **सह** सार्द्धम् **आसक्तं** लग्नं नियोजितम् 'अणरणवणभण शब्दे' इति वण्धातोर्घञ्प्रत्ययः वणनं बाणः बाणो ध्वनिरेषामस्तीति बाणाः तैः बाणैः एकत्वाद्बवयोरभेदः । उक्तं च-रलयोर्डलयोस्तद्वद्यजयोर्बवयोरपि । नणयोः शसयोश्चान्ते सविसर्गाविसर्गयोः । सबिन्दुकाबिन्दुकयोः स्यादभेदेन कल्पनम् ।' (८३) इति । स हि अर्जुनः सिंहनादान् कुर्वन् शरान् मुञ्चति । अथवा अन्ये तु एवं कथयन्ति तदेवंभूतम् अशं दुःखं तदहं शङ्के मन्ये के पानीयेऽपि अशं न शाम्यति । तद् उक्तं भवति यत् प्रागुक्तदुर्गतुल्ये वनेऽपि न शान्तं युष्माकं भयकारि दुःखं तज्जले निमग्नानपि युस्मान् न जहातीत्यर्थः । अथ समासः । वने सीदन्ति ते वनसदस्तेषां व० । मृगस्यायं मार्गस्तं मार्गम् । उपेयुरिति उपेयिवांसस्तेषाम् उ० । न शम् अशम् । आदियमकं यमकालङ्कारः । इति वृत्तार्थः ॥ १० ॥

पातितोत्तुङ्गमाहात्म्यैः संहृतायतकीर्तिभिः । गुर्वीं कामापदं हन्तुं कृतमावृत्तिसाहसम् ॥११॥

'पाति०' व्याख्या । हे गणाः ! भवद्भिः **कां गुर्वीं** महतीम् **आपदं** विपत्तिं **हन्तुं** विनाशयितुं दूरीकर्तुं वा **आवृत्तिसाहसं** पलायनरूपधैर्यं **कृतं** निष्पादितं न कांचिदपि आपदं हन्तुमित्यर्थः । विपत्तौ सत्यामेव भवतां पलायनं [युक्तं] न काचिदापत्पतितेत्यर्थः । पलायनान्न किंचित् फलमस्तीति भावः । किं० भवद्भिः ? **पातितोत्तुङ्गमाहात्म्यैः** भ्रंशितलोकप्रसिद्धभावैः पुनः किं० भवद्भिः ? **संहृतायतकीर्तिभिः** संक्षिप्तदीर्घयशोभिः पलायनेन कृत्वा तेषां माहात्म्ययशसी नष्टे इति भावः । अथ समासः । उत्तुङ्गं च तद् माहात्म्यं च उत्तुङ्गमाहात्म्यं पातितम् उत्तुङ्गमाहात्म्यं यैस्ते पातितोत्तुङ्गमाहात्म्यास्तैः पा० । आयता चासौ कीर्तिश्च आयतकीर्तिः संहृता आयतकीर्तिर्यैस्ते संहृतायतकीर्तयस्तैः सं० । आवृत्तिरेव साहसः आ० । इति वृत्तार्थः ॥ ११ ॥

नासुरोऽयं न वा नागो धरसंस्थो न राक्षसः ।
ना सुखोऽयं नवाभोगो धरणिस्थो हि राजसः ॥ १२ ॥ (गोमूत्रिकाबन्धः)

'नासु०' व्याख्या । हे गणाः ! कस्मात् यूयं पलायध्वं यत् **अयं** दृश्यमानो नरः **असुरो** दानवो **न** न भवतीत्यर्थः । **वा** अथवा **नागो** वासुकिप्रभृतिसर्प्पो **न** अथवा **धरसंस्थः** पर्वताकारः **राक्षसो**ऽपि **न** यस्मात् भयं भवेत् तर्हि कोऽयमित्याह- **ना** पुमानयं वर्तते किं० अयं ना ? **सुखः** सुखयतीति सुखः सुखसाध्यः कदाचिन्मनुष्योऽपि पुराणतापसो भविष्यति तदा दुःसाध्यः स्यादित्याह- पुनः किं० अयम् ? **नवाभोगः** अभिनवप्रयत्नवान् चिरन्तनतपस्वी न भवतीति भावः । पुनः किं० ? **धरणिस्थः** भूमिस्थो मनुष्यमात्रः पुनः किं० ना ? **हि** निश्चितं **राजसः** रजोगुणवान् सात्त्विकोऽयं न सात्त्विकाद्धि भयम् आशङ्क्यते इति भावः । अतो भवतां न पलायनमुचितमिति वाक्यार्थः । गोमूत्रिकाबन्धः । 'वर्णानामेकवर्णत्वं

यद्येकान्तरमर्द्दयोः । गोमुत्रिकेति तत्प्राहुः दुष्करं तद्विदो विदुः' इति लक्षणात् (८४) । षोडषकोष्ठद्वयो[ऽर्ध]द्वयं क्रमेण विलिख्यैकान्तरविनिमयेन वाचने श्लोकनिष्पत्तिरित्युद्धारः । अथ समासः । धरतीति धरः धरस्य संस्था यस्य स धरसंस्थः । नव आभोगो यस्य नवाभोगः । धरण्यां संतिष्ठते इति धरणिस्थः । इति वृत्तार्थः ॥१२॥

गोमूत्रिकाबन्धः ।

ना सु रो यं न वा ना गो ध र सं स्थो न रा क्ष सः ।

XXXXXXXXXXXXXXXXXXXXXXXXXXXXXX

ना सु खो यं न वा भो गो ध र सं स्थो न रा ज सः ॥

मन्दमस्यन्निषुलतां घृणया मुनिरेष वः । प्रणुदत्यागतावज्ञं जघनेषु पशूनिव ॥ १३ ॥

'मन्द०' व्याख्या । हे गणाः । **एषो**ऽयं **मुनिः** नवीनतापसः **वो** युष्मान् **आगतावज्ञं** स्वीकृतापमानं यथा स्यात्तथा **जघनेषु** कटिप्रदेशेषु **प्रणुदति** प्रेरयति किंकुर्वन् ? **घृणया** करुणया कृत्वा **मन्दं** शनैः शनैः यथा स्यात्तथा **इषुलतां** बाणश्रेणीम् **अस्यन्** क्षिपन् बाणलतया युष्मान् प्रेरयतीत्यर्थः । कानिव ? **पशूनिव** यथा कश्चित् पशून् सावज्ञं यष्ट्या पश्चाद्भागे मन्दं प्रणुदति तद्वत् कष्टं किमतः परमस्तीति भावः । अथ समासः । इषुरेव लता इषुलता ताम् इषुलताम् । आगता स्वीकृता अवज्ञा यस्मिन् कर्म्मणीति क्रियाविशेषणम्। इति वृत्तार्थः ॥ १३ ॥

न नोननुन्नो नुन्नोनो नाना नानानना ननु । नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥१४॥

(एकाक्षरः)

न ना ऊननुन्नः नुन्नोनः ना अना नानाननाः ननु । नुन्नः अनुन्नः ननुन्नेन ना अनेनाः नुन्ननुन्ननुत्। अत्रैवं पदच्छेदविधिः । अथ व्याख्या । **हे नानाननाः** हे प्रमथाः गणाः ! नानाप्रकाराणि अनेकविधानि सिंहव्याघ्रादीनि आननानि मुखानि येषां ते नानाननास्तेषां संबोधनं हे नानाननाः ! **ननु** इति निश्चितं स **न ना** न पुरुषः किन्तु कापुरुषः स कः यः 'ऊननुन्नः' **ऊनेन** निकृष्टेन हीनेन **नुन्नः** प्रेरितो जितः तथा 'नुन्नोनः' **नुन्नो** विद्धः **ऊनो** हीनो येन स नुन्नोनो यो ना पुमान् स अना अपुरुषः खलु । ऊनाद्भीतस्य पलायमानस्य किं वक्तव्यम् इति भावः । किंच **नुन्नेनः** नुन्नस्त्यक्त इनः स्वामी येन सः नुन्नेनः यः स्वाम्यापदि अन्तरा प्रविश्य मृत्युवशं गतेन वपुषा अक्षयं कीर्तिशरीरं स्वप्राणदानेनार्जयति स एव पुरुषगणनायां प्रथमः इत्यर्थः। यः पुनर्**ननुन्नेनः** स नुन्नोपि अनुन्नः यूयं च अनुन्नस्वामिकत्वात् अनुन्ना एवेति भावः । 'नुन्ननुन्ननुत्' **नुन्नेन** विद्धेन **नुन्नाः** विद्धाः नुन्ननुन्नाः तान् **नुदति** व्यथते इति नुन्ननुन्ननुत् अतिसन्तापितसंतापकः स पुमान् **अनेना** न निष्पापो न भवति किन्तु पापिष्ठ एव । 'नार्त्तं नातिपरिक्षतम्' (८५) इति निषेधात् इत्यर्थः । अयं चैतादृश इति न पलायितव्यमिति भावः । अत्रान्त्यस्तकारस्तु न

दोषावहः 'नान्त्यवर्णस्तु भेदकः' (८६) इत्यभ्यनुज्ञानात् । इति वृत्तार्थः ॥ १४ ॥

वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान् । प्रकृत्या ह्यमणिः श्रेयान्नालङ्कारश्च्युतोपलः ॥१५॥

'वरं०' व्याख्या । हे गणाः ! **अत्यन्तम्** अतिशयेन **अगुणो** निर्गुणः **पुमान् वरं** प्रशस्यो भवति। कस्मात्सकाशात् ? 'कृतध्वस्तगुणात्' पूर्वोपार्जितपश्चान्नष्टगुणाद् नरात् **कृतः** निष्पादितः **ध्वस्तः** विनाशितः **गुणो** येन तादृशात् पुरुषात् सकाशात् अत्यन्तमगुणः पुमान् प्रशस्य इति तात्पर्यार्थः । अत्रार्थे दृष्टान्तमाह- **हि** यस्मात् कारणात् **प्रकृत्या** स्वभावेन **अमणिः** मणिरहितोऽलङ्कारः भूषणं **श्रेयान्** प्रशस्यतरः वरं **च्युतोपलः** भ्रष्टरत्नोऽलङ्कारः श्रेयान् श्रेष्ठो न 'उपलः प्रस्तरे रत्ने' इति *विश्वः* । समरात् पलायितुः असमर एव वरमिति भावः । अथ समासः। पूर्वं कृता पश्चाद् ध्वस्ता इति कृतध्वस्ताः कृतध्वस्ता गुणा यस्य स कृतध्वस्तगुणस्तस्मात् कृ० । न विद्यते गुणो यस्मिन् सोऽगुणः । च्युत उपलो यस्मात् स च्युतोपलः । इति वृत्तार्थः ॥ १५ ॥

स्यन्दना नो चतुरगा सुरेभा वाऽविपत्तयः । स्यन्दना नो च तुरगाः सुरेभा वा विपत्तयः ॥१६॥

(समुद्गकः)

'यन्द०' व्याख्या । हे गणाः ! अत्र संग्रामे **स्यन्दना** रथा **नो** न सन्ति न विद्यन्ते **च** पुनः **तुरगाः** हयाः नो सन्ति **वा** चार्थे पुनः **सुरेभाः** देवदन्तिनो नो सन्ति पुनः **विपत्तयो** विशिष्टपदातयो नो सन्ति अथ सर्वेऽपि विशिष्यन्ते - किं० स्यन्दनाः ? [स्यन्दन्ते प्रस्रवन्तीति **स्यन्दना** जवनाः वेगवन्त इत्यर्थः । **चतुरं**] मनोहरं गच्छन्तीति **चतुरगाः** । किं० सुरेभाः ? 'रभृ शब्दे' सुष्ठु रेभन्ते शब्दायन्ते ते सुरेभाः शोभनबृंहता इत्यर्थः । किंलक्ष० विपत्तयः ? **अविपत्तयः** न विद्यते विपत्तिर्नाशो येषां ते अविपत्तयः विपत्तिरहिता इत्यर्थः । एतादृशानां रथानां तुरगाणां पत्तीनाम् अभावाद्भवद्भिर्न भेतव्यमिति भावः । अर्थद्वयसादृश्यात् समुद्गकयमको नाम यमकम्[1] । इति वृत्तार्थः ॥ १६ ॥

भवद्भिरधुनारातिपरिहापितपौरुषैः । ह्रदैरिवार्कनिष्पीतैः प्राप्तः पङ्को दुरुत्तरः ॥ १७ ॥

'भव०' व्याख्या । हे गणाः ! **भवद्भिः** युष्माभिः **अधुना** साम्प्रतं **दुरुत्तरो** दुर्निवारः पङ्क इव पङ्कः **पङ्कोऽ**यशोलक्षणः **प्राप्तः** किं० भवद्भिः ? **अरातिपरिहापितपौरुषैः** वैरिविनाशितविक्रमैः कैरिव ? **ह्रदैः** जलाशयविशेषै**रिव** यथा ह्रदे पङ्कः कर्दमः प्राप्यते तद्वदित्यर्थः । किं० पङ्कः ? **दुरुत्तरः** दुस्तरः किं० ह्रदैः ? **अर्कनिष्पीतैः** रविकिरणशोषितैः । अथ समासः । अरातिना परिहापितानि पौरुषाणि यैस्ते अरातिपरिहापितपौरुषास्तैः अ० । अर्केण निष्पीताः अर्कनिष्पीतास्तैर० । दुःखेनोत्तीर्यते दुरुत्तरः । इति वृत्तार्थः ॥ १७ ॥

१. अत्र पूर्वोत्तरार्धगतानां विशेषणानां विशेष्याणां चोद्देशोद्देश्यीभूतानां यथासंख्यसंबन्धानुक्रमाद्यथासंख्यालंकारो यमकेन संसृष्टः -म. ।

वेत्रशाककुजे शैलेऽलेशैजेऽकुकशात्रवे । यात किं विदिशो जेतुं तुञ्जेशो दिवि किंतया ॥१८॥
(प्रतिलोमानुलोमपादः)

'वेत्र०' व्याख्या । यूयं **विदिशः** अवान्तरदिशोऽग्निकोणादयः **जेतुं** जयनाय **किं यात** किं गच्छत दिशो विहायान्यदिशः किं गच्छत इत्यर्थः । किं० यूयम् ? **किंतया** केषां भावः किंता तया किंतया कुत्सिततया उपलक्षिताः । पुनः किं० यूयम् ? **शैले** पर्वते वर्तमानाः इति शेषः । किं० शैले ? 'वेत्रशाककुजे' कौ भूम्यां जायन्त इति कुजाः **वेत्राणि** वंशाः फलिन्यो वा **शाका** बर्बराः **कुजाश्च** वृक्षाः यस्मिन् स वेत्रशाककुजस्तस्मिन् वेत्रशाककुजे शत्रूणां दुष्प्रवेश्ये इत्यर्थः । पुनः किं० शैले ? **अलेशैजे** 'एजृ कम्पने' एजयति कम्पयतीत्येजः पच्यादित्वादप्रत्ययः लेशेन स्तोकमात्रेण अल्पप्रयासेन एजते कम्पते इति लेशैजः न लेशैजोऽलेशैजस्तस्मिन् अलेशैजे । स्तोकेन न कम्पत इत्यर्थः । यत्र पर्वते स्थितः सन् केन शत्रोः कम्पमुत्पादयति । तत्र महदुग्र इत्यर्थः । पुनः किं० शैले ? **अकुकशात्रवे** 'कुकतृक आदाने' कुकति आदत्ते इति कुकः न कुकोऽकुकः शत्रुरेव शात्रवः स्वार्थे अण् अकुकः अनादाता अग्राहकः ग्रहीतुं समर्थः शात्रवो यस्मिन् सोऽककुशात्रवस्तस्मिन् अककुशात्रवे । किं० यूयम् ? **दिवि** स्वर्गे **तुञ्जेशः** 'तुञ्जि हिंसायां' तुजन्ति हिसन्तीति तुञ्जाः स्वर्गद्विषो दैत्याः तेभ्यः ईशते प्रभवन्तीति क्विप् तुञ्जेशः । यद्वा तुजि हिंसार्थः तुञ्जशब्देन हिंसनं बलं च उच्यते तुञ्जस्य मारणस्य बलस्य वा ईशः स्वामिनः तुञ्जेशः स्वर्गेऽप्यसुरजयिनां भवताम् अत्र क्षुद्रस्थले क्षुद्रशत्रौ पलायनमतिकष्टमिति भावः अनुलोमप्रतिलोमार्द्धः । इति वृत्तार्थः ॥१८॥

ईशे तिष्ठति सति यत्पलायनं तन्न युक्तमित्याह -

अयं वः क्लैब्यमापन्नान् दृष्टपृष्ठानरातिना । वाञ्छतीशश्च्युताचारान् दारानिव निगोपितुम् ॥१९॥

'अयं०' व्याख्या । हे गणाः ! **अयम् ईशः** महादेवः **वः** युष्मान् **निगोपितुं** रक्षितुं **वाञ्छति** अभिलषति स्वमहिम्ना युष्मद्दोषं परिहर्तुमिच्छतीत्यर्थः । किं० वः ? **क्लैब्यं** निष्पौरुषम् **आपन्नान्** प्राप्तान् पुनः किं० वः ? **अरातिना** वैरिणा **दृष्टपृष्ठान्** दृष्टवंशान् पलायमानानित्यर्थः । पुनः किं० वः ? **च्युताचारान्** भ्रष्टमर्यादान् भ्रष्टसंग्रामाचारानित्यर्थः । कानिव ? **दारान्** कलत्रा**णीव** यथा कश्चित् पुमान् निगोपितुं वाञ्छति । सर्वाण्यपि विशेषणानि दारपक्षे योज्यानि । अथ समासः । क्लीबस्य भावः क्लैब्यम्। दृष्टं पृष्ठं येषां ते दृष्टपृष्ठास्तान् दृ० । च्युत आचारो येभ्यस्ते च्युताचारास्तान् च्यु० । इति वृत्तार्थः ॥१९॥

ननु हो मथना राघो घोरा नाथमहो नु न । तयदातवदा भीमा माभीदा बत दायत ॥२०॥
(प्रतिलोमानुलोमार्धः)

'ननु०' व्याख्या । **ननु** इति पृच्छायां **हो** इत्याह्वाने **बत** इति खेदे **नु** पुनरावर्तनेन यूयम् आत्मानं किं **न दायत** किं न श्रद्धात 'दैप् शोधने' यतः 'प्रासः पङ्को दुरुत्तर' (का. १७) इति प्रागुक्तम् । अतोऽधुना शुद्धयत पलायनं माकार्ष्टमित्यर्थः । किं० यूयम् ? **मथनाः** मथ्नातीति मथनाः पीडाकारिणः

'मथि विलोडने'। पुनः किं० यूयम् ? राघः 'राघृ सामर्थ्ये' राघतीति क्विप् **राघः** समर्थाः पुनः किं० यूयम् ? **घोराः** क्रूराः द्रष्टुमशक्याः पुनः किं० यूयम् ? 'नाथमहः' **नाथं** स्वामिनं **महयन्ति** पूजयन्तीति नाथमहः महादेवानुचराः। पुनः किं० यूयम् ? 'तयदातवदाः' तयन्ते रक्षन्तीति **तयाः** रक्षयितारः पच्यादित्वाद् अप्रत्ययः । दाताः दायन्ते स्म **दाताः** शुद्धाः दैपः कर्तरि क्तः । वदाः वदन्तीति **वदा** वक्तारः । यद्वा 'वद स्थैर्ये' वदन्तीति वदाः स्थिराः तयाश्च दाताश्च वदाश्च तयदातवदाः इतरेतरद्वन्द्वः । पुनः किं० यूयम् ? **भीमाः** भयङ्कराः पुनः किं० ? **माभीदाः** मा भीरभीस्तां ददातीति माभीदाः अभयप्रदाः प्रतिलोमानुलोमपादः । इति वृत्तार्थः ॥ २० ॥

किं त्यक्तापास्तदेवत्वमानुष्यकपरिग्रहैः । ज्वलितान्यगुणैर्गुर्वी स्थिता तेजसि मानिता ॥२१॥

'किं०' व्याख्या । हे गणाः ! युष्माभिरिति शेषः । **मानिता** शूरत्वाभिमानिता **किं** कथं **त्यक्ता** आजितो निर्लज्जैः पलायत इति भावः । किं० मानिता ? **गुर्वी** वरिष्ठा पुनः किं० मानिता ? **तेजसि** प्रतापे **स्थिता** प्रतापैकशरणेत्यर्थः । किं० भवद्भिः ? **अपास्तदेवत्वमानुष्यकपरिग्रहैः** त्यक्तदेवत्वमानुष्यत्व-स्वीकारैः पुनः किं० भवद्भिः ? **ज्वलितान्यगुणैः** उज्ज्वलितान्यौदार्यादिगुणैः भवद्भिरन्यगुणा उज्ज्वलिता इति भावः । अथ समासः । अपास्तं देवत्वं यैस्ते अपास्तदेवत्वाः मनुष्याणां भावो मानुष्यकम् अपास्तः देवत्वमानुष्यकपरिग्रहो यैस्ते अपास्तदेवत्वमानुष्यकपरिग्रहास्तैः अ० । ज्वलिता अन्यगुणा यैस्ते ज्वलितान्यगुणास्तैः ज्वलितान्यगुणैः । इति वृत्तार्थः ॥ २१ ॥

निशितासिरतोऽभीको न्येजतेऽमरणा रुचा । सारतो न विरोधी न[1] स्वाभासो भरवानुत ॥२२॥

'निश०' व्याख्या । हे **अमरणा** मरणवर्जिताः गणाः ! एष मुनिः **सारतो** बलात् **न विरोधी** इति **न** अपितु विरोधी एव । प्रस्तावाकर्तुन (?) एव । द्वौ नञौ प्रकृत्यर्थं सूचयतः । कथं ज्ञायते विरोधी इत्याह- किं० अयम् अर्जुनः ? **रुचा** कान्त्या **न्येजते** तेजस्वितया निष्प्रकम्पो दृश्यते अतो भवद्भिरपि स्थातव्यं न चलितव्यं किं० अयम् ? **निशितासिरतः** तीक्ष्णखड्गसक्तः पुनः किं० अयम् ? **स्वाभासः** सुष्ठु आभासतेति स्वाभासः दर्शनीयः 'भासृ दीप्तौ' सु आङ् पूर्वः । पुनः किं० अयम् ? **उत** अत्यर्थं भरवान् 'भृ भरणे' भरतीति भरः भरोऽस्यास्तीति **भरवान्** रणभरसहिष्णुः कवचादिभारयुक्त इत्यर्थः । अथ समासः। निशितश्चासावसिश्च निशितासिः निशितासौ रतः नि० । न विद्यते भीर्यस्य सोऽभीकः । न विद्यते मरणं येषां ते अमरणाः तेषां संबोधनं हे अमरणाः ! । विरोधोऽस्यास्तीति विरोधी प्रतिलोमानुलोमपरिश्लोकः । इति वृत्तार्थः ॥२२॥

ननु अयं न चलतीति कथं विज्ञायते तत्राह -

तनुवारभसो भास्वानधीरोऽविनतोरसा । चारुणा रमते जन्ये कोऽभीतो रसिताशिनि ॥२३॥

(प्रतिलोमानुलोमेन श्लोकद्वयम्)

1. नः -म.

'तनु०' व्याख्या । हे गणाः ! **कोऽभीतः** सन् निर्भयः सन् एवंलक्षणे **जन्ये** संग्रामे **रमते** न कोऽपीत्यर्थः । यदि रमते तर्हि अर्जुन एव रमते इत्यर्थः । किं० अर्जुनः ? 'तनुवारभसः' तनुं वृणोतीति **तनुवारं** कवचं कार्ये अण् तेन **बभस्ति** राजते इति तनुवारभसः वर्मणा शोभमानः पुनः किं० अर्जुनः ? **भास्वान्** दीप्तिवान् तेजस्वीत्यर्थः । पुनः किं० अर्जुनः ? 'अधीरः' **अः**कृष्णस्तद्वद् **धीरो** धैर्यवान् पुनः किं० अर्जुनः ? **चारुणा** मनोहरेण **विनतोरसा** उन्नतवक्षसोपलक्षितः किं० जन्ये ? **रसिताशिनि** रसितेन रवेणैव अश्नातीति रसिताशी तस्मिन् रसिताशिनि शब्देनैव जगत्प्राणहारिणीत्यर्थः । निर्भयसंवारात् एव अस्य निश्चलत्वं निश्चीयते इत्यर्थः । प्रतिलोमानुलोमश्लोकद्वयम् । इति वृत्तार्थः ॥ २३ ॥

पञ्चभिः कुलकमाह - तत्र महाहवं विशिनष्टि -

[1]निर्भिन्नपातिताश्वीयनिरुद्धरथवर्त्मनि । हतद्विपनगष्ठ्यूतरुधिराम्बुनदाकुले ॥ २४ ॥

'निर्भि०' व्याख्या । किं० महाहवे रणे ? 'निर्भिन्नपातिताश्वीयनिरुद्धरथवर्त्मनि' अश्वानां समूहाः **अश्वीयं** पूर्वं **निर्भिन्नं** विदारितं पश्चात्**पातितं** तच्च तद् अश्वीयं च निर्भिन्नपातिताश्वीयं तेन **निरुद्धं रथानां वर्त्म** यस्मिन् तत् तस्मिन् निर्भि० । पुनः किं० महाहवे ? 'हतद्विपनगष्ठ्यूतरुधिराम्बुनदाकुले' **हताः** मारिताः **द्विपा** गजा एव **नगाः** शैलाः तेभ्यो **ष्ठ्यूतानि** पतितानि **रुधिराण्येव अम्बूनि** तेषां **नदाः** प्रवाहाः **तैराकुले** व्याप्ते । इति वृत्तार्थः ॥ २४ ॥

सर्वतोभद्रः -

एकपादं लिखित्वा अधश्चत्वारः पादा लेखनीयाः । अतोऽनुलोमेन प्रतिलोमेन च ऊर्ध्वम् अधः तिर्यग् च वाचनीयं सर्वथा च पाठं ददातीति सर्वतोभद्रम् उच्यते -

देवाकानिनि कावादे वाहिकास्वस्वकाहि वा । काकारेभभरे काका निस्वभव्यव्यभस्वनि ॥२५॥

(सर्वतोभद्रः)

'देवा०' व्याख्या । पुनः किं० महाहवे ? **देवाकानिनि** 'कनी दीप्तौ' आङ्पूर्वकः देवान् आकनति प्रदीपयति क्रोधे सतीति । देवाकानी णिनिप्रत्ययः तस्मिन् देवाकानिनि देवताकोपोत्पादिनि । अथवा कै गै रै शब्दे आङ्पूर्वः भावे ल्युद् आकानं देवानामाकानं देवाकानं तत् यत्रास्तीति स देवाकानी । अथवा देवान् आकारयत्यादूयतीति देवाकानी तस्मिन् देवाकानिनि देवध्वनियुक्ते इत्यर्थः । पुनः किं० महाहवे ? **कावादे** ईषत् वादे कावादः - वाग्कलहः तत्र हि अहंपूर्वमुत्तिष्ठामिति इर्षत् वादो भटानां कावादः । अथवा कुत्सिता वादा यत्र तस्मिन् कावादे कुत्सितशब्दवति । पुनः किं० महाहवे ? वाहिकासु सुभटानां वाहवाहनपरिपाटीषु सतीषु **अस्वकाहि वा**शब्दश्चार्थे स्वका स्वकीया न स्वका अस्वकाः परे वैरिणः कथ्यन्ते तान् अस्वकान् आजिही ते आगच्छतीति अस्वकाहास्तस्मिन् अस्वकाहि शत्रुपरिगामिनीत्यर्थः ।

1. विभिन्न० -म. इदं च पा.

योद्धृधर्मो युद्धे उपचर्यते 'ओहाङ् गतौ' इत्यस्य क्विबन्तस्य प्रयोगः सोमपाशब्दवत्प्रक्रिया। पुनः किं० महाहवे? 'काकारेभभरे' कं पानीयम् आकिरन्तीति आक्षिपन्तीति **काकाराः** मेघाः काकारतुल्याः जलदसमानाः ये **इभा** हस्तिनः तेषां **भरः** समूहो यस्मिन् तत् तस्मिन् काकारेभभरे मेघाकारगजसंपूर्णे इत्यर्थः। तेषां गणानां यदा आमन्त्रणं क्रियते तदा हे अकाकाः काकाश्चपलाः न काकाः अकाकाः। न भवन्तः काका इव अनवस्थिता इत्यर्थः। संग्रामे यूयम् अचपला इति भावः। पुनः किं० महाहवे? 'निस्वभव्यव्यभस्विनि'। **निस्वा** रणं कर्तुम् अक्षमा अशूराः **भव्याः** योद्धुं समर्थाः शूराः निस्वाश्च भव्याश्च निस्वभव्यास्तान् उभयान् संवृण्यन्ति रक्षन्तीति निस्वभव्ययाः सुभटाः उच्यन्ते 'व्येञ् संवरणे' आतो डः तैः बभस्ति भासते यस्तस्मिन् निस्वभव्यव्यभस्विनि। 'अन्येभ्योऽपि दृश्यते' इति क्वनिप्प्रत्ययः। इति वृत्तार्थः॥ २५॥

सर्वतोभद्रः।

दे	वा	का	नि	नि	का	वा	दे
वा	हि	का	स्व	स्व	का	हि	वा
का	का	रे	भ	भ	रे	का	का
नि	स्व	भ	व्य	व्य	भ	स्व	नि
नि	स्व	भ	व्य	व्य	भ	स्व	नि
का	का	रे	भ	भ	रे	का	का
वा	हि	का	स्व	स्व	का	हि	वा
दे	वा	का	नि	नि	का	वा	दे

प्रनृत्तशववित्रस्ततुरङ्गाक्षिप्तसारथौ। मारुतापूर्णतूणीरविकृष्टहतसादिनि॥ २६॥

'प्रनृ०' व्याख्या। पुनः किं० महाहवे? 'प्रनृत्तशववित्रस्ततुरङ्गाक्षिप्तसारथौ' **प्रनृत्तेभ्यः शवेभ्यः** कबन्धेभ्यो **वित्रस्ता** ये **तुरङ्गा** हयाः तैः **आक्षिप्ताः** पातिता **सारथयो** यत्र स तस्मिन् प्रनृत्तशववित्र० पुनः किं० महा०? 'मारुतापूर्णतूणीरविकृष्टहतसादिनि' **मारुतेन** समीरणेन **आपूर्णा** अशून्या ये **तूणीराः** निषङ्गाः तैः **विकृष्टा** शोचिता विक्रुष्ट[1]पाठे शब्दायमानाः अत एव **हता** मारिताः **सादिनो**ऽश्ववाराः यत्र

1. एष पाठः म. मध्ये

स तस्मिन् मा० । इति वृत्तार्थः ॥ २६ ॥

ससत्त्वरतिदे नित्यं सदरामर्षनाशिनि । त्वराधिककसन्नादे रमकत्वमकर्षति ॥ २७ ॥

(अर्धभ्रमकः)

'स स०' व्याख्या । पुनः किंलक्षणे महाहवे ? **नित्यं** सर्वदा 'ससत्त्वरतिदे' **ससत्त्वानां** सत्त्ववतां **रतिदे** सुखकारिणि अनुरागप्रदे इत्यर्थः । पुनः किं० महा० ? **सदरामर्षनाशिनि** सभयानां क्रोधापहारिणि पुनः किं० म० ? 'त्वराधिककसन्नादे' **त्वरया** उत्साहेन **अधिकं कसन्तो** विकसन्तो **नादा** रवा **यस्मिन्** युयुत्सयाधिकप्रसरत्सिंहनादे इत्यर्थः । पुनः किं० महा० ? **रमकत्वमकर्षति** रणकर्मणापररञ्जकत्वम् अकर्षति अविनाशयति । अथ समासः । सह सत्त्वेन वर्तते ये ते ससत्त्वाः रतिं ददातीति रतिदः ससत्त्वानां रतिदः ससत्त्वरतिदस्तस्मिन् स० । दरेण सह वर्तमानाः सदराः सदराणाम् अमर्षः सदरामर्षः सदरामर्षं नाशयतीति सदरामर्षनाशी तस्मिन् स० । रमयन्तीति रमकः रमकस्य भावो रमकत्वम् । कर्षतीति कर्षन् न कर्षन् अकर्षन् तस्मिन् अकर्षति । इत्यर्धभ्रमकम् ॥ २७ ॥

अर्धभ्रमकः ।

स	स	त्त्व	र	ति	दे	नि	त्यं
स	द	रा	म	र्ष	ना	शि	नि
त्त्व	रा	धि	क	क	सं	ना	दे
र	म	क	त्त्व	म	क	र्ष	ति

आसुरे लोकवित्रासविधायिनि महाहवे । युष्माभिरुन्नतिं नीतं निरस्तमिह पौरुषम् ॥२८॥

'आसु०' व्याख्या । हे गणाः ! **युष्माभिः** भवद्भिः **इह** मानुष्यकरणे **पौरुषं** पराक्रमं **निरस्तं** त्यक्तं नाशितमित्यर्थः । किं० पौरुषम् ? **आसुरे** दानवसंबन्धिनि **महाहवे** महायुद्धे **उन्नतिम्** उच्छ्रायं **नीतं** प्रापितं किं० म० ? **लोकवित्रासविधायिनि** सकललोकभयोत्पादिनि भयङ्करे इत्यर्थः । अथ समासः । असुरस्य इदम् आसुरं तस्मिन् आ० । लोकानां वित्रासः लोकवित्रासः लोकवित्रासं विदधातीति लोकवित्रा-सविधायी तस्मिन् लो० । महच्च तत् आहवं महाहवं तस्मिन् म० । इति वृत्तार्थः ॥ २८ ॥ [प.कु.]

इति शासति सेनान्यां गच्छतस्ताननेकधा । निषिध्य हसता किंचित्तस्थे तत्रान्धकारिणा ॥२९॥

(निरौष्ठ्यम्)

'इति०' व्याख्या । **इत्यमुना** प्रकारेण **सेनान्यां** स्कन्दे **तान्** गणान् **अनेकधा** अनेकमार्गे **गच्छतो**

नश्यतः पलायमानान् **निषिध्य** स्थापयित्वा **शासति** शिक्षां ददति सति **तत्र** संग्रामे **किंचित् हसता** हास्यं कुर्वता सता **अन्धकारिणा** महादेवेन **तस्थे** स्थितम् इत्येकालापनिका अथवा 'अन्धकारिणा' **अन्धकस्या-**न्धकासुर**स्यारिः** शत्रुः तेन रुद्रेण किंचिद्धसता सता तस्थे स्थितं किंकृत्वा ? तान् गणान् निषिध्य निवार्य मा पलायनं कुर्यातेति शेषः । किंकुर्वतस्तान् सेनान्याम् इति शासति आज्ञापति सति अनेकधा गच्छतः पलायमानान् इति योजना कर्तव्या । अथ समासः । अन्धकस्य अरिः अन्धकारिस्तेनान्धकारिणा । इति वृत्तार्थः ॥ २९ ॥

मुनीषुदहनातप्ताँल्लज्जया निविवृत्सतः । शिवः प्रह्लादयामास तान्निषेधहिमाम्बुना ॥३०॥

'मुनि०' व्याख्या । **शिवो** रुद्रः **तान्** गणान् **निषेधहिमाम्बुना** मा पलायिषतेति निवारणवचनं तद् एव हिमाम्बु शीतोदकं तेन **प्रह्लादयामास** आह्लादयाञ्चक्रे किं० गणान् ? **मुनीषुदहनातप्तान्** अर्जुनबाणवैश्वानराततिप्तान् पार्थबाणाग्निपीडितानित्यर्थः । पुनः किं० ग० ? **लज्जया** व्रीडया **निविवृत्सतः** निवर्तितुकामान् निवर्त्तिष्यमाणान् इत्यर्थः । अथ समासः । मुनेरिषवो मुनीषवः मुनीषव एव दहनः मुनीषुदहनः मुनीषुदहनेन आतप्ता मुनीषुदहनातप्तास्तान् मु० । निवर्तितुम् इच्छन्तीति निविवृत्सन्ति निविवृत्सन्तीति निविवृत्सन्तस्तान् निविवृत्सतः । निषेध एव हिमाम्बु निषेधहिमाम्बु तेन नि० । इति वृत्तार्थः ॥ ३० ॥

दूनास्तेऽरिबलादूना निरेभा बहु मेनिरे । भीताः शितशराभीताः शङ्करं तत्र शङ्करम् ॥३१॥

(पादाद्यन्तयमकम्)

'दूना०' व्याख्या । **ते** गणाः **तत्र** रणे **शङ्करं** महादेवं **बहु मेनिरे** बहुत्वेन सन्मानितया ज्ञातवन्तः । बह्विति क्रियाविशेषणं किं० शङ्करम् ? **शङ्करं** सुखकरं किं० गणाः ? **दूनाः** अर्जुनशरेण संतप्ताः पीडिता [पुनः किं०गणाः ? **अरिबलाद्** शत्रुबलाद् **ऊना** ऊनबलाः **निरेभाः** निःशब्दाः] पुनः किं० गणाः ? अत एव **भीताः** भयं प्राप्ता त्रस्ताः कुत इत्याह- पुनः किं० गणाः ? **शितशराभीताः** तीक्ष्णबाणैरभिव्याप्ताः । अथ समासः । अरेर्बलम् अरिबलं तस्मात् अ० । शिताश्च ते शराश्च शितशराः शितशरैराभीताः शि० । शं सुखं करोतीति शंकरस्तं शंकरम् । इति पादाद्यन्तयमकवृत्तम् ॥ ३१ ॥

महेषुजलधौ शत्रोर्वर्तमाना दुरुत्तरे । प्राप्य पारमिवेशानमाशश्वास पताकिनी ॥ ३२ ॥

'महे०' व्याख्या । सा **पताकिनी** सेना **ईशानं** रुद्रं **प्राप्य आशश्वास** प्राणिति स्म आश्वसितवतीत्यर्थः । किं० पताकिनी ? **दुरुत्तरे** दुरुत्तरे **शत्रो**रर्जुनस्य संबन्धिनि **महेषुजलधौ** महाबाणसमुद्रे **वर्तमाना** किमिव **पारमिव** यथा समुद्रे वर्तमानः कश्चित् पुमान् पारं प्राप्य समाश्वसति तद्वदित्यर्थः । अथ समासः । महान्तश्च ते इषवश्च महेषवः महेषव एव जलधिः महेषुजलधिः तस्मिन् म० । दुःखेन उत्तीर्यत इति दुरुत्तरस्तस्मिन् दु० । इति वृत्तार्थः ॥ ३२ ॥

स बभार रणापेतां चमूं पश्चादवस्थिताम् । पुरः सूर्यादपावृत्तां छायामिव महातरुः ॥३३॥

'स०' व्याख्या । **स** महादेवः **पुरो**ऽग्रे स्थितः सन्निति शेषः । तां **चमूं** सेनां **बभार** दध्रे किं० चमूम् ? **रणापेतां** संग्रामादपावृत्तां पुनः किं० चमूम् ? **पश्चादवस्थितां** तस्य पृष्ठे वर्तमानां कः कामिव ? महातरुः छाया**मिव** यथा **महातरुः** महावृक्षः **छायां** बिभर्ति धारयति किं० छायाम् ? पुरो**ऽग्रे सूर्यात् अपावृत्तां** पश्चात् स्थिताम् आत्मैकशरणां तां सेनां न मुमोचेत्यर्थः । अथ समासः । रणात् अपेता रणापेता तां र० महांश्चासौ तरुश्च म० । इति वृत्तार्थः ॥ ३३ ॥

मुञ्चतीशे शराञ्जिष्णौ पिनाकध्वनिपूरितः । दधान ध्वनयन्नाशाः स्फुटन्निव धराधरः ॥३४॥

'मुञ्च०' व्याख्या । **धराधरो** इन्द्रकीलः हिमवान् पर्वतः **स्फुटन्निव** विदार्यमाण इव **दधान** ध्वनति स्म शब्दं चकारेत्यर्थः । धराधरः किंकुर्वन् ? **आशा** दिशो **ध्वनयन्** शब्दयन् कस्मिन् सति ? **ईशे** महादेवे **जिष्णाव**र्जुनविषये **शरान्** बाणान् **मुञ्चति** सति बाणवृष्टिं कुर्वति सति किं० धराधरः ? **पिनाकध्वनिपूरितः** ईश्वरकार्मुकशब्देन पूरितः । अथ समासः । पिनाकस्य ध्वनिः पिनाकध्वनिः पिनाकध्वनिना पूरितः पि० । इति वृत्तार्थः ॥३४॥

तद् गणा ददृशुर्भीमं चित्रसंस्था इवाचलाः । विस्मयेन तयोर्युद्धं चित्रसंस्था इवाचलाः ॥३५॥
(मध्यान्तयमकम्)

'तद्ग०' व्याख्या । **गणाः** प्रमथादयः **विस्मयेन** आश्चर्येण **तयोः** हरार्जुनयोः **तद्युद्धं** संग्रामं **ददृशुः** विलोकयामासुः किं० युद्धम् ? **भीमं** भयङ्करं किं० गणाः ? **चित्रसंस्था** विचित्राकाराः स्थिता **इव** पुनः किं० गणाः ? **अचलाः** स्थिराः पुनः किं० गणाः ? उत्प्रेक्ष्यते **चित्रसंस्थाः** आलेख्यलिखिता **अचलाः** पर्वता **इव** स्थिताः । अथ समासः । चित्राः संस्था येषां ते चित्रसंस्थाः । न चलाः अचलाः । चित्रं संस्था येषां ते चित्रसंस्थाः । एकत्र अचलशब्दः पर्वतवाची द्वितीयो निश्चलवाची । इति वृत्तार्थः ॥३५॥

परिमोहयमाणेन शिक्षालाघवलीलया । जैष्णवी विशिखश्रेणिः परिजह्रे पिनाकिना ॥३६॥

'परि०' व्याख्या । **पिनाकिना** महादेवेन **जैष्णवी** अर्जुनसंबन्धिनी **विशिखश्रेणिः** शरपङ्क्तिः **परिजह्रे** परिहृता निवारितेत्यर्थः । किं० पिनाकिना ? **शिक्षालाघवलीलया** अभ्यासपाटवातिशयेन कृत्वा **परिमोहयमाणेन** व्यामोहमुत्पादयता स हि भगवान् शिक्षालाघवेन विशिखसंततीः परिहरन् अर्जुनं मोहितवानित्यर्थः । [अथ समासः ।] परिमोहयते इति परिमोहयमाणस्तेन प० । शिक्षायाः लाघवं शिक्षालाघवं शिक्षालाघवस्य लीला शिक्षालाघवलीला तया शि० । जिष्णोरियं जैष्णवी । विशिखानां श्रेणिः वि० । पिनाकोऽस्यास्तीति पिनाकी तेन पि० । इति वृत्तार्थः ॥ ३६ ॥

अवद्यन्पत्रिणः शम्भोः सायकैरवसायकैः । पाण्डवः परिचक्राम शिक्षया रणशिक्षया ॥३७॥
(आद्यन्तयमकम्)

'अव०' व्याख्या । **पाण्डवो**ऽर्जुनः **शिक्षया** धनुर्वेदाभ्यासेन **रणशिक्षया** संग्रामाभ्यासेन

परिचक्राम चचार उत्साहनैपुण्याभ्यां रणे चचारेत्यर्थः । किंकुर्वन् अर्जुनः ? **सायकैः** बाणैः **शम्भोर्**महादेवस्य **पत्रिणः** बाणान् **अवद्यन्** खण्डयन् किं० सायकैः ? **अवसायकैः** अवसानकरैः देहान्तकारिभिः । अथ समासः । अवद्यतीति अवद्यन् । पत्राणि विद्यन्ते येषां ते पत्रिणस्तान् पत्रिणः । रणस्य शिक्षा रणशिक्षा तया र० । इति वृत्तार्थः ॥ ३७ ॥

चारचञ्चुश्चिरारेची चञ्चच्चीररुचा रुचः । चचार रुचिरश्चारु चारैराचारचञ्चुरः ॥३८॥

(द्व्यक्षरः)

'चा०' व्याख्या । सोऽर्जुनः **चारु** मनोहरं यथा स्यात् तथा **चारैः** गतिभिः **चचार** बभ्राम 'चारः प्रियालुवृक्षे स्याद् गतौ बन्धापसर्प्पयोः' इति *विश्वः* । किं० अर्जुनः ? **चारचञ्चुः** चारैर्गतिविशेषैः वित्तो ज्ञात इति वा अथवा चारा गोमूत्रिकादीनि मण्डलानि तैः प्रसिद्धः 'तेन वित्ते चञ्चुप् चणपौ' इति चञ्चुप्रत्ययः । पुनः किं० अर्जुनः ? 'चिरारेची' **चिरं** चिरकालम् **आरेचयति** रिक्तीकरोति वैरिणः इति चिरारेची । पुनः किं० अर्जुनः ? 'चञ्चच्चीररुचा' संग्रामवशात् **चञ्चत्** चलत् यत् **चीरं** वल्कलं तस्य **रुचा** कान्त्या रुचते इति **रुचः** तेन शोभमानः शोभातिशययुक्त इत्यर्थः । पुनः किं० अ० ? **रुचिरः** सुन्दरः दर्शनीय इत्यर्थः। पुनः किं० अ० ? 'आचारचञ्चुरः' चञ्चूर्यते भृशं चरतीति **चञ्चुरः** चरतेर्यङन्तात्पचाद्यच् । 'चरफलयोश्च' इति नुमागमः । 'यङोऽचि च' इति यङो लुक् । **आचारो** युद्धसमयः तस्य चञ्चुरो भृशमाचरिता । रेफचकारद्व्यक्षरः[इति]वृत्तार्थः ॥ ३८ ॥

स्फुरत्पिशङ्गमौर्वीकं धुनानः स बृहद्धनुः । धृतोल्कानलयोगेन तुल्यमंशुमता बभौ ॥३९॥

'स्फु०' व्याख्या । **सो**ऽर्जुनः **अंशुमता** सूर्येण **तुल्यं** समानं यथा स्यात्तथा **बभौ** शुशुभे सूर्येण समो रराजेत्यर्थः । किं० अर्जुनः ? **बृहत्** महद्**धनुः धुनानः** कम्पयन् आस्फालयन्नित्यर्थः । किं० धनुः ? **स्फुरत्पिशङ्गमौर्वीकम्** उल्लसत्पिङ्गलप्रत्यञ्चं किं० अंशुमता ? **धृतोल्कानलयोगेन** गृहीतोल्कानलसंयोगेन अर्जुनस्य सूर्योपमानं धनुषः उल्कोपमानम् अनलस्य मौर्व्युपमानम् । अथ समासः । स्फुरती पिशङ्गी मौर्वी प्रत्यञ्चा यस्य तत् स्फु० । उल्कैवानलः उल्कानलः उल्कानलस्य योगः उल्कानलयोगः धृत उल्कानलयोगो येन स धृतोल्कानलयोगस्तेन धृ० । अंशवो विद्यन्ते यस्य सोंऽशुमान् तेनांशुमता । इति वृत्तार्थः ॥३९॥

पार्थबाणाः पशुपतेरावव्रुर्विशिखावलिम् । पयोमुच इवारन्ध्राः सावित्रीमंशुसंहतिम् ॥४०॥

'पार्थ०' व्याख्या । **पार्थबाणाः** अर्जुनबाणाः **पशुपतेः** रुद्रस्य **विशिखावलिं** बाणश्रेणिम् **आवव्रुः** आच्छादयामासुः के कामिव ? पयोमुचोंऽशुसंहति**मिव** यथा **पयोमुचो** जलदाः **सावित्रीं** सूर्यसंबन्धिनीम् **अंशुसंहतिं** किरणश्रेणीम् आच्छादयन्ति किं० पयोमुचः ? **अरन्ध्राः** निबिडाः नीरन्ध्राः इत्यर्थः । अथ समासः । पार्थस्य बाणाः पा० । पशूनां पतिः पशुपतिः तस्य प० । विशिखानामावलिः विशिखावलिस्तां विशिखावलिम् । पयो मुञ्चन्तीति पयोमुचः । न रन्ध्राः अरन्ध्राः । सवितुरियं सावित्री तां सावित्रीम् । अंशूनां संहतिः अंशुसंहतिस्ताम् अं० । इति वृत्तार्थः ॥ ४० ॥

शरवृष्टिं विधूयोर्वीमुदस्तां सव्यसाचिना । रुरोध मार्गणैर्मार्गं तपनस्य त्रिलोचनः ॥४१॥

'शर०' व्याख्या । **त्रिलोचनो** महादेवः **मार्गणैः** शरैः कृत्वा **तपनस्य** सूर्यस्य **मार्गम**ध्वानं **रुरोध** आच्छादयामास किंकृत्वा ? **सव्यसाचिना** अर्जुनेन **उदस्तां** क्षिप्ताम् **उर्वीं** महती **शरवृष्टिं** बाणवृष्टिं काकाक्षिगोलकन्यायेन मार्गणैरिति पदस्य अत्रापि संबन्धात् मार्गणैः **विधूय** निरस्य विनाश्येत्यर्थः । अथ समासः । शरस्य वृष्टिः शरवृष्टिस्तां श० । सव्येन सच्यते समवैतीति सव्यसाची तेन स० । त्रीणि लोचनानि यस्य स त्रि० । इति वृत्तार्थः ॥ ४१ ॥

तेन व्यातेनिरे भीमा भीमार्जनफलानना: । न नानुकम्प्य विशिखाः शिखाधरजवाससः ॥४२॥
(शृङ्खलायमकम्)

'तेन०' व्याख्या । **तेन** महादेवेन **विशिखाः** बाणाः **व्यातेनिरे** विस्तारिता क्षिप्ता इत्यर्थः । किंकृत्वा ? तम् अर्जुनं [न] **नानुकम्प्य** अपितु अनुकम्प्य कृपां कृत्वेत्यर्थः । अर्जुनं रक्षित्वैव तेन शरा मुक्ता इत्यर्थः । किं० विशिखाः ? **भीमा** भयंकराः पुनः किं० वि० ? **'भीमार्जनफलाननाः' भीर्भयं** तस्याः **मार्जनं** निराकरणम् अपनयनं भीमार्जनं तदेव **फलं** प्रयोजनं येषां तानि भीमार्जनफलानि तानि **आननानि** मुखानि अग्राणि येषां ते भीमार्जनफलाननाः । पुनः किं० वि० ? **शिखाधरजवाससः** मयूरपिच्छयुक्ताः । अथ समासः । शिखाधरेभ्यो जातानि शिखाधरजानि तान्येव वासांसि येषां ते शि० । काञ्चीयमकम् । शृङ्खलाबन्धः इति केचित् पुनर्मुक्तं गृहीतं विदुः । इति वृत्तार्थः ॥ ४२ ॥

द्युवियद्गामिनी तारसंरावविहतश्रुतिः । हैमीषुमाला शुशुभे विद्युतामिव संहतिः ॥४३॥
(गूढचतुर्थपादः)

'द्युवि०' व्याख्या । **हैमीषुमाला** सुवर्णमयी शिवस्य बाणपङ्क्तिः **शुशुभे** दिदीपे किं० हैमीषुमाला ? **'द्युवियद्गामिनी' द्यां** स्वर्गं **वियद**न्तरिक्षं च **गच्छती**ति द्युवि० 'चन्द्रादित्योपरि द्यौरधस्तात् वियदुच्यते' तद्व्यापिनी । पुनः किं० हैमी ? **तारसंरावविहतश्रुतिः** उच्चैर्गर्जितेन बधिरीकृतकर्णाः के इव ? विद्युतां संहति**रिव** यथा **विद्युताम्** अचिररुचीनां **संहतिः** श्रेणीः शोभते । अथ समासः । द्यौश्च वियच्च द्युवियती द्युवियती गच्छतीति द्युवियद्गामिनी । तारश्चासौ संरावश्च तारसंरावः तारसंरावेण विहता श्रुतिर्यया सा ता० । हेम्नः इयं हैमी । इषूणां माला इ० । आद्यपादत्रये चतुर्थपादाक्षराणि गूढानि विचिन्त्यानि इति गूढचतुर्थकः । इति वृत्तार्थः ॥ ४३ ॥

विलङ्घ्य पत्रिणां पङ्क्तीर्भिन्नः शिवशिलीमुखैः । ज्यायो वीर्यमुपाश्रित्य न चकम्पे कपिध्वजः ॥४४॥

'विल०' व्याख्या । **कपिध्वजो**ऽर्जुनः **न चकम्पे** न चचाल किन्तु सेहे अवतस्थावित्यर्थः । किंकृत्वा ? **ज्यायः** प्रशस्तं प्रशस्यतरं **वीर्यं** सत्त्वम् **उपाश्रित्य** समाश्रित्य अवलम्ब्य गुरुतरं पराक्रममाश्रित्येत्यर्थः । किं० कपि० ? **शिवशिलीमुखैः** महादेवबाणैः आत्मनः **पत्रिणां** बाणानां **पङ्क्तीः**

श्रेणी**र्विलङ्घ्य** अतिक्रम्य **भिन्नो** विद्धः । अथ समासः । शिवस्य शिलीमुखाः शिवशिलीमुखास्तैः शि० । कपिर्वानरो ध्वजे केतौ यस्य सः कपिध्वजः । इति वृत्तार्थः ॥ ४४ ॥

जगतीशरणे युक्तो हरिकान्तः सुधासितः । दानवर्षी कृताशंसो नागराज इवाबभौ ॥४५॥

(अर्थत्रयवाची)

'जग०' व्याख्या । ना अगराज इति पदभेदमाश्रित्य प्रथमोऽर्थो विधीयते । तथाहि- **ना** नरोऽर्जुनः **आबभौ** शुशुभे क इव ? अगराज **इव** यथा **अगानां** गिरीणां **राजा** अगराजो हिमालयः **भाति** शोभते किं० अर्जुनः हिमाचलश्च ? 'जगतीशरणे युक्तः' जगत्याः ईशः **जगतीशः** महादेवः तस्य **रणे** संग्रामे **युक्तः** संलग्नः अर्जुनपक्षे इदं ज्ञेयम् अथागराजपक्षे 'जगतीशरणे युक्तः' **जगत्याः** भूम्याः **शरणे** त्राणे **युक्तो** नियुक्तो धात्रेति शेषः । पुनः किं० अर्जुनः ? 'हरिकान्तः' **हरिः**कृष्णस्तद्वत् **कान्तः** कमनीयः । अथवा **हरिः** सिंहस्तद्वत् कान्तः । अगराजपक्षे पुनः किं० अगराजः ? 'हरिकान्तः' **हरीणां** वानराणां **कान्तो** वल्लभो अथवा **हरीणां** सिंहानां **कान्तः** निवासदानात् । पुनः किं० अर्जुनः ? **'सुधासितः' सुधा** भूमिः तस्यां **सितो** बद्धः तत्प्राप्त्यै विहितोद्यमः । अगराजपक्षे पुनः किं० अ० ? 'सुधासितः' **सुधा** लेपद्रव्यविशेषः तद्व**त्सितो** धवलो हिमाश्रयत्वात् । पुनः किं० अर्जुनः ? 'दानवर्षी' **दानं** वैरिणां खण्डनं **तद्वर्षती**ति दानवर्षी पुनः किं० ? 'कृताशंसः' कृतजयाभिलाषः अथवा **कृता** निष्पादिता **आशंसा** महाशूरोऽयमिति भावना गणैर्यस्य स कृताशंसः । अगराजपक्षे 'दानवर्षीकृताशंसः' **दानवा** दैत्याः **ऋषयो** मुनयः तैः **कृता आशंसा** नानाफलाभिलाषो यस्मिन् स दानवर्षीकृताशंसः इत्येकोऽर्थः । (१)

अथैरावणस्य साम्यमुच्यते- किं० नागराजः ऐरावणः ? जगतीशरणे युक्तः । 'शो तनूकरणे' जगतीं भूमिं श्यन्ती तनूकुर्वन्तीति ते जगतीशाः राक्षसा दानवाः तेषां रणे युक्तो अपिहितः अनाच्छाहित इत्यर्थः । किं० नागराजः ? 'हरिकान्तः' **हरिः** शक्रस्तस्य **कान्तो**ऽभिरामो वाहनत्वात् । अन्यत्र सुतत्वात् । उभयत्रापि विशेषणद्वयं तुल्यमेतत् पुनः किं० नाग० ? **सुधासितः** अमृतवत् धवलः श्वेतवर्णत्वात् अन्यत्र अमृतवत्स्वच्छः शीतल इत्यर्थः । पुनः किं० नाग० ? **दानवर्षी** मदस्रावी अन्यत्र धनप्रदः । पुनः किं० नाग० ? **कृताशंसः** कृता आशंसा संभावना सर्वान् अरीन् जेतुं समर्थोऽयमितीन्द्रेण यस्मिन् कृताशंसः उभयत्रापि तुल्यं विशेषणमिदं पार्थ ऐरावण इवाबभौ । इति द्वितीयोऽर्थः । (२)

अथ शेषनागौपम्यमुच्यते- किं० नागराजः शेषनागः ? **जगतीशरणे युक्तः** भूमिरक्षणे युक्तः स्थापितः देवेनेति शेषः । पुनः किं० नाग० ? **हरिकान्तः** कृष्णप्रियः उभयत्रापि तुल्यमेतत् । पुनः किं० नाग० ? 'सुधासितः' **सुधा** अमृतं तत्र **सितः** आसक्तः अमृतप्रिय इत्यर्थः। अर्जुनपक्षे सुष्ठु दधाति पालयति प्रजाः इति सुधाः क्विबन्तः असितः कृष्णवर्णः सुधाश्चासौ असितश्च सुधासितः । पुनः किं० नाग० ? **दानवर्षी** दानं वर्षं वर्षति मुञ्चतीति दानवर्षी । अर्जुनपक्षे दानं वर्षतीत्येवंशीलो दानवर्षी बहुप्रदः । पुनः किं० नाग० ? **कृताशंसः** कृता पृथिवीधारणे आशंसा यस्मिन् कृताशंसः। अर्जुनपक्षे कृतम् अशं

दु:खं यैस्तान् श्यति अन्तं नयतीति कृताशंसः । यद्वैकपदं दानवर्षीकृताशंसः इति दानवाश्च ऋषयश्च ई:श्रीश्च तैः कृता आशंसा यस्य स दानवर्षीकृताशंसः विहितप्रशंस इत्यर्थः । उभयत्रापि तुल्यमेतत् । सोऽर्जुनः शेषनाग इवाबभौ । इति तृतीयोऽर्थः (३) प्रत्येकं त्रित्वादर्थषट्कम् । (अर्थत्रयवाची) इति वृत्तार्थः ॥ ४५ ॥

एवंविधे युद्धे प्रवर्तमाने किं जातं तदेवाह –

विफलीकृतयत्नस्य क्षतबाणस्य शम्भुना । गाण्डीवधनुषः खेभ्यो निश्चक्राम हुताशनः ॥४६॥

'विफली०' व्याख्या । **गाण्डीवधनुषः** अर्जुनस्य **खेभ्य** इन्द्रियेभ्यो रन्ध्रेभ्यः **हुताशनो** वैश्वानरः **निश्चक्राम** निष्क्रान्तः क्रोधादिति भावः । 'खमिन्द्रये सुखे स्वर्गे' इति *विश्वः* । ननु अर्जुनस्य इन्द्रियेभ्यः कुतो हेतोरग्निर्निष्क्रान्त इत्याह– किं० गाण्डीवधनुषः ? **शम्भुना** महादेवेन **क्षतबाणस्य** भग्नशरस्य पुनः किं० गा० ? अत एव **विफलीकृतयत्नस्य** व्यर्थीकृतप्रयत्नस्य । अथ समासः । अविफलः विफलः कृतः इति विफलीकृतः विफलीकृतो यत्नो यस्य स विफलीकृतयत्नस्तस्य वि० । क्षता बाणा यस्य स क्षतबाणस्तस्य क्ष० । गाण्डीवं धनुर्यस्य स गाण्डीवधनुस्तस्य गा० । इति श्लोकार्थः ॥ ४६ ॥

स पिशङ्गजटावलिः किरन्नुरु तेजः परमेण मन्युना ।
ज्वलितौषधिजातवेदसा हिमशैलेन समं विदिद्युते ॥ ४७ ॥ (प्रबो०)

'स पिशङ्ग०' व्याख्या । **सोऽर्जुनः** **हिमशैलेन समं** हिमाचलेन सह **विदिद्युते** दिदीपे स किं० ? **पिशङ्गजटावलिः** कर्बुरजटाराजिः स किंकुर्वन् ? **परमेण** उत्कटेन **मन्युना** कोपेन **उरु** महत्तेजः **किरन्** विक्षिपन् मुञ्चन्नित्यर्थः । किं० हिमशैलेन ? **ज्वलितौषधिजातवेदसा** देदीप्यमानोषधिवह्निना हिमाद्रिविशेषणं बिम्बप्रतिबिम्बभावेनोपमा । अथ समासः । पिशङ्गी जटावलिर्यस्य स पिशङ्गजटावलिः । औषधिभ्यो जातवेदाः औषधिजातवेदाः ज्वलित औषधिजातवेदा यस्मिन् स ज्वलितौषधिजातवेदास्तेन ज्व० । हिमश्चासौ शैलश्च हिमशैलस्तेन हि० । इति वृत्तार्थः ॥ ४७ ॥

शतशो विशिखानवद्यते भृशमस्मै रणवेगशालिने ।
प्रथयन्ननिवार्यवीर्यतां प्रजिघायेषुमघातुकं शिवः ॥ ४८ ॥ (प्रबो०)

'शत०' व्याख्या । **शिवो** हरः **अस्मै** अर्जुनाय **भृश**मत्यर्थम् **अघातुकम्** अमारकम् अहिंसकम् **इषु** बाणं **प्रजिघाय** प्रहितवान् प्रयुयुजे इत्यर्थः । 'हि गतौ' इति धातोर्लिट् ? 'हेरङि' इति कुत्वम् । किं० अस्मै ? **शतशः** शतसंख्याकान् **विशिखान्** शरान् **अवद्यते** छिन्दते खण्डयते इत्यर्थः । पुनः किं० अस्मै ? **रणवेगशालिने** संग्रामोत्साहकुशलाय किंकुर्वन् शिवः ? निजामिति शेषः । **अनिवार्यवीर्यताम्** अनिषेधनीयपौरुषतां **प्रथयन्** प्रकाशयन् अर्थाद् अर्जुनस्य इति महादेवेन सह अर्जुनेन संग्रामः कृतः । अस्यैवंविधः पराक्रमः इति भावः । अथ समासः । अवद्यतीति अवद्यन् तस्मै अवद्यते । रणस्य वेगः

रणवेगः रणवेगेन शालते इति रणवेगशाली तस्मै र० । अनिवार्यं वीर्यं यस्य स अनिवार्यवीर्यः अनिवार्यवीर्यस्य भावोऽनिवार्यवीर्यता ताम् अ० । इति वृत्तार्थः ॥ ४८ ॥

शम्भोर्धनुर्मण्डलतः प्रवृत्तं तं मण्डलादंशुमिवांशुभर्तुः ।
निवारयिष्यन्विदधे सिताश्वः शिलीमुखच्छायवृतां धरित्रीम् ॥ ४९ ॥ (उप०)

'शम्भो०' व्या० । **सिताश्वोऽर्जुनः धरित्रीं** भूमिं **शिलीमुखच्छायवृतां** बाणसमूहाच्छादितां **विदधे** चकार किंकुर्वन् सिताश्वः ? **शम्भोर्**महादेवस्य **धनुर्मण्डलतः** चापवलयात् **प्रवृत्तं** निष्क्रान्तं **तं** पूर्वोक्तम् अघातुकं बाणं **निवारयिष्यन्** निवर्तयितुकामः । कमिव ? **अंशुमिव** यथा **अंशुभर्तुः** सूर्यस्य **मण्डलात्** बिम्बात् निष्क्रान्तम् अंशुकिरणमिव प्रवृत्तं निष्क्रान्तम् अत्रापीषुवज्जातावेकवचनम् । अथ समासः । अंशूनां भर्ता अंशुभर्ता तस्य अं० । शिलीमुखानां छाया शिलीमुखछायं शिलीमुखछायेन वृता शिलीमुखछायवृता तां शि० । छायाबाहुल्यम् इति नपुंसकत्वम् । इति वृत्तार्थः ॥ ४९ ॥

घनं विदार्यार्जुनबाणपूगं ससारबाणोऽयुगलोचनस्य ।
घनं विदार्यार्जुनबाणपूगं ससारबाणोऽयुगलोचनस्य ॥ ५० ॥ (उपे०)

'घनं०' व्याख्या । **अयुगलोचनस्य** महादेवस्य **बाणः** शरः **घनं** सान्द्रं दृढम् **अर्जुनबाणपूगम्** अर्जुनशरसमूहं **विदार्य** भित्त्वा [**ससार** विवेश] 'अर्जुनबाणपूगम्' **अर्जुनाः** ककुभवृक्षा **बाणाः** नीलसै[रे]यकाः **पूगाः** क्रमुकवृक्षास्तेषां 'विभाषा वृक्षमृगतृणधान्यम्' इत्येकवद्भावः । ककुभबाणवृक्षक्रमुकं **ससार** जगाम प्रविवेशेत्यर्थः । किं० अर्जुनबाणपूगम् ? **विदार्या** लताविशेषेण **घनं** निबिडं दुष्प्रवेशं किं० बाणः ? **ससारबाणः** बलशब्दाभ्यां सहितः पुनः किं० बाणः ? 'अयुग्' न युज्यते न सज्यते कुत्रापीति **अयुग्** असंगः किं० ? **अलोचनस्य** अलोचनस्य अविद्यमानं तृतीयलोचनं नास्ति द्वे लोचने ज्ञायते । यद्वा सर्वलोचनार्थाः ज्ञानार्थाः न लोच्यते न ज्ञायते इति अलोचनस्तस्यालोचनस्य अज्ञातस्येत्यर्थः । अथ समासः । अर्जुनस्य बाणः अर्जुनबाणः अर्जुनबाणानां पूगः अर्जुनबाणपूगस्तमर्जु० । सारश्च बाणश्च सारबाणौ सारबाणाभ्यां सह वर्तमानः स० । अयुगानि लोचनानि यस्य स अयुगलोचनस्तस्य अ० । अर्जुनाश्च बाणाश्च पूगाश्च अ० । इति वृत्तार्थः ॥ ५० ॥

रुजन्हरेषून्बहुधा निपातिनो मुहुः शरौघैरपवारयन्दिशः ।
चलाचलोऽनेक इव क्रियावशान्महर्षिसङ्घैर्बुबुधे धनञ्जयः ॥ ५१ ॥ (वं०)

'रूज०' व्याख्या । **धनञ्जयो**ऽर्जुनः [किं० धनञ्जयः ? **चलाचलः** अतिचञ्चलः कस्मात् ? **क्रियावशात्** युद्धकर्मायत्ततया] **महर्षिसङ्घैः** मुनिसमूहैः **अनेक इव** नानाप्रकार इव अनेके अर्जुनाः इति **बुबुधे** ददृशे दृष्टः धनञ्जयः किंकुर्वन् ? [**मुहुः** वारंवारं] **हरेषून्** महादेवबाणान् **रुजन्** भञ्जन् किं० हरेषून् ? **बहुधा** अनेकप्रकारं यथा स्यात्तथा **निपातिनः** शीघ्रगामिनः क्वचित् '**बहुधाशुपातिनः**'[1] इति

1. एष पाठः म. मध्ये

पाठस्तत्र बहुधा अनेकप्रकारं यथा स्यात्तथा आशु शीघ्रं पातिनः आपपतः आगच्छतः पुनः किंकुर्वन् धनञ्जयः ? **शरौघैः** बाणसमूहैः [**दिश अपवारयन्** दिशा आच्छादयन् । अथ समासः ।] न एकः अनेकः । क्रियाया: वशः क्रियावशः तस्मात् क्रि० । महर्षीणां सङ्घाः महर्षिसङ्घास्तैर्म० । इति वृत्तार्थः ॥५१॥

विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ।
विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ॥ ५२ ॥ (वं०)
(समस्तपादयमकम्)

'विका०' व्याख्या । प्रथमचरणे तावदयमर्थः- **जगती** भूमिः तस्या **ईशो** जगतीशोऽर्जुनस्तस्य **मार्गणाः** शराः **विकाशं** विस्तरं दीप्तिं वा **ईयुः** प्रापुः । द्वितीयपादे- **जगति** विश्वे **ईशमार्गणाः** महादेवबाणाः **विकाशं** विषमगतिम् **ईयुः** भङ्गं प्रापुः । [यद्वा] वयो विहङ्गमाः । 'कस् गतौ' विभिः कसत्यनेन अस्मिन्निति वा विकाशः पक्षिवर्त्म आकाशमित्यर्थस्तम् ईयुः प्रापुः । तृतीयपादे- 'जगतीशमार्गणाः' 'शो तनूकरणे' **जगतीं** भुवं **श्यन्ति** तनूकुर्वन्ति पीडयन्ति ते जगतीशाः दानवास्तान् **मारयन्ति** घ्नन्तीति जगतीशमारः क्विप् ते च ते **गणाः** प्रमथाः जग० **विकाशम्** उल्लासम् **ईयुः** हर्षं प्रापुः । अहो देवेऽप्यस्य पराक्रमप्रसर इति विस्मयात् इति भावः । चतुर्थचरणे- 'जगतीशमार्गणाः' **जगतीशो** महादेवः तस्य **मार्गणाः** मार्गयन्तीति मार्गणः कर्तरि ल्युट् अन्वेषकाम् खगानां काशो गमनं गतिरत्रेति **विकाश**माकाशम् **ईयुः** दिदृक्षयेति भावः । यद्वा 'जगतीशमार्गणाः' **जगतीं** भूमिं **शमयन्ति** निरुपद्रवां कुर्वन्ति ते जगतीशमाः ऋचां गणः तमधीयन्ते इति **आर्गणाः** मुनयः जगतीशमाश्च ते आर्गणाश्च जगतीशमार्गणाः मुनयो **विकाशं** तुष्टिम् **ईयुः** प्रापुः महायमकोऽयम् । इति वृत्तार्थः ॥ ५२ ॥

संपश्यतामिति शिवेन वितायमानं
लक्ष्मीवतः क्षितिपतेस्तनयस्य वीर्यम् ।
अङ्गान्यभिन्नमपि तत्त्वविदां मुनीनां
रोमाञ्चमञ्चिततरं बिभराम्बभूवुः ॥ ५३ ॥ (व०)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *गणयुद्धो* नाम पञ्चदशः सर्गः ।

'संप०' व्याख्या । **तत्त्वविदां** त्रिकालदर्शिनां हरेरंशावतारोऽयमिति विदुषामपि किमुतान्येषामिति भावः । **मुनीनाम्** ऋषीणाम् **अङ्गानि** शरीराणि **अभिन्नं** निबिडम् **अञ्चिततरं** प्रशस्यतरम् अतिरुचिरं **रोमाञ्चं** रोमहर्षं **बिभराम्बभूवुः** धारयामासुः किंकुर्वतां मुनीनाम् ? **क्षितिपतेस्तनयस्य** अर्जुनस्य **वीर्यं** बलं पराक्रमं **संपश्यतां** विलोकयतां किं० क्षितिपतेः ? **लक्ष्मीवतः** जयश्रीयुक्तस्य किं० वीर्यम् ? **शिवेन** महादेवेन **इति** पूर्वोक्तमानेन **वितायमानं** विस्तार्यमाणं 'तनोतेर्यकि' इति वैकल्पिक आकारादेशः । अथ समासः । लक्ष्मीरस्यास्तीति लक्ष्मीवान् तस्य ल० । क्षितेः पतिः क्षितिपतिस्तस्य क्षि० । तत्त्वं विदन्ति ते तत्त्वविदस्तेषां त० । इति वृत्तार्थः ॥ ५३ ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्नवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद्गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गः शरक्षितिमितः समवाप पूर्तिम् ॥ २ ॥

इति श्रीकिरातार्जुनीये महाकाव्ये भट्टभारविकृतौ प्रदीपिका संपूर्णा (प्रदीपिकाभिधानायां वृत्तौ) पञ्चदशः सर्गः समाप्तः ॥ १५ ॥

षोडशः सर्गः।

ततः किराताधिपतेरलघ्वीमाजिक्रियां वीक्ष्य विवृद्धमन्युः ।
स तर्कयामास विविक्ततर्कश्चिरं विचिन्वन्निति कारणानि ॥ १ ॥ (उपे.)

'ततः' व्याख्या । **ततो**ऽनन्तरं **सो**ऽर्जुनः **इति** वक्ष्यमाणप्रकारेण **तर्कयामास** विचारयामास किंकृत्वा ? **किराताधिपतेः** महादेवस्य **अलघ्वीं** महतीम् **आजिक्रियां** रणकर्म संग्रामव्यापारं **वीक्ष्य** विलोक्य किं० सः ? **विवृद्धमन्युः** प्रवृद्धकोपः पुनः किं० सः ? **विविक्ततर्कः** शुद्धविचारः । स किं कुर्वन् ? **चिरं** चिरकालं **कारणानि** रणभरकारणानि रणाधिक्यहेतून् **विचिन्वन्** चिन्तयन् विमृश्यन्नित्यर्थः । अथ समासः। किरातस्य अधिपतिः किराताधिपतिस्तस्य कि० । न लघ्वी अलघ्वी ताम् अ० । आजौ क्रिया आजिक्रिया ताम् आ० । विवृद्धो मन्युर्यस्य स वि० । विविक्तः निष्कलङ्कस्तर्क उहो ज्ञानं वा यस्य स वि० । उपेन्द्रवज्राच्छन्दस्तस्य लक्षणं चेदम् 'उपेन्द्रवज्राजतलागयुग्मम्' । इति वृत्तार्थः ॥१॥

सांप्रतं त्रयोविंशत्या वृत्तैर्वितर्कप्रकारमेवाह –

मदस्रुतिश्यामितगण्डलेखा क्रामन्ति विक्रान्तनराधिरूढाः ।
सहिष्णवो नेह युधामभिज्ञा नागा नगोच्छ्रायमिवाक्षिपन्तः ॥ २ ॥ (उपे.)

'मद०' व्याख्या । हीनस्य किरातस्य युद्धे मम शक्तिह्रासः किमेतदिति कारणेषु वितर्कः । **इहा**स्मिन् संग्रामे **नागाः** हस्तिनो **न क्रामन्ति** न संचरन्ति यथा परेषु रणेषु हस्तिनः संचरन्ति तथा नात्रेत्यर्थः। किं० नागाः ? **मदस्रुतिश्यामितगण्डलेखाः** मदस्रावेण कलुषीकृतकपोलस्थलाः पुनः किं० नागाः ? **विक्रान्तनराधिरूढाः** विक्रान्ताः पराक्रमं कुर्वन्तः कर्तरि क्तः तैर्नरैरधिरूढाः वीरयोद्धाश्रिता इत्यर्थः । पुनः किं० नागाः ? **सहिष्णवः** रणभरसहनशीलाः संग्रामे समर्था इत्यर्थः । पुनः किं० नागाः ? अत एव **युधां** युद्धानां करणे **अभिज्ञाः** कुशलाः शिक्षिता इत्यर्थः । पुनः किं० नागाः ? **नगोच्छ्रायम्** उन्नतत्वात् नगानां पर्वतानाम् उच्छ्रायम् औन्नत्यम् **आक्षिपन्त इव** जयन्त इव स्थिताः पर्वतेभ्योत्युन्नता इत्यर्थः। अथ समासः। मदस्य स्रुतिः मदस्रुतिः मदस्रुत्या श्यामिता गण्डलेखा येषां ते म०। विक्रान्ताश्च ते नराश्च विक्रान्तनराः विक्रान्तनरैरधिरूढाः वि० । नगानाम् उच्छ्रायो नगोच्छ्रायस्तं न० । इति वृत्तार्थः ॥ २ ॥

विचित्रया चित्रयतेव भिन्नां रुचं रवेः केतनरत्नभासा ।
महारथौघेन न संनिरुद्धा पयोदमन्द्रध्वनिना धरित्री ॥ ३ ॥ (उपे.)

'विचित्र०' व्याख्या । किंच एवंविधेन वक्ष्यमाणेन **महारथौघेन** बृहद्रथसमूहेन **धरित्री** पृथ्वी **न संनिरुद्धा** नावृता न व्याप्तेत्यर्थः । किं० महारथौघेन ? **पयोदमन्द्रध्वनिना** मेघवद्गम्भीरशब्देन पुनः

किं० महा० ? [**केतनरत्नभासा** रत्नप्रभया **भिन्नां** संवलितां **रवेः रुचं** कान्तिं] **विचित्रया चित्रयतेव** चित्रवर्णां कुर्वतेव नानावर्णतां नयतेवेत्यर्थः । अत्र रणे रथा अपि न दृश्यन्ते इत्याश्चर्यम् । अथ समासः । केतनानां रत्नानि केतनरत्नानि केतनरत्नानां भासः केतनरत्नभासस्तया के० । महान्तश्च ते रथाश्च म० । महारथानाम् ओघः महारथौघस्तेन म० । पयोदानामिव मन्द्रो ध्वनिर्यस्य पयोदमन्द्रध्वनिस्तेन प० । इति वृत्तार्थः ॥३॥

समुल्लसत्प्रासमहोर्मिमालं परिस्फुरच्चामरफेनपङ्क्ति ।
विभिन्नमर्यादमिहातनोति नाश्वीयमाशा जलधेरिवाम्भः ॥ ४ ॥ (उ.)

'समु०' व्याख्या । किं नु **इहास्मिन्** संग्रामे **अश्वीयं** वाजिवृन्दं **विभिन्नमर्यादम्** उच्छृङ्खलं यथा स्यात्तथा **आशा** दिशो **न आतनोति** न व्याप्नोति किमिव ? **जलधेः** वारिधेः **अम्भो** जल**मिव** यथा जलधेरम्भो युगान्ते दिशो व्याप्नोति न तद्वत् । किं० अश्वीयं जलधेरम्भश्च ? **समुल्लसत्प्रासमहोर्मिमालं** स्फुरत्कुन्तरूपमहत्कल्लोलमालम् अम्भःपक्षे समुल्लसन्ती महोर्मिमाला यत्रेति । पुनः किं० अश्वीयम् ? **परिस्फुरच्चामरफेनपङ्क्ति** उल्लसच्चामररूपफेनश्रेणि । अथ समासः । परिस्फुरच्चामरा एव फेनानां पङ्क्तयो यस्मिन् तत् प० । विभिन्ना मर्यादा यत्र यस्मिन् कर्मणि तत् वि० । अश्वानां समूहः अश्वीयम् । इति वृत्तार्थः ॥ ४ ॥

हताहतेत्युद्धतभीमघोषैः समुज्झिता योद्धृभिरभ्यमित्रम् ।
न हेतयः प्राप्ततडित्त्विषः खे विवस्वदंशुज्वलिताः पतन्ति ॥ ५ ॥ (उपे.)

'हता०' व्याख्या । किंच इहास्मिन् रणे[मुक्तम]मुक्तं करमुक्तं यन्त्रमुक्तमिति चतुष्प्रकारा **हेतयो**ऽस्त्राणि **खे** गगने **न पतन्ति** न संचरन्ति आकाशे उल्लसन्त्यो न दृश्यन्ते कीदृग् अयं रणः इति वितर्काय किं० हेतयः ? **योद्धृभिः** सुभटैः **अमित्रं** रिपुम् **अभि** सन्मुखं **समुज्झिताः** मुक्ताः किं० योद्धृभिः ? **इति उद्धतभीमघोषैः** उद्धतभीषणशब्दवद्भिः इतीति किम् ? भो योद्धारः ! यूयं **हत** प्रहरत मारयत इत्यर्थः । **आहत** कुन्तादिभिः विध्यत किं० हेतयः ? **प्राप्ततडित्त्विषः** समासादितविद्युत्कान्तयः पुनः किं० हेतयः ? **विवस्वदंशुज्वलिताः** सूर्यकिरणैर्दीप्यमानाः । अथ समासः । उद्धताश्च भीमाश्च उद्धतभीमाः उद्धतभीमा घोषा येषां ते उद्धतभीमघोषास्तैरुद्ध० । प्राप्तास्तडितां त्विष इव त्विषो यैस्ते याभिस्ता वा प्रा० । विवस्वतोंऽशवो विवस्वदंशवः विवस्वदंशुभिः ज्वलिता वि० । इति वृत्तार्थः ॥ ५ ॥

अभ्यायतः संततधूमधूम्रं व्यापि प्रभाजालमिवान्तकस्य ।
रजः प्रतूर्णाश्वरथाङ्गनुन्नं तनोति न व्योमनि मातरिश्वा ॥ ६ ॥

[का. १४ यावद् उपजातिच्छन्दः]

'अभ्यायत०' व्याख्या । किंच इह रणे **मातरिश्वा** वायुः **व्योमनि** आकाशे **रजो** रेणुः **न तनोति** न विस्तारयति संग्रामे हि धूलिरुत्पतति सापीह नास्ति कीदृग् अयं रणः इति वितर्कः । किं० रजः ? 'प्रतूर्णाश्वरथाङ्गनुन्नं' **प्रतूर्णै**र्वेगवद्भिर**श्वै रथाङ्गै**श्चक्रैश्च **नुन्नं** प्रेरितं प्रकृष्टवेगवाजिरथचक्रैरुद्धतमित्यर्थः । पुनः

किं० रजः ? **अन्तकस्य** यमराजस्य **प्रभाजालं** कान्तिपटल**मिव** स्थितम् । किं० अन्तकस्य ? **अभ्यायतः** वीरान् हन्तुम् आभिमुख्येन आगच्छतः । इणः शतृप्प्रत्ययः । किं० प्रभाजालम् ? **संततधूमधूम्रम्** अविच्छिन्नधूमवत् धूम्रं कपिशं 'कपिशो धूम्र' इत्*यमरः* । पुनः किं० प्रभा० ? **व्यापि** सर्वतो विस्तारि व्यापकमित्यर्थः । अथ समासः । संततश्चासौ धूमश्च संततधूमः संततधूमवत् धूम्रं सं० । प्रभायाः जालं प्र० । प्रकृष्टं तूर्णं वेगो येषां ते प्रतूर्णाः प्रतूर्णाश्च ते अश्वाश्च प्रतूर्णाश्वाः प्रतूर्णाश्वाश्च रथाङ्गानि च प्रतूर्णाश्वरथाङ्गानि प्रतूर्णाश्वरथाङ्गैर्नुन्नं प्र० । इति वृत्तार्थः ॥ ६ ॥

भूरेणुना रासभधूसरेण तिरोहिते वर्त्मनि लोचनानाम् ।
नास्त्यत्र तेजस्विभिरुत्सुकानामह्नि प्रदोषः सुरसुन्दरीणाम् ॥ ७ ॥

'भूरेणु०' व्याख्या । **अत्र** अस्मिन् संग्रामे **सुरसुन्दरीणां** देवाङ्गनानाम् **अह्नि** दिवसे एव **प्रदोषो** यामिनीमुखं **नास्ति** अपरेषु रणेषु दिवा रात्रिर्भवति इह तु नेति वितर्कः । किं० सुरसुन्दरीणाम् ? **तेजस्विभिः** वीरैः **उत्सुकानाम्** उत्कण्ठितानां धूलिना रुद्धे आकाशे दिवसेऽपि संध्या जायते ततो वीरवरणार्थं सुरसुन्दर्य्य आयान्तीतिभावः । कस्मिन् सति प्रदोषभ्रम इत्याह– **भूरेणुना** पृथ्वीरजसा **लोचनानां** नेत्राणां **वर्त्मनि** मार्गे **तिरोहिते** आच्छादिते सति किं० भूरेणुना ? **रासभधूसरेण** गर्दभवत् ईषत्पाण्डुरेण। अथ समासः । भुवो रेणुः भूरेणुस्तेन भू० । रासभवत् धूसरः रासभधूसरस्तेन रा० । सुराणां सुन्दर्यः सुरसुन्दर्यः तासां सु० । इति वृत्तार्थः ॥ ७ ॥

रथाङ्गसंक्रीडितमश्वहेषा बृहन्ति मत्तद्विपबृंहितानि ।
संघर्षयोगादिव मूर्च्छितानि ह्रादं निगृह्णन्ति न दुन्दुभीनाम् ॥ ८ ॥

'रथाङ्ग०' व्याख्या । अस्मिन् संग्रामे एतानि गुरुतराणि पदार्थानि **दुन्दुभीनां** वाद्यविशेषाणां **ह्रादं** शब्दं **न निगृह्णन्ति** न तिरस्कुर्वन्ति किं० एतानि ? उत्प्रेक्ष्यते **संघर्षयोगादिव** परस्परस्पर्धासंबन्धात् संपर्कादिव **मूर्च्छितानि** वृद्धिं गतानि एतानि कानि ? **रथाङ्गसंक्रीडितं** चक्रधाराध्वनिः तथा **अश्वहेषा** हयहेषितानि तथा **बृहन्ति** गुरूणि **मत्तद्विपबृंहितानि** मत्तकरिगर्जितानि 'बृहितं करिगर्जितम्' । अथ समासः । रथाङ्गानां संक्रीडितं र० । अश्वानां हेषा अश्वहेषाः । मत्ताश्च ते द्विपाश्च मत्तद्विपाः मत्तद्विपानां बृंहितानि म० । संघर्षस्य योगः संघर्षयोगस्तस्मात् सं० । इति वृत्तार्थः ॥ ८ ॥

अस्मिन्यशःपौरुषलोलुपानामरातिभिः प्रत्युरसं क्षतानाम् ।
मूर्छान्तरायं मुहुरुच्छिनत्ति नासारशीतं करिशीकराम्भः ॥ ९ ॥

'अस्मिन्०' व्याख्या । किञ्च **अस्मिन्** संग्रामे **करिशीकराम्भः** गजानां वमथूदकं **मुहुर्वारं**वारं वीराणां **मूर्च्छान्तरायं** मोहविघ्नं रणविघ्नम् इत्यर्थः । **न उच्छिनत्ति** न दूरीकरोति न स्फेटयतीत्यर्थः। यथा अन्येषु रणेषु तथेह नेत्यर्थः । 'वमथुः करशीकरः' इति *हैमः* [१२२३] । किं० वीराणाम् ? **यशःपौरुषलोलुपानां** कीर्तिविक्रमगृह्यानां कीर्तिविक्रमौ ग्रहीतुकामानामित्यर्थः । मूर्च्छान्तराये हेतुमाह–

पुनः किं० वीराणाम् ? **अरातिभिः** वैरिभिः **प्रत्युरसं** हृदये **क्षतानां** हतानां किं० कारि० ? **आसारशीतं** वेगवती वृष्टिस्तद्वत् शीतलम् । अथ समासः । यशश्च पौरुषं च यशःपौरुषे यशःपौरुषयोर्लोलुपाः यशःपौरुषलोलुपास्तेषां य० । उरसि प्रति प्रत्युरसम् । मूर्च्छैवान्तरायो मूर्च्छान्तरायस्तं मू० । आसारवत् शीतम् आ० । करिशीकरस्य अम्भः क० । इति वृत्तार्थः ॥९॥

असृग्नदीनामुपचीयमानैर्विदारयद्भिः पदवीं ध्वजिन्याः ।
उच्छ्रायमायान्ति न शोणितौघैः पङ्कैरिवाश्यानघनैस्तटानि ॥ १० ॥

'असृ०' व्याख्या । किञ्च **अस्मिन्** रणे **असृग्नदीनां** रुधिरसरितां **तटानि** तीराणि **शोणितौघैः** रुधिरप्रवाहैः **उच्छ्रायम्** औन्नत्यं **न आयान्ति** न प्राप्नुवन्ति न गच्छन्तीत्यर्थः । किं० शोणि० ? **उपचीयमानैः** प्रवर्द्धमानैः वृद्धिं नीयमानैरित्यर्थः । किंकुर्वद्भिः शोणितौघैः ? **ध्वजिन्याः** सेनायाः **पदवीं** मार्गं **विदारयद्भिः** दुर्गमं कुर्वद्भिरित्यर्थः । 'विदूरयद्भिः' इतिपाठे दुःसंचारां कुर्वद्भिः पुनः किं० शोणितौघैः ? उत्प्रेक्ष्यते पङ्कै**रिव** यथा **पङ्कैः** कर्दमैः नदीनां तटं रुध्यते किं० पङ्कैः ? **आश्यानघनैः** ईषत्शुष्कनिबिडैः। अथ समासः । असृजां नद्यः असृग्नद्यः तासाम् असृ० । शोणितस्य ओघाः शोणितौघास्तैः शो० । आश्यानाश्च घनाश्च आश्यानघनास्तैः आ० । इति वृत्तार्थः ॥ १० ॥

परिक्षते वक्षसि दन्तिदन्तैः प्रियाङ्कशीता नभसः पतन्ती ।
नेह प्रमोहं प्रियसाहसानां मन्दारमाला विरलीकरोति ॥ ११ ॥

'परि०' व्याख्या । **इह** रणे **मन्दारमाला** मन्दारकुसुमहारः **प्रियसाहसानां** सुभटानां गजाभियायिनाम् इति भावः । **प्रमोहं** प्रहारमूर्च्छां **न विरलीकरोति** न मन्दीकरोतीत्यर्थः । कस्मिन् सति ? **दन्तिदन्तैः** गजदन्तैः **वक्षसि** हृदये **परिक्षते** विदारिते सति किं० मन्दारमाला ? अत एव **प्रियाङ्कशीता** भार्योत्संगवत् शीतलाः सुखदायित्वात् मन्दारमाला सुरमुक्तेति शेषः । पुनः किं० मन्दा० ? **नभसो** गगनात् **पतन्ती** आगच्छन्ती अन्यस्मिन् रणे मन्दारमाला दृष्टा इह न दृश्यते इति वितर्कः । अथ समासः । दन्तिनां दन्ताः दन्तिदन्तास्तैर्द० । प्रियायाः अङ्कः प्रियाङ्कः प्रियाङ्कवत् शीता प्रि० । प्रियं साहसं येषां ते प्रियसाहसास्तेषां प्रि० । मन्दाराणां माला म० । इति वृत्तार्थः ॥ ११ ॥

निषादिसंनाहमणिप्रभौघे परीयमाणे करिशीकरेण ।
अर्कत्विषोन्मीलितमभ्युदेति न खण्डमाखण्डलकार्मुकस्य ॥ १२ ॥

'निषा०' व्याख्या । किञ्च इह रणे **आखण्डलकार्मुकस्य** शक्रधनुषः **खण्ड**मेकदेशः **नाभ्युदेति** उदयं नासादयति व्यक्तिं न यातीत्यर्थः । किं० खण्डम् ? **अर्कत्विषा** सूर्यकिरणेन **उन्मीलितम्** उत्पादितं प्रकटितं व्यक्तिमानीतमित्यर्थः । कस्मिन् सति ? **करिशीकरेण** करिकरवारिणा **निषादिसन्नाहमणिप्रभौघे** हस्तिपककवचरत्नांशुजाले **परीयमाणे** व्याप्यमाने सति तेजोजलसंयोगात् इन्द्रधनुः उत्पद्यते इत्यर्थः । अन्यत्रवत् इह न तथेति वितर्कः । अथ समासः । निषादिनां सन्नाहाः नि० निषादिसन्नाहानां मणयः

निषादिसन्नाहमणयस्तेषां प्रभाः निषादिसन्नाहमणिप्रभास्तासामोघः निषादिसन्नाहमणिप्रभौघस्तस्मिन् नि०। करिणां शीकरः करिशीकरस्तेन क० । अर्कस्य त्विट् अर्कत्विट् तेन अ० । आखण्डलस्य कार्मुकम् आखण्डलकार्मुकं तस्य आ० । इति वृत्तार्थः ॥ १२ ॥

महीभृता पक्षवतेव भिन्ना विगाह्य मध्यं परवारणेन ।
नावर्तमाना निनदन्ति भीममपांनिधेराप इव ध्वजिन्यः ॥ १३ ॥

'मही०' व्याख्या । इह रणे **ध्वजिन्यः** सेनाः **न निनदन्ति** न शब्दायन्ते कोलाहलं न कुर्वन्तीत्यर्थः। का इव ? **अपांनिधेः** समुद्रस्य **आपो** जलानि **भीमं** भयङ्करं यथा स्यात्तथा नदन्ति न तद्वदित्यर्थः । किं० ध्वजिन्यः ? **परवारणेन** शत्रुगजेन **मध्यं** मध्ये **विगाह्य** प्रविश्य **भिन्नाः** क्षोभिता विलोड्यमाना इत्यर्थः। पुनः किं० ध्वजिन्यः ? अत एव **आवर्तमाना** भ्रमन्त्यः किं० आपः ? **पक्षवता** सपक्षेन **महीभृता** मैनाकपर्वतेन मध्यं **विगाह्य** विलोड्य भिन्नाः विलोडिताः पुनः किं० आपः ? आवर्तमानाः पयोभ्रमयुक्ताः। अथ समासः । महीं बिभर्ति महीभृत् तेन म० । पक्षः विद्यते यस्य स पक्षवान् तेन प० । परेषां वारणः परवारणस्तेन प० । इति वृत्तार्थः ॥ १३ ॥

महारथानां प्रतिदन्त्यनीकमधिस्यदस्यन्दनमुत्थितानाम् ।
आमूललूनैरतिमन्युनेव मातङ्गहस्तैर्व्रियते न पन्थाः ॥ १४ ॥

'महा०' व्याख्या । किञ्च इह रणे **अतिमन्युना** अतिकोपेन **मातङ्गहस्तैः** हस्तिसुण्डादण्डैः **महारथानां** योधानां **पन्थाः** मार्गो **न व्रियते** न रुध्यते न आच्छाद्यत इत्यर्थः । किं० मात० ? **आमूललूनैः** मूलादारभ्य छिन्नैः किं० महा० ? **अधिस्यदस्यन्दनम्** अधिकवेगरथं यथा भवति तथा **प्रतिदन्त्यनीकं** गजसैन्यं प्रति **उत्थितानां** चलितानाम् 'अनीकं तु रणे सैन्ये' इति *विश्वः*। यथा केनचित् कोपेन आगच्छतो रिपोः पन्थाः रुध्यते तद्वदिति ध्वनिः। अथ समासः। महान्तश्च ते रथाश्च महारथास्तेषां म० । दन्तिनामनीकं दन्त्यनीकं दन्त्यनीकं प्रति इति प्रति० । अधिकः स्यदो रंहो वेगो येषां ते अधिस्यदाः अधिस्यदाः स्यन्दना यस्मिन् तत् अ० । मूलम् आ मर्यादीकृत्य इति आमूलम् आमूलं लूनाः आमूललूनाः तैः आ० । मातङ्गानां हस्ताः मातङ्गहस्तास्तैर्मा० । इति वृत्तार्थः ॥ १४ ॥

धृतोत्पलापीड इव प्रियायाः शिरोरुहाणां शिथिलः कलापः ।
न बर्हभारः पतितस्य शङ्कोर्निषादिवक्षःस्थलमातनोति ॥ १५ ॥ (उपे.)

'धृतो०' व्याख्या । किञ्च इह संग्रामे **पतितस्य** वक्षसि भग्नस्य शङ्कोस्तोमरस्य संबन्धी **बर्हभारः** मयूरपिच्छसमूहः **निषादिवक्षःस्थलं** हस्तिपकस्य हृदयं **न आतनोति** न व्याप्नोति तन्मूलबद्धो लाञ्छनपिच्छकलापे बर्हभारः क इव ? **कलाप इव** यथा **प्रियायाः** वल्लभार्या(याः) **शिथिलः** श्लथः **शिरोरुहाणां** केशानां कलापः समूहः भर्तुः वक्षःस्थलम् आच्छादयति । किं० कलापः ? **धृतोत्पलापीडः**

धृतकमलमुकुटः । अथ समासः । उत्पलानामापीडः उत्पलापीडः धृतः उत्पलापीडो यस्मिन् स धृ० । बर्हाणां भारो ब० । निषादिनां वक्षःस्थलं नि० । इति वृत्तार्थः ॥ १५ ॥

उज्झत्सु संहार इवास्तसंख्यमह्नाय तेजस्विषु जीवितानि ।
लोकत्रयास्वादनलोलजिह्वं न व्याददात्याननमत्र मृत्युः ॥ १६ ॥

[का. २८ यावद् उपजातिच्छन्दः]

'उज्झ०' व्याख्या । किंच **अत्र** रणे **मृत्युः** यमः **आननं** वदनं **न व्याददाति** न प्रसारयति 'आङोदोऽनास्यविहरणे' इत्यात्मनेपदनिषेधात् परस्मैपदम् । किं० आननम् ? **लोकत्रयास्वादनलोलजिह्वं** सकलजगत्ग्रासगृध्नुजिह्वं केषु सत्सु ? **तेजस्विषु** वीरेषु **अस्तसंख्यं** गतसंख्यं निरस्तसंख्यं यथा स्यात्तथा **अह्नाय** झटिति **जीवितानि** प्राणान् **उज्झत्सु सत्सु** क इव ? **संहार इव** यथा संहारः युगान्तः जीवितानि संहरति तद्विदिति । अथ समासः । अस्ता संख्या यत्र यस्मिन् कर्मणि तत् अ० । लोकानां त्रयं लोकत्रयं लोकत्रयस्य आस्वादनं लोकत्रयास्वादनं लोकत्रयास्वादने लोला जिह्वा यस्य तत् लो० । इति वृत्तार्थः ॥१६॥

इयं च दुर्वारमहारथानामाक्षिप्य वीर्यं महतां बलानाम् ।
शक्तिर्ममावस्यति हीनयुद्धे सौरीव ताराधिपधाम्नि दीप्तिः ॥ १७ ॥

'इयं०' व्याख्या । **चा**न्यदप्याश्चर्यम् **इय**मेषा **मम शक्तिः** पराक्रमं सामर्थ्यम् द्र(इ)दानीं **हीनयुद्धे** भिल्लरणे **अवस्यति** क्षयं याति किमेतत्कारणम् ? किंकृत्वा ? **दुर्वारमहारथानां** दुर्निवारमहासुभटानां **महतां** गुरूणां **बलानां** सैन्यानां **वीर्यं** बलम् **आक्षिप्य** तिरस्कृत्य निरस्येत्यर्थः । केव ? सौरी दीप्ति**रिव** यथा **सौरी** सूर्यसंबन्धिनी **दीप्तिः** कान्तिः **ताराधिपधाम्नि** रात्रौ चन्द्रतेजसि अवस्यति क्षीयते चन्द्रतेजसो हीनत्वाद् दीप्त्यपेक्षया अत एतच्च विरुद्धम् अत्यद्भुतं चेति भावः । अथ समासः । दुःखेन वारयितुं शक्या दुर्वाराः दुर्वारा महारथा येषु तानि दुर्वारमहारथानि तेषां दु० । हीनानां युद्धं हीनयुद्धं तस्मिन् ही० । सूरस्येयं सौरी । ताराणामधिपः ताराधिपः ताराधिपस्य धाम ताराधिपधाम तस्मिन् ता० । इति वृत्तार्थः ॥ १७ ॥

माया स्विदेषा मतिविभ्रमो वा ध्वस्तं नु मे वीर्यमुताहमन्यः ।
गाण्डीवमुक्ता हि यथापुरेव पराक्रमन्ते न शराः किराते ॥ १८ ॥

'माया०' व्याख्या । **हि** निश्चितं **गाण्डीवमुक्ता** गाण्डीवधनुर्मुक्ताः **शरा** बाणाः **मे** मम **पुरा** पूर्वं यथा शत्रुषु इति शेषः । **पराक्रमं** चक्रुः तथा इदानीमत्र **किराते** भिल्ले न पराक्रमं **ते** पराक्रमं न **कुर्वन्ति** अप्रतिबन्धेन न प्रवर्तन्ते इत्यर्थः । **स्वित्** इति वितर्के **एषा** इयं शक्तिह्रासरूपा **माया स्विद्** देवतानां क्षोभेन वा अथवा **मतिविभ्रमः** मतिमोहः बुद्धिविपर्यासो वा अथवा **नु** इति वितर्के **मे** मम **वीर्यं** बलं **ध्वस्तं** क्षिप्तं नष्टम् **उत** अथवा **अहमन्यो**ऽर्जुनो वा पूर्वोऽर्जुनेन भवामीति वितर्कः । अथ समासः । मतेर्विभ्रमः म० । गाण्डीवात् मुक्ताः [गा०] । इति वृत्तार्थः ॥ १८ ॥

पुंसः पदं मध्यममुत्तमस्य द्विधेव कुर्वन्धनुषः प्रणादैः ।
नूनं तथा नैष यथास्य वेषः प्रच्छन्नमप्यूहयते हि चेष्टा ॥ १९ ॥

'पुंसः०' व्याख्या । **नूनं** निश्चितं **यथा अस्य वेषः तथा न एषो**ऽयं किरातः वेषादेवायं भिल्लः न स्वरूपात् इत्यर्थः । एष किंकुर्वन् ? **धनुषः** कोदण्डस्य **प्रणादैः** निर्घोषैः **उत्तमस्य पुंसः** वासुदेवस्य **मध्यमं पदम्** आकाशं **द्विधा कुर्वन्निव** विदारयन्निव स्थितः अन्यस्य किरातस्येदृशी शक्तिर्नास्त्यतोऽन्यः कश्चिन्महानरो भविष्यतीति भावः । कुतोऽवगम्यते तत्राह- **हि** यस्मात् कारणात् **चेष्टा** विशेषव्यापारः **प्रच्छन्नमपि** गुप्तमपि **ऊहयते** स्फुटीकरोति शरीरचेष्टा गुप्तमपि कथयतीत्यर्थः । अथ समासः । प्रकृष्टाश्च ते नादाश्च प्रणादास्तैः प्र० । इति वृत्तार्थः ॥ १९ ॥

अथ चतुर्भिः [श्लोकैः] चेष्टामेवाचष्टे -

धनुः प्रबन्धध्वनितं रुषेव सकृद्विकृष्टा विततेव मौर्वी ।
संधानमुत्कर्षमिव व्युदस्य मुष्टेरसंभेद इवापवर्गे ॥ २० ॥

'धनुः' व्याख्या । **धनुश्चापं रुषेव** कोपेनेव **प्रबन्धध्वनितम्** अविच्छेदध्वनितं दृश्यते **मौर्वी** प्रत्यञ्चा **सकृद्विकृष्टा** सती **विततेव** विस्तारितेव स्थिता सर्वदाकृष्टेव दृश्यते । **संधानं** शरसंधानं बाणाकर्षणम् **उत्कर्षं** तूणीरान्निष्कासनं **व्युदस्येव** परित्यज्येव दृश्यते । **अपवर्गे** बाणमोक्षे **मुष्टेः असंभेदो**ऽसंघट्ट इव मुष्टिबन्धं विनैव शरमोक्षो विहित इति हस्तलाघवोक्तिः । अथ समासः । प्रबन्धेन ध्वनितं प्र० । इति वृत्तार्थः ॥२०॥

अंसाववष्टब्धनतौ समाधिः शिरोधराया रहितप्रयासः ।
धृता विकारांस्त्यजता मुखेन प्रसादलक्ष्मीः शशलाञ्छनस्य ॥ २१ ॥

'अंसा०' व्याख्या । अस्य किरातस्येति शेषः । अस्य **अंसौ** स्कन्धौ **अवष्टब्धनतौ** स्थिरौ नतौ च वर्तेते पुनः **शिरोधराया** ग्रीवायाः **समाधिः** संस्थानविशेषः सम्यक् धारणं वा **रहितप्रयासः** अविद्यमानखेदः परित्यक्तायासो वा वर्तते । पुनः अस्य **मुखेन** वदनेन **शशलाञ्छनस्य** चन्द्रस्य **प्रसादलक्ष्मीः** निर्मलश्रीः **धृता** गृहीता किं० मुखेन ? **विकारान्** भ्रूभङ्गारक्तत्वं नेत्रोत्पाटनभृकुट्यादीन् **त्यजता** जहता जितश्रमत्वात् विकाररहितेनेत्यर्थः[1] । अथ समासः । अवष्टब्धौ च तौ नतौ च अ० । रहितोऽविद्यमानः प्रयासो यस्य स र० । प्रसादस्य लक्ष्मीः प्र० । शशो लाञ्छने यस्य स शशलाञ्छनस्तस्य श० । इति वृत्तार्थः ॥ २१ ॥

प्रहीयते कार्यवशागतेषु स्थानेषु विश्रब्धतया न देहः ।
स्थिरप्रयातेषु ससौष्ठवश्च लक्ष्येषु पातः सदृशः शराणाम् ॥ २२ ॥

१. असंभवत्संबन्धो निदर्शनालंकारः -म.

'प्रही०' व्याख्या । किंच अस्य **विश्रब्धतया** स्थैर्यतया कर्त्र्या **कार्यवशागतेषु** पश्चात् तिर्यग् सन्मुखोद्वडिघः (?) शरविमोक्षकार्यवशादागतेषु प्राप्तेषु **स्थानेषु** आलीढप्रत्यालीढविशेषसमपादकूर्म्मपद्मासन-दुर्दुराकारगरुडक्रमेषु अष्टसु स्थानकेषु **देहोऽङ्गं न प्रहीयते** त्यज्यते स्थिरतया स्थानेषु शरीरातिक्रमो न जायत इत्यर्थः। किन्तु स्थिर एव तिष्ठतीत्यर्थः । **च** पुनः **ससौष्ठवो** सलाघवोऽस्य **शराणां** बाणानां **पातः** पतनं **स्थिरप्रयातेषु** अचलचलेषु **लक्ष्येषु** वध्येषु **सदृशः** एकरूप एव वर्तते । अथ समासः। कार्यस्य वशं कार्यवशं कार्यवशादागतानि कार्यवशागतानि तेषु का० । विश्रब्धस्य भावो विश्रब्धता तया वि० । स्थिराणि च प्रयातानि च स्थिरप्रयातानि तेषु स्थि० । सुष्ठुभावः सौष्ठवं तेन सह वर्तमानः स० । इति वृत्तार्थः ॥ २२ ॥

परस्य भूयान्विवरेऽभियोगः प्रसह्य संरक्षणमात्मरन्ध्रे ।
भीष्मेऽप्यसंभाव्यमिदं गुरौ वा न संभवत्येव वनेचरेषु ॥ २३ ॥

'पर०' व्याख्या । **इदं** प्रहरणं धनुर्वेदविद्याकौशलं **भीष्मेऽपि** गाङ्गेयेऽपि **गुरौ** द्रोणाचार्ये च **असंभाव्यम्** अघटमानं न संभाव्यते अतो **वनेचरेषु** किरातेषु **न संभवत्येव** न घटत एव किं तद्द्वयं **परस्य** शत्रोः **विवरे** छिद्रे **भूयात्** बहुः **अभियोगः** उद्यमः **आत्मरन्ध्रे** निजछिद्रे **प्रसह्य** बलात्कारेण **संरक्षणं** गोपनम् एतद्द्वयं यदि जानतस्तर्हि तावेव जानतो नापरे इति वाक्यार्थः । अतो नायं भिल्लः किन्तु एषस्तद्वेषतिरोहितः कोऽपि अमानुषः पुरुषः इति तात्पर्यार्थः । अथ समासः । आत्मनो रन्ध्रम् आत्मरन्ध्रं तस्मिन् आत्मरन्ध्रे। इति वृत्तार्थः ॥ २३ ॥

अप्राकृतस्याहवदुर्मदस्य निवार्यमस्यास्त्रबलेन वीर्यम् ।
अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्हि वृद्धिः ॥ २४ ॥

'अप्रा०' व्याख्या । मयेति शेष **अस्य** किरातस्य **वीर्यं** धैर्यम् **अस्त्रबलेन** दिव्यायुधानुभावेन **निवार्यं** निवारणीयम् अन्यथा निवारयितुमशक्यमित्यर्थः । किं० अस्य ? **अप्राकृतस्य** अनीचस्य महासत्त्वस्य वा पुनः किं० अस्य ? **आहवदुर्मदस्य** संग्राममत्तस्य मायाभिल्लस्येति भावः । **हि** यस्मात् कारणात् **अल्पीयसोऽपि** हीनस्यापि **रिपोः** शत्रोः **वृद्धिः महापकाराय** महानर्थाय भवति अतो महायुद्धैरयं निवार्यः इत्यर्थः । किं० रिपोः ? **आमयतुल्यवृत्तेः** व्याधिसदृशव्यापारस्य । अथ समासः । आहवेन दुर्मदः आहवदुर्मदस्तस्याह० । अस्त्रस्य बलम् अस्त्रबलं तेनास्त्र० । आमयेन तुल्या वृत्तिर्यस्य स आमयतुल्यवृत्तिः तस्याम० । महांश्चासौ अपकारश्च महापकारः तस्मै म० । इति वृत्तार्थः ॥ २४ ॥

स संप्रधार्यैवमहार्यवीर्यः[1] सारं विनेष्यन् सगणस्य शत्रोः ।
प्रस्वापनास्त्रं द्रुतमाजहार ध्वान्तं घनानद्ध इवार्धरात्रः ॥ २५ ॥

'स संप्र०' व्याख्या । **सोऽर्जुनः एवं** पूर्वोक्तश्लोकोक्त्या **संप्रधार्य** निर्धार्य **प्रस्वापनास्त्रं**

1. अहार्यसारः -म. ।

गान्धर्वमस्त्रम् **आजहार** संदधे प्रकटयामासेत्यर्थः । स किं० ? **अहार्यवीर्यः** अनभिभवनीयबलः अनिवार्यवीर्यः इत्यर्थः । सः किंकरिष्यन् ? **सगणस्य** गणसहितस्य **शत्रोः** महादेवस्य **सारं** बलं **द्रुतं** शीघ्रं **विनेष्यन्** स्फेटयिष्यन् कः किमिव ? अर्धरात्रो ध्वान्त**मिव** यथा **अर्धरात्रो** निशीथः **ध्वान्त**मन्धकारं विस्तारयति । किं० अर्धरात्रः ? **घनानद्धः** जलदस्थगितः मेघैर्व्याप्त इत्यर्थः । अथ समासः । अहार्यं वीर्यं यस्य स अ० । गणैः सह वर्तमानः सगणस्तस्य स० । प्रस्वाप्यन्ते शाट्यन्ते शत्रवोऽनेनेति प्रस्वापनं तदेवास्त्रं प्रस्वापनास्त्रं घनैरानद्धो घ० । इति वृत्तार्थः ॥ २५ ॥ [कुलकम् ।]

प्रसक्तदावानलधूमधूम्रा संरुन्धती[1] धाम सहस्त्ररश्मेः ।
महावनानीव निशातमिस्त्रां छाया ततानेशबलानि काली ॥ २६ ॥

'प्रस०' व्याख्या । **काली** कृष्णवर्णा **छाया** कान्तिः **ईशबलानि** महादेवसैन्यानि **ततान** व्याप आच्छादयामासेत्यर्थः । का कानीव ? निशातमिस्त्रा **महावनानीव** यथा **निशातमिस्त्रां** निशान्धकारं 'महातमिस्त्रा'[2] इति वा पाठस्तत्र महती तमःसंहतिः महावनानि तनोति 'तमिस्त्रा तु तमस्ततिः' इति *विश्वः* । किं० छाया ? **प्रसक्तदावानलधूमधूम्रा** प्रवृत्तदावानलवत् धूम्रा कपिशा पुनः किं० छाया ? **सहस्त्ररश्मेः** सूर्यस्य **धाम** तेजः **संरुन्धती** आवृण्वती । अथ समासः । प्रसक्तश्चासौ दावानलश्च प्रसक्तदावानलः प्रसक्तदावानलस्य धूमः प्रसक्तदावानलधूमः प्रसक्तदावानलधूमवत् धूम्राः प्र० । सहस्त्रं रश्मयो यस्य स सहस्त्ररश्मिस्तस्य स० । महान्ति च तानि वनानि च म० । निशाया तमिस्त्राः नि० । ईशस्य बलानि ई० । इति वृत्तार्थः ॥२६॥

आसादिता तत्प्रथमं प्रसह्य प्रगल्भताया पदवीं हरन्ती ।
सभेव भीमा विदधे गणानां निद्रा निरासं प्रतिभागुणस्य ॥ २७ ॥

'आसा०' व्याख्या । **निद्रा** तन्द्रा कर्त्री **गणानां** प्रमथादीनां **प्रतिभागुणस्य** युद्धादिकरणसामर्थ्यस्य **निरासं** क्षयं **विदधे** चकार किं० निद्रा ? 'तत्प्रथमं' स एव प्रथमो यथा स्यात्तथा **तत्प्रथमं प्रसह्य** बलात्कारेण **आसादिता** प्राप्ता किंकुर्वती निद्रा ? **प्रगल्भतायाः** व्यवहारधाष्टर्यस्य **पदवीं** मार्गं **हरन्ती** लुम्पन्ती पुनः किं० निद्रा ? अत एव **भीमा** भयङ्करा चलनच(व)लनादिव्यवहारशून्यतया भीषणेत्यर्थः । केव ? **सभेव** संसदिव यथा उक्तलक्षणा सभा **प्रतिभागुणस्य** प्रज्ञागुणस्य **निरासं** विनाशं करोति । अथ समासः । प्रतिभायाः गुणः प्रतिभागुणस्तस्य प्र० । इति वृत्तार्थः ॥ २७ ॥

गुरुस्थिराण्युत्तमवंशजत्वाद्विज्ञातसाराण्यनुशीलनेन ।
केचित्समाश्रित्य गुणानतानि[3] सुहृत्कुलानीव धनूंषि तस्थुः ॥ २८ ॥

'गुरु०' व्याख्या । **केचित्** गणाः **धनूंषि** चापान् **समाश्रित्य** समालम्ब्य **तस्थुः** किं० धनूंषि ? **'गुरुस्थिराणि' गुरूणि** महान्ति **स्थिराणि** दृढानि कस्मात् ? **उत्तमवंशजत्वात्** प्रधानवंशोद्भवत्वात्

1. निरु० -म. । 2. एष पाठः म. मध्ये । 3. गुणान्वितानि -म. इदं च पा० ।

पुनः किं० धनूंषि ? **विज्ञातसाराणि** ज्ञातबलानि केन ? **अनुशीलनेन** सदाभ्यसनेन परिचयेन च । पुनः किं० धनूंषि ? **गुणानतानि** प्रत्यञ्चया नम्राणि कानीव ? 'सुहृत्कुला**नीव**' यथा **केचन** नराः **सुहृत्कुलानि** मित्रकुलानि **समाश्रित्य** समालम्ब्य तिष्ठन्ति तद्वदित्यर्थः । सुहृत्कुलपक्षेऽपि सर्वाण्यपि विशेषणानि योज्यानि। अथ समासः । गुरूणि स्थिराणि च गुरुस्थिराणि । उत्तमश्चासौ वंशश्च उत्तमवंश उत्तमवंशे जातानि उत्तमवंशजानि तेषां भावस्तत्त्वं तस्मात् उ० । विज्ञातः सारो येषां तानि वि० । गुणैरानतानि गु० । सुहृदां कुलानि सु० । इति वृत्तार्थः ॥ २८ ॥

कृतान्तदुर्वृत्त इवापरेषां पुरः प्रतिद्वन्द्विनि पाण्डवास्त्रे ।
अतर्कितं पाणितलान्निपेतुः क्रियाफलानीव तदायुधानि ॥ २९ ॥ (उपे.)

'कृता०' व्याख्या । **तदा** तस्मिन् काले तेषां गणानाम् **आयुधानि** शस्त्राणि **पाणितलात्** हस्तात् **अतर्कितम्** अविचारितमेव सहसा **पेतुः** पतितानि कस्मिन् सति ? **पाण्डवास्त्रे** प्रस्वापनाख्ये शस्त्रे **पुरः प्रतिद्वन्द्विनि** प्रतिकूले प्रतिपक्षतया स्थिते सति कानीव ? 'क्रियाफलानीव' कस्मिन्निव ? 'कृतान्तदुर्वृत्ते' **इव** यथा **क्रियाफलानि** कृष्यादिकार्यफलानि **कृतान्तदुर्वृत्ते** देवस्य प्रातिकूल्ये विरुद्धे जाते सति **अपरेषां** लोकानां करतलान्निपतन्ति विनश्यन्तीति भावः । अथ समासः । कृतान्तस्य दुर्वृत्तं कृतान्तदुवृत्तं तस्मिन् कृ० । पाण्डवस्य अस्त्रं पाण्डवास्त्रं तस्मिन् पा० । क्रियायाः फलानि क्रि० । तेषामायुधानि तदायुधानि। इति वृत्तार्थः ॥ २९ ॥

अंशस्थलैः केचिदभिन्नधैर्याः स्कन्धेषु संश्लेषवतां तरूणाम् ।
मदेन मीलन्नयनाः सलीलं नागा इव स्रस्तकरा निषेदुः ॥ ३० ॥ (उ.)

'अंश०' व्याख्या । **केचिद्**गणाः तदानीमपि **तरूणां** वृक्षाणां **स्कन्धेषु** प्रकाण्डेषु **निषेदुः** निषण्णाः उपविष्टा इत्यर्थः । किं० गणाः ? **अभिन्नधैर्याः** अनष्टधैर्याः अक्षतधैर्या इत्यर्थः । किं० तरूणाम् ? **अंशस्थलैः** स्कन्धप्रदेशैः कृत्वा **संश्लेषवतां** संपर्कवतां मीलितानामित्यर्थः । के इव ? नागा **इव** यथा **नागा** हस्तिनः **सलीलं** सक्रीडं यथा स्यात्तथा तरूणां स्कन्धेषु निषीदन्ति किं० नागाः ? **मदेन मीलन्नयनाः** मदवारिणा कृत्वा निमीलितनेत्राः पुनः किं० नागाः ? **स्रस्तकराः** व्यस्तशिथिलहस्ताः उभयेषां विशेषणम्। अथ समासः । न भिन्नं धैर्यं येषां ते अ० । संश्लेषो विद्यते येषां ते संश्लेषवतः तेषां सं० । मीलन्ति नयनानि येषां ते मी० । स्रस्ताः करा येषां ते स्र०। इति वृत्तार्थः ॥ ३० ॥

तिरोहितेन्दोरथ शम्भुमूर्ध्नः प्रणम्यमानं तपसां निवासैः ।
सुमेरुव[1]प्रादिव बिम्बमार्कं पिशङ्गमुच्चैरुदियाय तेजः ॥ ३१ ॥ (उपे.)

'तिरो०' व्याख्या । **अथ** स्वसैन्ये निद्रावशे सति **शम्भुमूर्ध्नः** हरमस्तकात् **उच्चै**र्गुरुतरं **पिशङ्गं** पीतवर्णं

1. शृङ्गादिव –म. इदं च पा०

तेजः प्रभा **उदियाय** निर्जगाम प्रकटीबभूवेत्यर्थः । तत्तेजो न चान्द्रमसमिति भावः । कुतो नेत्याह- किं० शम्भुमूर्ध्नः ? **तिरोहितेन्दोः** भिल्लच्छलेनाच्छादितचन्द्रात् किं० तेजः ? **तपसां निवासैः** मुनिभिः **प्रणम्यमानं** नमस्क्रियमाणं कस्मात् किमिव ? सुमेरुवप्रात् आर्क्कं बिम्ब**मिव** यथा **सुमेरुवप्राद्** मेरुशृङ्गात् **आर्कं** सूर्यसंबन्धि **बिम्बं** मण्डलमुदेति तदपि पिशङ्गं तपस्विभिरभिवन्द्यमानं तेजोवत् विशेषणविशिष्टं मेरुवप्रोऽपि तिरोहितेन्दुर्भवतीति । अथ समासः । तिरोहित इन्दुर्यस्मिन् स तिरोहितेन्दुस्तस्मात् ति० । शम्भोर्मूर्धा शम्भुमूर्धा तस्मात् श० । सुमेरोर्वप्रः सुमेरुवप्रस्तस्मात् सु० । अर्कस्येदम् आर्कम् । इति वृत्तार्थः ॥३१॥

छायां विनिर्धूय तमोमयीं तां तत्त्वस्य संवित्तिरिवापविद्याम् ।
ययौ विकाशं द्युतिरिन्दुमौलेरालोकमभ्यादिशती गणेभ्यः ॥ ३२ ॥

[का. ४२ यावद् उपजातिच्छन्दः]

'छायां०' व्याख्या । **इन्दुमौले**र्महादेवस्य **द्युतिः** प्रभा **विकाशं** विस्तारं **ययौ** प्रपेदे किंकृत्वा **तमोमयीं** तमःस्वरूपां **तां** प्रसिद्धां **छायां** निद्रां **विनिर्धूय** स्फेटयित्वा केव ? तत्त्वस्य संवित्ति**रिव** यथा **तत्त्वस्य संवित्तिः** तत्त्वज्ञानम् **अपविद्याम्** अविद्यां भ्रान्तिज्ञानं वा **विनिर्धूय** अपनीय **विकाशं** विस्तारं **याति** गच्छति द्युतिः किंकुर्वती ? **गणेभ्यः** प्रमथेभ्यः **आलोकम्** उद्योतं वस्तुप्रकाशम् **अभ्यादिशती** ददती। अथ समासः । तमः प्रचुरं यस्यां सा तमोमयी तां त० । इति वृत्तार्थः ॥ ३२ ॥

त्विषां ततिः पाटलिताम्बुवाहा सा सर्वतः पूर्वसरीव सन्ध्या ।
निनाय तेषां द्रुतमुल्लसन्ती विनिद्रतां लोचनपङ्कजानि ॥ ३३ ॥

'**त्विषां**०' व्याख्या । **सा** महादेवमूर्धोद्भवा **त्विषां** दीप्तीनां **ततिः** श्रेणिः **तेषां** गणानां **लोचन-पङ्कजानि** नेत्रकमलानि 'पङ्कजलोचनानि' इति पाठस्तत्र **पङ्कजानीव** कमलानीव **लोचनानि** नयनानि **विनिद्रतां** गतनिद्रतां स्मेरतामिति यावत् **निनाय** नयति स्म किं० ततिः ? **सर्वतः** विष्वक् **पाटलिताम्बुवाहा** कपिशीकृतमेघा पुनः किं० ततिः ? **द्रुतं** शीघ्रम् **उल्लसन्ती** ऊर्ध्वप्रकाशमाना केव ? **पूर्वसरी सन्ध्येव** यथा पूर्वसरी प्रातःकालसत्का पङ्कजानि कमलानि विनिद्रतां विकाशतां नयति सापि पूर्वविशेषेण विशिष्टेति योज्यम् । अथ समासः । पाटलिता अम्बुवाहा यया सा पा० । पूर्वा सरतीति पूर्वसरी । विनिद्रस्य भावो विनिद्रता तां वि० । लोचनान्येव पङ्कजानि लो० । इति वृत्तार्थः ॥ ३३ ॥

पृथग्विधान्यस्त्रविरामबुद्धाः शस्त्राणि भूयः प्रतिपेदिरे ते ।
मुक्ता वितानेन बलाहकानां ज्योतींषि रम्या इव दिग्विभागाः ॥ ३४ ॥

'पृथ०' व्याख्या । **ते** गणाः **पृथग्विधानि** नानाविधानि **शस्त्राणि** आयुधानि **भूयः** पुनरपि **प्रतिपेदिरे** जगृहुः किं० ते ? **अस्त्रविरामबुद्धाः** प्रस्वापनास्त्रापगमे जागरिताः के कानिव ? दिग्विभागाः ज्योतीं**षीव** यथा **दिग्विभागा** दिग्प्रान्ताः **ज्योतींषि** नक्षत्राणि प्रतिपद्यते किं० दिग्विभागाः ? **बलाहकानां** मेघानां **वितानेन** समूहेन **मुक्ताः** पुनः किं० दिग्विभागाः ? अत एव **रम्या** मनोहराः । अथ समासः ।

अस्त्रस्य विरामः अस्त्रविरामः अस्त्रविरामे बुद्धाः अ० । दिशां विभागाः दि० । इति वृत्तार्थः ॥३४॥

द्यौरुन्ननामेव दिशः प्रसेदुः स्फुटं विसस्रे सवितुर्मयूखैः ।
क्षयं गतायामिव यामवत्यां पुनः समीयाय दिनं दिनश्रीः ॥ ३५ ॥

'द्यौ०' व्याख्या । **द्यौर्**गगनं तमोभिः अधः पतिता सती शिवतेजोभिः **उन्ननामेव** उन्नता बभूव तथा **दिशः प्रसेदुः** प्रसन्ना बभूवुः तथा **सवितुः** रवेः **मयूखैः** किरणैः **स्फुटं** प्रकटं यथा स्यात्तथा **विसस्रे** प्रसृतं विस्तारं प्राप्तं **यामवत्यां** रात्रौ **क्षयं** नाशं **गतायां** प्राप्तायां प्रभात इव **दिनश्रीः** वासरशोभा **पुनः** भूयोऽपि **दिनं** दिवसं **समीयाय** समाजगाम[१] । अथ समासः । दिनस्य श्रीः दिनश्रीः । इति वृत्तार्थः ॥ ३५ ॥

महास्त्रदुर्गे शिथिलप्रयत्नं दिग्वारणेनेव परेण रुग्णे ।
[1]भुजङ्गमास्त्रं भुजवीर्यशाली नि[2]बन्धनाय प्रजिघाय जिष्णुः ॥ ३६ ॥

'महा०' व्याख्या । **जिष्णु**रर्जुनः शत्रो**र्निबन्धनाय** नितरां बन्धाय **भुजङ्गमास्त्रं** सर्पास्त्रं नागपाशमित्यर्थः । **प्रजिघाय** प्रहितवान् किं० जिष्णुः ? **भुजवीर्यशाली** बाहुबलेन शोभमानः कस्मिन् सति ? **परेण** वैरिणा **शिथिलप्रयत्नं** स्तोकप्रयासं यथा स्यात्तथा **महास्त्रदुर्गे** प्रस्वापनाख्यरूपप्रकारे **रुग्णे** भग्ने सति केनेव ? दिग्वारणे**नेव** यथा **दिग्वारणेन** दिग्गजेन महादुर्गो भज्यते तद्वदिति । अथ समासः । महच्च तदस्त्रं महास्त्रं महास्त्रमेव दुर्गः महास्त्रदुर्गः तस्मिन् म० । शिथिलः प्रयत्नो यस्मिन् कर्मणि तत् शि० । भुजवीर्येण शालते शोभते इति भु० । इति वृत्तार्थः ॥ ३६ ॥

जिह्वाशतान्युल्लसयन्त्य[3]सक्तं लसत्तडिल्लोलविषानलानि ।
त्रासान्निर[4]स्तां भुजगेन्द्रसेना नभश्चरैस्तत्पदवीं विवव्रे ॥ ३७ ॥

'जिह्वा०' व्याख्या । **भुजगेन्द्रसेना** सर्प्पराजसेना **तत्पदवीं** देवमार्गे **विवव्रे** विशेषेण वव्रे रुरोध किं० तत्पदवीम् ? **नभश्चरैः** गन्धर्वैः देवविशेषैः वा **त्रासात्** भयात् **निरस्तां** त्यक्तां किंकुर्वती भुज० ? **असक्तं** निरन्तरं **जिह्वाशतानि उल्लसयन्ती** चालयन्ती प्रकटयन्तीत्यर्थः । किं० जिह्वाशतानि ? **लसत्तडिल्लोलविषानलानि** लसन्तस्तडिद्वल्लोलाः विषमेवानलाः येषु तानि लसत्तडिल्लोलविषानलानि देदीप्यमानविद्युच्चञ्चलविषवैश्वानराणि । अथ समासः । जिह्वानां शतानि जिह्वाशतानि लसन्तस्तडिद्वद्लोलाः विषमेवानलाः येषु तानि ल० । भुजगस्येन्द्रो भुजगेन्द्रः भुजगेन्द्रस्य सेना भु० । तेषां पदवी तत्पदवी तां त० । इति वृत्तार्थः ॥ ३७ ॥

---

1. भुजङ्गपाशान् -म. इदं च पा० । 2. प्र० -म. इदं च पा० । 3. ०न्त्यजस्रं -म. इदं च पा० । 4. निरस्ता -म. इदं च पा० ।

---

१. अत्र वैयधिकरण्येन गुणक्रिययोः समुच्चये समुच्चयालंकारः । तस्य च समुन्नमनोत्प्रेक्षया 'इव'शब्दवाच्ययानुप्रवेशलक्षणः संकरः । दिक्प्रसादो गुणः शेषाः क्रियाः -म.

दिङ्नागहस्ताकृतिमुद्वहद्भिर्भोगैः प्रशस्तासितरत्ननीलैः ।
रराज सर्पावलिरुल्लसन्ती तरङ्गमालेव नभोर्णवस्य ॥ ३८ ॥

'दिङ्०' व्याख्या । **सर्प्पावलिः** भुजङ्गश्रेणिः **रराज** शुशुभे किं० सर्प्पावलिः ? **भोगैर्देहैः** उपलक्षिता किंकुर्वद्भिः भोगैः ? **दिङ्नागहस्ताकृतिं** दिग्वारणशुण्डादण्डाकारम् **उद्वहद्भिः** धारयद्भिः किं० भोगैः ? **प्रशस्तासितरत्ननीलैः** उत्तमेन्द्रनीलमणिवत् श्यामैः पुनः किं० सर्पावलिः ? **उल्लसन्ती** देदीप्यमाना केव ? नभोर्णवस्य तरङ्गमा**लेव** यथा **नभोर्णवस्य** गगनसागरस्य **तरङ्गमाला** कल्लोलमाला राजते विभक्तिपरिणामेन तरङ्गमालायाः विशेषणत्वेन विशेषणानि योज्यानि । अथ समासः । दिङ्नागानां हस्ता दिङ्नागहस्ताः तेषाम् आकृतिः दिङ्नागहस्ताकृतिस्तां दि० । प्रशस्तानि च तानि असितरत्नानि च प्रशस्तासितरत्नानि तद्वद्नीलाः प्रशस्तासितरत्ननीलास्तैः प्र० । सर्प्पाणामावलिः स० । तरङ्गाणां माला त० । नभ एवार्णवो नभोर्णवस्तस्य न० । इति वृत्तार्थः ॥ ३८ ॥

निःश्वासधूमैः स्थगितांशुजालः फणावतामुत्फणमण्डलानाम् ।
गच्छन्निवास्तं वपुरभ्युवाह विलोचनानां सुखमुष्णरश्मिः ॥ ३९ ॥

'निःश्वास०' व्याख्या । **उष्णरश्मिः** सूर्यः **विलोचनानां** नेत्राणां **सुखं** सुखकारि **वपु**र्बिम्बम् **अभ्युवाह** धारयामास बभारेत्यर्थः । उष्णरश्मिः किंकुर्वन् ? उत्प्रेक्ष्यते **अस्तं गच्छन्निव** किं० उष्णरश्मिः ? **फणावतां** सर्प्पाणां **निःश्वासधूमैः** बाष्पधूमैः **स्थगितांशुजालः** आच्छादितकिरणसमूहः किं० फणावताम् ? **उत्फणमण्डलानाम्** ऊर्ध्वीकृतफणासमूहानाम् । अथ समासः । निःश्वासेषु धूमाः निःश्वासधूमास्तैर्नि० । अंशूनां जालम् अंशुजालं स्थगितम् अंशुजालं यस्य स स्थ० । फणा विद्यन्ते येषां ते फणावन्तस्तेषां फ० । उत् ऊर्ध्वं फणानां मण्डलं येषां ते उत्फणमण्डलास्तेषामु० । उष्णाः रश्मयो यस्य स उ० । इति वृत्तार्थः ॥ ३९ ॥

प्रतप्तचामीकरभासुरेण दिशः प्रकाशेन पिशङ्गयन्त्यः ।
निश्चक्रमुः प्राणहरेक्षणानां ज्वाला महोल्का इव लोचनेभ्यः ॥ ४० ॥

'प्रत०' व्याख्या । **प्राणहरेक्षणानां** दृष्टिविषसर्प्पाणां **लोचनेभ्यो** नेत्रेभ्यः **ज्वाला निश्चक्रमुः** निःसृताः किं० ज्वाला ? उत्प्रेक्ष्यते **महोल्का इव** उल्कापाता इव स्थिताः ज्वालाः किंकुर्वत्यः ? **प्रकाशेन** तेजसा **दिशः पिशङ्गयन्त्यः** पीतवर्णा इव कुर्वन्त्यः किं० प्रकाशेन ? **प्रतप्तचामीकरभासुरेण** अग्निशोधितसुवर्णवत् देदीप्यमानेन । अथ समासः । प्रतप्तं च तत् चामीकरं प्रतप्तचामीकरं प्रतप्तचामीकरवत् भासुरं प्रतप्तचामीकरभासुरं तेन प्र० । प्राणान् हरन्तीति प्राणहराणि प्राणहराणि ईक्षणानि येषां ते प्राणहरेक्षणास्तेषां प्रा० । इति वृत्तार्थः ॥ ४० ॥

आक्षिप्तसंपातमपेतशोभमुद्वह्निधूमाकुलदिग्विभागम् ।
वृत्तं नभो भोगिबलैरवस्थां परोपरुद्धस्य पुरस्य भेजे ॥ ४१ ॥

'आक्षि०' व्याख्या । **नभो** गगनं **पुरस्य** नगरस्य **अवस्थां** दशां **भेजे** सिषेवे पुरसाम्यं प्रापेत्यर्थः । किं० पुरस्य ? **परोपरुद्धस्य** शत्रुभिर्वेष्टितस्य किं० नभः ? **भोगिबलैः** सर्प्पसेन्यैः 'भोगिकुलैः' इति पाठस्तत्र सर्प्पसमूहैः **वृत्तं** व्याप्तं वेष्टितमित्यर्थः । पुनः किं० नभः ? **आक्षिप्तसंपातं** [प्रतिषिद्धसंचारं] सिद्धानां पक्षिणां चेति शेषः । [**अपेतशोभं** गतश्रीकं] प्रतिषिद्धगमनं पुरस्यापि आक्षिप्तसंपातस्य जनानां प्रतिषिद्धसंचारस्य । पुनः किं० नभः ? **उद्वह्निधूमाकुलदिग्विभागं** [**उद्‌गतः** प्रदीप्तः **वह्निस्तस्मिन्**] धूमैर्व्याप्तदिगन्तं विभक्तिव्यत्ययेन पुरविशेषणानि सर्वाणि योज्यानि उक्तरीत्या साधर्म्यं नभः पुरस्य प्राप्तमित्यर्थः[1]। अथ समासः । आक्षिप्तः संपातो यस्मिन् तत् आ० । अपेता शोभा [1]यस्य तत् अ० । उद्‌गतश्चासौ वह्निश्च उद्वह्निः उद्वह्नेर्धूमः उद्वह्निधूमः उद्वह्निधूमेन आकुलः दिग्विभागः यस्य तत् उ० । भोगिनां बलानि भोगिबलानि तैर्भो० । परैरुपरुद्धं परोपरुद्धं तस्य प० । इति वृत्तार्थः ॥ ४१ ॥

तमाशु चक्षुःश्रवसां समूहमस्त्रेण ताक्ष्योंदयकारणेन ।
नेता नयेनेव परोपजापं निवारयामास पतिः पशूनाम् ॥ ४२ ॥

'तमाशु०' व्याख्या । **पशूनां पतिः** महादेवः **आशु** शीघ्रं **तं चक्षुःश्रवसां** सर्प्पाणां **समूहं** पुञ्जं **ताक्ष्योंदयकारणेन** गरुडाविर्भावहेतुना **अस्त्रेण** मन्त्रेण कृत्वा **निवारयामास** कः केन कमिव ? नेता नयेन परोपजापमिव यथा **नेता** जिगीषुर्नायको **नयेन** पञ्चाङ्गमन्त्रेण नीत्या वा 'परोपजापं' **परेषां** वैरिवर्गाणाम् **उपजापं** स्वमण्डलं [प्रति] प्रयुक्तं भेदं निवारयति रुणद्धि । अथ समासः । चक्षूंषि श्रवांसि येषां ते चक्षुःश्रवसस्तेषां च० । ताक्ष्योणामुदयः ताक्ष्योंदयः ताक्ष्योंदयस्य कारणं ताक्ष्योंदयकारणं तेन ता० । परस्य उपजापः परोपजापः तं प० । इति वृत्तार्थः ॥ ४२ ॥

प्रतिघ्नतीभिः कृतमीलितानि द्युलोकभाजामपि लोचनानि ।
गरुत्मतां संहतिभिर्विहायः क्षणप्रकाशाभिरिवावतेने ॥ ४३ ॥ (उपे.)

'प्रति०' व्याख्या । **गरुत्मतां** गरुडानां **संहतिभिः** श्रेणिभिः **विहायो** गगनम् **अवतेने** व्यानशे व्याप्तं काभिरिव ? क्षणप्रकाशाभि**रिव** यथा **क्षणप्रकाशाभिः** विद्युद्भिः विहायो व्याप्यते किं० संहतिभिः ? **द्युलोकभाजां** निमेषरहितानां देवानामपि **लोचनानि** नेत्राणि **प्रतिघ्नतीभिः** प्रतिघ्नतं कुर्वतीभिः किं० लोचनानि ? **कृतमीलितानि** संकुचितानि तासां सौवर्णत्वात् दृष्टिप्रतिघातित्वमुभयोरपीत्यर्थः । अथ समासः । प्रतिघ्नन्ति ताः प्रतिघ्नन्त्यस्ताभिः प्रतिघ्नतीभिः । कृतं मीलितं येषां तानि कृ० । द्युलोकं भजन्ती ते द्युलोकभाजस्तेषां द्यु० । गरुतो विद्यन्ते येषां ते गरुत्मन्तस्तेषां ग० । इति वृत्तार्थः ॥ ४३ ॥

ततः सुपर्णव्रजपक्षजन्मा नानागतिर्मण्डलयन् जवेन ।
जरत्तृणानीव वियन्निनाय वनस्पतीनां गहनानि वायुः ॥ ४४ ॥ (उ.)

1. एष पाठः म. मध्ये ।

१. निदर्शनालंकारः -म.

'ततः' व्याख्या । **ततो**ऽनन्तरं **वायु**र्वातः **वनस्पतीनां** तरूणां **गहनानि** वनानि **वियत्** गगनं **निनाय** अनैषीत् प्रापयदित्यर्थः । किं० वायुः ? **सुपर्णव्रजपक्षजन्मा** गरुडसमूहपिच्छोत्पन्नः पुनः किं० वायुः ? **नानागतिः** विविधगमनः विचित्रगतिः इत्यर्थः । पुनः किं० वायुः ? **जवेन** वेगेन **मण्डलयन्** मण्डलीभवन् कानीव ? **जरत् तृणानीव** यथा जरत्तृणानि वायुर्वियत् नयति तद्वत् । अथ समासः । सुपर्णानां व्रजाः सुपर्णव्रजाः सुपर्णव्रजानां पक्षाः सुपर्णव्रजपक्षाः सुपर्णव्रजपक्षे जन्म यस्य स सु० । नाना गतिर्यस्य स ना० । जरन्ती च तानि तृणानि च जर० । इति वृत्तार्थः ॥४४॥

मनःशिलाभङ्गनिभेन पश्चान्निरुध्यमानं निकरेण भासाम् ।
व्यूढैरुरोभिश्च विनुद्यमानं नभः ससर्पेव पुरः खगानाम् ॥ ४५ ॥ (उ.)

'मनः' व्याख्या । **नभो** गगनं **खगानां** गरुडानां **पुरो**ऽग्रे **ससर्प** प्रससारेव अग्रे चलितमिलितमिव इत्यर्थः । किं० नभः ? **भासां** कान्तीनां **निकरेण** समूहेन **पश्चात्** पश्चाद्भागे **निरुध्यमानम्** आह्रियमानं व्याप्यमानमित्यर्थः । किं० निकरेण ? **मनःशिलाभङ्गनिभेन** मनःशिलाच्छेदसदृशेन मनःशिला धातुविशेषः । पुनः किं० नभः ? **व्यूढैः** विस्तीर्णैः **उरोभिः** हृदयैः पुरेति शेषः **विनुद्यमानं** प्रेर्यमाणं पुरः शब्दस्य पुनरुक्तिभीतेः पुनरप्रयोगः[१] । अथ समासः । मनःशिलायाः भङ्गो मनःशिलाभङ्गः मनःशिलाभङ्गस्य निभः मनःशिलाभङ्गनिभस्तेन म० । इति वृत्तार्थः ॥ ४५ ॥

दरीमुखैरासवरागताम्रं विकासि रुक्मच्छदधाम पीत्वा ।
जवानिलाघूर्णितसानुजालो हिमाचलः क्षीब इवाचकम्पे ॥ ४६ ॥ (उपे.)

'दरी०' व्याख्या । **हिमाचलो** हिमवान् **क्षीबो** मत्त **इव आचकम्पे** कम्पते स्म किंकृत्वा ? **रुक्मच्छदधाम** गरुडतेजः **पीत्वा** आस्वाद्य अन्योऽपि यो मत्तो भवति स किंचित् पीत्वा मत्तो भवति तद्वदिति । किं० रुक्मच्छदधाम ? **आसवरागताम्रं** पुराणत्रिवार्षिकमदिरारागवद्रक्तं पुनः किं० रुक्म० ? **विकासि** प्रसरणशीलं किं० हिमाचलः ? **जवानिलाघूर्णितसानुजालः** गरुडपक्षवेगसमुत्थेन वातेन चालितशिखरसमूहः । अथ समासः । दर्य्य एव मुखानि दरीमुखानि तैः द० । आसवस्य रागः आसवरागः आसवरागवत् ताम्रम् आ० । रुक्मच्छदानां धाम रु० । जवश्चासावनिलश्च जवानिलः जवानिलेन आघूर्णितानि सानूनां जालानि यस्य स ज० । इति वृत्तार्थः ॥४६॥

प्रवृत्तनक्तंदिवसन्धिदीप्तैर्नभस्तलं गां च पिशङ्गयद्भिः ।
अन्तर्हितार्कैः परितः पतद्भिश्छायाः समाचिक्षिपिरे वनानाम् ॥ ४७ ॥ (उ.)

'प्रवृत्त०' व्याख्या । **पतद्भिः** पक्षिभिः गरुडैः **परितः** सर्वतो **वनानां** काननानां **छायाः** शोभाः **समाचिक्षिपिरे** स्फेटिता अन्तर्बहिश्च तेजःप्रवेशात् क्वापि गतेत्यर्थः । किं० पतद्भिः ? **अन्तर्हितार्कैः**

१. उत्तरोत्तरदेशतिरोधानेन गच्छतां खगानामपूर्वोऽपि पुरोभागः सादृश्यात्पूर्ववदुपलभ्यमानतया नभस एव छेदनात्पुरः ससर्पेवेत्युत्प्रेक्षा -म. ।

आच्छादितसूर्यैः । पुनः किं० पतद्भिः ? **नभस्तलं** गगनं **गां** भुवं **च पिशङ्गयद्भिः** पिशङ्गीकुर्वद्भिः पुनः किं० पतद्भिः ? **प्रवृत्तनक्तंदिवसन्धिदीप्तैः** प्रादुर्भूतरात्रिंदिवसन्धिवत् दीप्तैः दीपनशीलैः उभयकाल-संध्यारुणैरित्यर्थः । अथ समासः । नक्तं च दिवा च नक्तंदिवं नक्तंदिवस्य सन्धिः नक्तंदिवसन्धिः प्रवृत्तश्चासौ नक्तंदिवसन्धिश्च प्रवृत्तनक्तंदिवसन्धिस्तद्वत् दीप्ताः प्रवृत्तनक्तंदिवसन्धिदीप्तास्तैः प्र० । अन्तर्हितोऽर्को यैस्ते अन्तर्हितार्कास्तैः अ० । इति वृत्तार्थः ॥ ४७ ॥

स भोगिसङ्घः क्षयमुग्रधाम्नां सैन्येन निन्ये विनतासुतानाम् ।
महाध्वरे विध्यपचारदोषः कर्मान्तरेणेव महोदयेन ॥ ४८ ॥ (उ.)

'स भो०' व्याख्या । **विनतासुतानां** गरुडानां **सैन्येन** बलेन **स** पूर्वोक्तो **भोगिसङ्घः** सर्पसमूहः **क्षयं** विनाशं 'शमम्'[1] इति पाठस्तत्र शमं शान्तिं **निन्ये** नीतः प्रापित इत्यर्थः । किं० विनता० ? **उग्रधाम्नां** प्रकटतेजसां तेजस्विनामित्यर्थः । केन क इव ? कर्मान्तरेण विध्यपचारदोष इव **महाध्वरे** महायागे **कर्म्मान्तरेण** प्रायश्चितेन **विध्यपचारदोषः** अनुष्ठानस्खलनदोषः क्षयं शमं वा नीयते तद्वदित्यर्थः । किं० कर्मान्तरेण ? **महोदयेन** महाफलेन महासामर्थ्येन वा । अथ समासः । भोगिनां सङ्घः भो० । उग्रं धाम येषां ते उग्रधामानस्तेषामु० । विनतायाः सुताः विनतासुतास्तेषां वि० । महांश्चासौ अध्वरश्च महाध्वरस्तस्मिन् म० । विधेरपचारः विध्यपचारः विध्यपचारस्य दोषः वि० । एकस्मात् कर्मणोऽन्यत् कर्म कर्मान्तरं तेन क० । महान् उदयो यस्य तन्महोदयं तेन म० । इति वृत्तार्थः ॥ ४८ ॥

साफल्यमस्त्रे रिपुपौरुषस्य कृत्वा गते भाग्य इवापवर्गम् ।
अनिन्धनस्य प्रसभं समन्युः समाददेऽस्त्रं ज्वलनस्य जिष्णुः ॥ ४९ ॥ (उ.)

'साफ०' व्याख्या । स **जिष्णुरर्जुनः ज्वलनस्यास्त्रम्** आग्नेयास्त्रं **प्रसभं** शीघ्रं यथा स्यात्तथा **समाददे** जग्राह आग्नेयास्त्रममुञ्चदित्यर्थः । किं० ज्वलनस्य ? **अनिन्धनस्य** इन्धनरहितस्य इन्धनं विनैवोत्पादितस्येत्यर्थः । किं० जिष्णुः ? **समन्युः** सकोपः कस्मिन् सति ? **अस्त्रे** सर्प्पास्त्रे **रिपुपौरुषस्य** वैरिविक्रमस्य **साफल्यं** सफलतां सार्थकत्वं **कृत्वा** विधाय **अपवर्गं** विनाशम् अवसानं समाप्तिं **गते** प्राप्ते सति स्वनिवृत्त्या परसाफल्यात्सफलीकरणोपचारः । किं० अस्त्रे ? उत्प्रेक्ष्यते **भाग्ये** प्राग्भवीये शुभकर्मणीव । अथ समासः । सफलस्य भावः साफल्यम् । रिपोः पौरुषं रिपुपौरुषं तस्य रि० । न विद्यन्ते इन्धनानि यस्मिन् स अनिन्धनस्तस्य अ० । इति वृत्तार्थः ॥ ४९ ॥

ऊर्ध्वं तिरश्चीनमधश्च कीर्णैर्ज्वालाजटैर्लङ्घितमेघपङ्क्तिः ।
आयस्तसिंहाकृतिरुत्पपात प्राण्यन्तमिच्छन्निव जातवेदाः ॥ ५० ॥ (इ.)

'ऊर्ध्वं०' व्याख्या । **जातवेदाः** अग्निः **उत्पपात** उदियाय किं० जातवेदाः ? **आयस्त-सिंहाकृतिः** लङ्घनोद्यतसिंहाकारः यथा क्रुद्धः सिंहः सर्वतः ज्वालानुकारिस्कन्धकेशरैः उच्छलति तद्वदित्यर्थः ।

1. एष पाठः म. मध्ये ।

पुनः किं० जातवेदाः ? **ज्वालाजटैर्लङ्घितमेघपङ्क्तिः** ज्वालारूपकेशरैरतिक्रान्तजलदश्रेणिः किं० ज्वालाजटैः ? **ऊर्ध्वं तिरश्चीनमधश्च कीर्णैः** व्याप्तैः विस्तृतैरित्यर्थः । किंकुर्वन् जातवेदाः ? **प्राण्यन्तमिच्छन्निव** प्राणिनां संहारं कर्तुम् इच्छन्निव स्थितः । अथ समासः । ज्वाला एव जटाः ज्वालाजटास्तैर्ज्वा० । लङ्घिता मेघानां पङ्क्तिर्येन स ल० । आयस्तस्य सिंहस्येव आकृतिर्यस्य स आ० । इति वृत्तार्थः ॥ ५० ॥

भित्त्वेव भाभिः सवितुर्मयूखान् जज्वाल विष्वग्विसृतस्फुलिङ्गः ।
विशीर्यमाणाश्मनिनादभीमं[1] ध्वनिं वितन्वन्नकृशः कृशानुः ॥ ५१ ॥ (उ.)

'भित्त्वे०' व्याख्या । **अकृशः** प्रचुरः **कृशानुर्**वह्निः **जज्वाल** दिदीपे किंकृत्वा ? **भाभिः** कान्तिभिः **सवितुर्मयूखान्** सूर्यस्य किरणान् **भित्त्वेव** विदार्येव किं० कृशानुः ? **विष्वक्** सर्वतः **विसृतस्फुलिङ्गः** प्रसृताग्निकणः कृशानुः किंकुर्वन् ? **ध्वनिं** शब्दं **वितन्वत्** विस्तारयन् किं० ध्वनिम् ? **विशीर्यमाणाश्मनिनादभीमं** विदार्यमाणपाषाणध्वनिवद्रौद्रम् । अथ समासः । विसृताः स्फुलिङ्गाः यस्य स वि० विशीर्यमाणश्च अश्मा च विशीर्यमाणाश्मा विशीर्यमाणाश्मनो निनादः विशीर्यमाणाश्मनिनादस्तद्वत् भीमः विशीर्यमाणाश्मनिनादभीमस्तं वि० । न कृशोऽकृशः । इति वृत्तार्थः ॥ ५१ ॥

चयानिवाद्रीनिव तुङ्गशृङ्गान् क्वचित्पुराणीव हिरण्मयानि ।
महावनानीव च किंशुकानां ततान वह्निः पवनानुवृत्त्या ॥ ५२ ॥ (उपे.)

'चया०' व्याख्या । **वह्नि**रग्निः **पवनानुवृत्त्या** वायुवशेन **क्वचित्** कस्मिंश्चित् प्रदेशे **चयानिव** प्राकारानिव क्वचित् [**तुङ्गशृङ्गान्**] उन्नतशिखरान् **अद्रीनिव** पर्वतानिव **हिरण्मयानि** हेममयानि पुराणीव नगराणीव क्वचित् **किंशुकानां** पलाशकुसुमानां **महावनानीव ततान** विस्तारयामास तदाकारेण जज्वालेत्यर्थः। वातवशात् क्वचित् काञ्चनकूटनिभः क्वचिदुन्नतशिखराचलनिभः क्वचिदनेकहैम-गुणात्मकनगराकारः क्वचित् किंशुकवनाकृतिरग्निरालोक्यते इत्यर्थः । अथ समासः । तुङ्गानि शृङ्गाणि येषां ते तुङ्गशृङ्गास्तान् तु० । पवनस्य अनुवृत्तिः पवनानुवृत्तिस्तया प० । इति वृत्तार्थः ॥ ५२ ॥

मुहुश्चलत्पल्लवलोहिताभि[2]रुच्चैः शिखाभिः शिखिनोऽवलीढाः ।
तलेषु मुक्ताविशदा बभूवुः सान्द्राञ्जनश्यामरुचः पयोदाः ॥ ५३ ॥ (उ.)

'मुहु०' व्याख्या । **पयोदा** मेघाः **तलेषु** अधोभागेषु **मुक्ताविशदाः** मुक्ताफलवदुज्ज्वलाः **बभूवु**रासन् किं० पयोदाः ? **सान्द्राञ्जनश्यामरुचः** बहुलकज्जलकृष्णकान्तयः एवंलक्षणा अपि मेघाः वह्निना जलशोषणात् मुक्ताफलवद्धवला जाता इत्यर्थः । तत् कुतः इत्याह- किं० पयोदाः ? **शिखिनो** वह्नेः **शिखाभिः** ज्वालाभिः **उच्चै**रतिशयेन **मुहुः** वारंवारम् **अवलीढाः** दग्धाः किं० शिखाभिः ?

1. ०धीरं० म. इदं च पा. । 2. लोहिनीभिः -म. ।

चलत्पल्लवलोहिताभिः चञ्चलकिशलयवत् पाटलाभिः लोहितवर्णाभिरित्यर्थः। अथ समासः । चलन्तश्च ते पल्लवाश्च चलत्पल्लवाः चलत्पल्लववत् लोहिताः चलत्पल्लवलोहिताः ताभिः च० । मुक्तावत् **विशदाः** मु० । सान्द्रं च तदञ्जनं च सान्द्राञ्जनं सान्द्राञ्जनवत् श्यामा रुक् येषां ते सा०। इति **वृत्तार्थः** ॥५३॥

लिलिक्षतीव क्षयकालरौद्रे लोकं विलोलार्चिषि लोहिताश्वे ।
पिनाकिनाऽऽहूतमहाम्बुवाहमस्त्रं पुनः पाशभृतः प्रणिन्ये ॥ ५४ ॥ (उ.)

'लिलि०' व्याख्या । **पिनाकिना** महादेवेन **पुनः** भूयोऽपि **पाशभृतो** वरुणस्य **अस्त्रं** मेघास्त्रं **प्रणिन्ये** प्रयुक्तं वरुणास्त्रं मुक्तमित्यर्थः । किं० अस्त्रम् ? **आहूतमहाम्बुवाहम्** आकारितमहामेघं कस्मिन् सति ? **लोहिताश्वे** वह्नौ **लोकं** विश्वं **लिलिक्षतीव** लेढुमिच्छतीव सति किं० लोहिताश्वे ? **क्षयकालरौद्रे** प्रलयकालवत् भीमे भयङ्करे पुनः किं० लोहि० ? **विलोलार्चिषि** चपलज्वाले । अथ समासः । क्षयकालवत् रौद्रः क्षयकालरौद्रः तस्मिन् क्ष० । विलोलानि अर्चींषि यस्य स विलोलार्चिस्तस्मिन् वि० । लोहिता अश्वा यस्य स लोहिताश्वस्तस्मिन् लो० । आहूता महाम्बुवाहा येन यस्मिन् वा तत् आ० । इति **वृत्तार्थः** ॥ ५४ ॥

ततो धरित्रीधरतुल्यरोधसस्तडिल्लतालिङ्गितनीलमूर्तयः ।
अधोमुखाकाशसरिन्निपातिनीरपः प्रसक्तं मुमुचुः पयोमुचः ॥ ५५ ॥

[का. ६१ यावद् वंशस्थवृत्तम्]

'ततो०' व्याख्या । **ततो** वरुणास्त्रप्रयाणानन्तरं **पयोमुचो** मेघाः **प्रसक्तं** निरन्तरम् **अपो** जलानि **मुमुचुः** ववर्षुः किं० पयोमुचः ? **धरित्रीधरतुल्यरोधसः** पर्वतोपमतटाः [पुनः किं पयोमुचः ? **तडिल्लतालिङ्गिनीलमूर्तयः**] विद्युद्वल्लीसंसक्तकृष्णदेहाः किं० अपः ? **अधोमुखाकाशसरिन्निपातिनीः** अधोमुखा या आकाशगङ्गा तद्वत्पतनशीलाः अधोमुखपतत्स्वर्गङ्गाप्रवाहसदृशीरित्यर्थः । अथ समासः । [धरित्रीं धरति धरित्रीधरः धरित्रीधरेण तुल्यः रोधः येषां ते] ध० तडिल्लताभिरालिङ्गिता नीला मूर्तिः येषां ते त० । आकाशस्य सरित् आकाशसरित् अधोमुखी चासौ आकाशसरिच्च अधोमुखाकाशसरित् तद्वत् निपतन्त्यस्ताः अ० । इति वृत्तार्थः ॥ ५५ ॥

पराहतध्वस्तशिखे शिखावतो वपुष्यविक्षिप्तसमृद्धतेजसि ।[2]
कृतास्पदास्तप्त इवायसि ध्वनिं पयोनिपाताः प्रथमे वितेनिरे ॥ ५६ ॥

'परा०' व्याख्या । **प्रथमे** पूर्वे **पयोनिपाताः** जलनिपाताः **ध्वनिं** शब्दं **वितेनिरे** विस्तारयामासुः किं० पयोनिपाताः ? **शिखावतो** वह्नेः **वपुषि** देहे **कृतास्पदाः** विहितस्थानकाः किं० वपुषि ? उत्प्रेक्ष्यते **तप्ते आयसीव** यथा तप्ते लोहे प्रथमबिन्दुः पतितः सन् ध्वनति तद्वद् इत्यर्थः। पुनः किं० वपुषि ? **पराहतध्वस्तशिखे** अभिहतनिर्वापितज्वाले पुनः किं० वपुषि ? **अविक्षिप्तसमृद्धतेजसि**

1. पिनाकिना हूत० म. 2. अधिक्षिप्तसमिद्धते० -म. ।

सर्वम(?)नपास्तदीप्तप्रकाशे। अथ समासः । पूर्वं पराहता पश्चात् शिखा यस्य तत् तस्मिन् प०। शिखा अस्यास्तीति शिखावान् तस्य शि० । न विक्षिप्तं समृद्धं तेजो यस्य तत् अविक्षिप्तसमृद्धतेजस्तस्मिन् अ० । कृतमास्पदं यैस्ते कृ०। इति वृत्तार्थः ॥ ५६ ॥

महानले भिन्नसिताभ्रपातिभिः समेत्य सद्यः क्वथनेन फेनताम् ।
व्रजद्भिरार्द्रेन्धनवत्परिक्षयं जलैर्वितेने दिवि धूमसंततिः ॥ ५७ ॥

'महा०' व्याख्या । **जलैर्नीरैः दिवि** आकाशे **धूमसंततिः** धूमश्रेणिः **वितेने** विस्तारिताः किं-वत् ? **आर्द्रेन्धनवत्** यथा आर्द्रेन्धनैः धूमस्तन्यते तद्वदित्यर्थः । किं० जलैः ? **महानले** महति वैश्वानरे **भिन्नसिताभ्रपातिभिः** खण्डितश्वेताभ्रात् पतनशीलैः पुनः किं० जलैः ? अत एव **सद्यस्**तत्कालमेव **क्वथनेन** पाकेन शोषणेन वा **फेनतां** पाण्डुतां **समेत्य** प्राप्य **परिक्षयं** नाशं **व्रजद्भिः** गच्छद्भिः । अथ समासः । महांश्चासौ अनलश्च महानलस्तस्मिन् म० । भिन्नानि सितानि च तानि अभ्राणि च भिन्नसिताभ्राणि भिन्नसिताभ्रेभ्यः पतन्तीत्येवंशीलानि भिन्नसिताभ्रपातीनि तैः भि० । फेनस्य भावः फेनता तां फे० । आर्द्राणि च तानि इन्धनानि च आर्द्रेन्धनानि आर्द्रेन्धनैस्तुल्यम् आर्द्रेन्धनवत् । धूमानां संततिः धू०। इति वृत्तार्थः ॥ ५७ ॥

स्वकेतुभिः पाण्डुरनीलपाटलैः समागताः शक्रधनुःप्रभाभिदः ।
असंस्थितामादधिरे विभावसोर्विचित्रचीनांशुकचारुतां त्विषः ॥ ५८ ॥

'स्वके०' व्याख्या । **विभावसोः** वह्नेः **त्विषः** कान्तयः **विचित्रचीनांशुकचारुतां** नानावर्णचीन-देशोद्भवाम्बररमणीयताम् **आदधिरे** जगृहुः किं० विचि० ? **असंस्थिताम्** अस्थिरां चञ्चलामित्यर्थः। किं० **त्विषः** ? **स्वकेतुभिः** स्वकीयचिह्नैर्धूमैः **समागताः** संमिलिताः किं० स्वकेतुभिः ? **पाण्डुरनीलपाटलैः** पाण्डुरकृष्णपिशङ्गैः नानावर्णैरित्यर्थः । पुनः किं० **त्विषः** ? **शक्रधनुःप्रभाभिदः** इन्द्रधनुःप्रभाकारिण्यः । अथ समासः । स्वस्य केतवः स्वकेतव[: तैः स्व० पाण्डुराश्च नीलाश्च पाटलाश्च] पाण्डुरनीलपाटलास्तैः पा० । शक्रधनुषः प्रभां भिनत्ति ताः श० । न संस्थिता असंस्थिता ताम०। चीनस्य अंशुकं चीनांशुकं विचित्रं तच्चीनांशुकं [विचित्रचीनांशुकं तस्य चारुता तां वि०] । इति वृत्तार्थः ॥ ५८ ॥

जलौघसम्मूर्च्छनमूर्च्छितस्वनः प्रसक्तविद्युल्लसितैधितद्युतिः ।
प्रशान्तिमेष्यन्धृतधूममण्डलो बभूव भूयानिव तत्र पावकः ॥ ५९ ॥

'जलौ०' व्याख्या । **तत्र** तस्मिन् प्रदेशे **पावको**ऽग्निः **प्रशान्तिमेष्यन्** शान्तिं गमिष्यन् **भूयानिव** बहुरिव **बभूव** अभवत् भूयस्स्वस्थायित्वादिवेत्युक्तम् । अग्नेर्दीपस्य चायं स्वभावः **यत्** शान्तिसमये वर्द्धते पश्चाच्छाम्यत(ती)ति भावः । किं० पावकः ? **जलौघसंमूर्च्छनमूर्च्छितस्वनः** जलप्रवाहमिलनेन वर्द्धितशब्दः पुनः किं० पावकः ? **प्रसक्तविद्युल्लसितैधितद्युतिः** निरन्तरविद्युत्स्फुरणैर्वधितद्युतिः। पुनः किं० पावकः ? **धृतधूममण्डलः** गृहीतधूमसमूहः जलसंपर्कात्संभृतधूमपटल इत्यर्थः । अथ समासः। जलानामोघः जलौघः जलौघस्य संमूर्च्छनं जलौघसंमूर्च्छनं तेन मूर्च्छितः स्वनो यस्य स ज०।

प्रसक्तविद्युल्लसितैरेधिता द्युतिर्यस्य स प्र० । धृतं धूमानां मण्डलं येन स धृ० । इति वृत्तार्थः ॥ ५९ ॥

प्रवृद्धसिन्धूर्मिचयस्थवीयसां रयैर्विभिन्ना पयसां प्रपेदिरे ।
उपात्तसंध्यारुचिभिः सरूपतां पयोदविच्छेदलवैः कृशानवः ॥ ६० ॥

'प्रवृद्ध०' व्याख्या । **कृशानवो**ऽग्नयः **पयोदविच्छेदलवैः** मेघखण्डलेशैः **सरूपतां** सदृशतां सादृश्यं **प्रपेदिरे** प्रपन्नाः किं० पयो० ? **उपात्तसंध्यारुचिभिः** गृहीतसंध्याकान्तिभिः किं० कृशानवः ? **पयसां** जलानां **रयैर्वेगैः** क्वचिच् 'चयैः'[1] इति पाठस्तत्र चयै रोधैः **विभिन्ना** भेदं प्राप्ताः शान्ता इत्यर्थः। किं० पयसाम् ? **प्रवृद्धसिन्धूर्मिचयस्थवीयसां** वृद्धिंगतसागरोर्मिसमूहवत् स्थूलतराणाम् । अथ समासः । प्रवृद्धाश्च ते सिन्धूर्मयश्च प्रवृद्धसिन्धूर्मयः प्रवृद्धसिन्धूर्मीणां चयः प्रवृद्धसिन्धूर्मिचयस्तद्वत्स्थवीयसः- प्रवृद्धसिन्धूर्मिचयस्थवीयसस्तेषां प्रवृद्ध० । उपात्ता संध्याया रुचिर्यैस्ते उपात्तसंध्यारुचयः तैरु० । पयोदानां विच्छेदाः पयोदविच्छेदाः पयोदविच्छेदानां लवाः पयोदविच्छेदलवास्तैः प० । इति वृत्तार्थः ॥ ६० ॥

उपैत्यनन्तद्युतिरप्यसंशयं विभिन्नमूलोऽनुदयाय संक्षयम् ।
तथाहि तोयौघविभिन्नसंहतिः स हव्यवाहः प्रययौ पराभवम् ॥ ६१ ॥

'उपै०' व्याख्या । **अनन्तद्युतिः** प्रचुरतेजोपि (जा अपि) **विभिन्नमूलो** विच्छिन्नमूलः सन् **अनुदयाय** अनुत्पत्तेः पुनरनुच्छाये(?)त्यर्थः **असंशयं** निश्चितं **संक्षयं** विनाशम् **उपैति** प्राप्नोति पुनर्नोदेतीति भावः। **तथाहि** दृष्टान्ते **स हव्यवाहो**ऽग्निः **पराभवं** नाशं **प्रययौ** प्राप्तवान् किं० हव्यवाहः ? **तोयौघविभिन्नसंहतिः** जलसमूहविनाशितमूलः । अथ समासः । अनन्ता द्युतिर्यस्य सोऽन० । न विद्यते संशयो यस्मिन् कर्मणि तत् असंशयम् । विभिन्नं मूलं यस्य स वि० । तोयानामोघस्तोयौघस्तेन विभिन्ना संहतिर्यस्य स [तोयौघ]विभिन्नसंहतिः । इति वृत्तार्थः ॥ ६१ ॥

अथ विहितविधेयैराशु मुक्ता वितानैरसितनगनितम्बश्यामभासां घनानाम् ।
विकसदमलधाम्नां प्राप नीलोत्पलानां श्रियमधिकविशुद्धां वह्निदाहादिव द्यौः ॥६२॥ (मा०)

'अथ०' व्याख्या । **अथ** वह्निदाहानन्तरं **द्यौ**र्गगनं **नीलोत्पलानां** नीलकमलानाम् इन्दीवरादीनां **श्रियं** शोभां **प्राप** प्रपेदे किं० नीलो० ? **विकसदमलधाम्नां** विकसन्निर्मलतेजसां किं० श्रियम् ? **वह्निदाहादिव** वैश्वानरज्वलनादिव **अधिकविशुद्धाम्** अधिकतरनिर्मलां सुवर्णादि दाहानन्तरं विशुद्धकान्ति भवतीति ध्वनिः । किं० द्यौः ? **घनानां** मेघानां **वितानैः** समूहैः **मुक्ता** क्वचित् **'युक्ता'** इति पाठस्तत्र **युक्ता** संयुक्ता किं० वितानैः ? **आशु** शीघ्रं **विहितविधेयैः** कृतवह्निशमनलक्षणकार्यैः किं० घनानाम् ? **असितनगनितम्बश्यामभासां** अञ्जनगिरिमेखलावत् कृष्णकान्तीनाम् । अथ समासः । विकसदमलं धाम येषां तानि विकसदमलधामानि तेषां वि० । नीलानि च तानि उत्पलानि च नीलोत्पलानि तेषां नी० । अधिका विशुद्धा अधिकविशुद्धा ताम् अ० । इति वृत्तार्थः ॥ ६२ ॥

1. एष पाठः म. मध्ये ।

१. निदर्शनालंकारः -म. ।

इति विविधमुदासे सव्यसाची यदस्त्रं बहुसमरनयज्ञः सादयिष्यन्नरातिम् ।
विधिरिव विपरीतः पौरुषं न्यायवृत्तेः सपदि तदुपनिन्ये रिक्ततां नीलकण्ठः ॥६३॥ (मा०)

'इति०' व्याख्या । **सव्यसाची** अर्जुनः **इति** पूर्वोक्तप्रकारेण **विविधं** नानाप्रकारं **यत् अस्त्रम्** आयुधं **चिक्षेप** प्रयुक्तवानित्यर्थः । किं० सव्यसाची ? **बहुसमरनयज्ञः** अनेकसंग्रामव्यवहारकौशलः सव्यसाची किंकरिष्यन् ? **अरातिं** वैरिणं **सादयिष्यन्** हन्तुमिच्छन् तदर्जुनास्त्रं **नीलकण्ठो** महादेवः **सपदि** शीघ्रं **रिक्ततां** निष्फलताम् **उपनिन्ये** अगमयत् प्रापयदित्यर्थः । कः कस्य किमिव ? विधि**रिव** यथा **विपरीतः** प्रतिकूलो **विधिर्दैवं न्यायवृत्तेः** सन्मार्गवर्तिनः पुरुषस्य **पौरुषं** पराक्रमं **रिक्तताम्** अप्रमाणतां **नयति** प्रापयति। अथ समासः । समरस्य नयाः समरनयाः बहवश्च ते समरनयश्च बहुसमरनयाः तान् जानातीति ब० । न्यायेन वृत्तिर्यस्य स न्यायवृत्तिस्तस्य न्या० । रिक्तस्य भावो रिक्तता तां रि० । नीलः कण्ठो यस्य स नी० । इति वृत्तार्थः ॥ ६३ ॥

वीतप्रभावतनुरप्यतनुप्रभावः प्रत्याचकाङ्क्ष जयिनीं भुजवीर्यलक्ष्मीम् ।
अस्त्रेषु भूतपतिनापहृतेषु जिष्णुर्वर्षिष्यता दिनकृतेव जलेषु लोकः ॥ ६४ ॥ (व०)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *दिव्यास्त्रवर्णनो* नाम षोडशः सर्गः ॥१६॥

'वीत०' व्याख्या । **जिष्णुरर्जुनः जयिनीं** जयनशीलां **भुजवीर्यलक्ष्मीं** बाहुपराक्रमसंपदं **प्रत्याचकाङ्क्ष** अभिललाष ववाञ्छेत्यर्थः । यथा लोको नद्यादिजलापहारेऽपि उपायान्तरेण जीवितुम् इच्छतीति तद्वदित्यर्थः । किं० जिष्णुः ? **वीतप्रभावतनुरपि** गतप्रभाववपुरपि सन् **अतनुप्रभावः** गुरुतरप्रभावः केषु सत्सु ? **भूतपतिना** शङ्करेण **अस्त्रेषु** प्रस्वापनादिषु **अपहृतेषु** सत्सु अनुग्रहयिष्यता इति शेषः । क इव ? लोक **इव** यथा **लोकः** ग्रीष्मे **वर्षिष्यता** वर्षणशीलेन **दिनकृता** रविणा जगज्जीवनेषु **जलेषु** पानीयेषु अपहृतेषु सत्सु कृष्याद्युद्यमेन **लक्ष्मीं** सस्यसंपदं प्रत्याकाङ्क्षति वाञ्छति किं० दिनकृता ? वर्षासु सहस्रगुणं **वर्षिष्यता**। अथ समासः । वीतः प्रभावो यस्याः सा वीतप्रभावा वीतप्रभावा तनुर्यस्य स वी० । अतनुः प्रभावो यस्य सोऽत० । जयोऽस्या अस्तीति जयिनी तां ज० । भुजयोर्वीर्यं भुजवीर्यं भुजवीर्यस्य लक्ष्मीः भुजवीर्यलक्ष्मीः तां भु० । भूतानां पतिः भूतपतिस्तेन भू० । वर्षिष्यतीति वर्षिष्यन् तेन व० । दिनं करोतीति दिनकृत् तेन दि० । इति वृत्तार्थः ॥ ६४ ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्त्रवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद् गणभृतस्तैस्तैर्गुणै रेजिरे ॥ १ ॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपथभाजि किरातकाव्ये सर्गेण षोडशमितेन समासिराप्ता ॥ २ ॥

इति श्रीभट्टभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***अस्त्रयुद्धो***नाम षोडशः सर्गः ॥ १६ ॥ शुभं भवतुतराम् ।

सप्तदशः सर्गः।

ऐं नमः । श्री गुरुभ्यो नमः । अथ पुनः पार्थयुद्धवर्णनाय सप्तदशं सर्गमारभते । '**पार्थो**ऽर्जुनः **शरेषु** बाणेषु **जयं** विजयम् **आशशंसे** प्रत्याचकाङ्क्ष' इत्युत्तरत्र संबन्धः षड्भिः श्लोकैः । पञ्चभिः श्लोकैः पार्थं वर्णयिष्यन् कुलकमाह –

अथापदामुद्धरणक्षमेषु मित्रेष्विवास्त्रेषु तिरोहितेषु ।
धृतिं गुरुश्रीर्गुरुणाभिपुष्यन् स्वपौरुषेणेव शरासनेन ॥ १ ॥ (उ.)

भूरिप्रभावेण रणाभियोगात्प्रीतो विजिह्मश्च तदीयवृद्ध्या ।
स्पष्टोऽप्यविस्पष्टवपुःप्रकाशः सर्पन्महाधूम इवाद्रिवह्निः ॥ २ ॥ (इ.)

तेजः समाश्रित्य परैरहार्यं निजं महन्मित्रमिवोरुधैर्यम् ।
आसादयन्नस्खलितप्रभावो[1] भीमे भुजालम्बमिवारिदुर्गे ॥ ३ ॥ (उ.)

वंशोचितत्वादभिमानवत्या संप्राप्तया सु[2]प्रियतामसुभ्यः ।
समक्षमादित्सितया परेण वध्वेव कीर्त्या परितप्यमानः ॥ ४ ॥ (उ.)

पतिं नगानामिव बद्धमूलमुन्मूलयिष्यंस्तरसा विपक्षम् ।
लघुप्रयत्नं निगृहीतवीर्यस्त्रिमार्गगावेग इवेश्वरेण ॥ ५ ॥ (उ.)

संस्कारवत्त्वाद्रमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु ।
जयं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंसे ॥ ६ ॥ (उ.)

'अथ० भूरि० तेज० वंशो० पतिं० संस्का०' व्याख्या । **अथ** जयश्रीप्रत्याकाङ्क्षानन्तरं **पार्थो**ऽर्जुनः **शरेषु** बाणेषु **जयं** जयश्रियम् **आशशंसे** इयेष ववाञ्छेत्यर्थः । किं० पार्थः ? **शरासनेन** गाण्डीवधनुषा **धृतिं** धैर्यम् **अभिपुष्यन्** अवलम्बमानः पुनः किं० पार्थः ? **गुरुश्रीः** बहुशोभः प्रवृद्धशोभ इत्यर्थः । किं० शरासनेन ? **स्वपौरुषेणेव** स्वकीयपराक्रमेणेव अद्यापि गाण्डीवे चापे स्वपौरुषे च सति कियान् अयं किरातः इति धैर्यम् अवलम्बमान इत्यर्थः । केषु सत्सु ? **अस्त्रेषु** प्रस्वापनाभुजङ्गमादिषु आयुधेषु **तिरोहितेषु** गतेषु सत्सु अदृष्टीभूतेषु सत्सु इत्यर्थः । केष्विव ? मित्रे**ष्विव** यथा **मित्रेषु** तिरोहितेषु कश्चित् स्वपौरुषेषु धृतिं बध्नाति तद्वत् । मित्रेषु किं० ? **आपदां** कष्टानाम् **उद्धरणक्षमेषु** उन्मूलनसमर्थेषु किं० शरा० ? **गुरुणा** महता । अथ समासः । उद्धरणे क्षमाणि उद्धरणक्षमाणि तेषु उ०। गुर्वी श्रीर्यस्य सा गुरुश्रीः । स्वस्य पौरुषं स्वपौरुषं तेन स्व० । इति वृत्तार्थः ॥ १ ॥

'भूरि०' व्याख्या। पुनः किं० पार्थः ? **रणाभियोगात्** संग्राममलाभात् **भूरिप्रभावेण** प्रचुरमाहात्म्येन

1. ०वं –म. इदं च पा० । 2. संप्रि० –म. इदं च पा. ।

सह **प्रीतो** हर्षितः **च** पुनः किं० पार्थः ? **तदीयवृद्ध्या** किराताधिक्येन शत्रुवृद्ध्या **विजिह्मो** वक्रः विच्छायवदन इत्यर्थः। पुनः किं० पार्थः ? **स्पष्टः** दीप्त्या प्रकटोऽपि **अविस्पष्टवपुःप्रकाशः** अव्यक्तशरीरकान्तिः पुनः किं० पार्थः ? उत्प्रेक्ष्यते **सर्पन्** प्रसरन् **महाधूमः** धूमवान् **अद्रिवह्निः** पर्वताग्निरिव स्थितः इति शेषः । अथ समासः। भूरिः प्रभावो यस्य स भूरिप्रभावः तेन भू० । रणस्य अभियोगः रणाभियोगः तस्मात् र० । तस्य इयं तदीयं तदीया चासौ वृद्धिश्च तदीयवृद्धिः तया त० । न विस्पष्टो वपुषः प्रकाशो यस्य सोऽवि० । महान् धूमो यत्रासौ म० । अद्रेर्वह्निः अ० । इति वृत्तार्थः ॥२॥

'तेज०' व्याख्या । पुनः किंकुर्वन् पार्थः ? **भुजालम्बमिव उरु** महत् **धैर्यं** सत्त्वम् **आसादयन्** प्राप्नुवन् इदृशे शत्रुसंकटेऽपि महावीरत्वात् धैर्यमत्यजन् इत्यर्थः । किं० धैर्यम् ? उत्प्रेक्ष्यते **महन्मित्रमिव** स्थितं यथा कश्चित् पुमान् शत्रुसंकटे महन्मित्रम् आलम्ब्य भुजालम्बं प्राप्नोति [तद्वदिति] । किंकृत्वा ? **परैर्**वैरिभिः **अहार्यम्** अभेद्यं **निजं** स्वकीयं मह**त्तेजो** वीर्यं **समाश्रित्य** अवष्टभ्य किं० पार्थः ? **भीमे** भयङ्करे **अरिदुर्गे** वैरिरूपप्राकारे शत्रुसंकटे वा **अस्खलितप्रभावः** [अचलिततेजाः] 'अस्ख[1]लितस्वभाव' इति पाठस्तत्र अचलितशीलः। अथ समासः । न स्खलितः प्रभावो यस्य स अ० । भुजाभ्यामालम्बः भुजालम्बस्तं भु० । अरिरेव दुर्गम् अरिदुर्गं तस्मिन् अ० । इति वृत्तार्थः ॥ ३ ॥

'वंशो०' पुनः किं० पार्थः ? **कीर्त्त्या** यशसा **परितप्यमानः** परिपीड्यमानः कयेव ? **वध्वा** कान्त**येव** यथा कश्चित् पुमान् वध्वा परितप्यते । किं० कीर्त्त्या ? **वंशोचितत्वात्** वंशयोग्यत्वात् **अभिमानवत्या** अहंकारयुक्तया पुनः किं० कीर्त्त्या ? **असुभ्यः** प्राणेभ्यः **सुप्रियताम्** अत्यन्तवल्लभत्वं **संप्राप्तया** पुनः किं० कीर्त्त्या ? **परेण** शत्रुणा **समक्षं** प्रत्यक्षम् अक्ष्णामग्रतः **आदित्सितया** ग्रहीतुमिच्छया वध्वा अपि सर्वाणि विशेषणानि योज्यानि । अथ समासः । वंशस्य उचितत्वं वंशोचितत्वं तस्मात् वं० । अभिमानो विद्यते यस्याः सा अभिमानवती तया अ० । अक्ष्णोः समीपे समक्षम्। इति वृत्तार्थः ॥४॥

'पति०' व्याख्या । पुनः किंकुर्वन् पार्थः ? **तरसा** बलेन **विपक्षं** वैरिणम् **उन्मूलयिष्यन्** किं० विपक्षम् ? **नगानां पतिमिव** हिमाचलमिव **बद्धमूलं** दृढमूलं पुनः किं० विपक्षम् ? **लघुप्रयत्नं** स्तोकप्रयत्नं किं० अर्जुनः ? **ईश्वरेण** महादेवेन **निगृहीतवीर्यः** निरुद्धबलः प्रतिबद्धशक्तिः हतास्त्रशक्तिरिति यावत् । क इव ? त्रिमार्गगावेग **इव** यथा **त्रिमार्गगावेगः** गङ्गाप्रवाहः नगानां पतिम् उन्मूलयिष्यन् ईश्वरेण निगृहीतवीर्यः आसीत् । पुरा किल हिमाद्रिविदलनाय गगनात्पतन्तं गङ्गाप्रवाहं गङ्गाधरो निजजटाजूटेन निजग्राहेति पौराणिकी कथा । अथ समासः । बद्धं मूलं यस्य स बद्धमूलस्तं ब० । उन्मूलयिष्यतीति उ० । लघुः प्रयत्नो यस्मिन् कर्मणि तत् लघुप्रयत्नम् । निगृहीतं वीर्यं यस्य स नि० । त्रिभिर्मार्गैर्गच्छतीति त्रिमार्गगा त्रिमार्गगाया वेगः त्रि० । इति वृत्तार्थः ॥ ५ ॥

'संस्का० व्याख्या' । एवं पूर्वोक्तविशेषणविशिष्टः 'पार्थः शरेषु जयमाशशंसे' किं० शरेषु ? **संस्कारवत्त्वात्** संस्कारश्चित्रकारिरचना तद्वत्त्वात् पूर्वाभ्यासयोगत्वाच्च । **चेतः** चित्तं **रमयत्सु** प्रसादं

१. म. मध्ये तु 'अस्खलितस्वभावम्' इति धैर्यशब्दस्य विशेषणमेतत् ।

कुर्वत्सु पुनः किं० शरेषु ? 'प्रयोगशिक्षागुणभूषणेषु' **प्रयोगः** संधानमोक्षादिः **शिक्षाभ्यासः** **गुणाः** तदाहितोऽतिशयः प्रत्यञ्चा वा एते **भूषणं** येषां ते तेषु प्रयोग० पुनः किं० शरेषु ? **यथार्थेषु** नामसदृशार्थेषु हिंसकत्वात्। कः केषु कमिव ? शब्देषु भावार्थ**मिव** यथा कविः विद्वान् **शब्देषु** अभिधायकेषु 'भावार्थं' **भावः** प्रवृत्तिनिमित्तं सामान्यादिः स ए**वार्थ**स्तम् आशंसति अभिलषति। किं० शब्देषु 'संस्कारवत्त्वात्' **संस्कारो** व्युत्पत्तिः तद्वत्त्वात् **चेतः** मनो रमयत्सु पुनः किं० शब्देषु ? 'प्रयोगशिक्षागुणभूषणेषु' **प्रयोगो** नियुक्तव्यवहारः **शिक्षा** अभ्यासः **गुणाः** स्वस्थानकरणादयः श्लेषप्रसादादयो वा ते **भूषणानि** येषां ते तेषु प्रयोग० पुनः किं० शब्देषु ? **यथार्थेषु** सत्यार्थेषु यथा शाब्दिकः शब्दं साधयति तद्वत् शरैरर्जुनो जयं साधयितुमियेषेत्यर्थः। अथ समासः। संस्कारो विद्यते येषु ते संस्कारवन्तः संस्कारवतां भावः संस्कारवत्त्वं तस्मात् सं०। प्रयोगश्च शिक्षा च गुणश्च प्रयोगशिक्षागुणाः त एव भूषणं येषां ते प्रयोगशिक्षागुणभूषणास्तेषु प्र०। यथाभूतोऽर्थो येषां ते यथार्थास्तेषु य०। शृणन्ति हिंसन्ति ते शरास्तेषु शरेषु। इति वृत्तार्थः ॥ ६ ॥ षड्भिः कुलकम्।

भूयः समाधानविवृद्धतेजा नैवं पुरा युद्धमिति व्यथावान्।
स निर्ववामाश्रममर्षनुन्नं विषं महानाग इवेक्षणाभ्याम् ॥ ७ ॥ (उ.)

'भूयः०' व्याख्या। **सोऽर्जुनः** **ईक्षणाभ्यां** लोचनाभ्याम् **अश्रम्** अश्रुपातं **निर्ववाम** चकार मुमुचेत्यर्थः। सात्त्विकानां सर्वसाधारण्यात् रौद्रे रसे अश्रूदयोक्तिः। क इव ? महानाग **इव** यथा **महानागो** दृष्टिविषसर्पो नेत्राभ्यां **विषं** वमति तद्वदिति। किं० अश्रम् ? **अमर्षनुन्नं** क्रोधप्रेरितं क्रोधोत्थापितं किं० अर्जुनः ? **भूयः** पुनरपि **समाधानेन** युद्धाय मनोव्यवस्थापनेन **विवृद्धतेजाः** प्रवृद्धप्रतापः पुनः किं० सः ? **इति व्यथावान्** सव्यथः परितापवानित्यर्थः। इतीति किम् ? यत् **एव**मीदृशं **युद्धं** संग्रामं **पुरा** पूर्वं **ना**सीत् न बभूव। अथ समासः। समाधानेन विवृद्धं तेजो यस्य स स०। अमर्षेण नुन्नम् अ०। इति वृत्तार्थः ॥७॥

तस्याहवायासविलोलमौलेः संरम्भताम्रायतलोचनस्य।
निर्वापयिष्यन्निव रोषतप्तं प्रस्नापयामास मुखं निदाघः ॥ ८ ॥

'तस्या०' व्याख्या। **निदाघः** प्रस्वेदवारि **तस्या**र्जुनस्य **मुखं** वदनं रोषतप्तं क्रोधाग्नितप्तं सत् **प्रस्नापयामास** आर्द्रीचकार अत्रापि रौद्ररससूचकः स्वेदाविर्भावः। किं० तस्य ? **आहवायासविलोलमौलेः** युद्धव्यापारकुशलतया चञ्चलकेशस्य युद्धप्रयासेन स्रस्तमस्तककेशबन्धस्येत्यर्थः। 'चूडा किरीटं केशाश्च संयता मौलयस्त्रयः' *इत्यमरः*। पुनः किं० तस्य ? **संरम्भताम्रायतलोचनस्य** क्रोधेनारक्तदीर्घलोचनस्य 'संरम्भः संभ्रमे कोपे' इति *विश्वः*। किं० निदाघः ? तस्य मुखं **निर्वापयिष्यन्निव** शीतलं कर्तुमिच्छन्निव। अथ समासः। आहवे आयासः आहवायासः आहवायासेन विलोला मौलयो यस्य स आहवायासविलोलमौलिस्तस्याह०। संरम्भेण ताम्रे आयते लोचने यस्य स संरम्भताम्रायतलोचनस्तस्य सं०। रोषेण तप्तं रो०। इति वृत्तार्थः ॥ ८ ॥

क्रोधान्धकारान्तरितो रणाय भ्रूभेदले[1]खाः स बभार तिस्रः ।
घनोपरुद्धः प्रभवाय वृष्टेरुर्ध्वांशुराजीरिव घर्मरश्मिः ॥ ९ ॥

[का. १५ यावद् उपजातिच्छन्दः]

'क्रोधा०' व्याख्या । **सोऽर्जुनः रणाय** संग्रामार्थं **तिस्रः** [त्रि]संख्यका **भ्रूभेदलेखा** भृकुटीः **बभार** धारयामास किं० सः ? **क्रोधान्धकारान्तरितः** कोपतिमिरेणाच्छादितः क इव ? **घर्मरश्मिरिव** यथा **घर्मरश्मिः** सूर्यः **वृष्टेः प्रभवाय** जलोत्पत्तये **ऊर्ध्वांशुराजीः** ऊर्ध्वकिरणावलीः बिभर्ति धारयति 'अर्कस्य ऊर्ध्वांशुरेखोदये वृष्टेश्चिह्नम्' इत्*यागमः* । किं० घर्मरश्मिः ? **घनोपरुद्धः** मेघाच्छादितबिम्बः । अथ समासः । क्रोध एव अन्धकारः क्रोधान्धकारः क्रोधान्धकारेण अन्तरितः क्रो० । भ्रुवोर्भेदः भ्रूभेदः भ्रूभेदस्य लेखा भ्रू० । घनैरुपरुद्धः [घनोपरुद्धः] । ऊर्ध्वमंशूनां राजयः ऊर्ध्वांशुराजयस्ता उ० । घर्मा रश्मयो यस्य स घ० । इति वृत्तार्थः ॥ ९ ॥

[2]स ध्वानयन्नम्बुदनादि चापं हस्तेन दिङ्नाग इवाद्रिशृङ्गम् ।
बलानि शम्भोरिषुभिस्तताप चेतांसि चिन्ताभिरिवाशरीरः ॥ १० ॥

'सध्वान०' व्याख्या । **सोऽर्जुन इषुभिर्बाणैः शम्भोर्**महादेवस्य **बलानि** सैन्यानि **तताप** तापयामास क इव ? अशरीर **इव** यथा **अशरीरः** कन्दर्पः **चेतांसि** मनांसि **चिन्ताभि**स्तापयति यूनामिति शेषः । अत्र इषुशब्दः स्त्रीलिङ्गः अन्यथोपमानोपमेययोर्भिन्नलिङ्गतादोषः स्यात् । स किंकुर्वन् ? **हस्तेन** करेण **चापं** धनुः **ध्वानयन्** आस्फालयन् किं० चापम् ? **अम्बुदनादि** मेघवत्ध्वनि क इव ? दिङ्नाग **इव** यथा **दिङ्नागो** दिग्गजः **हस्तेन** शुण्डादण्डेन **अद्रिशृङ्गं** पर्वतशिखरं ध्वानयति आस्फालयति । अथ समासः । अम्बुदवत् नदति इति अ० । अद्रेः शृङ्गम् अद्रिशृङ्गम् । इति वृत्तार्थः ॥ १० ॥

सद्वादितेवाभिनिविष्टबुद्धौ गुणाभ्यसूयेव विपक्षपाते ।
अगोचरे वागिव चोपरेमे शक्तिः शराणां शितिकण्ठकाये ॥ ११ ॥

'सद्वा०' व्याख्या । **शराणाम**र्जुनबाणानां **शक्तिः** सामर्थ्यं **शितिकण्ठकाये** हरशरीरे विषये **उपरेमे** उपरता तस्याचिन्त्यमहिमत्वादिति भावः । कस्मिन् केव ? सद्वादिते**व** यथा **सद्वादिता** प्रामाणिकार्थ-समर्थकता **अभिनिविष्टबुद्धौ** सम्यगवगतपरमार्थे विदुषि विषये उपरमते अवकाशं न लभते । अन्ये तु इति व्याकुर्वते-**अभिनिविष्टबुद्धौ** आग्रहाभिभूतचित्ते सद्वादिता हितोपदेष्टृत्वमुपरमते अवकाशं न लभते आग्रही हितोपदिष्टं न गृह्णातीति भावः । पुनः कस्मिन् केव ? विपक्षपाते गुणाभ्यसूये**व** यथा **विपक्षपाते** वीतरागे सर्वसमे साधौ वा **गुणाभ्यसूया** अक्षमा इव उपरमते विरमति स हि वीतरागः समदर्शी समलोष्टुकाञ्चनः शत्रुमपि न द्वेष्टि इति भावः । **च** पुनः कस्मिन् केव ? वागे**व** यथा **वाग्** वाणी **अगोचरे**

1. रेखाः -म. इदं च पा० । 2. स प्रध्वनय्याम्बु० -म.

१. अत्र मालोपमा -म. ।

परमात्मनि उपरमते न प्रवर्तते यद्वागपि तत्र निवर्तन्ते 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' (८८) [तैत्तिरि० २-४-५] इति श्रुतेः । अथ समासः। अभिनिविष्टा बुद्धिर्यस्य अभिनिविष्टबुद्धिस्तस्मिन् अ० । गुणानामभ्यसूया गु० । विगतः पक्षपातो यस्य स विपक्षपातस्तस्मिन् वि० । शितिकण्ठस्य कायः शि० तस्मिन् शितिकण्ठकाये। इति वृत्तार्थः ॥ ११ ॥

उमापतिं पाण्डुसुतप्रणुन्नाः शिलीमुखा न व्यथयाम्बभूवुः ।
मध्यस्थितस्यासुमतां[1] समूहमर्कस्य पादा इव हैमनस्य ॥ १२ ॥

'उमा०' व्याख्या। 'पाण्डुसुतप्रणुन्नाः' पञ्चानां युधिष्ठिरप्रभृतिनां पाण्डुसुतत्वे समानेऽपि प्रकरणवशादर्जुनो लभ्यते तेन **पाण्डुसुतो**ऽर्जुनस्तेन **प्रणुन्नाः** प्रेरिताः प्रक्षिप्ताः **शिलीमुखाः** शराः **उमापतिं** महादेवं **न व्यथयाम्बभूवुः** न पीडयन्ति स्म कस्य के कमिव ? अर्कस्य पादा **इव** यथा **अर्कस्य पादाः** सूर्यकिरणाः **असुमतां** प्राणिनां **समूहं** वृन्दं न व्यथयन्ति। किं० अर्कस्य ? **हैमनस्य** हेमन्तोदितस्य पोषमासविहितोदयस्य पुनः किं० अर्कस्य ? **मध्यस्थितस्य** मध्याह्नसमयसत्कस्य पाठान्तरम्-'अभ्युच्छ्रितस्याद्रिपतेः[2][3] नितम्बमर्कस्य पादा इव हैमनस्य' तत्र के किमिव अर्कस्य पादाः किरणाः अभ्युच्छ्रितस्योन्नतस्य अद्रिपतेः हिमाचलस्य नितम्बं कटकं न व्यथयन्ति । अ[थ] समासः। उमायाः पतिः उमापतिस्तमु० । पाण्डुसुतेन प्रणुन्नाः पा०। शिली शल्यं मुखे येषां ते शि० । हेमन्ते भवो हैमनस्तस्य है० । इति वृत्तार्थः ॥ १२ ॥

संप्रीयमाणोऽनुबभूव तीव्रं पराक्रमं तस्य पतिर्गणानाम् ।
विषाणभेदं हिमवानसह्यं वप्रानतस्येव सुरद्विपस्य ॥ १३ ॥

'संप्री०' व्याख्या । **गणानां पतिः** महादेवः प्रसादप्रवणः सन् **तस्या**र्जुनस्य **तीव्रं** दुस्सहं **पराक्रमं** विक्रमम् **अनुबभूव** सेहे क इव ? हिमवानिव यथा **हिमवान्** हिमाचलो **वप्रानतस्य** तटपरिणतस्य तटान्तं कुर्वतः वप्रप्रहारिणः **सुरद्विपस्य** एरावणस्य [असह्यं] **विषाणभेदं** दन्तप्रहारं दुःसहमपि सहते तद्वदिति । किं० उमापतिः ? **संप्रीयमाणो** संहृष्यमाणो हर्षसंयुक्तः इत्यर्थः । अक्षोभ्यत्वादनुजिघृक्षत्वाच्च सोढवान् न त्वसामर्थ्यत्वात् । अथ समासः । विषाणस्य भेदः विषाणभेदस्तं वि० । सुराणां द्विपः सुरद्विपस्तस्य सु० । इति वृत्तार्थः ॥ १३ ॥

तस्मै हि भारोद्धरणे समर्थं प्रदास्यता बाहुमिव प्रतापम् ।
चिरं विषेहेऽभिभवस्तदानीं स कारणानामपि कारणेन ॥ १४ ॥

'तस्मै०' व्याख्या। **तदानीं** तस्मिन्नवसरे **कारणानां** ब्रह्मादीनामपि **कारणेन** जनकेन महादेवेन **सो**ऽर्जुनकृतः **अभिभवः** पराभवः **चिरं** चिरकालं **विषेहे** सोढः वात्सल्यादिति भावः । महादेवेन किंकरिष्यता ? **हि** निश्चितं **तस्मै** अर्जुनाय **प्रतापं** पौरुषं **प्रदास्यता** प्रदातुमिच्छता अन्यथा भारोद्वहनस्य

1. एष पाठः म. मध्ये पाठान्तररूपेण दर्शितः । 2. एष पाठः म. मध्ये सामान्येन वर्णभेदेन यथा-'अभ्युत्थितस्य' इति । 3. म. टीप्पण्याम् एतत्पाठान्तरं निर्दिष्टम् ।

दुष्करत्वादिति भावः । किं० प्रतापम् ? **भारोद्धरणे** वैरिनिग्रहलक्षणे अथवा भूभारस्योद्धरणे निराकरणे समर्थं पुनः किं० प्रतापम् ? उत्प्रेक्ष्यते **बाहुमिव** बाह्वोः अवष्टम्भमिव स्थितं यथा भारस्य गुण्यादेरुद्धरणे समर्थ(र्थः) कश्चित् पुमान् भुजमर्पयति तद्वत् सुचिरम् अर्जुनेन संग्रामे महादेवोऽभिभूतः इति जगति प्रथयितुम् इत्यर्थः । अथ समासः । भारस्य उद्धरणं भारोद्धरणं तस्मिन् भा० । प्रदास्यतीति प्रदास्यन् तेन प्र० । इति वृत्तार्थः ॥ १४ ॥

अथ त्रिभिः श्लोकैर्भगवदभिप्रायम् आविष्कुर्वन् चतुर्भिः श्लोकैः कलापकमाह –

प्रत्याहतौजाः कृतसत्त्ववेगः पराक्रमं ज्यायसि यस्तनोति ।
तेजांसि भानोरिव निष्पतन्ति यशांसि वीर्यज्वलितानि तस्य ॥ १५ ॥

'प्रत्या०' व्याख्या । **तस्य** पुरुषस्य **यशांसि** कीर्तयः **निष्पतन्ति** व्यक्तिमायान्ति उद्भवन्तीत्यर्थः । कस्य कानीव ? भानोः तेजां**सीव** यथा **भानोः** सूर्यस्य **तेजांसि** किरणानि पतन्ति निःसरन्ति । किं० तेजांसि ? **वीर्यज्वलितानि** पौरुषेण दीप्तानि शौर्येण प्रकाशितानीत्यर्थः । तस्य कस्य ? **यः** पुमान् **ज्यायसि** स्वस्मादपि अधिके रिपौ **पराक्रमं** सामर्थ्यं **तनोति** विस्तारयति हीनबलस्याधिकबलाभियोगो यशस्कर इति भावः । किं० यः ? **प्रत्याहतौजाः** द्विषद्भिः पातितबलः पुनः किं० यः ? **कृतसत्त्ववेगः** विहितोत्साहातिशयः सत्त्वमवलम्ब्य स्थित इत्यर्थः । अथ समासः । प्रत्याहितमोजो यस्य स प्र० । कृतः सत्त्ववेगो येन स कृ० । वीर्येण ज्वलितानि वी० । इति वृत्तार्थः ॥ १५ ॥

ततः किमित्यत आह –

दृष्टावदानाद्व्यथतेऽरिलोकः प्रध्वंसमेति व्यथिताच्च तेजः ।
तेजोविहीनं विजहाति दर्पः शान्तार्चिषं दीपमिव प्रकाशः ॥ १६ ॥ (इ.)

'दृष्टा०' व्याख्या । **अरिलोकः** वैरिवर्गः **दृष्टावदानात्** दृष्टपौरुषात् दृष्टाद्भुतकर्मणो नरात् **व्यथते** बिभेति येन महादेवो जितः तस्य अन्यः कियान् नामेति मन्वानो रिपुः व्यथते इति भावः । **च** पुनः **व्यथितात्** भीतात् पीडिताद्वा नरात् **तेजो** बलं **प्रध्वंसं** नाशम् **एति** गच्छति **तेजोविहीनं** तेजोरहितं नरं **दर्पः** उत्साहः **विजहाति** त्यजति कः कमिव ? प्रकाश **इव** यथा **प्रकाशः** उद्योतः **दीपं** विजहाति तद्वत् । किं० दीपम् ? **शान्तार्चिषं** निर्वाणज्वालम् । अथ समासः । दृष्टम् अवदानं यस्य स दृष्टावदानस्तस्मात् दृ० । अरीणां लोकः अ० । तेजसा विहीनः तेजोविहीनस्तं ते० । शान्तानि अर्चींषि यस्य स शान्तार्चिस्तं शा० । इति वृत्तार्थः ॥ १६ ॥

ततः प्रयात्यस्तमदावलेपः स जय्यतायाः पदवीं जिगीषोः ।
गन्धेन जेतुः प्रमुखागतस्य प्रतिद्विपस्येव मतङ्गजौघः ॥ १७ ॥ (उ.)

'ततः' व्याख्या । **ततो**ऽनन्तरं **सो**ऽरिलोकः वैरिजनः **जिगीषो**र्जेतुमिच्छतो नेतुर्नायकस्य **जय्यतायाः**

जेतुं शक्यतायाः **पदवीं** मार्गं **प्रयाति** पराभवस्य पन्थानमेति स शत्रुजनो जिगीषुणा जय्यो भवतीत्यर्थः। किं० सः ? **अस्तमदावलेपः** त्यक्ताभिमानगर्वः क इव ? मतङ्गजौघ **इव** यथा **मतङ्गजौघः** हस्तिसमूहः **प्रमुखागतस्य** सन्मुखागतस्य **प्रतिद्विपस्य** प्रतिपक्षभूतस्य गन्धहस्तिनो **गन्धेन** जय्यत्वस्य पदवीं प्रयाति तस्य गन्धेनैव पलायते इत्यर्थः । किं० जिगीषोः ? प्रतिद्विपस्य **जेतुः** जयनशीलस्य। अथ समासः । अस्तौ मदावलेपौ यस्य स अस्तमदावलेपः । जेतुं शक्यो जय्यः जय्यस्य भावो जय्यता तस्या ज० । मतङ्गजानाम् ओघः म० । इति वृत्तार्थः ॥ १७ ॥

एवं प्रतिद्वन्द्विषु तस्य कीर्तिं मौलीन्दुलेखाविशदां विधास्यन् ।
इयेष पर्यायजयावसादां रणक्रियां शम्भुरनुक्रमेण ॥ १८ ॥ (उ.)

'एवं०' व्याख्या । **शम्भुर्**महादेवः **अनुक्रमेण** परिपाट्या **रणक्रियां** युद्धकर्म **इयेष** वाञ्छति स्म शम्भोर्भङ्गः अर्जुनस्य जयः शम्भोर्जयोऽर्जुनस्य भङ्ग इति अनुक्रमेण जयहानिर्यत्र तां [**पर्यायजयावसादां**] यदीश्वरेणापि असौ न सहसा जितः किन्तु महता कालेन आयासेन तत्कथमसावन्यैः पराभवनीयः इति तदीययशोविस्तारार्थम् इति भावः । शम्भुः किंकरिष्यन् ? **एवम**मुना प्रकारेण **प्रतिद्वन्द्विषु** सुयोधनकर्णादिवैरिषु मध्ये **तस्या**ऽर्जुनस्य **कीर्तिं** यशः **मौलीन्दुलेखाविशदां** मस्तकस्थचन्द्रलेखानिर्मलां निष्कलङ्कां **विधास्यन्** करिष्यन् निष्पादयिष्यन् इत्यर्थः । अथ समासः । मौलौ इन्दुलेखा मौलीन्दुलेखा तद्वद्विशदा मौलीन्दुलेखाविशदा तां मौ० । जयश्च अवसादश्च जयावसादौ पर्यायेण जयावसादौ यस्यां सा पर्यायजयावसादा तां प० । रणस्य क्रिया रणक्रिया तां र० । इति वृत्तार्थः ॥१८॥ [च.क.]

मुनेर्विचित्रैरिषुभिः स भूयो निन्ये वशं भूतपतेर्बलौघः ।
सहात्मलाभेन समुत्पतद्भिर्जातिस्वभावैरिव जीवलोकः ॥ १९ ॥ (उ.)

'मुने०' व्याख्या । **मुनेर**र्जुनस्य **विचित्रै**र्नानाप्रकारजात्यैः **इषुभिः** बाणैः **भूयो**ऽत्यर्थं 'भूयान्'[1] इति पाठस्तत्र भूयानसंख्यो **भूतपते**रीश्वरस्य **स बलौघः** स सैन्यसमूहः **वशं** वश्यतां **निन्ये** प्रापितः क इव ? जीवलोकः **इव** यथा **जीवलोकः** प्राणीसमूहः 'जातिस्वभावैः' **जातयो** गोत्वमनुष्यत्वादयः **स्वभावाः** प्राणिजातमिव धर्मास्तैः जातिस्वभावैः जीवलोकः प्राणिजातमिव वशं नीयते प्राणिनो जातिधर्मानिव गणा मुनिशरान्नातिक्रमितुं शेकुरित्यर्थः । किं० जातिस्वभावैः ? **आत्मलाभेन** जन्मना **सह** सार्धं **समुत्पतद्भिः** जायमानैः उत्पाद्यमानैरित्यर्थः । अथ समासः । भूतानां पतिः भूतपतिस्तस्य भू० । बलानामोघः बलौघः । जातयश्च स्वभावाश्च जातिस्वभावास्तैर्जा० । इति वृत्तार्थः ॥ १९ ॥

वितन्वतस्तस्य शरान्धकारं त्रस्तानि सैन्यानि रवं वितेनुः ।
प्रवर्षतः संततवेपथूनि क्षपाघनस्येव गवां कुलानि ॥ २० ॥ (उ.)

---

1. एष पाठः म. मध्ये ।

---

१. अत्र श्लोकद्वयेन ज्यायसि पराक्रमकरणादीनां पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वकथनात्कारणमालाख्योऽलंकारः-म.

'वित०' व्याख्या । **तस्यार्जुनस्य शरान्धकारं** बाणान्धकारं **वितन्वतः** विस्तारयतः शरैरन्धकारं कुर्वतः इत्यर्थः । **त्रस्तानि** भीतानि **सैन्यानि** गणबलानि **रवम्** आर्तशब्दं **वितेनुः** चक्रुः 'निशे[1]मुः' इति पाठस्तत्र त्रस्तानि सैन्यानि तस्य रवम् अर्जुनस्य रवं शरवर्षघोषं निशेमुः शुश्रुवुः अन्यत् किंचिन्न ददृशुरित्यर्थः। चेष्टा तु दूरापास्तेति भावः । कानीव ? गवां कुलानीव यथा **गवां कुलानि** गोवृन्दानि **क्षपाघनस्य** रात्रिमेघस्य **प्रवर्षतः** वृष्टिं कुर्वतः भम्भारवं वितन्वन्ति विस्तारयन्ति । किं० गवां० ? **संततवेपथूनि** निरन्तरकम्पमानानि। अथ समासः । शरैरन्धकारं शरान्धकारम् । संततं वेपथुर्येषां तानि सं०। क्षपायाः घनः क्षपाघनस्तस्य क्ष० । इति वृत्तार्थः ॥ २० ॥

स सायकान्साध्वसविप्लुतानां क्षिपन्परेषामतिसौष्ठवेन ।
शशीव दोषावृतलोचनानां विभिद्यमानः पृथगाबभासे ॥ २१ ॥ (उपे.)

'ससा०' व्याख्या । **सोऽर्जुनः साध्वसविप्लुतानां** भयेन विह्वलानां **परेषां** वैरिणां **पृथग्** अनेकधा **विभिद्यमानो** दृश्यमानः तैरेकोऽप्यनेक इव सोऽर्जुनो दृष्ट इत्यर्थः । स किंकुर्वन् ? **अतिसौष्ठवेन** अत्यन्तलाघवेन **सायकान्** शरान् **क्षिपन्** मुञ्चन् बाणान् वर्षन्नित्यर्थः । **आबभासे** क इव ? **शशीव** यथा **शशी** इन्द्रः **दोषावृतलोचनानां** काचकामलादिदोषाच्छादितनेत्राणां पुंसां पृथक् विभिद्यमानः सन् प्रतिभासते यथा दोषावृतलोचनाः नराः चन्द्रमनेकमिव पश्यन्ति तथैनं गणा ददृशुरित्यर्थः । अथ समासः । साध्वसेन विप्लुताः साध्वसविप्लुतास्तेषां सा० । दोषेन आवृतानि लोचनानि येषां ते दोषावृतलोचनास्तेषां दो०। इति वृत्तार्थः ॥२१॥

क्षोभेण तेनाथ गणाधिपानां भेदं ययावाकृतिरीश्वरस्य ।
तरङ्गकम्पेन महाह्रदानां छायामयस्येव दिनस्य कर्तुः ॥ २२ ॥ (उ.)

'क्षोभे०' व्याख्या । **अथा**नन्तरं **तेन गणाधिपानां** नन्दिचन्दिप्रभृतीनां गणश्रेष्ठानां संबन्धिना **क्षोभेण** कोपेन **ईश्वरस्य** शङ्करस्य **आकृति**र्मूर्तिः **भेदं** विकारं **ययौ** प्राप्तवती केन कस्येव ? दिनस्य कर्तु**रिव** यथा **दिनस्य कर्तुः** सूर्यस्य आकृतिर्बिम्बं भेदं याति यद्यपि स्वयं निर्विकारस्तथापि प्रतिमासूर्यवत् संसर्गात् तथा प्रतीयते इत्यर्थः । केन ? **महाह्रदानां** महाजलाशयविशेषाणां संबन्धिना **तरङ्गकम्पेन** लहरीचापलेन किं० दिनस्य ? **छायामयस्य** प्रतिबिम्बगतस्य। अथ समासः। गणानामधिपाः गणाधिपास्तेषां ग०। तरङ्गानां कम्पस्तरङ्गकम्पस्तेन त०। महान्तश्च ते ह्रदाश्च महाह्रदास्तेषां म०। इति वृत्तार्थः ॥२२॥

प्रसेदिवांसं न तमाप कोपः कुतः परस्मिन्पुरुषे र[2]जो वा ।
आकारवैषम्यमिदं च भेजे दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥ २३ ॥ (उ.)

'प्रसे०' व्याख्या । **कोपः** क्रोधः **तमीश्वरं प्रसेदिवांसम्** अर्जुनं प्रति प्रसन्नचित्तं **न आप** न प्रपेदे अर्जुनं प्रति प्रसादाभिमुखत्वात् कोपो नाविशदित्यर्थः । महेश्वरः कथं कोपेन नान्धो भवेदित्याह-

1. एष पाठः म. मध्ये । 2. विकारः -म. इदं च पा. ।

तर्हि **परस्मिन् पुरुषे** परमात्मनि देवे स्वतो निर्विकारे **रजो** रजोगुणः **वा** शब्दात् तमश्च **कुतः** संजायते न कुतश्चिदित्यर्थः । तर्हि एतस्य निर्विकारस्य कथं बहिराकारभेदः कारणाभावादिति चेत्तत्र विप्र(द्म) इत्याह- **च** पुनः **इदमे**तत्पूर्वोक्तम् **आकारवैषम्यं** मूर्तिभेदं **भेजे** प्राप [किन्तु] केनापि कारणेन [न] कुप्यति स्मेत्यर्थः । ननु निर्विकारे कुतः कोपस्तत्राह- **हि** यस्मात् कारणात् **महतां** लोकोत्तराणां **वृत्ति**श्चेष्टा **दुर्लक्ष्यचिह्ना** दुर्ग्रहहेतुका अनुपलक्षणकारणा चित्तवृत्तिः ज्ञातुं [न] शक्यते इत्यर्थः । अथ समासः । आकारस्य वैषम्यम् आ० । दुर्लक्ष्यं चिह्नं यस्याः सा दु० । इति वृत्तार्थः ॥ २३ ॥

वैषम्यमाह -

विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रा धनुरन्तकस्य ।
भिन्नाकृतिं ज्यां ददृशुः स्फुरन्तीं क्रुद्धस्य जिह्वामिव तक्षकस्य ॥ २४ ॥ (इ.)

'विस्फा०' व्याख्या । **ततो**ऽनन्तरं **भूतानि** प्राणिनः **भर्त्रा** महादेवेन **भुजाभ्यां** दोर्भ्यां **विस्फार्यमाणस्य** आकृष्यमाणस्य **धनुरन्तकस्य** कार्मुकरूपकालस्य **ज्यां** प्रत्यञ्चां **ददृशुः** अद्राक्षुः खेचरा इति शेषः । किं० ज्याम् ? उत्प्रेक्ष्यते **भिन्नाकृतिं** द्विधाभूतं द्विधैव दृश्यमानाकृतिं **क्रुद्धस्य** कोपप्राप्तस्य **तक्षकस्य** तक्षकनाम्नो महासर्पस्य **जिह्वां** रसना**मिव** स्थितां किं० जिह्वाम् ? **स्फुरन्तीं** प्रकाशमानाम् । अथ समासः । धनुरन्तक इव धनुरन्तकस्तस्य ध० । भिन्ना आकृतिर्यस्याः सा भिन्नाकृतिस्तां भि० । इति वृत्तार्थः ॥ २४ ॥

सव्यापसव्यध्वनितोग्रचापं पार्थः किराताधिपमाशशङ्के ।
वैषम्य[1]संपादितकर्णतालं यन्ता गजं व्यालमिवापराद्धः ॥ २५ ॥ (इ.)

'सव्या०' व्याख्या । **पार्थो**ऽर्जुनः तं **किराताधिप**मीश्वरम् **आशशङ्के** मेने तच्चापचातुर्यदर्शनात् दुर्जयः कोऽप्ययम् अनर्थकरश्चेति शङ्कितवानित्यर्थः । किं० किराताधिपम् ? 'सव्यापसव्यध्वनितोग्रचापं' **सव्यापसव्याभ्यां** वामदक्षिणगतिभ्यामङ्गाभ्यां **ध्वनितोग्रचापं** नादितोत्कटकार्मुकं क इव ? यन्ते**व** यथा **यन्ता** हस्तिपकः **अपराद्धः** कृतापराधः सन् **व्यालं** दुष्टं **गजं** हस्तिनम् आशङ्कते न जाने किमयं करिष्यतीति । किं० गजम् ? **वैषम्यसंपादितकर्णतालं** विषमभावेन निर्धूतकर्णयुगलम् । अथ समासः । सव्यं च अपसव्यं च सव्यापसव्ये सव्यापसव्याभ्यां ध्वनितम् उग्रचापं येन स सव्या० तं स० । किरातानामधिपः किराताधिपस्तं किरा० । वैषम्येन संपादितः कर्णतालो येन स वैषम्यसंपादितकर्णतालः तं वैषम्यसं० । अपराधोऽस्यातीति अ० । इति वृत्तार्थः ॥ २५ ॥

निजघ्निरे चा[2]स्य हरेषुजालैः पतन्ति वृन्दानि शिलीमुखानाम् ।
ऊर्जस्विभिः सिन्धुमुखागतानि यादांसि यादोभिरिवाम्बुराशेः ॥ २६ ॥ (उ.)

'निज०' व्याख्या । **च** पुनः **अस्यार्जुनस्य पतन्ति** आगच्छन्ति **शिलीमुखानां** शराणां **वृन्दानि**

1. पर्याय० -म. इदं च पा. 2. तस्य -म. इदं च पा. ।

जालानि **हरेषुजालैः** महादेवबाणसमूहैः **निजघ्निरे** चिच्छेदिरे शम्भुशरैः पार्थस्य बाणानां वृन्दानि हतानीत्यर्थः । कैः कानीव ? यादोभिर्यादांसीव यथा **अम्बुराशेः** समुद्रस्य **यादोभिर्**जलजन्तुभिर्मत्स्यैः **सिन्धुमुखागतानि** नदीमुखादागतानि **यादांसि** जलजन्तवो मत्स्याः हन्यन्ते तद्वदित्यर्थः । किं० हरेषुजालैः ? **ऊर्जस्विभिः** तेजस्विभिः । अथ समासः । हरस्य इषवः हरेषवः हरेषूणां जालानि हरेषुजालानि तैः ह० । सिन्धूनां मुखानि सिन्धुमुखानि तेभ्यः आगतानि सि० । इति वृत्तार्थः ॥ २६ ॥

विभेदमन्तः पदवीनिरोधं विध्वंसनं चाविदितप्रयोगः ।
नेतारिलोकेषु करोति यद्यत्तत्तत् चकारास्य शरेषु शम्भुः ॥ २७ ॥ (उ.)

'विभे०' व्याख्या । **नेता** नायकः जिगीषुः **अरिलोकेषु** वैरिजनेषु **यत् यत्** यं यं प्रकारं **करोति** तत्तत् तं तं प्रकारं **शम्भुरी**श्वरः **अस्य** पार्थस्य **शरेषु** बाणेषु **चकार** अकरोत् किं० शम्भुः ? **अविदितप्रयोगः** अज्ञातमोक्षाकर्षणादिकः जिगीषोर्हि भेदादीनि प्रयुज्यमानानि गूढमन्त्रत्वात् न कश्चित् वेत्तीति भावः । तं प्रकारमाह-शम्भुः **अन्तर्विभेदं** मध्ये बाणानां व्यूहविश्लेषणं करोति । **च** पुनः **पदवीनिरोधं** मार्गे बाणानां रोधं करोति । **च** पुनः **विध्वंसनं** बाणानां द्विधा खण्डनं नेतृपक्षे नेता अन्तर्विभेदम् अन्तर्मध्ये प्रजानां विभेदमुत्पादयति । पुनः **पदवीनिरोधं** मार्गनिरोधं करोति । पुनः विध्वंसनम् अरिदुर्गलुण्टनदाहादिकं करोति । अथ समासः । पदव्यां निरोधः पदवीनिरोधस्तं प० । न विदितः प्रयोगो यस्यासौ अ० । अरीणां लोकाः अरिलोकास्तेषु अ० । इति वृत्तार्थः ॥ २७ ॥

सोढावगीतप्रथमायुधस्य क्रोधोज्झितैर्वेगितया पतद्भिः ।
छिन्नैरपि त्रासितवाहिनीकैः पेते कृतार्थैरिव तस्य बाणैः ॥ २८ ॥ (इ.)

'सोढा०' व्याख्या । **तस्यार्**जुनस्य **बाणैः** शरैः **कृतार्थैरिव** कृतकृत्यैरिव **पेते** पतितं तथा कृतार्थाः कृतस्वामिकार्याः पतन्ति इति ध्वनिः । किं० तस्य ? 'सोढावगीतप्रथमायुधस्य' **सोढानि** परैर**वगीतानि** गर्हितानि च **प्रथमायुधानि** पूर्वोत्सृष्टा बाणा यस्य स तस्य यद्वा 'प्रमथा' पाठस्तत्र सहितावहेलितगणास्त्रस्य किं० बाणैः ? **क्रोधोज्झितैः** पूर्वबाणवैफल्यत्वात् कोपेन त्यक्तैः [पुनः किं० बाणैः ? **वेगितया** वेगेन **पतद्भिः** गतिं कुर्वद्भिः] पुनः किं० बाणैः ? **छिन्नैरपि** शत्रुबाणैः खण्डितैरपि पुनः किं० बाणैः ? **त्रासितवाहिनीकैः** भापितशिवसैन्यैः । अथ समासः । सोढमवगीतं प्रथमानामायुधं येन स सोढावगीतप्रथमायुधस्तस्य सो० । क्रोधेन उज्झिताः क्रोधोज्झितास्तैः क्रो० । त्रासिता वाहिन्यो यैस्ते त्रासितवाहिनीकास्तैस्त्रा० । कृतोऽर्थो यैस्ते कृतार्थास्तैः कृ० । इति वृत्तार्थः ॥ २८ ॥

अलंकृतानामृजुतागुणेन गुरूपदिष्टां गतिमास्थितानाम् ।
सतामिवापर्वणि मार्गणानां भङ्गः स जिष्णोर्धृतिमुन्ममाथ ॥ २९ ॥ (उ.)

'अलं०' व्याख्या । **स** हरकृतः **मार्गणानां** शराणाम् **अपर्वणि** अप्रस्तावे **भङ्गश्**च्छेदः **जिष्णोर्**र्जुनस्य **धृतिं** धैर्यम् **उन्ममाथ** जहार अकाण्डे साधुविपत्तिदर्शनादिव शरभङ्गदर्शनाद्धैर्यभङ्गो-

ऽभूदित्यर्थः । किं० मार्गणानाम् ? **ऋजुतागुणेन** सरलतागुणेन **अलंकृतानाम्** अवक्राकारत्वं स एव गुणस्तेन भूषितानां पुनः किं० मार्गणानाम् ? **गुरूपदिष्टां** गुरुणा द्रोणाचार्येण उपदिष्टां **गतिं** गमनम् **आस्थितानां** प्राप्तानां केषामिव ? सता**मिव** यथा **सतां** साधूनाम् **अपर्वणि** अप्रस्तावे **भङ्गो** विपदागमः **जिष्णो**र्जयनशीलस्य पुंसः **धृतिं** हर्षम् उन्मथ्नाति जहाति तद्वत् । किं० सताम् ? **ऋजुतागुणेन** अवक्रशीलतागुणेन **अलंकृतानां** भूषितानां पुनः किं० सताम् ? **गुरूपदिष्टां** गुरुभिः धर्मशास्त्रविद्भिः दर्शितां **गतिम्** आचारम् **आस्थितानाम्** आश्रितानाम्। अथ समासः । ऋजोर्भावः ऋजुता ऋजुतायाः गुणः ऋजुतागुणस्तेन ऋ० । गुरुभिः उपदिष्टा गुरूपदिष्टा तां गु० । न पर्व अपर्व तस्मिन् अ० । इति वृत्तार्थः ॥ २९ ॥

बाणच्छिदस्ते विशिखाः स्मरारेरवाङ्मुखीभूतफलाः पतन्तः ।
अखण्डितं पाण्डवसायकेभ्यः फलस्य सद्यः प्रतिकारमापुः ॥ ३० ॥ (उ.)

'बाण०' व्याख्या । **स्मरारे**र्महादेवस्य **ते विशिखाः** शराः **पाण्डवसायकेभ्यः** अर्जुनशरेभ्यः **अखण्डितं** परिपूर्णं **सद्य**स्तत्कालमेव **फलस्य** कार्यस्य 'कृतस्य'[1] इति पाठस्तत्र कृतस्य फलभङ्गरूपकर्मणः **प्रतिकारं** प्रतिक्रियाम् **आपुः** प्रापुः किं० विशिखाः ? **बाणच्छिदः** अर्जुनसायकच्छेदिनः पुनः किं० विशिखाः ? **अवाङ्मुखीभूतफलाः** अधोमुखीभूतफलाः पुनः किं० विशिखाः ? **पतन्तः** गच्छन्तः अत्युत्कटं कर्म सद्यः फलं दर्शयतीति भावः । अथ समासः । बाणान् छिदन्ति ते बाणच्छिदः । स्मरस्य अरिः स्मरारिः तस्य स्म० । अवाङ्मुखीभूतं फलं येषां ते अ० । पाण्डवस्य सायकाः पाण्डवसायकास्तेभ्यः पा० । इति वृत्तार्थः ॥ ३० ॥

पुनरर्जुनस्य भङ्गं दर्शयित्वा जयमाह -

चित्रीयमाणानतिलाघवेन प्रमाथिनस्तान्भवमार्गणानाम् ।
शङ्काकुलाया निचखान दूरं बाणान्ध्वजिन्या हृदयेषु[2] जिष्णुः ॥ ३१ ॥ (उ.)

चित्री० व्याख्या । **जिष्णु**रर्जुनः **ध्वजिन्या** सेनायाः **हृदयेषु** वक्षस्सु **दूर**मत्यर्थं **तान् बाणान्** शरान् **निचखान** आरोपयामास किं० ध्वजिन्याः ? **शङ्काकुलायाः** भयविह्वलायाः 'समाकुलाया'[3] इति पाठस्तत्र [संक्षुभिताया **अतिलाघवेन**] अतिशीघ्रतया **चित्रीयमाणान्** आश्चर्यं कुर्वाणान् पुनः किं० बाणान् ? **भवमार्गणानां** हरशराणां **प्रमाथिनः** भेदकान् ते बाणा गणानां हृदयेषु शल्यभूताश्चिरं तस्थुः इत्यर्थः। अथ समासः । चित्रमिवाचरन्तीति चित्रीयमाणास्तान् चि० । भवस्य मार्गणाः भवमार्गणाः तेषां भ० । शङ्कयाकुला शङ्काकुला तस्याः श० । इति वृत्तार्थः ॥ ३१ ॥

तस्यातियत्नादतिरिच्यमाने पराक्रमेऽन्योन्यविशेषणेन ।
हन्ता पुरां भूरि पृषत्कवर्षं निरास नैदाघ इवाम्बु मेघः ॥ ३२ ॥ (उ.)

1. एष पाठः -म. मध्ये । 2. हृदयेष्वरातिः -म. इदं च पा. । 3. एष पाठः -म. मध्ये इदं च पा. ।

'तस्या०' व्याख्या । **पुरां हन्ता** त्रिपुरदाही रुद्रः **भूरि** प्रचुरं **पृषत्कवर्षं** बाणवृष्टिं **निरास** मुमोच ववर्षेत्यर्थः । कस्मिन् सति ? **अन्योन्यविशेषणेन** परस्परातिशयकरणेन **तस्य** अर्जुनस्य **पराक्रमे** पौरुषे **अतियत्नात्** अत्यन्तप्रयत्नात् हेतोः **अतिरिच्यमाने** अधिकीभवति सति वृद्धिं गच्छति सतीत्यर्थः । कः किमिव ? नैदाघमेघोऽम्बु **इव** यथा **नैदाघमेघो** ग्रीष्मकालमेघः **भूरि** बहु **अम्बु** जलं वर्षति नैदाघग्रहणं वर्षस्य अतितेजस्त्वद्योतनार्थम् । अथ समासः । अन्योन्यस्य विशेषणम् अन्योन्यविशेषणं तेन अ० । पृषत्कानां वर्षं पृ० । निदाघे भवो नैदाघः । इति वृत्तार्थः ॥ ३२ ॥

अनामृशन्तः क्वचिदेव मर्म प्रियैषिणानुप्रहिताः शिवेन ।
सुहृत्प्रयुक्ता इव नर्मवादाः शरा मुनेः प्रीतिकरा बभूवुः ॥ ३३ ॥ (उपे.)

'अना०' व्याख्या । **शरा** बाणाः **मुनेरर्जुनस्य** **प्रीतिकराः** संतोषकारिणः **बभूवुरासन्** किं० शराः ? **शिवेन** रौद्रेण **अनुप्रहिताः** प्रेषिताः प्रयुक्ताः शिवप्रयुक्तत्वाच्छिवप्रदायित्वं तेषामिति भावः । किं० शिवेन ? **प्रियैषिणा** हितकारिणा हितैषिणा इत्यर्थः । किंकुर्वन्तः शराः ? **क्वचिदेव** क्वापि **मर्म** मर्मस्थानम् **अनामृशन्तः** [अस्पृशन्तः] क इव ? सुहृत्प्रयुक्ता नर्मवादा **इव** यथा **सुहृत्प्रयुक्ताः** मित्रेण विहिता **नर्मवादाः** परिहासवचनानि मर्मदोषस्थानम् अनामृशन्तः सन्तः प्रीतिकरा भवन्ति । अथ समासः । प्रियम् इच्छतीति प्रियैषि तेन प्रि० । सुहृदा प्रयुक्ताः सु० । नर्मणां वादाः न० । प्रीतिं कुर्वन्तीति प्री० । इति वृत्तार्थः ॥ ३३ ॥

अस्त्रैः समानामतिरेकिणीं वा पश्यन्निषूणामपि तस्य शक्तिम् ।
विषादवक्तव्यबलः प्रमाथी समाललम्बे[1] बलमिन्दुमौलिः ॥ ३४ ॥

[का. ४१ यावद् उपजातिच्छन्दः]

'अस्त्रै०' व्याख्या । **इन्दुमौलिरीश्वरः** **बलं** स्वमहिमानं **समाललम्बे** जग्राह इन्दुमौलिः किंकुर्वन् ? **तस्या**ऽर्जुन**स्यापि** **इषूणां** शराणां **शक्तिं** सामर्थ्यम् **अस्त्रैः** स्वायुधैः **समानां** स्वायुधतुल्यां **वा** अथवा **अतिरेकिणीं** ततोऽधिकां **पश्यन्** विलोकयन् किं० इन्दुमौलिः ? **विषादवक्तव्यबलः** अनुत्साहेन निन्दनीयसैन्यः उत्साहभङ्गेन निर्वाच्यबल इत्यर्थः । पुनः किं० इन्दुमौलिः ? **प्रमाथी** शत्रुमर्दनः अर्जुनस्य बाणानां च सामर्थ्यमालोक्य स्ववीर्यमाससादेति वाक्यार्थः । अथ समासः । अतिरेको विद्यते यस्याः सा अतिरेकिणी ताम् अ० । विषादेन वक्तव्यं बलं यस्य स वि० । इन्दुः मौलौ यस्य स इ० । इति वृत्तार्थः ॥३४॥

ततस्तपोवीर्यसमुद्धतस्य पारं यियासोः समरार्णवस्य ।
महेषुजालान्यखिलानि जिष्णोरर्कः पयांसीव समाचचाम ॥ ३५ ॥

'ततः' व्याख्या । **ततो**ऽनन्तरं शिवः **जिष्णोरर्जुनस्य** [**अखिलानि**] सर्वाणि **महेषुजालानि** बृहच्छरवृन्दानि **समाचचाम** जग्रास संजहारेत्यर्थः । 'चमु अदने' इत्यस्य धातोः कर्तरि लिट् । किं०

1. स्वमा० -म०

जिष्णोः ? **तपोवीर्यसमुद्धतस्य** तपःप्रभावेनोत्कृष्टस्य पुनः किं० जिष्णोः ? **समरार्णवस्य** रणसागरस्य **पारं यियासोः** पारं गन्तुकामस्य क इव ? अर्क **इव** यथा **अर्कः** सूर्यः **पयांसि** जलानि ग्रसते । अथ समासः । तपश्च वीर्यं च तपोवीर्ये तपोवीर्याभ्यां समुद्धतः तपोवीर्यसमुद्धतस्तस्य त० । समर एव अर्णवः समरार्णवस्तस्य स० । महान्तश्च ते इषवश्च महेषवो महेषूणां जालानि म० । इति वृत्तार्थः ॥ ३५ ॥

रिक्ते सविश्रम्भमथार्जुनस्य निषङ्गवक्त्रे निपपात पाणिः ।
अन्यद्विपापीतजले सतर्षं मतङ्गजस्येव नगाश्मरन्ध्रे ॥ ३६ ॥

'रिक्ते०' व्याख्या । **अथ** बाणान्तर्धानानन्तरम् **अर्जुनस्य पाणिः** करः **निषङ्गवक्त्रे** तूणीरमुखे **सविश्रम्भं** यथा पूर्वं बाणाः सन्तीति सविश्वासं यथा स्यात्तथा **निपपात** पतति स्म किं० निष० ? **रिक्ते** शरशून्ये बाणरहिते इत्यर्थः । कस्येव ? मतङ्गजस्ये**व** यथा **मतङ्गजस्य** हस्तिनः **पाणिः** शुण्डादण्डः **सतर्षं** सतृष्णं यथा स्यात्तथा **नगाश्मरन्ध्रे** शैलशिलासंकटे निपतति किं० नगाश्मरन्ध्रे ? **अन्यद्विपापीतजले** अन्यगजपीतोदके । अथ समासः । सह विश्रम्भेन वर्तते यस्मिन् तत् स० । निषङ्गयोर्वक्त्रं निषङ्गवक्त्रं तस्मिन् नि० । अन्यश्चासौ द्विपश्च अन्यद्विपः तेनापीतं जलं यस्य तत् अन्यद्विपापीतजलं तस्मिन् अ० । सह तर्षया वर्तते यत्तत् स० । नगस्य अश्मानौ नगाश्मानौ नगाश्मनो रन्ध्रं नगाश्मरन्ध्रं तस्मिन् न० । इति वृत्तार्थः ॥ ३६ ॥

च्युते स तस्मिन्निषुधौ शरार्थाद् ध्वस्तार्थसारे सहसैव बन्धौ ।
तत्कालमोघप्रणयः प्रपेदे निर्वाच्यताकाम इवाभिमुख्यम् ॥ ३७ ॥

'च्यूते०' व्याख्या । **सो**ऽर्जुनस्य पाणिः **तस्मिन् इषुधौ** तूणे **शरार्थात्** बाणप्रयोजनात् **च्युते** भ्रष्टे सति **आभिमुख्यं** सन्मुखत्वं **प्रपेदे** प्राप किं० इषुधौ ? **ध्वस्तार्थसारे** नष्टग्रहणप्रयोजनसारे किं० पाणिः ? **तत्कालमोघप्रणयः** तत्कालमेव तस्मिन्निषुधौ मोघस्नेहः विफलप्रयासः कस्मिन् क इव ? बन्धौ निर्वाच्यताकाम **इव** यथा '**निर्वाच्यताकामः**' **निर्वाच्यतां** कृतघ्नत्वापवादराहित्यं **कामयत** इति निर्वाच्यताकामः निष्कलङ्को गुणवान् पुमान् **सहसा** शीघ्रं **ध्वस्तार्थसारे** नष्टधने **बन्धौ** स्वजने तत्कालमोघप्रणयोऽपि आभिमुख्यं प्रपद्यते । यथा कश्चित्कृतज्ञः पुमान् तत्कालेऽकृतोपकारकमपि बन्धुं पूर्वोपकारस्मरणात् पुनरनुबध्नाति तद्वदित्यर्थः । अथ समासः । इषवो धीयन्तेऽस्मिन्निति इषुधिस्तस्मिन् [इषुधौ । ध्वस्तः अर्थसारः यस्य स ध्व० तस्मिन्] ध्वस्तार्थसारे । तत्कालं मोघः प्रणयो यस्य स त० । निर्गतं वाच्यं यस्मादसौ निर्वाच्यः निर्वाच्यस्य भावो निर्वाच्यता तां कामयते इति नि० । अभिमुखस्य भावः आभिमुख्यम् । इति वृत्तार्थः ॥३७॥

संघट्टयामास गतागताभ्यां सावेगमग्राङ्गुलिरस्य तूणौ ।
विधेयमार्गे मतिरुत्सुकस्य नयप्रयोगाविव गां जिगीषोः ॥ ३८ ॥

'संघ०' व्याख्या । **अस्या**र्जुनस्य **अग्राङ्गुलिः** उत्कृष्टाङ्गुलिः हस्ताग्रः **सावेगं** सत्त्वरं सौत्सुक्यं

यथा स्यात्तथा **गतागताभ्यां** वारं वारं यातायाताभ्यां द्वौ **तूणौ** द्वौ इषुधी **संघट्टयामास** परस्परं बाणग्रहणाय पुनः पुनः तूणयोः पाणिं व्यापारयामास इत्यर्थः । कस्य केव ? गां जिगीषोः मति**रिव** यथा **गां जिगीषोः** पृथिवीं जेतुकामस्य नरस्य **मतिः** बुद्धिः **नयप्रयोगौ** मन्त्रव्यवसायौ अथवा नयः षाड्गुण्यं प्रयोगः उपायान्वेषणं नयप्रयोगाविति स्पृशति । किं० गां जिगीषोः ? **विधेयमार्गे उत्सुकस्य** कर्तव्यविषयैकप्रयत्नस्य । अथ समासः । गतं च आगतं च गतागते ताभ्यां ग० । सह आवेगेन वर्तते यस्यां क्रियायां तत् सा० । अग्रं चासावङ्गुलिश्च अ० । विधेयस्य मार्गो विधेयमार्गस्तस्मिन् वि० । नयश्च प्रयोगश्च न० । इति वृत्तार्थः ॥ ३८ ॥

बभार शून्याकृतिरर्जुनस्तौ महेषुधी वीतमहेषुजालौ ।
युगान्तसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवाम्बुराशी ॥ ३९ ॥

'बभा०' व्याख्या । **अर्जुनः शून्याकृतिः** इष्टविच्छेदात् निस्तेजस्करूपः सन् **तौ** द्वौ **महेषुधी** महातूणीरौ **बभार** दधौ निषङ्गयोर्महत्त्वं अक्षयशरत्वात् । किं० तौ महेषुधी ? **वीतमहेषुजालौ** गतमहाबाणसमूहौ क इव ? लोक **इव** यथा **लोको** भूमण्डलं **विजिह्मः** शून्यः आकुलः सन् **युगान्तसंशुष्कजलौ** प्रलयकाले क्षीणोदकौ [**पूर्वापरौ**] पूर्वपश्चिमौ **अम्बुराशी** समुद्रौ बिभर्ति धारयति तद्वदिति । अथ समासः । शून्या आकृतिर्यस्य स शू० । महान्तौ च तौ इषुधी च महेषुधी महेषूणां जालं महेषुजालं वीतं महेषुजालं याभ्यां तौ वी० । युगान्ते शुष्कं जलं ययोस्तौ यु० । पूर्वश्च अपरश्च पूर्वापरौ । अम्बूनां राशिर्ययोस्तौ अ० । इति वृत्तार्थः ॥ ३९ ॥

तेनानिमित्तेन तथा न पार्थस्तयोर्यथा रिक्ततयानुतेपे ।
स्वामापदं प्रोज्झ्य विपत्तिमग्नं शोचन्ति सन्तो ह्युपकारिपक्षम् ॥ ४० ॥

'तेना०' व्याख्या । **पार्थो**ऽर्जुनः **तेन अनिमित्तेन** बाणक्षयरूपेण दुर्निमित्तेन **तथा**[**ना**]**नुतेपे** न शुशोच तथा कथम् ? **यथा** येन प्रकारेण **तयोः** तूणीरयोः **रिक्ततया** शून्यतया हेतुना **अनुतेपे** शोकं चकार **हि** युक्तोऽयमर्थः **सन्तः** सज्जनाः **स्वामापदम्** आत्मीयां विपदं **प्रोज्झ्य** परित्यज्य **विपत्तिमग्नं** व्यसनेन लुप्तम् **उपकारिपक्षम्** उपकारकवर्गं **शोचन्ति** साधूनां स्वकष्टादपि परकीयकष्टमेव सन्तापकारकमित्यर्थः । अथ समासः । न निमित्तम् अनिमित्तं तेन अ० । रिक्तस्य भावो रिक्तता तया-रि० । विपत्तौ मग्नः विपत्तिमग्नस्तं वि० । उपकारिणां पक्षम् उ० । इति वृत्तार्थः ॥४०॥

प्रतिक्रियायै विधुरः स तस्मात्कृच्छ्रेण विश्लेषमियाय हस्तः ।
पराङ्मुखत्वेऽपि कृतोपकारात्तूणीमुखान्मित्रकुलादिवार्यः ॥ ४१ ॥

'प्रति०' व्याख्या । **सो**ऽर्जुनस्य **हस्तः** करः **तस्मात् तूणीमुखात्** निषङ्गवक्त्रात् **कृच्छ्रेण** कष्टेन **विश्लेषं** विरहम् **इयाय** प्राप किं० हस्तः ? **प्रतिक्रियायै विधुरः** प्रत्युपकाराय असमर्थः क इव ? **आर्य इव** यथा कृतज्ञः सत्पुरुषः **पराङ्मुखत्वेऽपि** तत्कालवैमुख्येऽपि **कृतोपकारात्** विहितोपकृतेः **मित्रकुलात्**

सुहृत्कुलात् आपदं हन्तुमसमर्थः कृच्छ्रेण विश्लेषम् एति । अथ समासः । पराङ्मुखस्य भावः पराङ्मुखत्वं तस्मिन् प० । कृत उपकारो येन स कृतोपकारस्तस्मात् कृ० । तूण्याः मुखं तूणीमुखं तस्मात् तू० । मित्राणां कुलं मित्रकुलं तस्मात् मि० । इति वृत्तार्थः ॥ ४१ ॥

पश्चात्क्रिया तूणयुगस्य भर्तुर्जज्ञे तदानीमुपकारिणीव ।
संभावनायां विफलीकृतायां पत्युः पुरः साहसमासितव्यम् ॥ ४२ ॥ (इ.)

'पश्चा०' व्याख्या । **तदानीं** तस्मिन् प्रस्तावे **भर्तु**रर्जुनस्य **पश्चात्क्रिया** पश्चात् अवस्थानं 'पाठ्रह्विवो' इति लोके । **तूणयुगस्य** निषङ्गद्वयस्य लोके 'विलाधा' **उपकारिणीव** उपकारिकेव **जज्ञे** जाता तथाहि **संभावनायां** स्वयोग्यतायां वा **विफलीकृतायां** भग्नायां सत्यां **पत्युः** प्रभोः पुरः अग्रतः **आसितव्यं** स्थातव्यं **साहसं** दुष्करं 'साहसं तु दमे दुष्करकर्मणि' इति *हैमानेकार्थः* [३-७५३] । अशक्यं स्थातुं न शक्यते इत्यर्थः। स्वामिना सन्मानितस्य अवसरे अनुपकारकस्य सेवकस्य स्वामिसांमुख्यं स्थितम् अनुचितमिति। अथ समासः। तूणयोर्युगं तूणयुगं तस्य तू० । इति वृत्तार्थः ॥ ४२ ॥

तं शम्भुराक्षिप्तमहेषुजालं लोहैः शरैर्मर्मसु निस्तुतोद ।
हृतोत्तरं तत्त्वविचारमध्ये वक्तेव दोषैर्गुरुभिर्विपक्षम् ॥ ४३ ॥ (उ.)

'तं श०' व्याख्या । **शम्भु**र्महादेवः **तम्** अर्जुनं **लोहैः** लोहमयैः **शरैः** बाणै**र्मर्मसु** मर्मस्थानेषु **निस्तुतोद** विव्याध अताडयदित्यर्थः । किं० तम् ? **आक्षिप्तमहेषुजालम्** अपहृतमहाबाणसमूहं क इव ? वक्ते**व** यथा **वक्ता** वादी प्रामाणिकः **विपक्षं** प्रतिवादिनं **गुरुभि**र्महद्भिः क्वचित् 'बहुभिः' इति पाठस्तत्र बहुभिरनेकैः **दोषैः** दूषणैः निग्रहस्थानैः **मर्मसु** शास्त्ररहस्येषु **तुदति** व्यथते किं० विपक्षम् ? **तत्त्वविचारमध्ये** सभासदमध्ये **हृतोत्तरं** मूकीभवन्तं निरुत्तरीकृतमित्यर्थः । अथ समासः । आक्षिप्तानि महेषूणां जालानि यस्य स आक्षिप्तमहेषुजालस्तम् आ० । हृतमुत्तरं यस्य स हृतोत्तरस्तं हृ०। तत्त्वं विचारयन्ति ते तत्त्वविचाराः तत्त्वविचाराणां मध्यं तत्त्वविचारमध्यं तस्मिन् त० । इति वृत्तार्थः ॥ ४३ ॥

जहार चास्मादचिरेण वर्म ज्वलन्मणिद्योतितहे[1]मलेखम् ।
चण्डः पतङ्गान्मरुदेकनीलं तडित्वतः खण्डमिवाम्बुदस्य ॥ ४४ ॥ (उ.)

'जहा०' व्याख्या । **च** पुनः शम्भुः **अस्मात्** अर्जुनसकाशात् **अचिरेण** शीघ्रं **वर्म** सन्नाहं **जहार** हृतवान् किं० वर्म ? **ज्वलन्मणिद्योतितहेमलेखं** देदीप्यमानरत्नैः प्रकाशितसुवर्णरेखं क इव ? मरु**दिव** यथा **चण्डः** प्रचण्डो **मरुत्** वायुः **पतङ्गात्** सूर्यात् **अम्बुदस्य** मेघस्य **खण्डं** शकलं हरति । किं० खण्डम् ? **एकनीलं** केवलकृष्णवर्णं किं० अम्बुदस्य ? **तडित्वतः** विद्युत्सहितस्य तदा भगवन्मायया मुक्तसंनाहो मुनिर्मेघमुक्तः सूर्य इव दिदीपेति तात्पर्यार्थः । अथ समासः। ज्वलन्तश्च ते मणयश्च ज्वलन्मणयः ज्वलनमणिभिर्द्योतिता हेम्नो लेखा यस्य तत् ज्व०। इति वृत्तार्थः ॥ ४४ ॥

1. हैमलेखम् -म. इदं च पा. ।

अथ श्लोकद्वयेन सन्नाहे हृते सत्यर्जुनस्य शोभामाह -

विकोशनिर्धौततनोर्महासेः फणावतश्च त्वचि विच्युतायाम् ।
प्रतिद्विपाबद्धरुषः समक्षं नागस्य विक्षिप्तमुखच्छदस्य ॥ ४५ ॥ (उ.)

विबोधितस्य ध्वनिना घनानां हरेरपेतस्य च शैलरन्ध्रात् ।
निरस्तधूमस्य च रात्रिवह्नेर्विना तनुत्रेण रुचिं स [2]लेभे ॥ ४६ ॥ (उपे.)

'विको०' 'विबो०' व्याख्या । **सोऽर्जुनः** तदानीं कञ्चुकहरणसमये **तनुत्रेण** सन्नाहेन विना तेषां पदार्थानां **रुचिं** शोभां **लेभे** प्राप ते के ? इत्याह- 'विकोशनिर्धौततनोः' **विकोशः** कोशादुद्धृतः **निर्धौततनोः** शाणोल्लीढशरीरस्य विकोशत्वेन निर्मलवपुषः **महासेः** महाखड्गस्य रुचिं लेभे । **च** पुनः **त्वचि** चर्मणि **विच्युतायां** निर्मुक्तायां सत्यां मुक्तकञ्चुकस्य **फणावतः** मुक्तकञ्चुकस्य सर्पस्य रुचिं लेभे । **च** पुनः **नागस्य** हस्तिनो रुचिं लेभे । किं० नागस्य ? **समक्षं** प्रत्यक्षं समीपे वा **प्रतिद्विपाबद्धरुषः** प्रतिद्वन्द्विवैरिगजविषये बद्धकोपस्य पुनः किं० नागस्य ? **विक्षिप्तमुखच्छदस्य** निरक्तमुखावरणपटस्य **च** पुनः **हरेः** सिंहस्य रुचिं लेभे । किं० हरेः ? **घनानां** मेघानां **ध्वनिना** गर्जितशब्देन **विबोधितस्य** जागरितस्य पुनः किं० हरेः ? **शैलरन्ध्रात्** पर्वतगुहायाः **अपेतस्य** विगतस्य **च** पुनः **रात्रिवह्नेः** निशावैश्वानरस्य रुचिं लेभे । किं० रात्रिवह्नेः ? **निरस्तधूमस्य** धूमरहितस्य प्रत्येकं षष्ठ्यन्तपदेन सह संबध्यते । एतेनास्य तीक्ष्णत्ववैरनिर्यातनत्वरणदुर्मदत्वमनस्वित्वतेजस्वित्वानि उक्तानि[१] । अथ समासः । विगतः कोशो यस्मात् असौ विकोशः अत एव निर्धौता तनुर्यस्य स विकोशनिर्धौततनुस्तस्य वि० । महांश्चासावसिश्च महासिस्तस्य म० । प्रतिद्विपे आबद्धः रुष् येनासौ प्र० । विक्षिप्तो मुखच्छदो यस्य स विक्षिप्तमुखच्छदस्तस्य वि० । शैलस्य रन्ध्रं शैलरन्ध्रं तस्मात् शै० । निरस्तो धूमो यस्य स निरस्तधूमस्तस्य नि० । रात्रौ वह्निः रात्रिवह्निस्तस्य रा० । तनुं त्रायते तत् तनुत्रं तेन त० । इति वृत्तार्थः ॥ ४६ ॥

अचित्ततायामपि नाम युक्तामनूर्ध्वतां प्राप्य तदीयकृच्छ्रे ।
महीं गतौ ताविषुधी तदानीं विवव्रतुश्चेतनयेव योगम् ॥ ४७ ॥ (उपे.)

'अचि०' व्याख्या । **तदानीं** तस्मिन् सन्नाहपतनसमये **तौ इषुधी** तूणौ निषङ्गौ **महीं गतौ** भुवि पतितौ सन्तौ **अचित्ततायामपि** अचेतनत्वेऽपि **चेतनया योगं** चैतन्यसंबन्धं **विवव्रतुरिव** प्रकटयामासतुरिव सचित्ताविव बभूवतुरित्यर्थः । किंकृत्वा ? **तदीयकृच्छ्रे** अर्जुनदुःखे **युक्तां** योग्याम् अकिंचित्करत्वात् **अनूर्ध्वताम्** अधोमुखत्वं प्राप्स्यामि दुःखे औन्नत्यम् अनुचितमित्यर्थः । **नाम**शब्दः किलार्थे । अथ समासः । चित्तस्य भावः चित्तता न चित्तता अचित्तता तस्याम् अ० । ऊर्ध्वस्य भावः ऊर्ध्वता न ऊर्ध्वता अनूर्ध्वता । तस्य इदं तदीयं तदीयं च तत् कृच्छ्रं च तदीयकृच्छ्रं तस्मिन् त० । इति वृत्तार्थः ॥४७॥

---

1. चाक्षि० -म. । 2. भेजे -म. इदं च पा.

---

१. अत्र रुचिमिव रुचिमिति सादृश्याक्षेपादसंभवद्वस्तुसंभवी निदर्शनालंकारो मालया संसृष्टः -म.

स्थितं विशुद्धे नभसीव सत्त्वे धाम्ना तपोवीर्यमयेन युक्तम् ।
शस्त्राभिघातैस्तमजस्त्रमीशस्त्वष्टा विवस्वन्तमिवोल्लिलेख ॥ ४८ ॥ (उ.)

'स्थितं०' व्याख्या । **ईशो** महादेवः **तमर्जुनमजस्त्रं** निरन्तरं **शस्त्राभिघातैः** शस्त्रप्रहारैः **उल्लिलेख** ततक्ष किं० तम् ? **विशुद्धे** निर्व्याजे **सत्त्वे** सत्त्वगुणे **स्थितं** पुनः किं० तम् ? **तपोवीर्यमयेन** तपोवीर्याभ्यामागतेन **धाम्ना** तेजसा **युक्तं** सहितं कः कमिव ? यथा **त्वष्टा** देवसूत्रधारः **विवस्वन्तं** सूर्यम् अजस्रं शस्त्राभिघातैः कृत्वा उल्लिखति तद्वदिति । किं० विवस्वन्तम् ? **विशुद्धे** निर्मले **नभसीव** गगने इव **स्थितम्** । पुनः किं विव० ? **धाम्ना युक्तं** तेजसा युक्तम् । अथ समासः । तपश्च वीर्यं च प्रचुरे यत्र तत् तपोवीर्यमयं तेन त० । शस्त्राणाम् अभिघाताः शस्त्राभिघातास्तैः श० । इति वृत्तार्थः ॥ ४८ ॥

संरम्भवेगोज्झितवेदनेषु गात्रेषु बाधिर्यमुपागतेषु ।
मुनेर्बभूवागणिता[1]हितेषोर्लौहस्तिरस्कार इवात्ममन्युः ॥ ४९ ॥ (उ.)

'संर०' व्याख्या । **मुनेरर्जुनस्य आत्ममन्युः** स्वक्रोधः **गात्रेषु** देहेषु **लौहस्तिरस्कार इव** लोहकवच इव **बभूवा**सीत्, सोऽर्जुनो रोषसन्नाहयुक्तो जातः क्रोधैकवर्मणां वीराणां किमन्यैर्लोहभारै-रित्यर्थः । रोषवशान्न किंचित्प्रहारदुःखम् अज्ञासीदित्यर्थः । केषु सत्सु ? **गात्रेषु बाधिर्यं** बधिरत्वम् इन्द्रियेषु जडत्वम् **उपागतेषु** प्राप्तेषु सत्सु [किं० गात्रेषु ? **संरम्भवेगोज्झितवेदनेषु** संभ्रमातिशयेन त्यक्तदुःखेषु] किं० मुनेः ? **अगणिताहितेषोः** अवहेलितशत्रुशरस्य । अथ समासः । संरम्भस्य वेगः संरम्भवेगः संरम्भवेगेन उज्झिता वेदना यैस्तानि सं० तेषु संरम्भवेगोज्झितवेदनेषु । बधिरस्य भावो बाधिर्यम् । अगणिता अहितानामिषवो येन सोऽगणिताहितेषुस्तस्य अ० । तिरस्क्रियते आबाध्यते अनेनेति तिरस्कारः । आत्मनो मन्युः आ० । इति वृत्तार्थः ॥ ४९ ॥

ततोऽनुपूर्वायतवृत्तबाहुः श्रीमान्क्षरल्लोहितदिग्धगा[2]त्रः ।
आस्कन्द्य वेगेन विमुक्तनादः क्षितिं विधुन्वन्निव पार्ष्णिघातैः ॥ ५० ॥ (उ.)

साम्यं गतेनाशनिना मघोनः शशाङ्कले[3]खाकृतिपाण्डुरेण ।
शम्भुं बिभित्सुर्धनुषा जघान स्तम्[4]भं विषाणेन महानिवेभः ॥ ५१ ॥ (उ.)

'ततः' 'साम्यं' व्याख्या । **ततो**ऽनन्तरं स अर्जुनः **शम्भुं** महादेवं **धनुषा** कार्मुकेन कृत्वा **जघान** ताडयामास क इव ? महान् इभ **इव** यथा **महान् इभः** महागजः **विषाणेन** दन्तमुशलेन **स्तम्भ**मालानं हन्ति तद्वदिति । अर्जुनः किंकर्तुमिच्छुः ? **बिभित्सुः** ईश्वरं भेत्तुमिच्छुः किं० धनुषा ? **मघोनः** इन्द्रस्य **अशनिना** वज्रेण सह **साम्यं** सादृश्यं **गतेन** प्राप्तेन वज्रसदृशप्रहारेणेत्यर्थः । पुनः किं० धनुषा ? **शशाङ्कलेखाकृतिपाण्डुरेण** शशिकलाकारश्वेतेन शशाङ्कलेखायाः वक्रत्वं पाण्डुरत्वं चोक्तम् । किं०

1. ०तेषुराशेलौं० -म. इदं च पा. । 2. दिग्धदेहः -म. । 3. ०खण्डा० -म. इदं च पा. । 4. स्तम्बं -म. इदं च पा.

अर्जुनः ? **अनुपूर्वायतवृत्तबाहुः** गोपुच्छाकारदीर्घवर्तुलमांसलभुजः पुनः किं० अर्जुनः ? **श्रीमान्** शोभावान् पुनः किं० अर्जुनः ? **क्षरल्लोहितदिग्धगात्रः** स्रवद्रुधिरेण लिप्तदेहः पुनः किं० अर्जुनः ? **वेगेन** सहसा **आस्कन्द्य** उड्डीय **विमुक्तनादः** मुक्तध्वनिः पुनः किं० अर्जुनः ? उत्प्रेक्ष्यते **पार्ष्णिघातैः** पाणिप्रहारैः पादयोः पश्चाद्भागः पार्ष्णिः **क्षितिं** भूमिं **विधुन्वन्निव** कम्पयन्निव **स्थितः** । अथ समासः । अनुपूर्वौ आयतौ वृत्तौ बाहू यस्य स अ० । श्रीरस्यास्तीति श्रीमान् । क्षरच्च तल्लोहितं च क्षरल्लोहितं क्षरल्लोहितेन दिग्धं गात्रं यस्य स क्ष० । पार्ष्ण्योः घाताः पार्ष्णिघातास्तैः पा० ॥ ५० ॥ शशाङ्कस्य लेखा शशाङ्कलेखा शशाङ्कलेखायाः आकृतिः शशाङ्कलेखाकृतिः शशाङ्कलेखाकृतिवत् पाण्डुरं शशाङ्कलेखाकृतिपाण्डुरं तेन श० । भेत्तुमिच्छतीति बिभित्सति बिभित्सतीति बिभित्सुः । इति वृत्तार्थः ॥ ५१ ॥

रयेण सा संनिदधे पतन्ती भवोद्भवेनात्मनि चापयष्टिः ।
समुद्धता सिन्धुरनेकमार्गा परे स्थितेनौजसि जह्नुनेव ॥ ५२ ॥ (उपे.)

'रये०' व्याख्या । **सा चापयष्टिः** अर्जुनमुक्ता धनुर्लता **रयेण** वेगेन **पतन्ती** आगच्छन्ती **भवोद्भवेन** जगत्कारणेन महादेवेन [**सिन्धुः** गङ्गा] **आत्मनि** स्वशरीरे **संनिदधे** प्रवेशिता तद्वदिति । किं० सिन्धुः ? **समुद्धता** उत्कटा [पुनः किं०सि० ? **अनेकमार्गा** त्रिस्रोताः केन ? **जह्नुना** राजर्षिणा] किं० जह्नुना ? **परे** प्रकृष्टे **ओजसि** बले परमे ज्योतिषि **स्थितेन** । अथ समासः । भव उद्भवति अस्मादिति भवोद्भवस्तेन भ० । अनेके मार्गा यस्याः सा अ० । इति वृत्तार्थः ॥ ५२ ॥

विकार्मुकः कर्मसु शोच्य[1]पूज्यः परिच्युतौदार्य इवोपचारः ।
विचिक्षिपे शूलभृता सलीलं स पत्रिभिर्दूरमदूरपातैः ॥ ५३ ॥ (उपे.)

'विका०' व्याख्या । **सोऽर्जुनः शूलभृता** महादेवेन **सलीलं** सक्रीडं यथा स्यात्तथा **अदूरपातैः** गाढप्रहारैः **पत्रिभि**र्बाणैः **सोऽर्जुनः दूरम्** अत्यन्तं **विचिक्षिपे** व्याकुलीकृतः किं० सः ? **विकार्मुकः** गतचापः भग्नचापो वा पुनः किं० स ? **कर्मसु** रणक्रियाविशेषेषु अनायुधत्वात् **शोच्यः** शोचनीयः सुसत्त्वात् **पूज्यः** माननीयः क इव ? **उपचार इव** सत्कारः यथा उपचारः आतिथ्यं **परिच्युतौदार्यः** सन् दानरहितः सन् शोच्यः पूज्यश्च भवति औदार्यं विना शोच्यः संभ्रमातिशयात् च पुनः [पूज्यः] । अथ समासः । विगतं कार्मुकं यस्मात् स वि० । शोच्यश्चासौ पूज्यश्च शो० । परिच्युतम् औदार्यं यस्मात् स प० । न दूरं पातो येषां ते अदूरपातास्तैर० । इति वृत्तार्थः ॥ ५३ ॥

उपोढकल्याणफलोऽभिरक्षन् वीरव्रतं पुण्यरणाश्रमस्थः ।
महोपवासैरिव संयतात्मा तेपे मुनिस्तैरिषुभिः शिवस्य ॥ ५४ ॥ (उ.)

'उपो०' व्याख्या । **मुनिरर्जुनः तैः शिवस्य** महादेवस्य **इषुभिः** शरैः **तेपे** तप्तवान् क इव ? संयतात्मा **इव** यथा **संयतात्मा** नियतचित्तसाधुः **महोपवासैः** तपोनियमैः क्वचित् 'जपोपवा[2]सैः' इति

1. शोचनीयः –म. इदं च पा. । 2. एष पाठः म. मध्ये इदं च पा. ।

पाठस्तत्र तपोजपैः तप्यते किं० अर्जुनः ? **उपोढकल्याणफलः** आसन्नकल्याणकारकास्त्रलाभलक्षणफलः मुनिपक्षे आसन्नमोक्षादिफलः । अर्जुनः किंकुर्वन् ? **वीरव्रतं** धैर्यं रणात् अपलायनलक्षणम् **अभिरक्षन्** पालयन् मुनिपक्षे वीरव्रतं तीव्रतपः । पुनः किं० सः ? **पुण्यरणाश्रमस्थः** पुण्यसंग्रामाश्रमस्थः मुनिपक्षे पुण्याश्रमो ब्रह्मचर्यादिस्तत्र वर्तमानः । अथ समासः । उपोढं कल्याणं फलं यस्य स उ० । वीराणां व्रतं वी० । रण एव आश्रमः रणाश्रमः पुण्यश्चासौ रणाश्रमश्च पु० पुण्यरणाश्रमे तिष्ठतीति पु० । अथवा पुण्ययोगात् पुण्यरणः स एवाश्रमस्तत्र तिष्ठतीति पु० । महान्तश्च ते उपवासाश्च महोपवासास्तैर्म० । इति वृत्तार्थः ॥५४॥

ततोऽग्रभूमिं व्यवसायसिद्धेः सीमानमन्यैरतिदुस्तरं सः ।
तेजःश्रियामाश्रयमुत्तमासिं साक्षादहंकारमिवाललम्बे ॥ ५५ ॥ (उ.)

'ततो०' व्याख्या । **ततो** धनुरन्तर्धानानन्तरं **सो**ऽर्जुनः **उत्तमासिं** महाखड्गम् **आललम्बे** जग्राह किं० उत्तमासिम् ? **व्यवसायसिद्धेः** प्रारब्धनिर्वाहव्रतस्य **अग्रभूमिं** प्रथमभूमिं विपदि गन्तव्यस्थानं शरणमित्यर्थः । पुनः किं० उत्तमा० ? **सीमानम्** अवधिम् आश्रयसाधनमित्यर्थः । कस्याः ? **व्यवसायसिद्धेः** उत्साहसिद्धेः मण्डूकप्लुतिन्यायेन एकपदम् उभयत्रापि संबध्यते । पुनः किं० उत्त० ? **अन्यै**रपरैः पृथक्जनै**रतिदुस्तरम्** अलङ्घनीयं दुरतिक्रममित्यर्थः । पुनः किं० उत्त० ? **तेजःश्रियां** प्रतापसंपदाम् [**आश्रयम्**] आश्रयस्थानं हेतुमित्यर्थः । पुनः [**साक्षादहंकारमिव**] अभिमानमिव **स्थितं** सर्वाण्यपि विशेषणानि अहंकारपक्षे योज्यानि। अथ समासः । अग्रं चासौ भूमिश्च अग्रभूमिः ताम् अ० । व्यवसायस्य सिद्धिः व्यवसायसिद्धिस्तस्याः व्य० । तेजांसि च श्रियश्च तेजःश्रियस्तेषां ते० । उत्तमश्चासावसिश्च उत्तमासिः तम् उ० । इति वृत्तार्थः ॥ ५५ ॥

शरानवद्यन्ननवद्यकर्मा चचार चित्रं प्रविचारिमार्गैः[1] ।
हस्तेन निस्त्रिंशभृता स दीप्तः सार्कांशुना वारिधिरूर्मिणेव ॥ ५६ ॥ (उ.)

'शरा०' व्याख्या । **सोऽनवद्यकर्मा** प्रशस्यकर्मा अर्जुनः **प्रविचारिमार्गैः** खड्गिनां गतिभेदैः खड्गपाणियोग्यमार्गैः **चित्रम्** आश्चर्यं यथा स्यात्तथा **चचार** बभ्राम स किंकुर्वन् ? **निस्त्रिंशभृता** खड्गधारिणा **हस्तेन** करेण **शरान्** हरमुक्तान् बाणान् **अवद्यन्** खण्डयन् किं० सः ? **दीप्तः** कान्तिमान् तेजस्वीत्यर्थः । क इव ? वारिधि**रिव** यथा **वारिधिः** सागरः **सार्कांशुना** सूर्यकिरणसहितेन **ऊर्मिणा** कल्लोलेन चित्रं यथा स्यात्तथा विचरति । अथ समासः । अनवद्यं कर्म यस्य सोऽन० । प्रविचारिणो मार्गाः प्रविचारिमार्गास्तैः प्र० । निस्त्रिंशं बिभर्तीति निस्त्रिंशभृत् तेन नि० । अर्कस्यांशवोऽर्कांशवः सहार्कांशुभिर्वर्तमानः यः स सार्कांशुस्तेन सा० । इति वृत्तार्थः ॥ ५६ ॥

यथा निजे वर्त्मनि भाति भाभिश्छायामयश्चाप्सु सहस्ररश्मिः ।
तथा नभस्याशु रणस्थलीषु स्पष्टं द्विमूर्तिर्ददृशे स भूतैः ॥ ५७ ॥ (उ.)

1. प्रविचारमार्गैः -म. ।

'यथा०' व्या० । **यथा** येन प्रकारेण **सहस्त्ररश्मिः** रविः **निजे वर्त्मनि** गगने **भाभिः** किरणैः **अप्सु** जलेषु **छायामयः** प्रतिबिम्बगतः द्विमूर्तिः सन् **भाति** शोभते [**तथा** तेन प्रकारेण] **सोऽर्जुनः भूतैः** प्राणिभिः **आशु** शीघ्रं [**नभसि** गगने] **रणस्थलीषु** संग्रामाङ्गणेषु [च] भ्रमन् **स्पष्टं** प्रकटं यथा स्यात्तथा **द्विमूर्तिः** मूर्तिद्वितयो **ददृशे** दृष्टः इत्युत्प्रेक्षा। अथ समासः। सहस्त्रं रश्मयो यस्य स स० । रणस्य स्थल्यः रणस्थल्यस्तासु र० । द्वे मूर्ती यस्य स द्विमूर्तिः। इति वृत्तार्थः ॥ ५७ ॥

[1]त्सरुप्रदेशादपवर्जिताङ्गः शिवप्रणुन्नेन शिलीमुखेन ।
ज्वलन्नसिस्तस्य पपात पाणेर्घनस्य वप्रादिव वैद्युतोऽग्निः ॥ ५८ ॥ (उपे.)

'त्सरु०' व्याख्या । **तस्यार्जुनस्य पाणेः** हस्तात् **ज्वलन्** देदीप्यमानः **असिः** खड्गः **पपात** पतति स्म किं०असिः ? **शिवप्रणुन्नेन** महादेवप्रहितेन **शिलीमुखेन** शरेण **त्सरुप्रदेशात्** मुष्टिप्रदेशात् **अपवर्जिताङ्गः** लूनविग्रहः खण्डिताङ्गः मुष्टिस्थानमवधिं कृत्वा छिन्न इत्यर्थः । क इव ? **अग्निरिव** यथा **वैद्युतो** विद्युत्संबन्धी **अग्निः** वह्निः **घनस्य वप्रात्** तटात् पतति तद्वदिति । अथ समासः । त्सरोः प्रदेशः त्सरुप्रदेशस्तस्मात् त्स० । अपवर्जितमङ्गं यस्य सोऽप० । शिवेन प्रणुन्नः शिवप्रणुन्नस्तेन शि० । विद्युतोऽयं वै० । इति वृत्तार्थः ॥ ५८ ॥

आक्षिप्तचापावरणेषुजालश्छिन्नोत्तमासिः स मृधेऽवधूतः ।
रिक्तः प्रकाशश्च बभूव भूमेरुत्सा[2]रितोद्यान इव प्रदेशः ॥ ५९ ॥ (इ.)

'आक्षि०' व्याख्या । **सोऽर्जुनः मृधे** संग्रामे इत्थम् **अवधूतः** पराभूतः तिरस्कृतः सन् **रिक्तः** शून्यः **प्रकाशः** प्रकटश्च **बभूवा**सीत् किं० सः ? **आक्षिप्तचापावरणेषुजालः** संहृतकोदण्डकवचबाणसमूहः पुनः किं० सः ? **छिन्नोत्तमासिः** छिन्नप्रधानखड्गः क इव ? भूमेः प्रदेश **इव** यथा **भूमेः** पृथिव्याः **प्रदेशः उत्सारितोद्यानः** छिन्नोद्यानवृक्षः सन् **रिक्तः प्रकाशश्च** भवति तद्वत्सोऽर्जुनो बभूव । अथ समासः। चापं च आवरणं च इषुजालानि च चापावरणेषुजालानि आक्षिप्तानि चापावरणेषुजालानि यस्य स आ० । उत्तमश्चासावसिश्च उत्तमासिः छिन्नः उत्तमासिर्यस्य स छि० । उत्सारितम् उद्यानं यस्य स उ० । इति वृत्तार्थः ॥ ५९ ॥

स खण्डनं प्राप्य परादमर्षवान् भुजद्वितीयोऽपि विजेतुमिच्छया ।
ससर्ज वृष्टिं परिरुग्णपादपां जवेन मेघः पयसामिवाश्मनाम् ॥ ६० ॥ (वं.)

'स ख०' व्याख्या । **सोऽर्जुनः परात्** शत्रोः सकाशात् **खण्डनं** शस्त्रापगमात् पराजयम् अपमानं भङ्गं वा **प्राप्य** आसाद्य **भुजद्वितीयोऽपि** भुजमात्रसहायः भुजमात्रोपकरणोऽपि **अमर्षवान्** सकोपः सन् **अश्मनां** पाषाणानां **वृष्टिं** वर्षणं तस्योपरीति शेषः । **ससर्ज** मुमोच प्राहिणोत् इत्यर्थः । कया ?

1. पूर्वार्धस्य पादद्वयं म. मध्ये परावृत्तं वर्तते । 2. -त्सादितो० -म. इदं च पा.

विजेतुमिच्छया जयेच्छया किं० अश्मनां वृष्टिम् ? **परिरुग्णपादपां** भग्नवृक्षां क इव ? मेघ **इव** यथा **मेघो** जलदः **जवेन** वेगेन [**पयसां**] जलानां द्रवेभ्य इतराणि तेषां कठिनानां करकाणां वा वृष्टिं करोति तथा सोऽप्यर्जुनोऽश्मभिर्जघानेत्यर्थः । अथ समासः । भुज एव द्वितीयो यस्य स भुजद्वितीयः । परिरुग्णाः पादपा यया सा परिरुग्णपादपा तां प० । इति वृत्तार्थः ॥ ६० ॥

नीरन्ध्रे परिगमिते क्षयं पृषत्कैर्भूतानामधिपतिना शिलावितानेे ।
उच्छ्रायस्थगितनभोदिगन्तरालं चिक्षेप क्षितिरुहजालमिन्द्रसूनुः ॥ ६१ ॥ (प्र०)

'नीर०' व्याख्या । **इन्द्रसूनुर**र्जुनः तस्योपरीति शेषः । **क्षितिरुहजालं** वृक्षसमूहं **चिक्षेप** मुमोच किं० क्षितिरुहजालम् ? **उच्छ्रायस्थगितनभोदिगन्तरालम्** औन्नत्येनाच्छादितगगनदिगन्तरालं कस्मिन् सति ? **भूतानाम् अधिपतिना** शिवेन **नीरन्ध्रे** निबिडे कठिने **शिलाविताने** पाषाणसमूहे **क्षयं** नाशं **परिगमिते** प्रापिते सति कैःकृत्वा ? [**पृषत्कैः**] बाणैः कृत्वा । अथ समासः । शिलायाः वितानं शिलावितानं तस्मिन् शि० । उच्छ्रायेन स्थगिते नभोदिगन्तराले येन तत् उ० । रोहन्तीति रुहाः क्षितौ रुहाः क्षितिरुहाः क्षितिरुहाणां जालं क्षि० । इन्द्रस्य सूनुः इ० । इति वृत्तार्थः ॥ ६१ ॥

निःशेषं शकलितवल्कलाङ्गसारैः कुर्वद्भिर्भुवमभितः कषायचित्राम् ।
ईशानः सकुसुमपल्लवैर्नगैस्तैराततेने बलिमिव रङ्गदेवताभ्यः ॥ ६२ ॥ (प्र०)

'निः शे०' व्याख्या । **ईशानः** शिवः **तैर**र्जुनप्रहितैः **नगैर्**वृक्षैः **रङ्गदेवताभ्यः** संग्रामदेवताभ्यः **बलिं** पूजा**मिवातेने** विस्तारयामास चकारेत्यर्थः । किं० नगैः ? **सकुसुमपल्लवैः** पुष्पकिसलययुक्तैः नगैः किंकुर्वद्भिः ? **अभितः** सर्वतः **कषायचित्रां** स्वरसेन विचित्रवर्णां **भुवं** भूमिं **कुर्वद्भिः** कुर्वाणैः पुनः किं० नगैः ? **निःशेषं** समस्तं यथा स्यात्तथा **शकलितवल्कलाङ्गसारैः** खण्डीकृतवृक्षत्वग्शाखामज्जाभिः यः पूजां करोति स एभिः पदार्थैः करोतीत्यर्थः । अथ समासः । वल्कलानि च अङ्गानि च सारश्च वल्कलाङ्गसाराः शकलिता वल्कलाङ्गसारा येषां ते शकलितवल्कलाङ्गसारास्तैः श० । कषायेन चित्रा कषायचित्रा तां क० । कुसुमानि च पल्लवाश्च कुसुमपल्लवाः कुसुमपल्लवैः सह वर्तमाना सकुसुमपल्लवास्तैः स० । रङ्गेण देवता रङ्गदेवतास्ताभ्यो र० । इति वृत्तार्थः ॥ ६२ ॥

उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः ।
गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः ॥ ६३ ॥ (प्र०)

'उन्म०' व्याख्या । **गाण्डीवी** अर्जुनः **भुजाभ्यां** बाहुभ्यां **विषमविलोचनस्य** महादेवस्य **वक्षो** वक्षस्स्थलम् **आजघ्ने** आहतवान् आजघ्ने इत्यत्र आत्मनेपदं चिन्त्यम् अस्वाङ्गत्वात् । किं० वक्षः ? **कनकशिलानिभं** सुवर्णशिक्षासदृशं किंकृत्वा ? **वेगेन** सहसा **बाणनद्याः** शरसरितः **प्रतिमुखं** संमुखम् **एत्य** आगत्य क इव ? मकर **इव** यथा **मकरो** जलचरजीवः **उन्मज्जन्** निःसरन् **अमरापगायाः** गङ्गायाः प्रतिमुखम् एति आगच्छति तद्वदिति । अथ समासः । अमराणाम् आपगा अमरापगा तस्याः

अ० । बाणानां नदी बाणनदी तस्याः बा० । कनकस्य शिला कनकशिला तद्वन्निभं क० । विषमानि विलोचनानि यस्य स विषमविलोचनः तस्य वि० । इति वृत्तार्थः ॥ ६३ ॥

अभिलषत उपायं विक्रमं कीर्तिलक्ष्म्योरसुगममरिसैन्यैरङ्कमभ्यागतस्य ।
जनक इव शिशुत्वे सुप्रियस्यैकसूनोरविनयमपि सेहे पाण्डवस्य स्मरारिः ॥६४॥ (मा०)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ सप्तदशः सर्गः ।

'अभि०' व्याख्या । **स्मरारिः** महादेवः **पाण्डवस्य** अर्जुनस्य **अविनयमपि** अपराधमपि [**सेहे**] सोढवान् किं० पाण्ड० ? **कीर्तिलक्ष्म्योः** यशःश्रियोः **उपायं** साधनभूतं **विक्रमं** पराक्रमम् **अभिलषतो** वाञ्छतः पुनः किं० पाण्डवस्य ? **अङ्कं** समीपम् **अभ्यागतस्य** प्राप्तस्य इत्यनेन भक्तवत्सलत्वं सूचितम्। किं० अङ्कम् ? **अरिसैन्यैः** शत्रुकटकैः **असुगमं** दुष्प्रापं क इव ? जनक **इव** यथा **जनकः** पिता **सुप्रियस्य** अत्यन्तवल्लभस्य **एकसूनोः** एकपुत्रस्य **शिशुत्वे** बाल्यावस्थायाम् अङ्कमभ्यागतस्य उत्सङ्गं प्राप्तस्य उपायं किंचित्महत्फलं प्रार्थयमानस्य अविनयमपि सहते तद्वदिति । अथ समासः । कीर्तिश्च लक्ष्मीश्च कीर्तिलक्ष्म्यौ तयोः की० । सुखेन गम्यते तत् सुगमं न सुगमम् अ० । अरीणां सैन्यानि अरिसैन्यानि तैः अ० । शिशोर्भावः शिशुत्वं तस्मिन् शिशुत्वे । एक एव सूनुः एकसूनुस्तस्यै० । स्मरस्य अरिः स्मरारिः । इति वृत्तार्थः ॥ ६४ ॥

अद्वैतस्मृतयः कुशाग्रमतयः सिद्धान्तपाथोधयः प्राज्ञानां च तपस्विनां च परमां काष्ठामधिष्ठास्त्रवः ।
श्रीमन्तो गुरवोऽत्र देवविजयोपाध्यायसिंहास्तपागच्छे ये प्रति गौतमाद् गणभृतस्तैस्तैर्गुणै रेजिरे ॥१॥

तेषामशेषसमयार्थविदां वराणां शिष्येण धर्मविजयेन विनिर्मितायाम् ।
वृत्तौ सदर्थपदभाजि किरातकाव्ये सर्गः समाप्तिमिह सप्तदशो जगाम ॥ २ ॥

इति श्रीकिरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ ***शस्त्रापहरणो*** नाम सप्तदशः सर्गः ॥ १७ ॥ शुभं भवतुतराम् । ऐं नमः । श्रीगुरुभ्यो नमः ॥

अष्टादशः सर्गः।

ऐं नमः । श्री गुरुभ्यो नमः ।
अथ शिवार्जुनयोर्मल्लयुद्धं शिवविहितमर्जुनस्य प्रसादं च वर्णयितुमष्टादशं सर्गमारभते –

तत उदग्र इव द्विरदे मुनौ रणमुपेयुषि भीमभुजायुधे ।
धनुरपास्य सबाणधि शङ्करः प्रतिजघान घनैरिव मुष्टिभिः ॥ १ ॥ (द्रु०)
(का. १२ यावद् द्रुतविलम्बितवृत्तम्)

'तत०' व्याख्या । **ततो** वक्षःस्थलप्रहारानन्तरं **शङ्करो** महादेवः **घनैरिव** लोहमुद्गरैरिव **मुष्टिभिः** कृत्वा **मुनौ** अर्जुने **प्रतिजघान** प्रहारान् चक्रे प्राक् मुनिकृतघातस्य प्रतिघातं कृतवानित्यर्थः । किंकृत्वा ? **सबाणधि** सतूणं **धनुश्चापम् अपास्य** त्यक्त्वा सतूणः धनुरहितः सन् स्वयमपि मुष्टियुद्धेन युयुधे इत्यर्थः । किं० मुनौ ? **रणं** संग्रामम् **उपेयुषि** प्राप्तवति पुनः किं० मुनौ ? **भीमभुजायुधे** रौद्रमहाभुजरूपास्त्रे पुनः किं० मुनौ ? **उदग्रे** प्रधाने **द्विरदे** गजे इव स्थिते । अथ समासः । भीमौ च तौ भुजौ च भीमभुजौ भीमभुजावेव आयुधे यस्य स भीमभुजायुधस्तस्मिन् भी० । बाणधिभ्यां सह वर्तमानं स० । इति वृत्तार्थः ॥१॥

हरपृथासुतयोर्ध्वनिरुत्पतन्नमृदुसंवलिताङ्गुलिपाणिजः ।
स्फुटदनल्पशिलारवदारुणः प्रतिननाद दरीषु महीभृतः ॥ २ ॥

'हर०' व्याख्या । **हरपृथासुतयोः** ईश्वरार्जुनयोः **अमृदुसंवलिताङ्गुलिपाणिजः** कठिनमुष्टीकृत-प्रहारसंजातः **उत्पतन्** उत्तिष्ठन् **ध्वनिः** शब्दः **महीभृतः** इन्द्रकीलपर्वतस्य **दरीषु** गुहासु **प्रतिननाद** प्रतिशब्दो बभूव किं० ध्वनिः ? **स्फुटदनल्पशिलारवदारुणः** स्फुटत्प्रचुरशिलाशब्दवत् भीषणः। अथ समासः। हरश्च पृथासुतश्च हरपृथासुतौ तयोर्ह० । न मृदु अमृदु अमृदुसंवलिता अङ्गुलयो येषां ते अमृदुसंवलिताङ्गुलयः अमृदुसंवलिताङ्गुलयश्च पाणयश्च अमृदुसंवलिताङ्गुलिपाणयस्तेषु जातः अ० । अनल्पा चासौ शिला च अनल्पशिला स्फुटन्ती चासौ अनल्पशिला च स्फुटदनल्पशिलाः स्फुटदनल्पशिलाया रवः स्फुटदनल्पशिलारवस्तद्वद्दारुणः स्फु० । इति वृत्तार्थः ॥२॥

शिवभुजाहतिभिन्नपृथुक्षतः सुखमिवानुबभूव कपिध्वजः ।
क इव नाम बृहन्मनसां भवेदनुकृतेरपि सत्त्ववतां क्षमः ॥ ३ ॥

'शिव०' व्याख्या । **कपिध्वजोऽर्जुनः शिवभुजाहतिभिन्नपृथुक्षतः** महादेवकरप्रहारविदीर्णः विस्तीर्णव्रणः सन् शिवबाहुहननविदारितमहाव्रणः सन् इत्यर्थः । **सुखम् अनुबभूव इव** सुखं प्राप प्रहारदुःखं नाजीगणदित्यर्थः। ननु दुःसहदुःखवेगेषु कथमगणनमित्यत्राह– **नाम** इति संभावनायां **बृहन्मनसां** महच्चेतसां तेजस्विनां **सत्त्ववतां** सत्त्वाधिकानाम् **अनुकृतेरपि** अनुकरणस्यापि क इव ? **कः** पुमान्

क्षमः समर्थो **भवेत्** अपितु न कोपीऽत्यर्थः । सतां चरित्रं नटवत् अनुकर्तुं न कश्चित् समर्थः तच्चरणं तु दूरापास्तम् । रौद्ररसाविष्टमनसां सतां कुतः सुखदुःखगणनेति भावः । अथ समासः । शिवस्य भुजौ शिवभुजौ शिवभुजयोराहतिः शिवभुजाहतिः शिवभुजाहत्या भिन्नं पृथुक्षतं यस्य स शि० । बृहन्ति मनांसि येषां ते बृहन्मनसस्तेषां बृ० । सत्त्वं विद्यते येषां ते सत्त्ववन्तस्तेषां स० । इति वृत्तार्थः ॥ ३ ॥

व्रणमुखच्युतशोणितशीकरस्थगितशैलतटोरुभुजान्तरः ।
अभिनवौषसरागभृता बभौ जलधरेण समानमुमापतिः ॥ ४ ॥

'व्रण०' व्याख्या । **उमापतिः** महादेवः **जलधरेण** मेघेन **समानं** तुल्यं यथा स्यात्तथा **बभौ** शुशुभे किं० जलधरेण ? **अभिनवौषसरागभृता** नवप्रभातकालीनलौहित्यधारिणा किं० उमापतिः ? 'व्रणमुखच्युतशोणितशीकरस्थगितशैलतटोरुभुजान्तरः' **व्रणमुखच्युतं** प्रहारमुखच्युतं **यच्छोणितं** रुधिरं तस्य **शीकराः** कणास्तैः **स्थगितम्** आच्छादितं **शैलतटोरु** पर्वतसमानविस्तारं **भुजान्तरं** वक्षो यस्य स तथोक्तः । अथ समासः । व्रणस्य मुखानि व्रणमुखानि व्रणमुखेभ्यः च्युतं व्रणमुखच्युतं च तच्छोणितं च व्रणमुखच्युतशोणितं तस्य शीकराः व्रणमुखच्युतशोणितशीकराः शैलतटवत् उरु शैलतटोरु शैलतटोरु च तत् भुजान्तरं च शैलतटोरुभुजान्तरं व्रणमुखच्युतशोणितशीकरैः स्थगितशैलतटोरुभुजान्तरं यस्य स व्रणमुख० । उषयोऽयं औषसः औषसश्चासौ रागश्च औषसरागः अभिनवश्चासौ औषसरागश्च अभिनवौषसरागस्तं बिभर्त्तीति अभिनवौषसरागभृत् तेन अभि० । उमायाः पतिः उ० । इति वृत्तार्थः ॥४॥

उरसि शूलभृतः प्रहिता मुहुः प्रतिहतिं ययुरर्जुनमुष्टयः ।
भृशरया इव सह्यमहीभृतः पृथुनि रोधसि सिन्धुमहोर्मयः ॥ ५ ॥

'उर०' व्याख्या । **अर्जुनमुष्टयः शूलभृतः** शिवस्य **उरसि** हृदये **मुहुर्वारंवारं** **प्रहिताः** प्रेषिताः **प्रतिहतिं ययुः** स्खलनां ययुः प्रहारव्यथां न चक्रुरित्यर्थः । के इव ? सिन्धुमहोर्मय **इव** यथा **सिन्धुमहोर्मयः** समुद्रस्य महाकल्लोलाः **भृशरयास्तीव्रवेगाः** **सह्यमहीभृतः** सह्याचलस्य **पृथुनि** महति **रोधसि** तटे प्रतिहतिं यान्ति स्खलनां प्राप्नुवन्ति तद्वदित्यर्थः । अथ समासः । अर्जुनस्य मुष्टयः अ० । भृशं रयो येषां ते भृ० । सह्यश्चासौ महीभृच्च सह्यमहीभृत् तस्य स० । महान्तश्च ते ऊर्मयश्च म० । इति वृत्तार्थः ॥५॥

निपतितेऽधिशिरोधरमायते सममरत्नियुगेऽयुगचक्षुषः ।
त्रिचतुरेषु पदेषु किरीटिना लुलितदृष्टि मदादिव चस्खले ॥ ६ ॥

'निप०' व्याख्या । **किरीटिना** अर्जुनेन **त्रिचतुरेषु पदेषु लुलितदृष्टि** विह्वलनेत्रं यथा स्यात्तथा **चस्खले** स्खलितं लोके 'लथडीयु' उत्प्रेक्ष्यते **मदादिव** यथा मत्तो लुलितदृष्टिः सन् स्खलति तद्वदिति । कस्मिन् सति ? **अयुगचक्षुषः** महादेवस्य **अरत्नियुगे** भुजद्वये निष्कनिष्ठिकोद्यतकरयोर्युगे

'अरत्निर्निष्कनिष्ठिकः' इति हैमः [५९९] । **अधिशिरोधरं** ग्रीवाम् अधिकृत्य **समं** समकालं **निपतिते** पतिते सति किं० अरत्नियुगे ? **आयते** दीर्घे । अथ समासः । शिरोधरायाः अधि अधिशिरोधरम् । अरत्न्योर्युगम् अरत्नियुगं तस्मिन् अ० । अयुगानि चक्षूंषि यस्य सोऽयु० तस्यायुगचक्षुषः । त्रीणि चत्वारि वा त्रिचतुराणि तेषु त्रि० । किरीटं विद्यते यस्य स किरीटी तेन कि० । लुलिता दृष्टिर्यस्मिन् कर्मणि तत् लु० । इति वृत्तार्थः ॥ ६ ॥

अभिभवो[1]त्थितमन्युविदीपितः समभिसृत्य भृशं जवमोजसा ।
[2]करयुगेन विभज्य समाददे शशिकलाभरणस्य भुजद्वयम् ॥ ७ ॥

'अभि०' व्याख्या । सोऽर्जुनः **करयुगेन** हस्तद्वयेन **शशिकलाभरणस्य** शिवस्य **भुजद्वयम्** अरत्नियुगं **विभज्य** मोटयित्वा **समाददे** जग्राह केन ? **ओजसा** बलेन किंकृत्वा ? **भृशम्** अत्यर्थं **जवं** वेगं **समभिसृत्य** आलम्ब्य विधायेत्यर्थः । क्वचित् 'समभिलष्य भृशं जयमोजसा' इति पाठस्तत्र किंकृत्वा ? भृशं जयं समभिलष्य स किं० ? **अभिभवोत्थितमन्युविदीपितः** पराभवोद्भूतकोपप्रज्वलितः । अथ समासः । अभिभवादुत्थित अभिभवोत्थितः अभिभवोत्थितश्चासौ मन्युश्च अभिभवोत्थितमन्युः तेन विदीपितः अ० । करयोर्युगं करयुगं तेन क० । शशिनः कलाः शशिकलाः शशिकला आभरणं यस्य स शशिकलाभरणस्तस्य श० । भुजयोर्द्वयं भु० । इति वृत्तार्थः ॥ ७ ॥

प्रववृतेऽथ महाहवमल्लयोरचलसंचलनाहरणो रणः ।
करणशृङ्खलसंकलनागुरुर्गुरुभुजायुधगर्वितयोस्तयोः ॥ ८ ॥

'प्रव०' व्याख्या । **अथ** भुजग्रहणानन्तरं **तयोः** हरार्जुनयोः **रणः** संग्रामः **प्रववृते** प्रवृत्तः किं० तयोः ? **महाहवमल्लयोः** महारणबलीयसोः 'मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसि' इति *विश्वः*। पुनः किं० तयोः ? **गुरुभुजायुधगर्वितयोः** [महत्करशस्त्राहंकारितयोः] किं० रणः ? **अचलसंचलनाहरणः** हिमाचलकम्पोत्पादकः पुनः किं० रणः ? 'करणशृङ्खलसंकलनागुरुः' **करणानि** करचरणानि तेषां बन्धन एव **शृङ्खलानि** करचरणबन्धनानि तान्येव शृङ्खलानि येषां तेषां **संकलना** संघट्टना तया गुरुः दुस्तरः । अथवा **करणानाम्** आकर्षणविकर्षणादीनां **शृङ्खलं** परस्परकरणं प्रतिधारणरूपं तस्य **संकलना** तया **गुरुर्महान्** । अथ समासः । महाहवे मल्लौ महाहवमल्लौ तयोर्म० । अचलस्य संचलनम् आहरतीति अ० । करणानां शृङ्खलानि करणशृङ्खलानि तेषां संकलना करणशृङ्खलसंकलना तया गुरुः क० । गुरू भुजावेव आयुधे गुरुभुजायुधे गुरुभुजायुधाभ्यां गर्वितौ गुरुभुजायुधगर्वितौ तयोर्गु० । इति वृत्तार्थः ॥ ८ ॥

अयमसौ भगवानुत पाण्डवः स्थितमवाङ्मुनिना शशिमौलिना ।
समधिरूढमजेन नु जिष्णुना स्विदिति वेगवशान्मुमुहे गणैः ॥ ९ ॥

'अय०' व्याख्या । **गणैः** प्रमथैः **वेगवशात्** शिक्षालाघवात् **इति मुमुहे** इति मोहं प्राप्तः

1. ०वोदित० -म. इदं च पा. । 2. भुजयु० -म. इदं च पा. ।

चिन्तयामासेत्यर्थः । भ्रान्तिप्रकारमाह- इतीति किम् ? **अयं** प्रत्यक्षः पुरोवर्ती पुमान् **भगवान्** महादेवः **उत** अथवा अय**मसौ पाण्डवो**ऽर्जुनः अयं हि तिष्ठदवस्थायां भ्रम इति वेदितव्यम् अथावनिपातितावस्थामाह- अथवा **मुनिना** अर्जुनेन **अवाङ् स्थितम्** अधोभागे स्थितम् अथवा **शशिमौलिना** हरेण अवाङ्स्थितं **नु** इति वितर्के **अजेन** शिवेन **समधिरूढम्** उपरिस्थितं **स्विदि**ति वितर्के **जिष्णुना** अर्जुनेन समधिरूढम् । अथ समासः । शशी मौलौ यस्य स शशिमौलिस्तेन श० । वेगस्य वशो वेगवशस्तस्मात् वे० । इति वृत्तार्थः ॥९॥

प्रचलने[1] चलितं स्थितमास्थिते विनमने[2] नतमुन्नतमुन्नतौ ।
वृषकपिध्वजयोरसहिष्णुना मुहुरभावभयादिव भूभृता ॥ १० ॥

'प्रचल०' व्याख्या । **भूभृता** इन्द्रकीलाचलेन **वृषकपिध्वजयोः** हरार्जुनयोः **प्रचलने** चलने सति चलितं चेले तयोः **आस्थिते**ऽवस्थानरहिते सति **स्थितं** तथैव तस्थे तयो**र्विनमने** सति **नतम्** अनामि तयोः **उन्नतौ** ऊर्ध्वं गतौ सत्याम् **उन्नतम्** उदनामि ऊर्ध्वगतमित्यर्थः । सर्वत्र भावे क्तः तयोः साम्यमेव धृतम् इत्यर्थः । कथमेवं शिरस्तत्क्रियानुकारित्वम् इत्याह- किं० भूभृता ? **असहिष्णुना** तदीयभारमसहमानेन उत्प्रेक्ष्यते **मुहू**र्वारंवारम् **अभावभयादिव** आत्मनो विनाशात् इव । अथ समासः । वृषश्च कपिश्च वृषकपी वृषकपी ध्वजयोर्ययोस्तौ वृषकपिध्वजौ तयोः वृ० । अभावात् भयम् अभावभयं तस्मात् अ० । भुवं बिभर्त्तीति भूभृत् तेन भूभृता । इति वृत्तार्थः ॥ १० ॥

करणविभ्रमनिःसृतयोस्तयोः कृतभुजध्वनि वल्गु विवल्गतोः ।
चरणपातनिपातितरोधसः प्रससृपुः सरितः परितः स्थलीः ॥ ११ ॥

'करण०' व्याख्या । **तयो**र्हरार्जुनयोः **कृतभुजध्वनि** विहितभुजास्फोटशब्दो **वल्गु** मनोहरं यथा स्यात्तथा **विवल्गतोः** नृत्यतोः 'कृतभुजध्वनि चोत्पल(त्प्लव)मानयोः' इति पाठस्तत्र कृतो भुजध्वनिः भुजास्फोटशब्दो यस्मिन् कर्मणि तत्तथा उत्प्लवमानयोः वियदुत्प्लवनं कुर्वतोः सतोः **सरितो** नद्यः **स्थलीः** अकृत्रिमा भुवः **परितः** समन्तात् **प्रससृपुः** जग्मुः अमार्गेण वोढुं प्रवृत्ता इत्यर्थः । तयोर्युद्धवेगजनितकुलपातक्षोभादुद्वेलजलाः सरितः स्थलानि जग्मुरित्यर्थः । एतेन तयोर्युद्धभर उक्तः किं०तयोः ? **करणविभ्रमनिःसृतयोः** हस्ताक्षेपेन निर्गतयोः अथवा करणानि करचरणसंबन्धविशेषाः तान्येव शृङ्खलानि[3] तेभ्योः निःसृतयोर्निर्गतयोः मुहुर्मुहुर्मुक्तबन्धयोरित्यर्थः । करणानां पूर्वोक्तानां विभ्रमेण विलासेन निःसृतयोः विश्लिष्टयोः इत्यर्थः । किं० सरितः ? **चरणपातनिपातितरोधसः** चरणप्रहारेण पातिततटाः । अथ समासः । करणानां विभ्रमः करणविभ्रमस्तेन निःसृतौ करणविभ्रमनिःसृतौ तयोः क० । कृतो भुजयोर्ध्वनिर्यस्मिन् कर्म्मणि तत् कृ० । चरणानां पाताः चरणपाताः चरणपातैः निपातितानि रोधांसि यासां ताः च० । इति वृत्तार्थः ॥ ११ ॥

1. प्रचलिते० -म. इदं च पा. । 2. विनमिते -म. इदं च पा. । 3. एष पाठः म. मध्ये ।

वियति वेगपरिप्लुतमन्तरा समभिसृत्य रयेण कपिध्वजः ।
चरणयोश्चरणानमितक्षितिर्निजगृहे जयिनस्तिसृणां पुराम् ॥ १२ ॥

'विय०' व्याख्या । **कपिध्वजो**ऽर्जुनः **वियति** गगने **वेगपरिप्लुतं** वेगेनोच्छलितं यथा स्यात्तथा **अन्तरा**मध्ये **रयेण** वेगेन **समभिसृत्य** आगत्य **तिसृणां पुरां जयिनो** महादेवस्य **चरणयोर्निजगृहे** जग्राह उत्पतितस्य भगवतश्चरणौ स्वकराभ्यां गृहीतवानित्यर्थः । किं० कपिध्वजः ? **चरणानमितक्षितिः** पादन्यासेन आनमितभूमिः अथवा कपिध्वजः चरणानमितक्षितिः सन् रयेण समभिसृत्य अन्तरा मध्येमार्गं चरणयोर्निजगृहे इति योजना । अथ समासः । वेगेन परिप्लुतः वेगपरिप्लुतस्तं वे० । चरणाभ्यामानमिता क्षितिर्येन स च० । इति वृत्तार्थः ॥ १२ ॥

विस्मितः सपदि तेन कर्मणा कर्मणां क्षयकरः परः पुमान् ।
क्षेप्तुकाममवनौ तमक्लमं निष्पिपेष परिरभ्य वक्षसा ॥ १३ ॥ (र०)

'विस्मित०' व्याख्या । **परः पुमान्** महादेव**स्तम्** अर्जुनं **वक्षसा** हृदयेन **परिरभ्य** आलिङ्ग्य **निष्पिपेष** पिष्टवान् गाढमालिलिङ्गेत्यर्थः । किं० तम् ? **अक्लमं** खेदरहितं पुनः किं० तम् ? **अवनौ** भूमौ **क्षेप्तुकामम्** आस्फोटयितुकामं किं० परः पुमान् ? **तेन कर्मणा** चरणग्रहणलक्षणेन **सपदि** तत्कालं **विस्मितः** साश्चर्यः पुनः किं० पर० ? **कर्मणां क्षयकरः** जन्ममरणोच्छेदकृद् मोक्षकृदित्यर्थः। अथ समासः। क्षेप्तुं कामो यस्य स क्षेप्तुकामः तं क्षे० । न विद्यते क्लमो यस्य सोऽक्लमस्तम० । इति वृत्तार्थः ॥१३॥

तपसा तथा न मुदमस्य ययौ भगवान् यथा विपुलसत्त्वतया ।
गुणसंततेः समतिरिक्तमहो निजमेव सत्त्वमुपकारि सताम् ॥ १४ ॥ (प्रमि०)

'तप०' व्याख्या । **भगवान्** महादेवः **अस्या**ऽर्जुनस्य **तपसा** प्राग्विदितदुष्करतपसा **तथा** तेन प्रकारेण **मुदं** हर्षं **न ययौ** न प्राप तथा कथम् ? **यथा** अस्य **विपुलसत्त्वतया** बहुलसत्त्वसंपदा कृत्वा महावीरतया तथाविधलोकोत्तरकर्म्मणा वा भगवान् मुदं ययौ प्रीतो बभूवेत्यर्थः । युक्तोऽयमर्थः । **अहो** इति आश्चर्ये **सतां** सत्पुरुषाणां **निजसत्त्वमेव** स्वकीयसत्त्वगुण एव **उपकारि** उपकारकारकं भवति किं० सत्त्वम्? **गुणसंततेः** तपःसेवादिगुणसमूहात् **समतिरिक्तम्** अतिशयितम् अधिकम् । अथ समासः । विपुलं च तत्सत्त्वं च विपुलसत्त्वं तस्य भावः विपुलसत्त्वता तया वि० । गुणानां संततिः गुणसंततिस्तस्याः गु० । इति वृत्तार्थः ॥ १६ ॥

अथ हिमशुचिभस्मभूषितं शिरसि विराजितमिन्दुलेखया ।
स्ववपुरतिमनोहरं हरं तं दधतमुदीक्ष्य ननाम पाण्डवः ॥ १५ ॥ (अप०)

'अथ०' व्याख्या । **अथा**नन्तरं **पाण्डवो**ऽर्जुनः **हरं** महादेवम् **उदीक्ष्य** दृष्ट्वा **ननाम** नमश्चक्रे

किं० हरम् ? **हिमशुचिभस्मभूषितं** हिमनिर्मलभस्मना अलंकृतं पुनः किं० हरम् ? **शिरसि** मस्तके **इन्दुलेखया** चन्द्रकलया **विराजितं** शोभमानं पुनः किंकुर्वन्तं हरम् ? किरातरूपं विहाय **स्ववपुः** निजशरीरम् **अतिमनोहरं** रम्यं **दधतं** धारयन्तम् । अथ समासः । हिमवत् शुचि हिमशुचि हिमशुचि च तद्भस्म च हिमशुचिभस्म हिमशुचिभस्मना भूषितं हि० । इन्दोर्लेखा इन्दुलेखा तया इ० । इति वृत्तार्थः ॥ १५ ॥

सहशरधि निजं तथा कार्मुकं वपुरतनु तथैव संवर्मितम् ।
निहितमपि तथैव पश्यन्नसिं वृषभगतिरुपाययौ स विस्मयम् ॥ १६ ॥ (प्रमु०)

'सह०' व्याख्या । **सोऽर्जुनः विस्मयम्** आश्चर्यम् **उपाययौ** प्राप स किं० ? **वृषभगतिः** बलीवर्दगमनः स किंकुर्वन् ? **निजम्** आत्मीयं [**वपुः** शरीरं किं० व० ? **अतनु** महद् पुनः किं०व० ? **संवर्मितं** सम्यक्कवचितं] **सहशरधि** तूणीरयुक्तं **कार्मुकं** चापं **तथैव** पूर्ववदेव **पश्यन्** विलोकयन् पुनः किं० ? **तथैव निहितं** यथापूर्वमारोपितम् **असिं** खड्गम् **अपि** पश्यन् । अथ समासः । शरधिभ्यां सह वर्तमानं स० । वृषभस्य गतिरिव गतिर्यस्य स वृ० । इति वृत्तार्थः ॥ १६ ॥

सिषिचुरवनिमम्बुवाहाः शनैः सुरकुसुममियाय चित्रं दिवः ।
विमलरुचि भृशं नभो दुन्दुभेर्ध्वनिरखिलमनाहतस्यानशे ॥ १७ ॥ (प्रमु०)

'सिषि०' व्याख्या । **अम्बुवाहाः** जलदाः **अवनिं** भूमिं **शनैर्**मन्दं यथा स्यात्तथा **सिषिचुः** सिञ्चन्ति स्म वृष्टिं चक्रुरित्यर्थः । तथा **दिवो** गगनात् **चित्रं** नानाप्रकारं **सुरकुसुमं** देवपुष्पम् **इयाय** पपात अवनिम् आजगामेत्यर्थः । तथा **अनाहतस्य** अवादितस्य **दुन्दुभेर्ध्वनिः** दुन्दुभिशब्दः **अखिलं** समग्रं **नभो** गगनम् **आनशे** व्याप देवकुसुमानि भूमौ पेतुः अताडिता एव दुन्दुभयो गगने ध्वनिं चक्रुरित्यर्थः । सर्वमिदमस्य लोकहितार्थत्वादिति वेदितव्यम् । किं० नभः ? **भृशम**त्यर्थं **विमलरुचि** निर्मलकान्ति दिग्दाहादिदोषरहितमित्यर्थः । अथ समासः । अम्बूनि वहन्तीति अम्बुवाहाः । सुराणां कुसुमं सु० । विमला रुचिर्यस्य तत् वि० । न आहतोऽनाहतस्तस्य अ० । इति वृत्तार्थः ॥ १७ ॥

आसेदुषां गोत्रभिदोऽनुवृत्त्या गोपायकानां भुवनत्रयस्य ।
रोचिष्णुरत्नावलिभिर्विमानैर्द्यौराचिता तारकितेव रेजे ॥ १८ ॥ (इ०)

'आसे०' व्याख्या । **द्यौ**राकाशः **रेजे** शुशुभे किं० द्यौः ? **भुवनत्रयस्य** जगत्त्रयस्य **गोपायकानां** रक्षकानां लोकपालानां **विमानैः** स्वविमानैः **आचिता** व्याप्ता उत्प्रेक्ष्यते **तारकितेव** संजाततारकेव सनक्षत्रेवेत्यर्थः । किं० गोपायकानाम् ? **गोत्रभिदः** इन्द्रस्य **अनुवृत्त्या** अनुसरणेन अनुगामितया **आसेदुषां** समुपागतानाम् आसन्नानामित्यर्थः । किं० विमानैः ? **रोचिष्णुरत्नावलिभिः** शोभमानरत्नश्रेणिभिः । अथ समासः । गोपायन्ते ते गोपायकाः तेषां गो० । भुवनानां त्रयं भुवनत्रयम् तस्य भु० । रोचिष्णवो रत्नावलयो

येषां तानि रोचिष्णुरत्नावलीनि तैः रो० । तारका जाता यस्यां सा ता० । इति वृत्तार्थः ॥ १८ ॥

हंसा बृहन्तः सुरसद्मवाहाः संह्लादिकण्ठाभरणाः पतन्तः ।
चक्रुः प्रयत्नेन विकीर्यमाणैर्व्योम्नः परिष्वङ्गमिवाग्रपक्षैः ॥ १९ ॥ (इ०)

'हंसा०' व्याख्या । **बृहन्तो** महन्तो **हंसाः** गरुडादयः **अग्रपक्षैः** पक्षाग्रैः **पतन्तो** धावन्तः सन्तः **व्योम्नो** गगनस्य **परिष्वङ्गमालिङ्गनं चक्रुरिव** कुर्वन्ति स्मेव किं० हंसाः ? **सुरसद्मवाहाः** विमानवाहका पुनः किं० हंसाः ? **संह्लादिकण्ठाभरणाः** सशब्दग्रैवेयकघूर्घूरिकादिकाभरणाः किं० अग्रपक्षैः ? **प्रयत्नेन** यत्नेन **विकीर्यमाणैः** विक्षिप्यमाणैः विस्तार्यमाणैरित्यर्थः । अथ समासः । सुराणां सद्मानि सुरसद्मानि सुरसद्मानि वहन्तीति सु० कार्ये यण् । संह्लादीनि कण्ठाभरणानि येषां ते सं० । पक्षाणाम् अग्राणि अग्रपक्षाः तैर० । इति वृत्तार्थः ॥ १९ ॥

मुदितमधुलिहो वितानाकृती[1]ः स्रज उपरि वितत्य सान्तानिकीः ।
जलद इव निषेदिवांसं वृषे मरुदुपसुखयाम्बभूवेश्वरम् ॥ २० ॥ (प्रमु.)

'मुदि०' व्याख्या । **मरुत्** वायुः **जलद इव** मेघवत् **ईश्वरं** शिवम् **उपसुखयाम्बभूव** प्रह्लादयामास किं० ईश्वरम् ? **वृषे** बलीवर्दे **निषेदिवांसम्** उपविष्टं किंकृत्वा ? **सान्तानिकीः** संतानवृक्षसंबन्धिनीः **स्रजो** मालाः **उपरि वितत्य** विस्तार्य किं० **स्रजः** ? **मुदितमधुलिहः** हर्षितभ्रमराः पुनः किं० स्रजः ? **वितानाकृतीः** चन्द्रोदयाकाराः प्रसारिण्यः । अथ समासः । मुदिताः मधुलिहो याभिस्ताः मु० । वितानानामाकृतिर्यासां ताः वितानाकृतयः ता वि० । सान्तानानामिमाः सान्तानिक्यः ताः सा० । इति वृत्तार्थः ॥ २० ॥

कृतधृति परिवन्दितेनोच्चकैर्गणपतिभिरभिन्नरोमोद्गमैः ।
तपसि कृतफले फलज्यायसि स्तुतिरिति जगदे हरेः सूनुना ॥ २१ ॥ (प्रमु.)

'कृत०' व्याख्या । **हरेः सूनुना** अर्जुनेन **इति** वक्ष्यमाणा **स्तुतिः** स्तवनं **जगदे** गदिता कथितेत्यर्थः । किं० हरेः० ? **गणपतिभिः** नन्दिप्रभृतिभिः **कृतधृति** ससंतोषं यथा स्यात्तथा **उच्चकैः** साधु साध्विति **परिवन्दितेन** विशेषतः संस्तुतेन किं० गणैः ? **अभिन्नरोमोद्गमैः** अविरलरोमाञ्चैः **कस्मिन्** सति ? 'फलज्यायसि' **फलेन** वक्ष्यमाणेन अस्त्रलाभलक्षणेन **ज्यायसि** गुरुणि **तपसि कृतफले** भगवत्साक्षात्कारलक्षणविहितफले सति । अथ समासः । कृता धृतिर्यस्मिन् कर्मणि तत् कृ० । गणानां पतयः गणपतयः तैर्ग० । रोम्णाम् उद्गमः रोमोद्गमः अभिन्नो रोमोद्गमो येषां ते अभिन्नरोमोद्गमाः तैर० । कृतं फलं यस्य तत् कृतफलं तस्मिन् कृ० । फलेन ज्यायः फलज्यायः तस्मिन् फ० । इति वृत्तार्थः ॥२१॥

1. वितानीकृताः –म. इदं च पा० ।

शरणं भवन्तमतिकारुणिकं भव ! भक्तिगम्यमधिगम्य जनाः ।
जितमृत्यवोऽजित ! भवन्ति भये ससुरासुरस्य जगतः शरणम् ॥ २२ ॥ (प्रमि०)

'शर०' व्याख्या । अर्जुनः स्तुवन् कथमाह-हे **भव** शिव ! हे **अजित** अपराजित ! **जनाः** लोकाः **भवन्तं** त्वां **शरणं** रक्षकम् **अधिगम्य** प्राप्य साक्षात्कारं कृत्वेत्यर्थः । **जितमृत्यवो**ऽभिभूतमरणाः अमरा **भवन्ति** किं० भवन्तम् ? **अतिकारुणिकम्** अतिदयापरं पुनः किं० भवन्तम् ? **भक्तिगम्यं** भक्तिप्राप्यं भक्तिमात्रेण सुलभमित्यर्थः । किं० जनाः भवन्ति ? **ससुरासुरस्य** देवदानवसहितस्य **जगतो** विश्वस्य **भये** विपदि शरणं स्वयं रक्षकाः स्वयं रक्षितारो भवन्ति । 'शरणं गृहरक्षित्रोः' इति *विश्वः* । अथ समासः । भक्त्या गम्यः भक्तिगम्यः तं भ० । जितो मृत्युर्यैस्ते जितमृत्यवः । सुराश्च असुराश्च सुरासुराः सुरासुरैः सह वर्तमानं ससुरासुरम् तस्य स० । इति वृत्तार्थः ॥ २२ ॥

विपदेति तावदवसादकरी न च कामसंपदभिकामयते ।
न नमन्ति चैकपुरुषं पुरुषास्तव यावदीश ! न नतिः क्रियते ॥ २३ ॥ (प्रमि०)

'विप०' व्याख्या । हे **ईश** ! महादेव ! नरेण **यावत् तव** भवतः **नति**र्नमस्कारो **न क्रियते तावत् अवसादकरी** नाशकरी **विपत्** आपत् तं नरम् [**एति** प्राप्नोति **च** पुनः **कामसंपद्** इष्टसंपत्तिः] **न अभिकामयते** न वाञ्छति **पुरुषाश्च** तम् **एकं पुरुषं** कृष्णं **न नमन्ति** न वशे वर्तन्ते तावत् नानिष्टनिवृत्तिः नापीष्टप्राप्तिः भवतीत्यर्थः । यदा तु त्वां प्रणमन्ति तदैव सर्वं लभन्ते इति भावः । अथ समासः । अवसादं करोतीति अ० । कामस्य संपत् का० । इति वृत्तार्थः ॥ २३ ॥

संसेवन्ते दानशीलादि मुक्त्यै संपश्यन्तो जन्मदुःखं पुमांसः ।
निःसंगस्त्वं यत् फलस्यानतेभ्यस्तत्कारुण्यं केवलं न स्वकार्यम् ॥ २४ ॥ (शालि०)

'सं से०' व्याख्या । हे ईश ! महादेव ! **पुमांसो** जनाः **जन्मदुःखम्** उत्पत्तिक्लेशं **संपश्यन्तो** विलोकयन्तः सन्तः **मुक्त्यै** मोक्षाय **दानशीलादि संसेवन्ते** आश्रयन्ते तत् स्वकार्यमेव न तच्चित्रं फलार्थित्वादिति भावः । अथवा किं० जनाः ? दानशीलाः दानं शीलं स्वभावो निजधर्मो वा येषां ते तथा त्वामेवोद्दिश्य दानं कुर्वत इत्यर्थः । तस्माद्दानं परमं वदन्तीति भावः । हे **निःसंगस्त्वं** निःस्पृहः कर्ममलसंसर्गरहितः यत् त्वम् **आनतेभ्यः** प्रणामपरेभ्यः **फलसि** फलं ददासि **तत् केवलं** निरुपाधिकं **कारुण्यं** दयापरत्वं **न स्वकार्यं** नात्मीयप्रयोजनं तदेव चित्रं केवलं परार्थत्वादिति भावः । अथ समासः । दानं च शीलं च दानशीलं ते आदौ यस्मिन् तत् दा० । जन्मनो दुःखं ज० । करुणायाः भावः का० । स्वस्य कार्यं स्व० । इति वृत्तार्थः ॥ २४ ॥

प्राप्यते यदिह दूरमगत्वा यत्फलत्यपरलोकगताय ।
तीर्थमस्ति न भवार्णवबाह्यं सार्वकामिकमृते भवतोऽन्यत् ॥ २५ ॥ (स्वा०)

'प्राप्य०' व्याख्या । हे ईश ! **भवतः** त्वाम् **ऋते** विना तत् **तीर्थं** तारकं **नास्ति** किं० तीर्थम् ? **भवार्णवबाह्यं** संसारसागरमतीत्य विवर्तमानं मोक्षप्रदमित्यर्थः । पुनः किं० तीर्थम् ? **सार्वकामिकं** सर्वमनोरथप्रदं तत् किम् ? **यत्** तीर्थम् **इहास्मिन्** लोके **दूरम् अगत्वा** समीपे एव **प्राप्यते** स्मृतिमात्रेण सुलभमित्यर्थः । गङ्गादिकं तीर्थं न तथेतिभावः । गङ्गादिकं तीर्थं दूरं गत्वा प्राप्यते न स्मृतिमात्रेणेतिभावः । यत् त्वं तीर्थं तु स्मरणमात्रादेवेति भावः । **अपरलोकगताय** इहलोकगताय **फलति** फलं ददाति **अन्यद्** गङ्गादितीर्थं परलोकगताय फलति । सर्वेभ्यः तीर्थेभ्यस्त्वं तीर्थमधिकमित्यर्थः । अथ समासः । तरन्त्यनेनेति तीर्थम् । भव एव अर्णवः भवार्णवः बहिर्भवं बाह्यं भवार्णवात् बाह्यं भ० । सर्वे कामा यस्मात् तत् सा० । इति वृत्तार्थः ॥ २५ ॥

दृष्ट्वा दृश्यान्याचरणीयानि विधाय
प्रेक्षाकारी याति पदं मुक्तमपायैः ।
सम्यग्दृष्टिस्तस्य परं पश्यति यस्त्वां
यश्चोपास्ते साधुविधेयं स विधत्ते ॥ २६ ॥ (मत्त०)

'दृष्ट्वा०' व्याख्या । हे महादेव ! **प्रेक्षाकारी** विमृश्यकारी युक्तायुक्तविचारकः पुमान् **अपायैः** जन्ममरणादिभिः **मुक्तं** रहितं **पदं** स्थानं **याति** प्राप्नोति किंकृत्वा ? **दृश्यानि** द्रष्टव्यानि **दृष्ट्वा** प्रेक्ष्य **आचरणीयानि** कर्तव्यानि **विधाय** कृत्वा 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' (८९) [ईशा. १५] इति श्रुतेः ज्ञानक्रियाभ्यां मोक्षः इति विज्ञायेत्यर्थः । किंतु ते ज्ञानक्रिये अपि त्वद्विषय एव मुक्तिसाधनं नान्यविषय इत्याशयेनाह- **यः** पुमान् **परं त्वां पश्यति तस्य सम्यग्दृष्टिः** सम्यग् ज्ञानं **च** पुनः **यः** पुमान् **त्वाम् उपास्ते** आराधयति **सः** पुमान् **साधु विधेयं** सत्कर्म **विधत्ते** करोति यस्त्वां पश्यति स ज्ञानवान् यस्त्वाम् उपास्ते स क्रियावान् इत्यर्थः । अथ समासः । प्रेक्षा बुद्धिस्तया करोतीति प्रेक्षाकारी । साधु च तत् विधेयं च सा० । इति वृत्तार्थः ॥ २६ ॥

व्रजति शुचि पदं त्वयि प्रीतिमान्प्रतिहतमतिरेति घोरां गतिम् ।
इयमनघ ! निमित्तशक्तिः परा तव वरद ! न चित्तभेदः क्वचित् ॥ २७ ॥ (प्रमु.)

'व्रज०' व्याख्या । हे **वरद** ! अभिमतार्थद ! **त्वयि** भवति विषये **प्रीतिमान्** भक्तिमान् पुमान् **शुचि** निर्म्मलं **पदं** कैवल्यं स्थानम् अपुनरावृत्तिलक्षणं **व्रजति** प्राप्नोति गच्छतीत्यर्थः । च पुनः त्वयि विषये **प्रतिहतमतिः** दुर्मतिः त्वद्द्वेषीति यावत् पुमान् **घोरां** रौद्रां **गतिं** नरकलक्षणाम् **एति** व्रजति नरकपाती भवतीत्यर्थः । न चैतावता भवरागद्वेषकलङ्कशङ्का इत्याह- हे **अनघ** ! हे निष्पाप ! **इयमेषा परा** प्रकृष्टा **निमित्तशक्तिः** तन्निमित्तस्य कारणभूतस्य विहितस्य सतोऽसतश्च कर्म्मणः शक्तिः सामर्थ्यं वर्त्तते हे वरद ! **तव क्वचित्** कुत्रापि द्वेषिणि रागिणि वा **चित्तभेदो** बुद्धिवैषम्यं नास्ति किन्तु स्वकर्मणैव जन्तुस्तरति पतति वा त्वं तु साक्षितया द्वयोरपि सम इत्यर्थः । अथ समासः । प्रीतिरस्यास्तीति प्रीतिमान् ।

प्रतिहता मतिर्यस्य स प्र० । निमित्तस्य शक्तिः नि० । चित्तस्य भेदः चि० । इति वृत्तार्थः ॥ २७ ॥

दक्षिणां प्रणतदक्षिण ! मूर्तिं तत्त्वतः शिवकरीमविदित्वा ।
रागिणापि विहिता तव भक्त्या संस्मृतिर्भव भवत्यभवाय ॥ २८ ॥ (स्वा०)

'दक्षिण०' व्याख्या । हे **भव** ! हे **प्रणतदक्षिण** ! हे भक्तानुकम्पानिपुण ! **तव** भवतः **दक्षिणां** निपुणां **शिवकरीं** मुक्तिहेतुभूतां **मूर्तिं तत्त्वतः** सत्येन याथात्म्येन **अविदित्वा** अज्ञात्वा **रागिणापि** रागद्वेषवतापि पुंसा **भक्त्या** श्रद्धया **विहिता** कृता तव **संस्मृतिः** स्मरणम् **अभवाय** मोक्षाय **भवति** संसारनिवृत्तये भवतीत्यर्थः । तत्त्वज्ञानं विनापि भक्तिपूर्विका तव स्मृतिरेव मुक्तिनिदानमित्यर्थः । अथ समासः । प्रणतेषु दक्षिणः प्रणतदक्षिणस्तस्य संबोधनं हे प्रणतदक्षिण ! । शिवं करोतीति शिवकरी तां शि० । न विदित्वा अ० । रागोऽस्यास्तीति रागी तेन रा० । न भवोऽभवस्तस्मै अ० । इति वृत्तार्थः ॥२८॥

[1]मुक्ताः स्वशक्त्या मुनयः प्रजानां हितोपदेशैरुपकारवन्तः ।
समुच्छिनत्सि त्वमचिन्त्यधामा कर्माण्युपेतस्य दुरुत्तराणि ॥ २९ ॥ (उ.)

'मुक्ताः०' व्याख्या । हे महादेव ! **मुनयः** कृष्णद्वैपायनप्रभृतयः **स्वशक्त्या** निजसामर्थ्येन निजयोगमहिम्ना **मुक्ताः** उत्तीर्णसंसाराः मोक्षं प्राप्ताः सन्तः **प्रजानां** लोकानां **हितोपदेशैः** हितकारिवचनैः **उपकारवन्तः** उपकारपराः वर्तन्ते । हे भगवन् ! **उपेतस्य** आश्रितस्य जनस्य **दुरुत्तराणि** दुस्तराणि **कर्माणि** बन्धकानि पुण्यपापानि **समुच्छिनत्सि** उन्मूलयसि दहसीत्यर्थः । नहि ते स्वतो ज्ञानादिना मुक्तौ समर्थास्त्वदनुग्रहेण तु अनायासेन कैवल्यं प्राप्नुवन्तीति भावः । कथं दुरुच्छेदानि कर्माणि उन्मूलयितुं शक्यानीत्याह- किं० त्वम् ? **अचिन्त्यधामा** अचिन्तनीयमहिमा सर्वाण्यतीत्य वर्तित्वात् । अथ समासः । स्वेषां शक्तिः स्वशक्तिः तया स्व० । हिताश्च ते उपदेशाश्च हितोपदेशाः तैर्हि० । उपकारो विद्यते येषां ते उ० । अचिन्त्यं धाम यस्य सोऽचि० । इति वृत्तार्थः ॥ २९ ॥

संनिबद्धमपहर्तुमहार्यं भूरि दुर्गतिभयं भुवनानाम् ।
अद्भुताकृतिम[2]यीमतिमाय ! त्वं बिभर्षि करुणामय ! मायाम् ॥ ३० ॥ (स्वा.)

'संनि०' व्याख्या । हे **अतिमाय** ! मायाम् अतिक्रान्तः जन्ममरणलक्षणमायां हे **करुणामय** ! दयार्द्र ! **त्वं मायां** विग्रहग्रहणलक्षणां **बिभर्षि** धारयसि अन्येषां कर्म्मानुबन्धिविग्रहः परिग्रहः भवतस्तु परोपकारार्थो देहग्रह इत्यर्थः । किं० मायाम् ? **अद्भुताकृतिमयीम्** आश्चर्याकारमयीं विचित्ररूपामित्यर्थः । किंकर्तुम् ? **भुवनानां** जगतां **संनिबद्धं** स्वकर्मणा दृढबद्धम् अत एव **अहार्यं** हर्तुमशक्यम् अन्यैरच्छेद्यं **भूरि** प्रचुरं **दुर्गतिभयं** नरकपातभयम् **अपहर्तुं** स्फेटयितुम् । अथ समासः । दुर्गतेर्भयं दु० । अद्भुता चासावाकृतिश्च अद्भुताकृतिः तत् स्वरूपा अद्भुताकृतिमयी ताम् अ० । अतिक्रान्ता माया येन स

1. युक्ताः -म. इदं च पा. । 2. ०मिमामति० -म. ।

अतिमायस्तस्य सबोधनं हे अतिमाय । करुणा प्रचुरा यस्मिन् असौ करुणामयस्तस्य संबोधनं हे करुणामय। इति वृत्तार्थः ॥ ३० ॥

न रागि चेतः परमा विलासिता वधूः शरीरेऽपि न चास्ति मन्मथः ।
नमस्क्रिया चोषसि धातुरित्यहो निसर्गदुर्बोधमिदं तवेहितम् ॥ ३१ ॥ (वं.)

'नरा०' व्याख्या । हे ईश ! **तव चेतो** मानसं **रागि** रागयुक्तं **न** वर्तते योगित्वात् **परमा** पुन**र्विलासिता** शृङ्गारचेष्टा परमोत्कृष्टा वर्तते पुनस्तव **शरीरे** अर्धाङ्गे **वधूः** पार्वती वर्तते पुनस्तव **मन्मथः** कामः **नास्ति** तस्य भस्मीकरणात् **च** पुन**रुषसि** प्रभाते **धातुर्**ब्रह्मणः **नमस्क्रिया** नमस्कारो वर्तते तव जगद्वन्द्यस्यापीति भावः । इत्थं विरुद्धमिदमुक्तम् इति पूर्वोक्तम् । **अहो** इति आश्चर्ये **इदं** तव **इहितं** चेष्टितं **निसर्गदुर्बोधं** स्वभावेनापि दुर्ज्ञेयं ज्ञातुमशक्यं वर्तते अदृष्टपूर्वत्वात् । अथ समासः । निसर्गतः दुर्बोधं नि० । इति वृत्तार्थः ॥ ३१ ॥

तवोत्तरीयं गजचर्म साङ्गजं ज्वलन्मणिः सारशनं महानहिः ।
स्रगा[1]स्थिपङ्क्तिः शबभस्म चन्दनं कला हिमांशोश्च समं चकासति ॥ ३२ ॥ (वं.)

'तवो०' व्याख्या । हे ईश ! **गजचर्म तव** ते **उत्तरीयं** संव्यानम् उपरिवस्त्रं वर्तते किं० गजचर्म ? **साङ्गजं** सलोमकं यदन्येषां दुःस्पर्शमिति भावः । पुनः **महानहिः** शेषनागः **सारशनं** कटिसूत्रं वर्तते योऽन्येषां प्राणहर इति भावः । किं० महानहिः ? **ज्वलन्मणिः** देदीप्यमानशिरोरत्नः पुन**रस्थिपङ्क्तिः** रूण्डमाला **स्त्रक्** पुष्पदाम वर्तते । पुनः **शबभस्म** श्मसानरक्षा **चन्दनं** विलेपनं वर्तते एतद्द्वयमपि अन्येषां यदस्पर्शम् अमङ्गलं चेति भावः । **च** पुनः **हिमांशोः** चन्द्रस्य **कला** षोडशोंऽशः वर्तते एतानि तव **समं** समकालं **चकासति** शोभन्ते त्वदाश्रयवशादरम्यस्यापि रम्यतेति किमशक्यं तवेति भावः । अथ समासः । गजस्य चर्म गजचर्म । अङ्गाज्जाता अङ्गजाः तैः सह वर्तमानं साङ्गजम् । ज्वलन्मणिर्यस्य स ज्व० । अस्थ्नां पङ्क्तिः [अस्थिपङ्क्तिः] । शबानां भस्म श० । इति वृत्तार्थः ॥ ३२ ॥

अविग्रहस्याप्यतुलेन हेतुना समेतभिन्नद्वयमूर्ति तिष्ठतः ।
तवैव नान्यस्य जगत्सु वि[2]द्यते विरुद्धवेशाभरणस्य कान्तता ॥ ३३ ॥ (वं.)

'अवि०' व्याख्या । हे ईश ! **जगत्सु** लोकेषु **विरुद्धवेषाभरणस्य** विरुद्धवेषाभरणधारिणः नरनार्योर्वेषः आभरणं सर्पादि **तवैव कान्तता** रमणीयता **विद्यते** वर्तते **नान्यस्य** अत एव अचिन्त्यमहिम्नः तवेत्यर्थः । तदेव विरुद्धवेषाभरणत्वं दर्शयति । किं० तव ? **अविग्रहस्यापि** अदेहस्यापि अथवा विग्रहरहितस्यापि सर्वसुहृदोऽपीत्यर्थः । किंकुर्वतस्तव ? **अतुलेन** दुर्बोधत्वाद् सदृशेन **हेतुना** केनापि कारणेन **समेतभिन्नद्वयमूर्ति** मिलितभिन्नद्वयदेहं यथा स्यात्तथा **तिष्ठतो** वर्तमानस्य अदेहस्य देहमेव विरुद्धं तदपि नारीनरात्मकमिति किमतश्चित्रमस्तीति भावः । अथ समासः । न विद्यते विग्रहो यस्य सोऽविग्रहस्तस्य

1. ०गास्यप० -म. । 2. दृश्यते -म. इदं च पा. ।

अ० । समेता भिन्ना द्वयी मूर्तिर्यस्मिन् कर्म्मणि तत् समेतभिन्नद्वयमूर्ति । वेषश्च आभरणं च वेषाभरणे विरुद्धे वेषाभरणे यस्य स विरुद्धवेषाभरणस्तस्य वि० । इति वृत्तार्थः ॥ ३३ ॥

आत्मलाभपरिणामनिरोधैर्भूतसंघ इव न त्वमुपेतः ।
तेन सर्वभुवनातिगलोके नोपमानमसि नाप्युपमेयः ॥ ३४ ॥ (स्वा.)

'आत्म०' व्याख्या । हे ईश ! **त्वं** भवान् **भूतसंघ** इव प्राणिवृन्दमिव **आत्मलाभपरिणामनिरोधैः** जन्मजरामरणैः **न उपेतो** न युक्तोऽसि यथा प्राणिसमूहः आत्मलाभपरिणामनिरोधैः युक्तस्तथा न त्वमिति भावः । हे **सर्वभुवनातिग** ! सर्वलोकोत्तर ! **तेन** कारणेन **लोके** लोकमध्ये अयम् ईशसदृश इति **उपमानं नासि** अमुना समः शङ्कर इति **उपमेयो**ऽपि नासि न कश्चित्त्वादृशोऽस्ति त्वमपि नान्यसदृशः अनन्यसाधारणत्वात् इति भावः । अथ समासः । आत्मनो लाभः आत्मलाभः आत्मलाभश्च परिणामश्च निरोधश्च आत्मलाभपरिणामनिरोधास्तैः आत्मलाभ० । भूतानां संघः भू० । सर्वाणि च तानि भुवनानि च सर्वभुवनानि सर्वभुवनानि अति गच्छतीति सर्वभुवनातिगस्तस्य संबोधनं हे स० ! । उपमीयते येन त० । उपमातुं योग्यः उ० । इति वृत्तार्थः ॥ ३४ ॥

त्वमन्तकः स्थावरजङ्गमानां त्वया जगत् प्राणिति देव ! विश्वम् ।
त्वं योगिनां हेतुफले रुणत्सि त्वं कारणं कारण ! कारणानाम् ॥ ३५ ॥ (उ.)

'त्वम्०' व्याख्या । हे ईश ! **स्थावरजङ्गमानां** स्थावरत्रसजीवानां **त्वमन्तकः** संहर्त्तासि हे देव ! **त्वया विश्वं** समस्तं **जगत्** लोकः **प्राणिति** जीवति हे देव ! **त्वं योगिनां** यतीनां **हेतुफले** जन्मकर्मणि **रुणत्सि** आवृणोषि निवर्तयसीत्यर्थः । तेषां त्वमेव बन्धमोचक इत्यर्थः । हे **कारण** ! ईश्वर ! त्वं **कारणानां** ब्रह्मादीनां प्रजापतीनां **कारणं** सृष्टा पितासीत्यर्थः । अथवा **कारणकारणानां**[1] महाभूतानां यानि कारणानि तन्मात्राणि तानि कारणकारणानि तेषां कारणं निमित्तभूतमित्यर्थः । अथ समासः । स्थावरश्च जङ्गमाश्च स्थावरजङ्गमास्तेषां स्था० । हेतुश्च फलं च हेतुफले । इति वृत्तार्थः ॥ ३५ ॥

रक्षोभिः सुरमनुजैर्दितेः सुतैर्वा यल्लोकेष्वविकलमाप्तमाधिपत्यम् ।
पाविन्याः शरणगतार्तिहारिणे तन्माहात्म्यं भव भवते नमस्क्रियायाः ॥३६॥ (प्र.)

'रक्षो०' व्याख्या । हे **भव** ! **भवते** तुभ्यं **पाविन्याः** पवित्रकारिण्याः पापहारिण्या वा **नमस्क्रियायाः** नमस्कारस्य **तन्माहात्म्यं** सामर्थ्यं वर्तते न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिरिति भावः । किं० भवते ? **शरणागतार्तिहारिणे** शरणागतपीडाविनाशिने तत्किम् ? यत् **रक्षोभिः** राक्षसैः रावणादिभिः **सुरमनुजैः** कुबेरादिजरासङ्घादिभिः **दितेः सुतैः** दैत्यैर्वा **लोकेषु** जगत्सु **अविकलं** परिपूर्णम् **आधिपत्य**मैश्वर्यम् **आप्तं** प्राप्तं तत् भवते नमस्कारसामर्थ्यम् इत्यर्थः । अथ समासः । सुराश्च मनुजाश्च

1. म. मध्ये एवं योजना ।

सुरमनुजास्तैः सु० । पावयतीति पावनी तस्याः पाविन्याः । शरणं गताःशरणागताः तेषाम् अर्तिं हरतीत्येवंशीलः शरणागतार्तिहारी तस्मै श० । इति वृत्तार्थः ॥ ३६ ॥

अथाष्टमूर्तिषु काश्चित् स्तुवन् प्रथमं वायुमूर्त्तिमाह -

तरसा भुवनानि यो बिभर्ति ध्वनति ब्रह्म यतः परं पवित्रम् ।
परितो दुरितानि यः पुनीते शिव ! तस्मै पवनात्मने नमस्ते ॥ ३७ ॥ (माल.)

'तर०' व्याख्या । हे **शिव** ! **तस्मै पवनात्मने** वायुमूर्तये **ते** तुभ्यं **नमो** नमस्कारोऽस्तु तस्मै कस्मै ? **यः** पवनात्मा त्वं **तरसा** निजबलेन **भुवनानि** जगन्ति **बिभर्ति** धारयति पुष्णाति च डुभृज्धारण-पोषणयोरिति । **यतः** पवनात्मनः परमेश्वरात् **परं** प्रकृष्टं **पवित्रं** पावनं **ब्रह्म** वर्णात्मकं शब्दात्मकं च **ध्वनति** नदति उत्पद्यते इत्यर्थः । 'सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् संजनयति' (९०) इति वचनात् । **यः** पवनात्मा भगवान् **परितः** समन्तात् **दुरितानि** पातकानि **पुनीते** शोधयति गालयतीति यावत् । अथ समासः । पावयतीति पवन इति व्युत्पतेः पवनः आत्मा स्वरूपं यस्य स पवनात्मा तस्मै प० । इति वृत्तार्थः ॥ ३७ ॥

अथाग्निमूर्तिमाह -

भवतः स्मरतां सदासने जयिनि ब्रह्ममये निषेदुषाम् ।
दहते भवबीजसंहतिं[1] शिखिनेऽनेकशिखाय ते नमः ॥ ३८ ॥ (ए.)

'भव०' व्याख्या । हे ईश ! **अनेकशिखाय** अनेकज्वालाय **शिखिने** वह्निमूर्तये **ते** तुभ्यं **नमो** नमोऽस्तु किं० शिखिने ? **भवतः स्मरतां** त्वां ध्यायतां मुनीनां **भवबीजसंहतिं** संसारनिदानकर्मसंघातं **दहते** भस्मीकुर्वते किं० भवतः स्मरताम् ? **जयिनि** जययुक्ते सर्वोत्कृष्टे **ब्रह्ममये** तत्त्वप्रधाने **सदासने** योगासने **निषेदुषाम्** उपविष्टानां स्थितानामित्यर्थः । अथ समासः । सच्च तद् आसनं च सदासनं तस्मिन् स० । ब्रह्म प्रधानं यस्मिन् तत् ब्रह्ममयं तस्मिन् ब्र० । भवस्य बीजं भवबीजं भवबीजस्य संहतिः भवबीजसंहतिस्तां भ० । अनेका शिखा यस्य सोऽनेकशिखस्तस्मै अ० । इति वृत्तार्थः ॥ ३८ ॥

अथ जलमूर्तिमाह -

आबाधामरणभयार्चिषा चिराय प्लुष्टेभ्यः[2] शिव ! महता भवानलेन ।
निर्वाणं समुपगमेन यच्छते ते जीवानां[3] प्रभव ! नमोऽस्तु जीवनाय ॥ ३९ ॥ (प्र.)

'आबा०' व्याख्या । हे **शिव** ! हे **जीवानां प्रभव** ! हे विश्वोत्पत्तिकारक ! तेषां त्वत्प्रतिबिम्बत्वादिति भावः । **जीवनाय** जलमूर्तये **ते** तुभ्यं **नमोऽस्तु** किंकुर्वते ? **भवानलेन** संसारवह्निना **चिराय** चिरकालं **प्लुष्टेभ्यः** दग्धेभ्यः प्राणिभ्यः **समुपगमेन** सेवया **निर्वाणं** संतापशान्तिं **यच्छते** ददते किं० भवानलेन ?

1. संततिं -म. इदं च पा. । 2. ०भ्यो भव ! -म. इदं च पा. । 3. बीजानां म. इदं च पा. ।

['आबाधामरणभयार्चिषा' **आबाधा** आध्यात्मिकादिदुःखं **मरणं** पञ्चत्वं ताभ्यां **भयं** तदेव **अर्चिः** ज्वाला यस्य स तेन आ०] पुनः किं० भ० ? **महता** अविच्छिन्नत्वात् । अथ समासः । भव एव अनलो भवानलस्तेन भ० । जीवयतीति जीवनं तस्मै जीवनाय । इति वृत्तार्थः ॥ ३९ ॥

अथ व्योममूर्त्तिमाह -

यः सर्वेषामावरीता वरीयान् सर्वैः[1] शश्वन्नावृतोऽनादिनिष्ठः ।
मार्गातीतायेन्द्रियाणां नमस्तेऽविज्ञेयाय व्योमरूपाय तस्मै ॥ ४० ॥ (शालि.)

'यः स०' व्याख्या । हे ईश ! **तस्मै व्योमरूपाय** गगनात्मने **ते** तुभ्यं **नमः** नमोऽस्तु किं० ते ? **इन्द्रियाणां** चक्षुरादीनां **मार्गातीताय** विषयात् अतिक्रान्ताय अतीन्द्रियायेत्यर्थः अमूर्तत्वात् । पुनः किं० ते ? **अविज्ञेयाय** दुर्विज्ञेयाय अपरिच्छेद्याय तत्कथं ज्ञायते इत्याह- तस्मै कस्मै ? **यः सर्वेषां** पदार्थानाम् **आवरीता** आच्छादयिता किं० यः ? **वरीयान्** श्रेष्ठः पुनः किं० यः ? **सर्वै**र्भावैः **शश्वत्** निरन्तरं **नावृतः** अनाच्छादितः पुनः किं० यः ? **अनादिनिष्ठः** अविद्यमानोत्पत्तिविनाशः । अथ समासः । अतिशयेन उरुर्वरीयान् उरुशब्दस्य वरादेशः । आदिश्च निष्ठा आदिनिष्ठे न विद्येते आदिनिष्ठे यस्य सोऽनादिनिष्ठः । मार्गादतीति मार्गातीतः तस्मै मा० । इति वृत्तार्थः ॥ ४० ॥

अणीयसे विश्वविधायिने[2] नमो नमोऽन्तिकस्थाय नमो दवीयसे ।
अतीत्य वाचां मनसां च गोचरं स्थिताय ते तत्पतये नमो नमः ॥ ४१ ॥ (वं.)

'अमीय०' व्याख्या । हे ईश ! **ते** तुभ्यम् **अणीयसे** सूक्ष्मातिसूक्ष्माय परमात्मरूपत्वात् तथापि **विश्वविधायिने** जगत्स्रष्ट्रे **नमो नमो**ऽस्तु पुनः किं० तुभ्यम् ? **अन्तिकस्थाय** समीपस्थिताय अन्तर्यामित्वात् सन्निकृष्टाय परमात्मरूपेण सर्वेषां हृदयाश्रितत्वात् नमोऽस्तु । पुनः किं० तुभ्यम् ? **दवीयसे** दुर्ग्रहत्वात् दूरतराय दुर्विज्ञेयदर्शनत्वात् नमोऽस्तु । **च** पुनः **वाचां** वाणीनां **मनसां** चित्तानां **गोचरं** मार्गम् **अतीत्य** अतिक्रम्य **स्थिताय** वर्तमानाय तुभ्यं नमोऽस्तु । तथापि **तत्पतये** वा मनसां स्वामिने अध्यक्षाय तदध्यक्षैस्तैरेव न दृश्यत इति विरोधः । नमोऽस्तु नमोऽस्तु तत् कारणत्वात् विरोधाभासालंकारः । अथ समासः । अतिशयेन अणुरणीयान् तस्मै अ० । विश्वं दधातीति विश्वविधायी तस्मै वि० । अन्तिके तिष्ठतीति अन्तिकस्थः तस्मै अ० । अतिशयेन दूरो दवीयान् तस्मै द० । तेषां पतिस्तत्पतिः तस्मै त० । इति वृत्तार्थः ॥४१॥

असंविदानस्य ममेश ! संविदां तितिक्षितुं दुश्चरितं त्वमर्हसि ।
विरोध्य मोहात्पुनरभ्युपेयुषां गतिर्भवानेव दुरात्मनामपि ॥ ४२ ॥ (वं.)

'असं०' व्याख्या । हे **संविदाम् ईश** ! हे ज्ञानिनामीश ! 'ईशानः सर्वविद्यानाम्' (९१) इति श्रुतेरिति भावः । **असंविदानस्य** अज्ञानस्य **मम** मे **दुश्चरितं** युद्धदुर्वचःप्रयोगरूपं दुश्चेष्टितं **तितिक्षितुं**

1. सर्वैर्भावै -म. इदं च पा. । 2. ०रिणे -म. ।

सोढुं **त्वम् अर्हसि** योग्योऽसि हे भगवन् ! **मोहाद**ज्ञानात् **विरोध्य** अपराधं कृत्वा क्वचित् 'विरुध्य' इति पाठः तत्र अज्ञानादपराध्य **पुन**र्भूयोऽपि **अभ्युपेयुषां** पश्चात् शरणागतानां **दुरात्मनामपि** पापात्मनामपि **भवान्** त्व**मेव गतिः** शरणं वर्तसे नहि शरणागतानाम् अपराधं गणयसीत्यर्थः । अथ समासः । संवित्तेऽसौ संविदानः न संविदानोऽसंविदानस्तस्य अ० । दुर् दुष्ट आत्मा येषां ते दुरात्मानस्तेषां दु० । इति वृत्तार्थः ॥ ४२ ॥

आस्तिक्यशुद्धमवतः प्रियधर्म ! धर्मं धर्मात्मजस्य विहितापदि शत्रुवर्गे ।
संप्राप्नुयां विजयमीश ! यया समृद्ध्या तां लोक[1]नाथ ! विभुतां वितराहवेषु ॥४३॥ (व.)[१]

'आस्ति०' व्याख्या । हे **प्रियधर्म** ! हे वल्लभवृष ! हे **ईश** ! शिव ! हे **लोकनाथ** ! हे भूतनाथ ! इदं साभिप्रायं विशेषणं लोकनाथ एवाभिमतं दातुं समर्थ इति भावः । त्वम् **आहवेषु** रणेषु **तां** प्रसिद्धां **विभुताम्** अस्त्रशक्तिम् अस्त्रविषयं सामर्थ्यम् अस्त्रविद्यां च **वितर** देहि तां काम् ? **यया समृद्ध्या** अस्त्रवैभवेन **शत्रुवर्गे** वैरिवृन्दे विषये **विजयं** जयलक्ष्मीं **संप्राप्नुयां** भजेयं किं० शत्रुवर्गे ? **धर्मात्मजस्य** युधिष्ठिरस्य **विहितापदि** कृतकष्टे 'विहिता[2]गसि' इति पाठस्तत्र **विहितम् आगो**ऽपराधो येन स तस्मिन् । धर्मात्मजस्य किंकुर्वति ? 'आस्तिक्यशुद्धम्' **आस्तिक्यम्** आगमप्रमाणम् इति निश्चयस्तेन **शुद्धं** निर्मलं दोषरहितं **धर्मं** स्वधर्मं वैदिकाचारं वा **अवतो** रक्षतः पालयतः । अथ समासः । अस्तीति मतिः यस्य स आस्तिकस्तस्य भावः आस्तिक्यं तेन शुद्धम् आ० । प्रियो धर्मो यस्य स प्रियधर्मस्तस्य संबोधनं हे प्रियधर्म ! । विहिता आपत् येन स विहितापत् तस्मिन् वि० । शत्रूणां वर्गः शत्रुवर्गस्तस्मिन् श० । लोकानां नाथो लोकनाथस्तस्य संबोधनं हे लोकनाथ ! । इति वृत्तार्थः ॥ ४३ ॥

इति निगदितवन्तं सूनुमुच्चैर्मघोनः प्रणतशिरसमीशः सादरं सान्त्वयित्वा ।
ज्वलदनलपरीतं रौद्रमस्त्रं दधानं धनुरुपपदमस्मै वेदमभ्यादिदेश ॥ ४४ ॥ (मा.)

'इति०' व्याख्या । **ईशो** महादेवः **अस्मै** अर्जुनाय धनु धनुरस्य शब्द उपपद 'पूढीसै बैजेहनै'(?) इति प्राकृतं **धनुरुपपदं वेदं** धनुःशब्दोपपदं वेदं धनुर्वेदमिति यावत् **अभ्यादिदेश** दत्तवान् अध्यापयामासेत्यर्थः । परोपदेशयोग्यो धनुर्वेदो लक्ष्यते किं० वेदम् ? **रौद्रं** रुद्रदेवताकम् **अस्त्रं** पाशुपतास्त्रं **दधानं** बिभ्राणं किं० अस्त्रम् ? **ज्वलदनलपरीतं** ज्वलद्वह्निव्याप्तं किंकृत्वा ? **मघोनः सूनुम्** अर्जुनं **सादरं** सगौरवं यथा स्यात्तथा **सान्त्वयित्वा** मधुरवचनैराश्वास्य किंकुर्वन्तं मघोनः सुनुम् ? **इति** अमुना प्रकारेण **उच्चैः** प्रकटं यथा स्यात्तथा **निगदितवन्तं** भाषमाणं किं० मघो० ? **प्रणतशिरसं** नतमस्तकं चरणयोरिति शेषः । अथ समासः । प्रणतं शिरो यस्य स प्रणतशिरास्तं प्र० । ज्वलंश्चासौ अनलश्च ज्वलदनलः ज्वलदनलेन परीतं ज्व० । रुद्रस्येदं रौद्रम् । धनुरुपपदं यस्य स धनुरुपपदस्तं ध० । इति वृत्तार्थः ॥ ४४ ॥

---

1. भूतनाथ ! -म. इदं च पा. । 2. एष पाठः म. मध्ये

---

१. संप्रति वरं याचते - इत्यवतरणिका म. ।

स पिङ्गाक्षः श्रीमान्भुवनमहनीयेन महसा तनुं भीमां बिभ्रत्त्रिगुणपरिवारप्रहरणः ।
परीत्येशानं त्रिः स्तुतिभिरुपगीतं सुरगणैः सुतं पाण्डोर्वीरं जलदमिव भास्वानभिययौ ॥४५॥ (शि०)

'स पिं०' व्याख्या । **स** धनुर्वेदः **पाण्डोः सुतं वीर**मर्जुनम् **अभिययौ** प्रतिजगाम किंकृत्वा ? **ईशानं** महादेवं **त्रि**स्त्रिवारं **परीत्य** प्रदक्षिणीकृत्य किं० पाण्डोः सुतम् ? **सुरगणैः** देवसमूहैः **स्तुतिभिः** स्तवनैः **उपगीतं** स्तुतं कः कमिव ? भास्वा**निव** यथा **भास्वान्** सूर्यः **जलदं** मेघम् अभियाति तद्वदिति। किं० सः ? **पिङ्गाक्षः** पीतनयनः सूर्योऽप्येवंविधः पुनः किं० धनुर्वेदः ? **श्रीमान्** शोभावान् सूर्योऽप्येवंविधः स किंकुर्वन् ? **भुवनमहनीयेन** त्रिभुवनपुज्येन **महसा** तेजसा **भीमां** भयावहां **तनुं** देहं **बिभ्रत्** धारयन् सूर्योऽपि सकललोकवन्दनीयोजसा भयङ्करां तनुमूर्तिं बिभ्रत् । पुनः किं० सः ? **त्रिगुणपरिवारप्रहरणः** त्रिशिखाकारः त्रिशूलायुधः सूर्योऽपि सत्त्वरजस्तमोगुणत्रयपरिवाररूपायुधः । अथ समासः । पिङ्गे अक्षिणी यस्य स पिङ्गाक्षः । श्रीरस्यास्तीति श्रीमान् । भुवनेन महनीयं भुवनमहनीयं तेन भु० । त्रयो गुणाः अवयवविशेषा यस्य स त्रिगुणः त्रिगुणपरिवारं प्रहरणं यस्य स त्रिगु० । सुराणां गणाः सुरगणास्तैः सु० । इति वृत्तार्थः ॥ ४५ ॥

अथ शशधरमौलेरभ्यनुज्ञामवाप्य त्रिदशपतिपुरोगाः पूर्णकामाय तस्मै ।
अवितथफलमाशीर्वादमारोपयन्तो विजयि विविधमस्त्रं लोकपाला वितेरुः ॥४६॥ (मा०)

'अथ०' व्याख्या । **अथ** महादेववरप्रदानानन्तरं **त्रिदशपतिपुरोगाः** इन्द्रप्रभृतयो **लोकपालाः शशधरमौलेः** महादेवस्य **अभ्यनुज्ञाम्** आदेशम् **अवाप्य** प्राप्य **पूर्णकामाय** संपूर्णमनोरथाय **तस्मै** अर्जुनाय **विजयि** जयनशीलं **विविधम्** अनेकप्रकारम् **अस्त्रं** स्वं स्वमायुधं **वितेरुः** दत्तवन्तः लोकपालाः किंकुर्वन्तः ? **अवितथफलं** सफलम् **आशीर्वादम्** आशिषम् **आरोपयन्तः** प्रयुञ्जानाः । अथ समासः । शशधरो मौलौ यस्य स शशधरमौलिस्तस्य श० । त्रिदशपतिः पुरोगो येषां ते त्रि० । पूर्णः कामो यस्य स पूर्णकामः तस्मै पू० । अवितथं फलं यस्य स अवितथफलस्तम् अ० । विजयोऽस्यास्तीति वि० । इति वृत्तार्थः ॥४६॥

असंहार्य्योत्साहं जयिनमुदयं प्राप्य तरसा,
धुरं गुर्वीं वोढुं स्थितमनवसादाय जगतः ।
स्वधाम्ना लोकानां तमुपरि कृतस्थानममरा-
स्तपोलक्ष्म्या दीप्तं दिनकृतमिवोच्चैरुपजगुः ॥ ४७ ॥ (शि०)

'असं०' व्याख्या । **अमरा** देवाः **तम्** अर्जुनम् **उच्चै**रतिशयेन **उपजगुः** प्रशशंसुः साधु महाभागोऽसीति तुष्टुवुरित्यर्थः । कमिव ? दिनकृत**मिव** यथा **दिनकृतं** सूर्यं जनाः स्तुवन्ति तद्वदित्यर्थः । किं० तं सूर्यं च ? **असंहार्य्योत्साहम्** अपरिहार्योद्यमं संवरीतुमशक्योत्साहं पुनः किं० तं सूर्यं च ? **जयिनं** जयनशीलं पुनः किं० तं सूर्यं च ? **उदयं** पाशुपतास्त्रप्राप्तिलक्षणम् अभ्युदयं **प्राप्य तरसा** बलेन

जगतः लोकस्य **अनवसादाय** अखेदाय **गुर्वी** महतीं **धुरं** भारं दुष्टनिग्रहलक्षणां **वोढुं** वहनाय **स्थितं** सूर्यपक्षे **तरसा** वेगेन **उदयम्** उदयाचलं प्राप्य जगतोऽनवसादाय गुर्वीं धुरं वोढुं स्थितम् । पुनः किं० तं सूर्यं च ? **स्वधाम्ना** निजतेजसा **लोकानां** सर्वेषां जनानाम् **उपरिकृतस्थानम्** उपरिस्थितं पुनः किं० तं सूर्यं च ? **तपोलक्ष्म्या दीप्तं** तपःशोभयोज्ज्वलम् । अथ समासः । असंहार्य उत्साहो यस्य सोऽसंहार्योत्साहस्तम् अ० । जयोऽस्यास्तीति जयी तं ज० । न अवसादः अनवसादस्तस्मै अ० । स्वस्य धाम स्वधाम तेन स्व० । कृतं स्थानं येन स कृतस्थानस्तं कृ० । तपसो लक्ष्मीः तपोलक्ष्मीस्तया त० । इति वृत्तार्थः ॥ ४७ ॥

व्रज जय रिपुलोकं पादपद्मानतः सन्
गदित इति भवेन श्लाघितो देवसंघैः ।
निजगृहमथ गत्वा सादरं पाण्डुपुत्रो
धृतगुरुजयलक्ष्मीर्धर्मसूनुं ननाम ॥ ४८ ॥ (मा०)

इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यङ्के भारविकृतौ *वरप्रदानो* नामाष्टदशः सर्गोऽगमत् ॥१८॥

संवत् १७९९ वर्षे अषाढमासे कृष्णपक्षे १३ तिथौ गुरुवारे ***ऋषिमोटाह्वय***येनालेखि प्रतिरियम्।

'व्रज०' व्याख्या । **अथानन्तरं पाण्डुपुत्रो** धनञ्जयो **धर्मसूनुं** युधिष्ठिरं **सादरम्** आदरेण सह वर्तमानं **ननाम** प्रणतवान् किंकृत्वा ? **निजगृहं** स्वधाम **गत्वा** प्रविश्य किं० पाण्डुपुत्रः ? **धृतगुरुजयलक्ष्मीः** गृहीतबृहत्तरजयशोभः पुनः किं० पा० ? **इति भवेन** शिवेन **गदितः** कथितः इतीति किं० ? हे पाण्डुपुत्र ! त्वं **रिपुलोकं** सुयोधनादिकं **जय** अस्मात्सकाशात् **व्रज** गच्छ पुनः किं० पाण्डु० ? **पादपद्मानतः** ईश्वरचरणकमलनतः पुनः किं० पा० ? **सन्** साधुः पुनः किं० पा० ? **देवसंघैः** देवसमूहैः **श्लाघितः** प्रशंसितः । अथ समासः । रिपूणां लोकः रिपुलोकस्तं रि० । पादावेव पद्मे पादपद्मे पादपद्मयोरानतः पा० । देवानां संघाः देवसंघास्ध्दतैर्दे० । निजं च तत् गृहं च नि० । पाण्डोः पुत्रः पा० । जयश्च लक्ष्मीश्च जयलक्ष्म्यौ धृते गुर्व्यौ जयलक्ष्म्यौ येन स धृ० । इति वृत्तार्थः ॥ ४८ ॥

इति श्रीभट्टभारविकृतस्य किरातार्जुनीयनाम्नो महाकाव्यस्य प्रदीपिकाभिधानायां वृत्तौ '***अस्त्रलाभो***' नामाष्टादशः सर्गः समाप्तः । परिपूर्णेयं टीका ।

संवत् १७९९ वर्षे आषाढमासे कृष्णपक्षे १३ त्रयोदश्यां तिथौ गुरुवारे ऋषिमोटाह्वयेनालेखि प्रतिरियं जालोरद्रङ्गनिवासिना श्रीरस्तुतराम् ॥ श्रीः ॥

परिशिष्टम् [१] श्लोकमानयन्त्रम्

किरातार्जुनीयकाव्यस्य श्लोकमानयन्त्रम्

सर्गः	का.सं.	श्लोकाः	अक्षराणि
१	४६	६९	१४
२	५९	७८	६
३	६०	८३	–
४	३८	५७	१४
५	५२	७८	१२
६	४७	७१	४
७	४०	६७	१६
८	४८	८६	८
९	७८	९९	१४
१०	६३	९८	२४
११	८१	८२	४
१२	५४	७४	१२
१३	७१	१००	१२
१४	६५	९७	२८
१५	५३	५६	४
१६	६४	९२	८
१७	६४	८९	१२
१८	४८	६९	१५
आहत्य	१०३१	१४५१	१५

प्रदीपिकाटीकाश्लोकमानयन्त्रम्

सर्गः	श्लोकाः	अक्षराणि
१	५५३	९
२	५८३	२०
३	५७३	२०
४	४४९	२८
५	६११	३०
६	४३८	१६
७	३६६	११
८	५६१	–
९	६५७	१८
१०	५२३	१४
११	४०१	२२
१२	४१७	१०
१३	५५४	१३
१४	५४६	२८
१५	४२७	१७
१६	३७१	१६
१७	५६९	२
१८	३७३	२५
आहत्य	८९८२	११

परिशिष्टम् [२]

किरातगतश्लोकसूची

परिशिष्टम् [३]

किरातगतछन्दःसूची

अनुष्टुब् : ११-१तः ७९, १५-१तः ४६ (आहत्य ८५)

अपरवक्त्र : १८-१५

इन्द्रवज्रा : ३-३९, ४१, ४३, ४७,५०, १६-५०, १७-२, ८, १६, २४, २५, २७, २८, ४२, ५९, १८-१८, १९ (आ. १७)

उद्गता : १२-१तः ५३

उपजाति : २-५७, ३-१तः ३८, ४२, ४४, ४६, ४८, ४९, ५१, ५३, ५५, ११-८०, १५-४९, १६-४, ६तः १४, १६तः २८, ३०, ३२तः ४२, ४४, ४५, ४७तः ४९, ५१, ५३, ५४, १७-१, ३तः ७, ९तः १५, १७तः २०, २२, २३, २६, २७, २९तः ३२, ३४तः ४१, ४३तः ४५, ४८तः ५१, ४८तः ५७, १८-२९, ३५ (आ. १३७)

उपेन्द्रवज्रा : ३-४०, ५२, ५४, १५-५०, १६ १तः ३, ५, १५, २९, ३१, ३३, ४६, ५२, १७-२१, ३३, ४६, ४७, ५२, ५३, ५८ (आ. २१)

एकरूप : १८-३८

औपछन्दसिकम् : ५-१७

कुटिला : ५-३१

क्षमा : ५-१८

जलधरमाला : ५-२३

जलोद्धतगति : ५-२७

द्रुतविसम्बितम् : ५-१तः, १६, १९, ४५, ४७, ४८, १४-६४, १८ १तः १२, (आ. ३३)

पुष्पिताग्रा : १-४५, २-५८, ४-३७, ५-३२, ३८, ३९, ४४, १० १तः ६२ (आ. ६९)

प्रबोधिता : २-१तः ५६, ३-५७, ५९, १५-४७, ४८ (आ. ६०)

प्रभा : ५-२१

प्रमिताक्षरा : ५-२०, २४, २५, ६-१तः ४५, १८-१४, २२, २३ (आ. ५१)

प्रमिदुतवदना : १८-१६, १७, २०, २१, २७

प्रहर्षिणी : ५-२६, ३४, ४०, ५०, ५१, ७-१तः ३९, १२-४८, १७-६१तः ६३, १८-३६, ३९ (आ. ५०)

मत्तममयूर : १८-२६

मालभारिणी : १३-१तः ३४, १८-३७ (आ. ३५)

मालिनी	:	१-४६, ३-६०, ४-३८, ५-५२, ६-४७, ९-७८, १४-६५, १६-६२, ६३, १७-६४, १८-४४, ४६, ४८ (आ. १३)
रथोद्धता	:	५-२२, १३-३५तः ७०, १८-१३ (आ. ३८)
वंशपत्रपतित	:	५-४३
वंशस्थ	:	१-१तः ४४, ३-५६, ४-१तः ३६, ५-३५, ८-१तः ५४, १४-१तः ६३, १५-५१, ५२, १६-५५तः ६२, १७-६०, १८-३१तः ३३, ४१, ४२ (आ. २१५)
वसन्ततिलका	:	२-५९, ५-२८तः ३०, ३३, ३७, ४१, ४२, ४६, ४९, ६-४६, ७-४०, ८-५५तः, ५७, ९-७४तः ७७, ११-८१, १३-७१, १६-६४, १८-४३ (आ. २३)
शालिनी	:	५-३६, १८-२४, ४० (आ. ३)
शिखरिणी	:	१०-६३, १८-४५, ४७ (आ. ३)
स्वागता	:	९-१तः ७३, १८-२५, २८, ३०, ३४ (आ. ७७)

परिशिष्टम् [४]
किरातगतालंकारस्थापना

अलंकारों के नाम	कितनी बार प्रयुक्त हुए हैं	किन-किन सर्गों में तथा किन-किन श्लोकों में पाए जाते हैं (विशद विवरण) ।
अतिशयोक्ति	२०	द्वितीय सर्ग २४, ३१, तृतीय सर्ग २१, पञ्चम सर्ग २, १९, ४३, षष्ठ सर्ग ४२, सप्तम सर्ग ११, १२, १६, अष्टम सर्ग २०, ४६, नवम सर्ग ४, दशम सर्ग १, २४, ३४, द्वादश स० ७, त्रयोदश सर्ग १६, २१, २३
अनुप्रास	१	अष्टम सर्ग २
अनुमान	१	त्रयोदश सर्ग ३७
अपह्नुति	१	द्वादश सर्ग १५
अर्थत्रयवाचिन्	१	पंचम सर्ग ४५
अर्थापत्ति	१	सप्तम सर्ग २७
अर्धभ्रामक	१	पंचदश सर्ग २७
उत्प्रेक्षा	१०३	द्वितीय सर्ग ५४, तृतीय सर्ग १, ३, ४३, ४७, ४८, ४९, चतुर्थ सर्ग ७, ११, १३, २६, २७, ३०, ३१, पंचम सर्ग १, ३, ७, ८, १५, १७, ३०, ३२, ३४, ३५, ४८, षष्ठ सर्ग १०, ११, १२, १७, २५, २६, २७, ३३, ४१, सप्तम सर्ग ६, १४, २३, २१, अष्टम सर्ग १०, ११, २१, २६, २७, २८, ३२, ३३, ३८, ५०, ५५, नवम सर्ग १, ३, ५, ११, १२, १४, २१, २३, २६, ३२, ५३, ५५, ६९, ७२, ७४, ७५, ७६, दशम सर्ग ३, ११, २१, ३२, ३३, ४३, द्वादश सर्ग १३, १४, २४, ४५, त्रयोदश सर्ग ५, ८, २२, ३३, ३४, चतुर्दश सर्ग २९, ३०, ३२, ३३, ३४, ४८, ५०, ५३, ५४, पंचदश सर्ग ९, षोडश सर्ग ३, ३५, ३८, ४५, ४६, ६२, सप्तदश सर्ग ८, ३७, ४७, अष्टादश सर्ग १८, १९ ।

अलंकारों के नाम	कितनी बार प्रयुक्त हुए हैं	किन-किन सर्गों में तथा किन-किन श्लोकों में पाए जाते हैं (विशद विवरण) ।
उदात्त	२	प्रथम सर्ग १६, त्रयोदश सर्ग ५५ ।
उपमा	५९	प्रथम सर्ग २१, द्वितीय सर्ग ५०, तृतीय सर्ग ३२, ३६, ४३, ४६, चतुर्थ सर्ग १, ६, १५, १७, १९, २८, ३६, पंचम सर्ग १८, २६, ४१, ४६, षष्ठ सर्ग २, २३, ४०, ४७, नवम सर्ग ८, १०, १२, १४, १७, १८, २७, २९, ३२, ६३, ६७, ७८, दशम सर्ग ८, २४, ३४, ४२, एकादश सर्ग ३३, ५५, ५९, ६४, द्वादश सर्ग १७, २०, २२, त्रयोदश सर्ग १४, १५, १७, २२, २५, २८, ५३, ६६, चतुर्दश सर्ग ७, ३५, ४०, ५२, षोडश सर्ग ४६, ६०, सप्तदश सर्ग ४ ।
उर्जस्वल	२	दशम सर्ग ५१, ५७ ।
एकव्यंजन	१	पंचदश सर्ग १४
एकावली	३	प्रथम सर्ग १२, द्वितीय सर्ग ३२, दशम सर्ग १३ ।
कारणमाला	३	द्वितीय सर्ग १४, ४०, सप्तदश सर्ग १७ ।
काव्यलिंग	२५	प्रथम सर्ग ७, द्वितीय सर्ग २९, ३९, ४०, ४४, तृतीय सर्ग ४२, पंचम सर्ग २०, २३, २६, ४०, ४४, षष्ठ सर्ग १८, सप्तम सर्ग २६, अष्टम सर्ग ३, १२, १८, ४४, नवम सर्ग ५५, ५७, ६२, ६३, दशम सर्ग १५, एकादश सर्ग १, ७८, चतुर्दश सर्ग २९ ।
गोमूत्रिका बन्ध	१	पंचदश सर्ग १२ ।
तुल्ययोगिता	२	नवम सर्ग ५१, एकादश सर्ग ५४ ।
द्वयक्षर	१	पंचदश सर्ग ३८
दृष्टान्त	२	द्वितीय सर्ग ५१, पंचदश सर्ग १५ ।
निदर्शना	१४	द्वितीय सर्ग ५९, पंचम सर्ग ३९, षष्ठ सर्ग ४, सप्तम सर्ग ३, ३७, ४०, ५७, नवम सर्ग ९, दशम सर्ग २७, एकादश सर्ग १९, षोर्शदश सर्ग २१, ४१, ६२, सप्तदश सर्ग ४६ ।
परिकर	४	प्रथम सर्ग १९, षष्ठ सर्ग ४०, सप्तम सर्ग ४, एकादश सर्ग ४५ ।
परिणाम	१	चतुर्थ सर्ग २
परिवृत्ति	१	द्वितीय सर्ग १९
पर्याय	१	दशम सर्ग ४९
पर्यायोक्ति	१	पंचम सर्ग ३७

अलंकारों के नाम	कितनी बार प्रयुक्त हुए हैं	किन-किन सर्गों में तथा किन-किन श्लोकों में पाए जाते हैं (विशद विवरण) ।
पूर्णोपमा	२	प्रथम सर्ग ४६, तृतीय सर्ग ४३
प्रतिलोभ	१	पंचदश सर्ग २३
प्रतिलोमानुलोमपाद	१	पंचदश सर्ग २०
प्रेय	१	पंचम सर्ग ५१
भाविक	२	प्रथम सर्ग २९, ३३
भ्रान्तिमान	१०	पंचम सर्ग २६, ३१, ४२, षष्ठ सर्ग ८, सप्तम सर्ग २२, ३९, अष्टम सर्ग ७, दशम सर्ग ४, ४२, अष्टादश सर्ग २१
माला	१	अष्टादश सर्ग ४६
मालोपमा	३	त्रयोदश सर्ग २९, चतुर्दश सर्ग ६३, सप्तदश सर्ग ११
मीलन	२	अष्टम सर्ग ४६, ४८
यथासंख्य	२	अष्टम सर्ग ४२, पंचदश सर्ग १६
यमक	७	पंचम सर्ग १८, २०, २३, पंचदश सर्ग १, ३, १६, ३१
रसवत्	१	दशम सर्ग ५१
रूपक	१४	तृतीय सर्ग ४१, चतुर्थ सर्ग २४, पंचम सर्ग २८, षष्ठ सर्ग ४१, सप्तम सर्ग ५, ११, १५, नवम सर्ग ३, २७, ५७, ६२, दशम सर्ग ३२, चतुर्दश सर्ग १२, पंचदश सर्ग ३८
विभावना	३	पंचम सर्ग २६, अष्टम सर्ग ४०, नवम सर्ग २५
विरोध	१	दशम सर्ग १४
विरोधाभास	५	नवम सर्ग ६३, ६४, एकादश सर्ग ३५, द्वादश सर्ग १६, अष्टादश सर्ग ४१
विशेषोक्ति	१	तृतीय सर्ग ८
विषम	२	प्रथम सर्ग १
व्यतिरेक	५	पंचम सर्ग ४४, एकादश सर्ग ६३, द्वादश सर्ग १४, त्रयोदश सर्ग ५२, ५३
श्लेष	८	अष्टम सर्ग २, दशम सर्ग २४, ३४, एकादश सर्ग ५९, त्रयोदश सर्ग १४, १५, चतुर्दश सर्ग ५२, सप्तदश सर्ग २७
संशय	१	नवम सर्ग ६९
संकर	३२	चतुर्थ सर्ग ३४, पंचम सर्ग २६, षष्ठ सर्ग २, ८, ४०, ४१, सप्तम्

अलंकारों के नाम	कितनी बार प्रयुक्त हुए हैं	किन-किन सर्गों में तथा किन-किन श्लोकों में पाए जाते हैं (विशद विवरण) ।
		सर्ग २३, २५, अष्टम सर्ग ६, ११, १५, १८, ४२, नवम सर्ग ३, ५, १२, १४, २७, ३२, ५५, ५७, ६२, दशम सर्ग २४, २५, ३४, ३६, द्वादश सर्ग १४, त्रयोदश सर्ग २१, ५३, ६६, चतुर्दश सर्ग २९, षोडश सर्ग ३५
संसर्ग	१	अष्टम सर्ग २
संसृष्टि	१६	द्वितीय सर्ग ५०, तृतीय सर्ग ४६, चतुर्थ सर्ग १७, पंचम सर्ग १८, २०, २३, सप्तम सर्ग १२, अष्टम सर्ग १, ७, १०, ४६, नवम सर्ग ६३, ६४, दशम सर्ग ३२, पंचदश सर्ग १६, सप्तदश सर्ग ४६
संदेह	१२	चतुर्थ सर्ग ५, पंचम सर्ग १२, ३६, षष्ठ सर्ग १२, अष्टम सर्ग १५, ३५, ३६, ५३, नवम सर्ग ७, १५, ५२, ५४
सम	१	दशम सर्ग २५
समपरिवृत्ति	१	सप्तम सर्ग ३५
समासोक्ति	९	प्रथम सर्ग १८, तृतीय सर्ग ४४, ६०, पंचम सर्ग २७, अष्टम सर्ग ६, नवम सर्ग ५, ११, दशम सर्ग ३१, चतुर्दश सर्ग ३
समाहित	१	दशम सर्ग ५१
समुच्चय	२	पंचदश सर्ग १, षोडश सर्ग ३५

परिशिष्टम् [५]

किरातगतसुभाषितवचनामृतसंग्रहः

-: सुभाषितानि :-

प्रथमः सर्गः

१. स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः — श्लो. ५

२. व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः — श्लो. ३०

३. अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन च विद्विषा दरः — श्लो. ३३

द्वितीयः सर्गः

४. अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् — श्लो. १३

५. विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः — श्लो. १४

६. मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः ।
लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः — श्लो. १८

७. अभिमानधनस्य गत्वरैरसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला ननु लक्ष्मीः फलमानुषङ्गिकम् — श्लो. १९

८. ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मनां जनः ।
अभिभूतिभयादसूनतः सुखमुज्झन्ति न धाम मानिनः — श्लो. २०

९. किमवेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया — श्लो. २१

१०. सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः — श्लो. ३०

११. अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति — श्लो. ३१

१२. शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः — श्लो. ३२

१३. मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम् – श्लो. ३३

१४. स्पृहणीयगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः।
विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः – श्लो. ३४

१५. शिवमौपयिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम्।
विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः – श्लो. ३५

१६. अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः।
अविभिद्य निशाकृतं तमः प्रभया नांशुमताप्युदीयते – श्लो. ३६

१७. बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः।
क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसंपदः – श्लो. ३७

१८. समवृत्तिरुपैति मार्दवं समये यश्च तनोति तिग्मताम्।
अधितिष्ठति लोकमोजसा स विवस्वानिव मेदिनीपतिः – श्लो. ३८

१९. क्व चिराय परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता।
शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः – श्लो. ३९

२०. श्रुतमप्यधिगम्य ये रिपून् विनयन्ते न शरीरजन्मनः।
जनयन्त्यचिराय संपदामयशस्ते खलु चापलाश्रयम् – श्लो. ४१

२१. उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः।
अनपायि निबर्हणं द्विषां न तितिक्षासममस्ति साधनम् – श्लो. ४३

२२. असमापितकृत्यसंपदां हतवेगं विनयेन तावता।
प्रभवन्त्यभिमानशालिनां मदमुत्तम्भयितुं विभूतयः – श्लो. ४८

२३. मदमानसमुद्धतं नृपं न वियुङ्क्ते नियमेन मूढता।
अतिमूढ उदस्यते नयान्नयहीनादपरज्यते जनः – श्लो. ४९

२४. अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंततिः।
सुकरस्तरुवत्सहिष्णुना रिपुरुन्मूलयितुं महानपि – श्लो. ५०

२५. अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः।
अखिलं हि हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः – श्लो. ५१

तृतीयः सर्गः

२६. करोति योऽशेषजनातिरिक्तां संभावनामर्थवतीं क्रियाभिः।
संसत्सु जाते पुरुषाधिकारे न पूरणी तं समुपैति संख्या – श्लो. ५१

एकादशः सर्गः

२७. शरदम्बुधरच्छायागत्वर्यो यौवनश्रियः। आपातरम्या विषयाः पर्यन्तपरितापिनः – श्लो. १२

२८. अविज्ञातप्रबन्धस्य वचो वाचस्पतेरपि । व्रजत्यफलतामेव नयद्रुह इवेहितम् – श्लो. ४३

२९. अपवादादभीतस्य समस्य गुणदोषयोः । असद्वृत्तेरहो वृत्तं दुर्विभाव्यं विधेरिव – श्लो. ५६

३०. शक्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः । जन्मिनो मानहीनस्य तृणस्य च समा गतिः – श्लो. ५९

त्रयोदशः सर्गः

३१. लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्षभूतयः ।
स्वन्तमन्तविरसा जिगीषतां मित्रलाभमनु लाभसंपदः । – श्लो. ५२

३२. सावलेपमुपलिप्सिते परैरभ्युपैति विकृतिं रजस्यपि ।
प्रार्थितस्तु न महान्समीहते जीवितं किमु धनं धनायितुम् – श्लो. ५६

३३. तेन सूरिरुपकारिताधनः कर्तुमिच्छति न याचितां वृथा ।
सीदतामनुभवन्निवार्थिनां वेद यत्प्रणयभङ्गवेदनाम् – श्लो. ६०

३४. आत्मनीनमुपतिष्ठते गुणाः संभवन्ति विरमन्ति चापदः ।
इत्यनेकफलभाजि मा स्म भूदर्थिता कथमिवार्यसंगमे – श्लो. ६९

चतुर्दशः सर्गः

३५. विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती – श्लो. ३

३६. भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये ।
नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित्प्रकाशताम् – श्लो. ४

३७. स्तुवन्ति गुर्वीमभिधेयसंपदं विशुद्धिमुक्तेरपरे विपश्चितः ।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभाः सर्वमनोरमा गिरः – श्लो. ५

३८. परोऽवजानाति यदज्ञताजडस्तदुन्नतानां न विहन्ति धीरताम् ।
प्रतीतवीर्यान्वयपौरुषेषु यः करोत्यतिक्रान्तिमसौ तिरस्क्रिया – श्लो. २३

३९. यदा विगृह्णाति हतं तदा यशः करोति मैत्रीमथ दूषिता गुणाः ।
स्थितिं समीक्ष्योभयथा परीक्षकः करोत्यवज्ञोपहतं पृथग्जनम् – श्लो. २४

पञ्चदशः सर्गः

४०. आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु । व्यक्तिमायाति महतां माहात्म्यमनुकम्पया – श्लो. ४

४१. वरं कृतध्वस्तगुणादत्यन्तमगुणः पुमान् । प्रकृत्या ह्यमणिः श्रेयान्नालङ्कारश्च्युतोपलः – श्लो. १५

-: वचनामृतम् :-

प्रथमः सर्गः

१. न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥२॥

२. क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः । हितं मनोहारि च दुर्लभं वचः ॥४॥

३. अनार्यसंगमाद्वरं विरोधोऽपि समं महात्मभिः ॥८॥
४. अहो दुरन्ता बलवद्विरोधता ॥२३॥
५. विचित्ररूपाः खलु चित्तवृत्तयः ॥३७॥
६. परैरपर्यासितवीर्यसंपदां पराभवोऽप्युत्सव एव मानिनाम् ॥४१॥
७. व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥४२॥
८. अरिषु हि विजयार्थिनः क्षितीषा विदधति सोपधि संधिदूषणानि ॥४५॥

द्वितीयः सर्गः

९. वक्तृविशेषनिःस्पृहा गुणगृह्या वचने विपश्चितः ॥५॥
१०. निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ १५ ॥
११. सहते न जनोऽप्यधःक्रियां किमु लोकाधिकधाम राजकम् ॥ ४७ ॥
१२. विपदन्ता ह्यविनीत संपदः ॥५२॥

तृतीयः सर्गः

१३. वीतस्पृहाणामपि मुक्तिभाजां भवन्ति भव्येषु हि पक्षपाताः ॥१२॥
१४. बलाद्वा मोहं विधत्ते विषयाभिलाषः ॥ १३ ॥
१५. असाधुयोगा हि जयान्तरायाः प्रमाथिनीनां विपदां पदानि ॥ १४ ॥
१६. प्रकर्षतन्त्रा हि रणे जयश्रीः ॥ १७ ॥
१७. विश्वासयत्याशु सतां हि योगः ॥ ३१ ॥
१८. स क्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः ॥४८॥
१९. मात्सर्यरागोपहतात्मनां हि स्खलन्ति साधुष्वपि मानसानि ॥ ५३ ॥

चतुर्थः सर्गः

२०. सुदुर्लभे नार्हति कोऽभिनन्दितुं प्रकर्षलक्ष्मीमनुरूपसंगमे ॥ ४ ॥
२१. न हीङ्गितज्ञोऽवसरेऽवसीदति ॥ २० ॥
२२. न रम्यमाहार्यमपेक्षते गुणम् ॥ २३ ॥
२३. गुणाः प्रियत्वेऽधिकृता न संस्तवः ॥ २५ ॥

पञ्चमः सर्गः

२४. मुखरताऽवसरे हि विराजते ॥१६॥
२५. प्रायेण सत्यपि हितार्थकरे विधौ हि श्रेयांसि लब्धुमसुखानि विनान्तरायैः ॥४९॥
२६. संधत्ते भृशमरतिं हि सद्वियोगः ॥ ५१ ॥

षष्ठः सर्गः

२७. महते रुजन्नपि गुणाय महान् ॥ ७ ॥
२८. किमिवावसादकरमात्मवताम् ॥ १९ ॥

२९. कमिवेशते रमयितुं न गुणाः ॥ २४ ॥
३०. वशिनां न हि हन्ति धैर्यमनुभावगुणः ॥ २८ ॥
३१. क्व वनेचराः क्व निपुणा मतयः ॥ ३७ ॥
३२. नयवर्त्मगाः प्रभवतां हि धियः ॥ ३८ ॥
३३. क्व शरासनं क्व च विमुक्तिपथः ॥ ४४ ॥
३४. स्वयशांसि विक्रमवतामवतां न वधूष्वघानि विमृशन्ति धियः ॥ ४५ ॥
३५. संभावना ह्यधिकृतस्य तनोति तेजः ॥४६॥

सप्तमः सर्गः

३६. रम्याणां विकृतिरपि श्रियं तनोति ॥ ५ ॥
३७. युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥ १३ ॥
३८. नाल्पीयान्बहुसुकृतं हिनस्ति दोषः ॥ १५ ॥
३९. संभक्तौ किमसुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः ॥ २७ ॥
४०. सा लक्ष्मीरुपकुरुते यया परेषाम् ॥ २८ ॥

अष्टमः सर्गः

४१. यथोत्तरेच्छा हि गुणेषु कामिनः ॥ ४ ॥
४२. वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥ ३६ ॥
४३. अकृत्रिमप्रेमरसाहितैर्मनो हरन्ति रामा कृतकैरपीहितैः ॥ ४४ ॥
४४. जनस्य रूढप्रणयस्य चेतसः किमप्यमर्षोऽनुनये भृशायते ॥ ५४ ॥

नवमः सर्गः

४५. लङ्घ्यते न खलु कालनियोगः ॥ १३ ॥
४६. वस्तुमिच्छति निरापदि सर्वः ॥ १६ ॥
४७. दुःखिते मनसि सर्वमसह्यम् ॥ ३० ॥
४८. तेजसापि खलु नूनमनूनं नासहायमभियाति जयश्रीः ॥३३॥
४९. प्राप्यते गुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः ॥५८॥
५०. आत्मवर्गहितमिच्छति सर्वः ॥ ६४ ॥
५१. प्रेम पश्यति भयान्यपदेऽपि ॥ ७० ॥

दशमः सर्गः

५२. उपहितपरमप्रभावधाम्नां न हि जयिनां तपसामलङ्घ्यमस्ति ॥ ६ ॥
५३. परिजनतापि गुणाय सद्गुणानाम् ॥ ९ ॥
५४. हरति मनो मधुरा हि यौवनश्रीः ॥ १७ ॥
५५. न हि महतां सुकरः समाधिभङ्गः ॥ २३ ॥

५६. गुणमहतां महते गुणाय योगः ॥ २५ ॥
५७. चलति नयान्न जिगीषतां हि चेतः ॥ २९ ॥
५८. प्रभवति न तदा परो विजेतुं भवति जितेन्द्रियता यदात्मरक्षा ॥३५॥
५९. बलवदपि बलं मिथोविरोधि प्रभवति नैव विपक्षनिर्जयाय ॥३८॥
६०. दुरधिगमा हि गतिः प्रयोजनानाम् ॥ ४० ॥
६१. वदति हि संवृत्तिरेव कामितानि ॥ ४४ ॥
६१. ननु करुणामृदु मानसं मुनीनाम् । उपनतमवधीरयन्त्यभव्याः ॥ ५१ ॥
६३. प्रभवति मण्डयितुं वधूरनङ्गः ॥ ५९ ॥
६४. ज्वलयति महतां मनांस्यमर्षे न हि लभतेऽवसरं सुखाभिलाषः ॥ ६२ ॥

एकादशः सर्गः

६५. अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः ॥८॥
६६. सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम् ॥११॥
६७. तपस्विनो हि वसने केवलाजिनवल्कले ॥१५॥
६८. क्रोधलक्ष्म क्षमावन्तः क्वायुधं क्व तपोधनाः ॥१८॥
६९. वामशीला हि जन्तवः ॥२४॥
७०. न्यायाधारा हि साधवः ॥३०॥
७१. सुलभो हि द्विषां भङ्गो दुर्लभा सत्स्ववाच्यता ॥५३॥
७२. असन्मैत्री हि दोषाय कूलच्छायेव सेविता ॥५५॥

द्वादशः सर्गः

७३. महतां हि धैर्यमविचिन्त्यवैभवम् ॥ ३ ॥
७४. पयस्यमृतायते हि सुतपः सुकर्मणाम् ॥ ४ ॥
७५. किमिवास्ति यन्न सुकरं मनस्विभिः ॥ ६ ॥
७६. गुरुतां नयन्ति हि गुणा न संहतिः ॥ १० ॥
७७. घ्नन्ति सहजमपि भूरिभियः सममागताः सपदि वैरमापदः ॥ ४६ ॥

त्रयोदशः सर्गः

७८. विमलं कलुषीभवच्च चेतः कथयत्येव हितैषिणं रिपुं वा ॥ ६ ॥
७९. परवुद्धिषु बद्धमत्सराणां किमिव ह्यस्ति दुरात्मनामलङ्घ्यम् ॥७॥
८०. न तथा कृतवेदिनां करिष्यन् प्रियतामेति यथा कृतावदानः ॥ ३२ ॥
८१. ईप्सितस्य न भवेदुपाश्रयः कस्य निर्जितरजस्तमोगुणः ॥ ४० ॥
८२. नायुधानि दधते मुमुक्षवः ॥५४॥
८३. प्रमाद्यतां संवृणोति खलु दोषमज्ञता ॥ ६३ ॥

८४. आपदेत्युभयलोकदूषणी वर्तमानमपथे हि दुर्मतिम् ॥ ६४ ॥
८५. वारिधीनिव युगान्तवायवः क्षोभयन्त्यनिभृता गुरूनपि ॥ ६६ ॥

चतुर्दशः सर्गः

८६. सुदुर्ग्रहान्तःकरणा हि सूरयः ॥ १ ॥
८७. हिते नियोज्यः खलु भूतिमिच्छता सहार्थनाशेन नृपोऽनुजीविना ॥ ८ ॥
८८. दिशत्यपायं हि सतामतिक्रमः ॥ ९ ॥
८९. अयातपूर्वा परिवादगोचरं सतां हि वाणी गुणमेव भाषते ॥ ११ ॥
९०. न मानिता चास्ति भवन्ति च श्रियः ॥ १३ ॥
९१. व्रताभिरक्षा हि सतामलङ्क्रिया ॥ १४ ॥
९२. कथं प्रसह्याहरणैषिणां प्रियाः परावनत्या मलिनीकृताः श्रियः ॥ १८ ॥
९३. विजानतोऽपि ह्यनयस्य रौद्रतां भवत्यपाये परिमोहिनी मतिः ॥ १९ ॥
९४. न दूषितः शक्तिमतां स्वयंग्रहः ॥ २० ॥
९५. गुणार्ज्जनोच्छ्रायविरुद्धबुद्धयः प्रकृत्यमित्रा हि सतामसाधवः ॥ २१ ॥
९६. सहावकृष्टैर्महतां न संगतं भवन्ति गोमायुसखा न दन्तिनः ॥२२॥
९७. महानुभावः प्रणिहन्ति पौरुषम् ॥ ४३ ॥
९८. महोदयानामपि सङ्घवृत्तितां सहायसाध्याः प्रदिशन्ति सिद्धयः ॥ ४४ ॥
९९. अरुन्तुदत्वं महतां ह्यगोचरः ॥ ५५ ॥

पञ्चदशः सर्गः

१००. मुह्यत्येव हि कृच्छ्रेषु संभ्रमज्वलितं मनः ॥२॥
१०१. नातिपीडयितुं भग्नानिच्छन्ति हि महौजसः ॥६॥

षोडशः सर्गः

१०२. प्रच्छन्नमप्यूहयते हि चेष्टा ॥ १९ ॥
१०३. अल्पीयसोऽप्यामयतुल्यवृत्तेर्महापकाराय रिपोर्हि वृद्धिः ॥ २४ ॥
१०४. दुर्लक्ष्यचिह्ना महतां हि वृत्तिः ॥ २३ ॥
१०५. स्वामापदं प्रोज्झ्य विपत्तिमग्नं शोचन्ति सन्तो ह्युपकारिपक्षम् ॥ ४० ॥

अष्टादशः सर्गः

१०६. क इव नाम बृहन्मनसां भवेदनुकृतेरपि सत्त्ववतां क्षमः ॥३॥
१०७. गुणसंततेः समतिरिक्तमहो निजमेव सत्त्वमुपकारि सताम् ॥ १४ ॥

परिशिष्टम् [६]

किरातनिर्दिष्टाः वाणीविषयकाः विचाराः ।

द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भूभृतः।
स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे ॥ (१-३)
विहितां प्रियया मनः प्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥१॥ (२-१)
अपवर्जितविप्लवे शुचौ हृदयग्राहिणि मङ्गलास्पदे ।
विमला तव विस्तरे गिरां मतिरादर्श इवाभिदृश्यते ॥२६॥
स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥२७॥
उपपत्तिरुदाहृता बलादनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः प्रसभं वक्तुमुपक्रमेत कः ॥२८॥ (२-२६तः २८)
प्रसादरम्यमोजस्वि गरीयो लाघवान्वितम् ।
साकाङ्क्षमनुपस्कारं विष्वग्गति निराकुलम् ॥३८॥
न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे ।
अप्रकम्प्यतयान्येषामाम्नायवचनोपमम् ॥३९॥
अलङ्घ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितम् ।
औदार्यादर्थसंपत्तेः शान्तं चित्तमृषेरिवे ॥४०॥
इदमीदृग्गुणोपेतं लब्धावसरसाधनम् ।
व्याकुर्यात् कः प्रियं वाक्यं यो वक्ता नेदृगाशयः ॥४१॥ (११-३८तः ४१)
विविक्तवर्णाभरणा सुखश्रुतिः प्रसादयन्ती हृदयान्यपि द्विषाम् ।
प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ॥३॥
भवन्ति ते सभ्यतमा विपश्चितां मनोगतं वाचि निवेशयन्ति ये ।
नयन्तितेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित् प्रकाशताम् ॥४॥
स्तुषन्ति गुर्वीमभिधेयसंपदं विशुद्धिमुक्तेरपरे विपश्चितः ।
इति स्थितायां प्रतिपूरुषं रुचौ सुदुर्लभा सर्वमनोरमा गिरः ॥५॥
समस्य संपादयता गुणैरिमां त्वया समारोपितभारभारतीम् ।
प्रगल्भमात्माधुरिधुर्य वाग्मिनां वनेचरेणापि सताधिरोपितः ॥६॥ (१४-३तः ६)

परिशिष्टम् [७]

किरातगतकाव्यशास्त्रीयगुणसमीक्षणम्

-रामकृपाल त्रिपाठी

माधुर्यगुणः

किरातार्जुनीयमहाकाव्ये माधुर्यगुणस्य बाहुल्यं दृश्यते । यथा-

धूतानामभिमुखपातिभिः समीरैरायासादविशदलोचनोत्पलानाम् ।
आनिन्ये मदजनितां श्रियं वधूनामुष्णांशुद्युतिजनितः कपोलरागः ॥ ७/३ ॥

अभिमुखपातिभिः समीरैः प्रतिकूलवायुभिर्धूतानामिति दुर्निमित्तसूचनम् । आयासाद्गति-प्रयासादविशदलोचनोत्पलानां वधूनामुष्णां-शुद्युतिजनित आतपकृतः कपोलानां रागः पाटलत्वम् । मदेन जनितां श्रियम् । तत्सदृशीं श्रियमित्यर्थः । आनिन्य आनीतवान् वधूरिति शेषः । माधुर्यगुणः ।

तिष्ठद्भिः कथमपि देवतानुभावादाकृष्टैः प्रजविभिरायतं तुरङ्गैः ।
नेमीनामतिविवर्तने रथौघैरासेदे वियति विमानवत्प्रवृत्तिः ॥ ७/४ ॥

कथमपि बाढम् । देवतानामनुभावात्तिष्ठद्भिः । अपतद्भिरित्यर्थः । रथविशेषणमेतत् । प्रजविभिर्वेगवद्भिस्तुरङ्गैरायतं दूरमाकृष्टं रथौधौर्वियत्याकाशे नेमीनां चक्रधाराणाम् । विवर्तने भ्रमणेऽसति विमानवद्विमानानामिवेत्युपमा । माधुर्यगुणोऽत्र ।

संवातामुहुरनिलेन नीयमाने दिव्यस्त्रीजघनवरांशुके विवृत्तिम् ।
पर्यस्यत्पृथुमणिमेखलांशुजालं सञ्जज्ञे युतकमिवान्तरीयमूर्वोः ॥ ७/१४ ।

संवातासंवहता, वातेर्गत्यर्थाच्छतृप्रत्ययः, अनिलेन, कामिनेवेति भावः । दिव्यस्त्रीणां जघनेषु वरं श्रेष्ठं यदंशुकं तस्मिन्विवृत्तिमपसारं मुहुर्नीयमाने सति पर्यस्यत्प्रसर्पत्पृथु विशालं मणिमेखलांशुजालमूर्वोर्युतकं चल्लनाख्यमिव । अन्तरे भावमन्तरीयमर्धोंशुकम् । सञ्जज्ञे सञ्जातम् । माधुर्यगुणोऽत्र ।

यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः ।
वनं विशन्त्यो वनजायतेक्षणाः क्षणद्युतीनां दधुरेकरूपताम् ॥८/२॥

यथायथं यथास्वम्, स्वकीयमनतिक्रम्येत्यर्थः । नभश्चरैर्गन्धर्वैर्मेघैश्च सहितातस्त्प्रभाभिः स्वदीप्तिभिरुद्भासिताः शैलवीरुधो याभिस्ताः पूर्वोक्ता वनजायतेक्षणाः पद्मलोचनाः श्रियो वनं विशन्त्यः । क्षणं द्युतिर्यासां तासां क्षणद्युतीनां विद्युतामेकरूपतां समानरूपतां दधुः । महुर्द्रुमान्तराले तासां स्फुरणस्य क्षणिकत्वादिति भावः । माधुर्यगुणोऽत्र ।

निवृत्तवृत्तोरुपयोधरक्लमः प्रवृत्तनिर्ह्रादिविभूषणारवः ।
नितम्बिनीनां भृशमादधे धृतिं नभःप्रयाणादवनौ परिक्रमः ॥ ८/३ ॥

निवृत्तो गतो वृत्तस्य वर्तुलस्योरुपयोधरस्य क्लमो यस्मिन्सः । पादप्रक्षेपेषु विश्रान्तिसंभवादिति भावः। प्रवृत्तो जातो निर्ह्रादिविभषणानां नूपुरादीनामारवो यस्मिन्सः, अवनौ पृथिव्यां परिक्रमःसञ्चारो नितम्बिनीनां नभःप्रयाणाद् भृशमधिकम् । धृतिं सन्तोषमादधे । माधुर्यगुणोऽत्र ।

तनूरलक्तारुणपाणिपल्लवाः स्फुरन्नखांशूत्करमञ्जरीभृतः ।
विलासिनीबाहुलता वनालयो विलेपनामोदहृताः सिषेविरे ॥८/५॥

विलेपनामोदैर्हृता आकृष्टा वनालयो वनभृङ्गास्तनूः कृशा अलक्तैररुणाः पाणय एव पल्लवा यासां ताः स्फुरन्तो नखांशूनामुत्कराः पुञ्जा एव मञ्जर्यस्ता बिभ्रतीति तथोक्ताः । विलासिनीनां बाहव एव लतास्ताः सिषेविरे ॥ अत्रैव माधुर्यगुणोऽस्ति ।

जहीहि कोपं दयितोऽनुगम्यतां पराऽनुशेते तव चञ्चलं मनः ।
इति प्रियं कञ्चिदुपैतुमिच्छतीं पुरोऽनुनिन्ये निपुणः सखीजनः ॥८/८॥

प्रियमुपैतुं स्वयमेवानुसर्तुमिच्छतीम् । काञ्चिन्नायिकां निपुणश्चित्तज्ञः सखीजनः मा कोपं जहीहि त्यज । दयितोऽनुगम्यतामनुस्त्रियताम् । अन्यथा चञ्चलमस्थिरं तव मनः पुराऽनुशेतेऽग्रेऽनुशयिष्यते । माधुर्यगुणः ।

प्रियेऽपरा यच्छति वाचमुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया ।
समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवम् ॥८/१५॥

वाचं यच्छति ददाति । समालपतीत्यर्थः । प्रिये निबद्धदृष्टिरत एवोन्मुखी, शिथिलः श्लथ आकुलश्चलितश्च तादृशं उच्चयो नीवीबन्धो यस्याः सा । नारीकट्यंशुकग्रन्थौ नीवी स्यादुच्चयोऽप्यथ इति मार्तण्डः । अपरान्या स्त्र्यंशुकं न समादधे न बबन्ध । रागपारवश्यादिति भावः । पुष्पेषु वृथा व्यर्थमाहितमारोपितम् । अस्थाने प्रसारितम्, पाणिपल्लवं च न विवेद । प्रियासक्तचित्तत्वादिति भावः । एषा च प्रगल्भा नायिका । माधुर्यगुणोऽत्र ।

सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम् ।
स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया ॥८/१६॥

आसक्ता लतान्ताः पल्लवा भूषणं यस्य तत् । पल्लवैः सह ग्रथितमित्यर्थम् । कुसुमावसंतकं पुष्पशेखरम् । कान्तदत्तमितिभावः, सलीलं सविलासं समासजन्त्या शिरसि प्रतिदधत्या । कान्तया कश्चित्स्तनाभ्यामुपपीड्येति स्तनोपपीडम् । घनेन निबिडेन जघनेन नुनुदे नुन्नः, अंशुकातिरेकादिति भावः । एषा च प्रगल्भैव । माधुर्यगुणोऽत्र ।

कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा ।
वलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता ॥८/१७॥

विलोलनीविना गात्रोन्नमनाद्विश्लिष्टवस्त्रग्रन्थिना कलत्रभारेण श्रोणिभारेण । तथा गलत्स्रंसमानं दुकूलं याभ्यां ताभ्यां स्तनाभ्यां शालत इति तथोक्तेनोरसा तथा वलिव्यपायेन भङ्गिनिवृत्त्या स्फुटा रोमराजिर्यस्मिंस्तेन निरायतत्वादप्रसारितत्वात्ताम्यता तनूभवतोदरेण चोपलक्षितया । माधुर्यगुणोऽत्र ।

विलम्बमाना कुलकेशपाशया कयाचिदाविष्कृतबाहुमूलया ।
तरुप्रसूनान्यपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥८/१८॥

विलम्बमानो विस्त्रंसमान आकुलो विलुलितश्च केशपाशो यस्यास्तया विकृतबाहुमूलया दर्शितकक्षप्रदेशया कयाचित्कान्तया तरुप्रसूनान्यपदिश्य । प्रसूनग्रहणं व्याजीकृत्येत्यर्थः । सादरं साभिलाषं मनोधिनाथस्य प्रियस्य मनः समादद आचकृषे । सर्वाङ्गसौष्ठवदर्शनाना-त्सद्यो लग्नं प्रियमनस्तत्रेति भावः । माधुर्यगुणोऽत्र ।

व्योहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी ॥८/१९॥

उन्नतौ च पीवरौ च स्तनौ यस्याः सोन्नतपीवरस्तनी । काचिल्लोचनतः स्वनेत्रात्पुष्पजं रजः परागं मुखानिलैः फूत्कारमारुतैर्व्यपोहितुमपनेतुमपारयन्तं किलाशक्नुवन्तम् । विलेत्यलीके । वस्तुतस्तदास्य-स्पर्शलोभादपारयन्तमित्यर्थः । प्रियमुन्मना उत्सुका सत्यत एव पयोधरेणोरसि जघान । तत्कपट-परिज्ञानजन्यादौत्सुक्यादिति भावः । माधुर्यगुणोऽत्र ।

प्रवालभङ्गारूणपाणिपल्लवः परागपाण्डूकृतपीवरस्तनः ।
महीरूहः पुष्पसुगन्धिराददे वपुर्गुणोच्छ्रायमिवाङ्गनाजनः ॥८/२१॥

प्रवालभङ्गेन पल्लवलयेनारुणाः पाणिपल्लवो यस्य, तद्रसरन्जनादित्यर्थम् । परागेण पुष्परजसा पाण्डूकृतौ पीवरौ स्तनौ यस्य सः, पुष्पैः सुगन्धिः सुरभिङ्गनाजनो महीरुहो वृक्षजाताद्वपुर्गुणस्य स्वदेहगुणस्योच्छ्रायः पाणिपल्लवारुण्यादेर्य उत्कर्षस्तमाददे लब्धवानित्युत्प्रेक्षा । माधुर्यगुणोऽत्र।

वरोरुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः ।
समेऽपि यातुं चरणाननीश्वरान्मदादिव प्रस्खलतः पदे पदे ॥८/२२॥

अनुसानु सानुषु यद्वर्त्म ततः सकाशाद् गुरुणा स्वेदेन मन्थरमलसं विनिर्यतीनां निर्गच्छन्तीनां सुराङ्गनानां संबन्धिभिर्वारणहस्तपीवरैः करिकरस्थूलैः । वराश्च त ऊरवश्चेति तैः । चिराय खिन्नान् । किंच नवपल्लवानां श्रीरिव श्रीर्येषां तान् । तद्वन्मृदूनित्यर्थः । अत एव समे समस्थलेऽपि । किं पुनर्विषम इति भावः । यातुं गन्तुमनीश्वरानशक्तानत एव मदादिव पदे पदे । वीप्यासां द्विर्भावः । प्रस्खलतश्चरणान् । माधुर्यगुणोऽत्र ।

विसारिकाञ्चीमणिरश्मिलब्धया मनोहरोच्छ्रायनितम्बशोभया ।
स्थितानि जित्वा नवसैकतद्युतिं श्रमातिरिक्तैर्जघनानि गौरवैः ॥९/२३॥

विसारिभिः काञ्चीमणिरश्मिभिर्लब्धया । तज्जनितयेत्यर्थः, मनोहर उच्छ्राय उत्सेधो येषां तेषां नितम्बानां शोभया करणेन नवसैकतानां द्युतिं शोभां जित्वा स्थितानि । माधुर्यगुणोऽत्र ।

समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहितश्रीण्युपनीवि नाभिभिः ।
दधन्ति मध्येषु वलीविभङ्गिषु स्तनातिभारादुदराणि नम्रताम् ॥८/२४॥

समुच्छ्वसत्पङ्कजकोशकोमलैर्दलत्कमलमुग्धैरित्युपमा । नाभिभिः प्रतारिकाख्यै । पुल्लिङ्गतायां तु कविरेव प्रमाणम् । उपनीवि नीवीसमीपे । उपाहितश्रीणि जनितशोभानि तथा वलीविभङ्गिषूर्मिमत्सु मध्येषु जघनस्थलेषु स्तनातिभारान्नम्रतां दधन्ति बिभ्राणानि । माधुर्यगुणोऽत्र ।

प्रशान्तघर्माभिभवः शनैर्विवान् विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकरस्तरङ्गमालान्तरगोचरोऽनिलः ॥८/२८॥

प्रशान्तमघर्माभिभवः प्रशान्तोष्णबाधः । ''वा दान्तशान्त' इत्यादिना निपातनात्साधुः । शनैर्विवान् मन्दं वहन् । परिमृष्टपङ्कजः, पद्गन्धीत्यर्थः । आत्तशीकरः । तरङ्गमालानामन्तरे गोचरः स्थानं यस्य सोऽनिलो विलासिनीभ्यो भुजालम्बं ददाविवेत्युत्प्रेक्षा । विशिष्टवायुसंपर्कात्तथोच्छ्वसुरित्यर्थः । माधुर्यगुणोऽत्र ।

गतैः सहावैः कलहंसविक्रमं कलत्रभारैः पुलिनं नितम्बिभिः ।
मुखैः सरोजानि च दीर्घलोचनैः सुरस्त्रियः साम्यगुणान्निरासिरे ॥८/२९॥

सुरस्त्रियोऽप्सरसः सहावैः सविलासैर्गतिभिः । कलहंसानां विक्रमं गतिम् । विलासविधुरमिति शेषः । तथा नितम्बिभिः प्रशस्तनितम्बैः कलत्रभारैः जघनभारैः पुलिनम् । नितम्बभाराशून्यमित्यर्थम्, तथा दीर्घलोचनैमुर्खैः सरोजानि च । आलोचनानीति शेषः । साम्यगुणात् समानगुणत्वान्निरासिरे निरस्तवत्यः । गुणवदगुणयोः कुतः साम्यमिति भावः । माधुर्यगुणोऽत्र ।

शिलाघनैर्नाकसदामुरः स्थलैर्बृहन्निवेशैश्च बधूपयोधरैः ।
तटाभिनीतेन विभिन्नवीचिना रुषेव भेजे कलुषत्वमम्भसा ॥८/३२॥

शिलावद्घनैः कठिनैः । नाकसदां गन्धर्वाणामुरः स्थलैर्बृहन्निवेशैर्महासंस्थानैः । अतिस्थूलैरित्यर्थः । वधूपयोधरैश्च तटमभितो नीतेन प्रापितेनात एव विभिन्नवीचिना भग्नोर्मिणाम्भसा कर्त्रा । रुषेवेति हेतूत्प्रेक्षा । कलुषत्वमाविलत्वं मनः क्षोभश्च ध्वन्यते । भेजे, यथा कश्चिन्मृदुस्वभावः केनचित्कठिनादिना साङ्गभङ्गं ताडयित्वा निष्कासितः क्षुभ्यति तद्वदिति भावः । कलुषत्वम् इत्यत्र वाच्यप्रतीयमानयोरभेदाध्यवसायः । माधुर्यगुणोऽत्र ।

विपक्षचित्तोन्मथना नखव्रणास्तिरोहिता विभ्रममण्डनेन ये ।
हृतस्य शेषानिव कुङ्कुमस्य तान् विकत्थनीयान्दधुरन्यथा स्त्रियः ॥८/३४॥

विपक्षस्य सपत्नीजनस्य, चित्तानामुन्मथनाः । व्यथका इत्यर्थः, बहुग्रहणात्कर्तरि ल्युट् । ये नखव्रणा नखक्षतानि, विभ्रमस्य सौन्दर्यस्य मण्डनम् । तेन कुङ्कुमलेपादिना तिरोहिताश्छन्ना हृतस्य क्षालितस्य कुङ्कुमस्य व्यञ्जकत्वेन शेषानिवावशिष्टलेशानिव स्थिता-नित्युत्प्रेक्षा । विकत्थनीयान् भर्तृत्वाल्लभ्यस्य व्यञ्जकत्वेन श्लाघनीयान् । तान् नखव्रणान् । स्त्रियोऽन्यथा दधुः । प्रकाशं दधुरित्यर्थः । माधुर्यगुणोऽत्र ।

प्रियेण संग्रथ्य विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ।
स्त्रजं न काचिद्विजहौ जलाविलां वसन्ति हे प्रेम्णि गुणा न वस्तुनि ॥८/३७॥

काचित् प्रियेण संग्रथ्य स्वयमेव रचयित्वा विपक्षसंनिधौ सपत्नीजनसमक्षं पीवरस्तने वक्षस्युपाहितां स्त्रजं मालां जलाविलाम् । मृदितामपीत्यर्थः । तां न विजहौ न तत्याज । न च निर्गुणायां तत्र का प्रीतिरिति वाच्यमित्यर्थान्तरन्यासेनाह - गुणाः प्रेम्णि वसन्ति, वस्तुनि न वसन्ति हि । यत् प्रेमास्पदं तदेव गुणवत् । अन्यत्तु गुणवदपि निर्गुणमेव । प्रेम तु वस्तुपरीक्षामपेक्षत इति भावः । माधुर्यगुणोऽत्र ।

तथा न पूर्वं कृतभूषणादरः प्रियानुरागेण विलासिनीजनः ।
यथा जलार्द्रो नखमण्डनश्रिया ददाह दृष्टीश्च विपक्षयोषिताम् ॥८/४१॥

विलासिनीजनः पूर्वं जलविहारात्प्राक् प्रियानुरागेण कृतो भूषणेष्वादर आसक्तिर्येन सः, अनुरक्त-प्रियत्वात्सम्यक्प्रसाधितः सन्नपीत्यर्थः, प्रियस्यानुरागेण च विपक्षयोषितां सपत्नीनां दृष्टीश्चक्षूंषि तथा न ददाह न दुःखीचकार । यथा जलार्द्रः सन् । "नख" शब्देन नखक्षतानि लक्ष्यन्ते, तान्येव मण्डनं तस्य श्रिया, तत्कृतशोभयेत्यर्थः, विपक्षयोषितां सपत्नीनां दृष्टीश्चक्षूंषि यथा ददाह तापयामास । मण्डनान्तरादपि नखमण्डनानुरागादपि तदनुभाव एव सपत्नीनां दुःखहेतुरिति भावः । माधुर्यगुणोऽत्र ।

हृदाम्भसि व्यस्तवधूकराहते रवं मृदङ्गध्वनिधीरमुज्झति ।
मुहुः स्तनैस्तालसमं समाददे मनोरमं नृत्यमिव प्रवेपितम् ॥८/४३॥

व्यस्ताभ्यां विपर्यासिताभ्यां वधूकराभ्यामाहते । एकेन करेणोत्सारितोऽन्येन ताडित इत्यर्थः । हृदाम्भसि मृदङ्गध्वनिवद्धीरं गम्भीरं रवमुज्झति सति । तथा ध्वनति सतीत्यर्थः । मुहुः स्तनैस्तालो गीतवाद्यनृत्यानां कालपरिच्छेदः । तस्य सममनुरूपं मनोरमं नृत्यमिव प्रवेपितं प्रकम्पः । समाददे स्वीकृतम् । माधुर्यगुणोऽत्र ।

परिस्फुरन्मीन विघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम् ॥८/४५॥

परितः स्फुरद्भिर्विवर्तमानैर्मीनैर्विघट्टिता उरवो यासां ता अत एव त्रासविलोलदृष्टयो भयविकस्वरनेत्राः कम्पित-पाणिपल्लवाश्च सुराङ्गनाः सखीजनस्यापि विलोकनीयतामुपाययुः । किमुत प्रियजनस्येति भावः । माधुर्यगुणोऽत्र ।

भयादिवाश्लिष्य झषाहतेऽम्भसि प्रियं मुदानन्दयति स्म मानिनी ।
अकृत्रिमप्रेमरसाहितैर्मनो हरन्ति रामाः कृतकैरपीहितैः ॥८/४६॥

मानिनी, दुर्लभस्वयंग्रहणेति भावः। अम्भसि झले झषेण मत्स्येनाहते सति। भयादिव, वस्तुतस्तु न तथेति भावः, किन्तु मुदौत्सुक्येनैवाश्लिष्य प्रियमानन्दयति स्म। तथाहि – रामाः स्त्रियोऽकृत्रिमोऽनारोपितो यः प्रेमरसस्तेनाहितैर्जनितैः कृतकैः कृत्रिमैरपीत्यर्थः। ईहितैश्चेष्टितैर्मनो हरन्ति। आरोपितमपि भयं प्रेममूलत्वान्मनोहरं बभूवेत्यर्थः। माधुर्यगुणोऽत्र।

तिरोहितान्तानि नितान्तव्याकुलैरपां विगाहादलकैः प्रसारिभिः।
ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृन्दान्तरितैः सरोरुहैः ॥८/४७॥

अपां विगाहान्नितान्तमाकुलैर्विकीर्णैः प्रसारिभिरायतैः। अलकैः केशैः। तिरोहितान्तानि छन्नप्रान्तानि वधूनां वदनानि द्विरेफवृन्दैरन्तरितानि छन्नानि सरोरुहाणि तैः सरोरुहैस्तुल्यतां ययुः। माधुर्यगुणोऽत्र।

करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसंभ्रमा।
सखीषु निर्वाच्यमधाष्ट्र्यदूषितं प्रियाङ्गसंश्लेषमवाप मानिनी ॥८/४८॥

मानिनी पयस्यगाधे सति। किलेत्यलीके, मज्जनभयादिवेत्यर्थः, जातसंभ्रमा उत्पन्नभया, अत एव नवपल्लवाकृती करौ धुनाना कम्पयन्ती। सखीषु विषये निर्वाच्यमवाच्यम्, अनिन्द्यमित्यर्थ;धाष्ट्र्यदूषितश्च न भवतीति आधाष्ट्र्यदूषितस्तम्। वस्तुतो रागमूलमपि भयमूलत्वारोपादिति भावः, प्रियाङ्गसंश्लेषमवाप। अत्रापि माधुर्यगुणोऽस्ति।

प्रियैः सलीलं करवारिवारितः प्रवृद्धनिःश्वासविकम्पितस्तनः।
सविभ्रमाधूतकराग्रपल्लवो यथार्थतामाप विलासिनीजनः ॥८/४९॥

प्रियैः कामिभिः सलीलं करवारिभिरञ्जलिजलैर्वारितोऽवरुद्धः। सिक्त इत्यर्थः। प्रवृद्धैः संततैर्निः-श्वासैर्विकम्पितौ स्तनौ यस्य सः, सविभ्रमं सविलासमाधूतानि कराग्रपल्लवानि पाणिपल्लवानि येन सः, विलसनशीला विलासिनी। सैव जनः, यथार्थतामाप। उक्तरीत्यानेकविलासवत्तया यथार्थनामकत्वमवापेत्यर्थः। ''क्वचिद्गम्यमानार्थस्याप्रयोगः'' इति नाम्नो न प्रयोगः। यथा माघे – ''चिराय याथार्थ्यमलम्भि दिग्गजैः'' इति। क्वचित्प्रयुज्यते, यथा रघुवंशे – ''वरंतपो नाम यथार्थनामा'' इति। माधुर्यगुणोऽत्र।

उदस्य धैर्यं दयितेन सादरं प्रसादितायाः करवारिवारितम्।
मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नीवदनादिवाददे ॥८/७०॥

दयितेन धैर्यं काठिन्यम्। उदस्यापनीय। अनुनीयेत्यर्थम्। सादरं यथा तथा प्रसादितायाः सौमनस्यं गमिताया नतभ्रुवः स्त्रियः संबन्धिकरवारिभिर्वारितमवरुद्धमत एव निमीलती नयने यस्य तन्मुखं सपत्नीवदनादिव श्रियमाददे जग्राह। तदानीं तद्वदनस्य निःश्रीकत्वात्तदीयश्रीग्रहणमुत्प्रेक्ष्यते। माधुर्यगुणः।

निमीलदाकेकरलोलचक्षुषां प्रियोपकण्ठं कृतगात्रवेपथुः।
निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो नु पप्रथे ॥८/५३॥

प्रियोपकण्ठं प्रियसमीपे, अत्यन्तसंयोगे द्वितीया, निमज्जतीनां विगाहमानानामत एव निमीलन्ति निमिषन्त्याकेकराणि आकेकरवन्ति लोलानि चक्षूंषि यासां तासाम् । आकेकरलक्षणं तु नृत्यविलासे - ''दृष्टिराकेकरा किंचित्स्फुटापाङ्गे प्रसारिता । मीलितार्धपुटा लोके ताराव्यावर्तनोत्तरा ।'' इति । तासां स्त्रीणां, कृतो गात्राणां वेपथुः कम्पो येन सः श्वसितैर्निःश्वासैरुद्धतावुत्पतितौ स्तनौ येन सः । श्रमः खेदो नु मदनो नु पप्रथे प्रादुर्बभुव । निमज्जनप्रियसंनिधानरूपोभयकारणसंभवान्नेत्रमीलनगात्रकम्पनिःश्वाससाधारणाच्च संदेहः । माधुर्यगुणः ।

ओजोगुणः -

ततोऽपवादेन पताकिनीपतेश्चचाल निर्ह्रादवती महाचमूः ।
युगान्तवाताभिहतेव कुर्वती निनादमम्भोनिधिवीचिसंहतिः ॥१४/२७॥

ततः पताकिनीपतेः सेनापतेः अपवादेनादेशेन ''अपवादोऽप्यथादेशः'' इति सज्जनः । निर्ह्रादवती शब्दवती महाचमूः सेना युगान्तवातैरभिहता आन्दोलिता अत एव निनादं कुर्वती, अम्भोनिधिवीचिसंहतिरिवोर्मिसमूह इव चचाल । ओजोगुणोऽत्र ।

रणाय जैत्रः प्रदिशन्निव त्वरां तरङ्गितालम्बित केतुसंसतिः ।
पुरो बलानां सघनाम्बुशीकरः शनैः प्रतस्थे सुरभिः समीरणः ॥१४/२८॥

जेतैव जैत्रो जयनशीलः अनुकूल इत्यर्थः । तरङ्गितं संजाततरङ्गं यथा तथा, आलम्बिता अवस्थिताः केतुसंततयो येन सः घनैः सान्द्रैरम्बुशीकरैः सघनाम्बुशीकरैः सुरभिः सुगन्धः समीरणो वायू रणाय त्वरां प्रदिशन्निव त्वरयन्निव बलानां सैन्यानां पुरोऽग्रे शनैः प्रतस्थे प्रस्थितः । ओजोगुणोऽत्र ।

जयारवक्ष्वेडितनादमूर्च्छितः शरासनज्यातलवारणध्वनिः ।
असंभवन्भूधरराजकुक्षिषु प्रकम्पयन्गामवतस्तरे दिशः ॥१४/२९॥

जयारवैर्वन्दिनां जयजयेतिशब्दैः क्ष्वेडितनादैः सिंहनादैश्च मूर्च्छितो वर्धितः शरासनज्यानां धनुर्गुणानां तलवारणानां ज्याघातवारणानां च ध्वनिर्भूधरराजकुक्षिषु गिरिगुहासु असंभवन् अमान् । अवकाशमलभमान इत्यर्थः । अत एव गां भुवं प्रकम्पयन् । एतेन बलानां बाहुल्यमुक्तम् । दिशोऽवतस्तरे व्यानशे । ओजोगुणोऽत्र ।

निशातरौद्रेषु विकासतां गतैः प्रदीपयद्भिः ककुभामिवान्तरम् ।
वनेसदां हेतिषु भिन्नविग्रहैर्विपुस्फुरे रश्मिमतो मरीचिभिः ॥१४/३०॥

निशातास्तीक्ष्णा अत एव रौद्रा भीषणाश्च ये तेषु निशातरौद्रेषु । विशेष्यविशेषणयोरन्यतर-विशेष्यत्वविवक्षाया इष्टत्वाद्विशेषणसमासः । वने सीदन्तीति वनेसदां वनेचराणाम् । हेतिषु आयुधेषु, भिन्नविग्रहैः संक्रान्तमूर्तिभिरत एव विकासतां विसृत्वरतां गतैरत एव ककुभां दिशाम्, अन्तरमवकाशं प्रदीपयद्भिः, प्रज्वालयद्भिरिव स्थितेरित्युत्प्रेक्षा । रश्मिमतः सूर्यस्य मरीचिभिः करैः । ओजोगुणोऽत्र ।

उदूढवक्षः स्थगितैकदिङ्मुखो विकृष्टविस्फारितचापमण्डलः ।
वितत्य पक्षद्वयमायतं बभौ विभुर्गुणानामुपरीव मध्यगः ॥१४/३१॥

उदूढेनोन्नतेन वक्षसा स्थगितमाच्छादितमेकमेकतरं दिङ्मुखं, येन सः विकृप्टमाकृष्टमत एव विस्फारितं निर्घोषितं चापमण्डलं येन स विभुः शिवः । आयतं विस्तृतं पक्षद्वये पार्श्वद्वये वितत्य स्वममहिम्ना व्याप्य । गुणानां मध्यगो मध्यस्थोऽपि उपरि स्थित इव बभौ । सर्वोन्नतत्वात्तया लक्षित इत्यर्थः । ओजोगुणोऽत्र ।

सुगेषु दुर्गेषु च तुल्यविक्रमैर्जवादहंपूर्विकया यियासुभिः ।
गणैरविच्छेदनिरुद्धमाबभौ वनं विरुच्छ्वासमिवाकुलाकुलम् ॥१४/३२॥

सुखेन दुःखेन च गच्छन्त्येष्विति सुगेषु सुगमेषु दुर्गेषु दुर्गमेषु च । समविषमदेशेष्वित्यर्थः । तुल्यविक्रमलाघवात्समसंचारैः जवाद्वेगात्, अहंपूर्विकयाऽहमहमिकया । यियासुभिर्यातुमिच्छुभिः, गणैः प्रथमैः । अविच्छेदेन निरुद्धमत एव, आकुलाकुलमाकुलप्रकारम् । वनं निरुच्छ्वासं निरुद्धप्राणमिव, आबभौ । ओजोगुणोऽत्र ।

निषण्णमापद्प्रतिकारकारणे शरासरे धैर्य इवानपायिनी ।
अलभङ्घनीयं प्रकृतावपि स्थितं निवातनिष्कम्पमिवापगापतिम् ॥१४/३७॥

पुनश्च आपदां प्रतिकारस्य कारणे साधनेऽनपायिनि स्थिरे एवंभूते शरासने धैर्य इव निषण्णं स्थितं प्रकृतौ स्वभावे स्थितमपि । निर्विकारमपीत्यर्थः, अतएव, अलङ्घनीयमनतिक्रमणीमत एव निवातनिष्कम्पं वाताभावान्निश्चलम् । आपगापतिं समुद्रमिव स्थितम् ॥ ओजोगुणोऽत्र ।

अर्जुनम्

अनादरोपात्तधृतैकसायकं जयेऽनुकूले सुहृदीव सस्पृहम् ।
शनैरपूर्णप्रतिकारपेलवे निवेशयन्तं नयने बलोदधौ ॥१४/३६॥

पुनश्च, अनादरेणावगणनया उपात्तो निषङ्गादुद्धृतो धृतश्चैकः सायको येन तं, तथाऽनुकूले सुहृदीव जये सस्पृहम् । जयमिच्छन्तम्, पुनश्च, अपूर्णो न्यूनः प्रतिकारो बाणाहरणप्रत्यर्पणरूपो यस्य सः, अत एव पेलवो लघुस्तस्मिन् अपूर्णप्रतिकारपेलवे बलोदधौ सेनासमुद्रे शनैरसंभ्रमेण नयने दृष्टी निवेशयन्तमिति वीरस्वभावोक्तिः । बलमुदधिरिवेत्युपमितसमासः । ओजोगुणोऽत्र ।

युद्धवर्णनं यथा–

किरातसैन्यादुरुचापनोदिताः समं समुत्पेतुरुपातरंहसः ।
महावनादुन्मनसः खगा इव प्रवृत्तपत्रध्वनयः शिलीमुखाः ॥

उरुभिर्बृहद्भिरचापैर्नोदिताः प्रक्षिप्ता उपात्तरंहसः प्राप्तवेगाः प्रवृत्तपत्रध्वनयः संजातपक्षस्वनाः शिलीमुखा बाणाः । महावनादुन्मनसः क्वापि गन्तुमुत्सुकाः । तथा, उक्तविशेषणविशिष्टाश्च खगाः पक्षिण इव ।

किरातसैन्यात् समं समन्ततः समुत्पेतुः । ओजोगुणोऽत्र ।

गभीररन्ध्रेषु भृशं महीभृतः प्रतिस्वनैरुन्नमितेन सानुषु ।
धनुर्निनादेन जवादुपेयुषा विभिद्यमाना इव दध्वनुर्दिशः ॥१४/४६॥

गभीररन्ध्रेषु गम्भीरगह्वरेषु महीभृतः सानुषु ये प्रतिस्वनास्तैर्भृशमुन्नमितेनोत्थापितेन दीर्घीकृतेन जवादुपेयुषा प्राप्तवता धनुषो निनादेन दिशो विभिद्यमाना विदीर्यमाणा इव दध्वनुर्ध्वनिं चक्रुः ॥ ओजोगुणोऽत्र ।

विधूनयन्ती गहनानि भूरुहां तिरोहितोपान्तनभोदिगन्तरा ।
महीयसी वृष्टिरिवानिलेरिता रवं वितेने गणमार्गणावलिः ॥१४/४७॥

भूरुहां गहनानि वनानि, विधूनयन्ती कम्पयन्ती तिरोहतानि छादितानि उपान्तानि प्रान्तानि नभोऽन्तरिक्षं दिगन्तराणि च यया सा । गणमार्गणावलिः प्रमथशरसंहतिः । अनिलेन वायुना, ईरिता प्रेरिता, महीयसी वृष्टिरिव रवं वितेने विस्तारयामास । ओजोगुणोऽत्र ।

पतत्सु शस्त्रेषु वितत्य रोदसी समन्ततस्तस्य धनुर्दुधूषतः ।
सरोषमुल्केव पपात भीषणा बलेषु दृष्टिर्विनिपातशंसिनी ॥१४/४९॥

शस्त्रेषु रोदसी द्यावापृथिव्यौ, समन्ततो वितस्य व्याप्य पतत्सु सत्सु धनुर्दुधूषतः कम्पितुमिच्छतः । आस्फालयत इत्यर्थः । तस्यार्जुनस्य संबन्धिनी । भीषयत इति भीषणा । विनिपातशंसिनी विनाशसूचिका दृष्टिरुक्तविशेषणा उल्केव वलेषु सरोषं यथा तथा पपात । ओजोगुणोऽत्र ।

संस्कारवत्त्वाद्रमयत्सु चेतः प्रयोगशिक्षागुणभूषणेषु ।
जयं यथार्थेषु शरेषु पार्थः शब्देषु भावार्थमिवाशशंसे ॥१७/६॥

एवंभूतः पार्थः संस्कारवत्वात् संस्कारश्चित्तवासना । अन्यत्र, साधुत्वम् । असाधूनां प्रयोगनिषेधादिति भावः । अथवा संस्कारो व्युत्पत्तिस्तद्वत्वात् चेतो रमयत्सु । प्रयोगः संधानमोक्षादिः शिक्षाऽभ्यासो गुणस्तदाहितोऽतिशयो मौर्वी वा, अन्यत्र तु, प्रयोगोऽभियुक्तव्यवहारः शिक्षाभ्यासो गुणाः स्वस्वस्थानकरणादयः श्लेषप्रसादादयो वा ते भूषणं येषां तेषु । यथाभूता अर्था येषां तेषु यथार्थेषु । अन्यत्र - नियतार्थेषु । शृणन्ति हिंसन्तीति शरास्तेषु जयम् । तन्निर्वाहकत्वात्तदाधारत्वविवक्षायां सप्तमी । शब्देषु पदेषु भावः प्रवृत्तिनिमित्तं सामान्यादिः स एव अर्थस्तमिव । आशशंसे आचकाङ्क्षे । शास्तिशंसत्योराङ्पूर्वयोरिच्छायामात्मनेपदमुपसंख्यानात् । यथा शाब्दिकाः शब्दैरर्थं साधयन्ति तद्वदयं शरैर्जयं साधयितुमियेषेत्यर्थः ।

भूयः समाधानविवृद्धतेजा नैवं पुरा युद्धमिति व्यथावान् ।
स निर्ववामास्त्रममर्षनुन्नं विषं महानाग इवेक्षणाभ्याम् ॥१७/७॥

भूयः पुनरपि समाधानेन युद्धाय मनोव्यवस्थापनेन विवृद्धतेजाः प्रवृद्धप्रतापः पुरा पुरातनं युद्धमेवमित्थं

शक्तिसादकरं नाभवत्, इति हेतोर्व्यथावान् परितापवान् सोऽर्जुन ईक्षणाभ्यां दृष्टिभ्यां महानागो महासर्पो विषमिवामर्षनुन्नं क्रोधोत्थापितम् । अस्रमश्रु निर्ववाम निर्जगार । ओजोगुणोऽत्र ।

क्रोधान्धकारान्तरितो रणाय भ्रूभेदरेखाः सबभार तिस्रः ।
घनोपरुद्धः प्रभवाय वृष्टेरूर्ध्वांशुराजीरिव तिग्मरशिमः ॥१७/९॥

क्रोधोऽन्धकार इव तेनान्तरित आवृतः सोऽर्जुनो घनोपरुद्धो मेघावृत्तस्तिग्मरश्मी रविर्वृष्टेः प्रभवाय वर्षणाय तिस्र ऊर्ध्वांशूनां राजीरिव । आर्कस्योर्ध्वंशुरेखोदये वृष्टिलिङ्गमित्यागमः । रणाय रणप्रवृत्तये तिस्रस्त्रिसंख्यः भ्रूभेदो भ्रूभङ्गस्तस्य रेखा बाभार ॥ ओजोगुणोऽत्र ।

स प्रध्वनय्याम्बुदनादि चापं हस्तेन दिङ्नाग इवाद्रिश्रृङ्गम् ।
बलानि शंभोरिषुभिस्तताप चेतांसि चिन्ताभिरिवाशरीरः ॥१७/१०॥

सोऽर्जुनोऽम्बुदवन्नदतीति अम्बुदनादि । चापं दिङ्नागो दिग्गजोऽद्रिश्रृङ्गमिव हस्तेन करेण प्रध्वनय्य ध्वनयित्वा शम्भोर्बलानि सैन्यानि । अशरीरोऽनङ्गः कामश्चेतांसि युवमनांसि चिन्ताभिः प्रयोजनध्यानैरिव । इषुभिस्तताप तापयामास । तपतिः सकर्मकः । अत्र ''इषु'' शब्दः स्त्रीलिङ्गः । अन्यथोपमानोपमेय-योर्भिन्नलिङ्गतादोषात् । ओजोगुणोऽत्र ।

स सायकान्साध्वसविप्लुतानां क्षिपन्परेषामतिसौष्ठवेन ।
शशीव दोषावृतलोचनानां विभिद्यमानः पृथगावभासे ॥१७/२१॥

अतिसौष्ठवेनातिलाघवेन सायकान् शरान् क्षिपन् सोऽर्जुनः साध्वसेन विप्लुतानां भ्रान्तानां परेषां द्विषां दोषेण काचकामलादिरोगेण आवृतलोचनानां दुष्टचक्षुषां शशीव पृथग्विभिद्यमान आबभासे । यथा सदोष चक्षुषैकश्चन्द्रो नानेव लक्ष्यते तद्वदेवकोऽप्यनेक इव इष्ट इति भावः । ओजोगुणोऽत्र ।

क्षोभेण तेनाऽथ गणाधिपानां भेदं ययावाकृतिरीश्वरस्य ।
तरङ्गकम्पेन महाह्रदानां छायामयस्येव दिनस्य कर्त्तुः ॥१७/२२॥

अथ गणाधिपानां संबन्धिना तेन क्षोभेण कम्पेन । ईश्वरस्याकृतिराकारो मूर्तिः । महाह्रदानां तरङ्गकम्पेन छायामयस्य प्रतिबिम्बरूपस्य दिनस्य कर्तुर्दिवाकरस्याकृतिरिव भेदं विकारं ययौ प्राप । स्वयं निर्विकारोऽपि प्रतिमासूर्यवत् परसंसर्गात्तथा प्रतीयत इत्यर्थः । ओजोगुणोऽत्र ।

मुनेर्विचित्रैरिषुभिः स भूयान्निन्ये वशं भूतपतेर्बलौघः ।
सहात्मलाभेन समुत्पतद्भिर्जातिस्वभावैरिव जीवलोकः ॥१७/१९॥

मुनेर्विचित्रैरिषुभिः स भूयान् असंख्यो भूतपतेर्बलौघ आत्मलाभेन जन्मना सह समुत्पतद्भिरा-विर्भवद्भिः । आजन्मसिद्धैरित्यर्थः । जातयो गोत्वमनुष्यत्वादयः, स्वभावा जातिनियता धर्मास्तैः जातिस्वभावैर्जीवलोकः प्राणिजातमिव वशं निन्ये नीतः । प्राणिनो जातिधर्मानिव गणा मुनिशरान्नातिक्रमितुं

शेकुरित्यर्थम्। ओजोगुणोऽत्र।

विस्फार्यमाणस्य ततो भुजाभ्यां भूतानि भर्त्रा धनुरन्तकस्य।
भिन्नाकृतिं ज्यां ददृशुः स्फुरन्तीं क्रुद्धस्य जिह्वामिव तक्षकस्य ॥१७/२४॥

ततोऽनन्तरं भूतानि भर्त्रा भूतपतिना। विस्फार्यमाणस्याकृष्यमाणस्य धनुरन्तक इव तस्य धनुरन्तकस्य संबन्धिनीं स्फुरन्तीं चलन्तीमत एव भिन्ना द्विधेव दृश्यमानाऽऽकृतिर्यस्यास्तां ज्यां धनुर्गुणं क्रुद्धस्य तक्षकस्य नागविशेषस्य जिह्वामिव ददृशुः, द्विधाभावाद्भयंकरत्वाच्चेति भावः। ओजोगुणोऽत्र।

बाणच्छिदस्ते विशिखाः स्मरारेरवाङ्मुखीभूतफलाः पतन्तः।
अखण्डितं पाण्डवसायकेभ्यः कृतस्य सद्यः प्रतिकारमापुः ॥१७/३०॥

बाणच्छिदः पार्थशरच्छेदिनस्ते स्मरारेर्विशिखा अवाङ्मुखीभूतफला विमुखाग्रा विफलाश्च सन्तः पतन्तः पाण्डवसायकेभ्यः। पाण्डवसायकानां कृतस्य फलभङ्गरूपस्य स्वकर्मणः सद्योऽखण्डितप्रतिकारमापुः। अत्युत्कटं कर्म सद्यो दर्शयतीति भावः। ओजोगुणोऽत्र।

चित्रीयमाणानतिलाघवेन प्रमाथिनस्तान्भवमार्गणानाम्।
समाकुलाया निचखान दूरं बाणान्ध्वजिन्या हृदयेष्वरातिः ॥१७/३१॥

अरातिरर्जुनः। अतिलाघवेनातिशीघ्रत्वात् चित्रीयमाणांश्चित्रमाश्चर्यं कुर्वाणान्। भवमार्गणानां प्रमाथिनः खण्डयतः तान् बाणान्। समाकुलायाः संक्षुभितायाः ध्वजिन्याः सेनाया हृदयेषु दूरं गाढं निचखान निखातवान्। ओजोगुणोऽत्र।

तस्यातियत्नादतिरिच्यमाने पराक्रमेऽन्योन्यविशेषणेन।
हन्ता पुरां भूरि पृषत्कवर्षं निरास नैदाघ इवाम्बु मेघः ॥१७/३२॥

तस्यार्जुनस्य पराक्रमेऽतियत्नाद्धेतोः, अन्योन्यस्य विशेषणेनातिशयकरणेन। अतिरिच्यमान उत्कृष्यमाणे सति पुरां हन्ता त्रिपुरविजयी हरो भूरि प्रभूतं पृषत्कवर्षं वाणवर्षम्। निदाघे भवो नैदाघो मेघोऽम्बुवाहोऽम्बु जलमिव निरास मुमोच "निदाघ" ग्रहणं वर्षणस्यातितीव्रत्व-द्योतनार्थम्। ओजोगुणोऽत्र।

अस्त्रैः समानामतिरेकिणीं वा पश्यन्निषूणामपि तस्य शक्तिम्।
विषादवक्तव्यबलः प्रमाथी स्वमाललम्बे बलमिन्दुमौलिः ॥१७/३४॥

अस्त्रैः स्वायुधैः समानां तुल्याम्। अतिरेकिणीं ततोऽधिकां वा तस्य मुनेः। इषूणामपि शक्तिं पश्यन् विषादेनोत्साहभङ्गेन वक्तव्यानि निर्वाच्यानि बलानि सैन्यानि यस्य स प्रमाथी शत्रुमर्दन इन्दुमौलिर्महादेवः स्वं बलमात्मीयं महिमानम्। आललम्बे स्वसामर्थ्यमवलम्बितवान्। ओजोगुणोऽत्र।

बभार शून्याकृतिरर्जुनस्तौ महेषुधी वीतमहेषुजालौ।
युगान्तसंशुष्कजलौ विजिह्मः पूर्वापरौ लोक इवाम्बुराशी ॥१७/३९॥

शून्याकृतिरिष्टनाशान्निस्तेजकस्करूपोऽर्जुनः । तौ वीतमहेषुजालौ वीतानि गतानि महेषुजालानि यथोस्तौ महेषुधी महानिषङ्गौ विजिह्मः शून्यो लोको युगान्ते संशुष्कजलौ । ''शुषः कः'' इति निष्ठातकारस्य ककारः । पूर्वापरावम्बुराशी समुद्राविव बभार । ओजोगुणोऽत्र ।

प्रसादगुणः-

कान्तानां कृतपुलकः स्तनाङ्गरागे वक्त्रेषु च्युततिलकेषु मौक्तिकाभः ।
सम्पेदे श्रमसलिलोद्गमो विभूषां रम्याणां विकृतिरपि श्रियं तनोति ॥७/५॥

कान्तानां स्तनानामङ्गरागे कृतपुलको जनितोद्भेदः । कृतरोमाञ्चः इत्यर्थः । च्युताः प्रमृष्टास्तिलका येषां तेषु वक्त्रेषु मौक्तिकाभः श्रमसलिलोद्गमः स्वेदोद्भेदो विभूषां भूषणं सम्पेदे सम्पन्नः । तथाहि । रम्याणां स्वभावसुन्दराणां विकृतिरपि श्रियं तनोति । अतः स्वेदस्यापि विभूषणत्वमुपपद्यत इति भावः । प्रसादगुणोऽत्र ।

रामाणामवजितमाल्यसौकुमार्ये सम्प्राप्ते वपुषि सहत्वमातपस्य ।
गन्धर्वैरधिगतविस्मयैः प्रतीये कल्याणी विधिषु विचित्रता विधातुः ॥७/७॥

मालैव माल्यं तस्य सौकुमार्यमवजितं येन तस्मिन्, कुसुमादपि सुकुमार इत्यर्थः । रामाणां वपुष्यातपस्य, सहत इति सहः क्षमः पचाद्यच् । तस्य भावः सहत्वम्, तत्सम्प्राप्ते सत्यधिगतविस्मयैः सम्प्राप्ताश्चर्यैर्गन्धर्वैर्विधातुविधिषु सृष्टिषु कल्याणी साधीयसी । उपकारकत्वादिति भावः । विचित्रता नानाविधत्व प्रतीयेऽवगता ज्ञाता । प्रसादगुणोऽत्र ।

सिन्दूरैः कृतरुचयः सहेमकक्ष्याः स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः ।
सादृश्यं ययुररुणांशुरागभिन्नैर्वर्षद्भिः स्फुरितशतह्रदैः पयोदैः ॥७/८॥

सिन्दूरैर्नागसम्भवाख्यै रागद्रव्यैः । सिन्दूरं नागसम्भवम्'' कृतरुचयः, अलङ्कृता इत्यर्थः । सह हेम्नः कक्ष्याभिर्मध्येभबन्धनैः सहेमकक्ष्याः । स्रोतोभिः सप्तभिर्मदनाडीभिः, करात्कटाभ्यां ''मेढ्राच्च नेत्राभ्यां च मदच्युतिः'' इति पालकाख्ये । करान्नासारन्ध्राभ्यामित्यर्थः । मदं क्षरन्तो वर्षन्तस्त्रिदशगजा अरुणस्या-र्कस्यांशूनां रागेणारुणेन भिन्नैः संसृष्टैर्वर्षद्भिः स्फुरितशतह्रदैः स्फुरिततडित्कैः पयोदैः सादृश्यं ययुरिति । प्रसादगुणोऽत्र ।

अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यन्तादहिममयूखण्डलस्य ।
आशानामुपरिचितामिवैकवेणीं रम्योर्मित्रिदशनदीं ययुर्बलानि ॥७/९॥

बलानि सैन्यान्यत्यर्थं दुरुपसदाद् दुःसहादहिममयूखमण्डलस्य सूर्यबिम्बस्य पर्यन्तात्समीपाद् दूरमुपेत्यागत्याशानामुपरचितां गुम्फितामेकवेणीमिव स्थितामिवेत्युत्प्रेक्षा । रम्या ऊर्मयस्तरङ्गा भङ्ग्यश्च यस्यास्तां त्रिदशनदीं मन्दाकिनीं ययुः प्रापुः ॥ प्रसादगुणोऽत्र ।

आमत्तभ्रमरकुलाकुलानि धुन्वन्नुद्धूतग्रथितरजांसि पङ्कजानि ।
कान्तानां गगननदीतरङ्गशीतः सन्तापं विरमयति स्म मातरिश्वा ॥७/१०॥

आमत्तैर्भ्रमरकुलैराकुलान्युद्धूतान्युत्थापितानि ग्रथितान्यन्योन्यसम्बद्धानि च रजांसि येषु तानि पङ्कजानि धुन्वन्कम्पयन् । सुरभिरित्यर्थः । गगननदीतरङ्गैः शीतो मातरिश्वा वायुः, कान्तानां सन्तापं विरमयति स्म शमयामास । मातर्यन्तरिक्षे श्वयतीति मातर्या श्वयतीति वेति नैरुक्ताः ॥ प्रसादगुणोऽत्र ।

तप्तानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरकरिणां घनाः क्षरन्तः ।
युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपि प्रवृत्तिः ॥७/१३॥

विषाणभिन्ना गजदन्तक्षताः । अतएव क्षरन्तः, स्रवन्तो घनास्तप्तानां सुरकरिणां प्रह्लादमुपदधिरे चक्रिरे । तथाहि, परोपकारे युक्तानामासक्तानां महतां सतां रुजत्स्वपि पीडयत्स्वपि विषये कल्याणी हितकारिणी खलु प्रवृत्तिर्व्यापारो भवतीत्यर्थः । प्रसादगुणोऽत्र ।

यातस्य ग्रथिततरङ्गसैकताभे विच्छेदं विपयसि वारिवाहजाले ।
आतेनुस्त्रिदशवधूजनाङ्गभाजां संधानं सुरधनुषः प्रभामणीनाम् ॥७/१६॥

ग्रथिततरङ्गं बद्धोर्मियत्सैकतं तस्याभेवाभा यस्य तस्मिन्विगतानि पयांसि यस्मात्तस्मिन्विपयसि निर्जले । वारिवाहजाले मेघवृन्दे विच्छेदं त्रुटिं यातस्य सुरधनुष इन्द्रचापस्य त्रिदशवधूजनाङ्गभाजां मणीनाम् । तरङ्गसङ्गिविभूषामणीनामित्यर्थः । प्रभाः कान्तयः सन्धानमातेनु-श्चक्रुः । प्रसादगुणोऽत्र ।

क्लान्तोऽपि त्रिदशवधूजनः पुरस्ताल्लीनाहिश्वसितविलोलपल्लवानाम् ॥
सेव्यानां हतविनयैरिवावृतानां सम्पर्कं परिहरति स्म चन्दनानाम् ॥७/२९॥

क्लान्तोऽपि त्रिदशवधूजनः पुरस्तादग्रे लीनानां संश्रितानामहीनां श्वसितैर्निश्वासैर्विलोलाः पल्लवा येषां तेषां चन्दनानां सम्पर्कं हतविनयैर्दुर्जनैः खलैरावृतानां संवृतानां सेव्यानां प्रभूणां सम्पर्कमिव परिहरति स्म । दुष्टवद्दुष्टसंसृष्टा गुणाढ्या अपि त्याज्या इति भावः ॥ प्रसादगुणोऽत्र ।

प्रस्थानश्रमजनितां विहाय निद्रामामुक्ते गणपतिना सदानपङ्के ।
शय्यान्ते कुलमलिनां क्षणं विलीनं संरभच्युतमिवशृङ्खलं चकाशे ॥७/३५॥

गजपतिना प्रस्थानश्रमेणगमनक्लेशेन जनितां निद्रां विहायामुक्तेऽत एव सदानपङ्के गजमदयुक्ते शय्यान्ते शयनीयप्रदेशे क्षणं विलीनं लग्नमलिनां कुलं संरम्भेणोत्थानसम्भ्रमेण च्युतं भ्रष्टं शृङ्खलं निगडमिवेत्युत्प्रेक्षा । प्रसादगुणोऽत्र ।

सरोजपत्रे नु विलीनषट्पदे विलोलदृष्टेः स्विदमू विलोचने ।
शिरोरुहाः स्विन्नतपक्ष्मसंततेर्द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥८/३५॥

अमू पुरोवर्तिनी विलीनषट्पदे संसक्तभृङ्गे, लीनालिकत्वमक्ष्णोरर्थसिद्धमित्युपमानं विशिष्यते, सरोजपत्रे

नु, यद्वा विलोलदृष्टेश्चञ्चला-क्ष्याविलोचने स्वित् "नु स्वत्" शब्दौ वितर्के, किञ्च, नतपक्ष्मसंततेश्चञ्चलाक्ष्याः शिरोरुहाः स्विन्निशब्दं नीरवं च तन्निश्चलं च तद् द्विरेफवृन्दं च नु । प्रसादगुणोऽत्र ।

अगूढहासस्फुटदन्तकेसरं मुखं स्विदेतद्विकसन्नु पङ्कजम् ।
इति प्रलीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः ॥८/३६॥

किंच, अगूढहासो व्यक्तस्मितं तेन स्फुटा दन्ताः केसरा इव दन्तकेसरा यस्य तन्मुखं स्वित् । यद्वा - विकसत्पङ्कजं नु । इतीत्यर्थः । संशयेनेति शेषः, नलिनोवने प्रलीनां निगूढां सखीं योषितः सुचिरेणातिविलम्ब्य । विकल्पादाम्प्रत्ययः, अत्र युग्मे निश्चयान्तसंदेहालङ्कारः । प्रसादगुणोऽत्र ।

असंशयं न्यस्तमुपान्तरक्तां यदेव रोद्धुं रमणीभिरञ्जनम् ।
हृतेऽपि तस्मिन्सलिलेन शुक्लतां निरास रागो नयनेषु न श्रियम् ॥८/३८॥

स्त्रीणां नेत्रशोभार्थमञ्जनधारणमम्बुविहारोपगमाद्रक्तवर्णत्वं चाक्ष्णां ततः शुक्लत्वतिरोधानं च निश्चितमित्युत्प्रेक्ष्यते - रमणीभिर्यदञ्जनं न्यस्तम् । तदञ्जनमुपान्तयोरक्ततां रोद्धुं प्रतिबद्धुमेव न्यस्तम्, नतु शोभार्थमित्यर्थः । अन्यथा रागाभिव्याप्त्या शुक्लत्वतिरोधानं स्यादित्यर्थः । असंशयमित्युत्प्रेक्षाव्यञ्जकम्, संशस्याप्यभावः, नात्र संशयोऽस्तीत्यर्थः । अर्थाभावेऽव्ययीभावः, कुत एतदिति चेद्यतस्तस्मिन्नञ्जने सलिलेन हृते क्षालिते सत्यपि रागः पूर्वोक्त एवोपान्तरक्तता किन्तु प्रतिबन्धाभावादभितो व्यासेत्याशयः । नयनेषु शुक्लतां निरास निरस्तवान् । श्रियं शोभां तु न निरास, अतः शुक्लत्वविरोधिरागनिरोधार्थमेवेदमञ्जनं स्यात् न तु शोभार्थम् । तस्यास्तदभावेऽपि सद्भावादित्यर्थः । अञ्जनापगमेऽपि तन्नयनानां राग एवालङ्कारोऽभूदिति भावः । अत्राञ्जनन्यासमनूद्य तस्य शोभार्थत्वनिषेधेन रागरोधार्थत्वोत्प्रेक्षणमुदितम् । उत्तरार्धे तस्यैव समर्थनात् । एवमुपान्तरक्ततां रोद्धुं यदञ्जनं न्यस्तमित्येकान्वये विध्यनुवादविरोधः । स्यात् । प्रसादगुणोऽत्र ।

द्युतिं वहन्तो वनितावतंसका हृताः प्रलोभादिव वेगिभिर्जलैः ।
उपप्लुतास्तत्क्षणशोचनीयतां च्युताधिकाराः सचिवा इवाययुः ॥८/३९॥

द्युतिं शोभां तेजश्च वहन्तो वेगिभिर्जविभिर्जलैरज्ञैश्च । डलयोरभेदात् । "जलं गोवकले नीरे ह्रीबेरे च जडेऽन्यवत्" इति विश्वः । प्रलोभान्मोहात् । हृता गृहीता उपप्लुता मृदिताः । यद्वा-प्लवमाना इत्यर्थः । अन्यत्रधनग्रहणबन्धनादिना पीडिता वनितावतंसकाश्च्युताधिकारा भ्रष्टाधिकराः सचिवा इव तत्क्षणं शोचनीयतामाययुः प्रापुः ॥ प्रसादगुणोऽत्र ।

विपत्रलेखा निरलक्तकाधरा निरञ्जनाक्षीरपि बिभ्रतीः श्रियम् ।
निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मण्डनम् ॥८/४०॥

विगताः पत्रलेखास्तिलकविशेषा यासां ता विपत्रलेखाः । निरलक्तकाः क्षालितरागा अधरा यासां ताः । निरञ्जनान्यक्षीणि यासां ता निरञ्जनाक्षीरपि । तथापि श्रियं बिभ्रतीः शोभाकारणाभावेऽपि शोभमाना इति । रामा निरीक्ष्य नभस्थैर्गन्धर्वैस्तासां वपुषैव मण्डनमलंकृतम् । न तुमण्डनेन तद्वपुरित्यक्षरार्थः । इति

बुबुधे ज्ञातम्। स्वभावरमणीयानां किमलङ्करणैरिति भावः। प्रसादगुणोऽत्र।

वनेचरस्यापि तस्य शिष्टाचारवेदित्वम् अकार्पण्यं च वर्णयति-

कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः।

न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥१/३॥

आदौ कृतनमस्कारस्य, पश्चात् शत्रुणा दुर्योधनेन वशीकृतां पृथिवीं राज्ञे युधिष्ठिराय विज्ञापयिष्यतः वेनेचरस्य हृदयं न विचलितं बभूव। यतः स्वामिहितार्थिनो जनाः मिथ्याभूतं प्रीतिकरं वचनं कथयितुं न अभिलषन्ति। असौ वनेचरः आगत्य प्रथमं युधिष्ठिरं प्रणनाम। ततः शत्रुणा दुर्योधनेन सर्वं राज्यं सुशासनेन स्वायत्तीकृतमित्यप्रियं वक्तुमुद्यतस्यापि तस्य मनो दुःखितं न बभूव। यतः स्वामिनो हितार्थिनो ये भवन्ति, ते केवलं मनस्तुष्ट्यै मिथ्याप्रियं वचनं वक्तुं नेच्छन्ति॥ प्रसादगुणोऽत्र।

प्रथमं तावद् अप्रियनिवेदकमात्मानं प्रति अक्षोभं याचते-

क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः।

अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥१/४॥

हे नृप ! क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैः। चारादिभिरित्यर्थः। चरन्तीति चराः पचाद्यच्। चरेः पचाद्यजन्तात्प्रज्ञादित्वादण्प्रत्ययः। त एव चक्षुर्येषा ते चारचक्षुषः। "स्वपरमण्डले कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपतीनाम्" इति नीतिवाक्यामृते। प्रभवो निग्राहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः। सत्यमेव वक्तव्या इत्यर्थः। चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इतिभावः। अतोऽप्रतार्यत्वाद्धेतोः। असाध्वप्रियं साधु प्रियं वा मदुक्तमिति शेषः। क्षन्तुं सोढुमर्हसि कुतः हितं पथ्यं मनोहारि प्रियं च वचो दुर्लभम्। अतो मद्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः। प्रसादगुणोऽत्र। यतश्चरा एव राज्ञां चक्षुस्वरूपाः, अतश्चरैः मिथ्यावचनैः राजानो न प्रतारणीयाः तस्मादहं सर्वं सत्यमेव ते कथयामि। तथाकथनेन यदि मेऽपराधो भविष्यति, स त्वया क्षन्तव्यः।

स किं सखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किं प्रभुः।

सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येु च सर्वसंपदः ॥१/५॥

यः सखा अमात्यादिः अधिपं साधु न उपदिशति। स कुत्सितः सखा, दुर्मन्त्रीत्यर्थः। प्रभुः हितवादिनः अमात्यात् हितवचनं न शृणोति स कुत्सितः। स्वामी यतः राजसु मन्त्रिषु परस्परानुरक्तेषु सत्सु सर्वाः सम्पत्तयः सर्वदा अनुरागं कुर्वन्ति। यो मन्त्री राजानं हितं नोपदिशतिं स दुर्मन्त्री। यश्च राजा मन्त्रिणो हितवचनं न शृणोति स कुराजः। राजानो मन्त्रिणश्च यदि परस्परमनुक्ताः भवेयुः, तदा राज्यसम्पत् चिरं तिष्ठेत्। अतो मया हितवचनं वक्तव्यं, त्वयापि प्रसन्नमनसा तत् श्रोतव्यमिति। प्रसादगुणोऽत्र।

निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः।

तवानुभावोऽयमवेदि यन्मया निगूढतत्वं नयवर्त्म विद्विषाम् ॥१/६॥

निसर्गेण स्वभावेन, दुर्बोधं बोद्धुमशक्ये राज्ञां कार्यं कुत्र अस्ति अज्ञानोपहताः मादृशाः पामरजनाश्च कुत्र सन्ति, स्वभावदुर्बोधं राजचरितं अज्ञजनैर्ज्ञातुं न शक्यते इति भावः, तथापि संवृतयाथार्थ्यं भवतः शत्रूणां राज्ञां नीतिमार्गः सन्धिविग्रहयानादिषड्गुणप्रयोगः, ज्ञातम्, इदं वेदनं प्रभावः, तवैव प्रभावेण अज्ञानेनापि मया सर्वं विद्वच्चरितं ज्ञातिमित्यर्थः । यद्यपि मादृशैरज्ञजनैः कुटिला राजनीतिः ज्ञातुमशक्या, तथापि तव प्रभावेणैव मया सा ज्ञाता । प्रसादगुणोऽत्र ।

विशङ्कमानो भवतः पराभवं नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते नयेन जेतुं जगतीं सुयोधनः ॥१/७॥

दुर्योधनः राजासनमधिष्ठितः सन् वनस्थात्, राज्यच्युतात् इत्यर्थः त्वतः पराजयं उत्प्रेक्षमाणः दुरोदरस्य द्यूतस्य छद्मना छलेन जिताम् लब्धां महीं नीत्या वशीकर्तुं चेष्टते । दुर्योधनो नृपासनमधिकुर्वन् वनवासिनोऽपि महाविक्रमशालिनो भवतः पराजयमाशङ्कमानः द्यूतक्रीडया छलेन जितामपि महीम् प्रकृतीनामनुरन्जनेन चिरं वशीकर्तुं नीतिशास्त्रानुसारिणीं वृत्तिमवलम्बते । प्रसादगुणोऽत्र ।

तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः ।
समुन्नयन्भूतिमनार्यसगामाद् वरं विरोधोऽपि समं महात्मभिः ॥१/८॥

तथापि साशङ्कोऽपि, जिह्मो वक्रो, वञ्चक इति यावत् । स दुर्योधनो भवज्जिगीषया । गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः । हेतौ, इति तृतीया गुणसम्पदा दयादानदाक्षिण्यादिगुणगरिम्णा करणेन शुभ्रं यशस्तनोति । स खलो गुणलोभनीयां त्वत्संपदमात्मसात्कर्तुं त्वत्तोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः । नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महानस्त्यस्य दोष इत्याशङ्क्य सोऽपि सत्संसर्गलाभो नीचसंगमाद्वर-मुत्कर्षावहत्वादित्याहसममिति तथाहि - भूतिं समुन्नयन्नुत्कर्षमापादयन् "लटः शतृशानचौ" - इत्यादिना शतृप्रत्ययः, पुनर्लङ्ग्रहणसामर्थ्यात्प्रथमासामानाधिकरण्यम् । महात्मभिः समं सह इत्यर्थः ।

"साकं सत्रा समं" इत्यमरः । अनार्यसंगमाद् दुर्जनसंसर्गात् । स भवतोऽप्यधिकतरगुणशालितया आत्मानं ख्यापयितुमिच्छन्सर्वैः सह सद्व्यवहारैः विमलं यशो विस्तारयति । अतो मन्ये असाधुभिः सह मैत्रीकरणात् साधुभिः सह शत्रुताकरणं वरम् येन आत्मोत्कर्षः साध्यते । प्रसादगुणोऽत्र ।

कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥१/९॥

जितकामक्रोधादिषड्रिपुणा साधारणपुरुषैः दुर्बोधां मनूपदिष्टां राज्यपालनपद्धतिं अवलम्बितुमिच्छुना दुर्योधनेन अनलसेन सता रात्रौ च दिने च अस्यां वेलायामिदं कर्म कर्तव्यमिति समयविभागं कृत्वा नीत्या नीतिशास्त्रनुसारेण पुरुषकर्म विस्तार्यते, स दुर्योधनः कामक्रोधादिकं विजित्य अनलसः सन् अहोरात्रयोर्मध्ये अस्यां वेलायामिदं कर्तव्यमिति कार्याणां समयविभागं कृत्वा मानवनीतिमनुसृज्य सर्वाणि कर्माणि करोति । प्रसादगुणोऽत्र ।

सखीनिव प्रीतियुजोऽनुजीविनः समानमानान्सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥१/१०॥

निरहङ्कारः दुर्योधनः सर्वदा अकपटम् भृत्यान् प्रणयभाजनानि सखीन् इव, सुहृदः च भ्रात्रादिभिः तुल्यसत्कारान्, बन्धुसमूहं कृताधिपत्या इव, लोकस्येति शेषः । दुर्योधनः सर्वेषामनुरागसञ्चयार्थं सर्वथा निरभिमानः अकपटश्च सन् भृत्यैः सह मित्रवद् व्यवहरति मित्राणि सोदरादीनिवदाद्रियते, सोदरादींश्चैवं ज्ञापयति यद् राज्येऽस्मिन् वस्तुतो भवतामेवाधिपत्यं, भवत्प्रतिनिधिना च सता मया राजकार्यं क्रियत इति । प्रसादगुणोऽत्र ।

असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान् न बाधतेऽस्य त्रिगणः परस्परम् ॥१/११॥

यथायथं विभज्य धर्म्मार्थकामरूपः त्रिवर्गः मिश्रीकृत्य सेव्य इत्यर्थः, इयता कालेन धर्म्मः सेव्यः, इयता कालेनार्थः, इयता कालेन कामश्चेति सर्वेषां समयविभागं कृत्वासमपक्षपातया, समः समानः, पक्षपातः, आसक्तिविशेषो यस्यां तथाभूतया अनुरागेण प्रत्येकं प्रति तुल्यसमादरेण असक्तम् आराधयतः अस्य त्रिगणः गुणानुरागात् मैत्रीम् - धर्मं सेवमानस्य अर्थे कामे च आसक्तिर्न जायते, अर्थं सेवमानस्य न धर्मे न कामे, कामं सेवमानस्य न धर्म्मे न चार्थे इतीत्थं परस्परं शत्रुतामापद्यमानोऽपि मित्रत्वम्, प्राप्तवान्, इव परस्परं न बाधते न पीडयति - परस्पराविमर्शेन वर्द्धत इत्यर्थः । स दुर्योधनः अनासक्तः सन्नपि अवश्यकर्तव्यतया धर्म्ममर्थं कार्यं च कालविभागेन व्यवस्थाप्य सादरं सेवतोऽतोऽस्य त्रिवर्गोऽपि परस्परानुपमर्देन सततं वर्द्धत एव । प्रसादगुणोऽत्र ।

निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥१/१२॥

दुर्योधनस्य निर्बाधम्, अविच्छेद्यं सन्धिः दानरहितं न भवति - स येन सह सन्धिं करोति तस्मै धनमपि ददातीत्यर्थः प्रचुरं समादरं परित्यज्य न प्रवर्तते, प्रचुरमपि धनं समादरपूर्वकमेवासौ ददाति इत्यर्थः । विशिष्टः समादरः गुणानुसारेण गुणवत्स्वेव तस्य समादरपूर्वकं प्रभूतदानं दृश्यत इत्यर्थः । साम दानं भेदो दण्डश्चतुर्षु उपायेषु असौ विविच्य येन सह सन्धिं करोति तस्मै धनमपि ददाति । स यदि गुणवान् भवति तदा सत्कारपूर्वकं प्रभूतं धनं ददाति । प्रसादगुणोऽत्र ।

वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥१/१३॥

जितेन्द्रियः दुर्योधनः धनानि इच्छन्, न दण्डलभ्यधनलोभेन इत्यर्थः न क्रोधेन, स्नेहमात्सर्यादिहेतुहीनः सन् स्वयं राज्ञो मम धर्म एवायम् एतावन्मात्रं बुद्ध्वा गुरूपदिष्टेन दण्डेन रिपौ सुतेऽपि वा धर्मविप्लवं निहन्ति । स दुर्योधनः लोभक्रोधस्नेहमात्सर्यादीनि परित्यज्य प्रधानामात्येन सह मन्त्रयित्वा यथाऽपराधं शत्रुं पुत्रं च यथाशास्त्र दण्डयति । प्रसादगुणोऽत्र ।

विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥१/१४॥

सः सर्वतः आत्मीयान् जनान् रक्षाकान् कृत्वा, नियुज्य तेषु अविश्वस्तः सन्नपि विश्व-स्तवन्मुखभावादिकम् इङ्गितम् । प्राप्नोति, प्रकाशयतीत्यर्थः युद्धादिकर्मणाम् अवसानेषु जयादिफलप्राप्तिषु च अनुजीविसात्कृताः सम्पदः दुर्योधनस्य मर्यादाभिज्ञतां सूचयन्ति । स दुर्योधनः आत्मीयान् जनान् राज्यरक्षाकर्मणिनियुज्य तेषु सम्पूर्णं विश्वासमकृत्वा सुगुप्तं तेषां कार्याणि पर्यालोचयन्नपि बाह्याकारैः विश्वासं प्रदर्शयति । कार्यावसाने जयलब्धद्रव्यजातैः पुरस्कारप्रदानेन वा तेषु कृतज्ञतां च प्रकाशयति । प्रसादगुणोऽत्र ।

अनारतं तेन पदेषु लम्भिता विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायतीरुपेत्य सङ्घर्षमिवार्थसम्पदः ॥१/१५॥

दुर्योधनेन स्थानेषु, योग्यपात्रेषु विविच्य पदं प्रापिताः प्रयुक्ताः सम्यक् यथाशास्त्रं विनियोगः प्रयोग एव सत्क्रिया सत्कारः येषां तथाविधाः सामदानभेददण्डाख्याः परस्परस्पर्द्धाम् प्राप्य इव उपचितोत्तरकालाः चिरस्थिरा धनसम्पत्तीः सततं प्रसुवते । समानैः सह सन्धिः कर्तव्यः, वलवत्तेरभ्यो दानं कर्तव्यं, संहताः शत्रवो भेत्तव्याः हीनबलैः सह विग्रहः कार्य इति नीतिशास्त्रानुसारेण विविच्य विहितैः समासाधुपायैः हेतुभिः सः अनपायनीः अर्थसम्पत्तीः लभते । प्रसादगुणोऽत्र ।

अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां भृशं नृपोपायनदन्तिनां मदः ॥१/१६॥

अयुग्मच्छदमन्धिः, सप्तपर्णकुसुमगन्धिः, नृपाणां राज्ञाम् उपायनानि उपाहारभूताः, ये दन्तिनः गजाः तेषां मदः अनेकराजन्यथाश्वसंकुलम् अनेके बहवो राजन्याः क्षत्रियाः तेषां रथाश्वेन रथैरश्वैश्च संकुलं व्याप्तं सभामण्डपं प्राङ्गणम् अत्यन्तम् पङ्किलतां प्रापयति । प्रत्यहं बहवो राजानो बहून् मदमत्तान् गजान् तस्मै उपहरन्ति, येषां मदजलेन तस्य सभागृहाङ्गणमार्द्रतामापद्यते ॥ प्रसादगुणोऽत्र ।

सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसंपदः ।
वितन्वतिक्षेममदेवमातृकाश्चिरायतस्मिन्कुरवश्चकासते ॥१/१७॥

तस्मिन्, दुर्योधने कूपकुल्यादिपूर्तकर्म्मविधानरूपं शुभं कुर्वति सति वृष्टिजलनिरपेक्षाः कुरुदेशाः कृषकैः अक्लेशेन अत एव कर्षणं विनैव फलवतीरिव सस्यसमृद्धीः धारयन्तः सन्तः चिरं कालं व्याप्य, सर्वदेव शोभन्ते । प्रसादगुणोऽत्र ।

—x—

परिशिष्टम् [८]

पूर्वग्रन्थैः सह किरातस्य तुलना

१. किरातस्य ३, २६ तमे श्लोके 'तत्त्वेषु' इति पदेन सांख्यसंमतानि २४ तत्त्वानि अभिप्रेतानि । किञ्च, तत्कालीनी अर्जुनस्य स्थितिः 'ऋतम्भरा तत्प्रज्ञा' (योगदर्शनम् समाधिपादः ४८) सूत्रेण सह समाना

२. ● क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः - रघुवंश २-५३
तुला - स क्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः - कि. ३-४८
● भिन्नरुचिर्हि लोकः - रघु ६-३० तुला - इति स्थितायां प्रतिपुरुषं रुचौ..... कि. १४-५
● पूर्वप्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी ।
तुरङ्गमस्कन्धनिषण्णदेहं प्रत्याश्वसन्तं रिपुमाचकाङ्क्ष ॥ रघु. ७-४७
तुला - द्विषां क्षतीर्याः प्रथमे शिलीमुखा विभिद्य देहावरणानि चक्रिरे ।
न तासु पेते विशिखैः पुनर्मुनेररुन्तुदत्वं महतां ह्यगोचरः ॥ कि.१४-५५
● रघुवंशे द्वितीये सर्गे यदा सिंहः गवामुपरि आक्रमणं करोति तदा दीलीपस्य बाणाकर्षण समये हस्तवर्णनं (२-२१) किराते च किरातार्जुनयोः युद्धे अर्जुनस्य अङ्गुल्याः वर्णनं (१७-३६,३७) समानम् अपि किञ्च, किराते किञ्चिद् वैशिष्ट्यम् अपि अस्ति ।

३. अश्वघोषस्य बुद्धचरितस्य त्रयोदशः सर्गः किरातस्य च ७ तः १० तमाः सर्गाः वर्णनदृष्ट्या विषयनिवेशदृष्ट्या च समानौ ।

४. निर्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम्-मुद्राराक्षस २-२८
तुला - व्रताभिरक्षा हि सतामलंक्रिया - कि. १४-१४
सद्यः क्रीडारसच्छेदं प्राकृतोऽपि न मर्षयेत् । किमु लोकाधिकं धाम बिभ्राणः पृथिवीपतिः ॥ मुद्रा. ४-१०
तुला - सहते न जनोऽप्यधःक्रियां किमु लोकाधिक धाम राजकम् । कि. २-४७

५. कुसुमस्तबकस्येव द्वे वृत्ती तु मनस्विनः । मूर्ध्नि वा सर्वलोकस्य विशीर्येत वनेऽथवा ॥
नीतिशतकम् १०५
तुला - विच्छिन्नाभ्रविलायं वा विलीये नगमूर्द्धनि । आराध्य वा सहस्राक्षमयशःशल्यमुद्धरे ॥
कि.११-७९

परिशिष्टम् [९]

अर्थशास्त्रेण सह किरातस्य तुलना

- नर्मदा रावल

प्रथमः सर्गः

	किरातार्जुनीयम्		अर्थशास्त्रम्
१.	श्रियः कुरूणामधिपस्य पालनीं, प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् । स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥ (१-१)	१.	वने वनचराः कार्याः श्रमणाटविकादयः । परप्रवृत्तिज्ञानार्थाः शीघ्राश्चारपरम्पराः ॥ (१.८.१२.१६)
२.	कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः । न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥ (१.२)	२.	पृष्टः प्रियहितं ब्रूयान्न ब्रूयादहितं प्रियम् । अप्रियं वा हितं ब्रूयाच्छृण्वतोऽनुमतो ॥ (५.९२.४.६)
३.	द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञाम-धिगम्य भूभृतः । स सौष्ठवौदार्य विशेषशालिनीं विनिश्चितार्थमिति वाचमाददे ॥ (१.३)	३.	अर्थक्रमः, सम्बन्धः, परिपूर्णता, माधुर्यमौदार्यं, स्पष्टत्वम् इति लेखसम्पत् ॥ (२.२६.१०)
	क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः । अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥ (१.४)		तं ब्रूयात् दूतमुखा वै राजानस्त्वं चान्ये च । तस्मादुद्यतेष्वपि शस्त्रेषु यथोक्तं वक्तारः । तेषामन्तावसायिनोऽप्यवध्याः, किमङ्ग पुनर्ब्राह्मणाः ॥ (१.१२.१६.२)
४.	किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः । सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः ॥ (१.५)	४.	सहायसाध्यं राजत्वं चक्रमेकं न वर्तते । कुर्वीत सचिवांस्तस्मात्तेषां च शृणुयान्मतम् ॥ (१.३.७.६)
५.	कृतारिषड्वर्गजयेन मानवीमगम्यरूपां पदवीं प्रपित्सुना । विभज्य नक्तन्दिवमस्ततन्द्रिणा वितन्यते तेन नयेन पौरुषम् ॥ (१.९)	५.	राजानमुत्तिष्ठमानमनूतिष्ठन्ते भृत्याः । प्रमाद्यन्त-मनुप्रमाद्यन्ति । ...तस्मादुत्थानमात्मनः कुर्वीत । नालिकाभिरहरष्टधा रात्रिं च विभजेत् । (१.१६.१९.१) आत्म बलानुकूल्येन वा निशाहर्भागान् प्रविभज्य कार्याणि सेवेत । (१.१६.१९.४)
६.	सखीनिव प्रीतियुजोऽनुजीविनः समानमानान् सुहृदश्च बन्धुभिः । न सन्ततं दर्शयते गतस्मयः कृताधिपत्यामिव साधु बन्धुताम् ॥ (१.१०)	६.	वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुरुत्थानेन योगक्षेम साधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम् ॥ (१.३.७.१)

किरातार्जुनीयम्	अर्थशास्त्र
७. असक्तमाराधयतो यथायथं विभज्य भक्त्या समपक्षपातया । गुणानुरागादिव सख्यमीदिवान् न बाधतेऽस्य त्रिगणः परस्परम् ॥ (१.११)	७. धर्मार्थाविरोधेन कामं सेवेत । न निःसुखं स्यात् । समं वा त्रिवर्गमन्योन्यानुबन्धम् । (१.३.७.३) पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम् ।
८. निरत्ययं साम न दानवर्जितं न भूरिदानं विरहस्य सत्क्रियाम् । प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥ (१.१२)	८. तुष्टानर्थमानाभ्यां पूजयेत् । अतुष्टान् सामदान-भेददण्डैः साधयेत् । (१.८.१३.९) आप्तपुरुषाधिष्ठितौ दुर्गप्रत्यन्तस्थौ वा कोशदण्डा-वकस्थौ कारयेत् ।
९. वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृतकारणः । गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥ (१.१३) विधाय रक्षान्परितः परेतरानशङ्किताकारमुपैति शङ्कितः । क्रियाऽपवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदन्ति सम्पदः ॥ (१.१४)	९. चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः । स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु ॥ (१.१.४.६) स्वपक्षे परपक्षे वा तूष्णीं दण्डं प्रयोजयेत् । आपत्यां च तदात्वे च क्षमावानविशङ्कितः ॥ (५.८९.१.२५) सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामै-दौंजयति । (१.१.४.३)
१०. अनारतं तेन पदेषु लम्भित विभज्य सम्यग्वि-नियोगसत्क्रियाः । फलन्त्युपायाः परिबृंहिता-यतीरुपेत्य सङ्घर्षमिवार्थसंपदः ॥ (१.१५) सुखेन लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसम्पदः । वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन् कुरवश्चकासति ॥ (१.१७) उदारकीर्तेरुदयं दयावतः प्रशान्तबाधं दिशतोऽ-भिरक्षया । स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता वसूप-मानस्य वसूनि मेदिनी ॥ (१.१८)	१०. वृद्धिं क्षयं च स्थानं च कर्शनोच्छेदनं तथा । सर्वोपायान्समादध्यादेतान् यश्चार्थशास्त्रवित् ॥ (७.१२६.१८) स्वधर्मकर्मानुग्रहपरिहारदानमानकर्मशिश्च प्रकृति-प्रियहितान्यनुवर्तेत । एवंविधेभ्यो पृथिवीं लभमानोऽर्थसास्त्रवित् संहितेभ्यः परेभ्यश्च विशेषमधिगच्छति ॥ (७.११५.१०) प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् । नात्पप्रियं हितं राज्ञः प्रजानां तु प्रियम् हितम् । (१.१४.१९.१०)
११. महीभृतां सच्चरितैश्चरैः क्रिया स वेद निःशेष-मशेषितक्रियाः । महोदयैतस्य हितानुबन्धिभिः प्रतीयते धातुरिवेहितं फलैः ॥ (१.२०)	११. तस्मात्स्वधर्मं भूतानां राजा न व्यभिचारयेत् । स्वधर्मं संदधानो हि प्रत्ये चेह न निन्दति ॥ व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः ।

किरातार्जुनीयम्	अर्थशास्त्र
	त्र्याभिरक्षितो लोकः प्रसीदति न सीदति ॥ (१.१.३.१०.११)
१२. स यौवराज्ये नवयौवनोद्धतं निधाय दुःशासन-मिद्धशासनः । मखेष्वखिन्नोऽनुमतः पुरोधसा धिनोति हव्येन हिरण्यरेतसम् ॥ (१.२२)	१२. युवराजे वा क्रमेण राज्यभारमारोप्य राजव्यसनं ख्यापयेत् ॥ (४.९३.६.७) ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम् । जयत्यजितमत्यन्तं शास्त्रानुगतशस्त्रितम् ॥ (१.५.९.५)
१३. तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां तत्र विनेयमुत्तरम् । परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां गिरः ॥ (१.२५)	१३. परस्यैतद् वाक्यमेष दूतधर्मः । (१.१२.१६.२)
१४. अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः । अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥ (१.३१)	१४. नेति भारद्वाजः । सत्पुरुषाचारः कोपः । वैरयातनमवज्ञावधो भीतमनुष्यता च, नित्यश्च कोपसम्बन्धः पापप्रतिषेधार्थः ।(८.१२९.३.४)
१५. न समयपरिरक्षणं क्षमं ते निकृतिपरेषु परेषु भूरिधाम्नः । अरिषु हि विजयार्थिनः क्षितीषा वदधति सोपधि सन्धिदूषणानि ॥ (१.४५)	१५. व्यसनत्वज्ञवमानालस्ययुक्तमज्ञं वा शत्रुमति-संधातुकामो देशकालकार्याणामनवस्थापनात् । 'संहितौ स्वः' इति सन्धिविश्वासेन परच्छिद्र-मासाद्य प्रहरेत् । सुमहतापि क्षयव्ययेन शत्रुविनाशोऽभ्युगन्तव्यः । (७.११७.१३.१८)
द्वितीयः सर्गः	**द्वितीयः सर्गः**
१६. चतसृष्वपि ते विवेकिनी नृप ! विद्यासु निरूढिमागता । कथमेत्य मतिर्विपर्ययं करिणी पङ्कमिवावसीदति । (२.६)	१६. चतस्त्र एव विद्याः इति कौटिल्यः । ताभिर्धर्मार्थौ यद्विद्यात्तद्विद्यानां विद्यात्वम् ॥ (१.१.१.५)
१७. द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः । सुमहानपि भूतिमिच्छता फलसम्पत्प्रवणः परिक्षयः ॥ (२.८)	१७. परकर्मोदयो नेतुः क्षयो वृद्धिविपर्यये । तुल्ये कर्मपथे स्थानं ज्ञेयं स्वं विजिगीषुणा ॥ (७.११६.१२.२३)
१८. अचिरेण परस्य भूयसी विपरीता विगणय्य चात्मनः । क्षययुक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ॥ (२.९)	१८. क्षिप्रमपो लाभश्चिरान्महानिति वा । क्षिप्रमल्पो लाभः कार्यदेश कालसंवादकः श्रेयान् इति आचार्याः । नेति कौटिल्यः चिरादविनिपाती बीजसधर्मा महान् लाभः श्रेयान् विपर्यये पूर्वः ॥

किरातार्जुनीयम्	अर्थशास्त्र
	(७.११५.९.३१)
१९. क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये। प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ (२.११)	१९. पूज्यपूजने दूष्यावग्रहे च नित्ययुक्तस्तिष्ठति। स्वामी च सम्पन्नः स्वसम्पद्भिः प्रकृतीः सम्पादयति। स्वयं यच्छीलस्तच्छीलाः प्रकृतयो भवन्ति उत्थाने प्रमादे च तदायत्तत्वात् ॥ (८.१२७.१.६)
२०. प्रभवः खलु कोशदण्डयोः कृतपञ्चाङ्गनिर्णयो नयः। स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते ॥ (२.१२)	२०. कर्मणामारम्भोपायः पुरुषद्रव्यसंपत् देशकाल-विभागो विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः। (१.११.१५.११)
२१. तदलं प्रतिपक्षमुन्नतेरवलम्ब्य व्यवसायवन्ध्य-ताम्। निवसन्ति पराक्रमाश्रया न विषादेन समं समृद्धयः ॥ (२.१५)	२१. तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम्। अर्थस्य मूलमुत्थानमनर्थस्य विपर्ययः ॥ अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च। प्राप्यते फलमुत्था-नाल्लभते चार्थसम्पदम् ॥ (१.१४.१८.११.१२) नक्षत्रतिपृच्छन्तं बालमर्थोऽतिवर्तते। अर्थो ह्यर्थस्य नक्षत्रं किं करिष्यन्ति तारकाः। नाधनाः प्राप्नु-वन्त्यर्थान्नराः यत्नशतैरपि। अर्थैरर्थाः प्रबध्यन्ते गजाः प्रतिगजैरिव ॥ (९.१४२.४.१८.१९)
२२. कुरु तन्मतिमेव विक्रमे नृप! निर्धूय तमः प्रमादजम्। ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः ॥ (२.२२)	२२. दैवप्रमाणो मानुषहीनो निरारम्भो विपन्नकर्मारम्भो वावसीदति। (७.११६.११.२१)
२३. सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ (२.३०)	२३. यत्किञ्चनकारी न किञ्चिदासादयति। पापिष्ठतमो भवति। (७.११६.११.२२) यथा छिद्रं तथा विनाशमप्यासादयेत् इति कौटिल्यः ॥ (७.११६.११.२४)
२४. अभिवर्षति योऽनुपालयन्विधिबीजानि विवेक-वारिणा। स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति ॥ (२.३१) शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्य-लंक्रिया। प्रशमाभरणं पराक्रमः स नयापादित-सिद्धिभूषणः ॥ (२.३२)	२४. आत्मवांस्वल्पदेशोऽपि युक्तः प्रकृतिसम्पदा। नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते ॥ (६.९६.१.१६) विद्याविनीतो राजा हि प्रजानां विनये रतः। अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः ॥ (१.२.४.८)

किरातार्जुनीयम्	अर्थशास्त्र
२५. मतिभेदतमस्तिरोहिते गहने कृत्यविधौ विवेकिनाम्। सुकृतः परिशुद्ध आगमः कुरुते दीप इवार्थदर्शनम्॥ (२.३३)	२५. प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्। आश्रयः सर्वधर्माणां राश्वदान्वीक्षिकी मता॥ (१.१.१.७)
२६. स्पृहणीविगुणैर्महात्मभिश्चरिते वर्त्मनि यच्छतां मनः। विधिहेतुरहेतुरागसां विनिपातोऽपि समः समुन्नतेः॥ (२.३४) शिवमौपायिकं गरीयसीं फलनिष्पत्तिमदूषितायतिम्। विगणय्य नयन्ति पौरुषं विजितक्रोधरया जिगीषवः॥ (२.३५) अपनेयमुदेतुमिच्छता तिमिरं रोषमयं धिया पुरः। अविभिद्य निशाकृतं तमः प्रभया नांशुमताऽप्युदीयते॥ (२.३६) बलवानपि कोपजन्मनस्तमसो नाभिभवं रुणद्धि यः। क्षयपक्ष इवैन्दवीः कलाः सकला हन्ति स शक्तिसम्पदः॥ (२.३७)	२६. धर्ममूलत्वात्कामफलत्वाच्चार्थस्य धर्मार्थकामानुबन्धा याऽर्थस्य सिद्धिः सा सर्वार्थसिद्धिः॥ (९.१४६.७.५२) कामादिरुत्सेकः स्वाः प्रकृतीः कोपयति अपनदो बाहयाः। स्वजनविकारः कोपः परवृद्धिहेतिष्वापदर्थोऽनर्थः॥ (९.१४५.७.१) वृद्धिं क्षयं च स्थानं च कर्शनोच्छेदनं तथा। सर्वोपायान्समादध्यादेतान् पश्चार्थशास्त्रवित्। एवमन्योन्यसंचारं षाड्गुण्यं योऽनुपश्यति। स बुद्धिनिर्गलैर्बद्धैरिष्टं क्रीडति पार्थिवैः॥ (७.१२६.१८) तस्मात्कोपं च कामं च व्यसनारम्भमात्मवान्। परित्यजेन्मूलहरं वृद्धसेवी जितेन्द्रियः॥ (८.१२९.३.३) सर्वत्र हि कोपश्चरति प्रायशश्च कोपवशा राजानः प्रकृतिकोपैर्हताः शृयन्ते......॥ (८.१२९.३.३)
२७. क्व चिराग परिग्रहः श्रियां क्व च दुष्टेन्द्रियवाजिवश्यता। शरदभ्रचलाश्चलेन्द्रियैरसुरक्षा हि बहुच्छलाः श्रियः॥ (२.३९)	२७. कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः। तद्विरुद्धवृत्तिरवश्येन्द्रियश्चातुरन्तोऽपि राजा सद्यो विनश्यति। (१.३.६.२)
२८. श्रुतमप्यधिगम्य ये रिपून विनयन्ते न शरीरजन्मनः। जनयत्यचिराय सम्पदामयशस्ते खलु चापलाश्रयम्॥ (२.४१) अतिपातितकालसाधना स्वशरीरेन्द्रियवर्गतापनी। जनवन्न भवन्तमक्षमा नयसिद्धैरपनेतुमर्हति॥ (२.४२.)	२८. दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद् वानप्रस्थपरिव्राजकानपि कोपयति किमङ्ग पुनर्गृहस्थान्। (१.१.४.५) तस्मादरिषड्वर्ग त्यागेनेन्द्रियजयं कुर्वीत। (१.३.७.१) द्वेष्यता शत्रुवेदनं दुःखासङ्गश्च कोपः। परिभवो दुव्यनाशः। परिभूतः स्वैः परैश्चावगृहयन्ते, द्वेष्यः समुच्छिद्यत इति॥ (८.१२९.३.५.६)

किरातार्जुनीयम्	अर्थशास्त्र
२९. उपकारकमायतेर्भृशं प्रसवः कर्मफलस्य भूरिणः । अनपायि निर्बर्हणं द्विषां न तितिक्षासममस्ति साधनम् ॥ (२.४३)	२९. कर्मफलभोगानां क्षेमाराधनः शमः । (६.९७.२.२)
३०. उपजापसहान्विलङ्घयन् स विधाता नृपतीन्मदोद्धतः । सहते न जनोऽप्यधः क्रियां किमु लोकाधिकधाम राजकम् ॥ (२.४७)	३०. नवस्तु राजा बलावर्जितं ममेदं राज्यम् इति यथेष्टमनवग्रहश्चरति । सामुत्थायिकैरवगृहीतो वा राज्योपघातं मर्षयति प्रकृतिष्वरूढःसुखः समुच्छेतुं भवति ॥ (८.१२८.२.८) बलवन्तमन्यायवृत्तिमभियुक्तं प्रकृतयो नानुगृह्णन्ति, निष्पायन्तयमित्रं वास्य भजन्ते ।(७.१०८.५.५) [अत्र या अधिकरणादिसंख्या दत्ता सा टी. गणपतिशास्त्रीसंपादितायाः आवृत्तेः अनुसारेण ज्ञेया]

परिशिष्टम् [१०]

परग्रन्थेषु किरातस्य छाया

१. शिशुपालवधे कृतं किरातकाव्यस्य अनुकरणम्।

● स्रोतः महाभारतम्। ● 'श्रियः' शब्देन आरम्भः। ● प्रत्येकस्मिन्सर्गान्ते 'श्री' शब्दस्य स्थापनम्। ● दूतसंदेशेन काव्यारम्भः। ● किराते दूतवाक्यानन्तरं द्रौपद्यादीनां परामर्शः शिशुपालवधे बलरामादीनाम्। ● कि. युधिष्ठिरः शान्तमार्गपथिकः शि. उद्धवः तादृशः। ● कि. व्यासप्रेरणया अर्जुनस्य तपस्यार्थं प्रस्थानम्, शि. नारदप्रेरणया कृष्णस्य प्रस्थानम्। ● कि. अर्जुनस्य इन्द्रकीलपर्वते गमनम्, शि. कृष्णस्य रैवतके। ● कि. पर्वतवर्णनं यमकालङ्कारबद्धं, शि. तथैव। ● अप्सरोविहारः समानः। ● किं किरातवेशधारिणा शिवेन अर्जुनस्यापमानाय दूतप्रेषणं, शि. शिशुपालेन कृष्णस्यापमानाय दूतप्रेषणम्। ● कि. दूतार्जुनयोः विवादः, शि. दूतसात्यक्योः विवादः। ● द्वयोः काव्ययोः युद्धवर्णनं चित्रालंकारचित्रितम्। ● कि. १-५७ - शि. १-१२, १९ ● कि. २-३६ - शि. २-५२ ● कि. २-१ - शि. २-६९ ● कि. २-१८ - शि. १५-१। एतासु कारिकासु समानता।

२. नैषधे कृतं किरातस्यानुकरणम्।

- इच्छतां सह वधूभिरभेदं....लङ्घ्यते न खलु कालनियोगः। कि. ९-१३
  अपि विरहमनिष्टमाचरन्ता...विधिवशचेतनचेष्टितानुमाने। नै. २१-१३३
- व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः। कि. १-३०
  आर्जवं हि कुटिलेषु न नीतिः। नै. ५-१०३
- वरं विरोधोऽपि समं महात्मभिः। कि. १-८ एनम् अर्थान्तरन्यासम् आधारीकृत्य रचिता उपमा-
  एतत्कुचस्पर्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम्।
  तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः॥ नै. ७-७५

३. उपर्युक्तादेव वचनात्प्रेरणां प्राप्य महिमभट्टसदृशः अभिमानी साहित्यालोचकः आनन्दवर्धनस्य आलोचनाय प्रवृत्तः। शब्दाः एवं सन्ति-नियतं यशसे प्रपत्स्यते यन्महता संस्तव एव गौरवाय। व्यक्तिविवेकः १-३

४. क्रियासु युक्तैर्नृप चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः। कि. १-४
कर्तव्येषु नियुक्तैरनुचरैर्न वञ्चनीयाः स्वामिनः। उपमितिभवप्रपञ्चाकथा तृतीयप्रस्तावः
हितं मनोहारि च दुर्लभं वचः। कि. १-३
यथार्थं मनोहरं च दुर्लभं वचनम्। उपमितिभवप्रपञ्चाकथा तृतीय प्रस्तावः

५. हरति मनो मधुरा हि यौवनश्रीः। कि. १०-१७
एषा उक्तिः द्विवारं राजशेखरेण कर्पूरमञ्जर्यां वर्णिता। तथाहि इह यद्यपि कमिनीनां सौन्दर्यं धारयत्यवयवानां श्रीः। अधिदेवतेव निवसति तथापि खलु तारुण्ये लक्ष्मीः॥२-४८॥ हृदयहरणयन्त्रं यौवनं कामिनीनां जयति मदनकाण्डः षष्ठको वर्द्धकश्च॥३-१८॥

परिशिष्टम् [११]

अलङ्कारशास्त्रेषु किरातकाव्यस्योदाहरणानि

ग्रन्थनाम	ग्रन्थकारः	प्रकरणम्	किरातकारिका
काव्यलङ्कारसूत्रम्	वामनः	अर्थान्तरन्यास	प्रियेण संग्रथ्य ८-३७
ध्वन्यालोकः	आनन्दवर्धनः	तृतीयउद्योत	प्रयच्छतोच्चैः ८-१४
व्यक्तिविवेकः	महिमभट्टः	प्रथमः विमर्शः	द्विषतामुदय २-८
काव्यप्रकाशः	मम्मटः	अर्थान्तरन्यास	प्रियेण संग्रथ्य ८-३७
अलंकारसर्वस्वम्	रुय्यकः	अर्थान्तरन्यास	सहसा विदधीत २-३०
सरस्वतीकण्ठाभरणम्	भोजः	अर्थान्तरन्यास	प्रियेण संग्रथ्य ८-३७
साहित्यदर्पणम्	विश्वनाथः	अर्थान्तरन्यास	सहसा विदधीत २-३०
अलङ्कारमहोदधिः	श्रीनरेन्द्रप्रभसूरिः	विविधस्थानानि	१-३३, ३-१४, ३-३४, ३-४०, ५-७, ५-११, ७-३५, ८-६, ८-४५, ९-१०, ९-१५, ९-२६, १३-३१, १३-३९, १३-५९, १८-९

परिशिष्टम् [१२]
प्रदीपिकाटीकानिर्दिष्टग्रन्थ-ग्रन्थकारनामसूची

अनेकार्थः	५-४५, ८-१७
अमरः	३.४५, ७-१९,३१, ९-२९, १०-२०/३०, ११-४७, १२-४७, १६-६, १७-८
आगमः	१०-१०, १२-२२, १७-९
कामन्दक	२-११
केशव	२-२१, ८-२४, १४-३०
क्षीरस्वामी	५-२४
गणव्याख्यान	२-१७/३०
घण्टापथः	१-१, ९-६०, १०-१
चन्द्रकीर्ति	२-५२
दण्डिन्	१-१
नानार्थे	१०-३३
नीतिवाक्यामृत	१-४/२६
नैषध	८-४९
पुराणवचनात्	२-२६
भारत	१४-१०
मनुः	२-१८, १४-६
मार्तण्डः	८-१५
याज्ञवल्क्य	१०-२४
यादवः	३-१९, ८-४०, ११-३७, १३-३४
रघुवंश	८-४९
रतिरहस्यम्	९-५०
रसरत्नाकर	९-७१
वजयन्ती	२-१८, १०-१
वाग्भट्टालङ्कार	२-३२, ५-२६
वात्स्यायन	९-४७
वामन	२-२७
विश्वः	२-४, ४-२०, ९-७६, १०-३५, ११-३६/५१, १२-१०, १५-१५/३८/४६, १६-१४, २६, १७-८, १८-८, ८-२२
वृत्तरत्नाकर	५-१८/२०/२१/२२/२३
शब्दार्णवः	८-३१
शाश्वत	४-६०, १०-३३, १४-५२
सज्जन	१४-२७
सामुद्रिकाः	६-१

परिशिष्टम् [१३]

प्रदीपिकाटीकागतोदाहरणसूची

(१) '॥ ॥' एतच्चिह्नेन एवं बोद्धव्यं यद् एतदुद्धरणं श्लोकरूपम्। (२) '( )' एतच्चिह्नेन एवं बोद्धव्यं यद् एतदुद्धरणं गद्यरूपम्।

परिशिष्टम् [१४]
प्रदीपिकाटीकागतव्याकरणसंदर्भाः

कारिका

१-१ 'पालनीम्' अत्र शीलेऽर्थे णिनिः 'अतीते शीले च' इत्यनेन सूत्रेण णिनिप्रत्ययः पश्चात् अण् ईप् प्रत्ययः

१-५ 'अमात्येषु' अत्र 'त्यतनौ' इत्यनेन सूत्रेण त्यप्रत्ययः ।

१-७ 'सुयोधनः' अत्र 'इषदुस्सुषल्यू' इत्यनेन सूत्रेण युप्रत्ययः पश्चात् 'युष्वोरनाकौ' इत्यनेन यु इत्यस्य अनादेशः ।

१-९ 'मानवी' अत्र 'देवतेदमर्थे' इत्यनेन सूत्रेण अण् प्रत्ययः ।

१-१० 'दर्शयते' अत्र 'अणिक्कर्मणिकर्तृणिगोस्मृतौ' इति आत्मनेपदम् ।

१-३८ अत्र स्थलीम् अकृत्रिमभूमिं 'जानपद'-(पा.४-१-४२) इत्यादिना अकुत्रिमार्थेङीप् ।

२-२१ 'धराः' अत्र 'पचिनन्दिग्रहादेरयुणिनि' इत्यनेन सूत्रेण अप्रत्ययः ।

२-३० 'वृणते' इत्यत्र 'वृङ् संभक्त्तौ' इति धातुः नात्र्यादेर्नाप्रत्ययः । ङ्कारानुबन्धादात्मनेपदमन्ते 'वृना' इति जातं पश्चात् 'नात्'इति सूत्रेण नामध्ये आकारस्य लोपः पश्चात् 'षुर्नोनेत' इति नस्य णत्वं जातं तदा 'वृणते' इति सिद्धम् ।

३-६ 'अस्मि' इत्यत्र 'अस्मि' इति अहमित्यर्थेऽव्ययम् 'विभक्तिथमन्ततसाद्याभाः' सि.१-१-३१ इति हैमसूत्रेणाव्ययसंज्ञा ।

३-५४ 'त्वाम्' अत्र 'त्वामौ' इत्यनेन सूत्रेण युष्मत् शब्दस्य अमा सह त्वादेशः ।

३-५४ परिरब्धुकामा अत्र 'तुं काममनसोरपि' इति मकारलोपः ।

४-३१ अभिघोषम् अत्र 'अभिप्रती आभिमुख्ये' इति अव्ययीभावः समासः ।

४-३८ 'सीरपाणेः' अत्र 'नेन्द्वादिभ्यश्च' इत्यनेन सूत्रेण सप्तम्याः पूर्वनिपातो न । सर्गान्तत्वात् ।

५-९ कदम्बकाः अत्र 'के ने ये का' इत्यनेन सूत्रेण स्वार्थे कप्रत्ययः ।

५-३१ हंसश्येनी अत्र 'वर्णाइनुदात्तोप० धात्तो न[ः]' इति श्वेतशब्दात् ङीप् ।

५-४३ शनकैः अत्र 'अव्यया सर्वाद्रेष्ठेरकूवा' इत्यनेन सूत्रेण अकप्रत्ययः ।

५-४३ भिदाम् अत्र 'भिदि विदारणे' भिद् धातुः 'षिद् भिदामङ्' इत्यनेन अङ्प्रत्ययः ।

६-३ सुखयन्ति अत्र 'डिडित्करणे' इत्यनेन डिप्रत्ययः ।

६-१३ स्मारितः अत्र 'स्मृतेर्धातोः स्मृतौ च कार्ये' इत्यनेन सूत्रेण कर्मणि षष्ठी ।

६-२७ दयालुना अत्र 'शीङ्श्रद्धा....' इत्यनेन सूत्रेण आलुप्रत्ययः । नामत्वात् पश्चात् तृतीयैकवचनं 'टानास्त्रियाम्' इत्यनेन टाना ।

६-२९ वनचराः 'अलुक् क्वचित्' इति क्वचित् ग्रहणात् विभक्तेर्लुक् ।
११-५० सत्यङ्कारम् अत्र 'कारे सत्यागदस्य' इति मुमागमः ।
११-५३ प्रियगुणो वा 'प्रियस्य' इति परनिपातः ।
११-७८ पलायन्ते अत्र 'उपसर्गस्यायतौ' इति रेफस्य लत्वम् ।
१३-१७ तिसृणाम् इत्यत्र 'न तिसृचतसृछन्दसि वा' इत्यनेन दीर्घत्वप्रतिषेधः ।
१३-१८ प्रकृतिप्रत्यययोः अत्र 'प्रकृतिप्रत्ययौ मिलितौ सन्तौ सहार्थं ब्रूवाते' इति वचनात् ।
१४-३२ आकुलाकुलम् अत्र 'प्रकारे गुणवचनस्य' [पा. ८/१/१२] इति द्विर्भावः ।
१५-५ साससूः अत्र 'षू प्रेरणे' इति धातोः 'सत्सूद्विष' इत्यादिना क्विप् ।
१५-५ साससूः, सासः इत्यादि सर्वत्र 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः ।
१५-५ अयेयाः अत्र 'या प्रापणे' 'य एच्चातः' इत्यनेन यप्रत्ययः ।
१५-५ अययः अत्र 'आतो०' इति ऽप्रत्ययः ।
१५-२५ निस्वा अत्र 'अन्येभ्योऽपि दृश्यते' इति क्वनिप् प्रत्ययः ।
१५-३८ चारचञ्चुः अत्र 'तेन वित्ते चञ्चुप् चणपौ' इति चञ्चुप्रत्ययः ।
१५-३८ चञ्चुरः अत्र 'चरफलयोश्च' इति नुमागमः । 'यङ्गोचि च' इति यडो लुक् ।
१५-४८ प्रजिघाय अत्र 'हि गतौ' इति धातोर्लिट् ? हरेङिइति कुत्वम् ।
१५-५० अर्जुनबाणपूगाः अत्र 'विभाषा वृक्षमृगतृणधान्यम्' इति एकवद्भावः ।
१५-५३ वितायमानम् अत्र 'तनोतेर्यकि' इति वैकल्पिक आकारादेशः ।
१६-१६ व्याददाति अत्र 'अडोदोऽनास्यविहरणे' इति आत्मनेपदनिषेधात् परस्मैपदम् ।

परिशिष्टम् [१५]

प्रदीपिकाटीकागत 'लोके' इति उद्धरणानि

कारिका

५-१४ 'संभरावतो छै' इति लोके
५-३८ 'पन्नाम्' इति लोके
६-११ 'मयूरपिछना चान्दलानेंसरिखु' इति लोके
७-२७ 'डेरा' इति लोके
७-३० 'पाखर' इति लोके
७-३१ 'साङ्कल' इति लोके
१०-४ 'नेहकारदीनाम्' इति लोके
१०-३१ 'नेपुर' इति लोके
१७-४२ 'पाठ्रह्रिवो' 'विलाधा' इति लोके
१८-६ 'लथडीयु' इति लोके
१८-४४ 'पूढीसै बैजेहनै' इति प्राकृतम्

परिशिष्टम् [१६]
प्रदीपिकाटीकानिर्दिष्टपाठान्तराणि

कारिका	स्वीकृतपाठः	पाठान्तरम्
१-१	पालनीम्	पालिनीम्
१-२५	तन्वताम्	चिन्वताम्
१-२५	धियः	गिरः
१-३६	धृतिसंयमौ	धृतसंयमौ
१-४६	शिथलवसुम	शिथिलबलम्
२-५२	मतिमान्	नयवान्
३-६	आसंहृते	असंसृते
४-२६	निध्रातुम्	निध्यातुम्
४-२८	वनराजयोषितः	वनराजियोषितः
४-३०	रवैः	रुतैः
५-१९	रुचिरपल्लवपुष्प-	रुचिरपल्लवपुष्प-
	लतागृहैः	लताकुलैः
५-२४	जगताम्	जगतः
५-३८	परिसरविषयेषु	परिसरविषमेषु
६-१७	पुष्पभरनम्रशिखैः	पुष्पफलनम्रशिखैः
६-२९	आहितविषादधियः	आस्थितविषादधियः
६-३८	अवगम्य	उपलभ्य
७-१०	विमानपङ्क्तीः	विमानभित्तीः
७-१०	वप्रान्तस्खलित०	वप्राम्भस्खलन०
७-१२	विवृत्तिः	प्रवृत्तिः
७-२१	सामग्रीम्	साम्ग्रयम्
७-२५	रथाङ्गधूतम्	रथाङ्गनूनम्
७-३६	कौसुम्भम्	कौशेयम्, माञ्जिष्ठम्
८-३०	सभीतिभिः	विषादिभिः

कारिका	स्वीकृतपाठः	पाठान्तरम्
८-३२	उपप्लुताः	उपहृताः
८-३२	च्युताधिकाराः-	हृताधिकाराः
	सचिवा इव	अमात्या इव
८-४२	कृतोपकारा	कृतानुकूलया,
		कृतानुकारा
९-७	भूरुहान्	भूधरान्
९-७	अस्तशैलगहनानि	अस्तशैलगहनम्
९-१९	नालनीरज०	नीलनीरद०
९-२२	कनकटङ्कपिशङ्ग्या	कनकभङ्गपिशङ्ग्या
९-२७	समन्तात्	दिगन्तान्
९-३०	आतपे	आतपाः
९-४८	गलितनीवि	वलितनीवि
९-५०		
१०-३	विरलाववितता	अविरलवितता
१०-६	जयिनाम्	महताम्
१०-२७	विकचपलाशच-	विकचपलाशव-
	यश्रियम्	नश्रियम्
१०-३२	हसन्तीम्	वहन्तीम्
१०-४२	निहितम्	स्तिमितम्
१०-५८	अकुपितम्	प्रकुपितम्
१०-६१	अनवसितार्थ०	अवहितार्थ०
१०-६३	सावेगैः-	सोद्वेगैः
११-१५	वसने	वसते
११-३६	पाविते	प्लाविते

कारिका	स्वीकृतपाठः	पाठान्तरम्
११-३७	प्रसन्नगम्भीरम्	प्रश्रयगम्भीरम्
११-३९	अनपेक्षम्	निरपेक्षम्
१२-६	मनस्विभिः	मनस्विनाम्
१२-१८	निरीक्षितुम्	निचायितुम्
१२-२२	अवसक्तवितत-वपुषा	अवशक्तिवितत-वपुषा
१२-२३	पश्चात् क्षेपके-धवलायितैः	प्रबलायतैः
१३-४	वीतदयाम्	वीतभयाम्
१३-२४	वनस्थैः	नभस्थैः
१३-४५	अपदे	अपथे
१३-५९	न याचसं	न नाथसे
१४-२	सलेशम्	अशेषम्
१४-१०	शैलजनायुधे	शैलजनाशुगे
१४-२८	जेतुः	जैत्रः
१४-३२	सुगेषु	सुखेषु
१४-३५	विद्विषां	भूभृताम्
१४-३६	अपूर्णप्रतिकारपेलवे	अपूर्णप्रतिकायपेलवे
१४-४२	महाचलम्	तपात्यये
१४-४६	उन्नदितेषु	उन्नमितेन
१४-४८	विदुषेव	सुहृदेव

कारिका	स्वीकृतपाठः	पाठान्तरम्
१४-५५	अरुन्तुदत्वम्	अरुन्तुदत्वे
१५-२६	विकृष्ट	विक्रुष्ट
१५-५१	बहुधा निपातिनः	बहुधाशुपातिनः
१६-१०	विदारयद्भिः	विदूरयद्भिः
१६-२६	निशातमिस्राम्	महातमिस्राम्
१६-३३	लोचनपङ्कजानि	पङ्कजलोचनानि
१६-४१	भोगिबलैः	भोगिकुलैः
१६-४८	क्षयम्	शमम्
१६-६०	रयैः	चयैः
१६-६२	मुक्ता	युक्ता
१७-३	अस्खलितप्रभावः	अस्खलितस्वभावः
१७-३०	फलस्य	कृतस्य
१७-३१	शङ्काकुलायाः	समाकुलायाः
१७-४३	गुरुभिः	बहुभिः
१७-५४	महोपवासैः	जयोपवासैः
१८-७	समभिसृत्यभृशं जवमोजसा	समभिलष्य भृशं जयमोजसा
१८-११	कृतभुजध्वनि वल्गु विवल्गतोः	कृतभुजध्वनिचोत्पल(त्ल्व)मानयोः
१८-४२	विरोध्य	विरुध्य

परिशिष्टम् [१७]

धर्मविजयीय-मल्लीनाथीयटीकागतकारिकाक्रमभेदः

ध.	म.	ध.	म.
१-३९	१-४०	१०-११	१०-१२
१-४०	१-३९	१०-१२	१०-११
५-१२	५-१३	१०-३३	१०-३४
५-१३	५-१२	१०-३४	१०-३३
५-३९	५-४०	१०-३७	१०-३८
५-४०	५-३९	१०-३८	१०-३७
७-१०	७-११	क्षेपकः	क्षेपकः
७-११	७-१०	१२-२३	१२-२४
८-३२	८-३९	पश्चात्	पश्चात्
८-३३	८-३२	१३-१८	१३-१९
८-३६	८-३७	१३-१९	१३-१८
८-३७	८-३८	१३-५७	१३-५८
८-३८	८-४०	१३-५८	१३-५७
८-३९	८-४१	१८-३६	१८-२८
८-४०	८-४२	१८-२७	१८-२६

आशयसर्वस्वम्

जगति सर्वेऽपि प्राणिनः दुःखरहितं, परिपूर्णम्, अन्तरहितं च सुखं वाञ्छन्ति। अहोरात्रं याः काः अपि प्रवृत्तयः क्रियन्ते तासां सर्वासाम् अन्तिमं लक्ष्यं तु तादृशं सुखमेव। तादृशं सुखं कदा प्राप्येत ? कुत्र प्राप्येत ? कया रीत्या प्राप्येत ? इत्यस्य विचारः सर्वैः प्राज्ञैः शान्तचेतसा कर्तव्यः एव। क्रोध-मान-माया-लोभ-राग-द्वेषसदृशाः दुर्गुणाः यदि प्रबलाः भवेयुः तदा सुखं प्राप्तुं शक्यते किम् ? अत एव सर्वैः तत्त्वचिन्तकैः ऐककण्ठ्येन उद्घोषणा कृता यद् सुखप्राप्तये क्रोधादयः न्यूनीकर्तव्याः एव-नाशनीयाः एव। तेषां न्यूनीकरणेन एव-नाशनेन एव वास्तविकस्य आत्मिकसुखस्य अनुभवः भविष्यति। आत्मा, परलोकः, पुण्यं, पापं, मोक्षश्च एते पदार्थाः सर्वैः भारतीयचिन्तकैः स्वीकृताः एव। एतेषां पदार्थानां स्वरूपे मतभेदः भवतु नाम, अस्तित्वविषये तु ऐकमत्यम् एव अस्ति। अतः एव भारतीयजीवनदर्शने 'आत्मा' 'आध्यात्मिकी उन्नतिः' 'मोक्षः' इत्येतत्सर्वं केन्द्रवर्ति भवति। जैनसाहित्यस्य आगमाः, पञ्चाङ्गानि, प्रकरणानि, काव्यानि, जीवनचरित्राणि, नाट्यानि, स्तोत्राणि इत्यादि यः कोऽपि प्रकारः भवेत् तस्य सर्वस्य ध्वनिः एक एव 'आत्मा रागद्वेषौ न्यूनीकृत्य, क्रमशः सर्वथा विनाश्य च मोक्षं प्राप्नुयाद्' इति। अस्य साहित्यस्य रचयितारः जीवने मोक्षं लक्ष्यीकृत्य सर्वविधान् भोगान् त्यक्तवन्तः त्यक्तुकामाः वा आसन्। अतः एव इदं साहित्यम् अधिकृत्य, पठनं, पाठनं, विवेचनं, संशोधनं, संपादनम्, अनुवादः, संदर्भरूपेण उल्लेखः, शोधप्रबन्धनिर्माणम् इत्येतादृशं यत्किमपि भवेत् तत्सर्वम् एतत्साहित्यकर्तॄणां हृदये यद् 'आशयसर्वस्वम्' आसीत् तदेव सिद्धान्तीकृत्य कर्तुम् उचितम्। अन्यथा वयम् अस्य साहित्यस्य पठनादिषु अधिकारिणः एव न स्याम। अनधिकृतचेष्टातश्च तत्कर्तॄणां 'विश्वासघातः' भवति। विश्वासघातश्च पापानां शिरोमणिः। सुज्ञः पाठकगणः तादृशं पापं स्वशिरसि स्थापयेद् इति तु असंभावनीयप्रायम्। अतः वयं सर्वे इदं साहित्यं पठित्वा स्वशक्त्यनुसारं भोगतृष्णां न्यूनीकृत्य, अन्ते तां नाशयित्वा दुःखरहितं, परिपूर्णम् अन्तरहितं च 'आत्मिकं' सुखं प्राप्नुयाम इत्येषा एका एव सर्वदा शुभाभिलाषा।

॥ वीरशासनम् ॥